Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

SRI AUROBINDO LIBRARY
PONDICHERRY, INDIA

Fumigated AUG 1993

But thought nor word can seize eternal truth

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

श्रीमहाभारतं

॥ विराटपर्व्व ॥

॥ नमो गणेशाय ॥ नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं। देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥
॥ जनमेजय उवाच ॥ कथं विराटनगरे मम पूर्व्वपितामहाः। अज्ञातवासमुषिता दुर्य्योधनभयार्द्दिताः।
पतिव्रता महाभागा सततं ब्रह्मवादिनी। द्रौपदी च कथं ब्रह्मन्नज्ञाता दुःखिताऽवसत्।
॥ वैशम्पायन उवाच ॥ यथा विराटनगरे तव पूर्व्वपितामहाः। अज्ञातवासमुषितास्तच्छृणुष्व नराधिप।
तथा तु स वराल्लब्धा धर्म्माद्धर्म्मभृतां वरः। गत्वाश्रमं ब्राह्मणेभ्य आचख्यौ सर्व्वमेव तत्।
कथयित्वा तु तत्सर्व्वं ब्राह्मणेभ्यो युधिष्ठिरः। अरणीसहितं तस्मै ब्राह्मणाय न्यवेदयत्।
ततो युधिष्ठिरो राजा धर्म्मपुत्त्रो महामनाः। सन्निवर्त्त्यानुजान् सर्व्वानिति होवाच भारत।
द्वादशेमानि वर्षाणि राज्यविप्रोषिता वयं। त्रयोदशोऽयं सम्प्राप्तः कृच्छ्रात् परमदुर्व्वसः।
स साधु कौन्तेय इतो वासमर्ज्जुन रोचय। सम्वत्सरमिमं यत्र वसेमाविदिताः परैः।
॥ अर्ज्जुन उवाच ॥ तस्यैव वरदानेन धर्म्मस्य मनुजाधिप। अज्ञाता विचरिष्यामो नराणां नात्र संशयः।
किन्तु वासाय राष्ट्राणि कीर्त्तयिष्यामि कानिचित्। रमणीयानि गुप्तानि तेषां किञ्चित् स्म रोचय। १०
सन्ति रम्या जनपदा बह्वन्नाः परितः कुरून्। पाञ्चालाश्चेदिमत्स्याश्च शूरसेनाः पटच्चराः।
दशार्णा नवराष्ट्राश्च मल्लाः शाल्वा युगन्धराः। कुन्तिराष्ट्रञ्च विपुलं सुराष्ट्रावन्तयस्तथा।
एतेषां कतमो राजन्निवासस्तव रोचते। यत्र वत्स्यामहे राजन् सम्वत्सरमिमं वयं।
॥ युधिष्ठिर उवाच ॥ श्रुतमेतन्महाबाहो यथा स भगवान् प्रभुः। अब्रवीत् सर्व्वभूतेशस्तत्तथा न तदन्यथा।
अवश्यन्त्वेव वासार्थं रमणीयं शिवं सुखं। सम्मन्त्र्य सहितैः सर्व्वैर्व्वस्तव्यमकुतोभयैः। १५
मत्स्यो विराटो बलवानभिरक्षोऽथ पाण्डवान्। धर्म्मशीलो वदान्यश्च वृद्धश्च सततं प्रियः।
विराटनगरे तात सम्वत्सरमिमं वयं। कुर्व्वन्तस्तस्य कर्म्माणि विहरिष्याम भारत।
यानि यानि च कर्म्माणि तस्य वक्ष्यामहे वयं। आसाद्य मत्स्यं तत् कर्म्म प्रब्रूत कुरुनन्दनाः।
॥ अर्ज्जुन उवाच ॥ नरदेव कथं तस्य राष्ट्रे कर्म्म करिष्यसि। विराटनगरे साधो वत्स्यसे केन कर्म्मणा।
मृदुर्व्वदान्यो ह्रीमांश्च धार्म्मिकः सत्यसङ्गरः। राजंस्त्वमापदा क्लिष्टः किङ्करिष्यसि पाण्डव। २०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

न दुःखमुचितं किञ्चिद्राजा वेद यथा जनः । स इमामापदं प्राप्य कथं घोरान्तरिष्यसि ।
॥ युधिष्ठिर उवाच ॥ शृणुध्वं यत्करिष्यामि कर्म्म वै कुरुनन्दनाः । विराटमनुसम्प्राप्य राजानं पुरुषर्षभाः ।
सभास्तारो भविष्यामि तस्य राज्ञो महात्मनः । कङ्को नाम द्विजो भूत्वा मताक्षः प्रियदेवनः ।
वैदूर्य्यान् काञ्चनान् दान्तान् फलैर्ज्योतीरसैः सह । कृष्णाक्षाल्लोहिताक्षांश्च निर्व्वर्त्स्यामि मनोरमान् ।
विराटराजं रमयन् सामात्यं सहबान्धवं । न च मां वेत्स्यते कश्चित्तोषयिष्ये च तं नृपं । २५
आसं युधिष्ठिरस्याहं पुरा प्राणसमः सखा । इति वक्ष्यामि राजानं यदि मां सोऽनुयोक्ष्यते ।
इत्येतद्वो मया ख्यातं विहरिष्याम्यहं यथा । वृकोदर विराटे त्वं वत्स्यसे केन हेतुना ।
इति श्रीमहाभारते विराटपर्व्वणि पाण्डवप्रवेशपर्व्वणि युधिष्ठिरादिमन्त्रणे प्रथमोऽध्यायः ॥ १ ॥
॥ भीमसेन उवाच ॥ पौरोगवो ब्रुवाणोऽहं बल्लवो नाम भारत । उपस्थास्यामि राजानं विराटमिति मे मतिः ।
सूपानस्य करिष्यामि कुशलोऽस्मि महानसे । कृतपूर्व्वाणि यान्यस्य व्यञ्जनानि सुशिक्षितैः ।
तानप्यभिभविष्यामि प्रीतिं सञ्जनयन्नहं । आहरिष्यामि दारूणां निचयान्महतोऽपि च । ३०
यत्प्रेक्ष्य विपुलं कर्म्म राजा संयोक्ष्यते स मां । अमानुषाणि कुर्व्वाणस्तानि कर्म्माणि भारत ।
राज्ञस्तस्य परिप्रेष्या मंस्यन्ते मां यथा नृपं । भक्ष्यान्नरसपानानां भविष्यामि तथेश्वरः ।
द्विपा वा बलिनो राजन् वृषभा वा महाबलाः । विनिग्राह्या यदि मया निग्रहीष्यामि तानपि ।
ये च केचिन्नियोत्स्यन्ति समाजेषु नियोधकाः । तानहं निहनिष्यामि रतिं तस्य विवर्द्धयन् ।
न त्वेतान् युध्यमानान् वै हनिष्यामि कथञ्चन । अथ तान् पातयिष्यामि यथा यास्यन्ति न क्षयं । ३५
आरालिको गोविकर्त्ता सूपकर्त्ता नियोधकः । आसं युधिष्ठिरस्याहमिति वक्ष्यामि पृच्छतः ।
आत्मानमात्मना रक्षंश्चरिष्यामि विशाम्पते । इत्येतत् प्रतिजानामि विहरिष्याम्यहं यथा ।
॥ युधिष्ठिर उवाच ॥ यमग्निर्ब्राह्मणो भूत्वा समागच्छन्नृणां वरं । दिधक्षुः खाण्डवं दावं दाशार्हसहितं पुरा ।
महाबलं महाबाहुमजितं कुरुनन्दनं । सोऽयं किङ्कर्म्म कौन्तेयः करिष्यति धनञ्जयः ।
योऽयमासाद्य तं दावं तर्पयामास पावकं । विजित्यैकरथेनैव हत्वा पन्नगराक्षसान् । ४०
वासुकेः सर्पराजस्य स्वसारं हृतवांश्च यः । श्रेष्ठो यः प्रतियोधानां सोऽर्ज्जुनः किङ्करिष्यति ।
सूर्य्यः प्रतपतां श्रेष्ठो द्विपदां ब्राह्मणो वरः । आशीविषश्च सर्प्पाणामग्निस्तेजस्विनां वरः ।
आयुधानां वरं वज्रं ककुद्मी च गवां वरः । ह्रदानामुदधिः श्रेष्ठः पर्ज्जन्यो वर्षतां वरः ।
धृतराष्ट्रश्च नागानां हस्तिष्वैरावणो वरः । पुत्त्रः प्रियाणामधिको भार्य्या च सुहृदां वरा ।
यथैतानि विशिष्टानि जात्यां जात्यां वृकोदर । एवं युवा गुडाकेशः श्रेष्ठः सर्व्वधनुष्मतां । ४५
सोऽयमिन्द्रादनवरो वासुदेवान्महाद्युतिः । गाण्डीवधन्वा बीभत्सुः श्वेताश्वः किङ्करिष्यति ।
उषित्वा पञ्चवर्षाणि सहस्राक्षस्य वेश्मनि । अस्त्रयोगं समासाद्य स्ववीर्य्यान्मानुषाद्भुतं ।
दिव्यान्यस्त्राणि चाप्तानि देवरूपेण भास्वता । यं मन्ये द्वादशं रुद्रमादित्यानां त्रयोदशं । वसूनां नवमं मन्ये ग्रहाणां दशमं तथा ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यस्य बाहू समौ दीर्घौ ज्याघातकठिनत्वचौ। दक्षिणे चैव सव्ये च गवामिव वहः कृतः।
हिमवानिव शैलानां समुद्रः सरितामिव। त्रिदशानां यथा शक्रो वसूनामिव हव्यवाट्। ५०
मृगाणामिव शार्दूलो गरुडः पततामिव। वरः सन्नह्यमानानां सोऽर्ज्जुनः किङ्करिष्यति।
॥ अर्ज्जुन उवाच ॥ प्रतिज्ञां षण्डकोऽस्मीति करिष्यामि महीपते। ज्याघातौ हि महान्तौ मे संवर्त्तुं नृप दुष्करौ।
वलयैश्छादयिष्यामि बाहू किणकृताविमौ। कर्णयोः प्रतिमुच्याहं कुण्डले ज्वलनप्रभे।
पिनद्धकम्बुः पाणिभ्यां तृतीयां प्रकृतिं गतः। वेणीकृतशिरा राजन्नाम्ना चैव बृहन्नला।
पठन्नाख्यायिकाश्चैव स्त्रीभावेन पुनःपुनः। रमयिष्ये महीपालमन्यांश्चान्तः पुरे जनान्। ५५
गीतं नृत्यं विचित्रञ्च वादित्रं विविधं तथा। शिक्षयिष्याम्यहं राजन् विराटस्य पुरस्त्रियः।
प्रजानां समुदाचारं बहुकर्म्म कृतं वदन्। छादयिष्यामि कौन्तेय माययात्मानमात्मना।
युधिष्ठिरस्य गेहे वै द्रौपद्याः परिचारिका। उषिताऽस्मीति वक्ष्यामि पृष्टो राज्ञा च पाण्डव।
एतेन विधिना च्छन्नः कृतकेन यथाऽनलः। विहरिष्यामि राजेन्द्र विराटभवने सुखं।
इत्येवमुक्त्वा पुरुषप्रवीरस्तथाऽर्ज्जुनो धर्म्मभृतां वरिष्ठः। वाक्यं तथाऽसौ विरराम भूयो नृपोऽपरं भ्रातरमावभाषे। ६०

इति श्रीमहाभारते विराटपर्व्वणि पाण्डवप्रवेशपर्व्वणि युधिष्ठिरादिमन्त्रणे द्वितीयोऽध्यायः॥ २ ॥

॥ युधिष्ठिर उवाच॥ किं त्वं नकुल कुर्व्वाणस्तत्र तात चरिष्यसि। कर्म्म तत् त्वं समाचक्ष्व राज्ये तस्य महीपतेः। सुकुमारश्च शूरस्य दर्शनीयः सुखोचितः।
॥ नकुल उवाच ॥ अश्वबन्धो भविष्यामि विराटनृपतेरहं। सर्व्वथा ज्ञानसम्पन्नः कुशलः परिरक्षणे।
ग्रन्थिको नाम नाम्नाऽहं कर्म्मैतत् सुप्रियं मम। कुशलोऽस्म्यश्वशिक्षायां तथैवाश्वचिकित्सने।
प्रियाश्च सततं मेऽश्वाः कुरुराज यथा तव। ये मामामन्त्रयिष्यन्ति विराटनगरे जनाः।
तेभ्य एवं प्रवक्ष्यामि विहरिष्याम्यहं यथा। पाण्डवेन ह्यहं तात अश्वेष्वधिकृतः पुरा। विराटनगरे च्छन्नश्चरिष्यामि महीपते। ६५
॥ युधिष्ठिर उवाच ॥ सहदेव कथं तस्य समीपे विहरिष्यसि। किं वा त्वं कर्म्म कुर्व्वाणः प्रच्छन्नो विहरिष्यसि।
॥ सहदेव उवाच ॥ गोसङ्ख्याता भविष्यामि विराटस्य महीपतेः। प्रतिषेद्धा च दोग्धा च सङ्ख्याने कुशलो गवां।
तन्तिपाल इतिख्यातो नाम्नाऽहं विदितस्त्वथ। निपुनश्च चरिष्यामि व्येतु ते मानसो ज्वरः।
अहं हि सततं गोषु भवता प्रहितः पुरा। तत्र मे कौशलं सर्व्वमवबुद्धं विशाम्पते।
लक्षणञ्चरितं चापि गवां यच्चापि मङ्गलं। तत्सर्व्वं मे सुविदितमन्यच्चापि महीपते। ७०
वृषभानपि जानामि राजन् पूजितलक्षणान्। येषां मूत्रमुपाघ्राय अपि बन्ध्या प्रसूयते।
सोऽहमेवं चरिष्यामि प्रीतिरत्र हि मे सदा। न च मां वेत्स्यते कश्चित्तोषयिष्ये च पार्थिवं।
॥ युधिष्ठिर उवाच ॥ इयं हि नः प्रिया भार्य्या प्राणेभ्योऽपि गरीयसी। मातेव परिपाल्या च पूज्या ज्येष्ठेव च स्वसा।
केन स्म द्रौपदी कृष्णा कर्म्मणा विचरिष्यति। न हि किञ्चिद्विजानाति कर्म्म कर्त्तुं यथा स्त्रियः।
सुकुमारी च बाला च राजपुत्त्री यशस्विनी। पतिव्रता महाभागा कथन्तु विचरिष्यति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

माल्यगन्धानलङ्कारान् वस्त्राणि विविधानि च। एतान्येवाभिजानाति यतो जाता हि भाविनी।
॥ द्रौपद्युवाच ॥ सैरिन्ध्र्यो रक्षिता लोके भुजिष्याः सन्ति भारत। नैवमन्याः स्त्रियो यान्ति इति लोकस्य निश्चयः।
साऽहं ब्रुवाणा सैरिन्ध्री कुशला केशकर्म्मणि। युधिष्ठिरस्य गेहे वै द्रौपद्याः परिचारिका।
उषिताऽस्मीति वक्ष्यामि पृष्टा राज्ञा च भारत। आत्मगुप्ता चरिष्यामि यन्मां त्वं परिपृच्छसि।
सुदेष्णां प्रत्युपस्थास्ये राजभार्य्यां यशस्विनीं। सा रक्षिष्यति मां प्राप्तां माभूत्ते दुःखमीदृशं। ८०
॥ युधिष्ठिर उवाच ॥ कल्याणं भाषसे कृष्णे कुले जाताऽसि भाविनि। न पापमभिजानासि साध्वी साधुव्रते स्थिता।
यथा न दुर्हृदः पापा भवन्ति सुखिनः पुनः। कुर्य्यास्तथा त्वं कल्याणि लक्षयेयुर्न्न ते यथा।
इति श्रीमहाभारते विराटपर्व्वणि पाण्डवप्रवेशपर्व्वणि युधिष्ठिरादिमन्त्रणे तृतीयोऽध्यायः॥ ३ ॥
॥ युधिष्ठिर उवाच ॥ कर्म्माण्युक्तानि युष्माभिर्यानि यानि करिष्यथ। मम चापि यथा बुद्धिरुचिता विधिनिश्चयात्।
पुरोहितोऽयमस्माकमग्निहोत्राणि रक्षतु। सूतपौरोगवैः सार्द्धं द्रुपदस्य निवेशने।
इन्द्रसेनमुखाश्चेमे रथानादाय केवलान्। यान्तु द्वारवतीं शीघ्रमिति मे वर्त्तते मतिः। ८५
इमाश्च नार्य्यो द्रौपद्याः सर्व्वाश्च परिचारिकाः। पञ्चालानेव गच्छन्तु सूतपौरोगवैः सह।
सर्व्वैरपि च वक्तव्यं न प्राज्ञायन्त पाण्डवाः। गता ह्यस्मानपाकीर्य्य सर्व्वे द्वैतवनादिति।
॥ वैशम्पायन उवाच ॥ एवं तेऽन्योऽन्यमामन्त्र्य कर्म्माण्युक्त्वा पृथक्पृथक्। धौम्यमामन्त्रयामासुः स च तान्मन्त्रमब्रवीत्।
॥ धौम्य उवाच ॥ विहितं पाण्डवाः सर्व्वं ब्राह्मणेषु सुहृत्सु च। याने प्रहरणे चैव तथैवाग्निषु भारत।
त्वया रक्षा विधातव्या कृष्णायाः फाल्गुनेन च। विदितं वो यथा सर्व्वं लोकवृत्तमिदं तव। ९०
विदिते चापि वक्तव्यं सुहृद्भिरनुरागतः। एष धर्म्मश्च कामश्च अर्थश्चैव सनातनः।
अतोऽहमपि वक्ष्यामि हेतुमत्र निबोधत। हन्तेमां राजवसतिं राजपुत्रा ब्रवीम्यहं।
यथा राजकुलं प्राप्य सर्व्वान् दोषांस्तरिष्यथ। दुर्व्वसन्त्वेव कौरव्या जानता राजवेश्मनि।
अमानितैर्म्मानितैर्व्वा अज्ञातैः परिवत्सरं। ततश्चतुर्दशे वर्षे चरिष्यथ यथासुखं।
दिष्टद्वारो लभेत् द्रष्टुं रहस्येषु न विश्वसेत्। तदेवासनमन्विच्छेद्यत्र नाभिषजेत् परः। ९५
यो न यानं न पर्य्यङ्कं न पीठं न गजं रथं। आरोहेत् सम्मतोऽस्मीति स राजवसतिं वसेत्।
अथ यत्रैनमासीनं शङ्केरन् दुष्टचारिणः। न तत्रोपविशेद्यो वै स राजवसतिं वसेत्।
न चानुशिष्याद्राजानमपृच्छन्तं कदाचन। तूष्णीञ्चैनमुपासीत काले समभिपूजयेत्।
असूयन्ति हि राजानो जनाननृतवादिनः। तथैव चावमन्यन्ते मन्त्रिणं वादिनं मृषा।
नैषां दारेषु कुर्व्वीत मैत्रीं प्राज्ञः कदाचन। अन्तःपुरचरा ये च द्वेष्टि यानहिताश्च ये। १००
विदिते चास्य कुर्व्वीत कार्य्याणि सुलघून्यपि। एवं विचरता राज्ञि न क्षतिर्जायते क्वचित्।
गच्छन्नपि परां भूमिमपृष्टो ह्यनियोजितः। जात्यन्ध इव मन्येत मर्य्यादामनुचिन्तयन्।
न हि पुत्रं न नप्तारं न भ्रातरमरिन्दमाः। समतिक्रान्तमर्य्यादं पूजयन्ति नराधिपाः।
यत्नाच्चोपचरेदेनमग्निवद्देववच्चिह। अनृतेनोपचीर्णो हि हन्यादेव न संशयः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यद्यद्भर्त्ताऽनुयुञ्जीत तत्तदेवानुवर्त्तयेत्। प्रमादमवलेपञ्च कोपञ्च परिवर्ज्जयेत्। १०५
समर्थनासु सर्व्वासु हितञ्च प्रियमेव च। संवर्णयेत्तदेवास्य प्रियादपि हितं वदेत्।
अनुकूलो भवेच्चास्य सर्व्वार्थेषु कथासु च। अप्रियं चाहितं यत्स्यात्तदस्मै नानुवर्णयेत्।
नाहमस्य प्रियोऽस्मीति मत्वा सेवेत पण्डितः। अप्रमत्तश्च सततं हितं कुर्य्यात् प्रियञ्च यत्।
नास्यानिष्टानि सेवेत नाहितैः सह संवसेत्। स्वस्थानान्न विकम्पेत स राजवसतिं वसेत्।
दक्षिणं वाऽथ वामं वा पार्श्वमासीत पण्डितः। रक्षिणां ह्यात्तशस्त्राणां स्थानं पश्चाद्विधीयते। ११०
नित्यं हि प्रतिषिद्धन्तु पुरस्तादासनं महत्। न च सन्दर्शने किञ्चित् प्रवृत्तमपि संजपेत्।
अपि ह्येतद्दरिद्राणां व्यलीकं स्थानमुत्तमं। न मृषाऽभिहितं राज्ञां मनुष्येषु प्रकाशयेत्।
असूयन्ति हि राजानो नराननृतवादिनः। तथैव चावमन्यन्ते नरान् पण्डितमानिनः।
शूरोऽस्मीति न दृप्तः स्याद्बुद्धिमानिति वा पुनः। प्रियमेवाचरन् राज्ञः प्रियो भवति भोगवान्।
ऐश्वर्य्यं प्राप्य दुष्प्रापं प्रियं प्राप्य च राजतः। अप्रमत्तो भवेद्राज्ञः प्रियेषु च हितेषु च। ११५
यस्य कोपो महाबाधः प्रसादश्च महाफलः। कस्तस्य मनसाऽपीच्छेदनर्थं प्राज्ञसम्मतः।
न चोष्ठौ न भुजौ जानू न च वाक्यं समाक्षिपेत्। सदा वातञ्च वाचञ्च ष्ठीवनञ्चाचरेच्छनैः।
हास्यवस्तुषु चाप्यस्य वर्त्तमानेषु केषु चित्। नातिगाढं प्रहृष्येत न चाप्युन्मत्तवद्धसेत्।
न चातिधैर्य्येण चरेद्गुरुतां हि व्रजेत्ततः। स्मितन्तु मृदुपूर्व्वेण दर्शयेदप्रमादजं।
लाभे न हर्षयेद्यस्तु न व्यथेद्योऽवमानितः। असंमूढश्च यो नित्यं स राजवसतिं वसेत्। १२०
राजानं राजपुत्त्रं वा संवर्णयति यः सदा। अमात्यः पण्डितो भूत्वा स चिरं तिष्ठते प्रियः।
प्रगृहीतश्च योऽमात्यो निगृहीतश्च कारणैः। न निर्वदति राजानं लभते सम्पदं पुनः।
प्रत्यक्षञ्च परोक्षञ्च गुणवादी विचक्षणः। उपजीवी भवेद्राज्ञो विषये योऽपि वा भवेत्।
अमात्यो हि बलाद्भोक्तुं राजानं प्रार्थयेत्तु यः। न स तिष्ठेच्चिरं स्थाने गच्छेच्च प्राणसंशयं।
श्रेयः सदात्मनो दृष्ट्वा परं राज्ञा न संवदेत्। विशेषयेन्न राजानं योग्यभूमिषु सर्व्वदा। १२५
अम्लानो बलवाञ्छूरश्छायेवानुगतः सदा। सत्यवादी मृदुर्दान्तः स राजवसतिं वसेत्।
अन्यस्मिन् प्रेष्यमाणे तु पुरस्ताद्यः समुत्पतेत्। अहं किं करवाणीति स राजवसतिं वसेत्।
आन्तरे चैव बाह्ये च राज्ञा यश्चैव सर्व्वदा। आदिष्टो नैव कम्पेत स राजवसतिं वसेत्।
यो वै गृहेभ्यः प्रवसन् प्रियाणां नानुसंस्मरेत्। दुःखेन सुखमन्विच्छेत् स राजवसतिं वसेत्।
समवेशं न कुर्व्वीत नोच्चैः सन्निहितो हसेत्। न मन्त्रं बहुधा कुर्य्यादेवं राज्ञः प्रियो भवेत्। १३०
न कर्म्मणि नियुक्तः सन् धनं किञ्चिदुपस्पृशेत्। प्राप्नोति हि हरन् द्रव्यं बन्धनं यदि वा वधं।
यानं वस्त्रमलङ्कारं यच्चान्यत् सम्प्रयच्छति। तदेव धारयेन्नित्यमेवं प्रियतरो भवेत्।

एवं संयम्य चित्तानि यत्नतः पाण्डुनन्दनाः। सम्वत्सरमिमं तातास्तथाशीला बुभूषवः। अथ स्वविषयं प्राप्य यथाकामं चरिष्यथ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ युधिष्ठिर उवाच ॥ अनुशिष्टाः स्म भद्रन्ते नैतद्वक्ताऽस्ति कश्चन । कुन्तीमृते मातरं नो विदुरं वा महामतिं ।
यदेवानन्तरं कार्य्यं तद्भवान् वक्तुमर्हति । तारणायास्य दुःखस्य प्रस्थानाय जयाय च । १२५
॥ वैशम्पायन उवाच ॥ एवमुक्तस्ततो राज्ञा धौम्योऽथ द्विजसत्तमः । अकरोद्विधिवत्सर्व्वं प्रस्थाने यद्विधीयते ।
तेषां समिध्य तानग्नीन्मन्त्रवच्च जुहाव सः । समृद्धिवृद्धिलाभाय पृथिवीविजयाय च ।
अग्नीन् प्रदक्षिणीकृत्य ब्राह्मणांश्च तपोधनान् । याज्ञसेनीं पुरस्कृत्य षडेवाथ प्रवव्रजुः ।
गतेषु तेषु वीरेषु धौम्योऽथ जपताम्वरः । अग्निहोत्राण्युपादाय पाञ्चालानभ्यगच्छत ।
इन्द्रसेनादयश्चैव यथोक्ताः प्राप्य यादवान् । रथानश्वांश्च रक्षन्तः सुखमूषुः सुसंवृताः । १३०
इति श्रीमहाभारते विराटपर्व्वणि पाण्डवप्रवेशपर्व्वणि धौम्योपदेशे चतुर्थोऽध्यायः ॥ ४ ॥
॥ वैशम्पायन उवाच ॥ ते वीरा बद्धनिस्त्रिंशास्तथायुधकलापिनः । बद्धगोधाङ्गुलित्राणाः कालिन्दीमभितो ययुः ।
ततस्ते दक्षिणं तीरमन्वगच्छन् पदातयः । निवृत्ता वनवासाद्वै स्वराष्ट्रं प्रेप्सवस्तदा ।
वसन्तो गिरिदुर्गेषु वनदुर्गेषु धन्विनः । विध्यन्तो मृगजातानि महेष्वासा महाबलाः ।
उत्तरेण दशार्णांस्ते पञ्चालान् दक्षिणेन च । अन्तरेण यकृल्लोमाञ्छूरसेनांश्च पाण्डवाः ।
लुब्धा ब्रुवाणा मत्स्यस्य विषयं प्राविशन् वनात् । धन्विनो बद्धनिस्त्रिंशा विवर्णाः श्मश्रुधारिणः । १३५
ततो जनपदं प्राप्य कृष्णा राजानमब्रवीत् । पश्यैकपद्यो दृश्यन्ते क्षेत्राणि विविधानि च ।
व्यक्तं दूरे विराटस्य राजधानी भविष्यति । वसामेहापरां रात्रिं बलवान् मे परिश्रमः ।
॥ युधिष्ठिर उवाच ॥ धनञ्जय समुद्यम्य पाञ्चालीं वह भारत । राजधान्यां निवत्स्यामो विमुक्ताश्च वनादितः ।
॥ वैशम्पायन उवाच ॥ तामादायार्ज्जुनस्तूर्णं द्रौपदीं गजराडिव । संप्राप्य नगराभ्यासमवातारयदर्ज्जुनः ।
स राजधानीं संप्राप्य कौन्तेयोऽर्ज्जुनमब्रवीत् । क्वायुधानि समासज्य प्रवेक्ष्यामः पुरं वयं । १४०
सायुधाश्च प्रवेक्ष्यामो वयं तात पुरं यदि । समुद्वेगं जनस्यास्य करिष्यामो न संशयः ।
गाण्डीवञ्च महद्गाढं लोके च विदितं नृणां । तच्चेदायुधमादाय गच्छामो नगरं वयं ।
क्षिप्रमस्मान् विजानीयुर्म्मनुष्या नात्र संशयः । ततो द्वादशवर्षाणि प्रवेष्टव्यं वने पुनः । एकस्मिन्नपि विज्ञाते प्रतिज्ञातं हि नस्तथा ।
॥ अर्ज्जुन उवाच ॥ इयं कूटे मनुष्येन्द्र गहना महती शमी । भीमशाखा दुरारोहा श्मशानस्य समीपतः ।
न चापि विद्यते कश्चित् मनुष्य इति मे मतिः । योऽस्मान्निदधतो द्रष्टा भवेच्छस्त्राणि पाण्डवाः । १४५
उत्पथे हि वने जाता मृगव्यालनिषेविते । समीपे च श्मशानस्य गहनस्य विशेषतः ।
समाधायायुधं शम्यां गच्छामो नगरं प्रति । एवमत्र यथायोगं विहरिष्याम भारत ।
॥ वैशम्पायन उवाच ॥ एवमुक्त्वा स राजानं धर्म्मराजं युधिष्ठिरं । प्रचक्रमे निधानाय शस्त्राणां भरतर्षभ ।
येन देवान्मनुष्यांश्च सर्व्वांश्चैकरथोऽजयत् । स्फीतान् जनपदांश्चान्यानजयत् कुरुपुङ्गवः ।
तदुदारं महाघोषं सपत्नबलसूदनं । अपज्यमकरोत् पार्थो गाण्डीवं सुभयङ्करं । १५०
येन वीरः कुरुक्षेत्रमभ्यरक्षत् परन्तपः । अमुञ्चद्धनुषस्तस्य ज्यामक्षय्यां युधिष्ठिरः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पाञ्चालान् येन सङ्ग्रामे भीमसेनोऽजयत्प्रभुः। प्रत्यषेधद्बहूनेकः सपत्नांश्चैव दिग्जये।
निशम्य यस्य विस्फारं व्यद्रवन्त रणात् परे। पर्व्वतस्येव दीर्णस्य विस्फोटमशनेरिव।
सैन्धवं येन राजानं पर्य्यामृषत चानघः। ज्यापाशं धनुषस्तस्य भीमसेनोऽवतारयत्।
अजयत्पश्चिमामाशां धनुषा येन पाण्डवः। माद्रीपुत्त्रो महाबाहुस्ताम्राक्षो मितभाषिता। १६५
तस्य मौर्व्वीमपाकर्षच्छूरः संक्रन्दनो युधि। कुले नास्ति समो रूपे यस्येति नकुलः स्मृतः।
दक्षिणां दक्षिणाचारो दिशं येनाजयत् प्रभुः। अपज्यमकरोद्वीरः सहदेवस्तदायुधं।
खड्गांश्च दीप्तान् दीर्घांश्च कलापांश्च महाधनान्। विपाठान् क्षुरधारांश्च धनुर्भिर्न्निदधुः सह।
॥ वैशम्पायन उवाच॥ अथान्वशासन्नकुलं कुन्तीपुत्त्रो युधिष्ठिरः। आरुह्येमां शमीं वीर धनूंष्येतानि निक्षिप।
तामुपारुह्य नकुलो धनूंषि निदधे स्वयं। यानि तस्यावकाशानि दिव्यरूपाण्यमन्यत। १७०
यत्र चापश्यत स वै तिरोवर्षाणि वर्षति। तत्र तानि दृढैः पाशैः सुगाढं पर्य्यबन्धत।
शरीरञ्च मृतस्यैकं समबध्नन्त पाण्डवाः। विवर्ज्जयिष्यन्ति नरा दूरादेव शमीमिमां।
आबद्धं शवमत्रेति गन्धमाघ्राय पूतिकं। अशीतिशतवर्षेयं माता न इति वादिनः।
कुलधर्म्मोऽयमस्माकं पूर्व्वैराचरितोऽपि वा। समासज्याथ वृक्षेऽस्मिन्निति वै व्याहरन्ति ते।
आगोपालाविपालेभ्य आचक्षाणाः परन्तप। आजग्मुर्न्नगराभ्याशं पार्थाः शत्रुनिवर्हणाः। १७५
जयो जयन्तो विजयो जयत्सेनो जयद्बलः। इति गुह्यानि नामानि चक्रे तेषां युधिष्ठिरः।
ततो यथाप्रतिज्ञाभिः प्राविशन्नगरं महत्। अज्ञातचर्य्यां वत्स्यन्तो राष्ट्रे वर्षं त्रयोदशं।
इति श्रीमहाभारते विराटपर्व्वणि पाण्डवप्रवेशपर्व्वणि अस्त्रसंस्थापने पञ्चमोऽध्यायः॥ ५॥
॥ वैशम्पायन उवाच॥ विराटनगरं रम्यं गच्छमानो युधिष्ठिरः। अस्तुवन्मनसा देवीं दुर्गां त्रिभुवनेश्वरीं।
यशोदागर्भसम्भूतां नारायणवरप्रियां। नन्दगोपकुले जातां मङ्गल्यां कुलवर्द्धनीं।
कंसविद्रावणकरीमसुराणां क्षयङ्करीं। शिलातटविनिक्षिप्तामाकाशं प्रति गामिनीं। १८०
वासुदेवस्य भगिनीं दिव्यमाल्यविभूषितां। दिव्याम्बरधरां देवीं खड्गखेटकधारिणीं।
भारावतरणे पुण्ये ये स्मरन्ति सदा शिवां। तान् वै तारयते पापात्पङ्के गामिव दुर्ब्बलां।
स्तोतुं प्रचक्रमे भूयो विविधैः स्तोत्रसम्भवैः। आमन्त्र्य दर्शनाकाङ्क्षी राजा देवीं सहानुजः।
नमोऽस्तु वरदे कृष्णे कुमारि ब्रह्मचारिणि। बालार्कसदृशाकारे पूर्णचन्द्रनिभानने।
चतुर्भुजे चतुर्व्वक्त्रे पीनश्रोणिपयोधरे। मयूरपिच्छवलये केयूराङ्गदधारिणि। १८५
भासि देवि यथापद्मा नारायणपरिग्रहः। स्वरूपं ब्रह्मचर्य्यञ्च विशदं तव खेचरि।
कृष्णच्छविसमा कृष्णा सङ्कर्षणसमानना। बिभ्रती विपुलौ बाहू शक्रध्वजसमुच्छ्रयौ।
पात्री च पङ्कजी घण्टी स्त्रीविशुद्धा च या भुवि। पाशन्धनुर्महाचक्रं विविधान्यायुधानि च।
कुण्डलाभ्यां सुपूर्णाभ्यां कर्णाभ्याञ्च विभूषिता। चन्द्रविस्पर्द्धिना देवि मुखेन त्वं विराजसे।
मुकुटेन विचित्रेण केशबन्धेन शोभिना। भुजङ्गाभोगवासेन श्रोणिसूत्रेण राजता। १९०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विभ्राजसे चाबद्धेन भोगेनेवेह मन्दरः । ध्वजेन शिखिपिच्छानामुच्छ्रितेन विराजसे ।
कौमारं व्रतमास्थाय त्रिदिवं पावितं त्वया । तेन त्वं स्तूयसे देवि त्रिदशैः पूज्यसेऽपि च ।
त्रैलोक्यरक्षणार्थाय महिषासुरनाशिनि । प्रसन्ना मे सुरश्रेष्ठे दयां कुरु शिवा भव ।
जया त्वं विजया चैव सङ्ग्रामे च जयप्रदा । ममापि विजयं देहि वरदा त्वञ्च साम्प्रतं ।
विन्ध्ये चैव नगश्रेष्ठे तव स्थानं हि शाश्वतं । कालि कालि महाकालि सीधुमांसपशुप्रिये । १९५
कृतानुयात्रा भूतैस्त्वं वरदा कामचारिणि । भारावतारे ये च त्वां संस्मरिष्यन्ति मानवाः ।
प्रणमन्ति च ये त्वां हि प्रभाते तु नरा भुवि । न तेषां दुर्ल्लभं किञ्चित् पुत्त्रतो धनतोऽपि वा ।
दुर्गात्तारयसे दुर्गे तत्त्वं दुर्गा स्मृता जनैः । कान्तारेष्ववसन्नानां मग्नानाञ्च महार्णवे ।
दस्युभिर्व्वा निरुद्धानां त्वं गतिः परमा नृणां । जलप्रतरणे चैव कान्तारेष्वटवीषु च ।
ये स्मरन्ति महादेवि न च सीदन्ति ते नराः । त्वं कीर्त्तिः श्रीर्धृतिः सिद्धिर्ह्रीर्व्विद्या सन्ततिर्म्मतिः । २००
सन्ध्या रात्रिः प्रभा निद्रा ज्योत्स्ना कान्तिः क्षमा दया । नृणाञ्च बन्धनं मोहं पुत्त्रनाशं धनक्षयं । व्याधिं मृत्युं भयञ्चैव पूजिता नाशयिष्यसि ।
सोऽहं राज्यात् परिभ्रष्टः शरणं त्वां प्रपन्नवान् । प्रणतश्च यथा मूर्द्ध्ना तव देवि सुरेश्वरि ।
त्राहि मां पद्मपत्त्राक्षि सत्ये सत्या भवस्व नः । शरणं भव मे दुर्गे शरण्ये भक्तवत्सले ।
एवं स्तुता हि सा देवी दर्शयामास पाण्डवं । उपगम्य तु राजानमिदं वचनमब्रवीत् ।
॥ देव्युवाच ॥ शृणु राजन्महाबाहो मदीयं वचनं प्रभो । भविष्यत्यचिरादेव सङ्ग्रामे विजयस्तव । २०५
मम प्रसादान्निर्ज्जित्य हत्वा कौरववाहिनीं । राज्यं निष्कण्टकं कृत्वा भोक्ष्यसे मेदिनीं पुनः ।
भ्रातृभिः सहितो राजन् प्रीतिं प्राप्स्यसि पुष्कलां । मत्प्रसादाच्च ते सौख्यमारोग्यञ्च भविष्यति ।
ये च सङ्कीर्त्तयिष्यन्ति लोके विगतकल्मषाः । तेषां तुष्टा प्रदास्यामि राज्यमायुर्व्वपुःसुतं ।
प्रवासे नगरे वाऽपि सङ्ग्रामे शत्रुसङ्कटे । अटव्यां दुर्गकान्तारे सागरे गहने गिरौ ।
ये स्मरिष्यन्ति मां राजन् यथाऽहं भवता स्मृता । न तेषां दुर्ल्लभं किञ्चिदस्मिँल्लोके भविष्यति । २१०
इदं स्तोत्रवरं भक्त्या शृणुयाद्वा पठेत वा । तस्य सर्व्वाणि कार्य्याणि सिद्धिं यास्यन्ति पाण्डवाः ।
मत्प्रसादाच्च वः सर्व्वान् विराटनगरे स्थितान् । न प्रज्ञास्यन्ति कुरवो नरा वा तन्निवासिनः ।
इत्युक्त्वा वरदा देवी युधिष्ठिरमरिन्दमं । रक्षां कृत्वा च पाण्डूनां तत्रैवान्तरधीयत ।
इति श्रीमहाभारते विराटपर्व्वणि पाण्डवप्रवेशपर्व्वणि श्रीदुर्गास्तवे षष्ठोऽध्यायः ॥ ६ ॥
॥ वैशम्पायन उवाच ॥ ततो विराटं प्रथमं युधिष्ठिरो राजा सभायामुपविष्टमाव्रजत् । वैदूर्य्यरूपान् प्रतिमुच्य काञ्चनानक्षान् स कक्षे परिगृह्य वाससा ।
२१५
नराधिपो राष्ट्रपतिं यशस्विनं महायशाः कौरववंशवर्द्धनः । महानुभावो नरराजसत्कृतो दुरासदस्तीक्ष्णविषो यथोरगः ।
बलेन रूपेण नरर्षभो महानपूर्व्वरूपेण यथाऽमरस्तथा । महाभ्रजालैरिव संवृतो रविर्यथाऽनलो भस्मवृतश्च वीर्य्यवान् ।
तमापतन्तं प्रसमीक्ष्य पाण्डवं विराटराडिन्दुमिवाभ्रसंवृतं । सभागतं पूर्णशशिप्रभाननं महानुभावं नचिरेण दृष्टवान् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अन्निद्विजान् सूतमुखान् विशस्तथा ये चापि केचित् परितः समासते । पप्रच्छ कोऽयं प्रथमं समीयिवान् नृपोपमोऽयं सम वेक्षते सभां ।

न तु द्विजोऽयं भविता नरोत्तमः पतिः पृथिव्या इति मे मनोगतं । न चास्य दासो न रथो न कुञ्जरः समीपतो भ्राजति चायमिन्द्रवत् ।

शरीरलिङ्गैरुपसूचितो ह्ययं मूर्द्धाभिषिक्तस्त्विति मे मनोगतं । समीपमायाति च मे गतव्यथो यथा गजस्तामरसीं मदोत्कटः ।　२२०

वितर्कयन्तन्तु नरर्षभस्तथा युधिष्ठिरोऽभ्येत्य विराटमब्रवीत् । सम्राड्विजानातिह जीवनार्थिनं विनष्टसर्व्वस्वमुपागतं द्विजं ।

इहाहमिच्छामि तवानघान्तिके वस्तुं यथा कामचरस्तथा विभो । तमब्रवीत् स्वागतमित्यनन्तरं राजा प्रहृष्टः प्रतिसङ्गृहाण च ।

तं राजसिंहं प्रतिगृह्य राजा प्रीत्यात्मना चैवमिदं बभाषे । कामेन ताताभिवदाम्यहं त्वां कस्यासि राज्ञो विषयादिहागतः । गोत्रञ्च नामापि च शंस तत्त्वतः किं वाऽपि शिल्पं तव विद्यते कृतं ।

॥ युधिष्ठिर उवाच ॥ युधिष्ठिरस्यासमहं पुरा सखा वैयाघ्रपद्यः पुनरस्मि विप्रः । अक्षान् प्रयोक्तुं कुशलोऽस्मि देविता कङ्केति नाम्नाऽस्मि विराट विश्रुतः ।

॥ विराट उवाच ॥ ददानि ते हन्त वरं यमिच्छसि प्रशाधि मत्स्यान्वशगो ह्यहं तव । प्रियास्तु धूर्त्ता मम देविनः सदा भवांश्च देवोपम राज्यमर्हति ।　२२५

॥ युधिष्ठिर उवाच ॥ आप्तो विवादः प्रथमं विशाम्पते न विद्यते कञ्चन मत्स्य हीनतः । न मे जितः कश्चन धारयेद्धनं वरो ममैषोऽस्तु तव प्रसादजः ।

॥ विराट उवाच ॥ हन्यामवध्यं यदि तेऽप्रियञ्चरेत् प्रव्राजयेयं विषयाद्द्विजांस्तथा । शृण्वन्तु मे जानपदाः समागताः कङ्को यथाऽहं विषये प्रभुस्तथा ।

समानयानो भविताऽसि मे सखा प्रभूतवस्त्रो बहुपानभोजनः पश्येस्त्वमन्तश्च वहिश्च सर्व्वदा कृतञ्च ते द्वारमपावृतं मया ।

ये त्वाऽनुवादेयुरवृत्तिकर्षिता ब्रूयाश्च तेषां वचनेन मां सदा । दास्यामि सर्व्वं तदहं न संशयो न ते भयं विद्यति सन्निधौ मम ।

॥ वैशम्पायन उवाच ॥ एवं स लब्ध्वा तु वरं समागमं विराटराजेन नरर्षभस्तदा । उवास धीरः परमार्चितः सुखी न चापि कश्चिच्चरितं बुबोध तत् ।　२३०

इति श्रीमहाभारते विराटपर्व्वणि पाण्डवप्रवेशपर्व्वणि युधिष्ठिरप्रवेशे सप्तमोऽध्यायः ॥ ७ ॥

॥ वैशम्पायन उवाच ॥ अथापरो भीमबलः श्रिया ज्वलन्नुपाययौ सिंहविलासविक्रमः । खजाञ्च दर्व्वीञ्च करेण धारयन्नसिञ्च कालाङ्गमकोषमव्रणं ।

स सूदरूपः परमेण वर्चसा रविर्यथा लोकमिमं प्रकाशयन् । सुकृष्णवासा गिरिराजसारवांस्ते मत्स्यराजं समुपेत्य तस्थिवान् ।

तं प्रेक्ष्य राजानमिवान्तिकागतं ततोऽब्रवीज्जानपदान् समागतान् । सिंहोन्नतांसोऽयमतीव रूपवान् प्रदृश्यते को नु नरर्षभो युवा ।

अदृष्टपूर्व्वः पुरुषो रविर्यथा वितर्कयन्नास्य लभामि निश्चयं । तथाऽस्य चित्तं ह्यपि संवितर्कयन्नरर्षभस्यास्य नयामि तत्त्वतः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon.

दृष्ट्वैव चैनं न विचारयाम्यहं गन्धर्व्वराजो यदि वा पुरन्दरः। जानीत कोऽयं मम दर्शने स्थितो यदीप्सितं तल्लभतां च
मा चिरं। २३५
विराटवाक्येन च तेन चोदिता नरा विराटस्य सुशीघ्रगामिनः। उपेत्य कौन्तेयमथाब्रुवंस्तदा यथा स राजाऽवदद्च्युतानुजं।
ततो विराटं समुपेत्य पाण्डवस्त्वदीनरूपं वचनं महामनाः। उवाच सूदोऽस्मि नरेन्द्र बल्लवो भजस्व मां व्यञ्जनकारमुत्तमं।
॥ विराट उवाच ॥ न सूदतां बल्लव श्रद्दधामि ते सहस्रनेत्रप्रतिमो विराजसे। श्रिया च रूपेण च विक्रमेण च प्रभाससे त्वं
नृवरो नरेष्विव।
॥ भीम उवाच ॥ नरेन्द्र सूदः परिचारकोऽस्मि ते जानामि सूपान् प्रथमं न केवलान्। आस्वादिता ये नृपते पुराऽभवन्
युधिष्ठिरेणापि नृपेण सर्व्वशः।
बलेन तुल्यश्च न विद्यते मया नियुद्धशीलश्च सदैव पार्थिव। गजैश्च सिंहैश्च समेयिवानहं सदा करिष्यामि तवानघ
प्रियं। २४०
॥ विराट उवाच ॥ ददामि ते हन्त वरान्महानसे तथाऽधिकुर्य्याः कुशलं प्रभाषसे। न चैव मन्ये तव कर्म्म तत्समं समुद्रनेमिं
पृथिवीं त्वमर्हसि।
यथाहि कामो भवतस्तथा कृतं महानसे त्वं भव मे पुरस्कृतः। नराश्च ये तत्र समाहिताः पुरा भवांश्च तेषामधिपो मया कृतः।
॥ वैशम्पायन उवाच ॥ तथा स भीमो विहितो महानसे विराटराज्ञो दयितोऽभवद्दृढं। उवास राजन्न च तं पृथग्जनो
बुबोध तत्रानुचराश्च केचन।

इति श्रीमहाभारते विराटपर्व्वणि पाण्डवप्रवेशपर्व्वणि भीमप्रवेशे अष्टमोऽध्यायः ॥ ८ ॥

॥ वैशम्पायन उवाच ॥ ततः केशान् समुत्क्षिप्य वेल्लिताग्राननिन्दितान्। कृष्णान् सूक्ष्मान् मृदून् दीर्घान् समुद्ग्रथ्य शुचि
स्मिता।
जुगूहे दक्षिणे पार्श्वे मृदूनसितलोचना। वासश्च परिधायैकं कृष्णा सुमलिनं महत्। २४५
कृत्वा वेशञ्च सैरिन्ध्र्यास्ततो व्यचरदार्त्तवत्। तां नराः परिधावन्तः स्त्रियश्च समुपाद्रवन्।
अपृच्छंश्चैव तां दृष्ट्वा का त्वं किञ्च चिकीर्षसि। सा तानुवाच राजेन्द्र सैरिन्ध्र्यहमिहागता।
कर्म्म चेच्छामि वै कर्त्तुं तस्य यो मां युयुक्षति। तस्या रूपेण वेशेन श्लक्ष्णया च तथा गिरा।
न श्रद्दधत तां दासीमन्नहेतोरुपस्थितां। विराटस्य तु कैकेयी भार्य्या परमसम्मता।
आलोकयन्ती ददृशे प्रासादाद्द्रुपदात्मजां। सा समीक्ष्य तथारूपामनाथामेकवाससं। २५०
समाहूयाब्रवीद्भद्रे का त्वं किञ्च चिकीर्षसि। सा तामुवाच राजेन्द्र सैरिन्ध्र्यहमुपागता। कर्म्म चेच्छाम्यहं कर्त्तुं तस्य यो मां
युयुक्षति।
॥ सुदेष्णोवाच ॥ नैवंरूपा भवन्त्येव यथा वदसि भाविनि। प्रेषयन्ती च वै दासीर्दासांश्च विविधान्बहून्।
नोच्चगुल्फा संहतोरुस्त्रिगम्भीरा षडुन्नता। रक्ता पञ्चसु रक्तेषु हंसगद्गदभाषिणी।
सुकेशी सुस्तनी श्यामा पीनश्रोणिपयोधरा। तेन तेनैव सम्पन्ना काश्मीरीव तुरङ्गमी।
अरालपक्ष्मनयना बिम्बोष्ठी तनुमध्यमा। कम्बुग्रीवा गूढशिरा पूर्णचन्द्रनिभानना। २५५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शारदोत्पलपत्राच्छ्या शारदोत्पलगन्धया । शारदोत्पलसेविन्या रूपेण सदृशी श्रिया ।
का त्वं ब्रूहि यथा भद्रे नासि दासी कथञ्चन । यक्षी वा यदि वा देवी गन्धर्व्वी यदि वाऽप्सराः ।
देवकन्या भुजङ्गी वा नगरस्याथ देवता । विद्याधरी किन्नरी वा यदि वा रोहिणी स्वयं ।
अलम्बुषा मिश्रकेशी पुण्डरीकाऽथ मालिनी । इन्द्राणी वारुणी वा त्वं त्वष्टुर्धातुः प्रजापतेः । देव्यो देवेषु विख्यातास्तासां त्वं कतमा शुभे ।
॥ द्रौपद्युवाच ॥ नास्मि देवी न गन्धर्व्वी नासुरी न च राक्षसी । सैरिन्ध्री तु भुजिष्याऽस्मि सत्यमेतद्ब्रवीमि ते । २६०
केशान् जानाम्यहं कर्त्तुं पिंषे साधु विलेपनं । मल्लिकोत्पलपद्मानां चम्पकानां तथा शुभे ।
ग्रन्थयिष्ये विचित्राश्च स्रजः परमशोभनाः । आराधयं सत्यभामां कृष्णस्य महिषीं प्रियां ।
कृष्णाञ्च भार्य्यां पाण्डूनां कुरूणामेकसुन्दरीं । तत्र तत्र चराम्येवं लभमाना सुभोजनं ।
वासांसि यावन्ति लभे तावत्तावद्रमे तथा । मालिनीत्येव मे नाम स्वयं देवी चकार सा । साऽहमद्यागता देवि सुदेष्णे त्वन्निवेशनं ।
॥ सुदेष्णोवाच ॥ मूर्द्धि त्वां वासयेयं वै संशयो मे न विद्यते । न चेदिच्छति राजा त्वां गच्छेत् सर्व्वेण चेतसा । २६५
स्त्रियो राजकुले याश्च याश्चेमा मम वेश्मनि । प्रसक्तास्त्वां निरीक्षन्ते पुमांसं कं न मोहयेः ।
वृक्षांश्चावस्थितान् पश्य य इमे मम वेश्मनि । तेऽपि त्वां सन्नमन्तीव पुमांसं कं न मोहयेः ।
राजा विराटः सुश्रोणि दृष्ट्वा वपुरमानुषं । विहाय मां वरारोहे गच्छेत् सर्व्वेण चेतसा ।
यं हि त्वमनवद्याङ्गी तरलायतलोचने । प्रसक्तमभिवीक्षेथाः स कामवशगो भवेत् ।
यश्च त्वां सततं पश्येत् पुरुषश्चारुहासिनि । एवं सर्व्वानवद्याङ्गि स चानङ्गवशो भवेत् । २७०
अध्यारोहेद्यथा वृक्षानवधायैवात्मनो नरः । राजवेश्मनि ते सुभ्रु रोहितं स्यात्तथा मम ।
यथा च कर्कटी गर्भमाधत्ते मृत्युमात्मनः । तथाविधमहं मन्ये वासं तव शुचिस्मिते ।
॥ द्रौपद्युवाच ॥ नास्मि लभ्या विराटेन न चान्येन कदाचन । गन्धर्व्वाः पतयो मह्यं युवानः पञ्च भाविनि ।
पुत्रा गन्धर्व्वराजस्य महासत्त्वस्य कस्यचित् । रक्षन्ति ते च मां नित्यं दुःखाचारा तथा ह्यहं ।
यो मे न दद्यादुच्छिष्टं न च पादौ प्रधावयेत् । प्रीयेरंस्तेन वासेन गन्धर्व्वाः पतयो मम । २७५
यो हि मां पुरुषो गृध्येद्यथाऽन्याः प्राकृताः स्त्रियः । तामेव स ततो रात्रिं प्रविश्य च परां तनुं ।
न चाप्यहं चालयितुं शक्या केनचिदङ्गने । दुःखशीला हि गन्धर्व्वास्ते च मे बलवत्प्रियाः । प्रच्छन्नाश्चापि रक्षन्ति ते मां नित्यं शुचिस्मिते ।
॥ सुदेष्णोवाच ॥ एवं त्वां वासयिष्यामि यथा त्वं नन्दिनीच्छसि । न च पादौ न चोच्छिष्टं प्रक्ष्यसि त्वं कथञ्चन ।
॥ वैशम्पायन उवाच ॥ एवं कृष्णा विराटस्य भार्य्यया परिसान्त्विता । उवास नगरे तस्मिन् पतिधर्म्मवती सती । नचैनां वेद तत्रान्यस्तत्त्वेन जनमेजय ।
इति श्रीमहाभारते विराटपर्व्वणि पाण्डवप्रवेशपर्व्वणि द्रौपदीप्रवेशे नवमोऽध्यायः ॥ ९ ॥
॥ वैशम्पायन उवाच ॥ सहदेवोऽपि गोपानां कृत्वा वेशमनुत्तमं । भाषाञ्चैषां समास्थाय विराटं समुपाययौ । २८०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

गोष्ठमासाद्य तिष्ठन्तं भवनस्य समीपतः । राजाऽथ दृष्ट्वा पुरुषान् प्राहिणोज्जातविस्मयः ।

तमायान्तमभिप्रेच्य भ्राजमानं नरर्षभं । समुपस्थाय वै राजा पप्रच्छ कुरुनन्दनं ।

कस्य वा त्वं कुतो वा त्वं किं वा तात चिकीर्षसि । न हि मे दृष्टपूर्व्वस्त्वं तत्त्वं ब्रूहि नरर्षभ ।

सम्प्राप्य राजानममित्रतापनं ततोऽब्रवीन्मेघमहौघनिस्वनः । वैश्योऽस्मि नाम्नाऽहमरिष्टनेमिर्गोसङ्ख्य आसं कुरुपुङ्गवानां ।

वस्तुं त्वयीच्छामि विशां वरिष्ठ तान्राजसिंहान्नहि वेद्मि पार्थान् । न शक्यते जीवितुमप्यकर्म्मणा न च त्वदन्यो मम रोचते नृपः । २८॥

॥ विराट उवाच ॥ त्वं ब्राह्मणो यदि वा क्षत्रियोऽसि समुद्रनेमीश्वररूपवानसि । आचक्ष्व मे तत्त्वममित्रकर्षण न वैश्यकर्म्म त्वयि विद्यते क्षमं ।

कस्यासि राज्ञो विषयादिहागतः किं वाऽपि शिल्पं तव विद्यते कृतं । कथं त्वमस्मासु निवत्स्यसे सदा वदस्व किञ्चापि तवेह वेतनं ।

॥ सहदेव उवाच ॥ पञ्चानां पाण्डुपुत्त्राणां ज्येष्ठो भ्राता युधिष्ठिरः । तस्याष्टशतसाहस्रा गवां वर्गाः शतं शतं ।

अपरे दशसाहस्रा द्विस्तावन्तस्तथा परे । तेषां गोसङ्ख्य आसं वै तन्तिपालेति मां विदुः ।

भूतं भव्यं भविष्यच्च यच्च संख्यागतं गवां । न मेऽस्त्यविदितं किञ्चित् समन्ताद्दशयोजनं । ९०

गुणाः सुविदिता ह्यासन्मम तस्य महात्मनः । आसीच्च स मया तुष्टः कुरुराजो युधिष्ठिरः ।

क्षिप्रञ्च गावो बहुला भवन्ति न तासु रोगो भवतीह कश्चन । तैस्तैरुपायैर्व्विदितं ममैतदेतानि शिल्पानि मयि स्थितानि ।

ऋषभांश्चापि जानामि राजन् पूजितलक्षणान् । येषां मूत्रमुपाघ्राय अपि बन्ध्या प्रसूयते ।

॥ विराट उवाच ॥ शतं सहस्राणि समाहितानि सवर्णवर्णस्य विमिश्रितान् गुणैः । पशून् सपालान् भवते ददाम्यहं त्वदाश्रया मे पशवो भवन्त्विह ।

॥ वैशम्पायन उवाच ॥ तथा स राज्ञो विदितो विशाम्पतेरुवास तत्रैव सुखं नरोत्तमः । न चैनमन्येऽपि विदुः कथञ्चन प्रादाच्च तस्मै भरणं यथेप्सितं । ९९॥

इति श्रीमहाभारते विराटपर्व्वणि पाण्डवप्रवेशपर्व्वणि सहदेवप्रवेशे दशमोऽध्यायः ॥ १० ॥

॥ वैशम्पायन उवाच ॥ अथापरोऽदृश्यत रूपसम्पदा स्त्रीणामलङ्कारधरो बृहत्पुमान् । प्राकारवप्रे प्रतिमुच्य कुण्डले दीर्घे च कम्बूपरि हाटके शुभे ।

बहूंश्च दीर्घान् प्रविकीर्य्य मूर्द्धजान्महाभुजो वारणतुल्यविक्रमः । गतेन भूमिं प्रतिकम्पयंस्तदा विराटमासाद्य सभा समीपतः ।

तं प्रेक्ष्य राजोपगतं सभातले व्याजात् प्रतिच्छन्नमरिप्रमाथिनं । विराजमानं परमेण वर्च्चसा सुतं महेन्द्रस्य गजेन्द्र विक्रमं ।

सर्व्वानपृच्छच्च सभाऽनुचारिणः कुतोऽयमायाति पुरा न मे श्रुतः । न चैनमूचुर्व्विदितं तदा नराः सविस्मयं वाक्यमिदं नृपोऽब्रवीत् । १००

सत्त्वोपपन्नः पुरुषोऽमरोपमः श्यामो युवा वारणयूथपोपमः । आमुच्य कम्बूपरि हाटके शुभे विमुच्य वेणीमपिनह्य कुण्डले ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

स्रग्वी सुकेशः परिधाय चान्यथा भृशोभाभ धन्वी कवची शरी तथा। आरुह्य यानं परिधावतां भवान् सुतैः समो मे भव वा मया समः।

वृद्धो ह्यहं वै परिहातुकामः सर्व्वान् मत्स्यांस्तरसा पालयस्व। नैवंविधाः क्लीवरूपा भवन्ति कथञ्चनेति प्रतिभाति मे मनः।

॥ अर्ज्जुन उवाच॥ गायामि नृत्याम्यथ वादयामि भद्रोऽस्मि नृत्ये कुशलोऽस्मि गीते। त्वमुत्तरायै प्रदिशस्व मां स्वयं भवामि देव्या नरदेव नर्त्तकः। ७०५

इदन्तु रूपं मम येन किन्तव प्रकीर्त्तयित्वा भृशशोकवर्द्धनं। बृहन्नलां मां नरदेव विद्धि सुतं सुतां वा पितृमातृवर्ज्जितां।

॥ विराट उवाच॥ ददामि ते हन्त वरं बृहन्नले सुताञ्च मे नर्त्तय याश्च तादृशीः। इदन्तु ते कर्म्म समं न मे मतं समुद्रनेमिं पृथिवीं त्वमर्हसि।

॥ वैशम्पायन उवाच॥ बृहन्नलां तामभिवीक्ष्य मत्स्यराट् कलासु नृत्येषु तथैव वादिते। संमन्त्र्य राजा विविधैः स्वमन्त्रिभिः परीक्ष्य चैनं प्रमदाभिराशु वै।

अपुंस्त्वमप्यस्य निशम्य च स्थिरं ततः कुमारीपुरमुत्ससर्ज्ज तं। स शिक्षयामास च गीतवादितं सुतां विराटस्य धनञ्जयः प्रभुः।

सखीश्च तस्याः परिचारिकास्तथा प्रियश्च तासां स बभूव पाण्डवः। ७१०

तथा स सत्रेण धनञ्जयो वसन् प्रियाणि कुर्व्वन् सह ताभिरात्मवान्। तथा च तं तत्र न जज्ञिरे जना बहिश्चरा वाऽप्यथ वाऽन्तरेचराः।

इति श्रीमहाभारते विराटपर्व्वणि पाण्डवप्रवेशपर्व्वणि अर्ज्जुनप्रवेशे एकादशोऽध्यायः॥ ११ ॥

॥ वैशम्पायन उवाच॥ अथापरोऽदृश्यत पाण्डवः प्रभुर्विराटराजं तरसा समेयिवान्। तमापतन्तं ददृशे पृथग्जनो विमुक्तमभ्रादिव सूर्य्यमण्डलं।

स वै हयानैक्षत तांस्ततस्ततः समीक्षमाणं स ददर्श मत्स्यराट्। ततोऽब्रवीत्ताननुगान्नरेश्वरः कुतोऽयमायाति नरोऽमरप्रभः।

अयं हयानीक्षति मामकान् दृढं ध्रुवं हयज्ञो भविता विचक्षणः। प्रवेश्यतामेष समीपमाशु मे विभाति वीरो हि यथाऽमरस्तथा।

अभ्येत्य राजानममित्रहाऽब्रवीज्जयोऽस्तु ते पार्थिव भद्रमस्तु वः। हयेषु युक्तो नृपसम्मतः सदा तवाश्वसूता निपुणो भवाम्यहं। ७१५

॥ विराट उवाच॥ ददामि यानानि धनं निवेशनं ममाश्वसूतो भवितुं त्वमर्हसि। कुतोऽसि कस्यासि कथं त्वमागतः प्रब्रूहि शिल्पं तव विद्यते च यत्।

॥ नकुल उवाच॥ पञ्चानां पाण्डुपुत्त्राणां ज्येष्ठो भ्राता युधिष्ठिरः। तेनाहमश्वेषु पुरा नियुक्तः शत्रुकर्षण।

अश्वानां प्रकृतिं वेद्मि विनयञ्चापि सर्व्वशः। दुष्टानां प्रतिपत्तिञ्च कृत्स्नञ्चैव चिकित्सितं।

न कातरं स्यान्मम जातु वाहनं न मेऽस्ति दुष्टा वडवाः कुतो हयाः। जनस्तु मामाह स चापि पाण्डवो युधिष्ठिरो ग्रन्थिकमेव नामतः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ विराट उवाच ॥ यदस्ति किञ्चिन्मम वाजिवाहनं तदस्तु सर्व्वं त्वदधीनमद्य वै । ये चापि केचिन्मम वाजियोजकास्त्वदा १२०
श्रयाः सारथयश्च सन्तु मे ।
इदं तवेष्टं यदि वै सुरोपम ब्रवीहि यत्ते प्रसमीक्षितं वसु । न तेऽनुरूपं हयकर्म्म विद्यते प्रभासि राजेव हि सम्मतो मम ।
युधिष्ठिरस्येव हि दर्शनेन मे समन्तवेदं प्रियमत्र दर्शनं । कथन्तु भृत्यैः स विनाकृतो वने वसत्यनिन्द्यो रमते च पाण्डवः ।
॥ वैशम्पायन उवाच ॥ तथा स गन्धर्ब्ववरोपमो युवा विराटराज्ञा मुदितेन पूजितः । न चैनमन्येऽपि विदुः कथञ्चन प्रिया
भिरामं विचरन्तमन्तरा ।
एवं हि मत्स्ये न्यवसन्त पाण्डवा यथाप्रतिज्ञाभिरमोघदर्शनाः । अज्ञातचर्य्यां व्यचरन् समाहिताः समुद्रनेमीपतयोऽति
दुःखिताः ।
इति श्रीमहाभारते विराटपर्व्वणि पाण्डवप्रवेशपर्व्वणि नकुलप्रवेशे द्वादशोऽध्यायः समाप्तश्च पाण्डवप्रवेशपर्व्व ॥ १२ ॥

॥ अथ समयपालनपर्व्व ॥ १ ॥

॥ जनमेजय उवाच ॥ एवं ते मत्स्यनगरे प्रच्छन्नाः कुरुनन्दनाः । अत ऊर्द्ध्वं महावीर्य्याः किमकुर्व्वत वै द्विज । १२५
॥ वैशम्पायन उवाच ॥ एवं मत्स्यस्य नगरे प्रच्छन्नाः कुरुनन्दनाः । आराधयन्तो राजानं यदकुर्व्वत तच्छृणु ।
तृणविन्दुप्रसादाच्च धर्म्मस्य च महात्मनः । अज्ञातवासमेवन्तु विराटनगरेऽवसन् ।
युधिष्ठिरः सभास्तारो मत्स्यानामभवत् प्रियः । तथैव च विराटस्य सपुत्त्रस्य विशाम्पते ।
स ह्यक्षहृदयज्ञस्तं क्रीडयामास पाण्डवः । अक्षवत्यां यथाकामं सूत्रबद्धानिव द्विजान् ।
अज्ञातश्च विराटस्य विजित्य वसु धर्म्मराट् । भ्रातृभ्यः पुरुषव्याघ्रो यथाऽर्हं संप्रयच्छति । ११०
भीमसेनोऽपि मांसानि भक्ष्याणि विविधानि च । अतिसृष्टानि मत्स्येन विक्रीणीते युधिष्ठिरे ।
वासांसि परिजीर्णानि लब्धान्यन्तःपुरेऽर्ज्जुनः । विक्रीणानस्य सर्व्वेभ्यः पाण्डवेभ्यः प्रयच्छति ।
सहदेवोऽपि गोपानां वेशमास्थाय पाण्डवः । दधि क्षीरं घृतञ्चैव पाण्डवेभ्यः प्रयच्छति ।
नकुलोऽपि धनं लब्ध्वा कृते कर्म्मणि वाजिनां । तुष्टे तस्मिन्नरपतौ पाण्डवेभ्यः प्रयच्छति ।
कृष्णा तु सर्व्वान् भ्रातॄंस्तान्निरीक्षन्ती तपस्विनी । यथा पुनरविज्ञाता तथा चरति भाविनी । १३५
एवं सम्पादयन्तस्ते तदाऽन्योऽन्यं महारथाः । विराटनगरे चेरुः पुनर्गर्भधृता इव ।
साशङ्का धार्त्तराष्ट्रस्य भयात् पाण्डुसुतास्तदा । प्रेक्षमाणास्तदा कृष्णामूषुश्छन्ना नराधिपाः ।
अथ मासे चतुर्थे तु ब्रह्मणः सुमहोत्सवः । आसीत् समृद्धो मत्स्येषु पुरुषाणां सुसम्मतः ।
तत्र मल्लाः समापेतुर्दिग्भ्यो राजन् सहस्रशः । समाजे ब्रह्मणो राजन् यथा पशुपतेरिव ।
महाकाया महावीर्य्याः कालखञ्जा इवासुराः । वीर्य्योन्मत्ता बलोदग्रा राज्ञा समभिपूजिताः । १४०
सिंहस्कन्धकटिग्रीवाः स्ववदाता मनस्विनः । असकृल्लब्धलक्षास्ते रङ्गे पार्थिवसन्निधौ ।
तेषामेको महानासीत् सर्व्वमल्लानथाह्वयत् । आवल्गमानं तं रङ्गे नोपतिष्ठति कश्चन ।
यदा सर्व्वे विमनसस्ते मल्ला हतचेतसः । अथ सूदेन तं मल्लं योधयामास मत्स्यराट् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

चोद्यमानस्तदा भीमो दुःखेनैवाकरोन्मतिं। न हि शक्नोति विवृते प्रत्याख्यातुं नराधिप।
ततः स पुरुषव्याघ्रः शार्दूलशिथिलञ्चरन्। प्रविवेश महारङ्गं विराटमभिपूजयन्। १४५
बबन्ध कक्षां कौन्तेयस्ततः संहर्षयन् जनं। ततस्तु वृत्रसङ्काशं भीमो मल्लं समाह्वयत्।
जीमूतं नाम तं तत्र मल्लं प्रख्यातविक्रमं। तावुभौ सुमहोत्साहावुभौ भीमपराक्रमौ।
मत्ताविव महाकायौ वारणौ षष्टिहायनौ। ततस्तौ नरशार्दूलौ बाहुयुद्धं समीयतुः।
वीरौ परमसंहृष्टावन्योऽन्यजयकाङ्क्षिणौ। आसीत्सुभीमः सम्पातो वज्रपर्व्वतयोरिव।
उभौ परमसंहृष्टौ बलेनातिबलावुभौ। अन्योऽन्यस्यान्तरं प्रेप्सू परस्परजयैषिणौ। १५०
उभौ परमसंहृष्टौ मत्ताविव महागजौ। कृतप्रतिकृतैश्चित्रैर्ब्बाहुभिश्च सुसङ्कटैः।
सन्निपातावधूतैश्च प्रमाथोन्मथनैस्तथा। क्षेपणैर्मुष्टिभिश्चैव वराहोद्धूतनिस्वनैः।
तलैर्व्वज्रनिपातैश्च प्रसृष्टाभिस्तथैव च। शलाकानखपातैश्च पादोद्धूतैश्च दारुणैः।
जानुभिश्चाश्मनिर्घोषैः शिरोभिश्चावघट्टनैः। तद्युद्धमभवद्घोरमशस्त्रं बाहुतेजसा।
बलप्राणेन शूराणां समाजोत्सवसन्निधौ। अरज्यत जनः सर्व्वः सोत्कृष्टनिनदोत्थितः। १५५
बलिनोः संयुगे राजन् वृत्रवासवयोरिव। प्रकर्षणाकर्षणयोरभ्याकर्षविकर्षणैः।
आकर्षतुरथान्योऽन्यं जानुभिश्चापि जघ्नतुः। ततः शब्देन महता भर्त्सयन्तौ परस्परं।
व्यूढोरस्कौ दीर्घभुजौ नियुद्धकुशलावुभौ। बाहुभिः समसज्जेतामायसैः परिघैरिव।
चकर्ष दोर्भ्यामुत्पाट्य भीमो मल्लममित्रहा। निनदन्तमभिक्रोशन् शार्दूल इव वारणं।
समुद्यम्य महाबाहुर्भ्रामयामास वीर्य्यवान्। ततो मल्लाश्च मत्स्याश्च विस्मयं चक्रिरे परं। १६०
भ्रामयित्वा शतगुणं गतसत्त्वमचेतनं। प्रत्यपिंषन्महाबाहुर्मल्लं भुवि वृकोदरः।
तस्मिन् विनिहते वीरे जीमूते लोकविश्रुते। विराटः परमं हर्षमगच्छद्बान्धवैः सह।
प्रहर्षात् प्रददौ वित्तं बहु राजा महामनाः। बल्लवाय महारङ्गे यथा वैश्रवणस्तथा।
एवं स सुबहून् मल्लान् पुरुषांश्च महाबलान्। विनिघ्नन् मत्स्यराजस्य प्रीतिमाहरदुत्तमां।
यदाऽस्य तुल्यः पुरुषो न कश्चित्तत्र विद्यते। ततो व्याघ्रैश्च सिंहैश्च द्विरदैश्चाप्ययोधयत्। १ ५
पुनरन्तःपुरगतः स्त्रीणां मध्ये वृकोदरः। योध्यते स विराटेन सिंहैर्मत्तैर्महाबलैः।
बीभत्सुरपि गीतेन स्वनृत्येन च पाण्डवः। विराटं तोषयामास सर्व्वाश्चान्तःपुरस्त्रियः।
अश्वैर्व्विनीतैर्जवनैस्तत्र तत्र समागतैः। तोषयामास राजानं नकुलो नृपसत्तमं।
तस्मै प्रदेयं प्रायच्छत् प्रीतो राजा धनं बहु। विनीतान् वृषभान् दृष्ट्वा सहदेवस्य चाभितः।
धनं ददौ बहुविधं विराटः पुरुषर्षभः। द्रौपदी प्रेक्ष्य तान् सर्व्वान् क्लिश्यमानान्महारथान्। १७०
नातिप्रीतमना राजन्निश्वासपरमाऽभवत्। एवं ते न्यवसंस्तत्र प्रच्छन्नाः पुरुषर्षभाः।
कर्म्माणि तस्य कुर्व्वाणा विराटनृपतेस्तदा।

इति श्रीमहाभारते विराटपर्व्वणि समयपालनपर्व्वणि जीमूतबधे त्रयोदशोऽध्यायः समाप्तञ्च समयपालनपर्व्व॥ १३॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ अथकीचकवधपर्व्व ॥ २ ॥

॥ वैशम्पायन उवाच ॥ वसमानेषु पार्थेषु मत्स्यस्य नगरे तदा । महारथेषु छन्नेषु मासा दश समाययुः ।
याज्ञसेनी सुदेष्णान्तु शुश्रूषन्ती विशाम्पते । अवसत् परिचारार्हा सुदुःखं जनमेजय ।
तथा चरन्ती पाञ्चाली सुदेष्णाया निवेशने । तां देवीं तोषयामास तथा चान्तःपुरे स्त्रियः । १७५
तस्मिन् वर्षे गतप्राये कीचकस्तु महाबलः । सेनापतिर्व्विराटस्य ददर्श द्रुपदात्मजां ।
तां दृष्ट्वा देवगर्भाभां चरन्तीं देवतामिव । कीचकः कामयामास कामबाणप्रपीडितः ।
स तु कामाग्निसन्तप्तः सुदेष्णामभिगम्य वै । प्रहसन्निव सेनानीरिदं वचनमब्रवीत् ।
नेयं मया जातु पुरेह दृष्टा राज्ञो विराटस्य निवेशने शुभा । रूपेण चोन्मादयतीव मां भृशं गन्धेन जाता मदिरेव भाविनी ।
का देवरूपा हृदयङ्गमा शुभा ह्याचक्ष्व मे कस्य कुतोऽत्र शोभने । चित्तं हि निर्म्मथ्य करोति मां वशे नचान्यदत्रौषधमस्ति मे मतं । १८०
अहो तवेयं परिचारिका शुभा प्रत्यग्ररूपा प्रतिभाति मामियं । अयुक्तरूपं हि करोति कर्म्म ते प्रशास्तु मां यच्च ममास्ति किञ्चन ।
प्रभूतनागाश्वरथं सभाजनं समृद्धियुक्तं बहुपानभोजनं । मनोहरं काञ्चनचित्रभूषणं गृहं महच्छोभयतामियं मम ।
ततः सुदेष्णामनुमन्त्र्य कीचकस्ततः समभ्येत्य नराधिपात्मजां । उवाच कृष्णामभिसान्त्वयंस्तदा मृगेन्द्रकन्यामिव जम्बुकोवने ।
॥ कीचक उवाच ॥ का त्वं कस्यासि कल्याणि कुतो वा त्वं वरानने । प्राप्ता विराटनगरं तत्त्वमाचक्ष्व शोभने ।
रूपमग्र्यं तथा कान्तिः सौकुमार्य्यमनुत्तमं । कान्त्या विभाति वक्त्रं ते शशाङ्क इव निर्म्मलं । १८५
नेत्रे सुविपुले सुभ्रु पद्मपत्रनिभे शुभे । वाक्यन्ते चारुसर्व्वाङ्गि परपुष्टरुतोपमं ।
एवंरूपा मया नारी काचिदन्या महीतले । न दृष्टपूर्व्वा सुश्रोणि यादृशी त्वमनिन्दिते ।
लक्ष्मीः पद्मालया का त्वमथ भूतिः सुमध्यमे । ह्रीः श्रीः कीर्त्तिरथो कान्तिरासां का त्वं वरानने ।
अतीव रूपिणी किन्त्वमनङ्गाङ्गविहारिणी । अतीव भ्राजसे सुभ्रु प्रभेवेन्दोरनुत्तमा ।
अपि चेक्षणपक्ष्माणां स्मितंज्योत्स्नोपमं शुभं । दिव्यांशुरश्मिभिर्वृत्तं दिव्यकान्तिमनोरमं । १९०
निरीक्ष्य चन्द्रवक्त्रान्ते लक्ष्म्याऽनुपमया युतं । कृत्स्ने जगति को नेह कामस्य वशगो भवेत् ।
हारालङ्कारयोग्यौ ते स्तनौ चोभौ सुशोभनौ । सुजातौ सहितौ लक्ष्म्या पीनौ वृत्तौ निरन्तरौ ।
कुड्मलाम्बुरुहाकारौ तव सुभ्रु पयोधरौ । कामप्रतोदाविव मां तुदतश्चारुहासिनि ।
वलीविभङ्गचतुरं स्तनभारविनामितं । कराग्रसम्मितं मध्यं तवेदं तनुमध्यमे ।
दृष्ट्वैव चारुजघनं सरित्पुलिनसन्निभं । कामव्याधिरसाध्यो मामप्याक्रामति भामिनि । १९५
जज्वाल चाग्निमदनो दावाग्निरिव निर्द्दयः । त्वत्सङ्गमाभिसङ्कल्पविवृद्धो मां दहत्ययं ।
आत्मप्रदानवर्षेण सङ्गमाम्भोधरेण च । शमयस्व वरारोहे ज्वलन्तं मन्मथानलं ।
मच्चित्तोन्मादनकरा मन्मथस्य शरोत्कराः । त्वत्सङ्गमेन शमितास्तीव्राः शशिनिभानने ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

मध्यं विदार्य्य हृदयमिदं निर्द्दयवेगिता। प्रविष्टा ह्यसितापाङ्गि प्रचण्डाश्चण्डदारुणाः।
अत्युन्मादसमारम्भाः प्रीत्युन्मादकरा मम। आत्मप्रदानसम्भोगैर्म्मामुद्धर्त्तुमिहार्हसि। ४००
चित्रमाल्याम्बरधरा सर्व्वाभरणभूषिता। कामं प्रकामं सेव त्वं मया सह विलासिनि।
नार्हसीहासुखं वस्तुं सुखार्हा सुखवर्ज्जिता। प्राप्नुं स्वनुत्तमं सौख्यं मत्तस्त्वं मत्तगामिनि।
स्वादून्यमृतकल्पानि पेयानि विविधानि च। पिवमाना मनोज्ञानि रममाणा यथासुखं।
भोगोपचारान् विविधान् सौभाग्यं चाप्यनुत्तमं। पानं पिव महाभागे भोगैश्चानुत्तमैः शुभैः।
इदं हि रूपं प्रथमं नवं वयो, निरर्थकं केवलमद्य भाविनि। अधार्य्यमाणा स्रगिवोत्तमा शुभा न शोभसे सुन्दरि शोभना सती। ४१०
त्यजामि दारान्मम ये पुरातना भवन्तु दास्यस्तव चारुहासिनि। अहञ्च ते सुन्दरि दासवत्स्थितः सदा भविष्ये वशगो वरानने।
॥ द्रौपद्युवाच ॥ अप्रार्थनीयामिह मां सूतपुत्त्राभिमन्यसे। निहीनवर्णां सैरिन्ध्रीं वीभत्सां केशकारिणीं।
परदाराऽस्मि भद्रन्ते न युक्तं तव साम्प्रतं। दयिताः प्राणिनां दारा धर्म्मं समनुचिन्तय।
परदारे न ते बुद्धिर्ज्जातु कार्य्या कथञ्चन। विवर्ज्जनं ह्यकार्य्याणामेतत् सुपुरुषव्रतं।
मिथ्याऽभिगृध्नो हि नरः पापात्मा मोहमास्थितः। अयशः प्राप्नुयाद्घोरं महद्वा प्राप्नुयाद्भयं। ४१५
॥ वैशम्पायन उवाच ॥ एवमुक्तस्तु सैरिन्ध्र्या कीचकः काममोहितः। जानन्नपि सुदुर्ब्बुद्धिः परदाराभिमर्षणे।
दोषान् बहून् प्राणहरान् सर्व्वलोकविगर्हितान्। प्रोवाचेदं सुदुर्ब्बुद्धिर्द्रौपदीमजितेन्द्रियः।
नार्हस्येवं वरारोहे प्रत्याख्यातुं वरानने। मां मन्मथसमाविष्टं त्वत्कृते चारुहासिनि।
प्रत्याख्याय च मां भीरु वशगं प्रियवादिनं। नूनं त्वमसितापाङ्गि पश्चात्तापं करिष्यसि।
अहं हि सुभ्रु राज्यस्य कृत्स्नस्यास्य सुमध्यमे। प्रभुर्व्वासयिता चैव वीर्य्ये चाप्रतिमः क्षितौ। ४२०
पृथिव्यां मत्समो नास्ति कश्चिदन्यः पुमानिह। रूपयौवनसौभाग्यैर्भोगैश्चानुत्तमैः शुभैः।
सर्व्वकामसमृद्धेषु भोगेष्वनुपमेष्विह। भोक्तव्येषु च कल्याणि कस्माद्दास्ये रता ह्यसि।
मया दत्तमिदं राज्यं स्वामिन्यसि शुभानने। भजस्व मां वरारोहे भुङ्क्ष्व भोगाननुत्तमान्।
एवमुक्ता तु सा साध्वी कीचकेनाशुभं वचः। कीचकं प्रत्युवाचेदं गर्हयन्त्यस्य तद्वचः।
॥ सैरिन्ध्र्युवाच ॥ मा सूतपुत्त्र मुह्यस्व माऽद्यात्याक्षीः स्वजीवितं। जानीहि पञ्चभिर्घोरैर्नित्यं मामभिरक्षितां। ४२५
न चाप्यहं त्वया लभ्या गन्धर्व्वाः पतयो मम। ते त्वां निहन्युः कुपिताः साध्वलं मा व्यनीनशः।
अशक्यरूपं पुरुषैरध्वानं गन्तुमिच्छसि। यथा निश्चेतनो बालः कूलस्थः कूलमुत्तरं। तर्त्तुमिच्छति मन्दात्मा तथा त्वं कर्त्तुमिच्छसि।
अन्तर्म्महीं वा यदि वोर्द्ध्वमुत्पतेः समुद्रपारं यदि वा प्रधावसि। तथाऽपि तेभ्यो न विमोक्षमर्हसि प्रमाथिनो देवसुता हि खेचराः।
त्वं कालरात्रीमिव कश्चिदातुरः किं मां दृढं प्रार्थयसेऽद्य कीचक। किं मातुरङ्के शयितो यथा शिशुश्चन्द्रं जिघृक्षुरिव मन्यसे हि मां।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तेषां प्रियां प्रार्थयतो न ते भुवि गत्वा दिवं वा शरणं भविष्यति। न वर्त्तते कीचक ते दृशा शुभं या तेन सञ्जीवनमर्थ
येत। ४३०

इति श्रीमहाभारते विराटपर्व्वणि कीचकबधपर्व्वणि कीचककृष्णासंवादे चतुर्द्दशोऽध्यायः॥ १४ ॥

॥ वैशम्पायन उवाच॥ प्रत्याख्यातो राजपुत्त्या सुदेष्णां कीचकोऽब्रवीत्। अमर्य्यादेन कामेन घोरेणाभिपरिप्लुतः।
॥ कीचक उवाच॥ यथा कैकेयि सैरिन्ध्री समेयात्तद्विधीयतां। येनोपायेन सैरिन्ध्री भजेन्मां गजगामिनी। तां सुदेष्णे परी
प्सस्व मोहात् प्राणान् प्रहासिषं।
॥ वैशम्पायन उवाच॥ तस्य सा बहुशः श्रुत्वा वाचं विलपतस्तदा। विराटमहिषी देवी कृपाञ्चक्रे मनस्विनी।
स्वमन्त्वमभिसन्धाय तस्यार्थमनुचिन्त्य च। उद्योगञ्चैव कृष्णायाः सुदेष्णा सूतमब्रवीत्।
॥ सुदेष्णोवाच॥ पर्व्वणि त्वं समुद्दिश्य सुरामन्नञ्च कारय। तत्रैनां प्रेषयिष्यामि सुराहारीं तवान्तिकं। ४३५
तत्र सम्प्रेषितामेनां विजने निरवग्रहे। सान्त्वयेथा यथाकामं सान्त्व्यमाना रमेद्यदि।
॥ वैशम्पायन उवाच॥ इत्युक्तः स विनिष्क्रम्य भगिन्या वचनात्तदा। सुरामाहारयामास राजार्हां सुपरिष्कृतां।
मार्ग्गांश्च विविधाकारान् बहूंश्चोच्चावचांस्तदा। कारयामास कुशलैरन्नपानं सुशोभनं।
तस्मिन् कृते तदा देवी कीचकेनोपमन्त्रिता। सुदेष्णा प्रेषयामास सैरिन्ध्रीं कीचकालयं।
॥ सुदेष्णोवाच॥ उत्तिष्ठ गच्छ सैरिन्ध्रि कीचकस्य निवेशनं। पानमानय कल्याणि पिपासा मां प्रबाधते। ४४०
॥ सैरिन्ध्र्युवाच॥ न गच्छेयमहं तस्य राजपुत्त्रि निवेशनं। त्वमेव राज्ञि जानासि यथा स निरपत्रपः।
न चाहमनवद्याङ्गि तव वेश्मनि भाविनि। कामवृत्ता भविष्यामि पतीनां व्यभिचारिणी।
त्वं चैव देवि जानासि यथा स समयः कृतः। प्रविशन्त्या मया पूर्व्वं तव वेश्मनि भाविनि।
कीचकस्तु सुकेशान्ते मूढो मदनदर्पितः। सोऽवमंस्यति मां दृष्ट्वा न यास्ये तत्र शोभने।
सन्ति बह्व्यस्तव प्रेष्या राजपुत्त्रि वशानुगाः। अन्यां प्रेषय भद्रन्ते स हि मामवमंस्यते। ४४५
॥ सुदेष्णोवाच॥ नैवं त्वां जातु हिंस्यात्स इतः संप्रेषिता मया। इत्युक्त्वा प्रददौ पात्रं सपिधानं हिरण्मयं।
सा शङ्कमाना रुदती दैवं शरणमीयुषी। प्रातिष्ठत सुराहारी कीचकस्य निवेशनं।
॥ सैरिन्ध्र्युवाच॥ यथाऽहमन्यं भर्त्तृभ्यो नाभिजानामि कञ्चन। तेन सत्येन मां प्राप्तां माकुर्य्यात् कीचको वशे।
॥ वैशम्पायन उवाच॥ उपातिष्ठत सा सूर्य्यं मुहूर्त्तमबला ततः। स तस्यास्तनुमध्यायाः सर्व्वं सूर्य्योऽवबुद्धवान्।
अन्तर्हितं ततस्तस्या रक्षो रक्षार्थमादिशत्। तच्चैनां नाजहात्तत्र सर्व्वावस्थास्वनिन्दितां। ४५०
तां मृगीमिव संत्रस्तां दृष्ट्वा कृष्णां समीपगां। उदतिष्ठन्मुदा सूतो नावं लब्ध्वेव पारगः।
इति श्रीमहाभारते विराटपर्व्वणि कीचकवधपर्व्वणि द्रौपदीसुराहरणे पञ्चदशोऽध्यायः॥ १५ ॥
॥ कीचक उवाच॥ स्वागतं ते सुकेशान्ते सुव्युष्टा रजनी मम। स्वामिनी त्वमनुप्राप्ता प्रकुरुष्व मम प्रियं।
सुवर्णमालाः कम्बूंश्च कुण्डले परिहाटके। नानापत्तनजे शुभ्रे मणिरत्नञ्च शोभनं।
आहरन्तु च वस्त्राणि कौशिकान्यजिनानि च। अस्ति मे शयनं दिव्यं त्वदर्थमुपकल्पितं। एहि तत्र मया सार्द्धं पिबस्व मधु
माधवीं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding: KS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ द्रौपद्युवाच ॥ अप्रैषीद्राजपुत्त्री मां सुराहारीं तवान्तिकं। पानमाहर मे चिप्रं पिपासा मयि चाब्रवीत्। ४४५

॥ कीचक उवाच ॥ अन्या भद्रे नयिष्यन्ति राजपुत्त्र्याः प्रतिश्रुतं। इत्येनां दक्षिणे पाणौ सूतपुत्त्रः परामृषत्।

॥ द्रौपद्युवाच ॥ यथैवाहं नाभिचरे कदाचित् पतीन्मदादैमनसाऽपि जातु। तेनैव सत्येन वशीकृतं त्वां द्रक्ष्यामि पापं परिकृष्यमाणं।

॥ वैशम्पायन उवाच ॥ स तामभिप्रेक्ष्य विशालनेत्रां जिघृक्षमाणः परिभर्त्सयन्तीं। जग्राह तामुत्तरवस्त्रदेशे स कीचकस्तां सहसाक्षिपन्तीं।

प्रगृह्यमाणा तु महाजवेन मुहुर्विनिश्वस्य च राजपुत्त्री। चिक्षेप तं गाढमनुध्यमाणा प्रवेपमानोऽतिरुषा शुभाङ्गी। तया समाक्षिप्ततनुः स पापः पपात शाखीव निकृत्तमूलः।

सा गृहीता विधुन्वाना भूमावाक्षिप्य कीचकं। सभां शरणमागच्छद्यत्र राजा युधिष्ठिरः। ४६०

तां कीचकः प्रधावन्तीं केशपाशे परामृशत्। अथैनां पश्यतो राज्ञः पातयित्वा पदाऽवधीत्।

तस्या योऽसौ तदाऽर्केण राक्षसः सन्नियोजितः। स कीचकमपोवाह वातवेगेन भारत।

स पपात तदा भूमौ रक्षोबलसमाहतः। विघूर्णमानो निश्चेष्टश्छिन्नमूल इव द्रुमः।

तां चासीनौ ददृशतुर्भीमसेनयुधिष्ठिरौ। अमृष्यमाणौ कृष्णायाः कीचकेन पराभवं।

तस्य भीमो बधं प्रेप्सुः कीचकस्य दुरात्मनः। दन्तैर्दन्तांस्तदा रोषान्निष्पिपेष महामनाः। ४६५

धूमच्छायामभजतां नेत्रे चोच्छ्रितपक्ष्मणी। सस्वेदा भ्रुकुटी चोग्रा ललाटे समवर्त्तत।

हस्तेन ममृदे चैव ललाटं परवीरहा। भूयश्च त्वरितः क्रुद्धः सहसोत्थातुमैच्छत।

अथावमृद्नादङ्गुष्ठमङ्गुष्ठेन युधिष्ठिरः। प्रबोधनभयाद्राजा भीमं तं प्रत्यसेधयत्।

तं मत्तमिव मातङ्गं वीक्षमाणं वनस्पतिं। स तमावारयामास भीमसेनं युधिष्ठिरः।

आलोकयसि किं वृक्षं सूद दारुकृतेन वै। यदि ते दारुभिः कृत्यं वहिर्वृक्षान्निगृह्यतां। ४७०

सा सभाद्वारमासाद्य रुदती मत्स्यमब्रवीत्। अवेक्षमाणा सुश्रोणी पतींस्तान्दीनचेतसः।

आकारमभिरक्षन्ती प्रतिज्ञां धर्म्मसंहितां। दह्यमानेव रौद्रेण चक्षुषा द्रुपदात्मजा।

॥ द्रौपद्युवाच ॥ येषां वैरी न स्वपिति षष्ठेऽपि विषये वसन्। तेषां मां मानिनीं भार्य्यां सूतपुत्त्रः पदाऽवधीत्।

ये दद्युर्न च याचेयुर्ब्रह्मण्याः सत्यवादिनः। तेषां मां मानिनीं भार्य्यां सूतपुत्त्रः पदाऽवधीत्।

येषां दुन्दुभिनिर्घोषो ज्याघोषः श्रूयतेऽनिशं। तेषां मां मानिनीं भार्य्यां सूतपुत्त्रः पदाऽवधीत्। ४७५

ये च तेजस्विनो दान्ता बलवन्तोऽभिमानिनः। तेषां मां मानिनीं भार्य्यां सूतपुत्त्रः पदाऽवधीत्।

सर्व्वलोकमिमं हन्युर्धर्म्मपाशासितास्तु ये। तेषां मां मानिनीं भार्य्यां सूतपुत्त्रः पदाऽवधीत्।

शरणं ये प्रपन्नानां भवन्ति शरणार्थिनां। चरन्ति लोके प्रच्छन्नाः क्व नु तेऽद्य महारथाः।

कथन्ते सूतपुत्त्रेण बध्यमानां प्रियां सतीं। मर्षयन्ति यथा क्लीवा बलवन्तोऽमितौजसः।

क्व नु तेषाममर्षश्च वीर्य्यन्तेजश्च वर्त्तते। न परीप्सन्ति ये भार्य्यां बध्यमानां दुरात्मना। ४८०

मया तु शक्यं किङ्कर्तुं विराटे धर्म्मदूषके। यः पश्यन्मां मर्षयति बध्यमानामनागसं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding by MoE-IKS Grant & Equipment Heritage Foundation, Jalgaon

न राजा राजवत्किञ्चित् समाचरति कीचके । दस्यूनामिव धर्म्मस्ते न हि संसदि शोभते ।
नाहमेतेन युक्ता वै हन्तुं मत्स्य तवान्तिके । सभासदस्तु पश्यन्तु कीचकस्य व्यतिक्रमं ।
कीचको न च धर्म्मज्ञो न च मत्स्यः कथञ्चन । सभासदोऽप्यधर्म्मज्ञा य एनं पर्य्युपासते ।
॥ वैशम्पायन उवाच ॥ एवंविधैर्व्वचोभिः सा तदा कृष्णाऽश्रुलोचना । उपालभत राजानं मात्स्यानां वरवर्णिनी । ४८५
॥ विराट उवाच ॥ परोक्षं नाभिजानामि विग्रहं युवयोरहं । अर्थतत्त्वमविज्ञाय किन्नु स्यात् कौशलं मम ।
॥ वैशम्पायन उवाच ॥ ततस्तु सभ्या विज्ञाय कृष्णां भूयोऽभ्यपूजयन् । साधुसाध्विति चाप्याहुः कीचकं च व्यगर्हयन् ।
॥ सभ्या ऊचुः ॥ यस्येयं चारुसर्व्वाङ्गी भार्य्या स्यादायतेक्षणा । परो लाभस्तु तस्य स्यान्न च शोचेत् कथञ्चन ।
न हीदृशी मनुष्येषु सुलभा वरवर्णिनी । नारी सर्व्वानवद्याङ्गी देवीं मन्यामहे वयं ।
॥ वैशम्पायन उवाच ॥ एवं संपूजयन्तस्ते कृष्णां प्रेक्ष्य सभासदः । युधिष्ठिरस्य कोपात्तु ललाटे स्वेद आगमत् । ४९०
अथाऽब्रवीद्राजपुत्त्रीं कौरव्यो महिषीं प्रियां । गच्छ सैरिन्ध्रि मात्रस्थाः सुदेष्णाया निवेशनं ।
भर्त्तारमनुरुध्यन्त्यः क्लिश्यन्ते वीरपत्नयः । शुश्रूषया क्लिश्यमानाः पतिलोकं जयन्त्युत ।
मन्ये न कालं क्रोधस्य पश्यन्ति पतयस्तव । तेन त्वां नाभिधावन्ति गन्धर्व्वाः सूर्य्यवर्च्चसः ।
अकालज्ञाऽसि सैरिन्ध्रि शैलूषीव विरोदिषि । विघ्नं करोषि मत्स्यानां दीव्यतां राजसंसदि ।
गच्छ सैरिन्ध्रि गन्धर्व्वाः करिष्यन्ति तव प्रियं । व्यपनेष्यन्ति ते दुःखं येन ते विप्रियं कृतं । ४९५
॥ सैरिन्ध्र्युवाच ॥ अतीव तेषां घृणिनामर्थेऽहं धर्म्मचारिणी । तस्य तस्यैव ते बध्या येषां ज्येष्ठोऽक्षदेविता ।
॥ वैशम्पायन उवाच ॥ इत्युक्त्वा प्राद्रवत्कृष्णा सुदेष्णाया निवेशनं । केशान्मुक्त्वा च सुश्रोणी संरम्भाल्लोहितेक्षणा ।
शुशुभे वदनं तस्या रुदन्त्याः सुचिरं तदा । मेघलेखाविनिर्म्मुक्तं दिवीव शशिमण्डलं ।
॥ सुदेष्णोवाच ॥ कस्त्वाऽवधीद्वरारोहे कस्माद्रोदिषि शोभने । कस्याद्य न सुखं भद्रे केन ते विप्रियं कृतं ।
॥ द्रौपद्युवाच ॥ कीचको माऽवधीत्तत्र सुराहारीं गतान्तव । सभायां पश्यतो राज्ञो यथैव विजने वने । ५००
॥ सुदेष्णोवाच ॥ घातयामि सुकेशान्ते कीचकं यदि मन्यसे । योऽसौ त्वां कामसम्मत्तो दुर्लभामवमन्यते ।
॥ सैरिन्ध्र्युवाच ॥ अन्ये चैव बधिष्यन्ति येषामागः करोति सः । मन्ये चैवाद्य सुव्यक्तं यमलोकं गमिष्यति ।
इति श्रीमहाभारते विराटपर्व्वणि कीचकबधपर्व्वणि द्रौपदीपरिभवे षोडशोऽध्यायः ॥ १६ ॥
॥ वैशम्पायन उवाच ॥ सा हता सूतपुत्त्रेण राजपत्नी यशस्विनी । बधं कृष्णा परीप्सन्ती सेनावाहस्य भामिनी ।
जगामावासमेवाथ तदा सा द्रुपदात्मजा । कृत्वा शौचं यथान्यायं कृष्णा सा तनुमध्यमा ।
गात्राणि वाससी चैव प्रक्षाल्य सलिलेन सा । चिन्तयामास रुदती तस्य दुःखस्य निर्णयं । ५०५
किङ्करोमि क्व गच्छामि कथं कार्य्यं भवेन्मम । इत्येवं चिन्तयित्वा सा भीमं वै मनसाऽगमत् ।
नान्यः कर्त्ता ऋते भीमान्ममाद्य मनसः प्रियं । तत उत्थाय रात्रौ सा विहाय शयनं स्वकं ।
प्राद्रवन्नाथमिच्छन्ती कृष्णा नाथवती सती । भवनं भीमसेनस्य क्षिप्रमायतलोचना । दुःखेन महता युक्ता मानसेन मनस्विनी ।
॥ सैरिन्ध्र्युवाच ॥ तस्मिन् जीवति पापिष्ठे सेनावाहे मम द्विषि । तत्कर्म्म कृतवानद्य कथं निद्रान्निषेवसे ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ वैशम्पायन उवाच ॥ एवमुक्त्वाऽथ तां शालां प्रविवेश मनस्विनी। यस्यां भीमस्तथा शेते मृगराज इव श्वसन्। ५१०
तस्या रूपेण सा शाला भीमस्य च महात्मनः। सम्मूर्च्छितेव कौरव्य प्रजज्वाल च तेजसा। सा वै महानसं प्राप्य भीमसेनं शुचि-
स्मिता।
सर्व्वश्वेतेव माहेयी वने जाता त्रिहायनी। उपातिष्ठत पाञ्चाली वाशितेव नरर्षभं।
सा लतेव महाशालं फुल्लं गोमतितीरजं। परिष्वजति पाञ्चाली मध्यमं पाण्डुनन्दनं।
बाहुभ्यां परिरभ्यैनं प्राबोधयदनिन्दिता। सिंहं सुप्तं वने दुर्गे मृगराजवधूरिव।
भीमसेनमुपाश्लिष्यद्धस्तिनीव महागजं। वीणेव मधुरालापा गान्धारं साधुमूर्च्छती। अभ्यभाषत पाञ्चाली भीमसेनमनि-
न्दिता। ५१५
उत्तिष्ठोत्तिष्ठ किं शेषे भीमसेन यथा मृतः। नामृतस्य हि पापीयान् भार्य्यामालभ्य जीवति।
स सम्प्रहाय शयनं राजपुत्त्र्या प्रबोधितः। उपातिष्ठत मेघाभः पर्य्यङ्के सोपसंग्रहे।
अथाब्रवीद्राजपुत्त्रीं कौन्तेयो महिषीं प्रियां। केनास्यर्थेन संप्राप्ता त्वरितेव ममान्तिकं।
न ते प्रकृतिमान् वर्णः कृशा पाण्डुश्च लक्ष्यसे। आचक्ष्व परिशेषेण सर्व्वं विद्यामहं यथा।
सुखं वा यदि वा दुःखं द्वेष्यं वा यदि वा प्रियं। यथावत्सर्व्वमाचक्ष्व श्रुत्वा ज्ञास्यामि यत् क्षमं। ५२०
अहमेव हि ते कृष्णे विश्वास्यः सर्व्वकर्म्मसु। अहमापत्सु चापि त्वां मोचयामि पुनः पुनः।
शीघ्रमुक्त्वा यथाकामं यत्ते कार्य्यं विवक्षितं। गच्छ वै शयनायैव पुरा नान्येन बुध्यते।
इति श्रीमहाभारते विराटपर्व्वणि कीचकवधपर्व्वणि द्रौपदीभीमसंवादे सप्तदशोऽध्यायः ॥ १७ ॥
॥ द्रौपद्युवाच ॥ अशोच्यत्वं कुतस्तस्या यस्या भर्त्ता युधिष्ठिरः। जानन् सर्व्वाणि दुःखानि किं मां त्वं परिपृच्छसि।
यन्मां दासीप्रवादेन प्रातिकामी तदाऽनयत्। सभापरिषदो मध्ये तन्मां दहति भारत।
पार्थिवस्य सुता नाम काऽनुजीवति मादृशी। अनुभूयेदृशं दुःखमन्यत्र द्रौपदीं प्रभो। ५२५
वनवासगतायाश्च सैन्धवेन दुरात्मना। परामर्षो द्वितीयो वै सोढुमुत्सहते तु का।
मत्स्यराज्ञः समक्षन्तु तस्य धूर्त्तस्य पश्यतः। कीचकेन पदास्पृष्टा का नु जीवति मादृशी।
एवं बहुविधैः क्लेशैः क्लिश्यमानाञ्च भारत। न मां जानासि कौन्तेय किं फलं जीवितेन मे।
योऽयं राज्ञो विराटस्य कीचको नाम भारत। सेनानीः पुरुषव्याघ्र श्यालः परमदुर्म्मतिः।
स मां सैरिन्ध्रिवेशेन वसन्तीं राजवेश्मनि। नित्यमेवाह दुष्टात्मा भार्य्या मम भवेति वै। ५३०
तेनोपमन्त्र्यमाणाया वधार्हेण सपत्नहन्। कालेनेव फलं पक्वं हृदयं मे विदीर्य्यते।
भ्रातरञ्च विगर्हस्व ज्येष्ठं दुर्द्यूतदेविनं। यस्यास्मि कर्म्मणा प्राप्ता दुःखमेतदनन्तकं।
को हि राज्यं परित्यज्य सर्व्वस्वं चात्मना सह। प्रव्रज्यायैव दीव्येत विना दुर्द्यूतदेविनं।
यदि निष्कसहस्रेण यच्चान्यत्सारवद्धनं। सायं प्रातरदेविष्यदपि सम्वत्सरान् बहून्।
रुक्मं हिरण्यं वासांसि यानं युग्यमजाविकं। अश्वाश्वतरसङ्घांश्च न जातु क्षयमावहेत्। ५३५
सोऽयं द्यूतप्रवादेन श्रिया प्रत्यवरोपितः। तूष्णीमास्ते यथा मूढः स्वानि कर्म्माणि चिन्तयन्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

दशनागसहस्राणि हयानां हेममालिनां। यं यान्तमनुयान्तीह सोऽयं द्यूतेन जीवति।
रथाः शतसहस्राणि नृपाणाममितौजसां। उपासन्त महाराजमिन्द्रप्रस्थे युधिष्ठिरं।
शतं दासीसहस्राणां यस्य नित्यं महानसे। पात्रीहस्तं दिवारात्रमतिथीन् भोजयत्युत।
एष निष्कसहस्राणि प्रदाय ददताम्वरः। द्यूतजेन ह्यनर्थेन महता समुपाश्रितः। ५४०
एनं हि स्वरसम्पन्ना वहवः सूतमागधाः। सायम्प्रातरुपातिष्ठन् सुमृष्टमणिकुण्डलाः।
सहस्रमृषयो यस्य नित्यमासन् सभासदः। तपःश्रुतोपसम्पन्नाः सर्व्वकामैरुपस्थिताः।
अष्टाशीतिसहस्राणि स्नातका गृहमेधिनः। त्रिंशद्दासीक एकैको यान् बिभर्त्ति युधिष्ठिरः।
अप्रतिग्राहिणाञ्चैव यतीनामूर्द्ध्वरेतसां। दश चापि सहस्राणि सोऽयमास्ते नरेश्वरः।
आनृशंस्यमनुक्रोशं संविभागस्तथैव च। यस्मिन्नेतानि सर्व्वाणि सोऽयमास्ते नरेश्वरः। ५४५
अन्धान् वृद्धांस्तथाऽनाथान् बालान् राष्ट्रेषु दुर्गतान्। बिभर्त्ति विविधान्राजा धृतिमान् सत्यविक्रमः।
संविभागमना नित्यमानृशंस्याद्युधिष्ठिरः। स एष निरयं प्राप्तो मत्स्यस्य परिचारकः।
सभायां देविता राज्ञः कङ्को ब्रूते युधिष्ठिरः। इन्द्रप्रस्थे निवसतः समये यस्य पार्थिवाः।
आसन् वलिभृतः सर्व्वे सोऽद्यान्यैर्भृतिमिच्छति। पार्थिवाः पृथिवीपाला यस्यासन्वशवर्त्तिनः।
स्ववशे विवशो राजा परेषामद्य वर्त्तते। प्रताप्य पृथिवीं सर्व्वां रश्मिवानिव तेजसा। ५५०
सोऽयं राज्ञो विराटस्य सभास्तारो युधिष्ठिरः। यमुपासत राजानः सभायामृषिभिः सह।
तमुपासीनमद्यान्यं पश्य पाण्डव पाण्डवं। सदस्यं समुपासीनं परस्य प्रियवादिनं।
दृष्ट्वा युधिष्ठिरं कोपो वर्द्धते मामसंशयं। अतदर्हं महाप्राज्ञं जीवितार्थेऽभिसंस्थितं।
दृष्ट्वा कस्य न दुःखं स्याद्धर्म्मात्मानं युधिष्ठिरं। उपास्ते स्म सभायां यं कृत्स्नवीरवसुन्धरा।
तमुपासीनमप्यन्यं पश्य भारत भारतं। एवं बहुविधैर्दुःखैः पीड्यमानामनाथवत्। ५५५
शोकसागरमध्यस्थां किं मां भीम न पश्यसि।

इति श्रीमहाभारते विराटपर्व्वणि कीचकवधपर्व्वणि द्रौपदीभीमसंवादेऽष्टादशोऽध्यायः ॥ १८ ॥

॥ द्रौपद्युवाच ॥ इदन्तु मे महद्दुःखं यत्प्रवक्ष्यामि भारत। न मेऽभ्यसूया कर्त्तव्या दुःखादेतद्ब्रवीम्यहं।
सूदकर्म्मणि हीने त्वमसमे भरतर्षभ। ब्रुवन् बल्लवजातीयः कस्य शोकं न वर्द्धयेः।
सूपकारं विराटस्य बल्लवं त्वां विदुर्ज्जनाः। प्रेष्यत्वं समनुप्राप्तं ततो दुःखतरं नु किं।
यदा महानसे सिद्धे विराटमुपतिष्ठसे। ब्रुवाणो बल्लवः सूदस्तदा सीदति मे मनः।
यदा प्रहृष्टः सम्राट् त्वां संयोधयति कुञ्जरैः। हसन्त्यन्तःपुरे नार्य्यो मम तूद्विजते मनः। ५६०
शार्दूलैर्महिषैः सिंहैरागारे योध्यसे यदा। कैकेय्याः क्रियमाणायास्तदा मे कश्मलोऽभवत्।
तत उत्थाय कैकेयी सर्व्वास्ताः प्रत्यभाषत। प्रेष्याः समुत्थिताश्चापि कैकेयीन्ताः स्त्रियोऽब्रुवन्।
प्रेक्ष्य मामनवद्याङ्गीं कश्मलोपहतामिव। स्नेहात् संवासजाद्धर्म्मात् सूदमेषा शुचिस्मिता।
योध्यमानं महावीर्य्यैरियं समनुशोचति। कल्याणरूपा सैरिन्ध्री बल्लवश्चापि सुन्दरः। ५६५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स्त्रीणां चित्तं च दुर्ज्ञेयं युक्तरूपौ च मे मतौ । सैरिन्ध्रीप्रियसंवासान्नित्यं करुणवादिनी ।
अस्मिन् राजकुले चोभौ तुल्यकालनिवासिनौ । इति ब्रुवाणा वाक्यानि सा मां नित्यमतर्ज्जयत् ।
क्रुध्यन्तीं माञ्च सम्प्रेक्ष्य समशङ्कत मां त्वयि । तस्यां तथा ब्रुवन्त्यान्तु दुःखं मां महदाविशत् ।
त्वय्येवं निरयम्प्राप्ते भीमे भीमपराक्रमे । शोके यौधिष्ठिरे मग्ना नाहं जीवितुमुत्सहे ।
यः सदेवान्मनुष्यांश्च सर्व्वांश्चैकरथोऽजयत् । सोऽयं राज्ञो विराटस्य कन्यानां नर्त्तको युवा । ५७०
योऽतर्पयदमेयात्मा खाण्डवे जातवेदसं । सोऽन्तःपुरगतः पार्थः कूपेऽग्निरिव संवृतः ।
यस्माद्भयममित्राणां सदैव पुरुषर्षभात् । स लोकपरिभूतेन वेशेनास्ते धनञ्जयः ।
यस्य ज्याक्षेपकठिनौ बाहू परिघसन्निभौ । स शङ्खपरिपूर्णाभ्यां शोचन्नास्ते धनञ्जयः ।
यस्य ज्यातलनिर्घोषात् समकम्पन्त शत्रवः । स्त्रियो गीतस्वनन्तस्य मुदिताः पर्य्युपासते ।
किरीटं सूर्य्यसङ्काशं यस्य मूर्द्धन्यशोभत । वेणीविकृतकेशान्तः सोऽयमद्य धनञ्जयः । ५७५
तं वेणीकृतकेशान्तं भीमधन्वानमर्ज्जुनं । कन्यापरिवृतं दृष्ट्वा भीम सीदति मे मनः ।
यस्मिन्नस्त्राणि दिव्यानि समस्तानि महात्मनि । आधारः सर्व्वविद्यानां स धारयति कुण्डले ।
यस्य राजसहस्राणि तेजसाऽप्रतिमानि वै । समरे नाभ्यवर्त्तन्त वेलामिव महार्णवः ।
सोऽयं राज्ञो विराटस्य कन्यानां नर्त्तको युवा । आस्ते वेशप्रतिच्छन्नः कन्यानां परिचारकः ।
यस्य स्म रथघोषेण समकम्पत मेदिनी । सपर्व्वतवना भीमा सहस्थावरजङ्गमा । ५८०
यस्मिन् जाते महाभागे कुन्त्याः शोको व्यनश्यत । स शोचयति मामद्य भीमसेन तवानुजः ।
भूषितं तमलङ्कारैः कुण्डलैः परिहाटकैः । कम्बुपाणिनमायान्तं दृष्ट्वा सीदति मे मनः ।
यस्य नास्ति समो वीर्य्ये कश्चिदुर्व्यान्धनुर्द्धरः । सोऽद्य कन्यापरिवृतो गायन्नास्ते धनञ्जय ।
धर्म्मे शौर्य्ये च सत्ये च जीवलोकस्य सम्मतं । स्त्रीवेशविकृतं पार्थं दृष्ट्वा सीदति मे मनः ।
यदा ह्येनं परिवृतं कन्याभिर्द्देवरूपिणं । प्रभिन्नमिव मातङ्गं परिकीर्णं करेणुभिः । ५८५
मत्स्यमर्थपतिं पार्थं विराटं समुपस्थितं । पश्यामि तूर्य्यमध्यस्थं दिशो नश्यन्ति मे तदा ।
नूनमार्य्या न जानाति कृच्छ्रं प्राप्तं धनञ्जयं । अजातशत्रुं कौरव्यं मग्नं दुर्य्यूतदेविनं ।
तथा दृष्ट्वा यवीयांसं सहदेवं गवाम्पतिं । गोषु गोवेशमायान्तं पाण्डुभूताऽस्मि भारत ।
सहदेवस्य वृत्तानि चिन्तयन्ती पुनःपुनः । न निद्रामभिगच्छामि भीमसेन कुतो रतिं ।
न विन्दामि महाबाहो सहदेवस्य दुष्कृतं । यस्मिन्नेवंविधं दुःखं प्राप्नुयात् सत्यविक्रमः । ५९०
दूयामि भरतश्रेष्ठ दृष्ट्वा ते भ्रातरम्प्रियं । गोषु गोवृषसङ्काशं मत्स्येनाभिनिवेशितं ।
संरब्धं रक्तनेपथ्यं गोपालानां पुरोगमं । विराटमभिनन्दन्तमथ मे भवति ज्वरः ।
सहदेवं हि मे वीरं नित्यमार्य्या प्रशंसति । महाभिजनसम्पन्नः शीलवान् वृत्तवानिति ।
ह्रीनिषेवो मधुरवाक् धार्म्मिकश्च प्रियश्च मे । स तेऽरण्येषु वोढव्यो याज्ञसेनि क्षपास्वपि ।
सुकुमारश्च शूरश्च राजानं चाप्यनुव्रतः । ज्येष्ठापचायिनं वीरं स्वयं पाञ्चालि भोजयेः । ५९५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इत्युवाच हि मां कुन्ती रुदती पुत्त्रगर्द्धिनी। प्रव्रजन्तं महारण्यं तं परिष्वज्य तिष्ठती।
तं दृष्ट्वा व्यापृतङ्गोषु वत्सचर्म्मक्षपाशयं। सहदेवं युधां श्रेष्ठं किन्नु जीवामि पाण्डव।
यस्त्रिभिर्न्नित्यसम्पन्नो रूपेणास्त्रेण मेधया। सोऽश्वबन्धो विराटस्य पश्य कालस्य पर्य्ययं।
अभ्यकीर्य्यन्त वृन्दानि दामग्रन्थिमुदीक्ष्यतं। विनयन्तञ्जवेनाश्वान् महाराजस्य पश्यतः।
अपश्यमेनं श्रीमन्तं मत्स्यं भ्राजिष्णुमुत्तमं। विराटमुपतिष्ठन्तं दर्शयन्तञ्च वाजिनः। ६००
किन्नु मां मन्यसे पार्थ सुखिनीति परन्तप। एवं दुःखशताविष्टा युधिष्ठिरनिमित्ततः।
अतः प्रतिविशिष्टानि दुःखान्यन्यानि भारत। वर्त्तन्ते मयि कौन्तेय वक्ष्यामि शृणु तान्यपि।
युष्मासु ध्रियमाणेषु दुःखानि विविधान्युत। शोषयन्ति शरीरं मे किं नु दुःखमतः परं।
इति श्रीमहाभारते विराटपर्व्वणि कीचकबधपर्व्वणि द्रौपदीभीमसंवादे एकोनविंशोऽध्यायः ॥ १९ ॥
॥ द्रौपद्युवाच ॥ अहं सैरिन्ध्रिवेशेन चरन्ती राजवेश्मनि। शौचदाऽस्मि सुदेष्णाया अक्षधूर्त्तस्य कारणात्।
विक्रियां पश्य मे तीव्रां राजपुत्त्रयाः परन्तप। आत्मकालमुदीक्षन्ती सर्व्वं दुःखं किलान्तवत्। ६०५
अनित्या किल मर्त्यानामर्थसिद्धिर्ज्जयाजयौ। इति कृत्वा प्रतीक्षामि भर्त्तॄणामुदयं पुनः।
चक्रवत् परिवर्त्तन्ते ह्यर्थाश्च व्यसनानि च। इति कृत्वा प्रतीक्षामि भर्त्तॄणामुदयं पुनः।
य एव हेतुर्भवति पुरुषस्य जयावहः। पराजये च हेतुश्च स इति प्रतिपालये।
किं मां न प्रतिजानीषे भीमसेन मृतामिव। दत्त्वा याचन्ति पुरुषा हत्वा बध्यन्ति चापरे।
पातयित्वा च पात्यन्ते परैरिति च मे श्रुतं। न दैवस्यातिभारोऽस्ति न चैवास्यातिवर्त्तनं। ६१०
इति चाप्यागमं भूयो दैवस्य प्रतिपालये। स्थितं पूर्व्वं जलं यत्र पुनस्तत्रैव गच्छति।
इति पर्य्यायमिच्छन्ती प्रतीक्षे उदयं पुनः। दैवेन किल यस्यार्थः स नीतोऽपि विपद्यते।
दैवस्य चागमे यत्नस्तेन कार्य्यो विजानता। यत्तु मे वचनस्यास्य कथितस्य प्रयोजनं।
पृच्छ मां दुःखितां तत्त्वं पृष्टा चात्र ब्रवीमि ते। महिषी पाण्डुपुत्त्राणां दुहिता द्रुपदस्य च।
इमामवस्थां सम्प्राप्ता मदन्या का जिजीविषेत्। कुरून्परिभवेत् सर्व्वान् पाञ्चालानपि भारत। ६१५
पाण्डवेयांश्च सम्प्राप्तो मम क्लेशो ह्यरिन्दम। भ्रातृभिः श्वशुरैः पुत्त्रैर्बहुभिः परिवारिता।
एवं समुदिता नारी कात्वन्या दुःखिता भवेत्। नूनं हि बालया धातुर्म्मया वै विप्रियं कृतं।
यस्य प्रसादाद्दुर्न्नीतं प्राप्ताऽस्मि भरतर्षभ। वर्णावकाशमपि मे पश्य पाण्डव यादृशं।
तादृशो मे न तत्रासीत् दुःखे परमके तदा। त्वमेव भीम जानीषे यन्मे पार्थ सुखं पुरा।
साऽहन्दासीत्वमापन्ना न शान्तिमवशा लभे। नादैविकमहं मन्ये यत्र पार्थो धनञ्जयः। ६२०
भीमधन्वा महाबाहुरास्ते छन्न इवानलः। अशक्या वेदितुं पार्थ प्राणिनां वै गतिर्न्नरैः।
विनिपातमिमं मन्ये युष्माकं ह्यविचिन्तितं। यस्या मम सुखप्रेक्ष्या यूयमिन्द्रसमाः सदा।
सा प्रेक्षे सुखमन्यासामवराणां वरा सती। पश्य पाण्डव मेऽवस्थां यथा नार्हामि वै तथा।
युष्मासु ध्रियमाणेषु पश्य कालस्य पर्य्ययं। यस्याः सागरपर्य्यन्ता पृथिवी वशवर्त्तिनी।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

आशीत्साऽद्य सुदेष्णाया भीताऽहं वशवर्त्तिनी । यस्याः पुरःसरा आसन् पृष्ठतश्चानुगामिनः ।
साऽहमद्य सुदेष्णायाः पुरः पश्चाच्च गामिनी । इदन्तु दुःखं कौन्तेय ममासह्यं निबोध तत् ।
या न जातु स्वयं पिंषे गात्रोद्वर्त्तनमात्मनः । अन्यत्र कुन्त्या भद्रन्ते सा पिनष्म्यद्य चन्दनं ।
पश्य कौन्तेय पाणी मे नैवाभूतां हि यौ पुरा । इत्यस्य दर्शयामास किणवन्तौ करावुभौ ।
बिभेमि कुन्त्या या नाहं युष्माकं वा कदाचन । साऽद्याग्रतो विराटस्य भीता तिष्ठामि किङ्करी ।
किं नु वक्ष्यति सम्राण्मां वर्णकः सुकृतो न वा । नान्यपिष्टं हि मत्स्यस्य चन्दनं किल रोचते ।
॥ वैशम्पायन उवाच ॥ सा कीर्त्तयन्ती दुःखानि भीमसेनस्य भामिनी । रुरोद शनकैः कृष्णा भीमसेनमुदीक्षती ।
सा वाष्पकलया वाचा निःश्वसन्ती पुनःपुनः । हृदयं भीमसेनस्य घटयन्तीदमब्रवीत् ।
॥ द्रौपद्युवाच ॥ नाल्पं कृतं मया भीम देवानां किल्बिषं पुरा । अभाग्या यत्र जीवामि कर्त्तव्ये सति पाण्डव ।
॥ वैशम्पायन उवाच ॥ ततस्तस्याः करौ सूक्ष्मौ किणवन्तौ वृकोदरः । मुखमानीय वै पत्न्या रुरोद परवीरहा ।
तौ गृहीत्वा च कौन्तेयो वाष्पमुत्सृज्य वीर्य्यवान् । ततः परमदुःखार्त्त इदं वचनमब्रवीत् ।
इति श्रीमहाभारते विराटपर्व्वणि कीचकवधपर्व्वणि द्रौपदीभीमसंवादे विंशोऽध्यायः ॥ २० ॥
॥ भीमसेन उवाच ॥ धिगस्तु मे बाहुबलं गाण्डीवं फाल्गुनस्य च । यत्ते रक्तौ पुरा भूत्वा पाणी कृतकिणाविमौ ।
सभायान्तु विराटस्य करोमि कदनं महत् । तत्र मे कारणं भाति कौन्तेयो यत् प्रतीक्षते ।
अथ वा कीचकस्याहं पोथयामि पदा शिरः । ऐश्वर्य्यमदमत्तस्य क्रीडन्निव महाद्विपः ।
अपश्यन्त्वां यदा कृष्णे कीचकेन पदाहतां । तदैवाहं चिकीर्षामि मत्स्यानां कदनं महत् ।
तत्र मां धर्म्मराजस्तु कटाक्षेण न्यवारयत् । तदहन्तस्य विज्ञाय स्थित एवास्मि भामिनि ।
यच्च राष्ट्रात् प्रच्यवनं कुरूणामवधश्च यः । सुयोधनस्य कर्णस्य शकुनेः सौबलस्य च ।
दुःशासनस्य पापस्य यन्मया न हृतं शिरः । तन्मे दहति गात्राणि हृदि शल्यमिवार्पितं ।
मा धर्म्मं जहि सुश्रोणि क्रोधं जहि महामते । इदन्तु समुपालम्भं त्वत्तो राजा युधिष्ठिरः ।
शृणुयाद्वाऽपि कल्याणि कृत्स्नं जह्यात् स जीवितं । धनञ्जयो वा सुश्रोणि यमौ वा तनुमध्यमे ।
लोकान्तरगतेष्वेषु नाहं शक्ष्यामि जीवितुं । पुरा सुकन्या भार्य्या च भार्गवं च्यवनं वने ।
वल्मीकभूतं शाम्यन्तमन्वपद्यत भामिनी । नारायणी चेन्द्रसेना रूपेण यदि ते श्रुता ।
पतिमन्वचरद्वृद्धं पुरा वर्षसहस्रिणं । दुहिता जनकस्यापि वैदेही यदि ते श्रुता ।
पतिमन्वचरत्सीता महारण्यनिवासिनं । रक्षसा निग्रहं प्राप्य रामस्य महिषी प्रिया ।
क्लिश्यमानाऽपि सुश्रोणी राममेवान्वपद्यत । लोपामुद्रा तथा भीरु वयोरूपसमन्विता ।
अगस्त्यमन्वयाद्धित्वा कामान् सर्व्वानमानुषान् । द्युमत्सेनसुतं वीरं सत्यवन्तमनिन्दिता ।
सावित्र्यनुचचारैका यमलोकं मनस्विनी । यथैताः कीर्त्तिता नार्य्यो रूपवत्यः पतिव्रताः ।
तथा त्वमपि कल्याणि सर्व्वैः समुदिता गुणैः । मा दीर्घं क्षम कालन्त्वं मासमर्द्धञ्च सम्मितं ।
पूर्णे त्रयोदशे वर्षे राज्ञां राज्ञी भविष्यसि ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ द्रौपद्युवाच ॥ आर्त्तयैतन्मया भीम कृतं वाष्पप्रमोचनं । अपारयन्त्या दुःखानि न राजानमुपालभे ।
किमुक्तेन व्यतीतेन भीमसेन महाबल । प्रत्युपस्थितकालस्य कार्य्यस्यानन्तरो भव । ६६०
ममेह भीम कैकेयी रूपाभिभवशङ्कया । नित्यमुद्विजते राजा कथं नेयादिमामिति ।
तस्या विदित्वा तं भावं स्वयं चानृतदर्शनः । कीचकोऽयं सुदुष्टात्मा सदा प्रार्थयते हि मां ।
तमहं कुपिता भीम पुनः कोपं नियम्य च । अब्रुवं कामसंमूढमात्मानं रक्ष कीचक ।
गन्धर्व्वाणामहं भार्य्या पञ्चानां महिषी प्रिया । ते त्वां निहन्युः कुपिताः शूराः साहसकारिणः ।
एवमुक्तः सुदुष्टात्मा कीचकः प्रत्युवाच ह । नाहं बिभेमि सैरिन्ध्रि गन्धर्व्वाणां शुचिस्मिते । ६६५
शतं शतसहस्राणि गन्धर्व्वाणामहं रणे । समागतं हनिष्यामि त्वम्भीरु कुरु मे क्षणं ।
इत्युक्ते चाब्रुवं मत्तं कामातुरमहं पुनः । न त्वम्प्रतिबलस्तेषां गन्धर्व्वाणां यशस्विनां ।
धर्म्मे स्थिताऽस्मि सततं कुलशीलसमन्विता । नेच्छामि कश्चिद्वध्यन्तं तेन जीवसि कीचक ।
एवमुक्तः स दुष्टात्मा प्राहसत् स्वनवत्तदा । अथ मां तत्र कैकेयी प्रेषयत् प्रणयेन तु ।
तेनैव देशिता पूर्व्वं भ्रातृप्रियचिकीर्षया । सुरामानय कल्याणि कीचकस्य निवेशनात् । ६७०
सूतपुत्त्रस्तु मां दृष्ट्वा महत् सान्त्वमवर्त्तयत् । सान्त्वे प्रतिहते क्रुद्धः परामर्षमनाऽभवत् ।
विदित्वा तस्य सङ्कल्पं कीचकस्य दुरात्मनः । तथाऽहं राजशरणं जवेनैव प्रधाविता ।
सन्दर्शने तु मां राज्ञः सूतपुत्त्रः परामृषत् । पातयित्वा तु दुष्टात्मा पदाऽहन्तेन ताडिता ।
प्रेक्षते स्म विराटस्तु कङ्कस्तु बहवो जनाः । रथिनः पीठमर्द्दाश्च हस्त्यारोहाश्च नैगमाः ।
उपालब्धो मया राजा कङ्कश्चापि पुनः पुनः । ततो न वारितो राज्ञा न तस्य विनयः कृतः । ६७५
योऽयं राज्ञो विराटस्य कीचको नाम सारथिः । त्यक्तधर्म्मा नृशंसश्च नरस्त्रीसम्मतः प्रियः ।
शूरोऽभिमानी पापात्मा सर्व्वार्थेषु च मुग्धवान् । दारामर्षी महाभाग लभतेऽर्थान् बहूनपि ।
आहरेदपि वित्तानि परेषां क्रोशतामपि । न तिष्ठति स्म सन्मार्गे नच धर्म्मं बुभूषति ।
पापात्मा पापभावश्च कामबाणवशानुगः । अविनीतश्च दुष्टात्मा प्रत्याख्यातः पुनःपुनः ।
दर्शने दर्शने हन्याद्यदि जह्याञ्च जीवितं । तद्धर्म्मे यतमानानां महान् धर्म्मो नशिष्यति । ६८०
समयं रक्षमाणानां भार्य्या वो न भविष्यति । भार्य्यायां रक्ष्यमाणायां प्रजा भवति रक्षिता ।
प्रजायां रक्ष्यमाणायामात्मा भवति रक्षितः । आत्मा हि जायते तस्यां तेन जायां विदुर्ब्बुधाः ।
भर्त्ता तु भार्य्यया रक्ष्यः कथञ्जायान्ममोदरे । वदतां वर्णधर्म्मांश्च ब्राह्मणानामिति श्रुतं ।
क्षत्त्रियस्य सदा धर्म्मो नान्यः शत्रुनिबर्हणात् । पश्यतो धर्म्मराजस्य कीचको माम्पदाऽवधीत् ।
तव चैव समक्षं वै भीमसेन महाबल । त्वया ह्यहं परित्राता तस्माद्घोराज्जटासुरात् । ६८५
जयद्रथन्तथैव त्वमजैषीर्भ्रातृभिः सह । जहीममपि पापिष्ठं योऽयं मामवमन्यते ।
कीचको राजवाल्लभ्याच्छोकक्लन्मम भारत । तमेवं कामसंमत्तं भिन्धि कुम्भमिवाश्मनि ।
यो निमित्तमनर्थानां बहूनां मम भारत । तञ्चेज्जीवन्तमादित्यः प्रातरभ्युदयिष्यति ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विषमालोड्य पास्यामि मा कीचकवशङ्गमं। श्रेयो हि मरणं मह्यम्भीमसेन तवाग्रतः।
॥ वैशम्पायन उवाच ॥ इत्युक्त्वा प्रारुदत्कृष्णा भीमस्योरःसमाश्रिता। भीमश्च ताम्परिष्वज्य महत्सान्त्वं प्रयुज्य च। ६९०
आश्वासयित्वा बहुशो भृशमार्त्तां सुमध्यमां। हेतुतत्त्वार्थसंयुक्तैर्व्वचोभिर्द्रुपदात्मजां।
प्रमृज्य वदनं तस्याः पाणिनाऽश्रुसमाकुलं। कीचकं मनसाऽगच्छत् सृक्कणी परिसंलिहन्।
उवाच चैनां दुःखार्त्तां भीमः क्रोधसमन्वितः।
इति श्रीमहाभारते विराटपर्व्वणि कीचकवधपर्व्वणि द्रौपदीसान्त्वने एकविंशोऽध्यायः॥ २१ ॥
॥ भीमसेन उवाच ॥ तथा भद्रे करिष्यामि यथा त्वम्भीरु भाषसे। अद्य तं सूदयिष्यामि कीचकं सहबान्धवं।
अस्याः प्रदोषे सर्व्वर्य्याः कुरुष्वानेन सङ्गतं। दुःखं शोकञ्च निर्द्धूय याज्ञसेनि शुचिस्मिते। ६९५
यैषा नर्त्तनशालेह मत्स्यराजेन कारिता। दिवाऽत्र कन्या नृत्यन्ति रात्रौ यान्ति यथागृहं।
तत्रास्ति शयनं दिव्यं दृढाङ्गं सुप्रतिष्ठितं। तत्रास्य दर्शयिष्यामि पूर्व्वप्रेतान् पितामहान्।
यथा च त्वां न पश्येयुः कुर्व्वाणां तेन संविदं। कुर्य्यास्तथा त्वं कल्याणि यथा सन्निहितो भवेत्।
॥ वैशम्पायन उवाच ॥ तथा तौ कथयित्वा तु वाष्पमुत्सृज्य दुःखितौ। रात्रिशेषं तमत्युग्रं धारयामासतुर्हृदि।
तस्यां रात्र्यां व्यतीतायां प्रातरुत्थाय कीचकः। गत्वा राजकुलायैव द्रौपदीमिदमब्रवीत्। ७००
सभायां पश्यतो राज्ञः पातयित्वा पदाऽहनं। नचैवालभसे त्राणमभिपन्ना बलीयसा।
प्रवादेनेह मत्स्यानां राजा नाम्नाऽयमुच्यते। अहमेव हि मत्स्यानां राजा वै वाहिनीपतिः।
मां सुखं प्रतिपद्यस्व दासो भीरु भवामि ते। अह्नाय तव सुश्रोणि शतं निष्कं ददाम्यहं।
दासीशतञ्च ते दद्यां दासानामपि चापरं। रथं चाश्वतरीयुक्तमस्तु नौ भीरु सङ्गमः।
॥ द्रौपद्युवाच ॥ एवं मे समयं त्वद्य प्रतिपद्यस्व कीचक। न त्वां सखा वा भ्राता वा जानीयात्सङ्गतं मया। ७०५
अनुप्रवादाद्भीताऽस्मि गन्धर्व्वाणां यशस्विनां। एवं मे प्रतिजानीहि ततोऽहं वशगा तव।
॥ कीचक उवाच ॥ एवमेतत् करिष्यामि यथा सुश्रोणि भाषसे। एको भद्रे गमिष्यामि शून्यमावसथं तव।
समागमार्थं रम्भोरु त्वया मदनमोहितः। यथा त्वां नैव पश्येयुर्गन्धर्व्वाः सूर्य्यवर्चसः।
॥ द्रौपद्युवाच ॥ यदेतन्नर्त्तनागारं मत्स्यराजेन कारितं। दिवाऽत्र कन्या नृत्यन्ति रात्रौ यान्ति यथागृहं।
तमिस्रे तत्र गच्छेथा गन्धर्व्वास्तन्न जानते। तत्र दोषः परिहृतो भविष्यति न संशयः। ७१०
॥ वैशम्पायन उवाच ॥ तमर्थमभिजल्पन्त्याः कृष्णायाः कीचकेन ह। दिवसार्द्धं समभवन्मासेनैव समं नृप।
ततः सा भीमसेनस्य तमर्थं प्रत्यवेदयत्। कीचकोऽथ गृहं गत्वा भृशं हर्षपरिप्लुतः।
सैरिन्ध्रीरूपिणं मूढो मृत्युं तन्नावबुद्धवान्। गन्धाभरणमाल्येषु व्यासक्तः सविशेषतः।
अलञ्चक्रे तदात्मानं सत्वरं काममोहितः। तस्य तत् कुर्व्वतः कर्म्म कालो दीर्घ इवाभवत्।
अनुचिन्तयतश्चापि तामेवायतलोचनां। आसीदभ्यधिका चापि श्रीः श्रियं प्रमुमुक्षतः। ७१५
निर्व्वाणकाले दीपस्य वर्त्तीमिव दिधक्षतः। कृतसम्प्रत्ययस्तस्याः कीचकः काममोहितः।
नाजानाद्दिवसं यान्तं चिन्तयानः समागमं। ततस्तु द्रौपदी गत्वा तदा भीमं महानसे।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon.

उपातिष्ठत कल्याणी कौरव्यं पतिमन्तिकं । तमुवाच सुकेशान्ता कीचकस्य मया कृतः ।
सङ्गमो नर्त्तनागारे यथाऽवोचः परन्तप । शून्यं स नर्त्तनागारमागमिष्यति कीचकः ।
एको निशि महाबाहो कीचकं तं निसूदय । तं सूतपुत्त्रं कौन्तेय कीचकं मददर्प्पितं । ७२०
गत्वा त्वं नर्त्तनागारं निर्ज्जीवं कुरु पाण्डव । दर्पाच्च सूतपुत्त्रोऽसौ गन्धर्व्वानवमन्यते ।
तं त्वं प्रहरतां श्रेष्ठ ह्रदान्नागमिवोद्धर । अश्रु दुःखाभिभूताया मम मार्ज्जस्व भारत ।
आत्मनश्चैव भद्रन्ते कुरु मानं कुलस्य च ।
॥ भीमसेन उवाच ॥ एवं करोम्यहं भद्रे यथा त्वं भीरु भाषसे । स्वागतं ते वरारोहे यन्मां वेदयसे प्रियं ।
न ह्यन्यं कञ्चिदिच्छामि सहायं वरवर्णिनि । या मे प्रीतिस्त्वयाख्याता कीचकस्य समागमे । ७२५
हत्वा हिडिम्बं सा प्रीतिर्म्ममासीद्वरवर्णिनि । सत्यं भ्रातॄंश्च धर्म्मञ्च पुरस्कृत्य ब्रवीमि ते ।
कीचकं निहनिष्यामि वृत्रं देवपतिर्य्यथा । तं गह्वरे प्रकाशे वा पोथयिष्यामि कीचकं ।
अथ चेदपि योत्स्यन्ति हिंसे मत्स्यानपि ध्रुवं । ततो दुर्य्योधनं हत्वा प्रतिपत्स्ये वसुन्धरां ।
कामं मत्स्यमुपास्तां हि कुन्तीपुत्त्रो युधिष्ठिरः ।
॥ द्रौपद्युवाच ॥ यथा न संत्यजेथास्त्वं सत्यं वै मत्कृते विभो । निगूढस्त्वं तथा पार्थ कीचकं तं निसूदय । ७३०
॥ भीमसेन उवाच ॥ एवमेतत् करिष्यामि यथा त्वं भीरु भाषसे । अद्य तं सूदयिष्यामि कीचकं सह बान्धवैः ।
अदृश्यमानस्तस्याद्य तमस्विन्यामनिन्दिते । नागो विल्वमिवाक्रम्य पोथयिष्याम्यहं शिरः ।
अलभ्यामिच्छतस्तस्य कीचकस्य दुरात्मनः ।
॥ वैशम्पायन उवाच ॥ भीमोऽथ प्रथमं गत्वा रात्रौ च्छन्न उपाविशत् । मृगं हरिरिवादृश्यः प्रत्याकाङ्क्षत कीचकं ।
कीचकश्चाप्यलङ्कृत्य यथाकाममुपागमत् । तां वेलां नर्त्तनागारं पाञ्चालीसङ्गमाशया । ७३५
मन्यमानः स सङ्केतमागारं प्राविशत्ततः । प्रविश्य च स तद्वेश्म तमसा संवृतं महत् ।
पूर्व्वागतं गतस्तत्र भीममप्रतिमौजसं । एकान्तावस्थितं चैनमाससाद सुदुर्म्मतिः ।
शयानं शयने तत्र सूतपुत्त्रः परामृषत् । जाज्वल्यमानं कोपेन कृष्णाधर्षणजेन ह ।
उपसङ्गम्य चैवैनं कीचकः काममोहितः । हर्षोन्मथितचित्तात्मा स्मयमानोऽभ्यभाषत ।
प्रापितन्ते मया वित्तं बहुरूपमनन्तकं । त्वत्कृते धनरत्नाढ्यं दासीशतपरिच्छदं ।
रूपलावण्ययुक्ताभिर्युवतीभिरलङ्कृतं । गृहं चान्तःपुरं सुभ्रु क्रीडारतिविराजितं । ७४०
तत्सर्व्वं त्वां समुद्दिश्य सहसाऽहमुपागतः । अकस्मात् मां प्रशंसन्ति सदा गृहगताः स्त्रियः ।
सुवासा दर्शनीयश्च नाऽन्योऽस्ति त्वादृशः पुमान् ।
॥ भीमसेन उवाच ॥ दिष्ट्या त्वं दर्शनीयोऽद्य दिष्ट्यात्मानं प्रशंससि । ईदृशस्तु त्वया स्पर्शः स्पृष्टपूर्व्वो न कर्हिचित् ।
स्पर्शं वेत्सि विदग्धस्त्वं कामधर्म्मविचक्षणः । स्त्रीणां प्रीतिकरो नान्यस्त्वत्समः पुरुषस्त्विह ।
॥ वैशम्पायन उवाच ॥ इत्युक्त्वा तं महाबाहुर्भीमो भीमपराक्रमः । सहसोत्पत्य कौन्तेयः प्रहस्येदमुवाच ह । ७४५
अद्य त्वां भगिनी पापं कृष्यमाणं मया भुवि । द्रक्ष्यतेऽद्रिप्रतीकाश सिंहेनेव महागजं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

निराबाधा त्वयि हते सैरिन्ध्री विचरिष्यति। सुखमेव चरिष्यन्ति सैरिन्ध्र्याः पतयः सदा।
ततो जग्राह केशेषु माल्यवत्सु महाबलः। स केशेषु परामृष्टो बलेन बलिनाम्वरः।
आक्षिप्य केशान्वेगेन बाह्वोर्जग्राह पाण्डवं। बाहुयुद्धं तयोरासीत् क्रुद्धयोर्नरसिंहयोः। ७५०
वसन्ते वासिताहेतोर्बलवद्गजयोरिव। कीचकानान्तु मुख्यस्य नराणामुत्तमस्य च।
वालिसुग्रीवयोर्भ्रात्रोः पुरेव कपिसिंहयोः। अन्योऽन्यमभिसंरब्धौ परस्परजयैषिणौ।
ततः समुद्यम्य भुजौ पञ्चशीर्षाविवोरगौ। नखदंष्ट्राभिरन्योऽन्यं घ्नतः क्रोधविषोद्धतौ।
वेगेनाभिहतो भीमः कीचकेन बलीयसा। स्थिरप्रतिज्ञः स रणे पदान्न चलितः पदं।
तावन्योऽन्यं समाश्लिष्य प्रकर्षन्तौ परस्परं। उभावपि प्रकाशेते प्रवृद्धौ वृषभाविव। ७५५
तयोर्ह्यासीत् सुतुमुलः सम्प्रहारः सुदारुणः। नखदन्तायुधवतोर्व्याघ्रयोरिव दृप्तयोः।
अभिपत्याथ बाहुभ्यां प्रत्यगृह्णादमर्षितः। मातङ्ग इव मातङ्गं प्रभिन्नकरटामुखं।
स चाप्येनं तदा भीमः प्रतिजग्राह वीर्य्यवान्। तमाक्षिपत् कीचकोऽथ बलेन बलिनां वरः।
तयोर्भुजविनिष्पेषादुभयोर्ब्बलिनोस्तदा। शब्दः समभवद्घोरो वेणुस्फोटसमो युधि।
अथैनमाक्षिप्य बलाद्गृहमध्ये वृकोदरः। धूनयामास वेगेन वायुश्चण्ड इव द्रुमं। ७६०
भीमेन च परामृष्टो दुर्ब्बलो बलिना रणे। व्यस्पन्दत यथाप्राणं विचकर्ष च पाण्डवं।
ईषदाकलितं चापि क्रोधात् द्रुतपदं स्थितं। कीचको बलवान् भीमं जानुभ्यामाक्षिपद्भुवि।
पातितो भुवि भीमस्तु कीचकेन बलीयसा। उत्पपाताथ वेगेन दण्डपाणिरिवान्तकः।
स्पर्द्धया च बलोन्मत्तौ तावुभौ सूतपाण्डवौ। निशीथे पर्य्यकर्षेतां बलिनौ निर्जने स्थले।
ततस्तद्भवनश्रेष्ठं प्राकम्पत मुहुर्मुहुः। बलवच्चापि संक्रुद्धावन्योऽन्यं प्रति गर्ज्जतां। ७६५
तलाभ्यां स तु भीमेन वक्षस्यभिहतो बली। कीचको रोषसन्तप्तः पदान्न चलितः पदं।
मुहूर्त्तं तु स तं वेगं सहित्वा भुवि दुःसहं। बलादहीयत तदा सूतो भीमबलार्द्दितः।
तं हीयमानं विज्ञाय भीमसेनो महाबलः। वक्षस्यानीय वेगेन ममर्द्दैनं विचेतसं।
क्रोधाविष्टो विनिःश्वस्य पुनश्चैनं वृकोदरः। जग्राह जयतां श्रेष्ठः केशेष्वेव तदा भृशं।
गृहीत्वा कीचकं भीमो विरुराव महाबलः। शार्दूलः पिशिताकाङ्क्षी गृहीत्वेव महामृगं। ७७०
तत एनं परिश्रान्तमुपलभ्य वृकोदरः। योजयामास बाहुभ्यां पशुं रशनया यथा।
नदन्तञ्च महानादं भिन्नभेरीसमस्वनं। भ्रामयामास सुचिरं विस्फुरन्तमचेतसं।
प्रगृह्य तरसा दोर्भ्यां कण्ठं तस्य वृकोदरः। अपीड़यत कृष्णायास्तदा कोपोपशान्तये।
अथ तम्भग्नसर्व्वाङ्गं व्याविद्धनयनाम्बरं। आक्रम्य च कटीदेशे जानुना कीचकाधमं।
अपीडयत बाहुभ्यां पशुमारममारयत्। तं विषीदन्तमाज्ञाय कीचकं पाण्डुनन्दनः। ७७५
भूतले भ्रामयामास वाक्यं चेदमुवाच ह। अद्याहमनृणो भूत्वा भ्रातुर्भार्य्यापहारिणं। शान्तिं लब्धाऽस्मि परमां हत्वा सैरिन्ध्रिकण्टकं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding : KS MoE-IKS Grant, Equipment Heritage Foundation, Jalgaon

इत्येवमुक्त्वा पुरुषप्रवीरस्तं कीचकं क्रोधसरागनेत्रः । आस्थलतत्रस्ताभरणं स्फुरन्तमुद्भ्रान्तनेत्रं व्यसुमुत्ससर्ज्ज ।
निष्पिष्य पाणिना पाणिं सन्दष्टौष्ठपुटं बली । समाक्रम्य च संक्रुद्धो बलेन बलिनां वरः ।
तस्य पादौ च पाणी च शिरो ग्रीवाञ्च सर्व्वशः । काये प्रवेशयामास पशोरिव पिनाकधृक् ।
तं संमथितसर्व्वाङ्गं मांसपिण्डोपमं कृतं । कृष्णाया दर्शयामास भीमसेनो महाबलः । ७८०
उवाच च महातेजा द्रौपदीं योषितां वरां । पश्यैनमेहि पाञ्चालि कामुकोऽयं यथाकृतः ।
एवमुक्त्वा महाराज भीमो भीमपराक्रमः । पादेन पीडयामास तस्य कायं दुरात्मनः ।
ततोऽग्निं तत्र प्रज्वाल्य दर्शयित्वा तु कीचकं । पाञ्चालीं स तदा वीर इदं वचनमब्रवीत् ।
प्रार्थयन्ति सुकेशान्ते ये त्वां शीलगुणान्वितां । एवन्ते भीरु बध्यन्ते कीचकः शोभते यथा ।
तत् कृत्वा दुष्करं कर्म्म कृष्णायाः प्रियमुत्तमं । तथा स कीचकं हत्वा गत्वा रोषस्य वै शमं । ७८५
आमन्त्र्य द्रौपदीं कृष्णां क्षिप्रमायान्महानसं । कीचकं घातयित्वा तु द्रौपदी योषितां वरा ।
प्रहृष्टा गतसन्तापा सभापालानुवाच ह । कीचकोऽयं हतः शेते गन्धर्व्वैः पतिभिर्म्मम ।
परस्त्रीकामसंमत्तस्तत्रागच्छत पश्यत । तच्छ्रुत्वा भाषितं तस्या नर्त्तनागाररक्षिणः ।
सहसैव समाजग्मुरादायोल्काः सहस्रशः । ततो गत्वाऽथ तद्वेश्म कीचकं विनिपातितं ।
गतासुं ददृशुर्भूमौ रुधिरेण समुक्षितं । पाणिपादविहीनन्तु दृष्ट्वा च व्यथिताऽभवन् । ७९०
निरीक्षन्ति ततः सर्व्वे परं विस्मयमागताः । अमानुषकृतं कर्म्म तं दृष्ट्वा विनिपातितं ।
क्वास्य ग्रीवा क्व चरणौ क्व पाणी क्व शिरस्तथा । इति स्म तं परीक्षन्ते गन्धर्व्वेण हतं तदा ।
इति श्रीमहाभारते विराटपर्व्वणि कीचकबधपर्व्वणि कीचवधे द्वाविंशोऽध्यायः ॥ २२ ॥
॥ वैशम्पायन उवाच ॥ तस्मिन्काले समागम्य सर्व्वे तत्रास्य बान्धवाः । रुरुदुः कीचकं दृष्ट्वा परिवार्य्य समन्ततः ।
सर्व्वे संहृष्टरोमाणः सन्त्रस्ताः प्रेक्ष्य कीचकं । तथा सम्भिन्नसर्व्वाङ्गं कूर्म्मं स्थल इवोद्धृतं ।
पोथितं भीमसेनेन तमिन्द्रेणेव दानवं । संस्कारयितुमिच्छन्तो बहिर्नेतुं प्रचक्रमुः । ७९५
ददृशुस्ते ततः कृष्णां सूतपुत्राः समागताः । अदूराच्चानवद्याङ्गीं स्तम्भमालिङ्ग्य तिष्ठतीं ।
समवेतेषु सर्व्वेषु तामूचुरुपकीचकाः । हन्यतां शीघ्रमसतीं यत्कृते कीचको हतः ।
अथ वा नैव हन्तव्या दह्यतां कामिना सह । मृतस्यापि प्रियं कार्य्यं सूतपुत्रस्य सर्व्वथा ।
ततो विराटमूचुस्ते कीचकोऽस्याः कृते हतः । सहानेनाद्य दह्येम तदनुज्ञातुमर्हसि ।
पराक्रमन्तु सूतानां मत्वा राजाऽन्वमोदत । सैरिन्ध्याः सूतपुत्रेण सह दाहं विशाम्पतिः ।
तां समासाद्य वित्रस्तां कृष्णां कमललोचनां । मोमुह्यमानां ते तत्र जगृहुः कीचका भृशं । ८००
ततस्तु तां समारोप्य निबध्य च सुमध्यमां । जग्मुरुद्यम्य ते सर्व्वे श्मशानाभिमुखास्तदा ।
ह्रियमाणा तु सा राजन् सूतपुत्रैरनिन्दिता । प्राक्रोशन्नाथमिच्छन्ती कृष्णा नाथवती सती ।
॥ द्रौपद्युवाच ॥ जयो जयन्तो विजयो जयत्सेनो जयद्बलः । ते मे वाचं विजानन्तु सूतपुत्रा नयन्ति मां ।
येषां ज्यातलनिर्घोषो विस्फूर्जितमिवाशनेः । व्यश्रूयत महायुद्धे भीमघोषस्तरस्विनां । ८०५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

रथघोषश्च बलवान् गन्धर्व्वाणां तरस्विनां। ते मे वाचं विजानन्तु सूतपुत्त्रा नयन्ति मां।
॥वैशम्पायन उवाच॥ तस्यास्ताः कृपणा वाचः कृष्णायाः परिदेविताः। श्रुत्वैवाभ्यापतद्भीमः शयनादविचारयन्।
॥भीमसेन उवाच॥ अहं शृणोमि ते वाचं त्वया सैरिन्ध्रि भाषितां। तस्मात्ते सूतपुत्त्रेभ्यो भयं भीरु न विद्यते।
॥वैशम्पायन उवाच॥ इत्युक्त्वा स महाबाहुर्विजजृम्भे जिघांसया। ततः सव्यायतं कृत्वा वेशं विपरिवर्त्त्य च।
अद्वारेणाभ्यवस्कन्द्य निर्ज्जगाम बहिस्तदा। स भीमसेनः प्राकारमारुह्य तरसा द्रुतं। ८१०
श्मशानाभिमुखः प्रायाद्यत्र ते कीचका गताः। स लङ्घयित्वा प्राकारं निःसृत्य च पुरोत्तमात्।
जवेन पतितो भीमः सूतानामग्रतस्तदा। चितासमीपे गत्वा स तत्रापश्यद्वनस्पतिं।
तालमात्रं महास्कन्धमूर्द्धशुष्कं विशाम्पते। तं नागवदुपक्रम्य बाहुभ्यां परिरभ्य च।
स्कन्धमारोपयामास दशव्यामं परन्तप। स तं वृक्षं दशव्यामं सस्कन्धविटपं बली।
प्रगृह्याभ्यद्रवत्सूतान् दण्डपाणिरिवान्तकः। ऊरुवेगेन तस्याथ न्यग्रोधाश्वत्थकिंशुकाः। ८१५
भूमौ निपतिता वृक्षाः सङ्घशस्तत्र शेरते। तं सिंहमिव संक्रुद्धं दृष्ट्वा गन्धर्व्वमागतं।
वित्रेसुः सर्व्वशः सूता विषादभयकम्पिताः। तमन्तकमिवायान्तं गन्धर्व्वं प्रेक्ष्य ते तदा।
दिधक्षन्तस्तदा ज्येष्ठं भ्रातरं ह्युपकीचकाः। परस्परमथोचुस्ते विषादभयकम्पिताः।
गन्धर्व्वो बलवानेति क्रुद्ध उद्यम्य पादपं। सैरिन्ध्री मुच्यतां शीघ्रं यतो नो भयमागतं।
ते तु दृष्ट्वा तदाविद्धं भीमसेनेन पादपं। विमुच्य द्रौपदीं तत्र प्राद्रवन्नगरं प्रति। ८२०
द्रवतस्तांस्तु सम्प्रेक्ष्य स वज्री दानवानिव। शतं पञ्चाधिकं भीमः प्राहिणोद्यमसादनं।
वृक्षेण तेन राजेन्द्र प्रभञ्जनसुतो बली। तत आश्वासयत् कृष्णां स विमुच्य विशाम्पते।
उवाच च महाबाहुः पाञ्चालीं तत्र द्रौपदीं। अश्रुपूर्णमुखीन्दीनां दुर्द्धर्षः स वृकोदरः।
एवन्ते भीरु वध्यन्ते ये त्वां क्लिश्यन्त्यनागसं। प्रैहि त्वं नगरं कृष्णे न भयं विद्यते तव।
अन्येनाहं गमिष्यामि विराटस्य महानसं। ८२५
॥वैशम्पायन उवाच॥ पञ्चाधिकं शतं तच्च निहतं तत्र भारत। महावनमिव च्छिन्नं शिश्ये विगलितद्रुमं।
एवन्ते निहता राजन् शतं पञ्च च कीचकाः। स च सेनापतिः पूर्व्वमित्येतत् सूतषट्शतं।
तद्दृष्ट्वा महदाश्चर्य्यं नरा नार्य्यश्च सङ्गताः। विस्मयं परमं गत्वा नोचुः किञ्चन भारत।
इति श्रीमहाभारते विराटपर्व्वणि कीचकवधपर्व्वणि उपकीचकवधे त्रयोविंशोऽध्यायः॥ २३ ॥
॥वैशम्पायन उवाच॥ ते दृष्ट्वा निहतान्सूतान्राज्ञे गत्वा न्यवेदयन्। गन्धर्व्वैर्निहता राजन् सूतपुत्त्रा महाबलाः।
यथा वज्रेण वै दीर्णं पर्व्वतस्य महच्छिरः। व्यतिकीर्णाः प्रदृश्यन्ते तथा सूता महीतले। ८३०
सैरिन्ध्री च विमुक्ताऽसौ पुनरायाति ते गृहं। सर्व्वं संशयितं राजन् नगरन्ते भविष्यति।
यथारूपा च सैरिन्ध्री गन्धर्व्वाश्च महाबलाः। पुंसामिष्टश्च विषयो मैथुनाय न संशयः।
यथा सैरिन्ध्रिदोषेण न ते राजन्निदं पुरं। विनाशमेति वै क्षिप्रं तथा नीतिर्व्विधीयतां।
तेषां तद्वचनं श्रुत्वा विराटो वाहिनीपतिः। अब्रवीत्क्रियतामेषां सूतानां चरमा क्रिया।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

एकस्मिन्नेव ते सर्व्वे सुसमिद्धे हुताशने । दह्यन्तां कीचकाः शीघ्रं रत्नैर्गन्धैश्च सर्व्वशः । ८३५
सुदेष्णामब्रवीद्राजा महिषीं जातसाध्वसः । सैरिन्ध्रीमागतां ब्रूया ममैव वचनादिदं ।
गच्छ सैरिन्ध्रि भद्रन्ते यथाकामं वरानने । बिभेति राजा सुश्रोणि गन्धर्व्वेभ्यः पराभवात् ।
न हि त्वामुत्सहे वक्तुं स्वयं गन्धर्व्वरक्षितां । स्त्रियास्त्वदोषस्त्वां वक्तुमतस्त्वां प्रब्रवीम्यहं ।
॥ वैशम्पायन उवाच ॥ अथ मुक्ता भयात् कृष्णा सूतपुत्त्रान्निरस्य च । मोक्षिता भीमसेनेन जगाम नगरं प्रति ।
त्रासितेव मृगी बाला शार्दूलेन मनस्विनी । गात्राणि वाससी चैव प्रक्षाल्य सलिलेन सा । ८४०
तां दृष्ट्वा पुरुषा राजन् प्राद्रवन्त दिशो दश । गन्धर्व्वाणां भयत्रस्ताः केचिद्दृष्ट्वा न्यमीलयन् ।
ततो महानसद्वारि भीमसेनमवस्थितं । ददर्श राजन् पाञ्चाली यथा मत्तं महाद्विपं ।
तं विस्मयन्ती शनकैः संज्ञाभिरिदमब्रवीत् । गन्धर्व्वराजाय नमो येनास्मि परिमोचिता ।
॥ भीम उवाच ॥ ये पुरा विचरन्तीह पुरुषा वशवर्त्तिनः । तस्यास्ते वचनं श्रुत्वा त्वनृणा विहरन्त्यतः ।
॥ वैशम्पायन उवाच ॥ ततः सा नर्त्तनागारे धनञ्जयमपश्यत । राज्ञः कन्या विराटस्य नर्त्तयानं महाभुजं । ८४५
ततस्ता नर्त्तनागारादभिनिष्क्रम्य सहार्ज्जुनाः । कन्या ददृशुरायान्तीं क्लिष्टां कृष्णामनागसं ।
दृष्ट्वा तामेत्य सर्व्वास्ता इदमूचुः सहर्षिताः ।
॥ कन्या ऊचुः ॥ दिष्ट्या सैरिन्ध्रि मुक्ताऽसि दिष्ट्याऽसि पुनरागता । दिष्ट्या विनिहताः सूता ये त्वां क्लिश्यन्त्यनागसं ।
॥ बृहन्नलोवाच ॥ कथं सैरिन्ध्रि मुक्ताऽसि कथं पापाश्च ते हताः । इच्छामि वै तव श्रोतुं सर्व्वमेव यथातथं ।
॥ सैरिन्ध्र्युवाच ॥ बृहन्नले किन्नु तव सैरिन्ध्र्या कार्य्यमद्य वै । या त्वं वससि कल्याणि सदा कन्यापुरे सुखं । ८५०
नहि दुःखमवाप्नोषि सैरिन्ध्री यदुपाश्नुते । तेन मां दुःखितामेवं पृच्छसे प्रहसन्निव ।
॥ बृहन्नलोवाच ॥ बृहन्नलाऽपि कल्याणि दुःखमाप्नोत्यनुत्तमं । तिर्य्यग्योनिगता बाले नचैनामवबुध्यसे ।
त्वया सहोषिता चास्मि त्वं च सर्व्वैः सहोषिता । क्लिश्यन्त्यां त्वयि सुश्रोणि को नु दुःखं न चिन्तयेत् ।
न तु केनचिदत्यन्तं कस्यचिद्धृदयङ्क्वचित् । वेदितुं शक्यते नूनं तेन मां नावबुध्यसे ।
॥ वैशम्पायन उवाच ॥ ततः सहैव कन्याभिर्द्रौपदी राजवेश्म तत् । प्रविवेश सुदेष्णायाः समीपमुपगामिनी । ८५५
तामब्रवीद्राजपत्नी विराटवचनादिदं । सैरिन्ध्रि गम्यतां शीघ्रं यत्र कामयसे गतिं ।
राजा बिभेति ते भद्रे गन्धर्व्वेभ्यः पराभवात् । त्वञ्चापि तरुणी सुभ्रु रूपेणाप्रतिमा भुवि ।
पुंसामिष्टश्च विषयो गन्धर्व्वाश्चातिकोपनाः ।
॥ सैरिन्ध्र्युवाच ॥ त्रयोदशाहमात्रं मे राजा क्षाम्यतु भामिनि । कृतकृत्या भविष्यन्ति गन्धर्व्वास्ते न संशयः ।
ततो मामुपनेष्यन्ति करिष्यन्ति च ते प्रियं । ध्रुवञ्च श्रेयसा राजा योक्ष्यते सह बान्धवैः । ८६०
इति श्रीमहाभारते विराटपर्व्वणि कीचकवधपर्व्वणि कीचकदाहे चतुर्विंशोऽध्यायः ॥ २४ ॥ समाप्तञ्च कीचकवधपर्व्व ॥

॥ अथ गोहरणपर्व्व ॥ ३ ॥

॥ वैशम्पायन उवाच ॥ कीचकस्य तु घातेन सानुजस्य विशाम्पते । अत्याहितं चिन्तयित्वा व्यस्मयन्त पृथग्जनाः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तस्मिन् पुरे जनपदे सञ्जल्पोऽभूच्च सर्व्वशः। शौर्य्याद्धि वल्लभो राज्ञो महासत्त्वश्च कीचकः।
आसीत् प्रहर्त्ता सैन्यानां दारामर्षी च दुर्म्मतिः। स हतः खलु पापात्मा गन्धर्व्वैर्दुष्टपूरुषः।
इत्यजल्पन्महाराज परानीकविनाशनं। देशे देशे मनुष्याश्च कीचकं दुष्प्रधर्षणं।
अथ वै धार्त्तराष्ट्रेण प्रयुक्ता ये वहिश्चराः। मृगयित्वा बहून् ग्रामान् राष्ट्राणि नगराणि च। ८६५
संविधाय यथादृष्टं यथादेशप्रदर्शनं। कृतकृत्या न्यवर्त्तन्त ते चरा नगरं प्रति।
तत्र दृष्ट्वा तु राजानं कौरव्यं धृतराष्ट्रजं। द्रोणकर्णकृपैः सार्द्धं भीष्मेण च महात्मना।
सङ्गतं भ्रातृभिश्चापि त्रिगर्त्तैश्च महारथैः। दुर्य्योधनं सभामध्ये आसीनमिदमब्रुवन्।
॥ चरा ऊचुः ॥ कृतोऽस्माभिः परो यत्नस्तेषामन्वेषणे सदा। पाण्डवानां मनुष्येन्द्र तस्मिन्महति कानने।
निर्जने मृगसङ्कीर्णे नानाद्रुमलताकुले। लताप्रतानबहुले नानागुल्मसमावृते। ८७०
न च विद्मो गता येन पार्थाः सुदृढविक्रमाः। मार्गमाणाः पदन्यासं तेषु तेषु तथा तथा।
गिरिकूटेषु दुर्गेषु नानाजनपदेषु च। जनाकीर्णेषु देशेषु कर्बटेषु परेषु च।
नरेन्द्र बहुशोऽन्विष्टा नैव विद्मश्च पाण्डवान्। अत्यन्तं वा विनष्टास्ते भद्रन्तुभ्यं नरर्षभ।
वर्त्मन्यन्वेष्यमाणा वै रथिनां रथिसत्तम। न हि विद्मो गतिं तेषां वासं हि नरसत्तम।
कञ्चित् कालं मनुष्येन्द्र सूतानामनुगा वयं। मृगयित्वा यथान्यायं विदितार्थाः स्म तत्त्वतः। ८७५
प्राप्ता द्वारवतीं सूता विना पार्थैः परन्तप। न तत्र कृष्णा राजेन्द्र पाण्डवाश्च महाव्रताः।
सर्व्वथा विप्रनष्टास्ते नमस्ते भरतर्षभ। न हि विद्मो गतिं तेषां वासं वाऽपि महात्मनां।
पाण्डवानां प्रवृत्तिञ्च विद्मः कर्म्मापि वा कृतं। स नः शाधि मनुष्येन्द्र अत ऊर्द्धं विशाम्पते।
अन्वेषणे पाण्डवानां भूयः किं करवामहे। इमाञ्च नः प्रियां वीर वाचं भद्रवतीं शृणु।
येन त्रिगर्त्ता निहता बलेन महता नृप। सूतेन राज्ञो मत्स्यस्य कीचकेन पुनः पुनः। ८८०
स हतः पतितः शेते गन्धर्व्वैर्निशि भारत। अदृश्यमानैर्दुष्टात्मा भ्रातृभिः सह सोदरैः।
प्रियमेतदुपश्रुत्य शत्रूणाञ्च पराभवं। कृतकृत्यश्च कौरव्य विधत्स्व यदनन्तरं।
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि चारप्रत्यागमने पञ्चविंशोऽध्यायः ॥ २५ ॥
॥ वैशम्पायन उवाच ॥ ततो दुर्य्योधनो राजा श्रुत्वा तेषां वचस्तदा। चिरमन्तर्म्मना भूत्वा प्रत्युवाच सभासदः।
सुदुःखा खलु कार्य्याणां गतिर्विज्ञातुमन्ततः। तस्मात् सर्व्वे निरीक्षध्वं क्व नु ते पाण्डवा गताः।
अल्पावशिष्टं कालस्य गतभूयिष्ठमन्ततः। तेषामज्ञातचर्य्याणामस्मिन्वर्षे त्रयोदशे। ८८५
अस्य वर्षस्य शेषञ्चेत् व्यतीयुरिह पाण्डवाः। निवृत्तसमयास्ते हि सत्यव्रतपरायणाः।
क्षरन्त इव नागेन्द्राः सर्व्वे ह्याशीविषोपमाः। दुःखा भवेयुः संरब्धाः कौरवान् प्रति ते ध्रुवं।
सर्व्वे कालस्य वेत्तारः कृच्छ्ररूपधराः स्थिताः। प्रविशेयुर्ज्जितक्रोधास्तावदेव पुनर्व्वनं।
तस्मात् क्षिप्रं बुभूषध्वं यथातेऽत्यन्तमव्ययं। राज्यं निर्द्वन्द्वमव्यग्रं निःसपत्नं चिरम्भवेत्।
अथाब्रवीत्ततः कर्णः क्षिप्रं गच्छन्तु भारत। अन्ये धूर्त्ता नरा दक्षा निभृताः साधुकारिणः। ८९०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

चरन्तु देशान् संवीताः स्फीतान् जनपदाकुलान्। तत्र गोष्ठीषु रम्यासु सिद्धप्रव्रजितेषु च।
परिचारेषु तीर्थेषु विविधेष्वाकरेषु च। विज्ञातव्या मनुष्यैस्तैस्तर्कया सुविनीतया।
विविधैस्तत्परैः सम्यक् तज्ज्ञैर्निपुणसंवृतैः। अन्वेष्टव्याः सुनिपुणैः पाण्डवाश्छन्नवासिनः।
नदीकुञ्जेषु तीर्थेषु ग्रामेषु नगरेषु च। आश्रमेषु च रम्येषु पर्व्वतेषु गुहासु च।
अथाग्रजानन्तरजः पापभावानुरागवान्। ज्येष्ठं दुःशासनस्तत्र भ्राता भ्रातरमब्रवीत्। ८९५
येषु नः प्रत्ययो राजंश्चारेषु मनुजाधिप। ते यान्तु दत्तदेया वै भूयस्तान्परिमार्गितुं।
एतच्च कर्णो यत्प्राह सर्व्वमीहामहे तथा। यथोद्दिष्टं चराः सर्व्वे मृगयन्तु ततस्ततः।
एते चान्ये च भूयांसो देशाद्देशं यथाविधि। ननु तेषां गतिर्व्वासः प्रवृत्तिश्चोपलभ्यते।
अत्यन्तं वा निगूढास्ते पारं वोर्म्मिमतो गताः। व्यालैश्चापि महारण्ये भक्षिताः शूरमानिनः।
अथ वा विषमं प्राप्य विनष्टाः शाश्वतीः समाः। तस्मान्मानसमव्यग्रं कृत्वा त्वं कुरुनन्दन। ९००
कुरु कार्य्यं महोत्साहं मन्यसे यन्नराधिप।
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि कर्णदुःशासनवाक्ये षड्विंशोऽध्यायः॥ २६ ॥
॥ वैशम्पायन उवाच ॥ अथाब्रवीन्महावीर्य्यो द्रोणस्तत्त्वार्थदर्शिवान्। न तादृशा विनश्यन्ति न प्रयान्ति पराभवं।
शूराश्च कृतविद्याश्च बुद्धिमन्तो जितेन्द्रियाः। धर्म्मज्ञाश्च कृतज्ञाश्च धर्म्मराजमनुव्रताः।
नीतिधर्म्मार्थतत्त्वज्ञं पितृवच्च समाहिताः। धर्म्मे स्थितं सत्यधृतिं ज्येष्ठं ज्येष्ठानुयायिनः।
अनुव्रता महात्मानं भ्रातरो भ्रातरं नृप। अजातशत्रुं श्रीमन्तं सर्व्वभ्रातॄननुव्रतं। ९०५
तेषां तथाविधेयानां निभृतानां महात्मनां। किमर्थं नीतिमान् पार्थः श्रेयो नैषां करिष्यति।
तस्माद्यत्नात् प्रतीक्षन्ते कालस्योदयमागतं। न हि ते नाशमृच्छेयुरिति पश्याम्यहं धिया।
साम्प्रतं चैव यत्कार्य्यं तच्च क्षिप्रमकालिकं। क्रियतां साधु सञ्चिन्त्य वासश्चैषां प्रचिन्त्यतां।
यथावत्पाण्डुपुत्त्राणां सर्व्वार्थेषु धृतात्मनां। दुर्ज्ञेयाः खलु शूरास्ते दुरापास्तपसावृताः।
शुद्धात्मा गुणवान् पार्थः सत्यवान्नीतिमान् शुचिः। तेजोराशिरसंख्येयो गृह्णीयादपि चक्षुषा। ९१०
विज्ञाय क्रियतां तस्माद्भूयश्च मृगयामहे। ब्राह्मणैश्चारकैः सिद्धैर्ये चान्ये तद्विदो जनाः।
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि चारप्रत्याचारे द्रोणवाक्ये सप्तविंशोऽध्यायः॥ २७ ॥
॥ वैशम्पायन उवाच ॥ ततः शान्तनवो भीष्मो भरतानां पितामहः। श्रुतवान् देशकालज्ञस्तत्त्वज्ञः सर्व्वधर्म्मवित्।
आचार्य्यवाक्योपरमे तद्वाक्यमभिसन्दधत्। हितार्थं समुवाचेमां भारतीं भरतान् प्रति।
युधिष्ठिरे समासक्तां धर्म्मज्ञे धर्म्मसंवृतां। असत्सु दुर्लभां नित्यं सतां चाभिमतां सदा।
भीष्मः समवदत्तत्र गिरं साधुभिरर्च्चितां। यथैष ब्राह्मणः प्राह द्रोणः सर्व्वार्थतत्त्ववित्। ९१५
सर्व्वलक्षणसम्पन्नाः साधुव्रतसमन्विताः। श्रुतव्रतोपपन्नाश्च नानाश्रुतिसमन्विताः।
वृद्धानुशासने युक्ताः सत्यव्रतपरायणाः। समयं समयज्ञास्ते पालयन्तः शुचिव्रताः।
क्षत्त्रधर्म्मरता नित्यं केशवानुगताः सदा। प्रवीरपुरुषास्ते वै महात्मानो महाबलाः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नावसीदितुमर्हन्ति उद्वहन्तः सतां धुरं। धर्म्मतश्चैव गुप्तास्ते सुवीर्य्येण च पाण्डवाः।
न नाशमधिगच्छेयुरिति मे धीयते मतिः। तत्र बुद्धिं प्रवक्ष्यामि पाण्डवान्प्रति भारत। ९२०
न तु नीतिः सुनीतस्य शक्यतेऽन्वेषितुं परैः। यत्तु शक्यमिहास्माभिस्तान्वै सञ्चिन्त्य पाण्डवान्।
बुद्ध्या प्रयुक्तं न द्रोहात् प्रवक्ष्यामि निबोध तत्। न त्वियं मादृशैर्नीतिस्तस्य वाच्या कदाचन।
सा त्वियं साधु वक्तव्या न त्वनीतिः कथञ्चन। वृद्धानुशासने तात तिष्ठता सत्यशीलिना।
अवश्यं त्विह धीरेण सभामध्ये विवचता। यथार्थमिह वक्तव्यं सर्व्वथा धर्म्मलिप्सया।
तत्र नाहं तथा मन्ये यथाऽयमितरो जनः। निवासं धर्म्मराजस्य वर्षेऽस्मिन्वै त्रयोदशे। ९२५
तत्र तात न तेषां हि राज्ञां भाव्यमसाम्प्रतं। पुरे जनपदे चापि यत्र राजा युधिष्ठिरः।
दानशीलो वदान्यश्च निभृतो ह्रीनिषेवकः। जनैर्जनपदे भाव्यो यत्र राजा युधिष्ठिरः।
प्रियवादी सदा दान्तो भव्यः सत्यपरो जनः। हृष्टः पुष्टः शुचिर्दक्षो यत्र राजा युधिष्ठिरः।
नासूयको न चापीर्षुर्नाभिमानी न मत्सरी। भविष्यति जनस्तत्र स्वयं धर्म्ममनुव्रतः।
ब्रह्मघोषाश्च भूयांसः पूर्णाहुत्यस्तथैव च। क्रतवश्च भविष्यन्ति भूयांसो भूरिदक्षिणाः। ९३०
सदा च तत्र पर्ज्जन्यः सम्यग्वर्षी न संशयः। सम्पन्नशस्या च मही निरातङ्का भविष्यति।
फलवन्ति च धान्यानि रसवन्ति फलानि च। गन्धवन्ति च माल्यानि शुभशब्दा च भारती।
वायुश्च सुखसंस्पर्शो निष्प्रतीपश्च दर्शनं। भयं नाभ्याविशेत्तत्र यत्र राजा युधिष्ठिरः।
गावश्च बहुलास्तत्र न कृशा न च दुर्ब्बलाः। पयांसि दधि सर्पींषि रसवन्ति हितानि च।
गुणवन्ति च पेयानि भोज्यानि रसवन्ति च। तत्र देशे भविष्यन्ति यत्र राजा युधिष्ठिरः। ९३५
रसाः स्पर्शाश्च गन्धाश्च शब्दाश्चापि गुणान्विताः। दृश्यानि च प्रसन्नानि यत्र राजा युधिष्ठिरः।
धर्म्माश्च तत्र सर्व्वैस्तु सेविताश्च द्विजातिभिः। स्वैः स्वैर्गुणैश्च संयुक्ता अस्मिन्वर्षे त्रयोदशे।
देशे तस्मिन् भविष्यन्ति तात पाण्डवसंयुते। सम्प्रीतिमान् जनस्तत्र सन्तुष्टः शुचिरव्ययः।
देवताऽतिथिपूजासु सर्व्वभावानुरागवान्। इष्टदानो महोत्साहः स्वस्वधर्मपरायणः।
अशुभद्विट् शुभप्रेप्सुर्नित्ययज्ञः शुभव्रतः। भविष्यति जनस्तत्र यत्र राजा युधिष्ठिरः। ९४०
त्यक्तवाक्यानृतस्तात शुभकल्याणमङ्गलः। शुभार्थेप्सुः शुभमतिर्यत्र राजा युधिष्ठिरः।
भविष्यति जनस्तत्र नित्यञ्चेष्टप्रियव्रतः। धर्म्मात्मा शक्यते ज्ञातुं नापि तात द्विजातिभिः।
किं पुनः प्राकृतैस्तात पार्थो विज्ञायते क्वचित्। यस्मिन् सत्यं धृतिर्दानं परा शान्तिर्ध्रुवा क्षमा।
ह्रीः श्रीः कीर्त्तिः परन्तेज आनृशंस्यमथार्ज्जवं। तस्मात्तत्र निवासन्तु छन्नं यत्नेन धीमतः।
गतिञ्च परमां तत्र नोत्सहे वक्तुमन्यथा। एवमेतत्तु सञ्चिन्त्य यत्कृतं मन्यसे हितं। ९४५
तत् क्षिप्रं कुरु कौरव्य यद्येवं श्रद्दधासि मे।

इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि चारप्रत्याचारे भीष्मवाक्ये अष्टाविंशोऽध्यायः ॥ २८ ॥

॥ वैशम्पायन उवाच॥ ततः शारद्वतो वाक्यमित्युवाच कृपस्तदा। युक्तं प्राप्तञ्च वृद्धेन पाण्डवान्प्रति भाषितं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

धर्म्मार्थसहितं श्लक्ष्णं तत्त्वतश्च सहेतुकं। तत्रानुरूपं भीष्मेण ममाप्यत्र गिरं शृणु।
तेषाञ्चैव गतिस्तीर्थैर्वासश्चैषां प्रचिन्त्यतां। नीतिर्विधीयतां चापि साम्प्रतं या हिता भवेत्।
नावज्ञेयो रिपुस्तात प्राकृतोऽपि बुभूषता। किं पुनः पाण्डवास्तात सर्व्वास्त्रकुशला रणे। ९६०
तस्मात् सत्त्वं प्रविष्टेषु पाण्डवेषु महात्मसु। गूढभावेषु छन्नेषु काले चोदयमागते।
स्वराष्ट्रे परराष्ट्रे च ज्ञातव्यं बलमात्मनः। उदयः पाण्डवानाञ्च प्राप्ते काले न संशयः।
निवृत्तसमयाः पार्था महात्मानो महाबलाः। महोत्साहा भविष्यन्ति पाण्डवा ह्यमितौजसः।
तस्माद्बलञ्च कोषञ्च नीतिश्चापि विधीयतां। यथाकालोदये प्राप्ते सम्यक्तैः सन्दधामहे।
तात बुध्यामि तत्सर्व्वं बुध्यस्व बलमात्मनः। नियतं सर्व्वमित्रेषु बलवत्सु बलेषु च। ९६५
उच्चावचं बलं ज्ञात्वा मध्यस्थञ्चापि भारत। प्रहृष्टमप्रहृष्टञ्च सन्दधामस्तथा परैः।
साम्ना भेदेन दानेन दण्डेन बलिकर्म्मणा। न्यायेनाक्रम्य च परान् बलाच्चानम्य दुर्ब्बलान्।
सान्त्वयित्वा तु मित्राणि बलञ्चाभाष्यतां सुखं। सकोषबलसंवृद्धः सम्यक् सिद्धिमवाप्स्यसि।
योत्स्यसे चापि बलिभिररिभिः प्रत्युपस्थितैः। अन्यैस्त्वं पाण्डवैर्व्वाऽपि हीनैश्च बलवाहनैः।
एवं सर्व्वं विनिश्चित्य व्यवसायं स्वधर्म्मतः। यथाकालं मनुष्येन्द्र चिरं सुखमवाप्स्यसि। ९७०
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि चारप्रत्याचारे द्रोणवाक्ये एकोनत्रिंशोऽध्यायः॥ २९ ॥
॥ वैशम्पायन उवाच ॥ अथ राजा त्रिगर्त्तानां सुशर्म्मा रथयूथपः। प्राप्तकालमिदं वाक्यमुवाच त्वरितो बली।
असकृन्निकृतः पूर्व्वं मत्स्यशाल्वेयकैः प्रभो। सूतेनैव च मत्स्यस्य कीचकेन पुनः पुनः।
बाधितो बन्धुभिः सार्द्धं बलाद्बलवतां विभो। स कर्णमभ्युदीच्याथ दुर्य्योधनमभाषत।
असकृन्मत्स्यराज्ञा मे राष्ट्रं बाधितमोजसा। प्रणेता कीचकस्तस्य बलवानभवत्पुरा।
क्रूरोऽमर्षी स दुष्टात्मा भुवि प्रख्यातविक्रमः। निहतः स तु गन्धर्व्वैः पापकर्म्मा नृशंसवान्। ९७५
तस्मिन् विनिहते राजा हतदर्पो निराश्रयः। भविष्यति निरुत्साहो विराट इति मे मतिः।
तत्र यात्रा मम मता यदि ते रोचतेऽनघ। कौरवाणाञ्च सर्व्वेषां कर्णस्य च महात्मनः।
एतत्प्राप्तमहं मन्ये कार्य्यमात्ययिकं हि नः। राष्ट्रन्तस्याभियास्यामो बहुधान्यसमाकुलं।
आददामोऽस्य रत्नानि विविधानि वसूनि च। ग्रामान् राष्ट्राणि वा तस्य हरिष्यामो विभागशः।
अथ वा गोसहस्राणि शुभानि च बहूनि च। विविधानि हरिष्यामः प्रतिपीड्य पुरं बलात्।
कौरवैः सह सङ्गत्य त्रिगर्त्तैश्च विशाम्पते। गास्तस्यापहरामोऽद्य सह सर्व्वैः सुसंहताः। ९८०
संविभागेन कृत्वा तु निबध्नीमोऽस्य पौरुषं। हत्वा चास्य चमूं कृत्स्नां वशमेवानयामहे।
तं वशे न्यायतः कृत्वा सुखं वत्स्यामहे वयं। भवतो बलवृद्धिश्च भविष्यति न संशयः।
तच्छ्रुत्वा वचनं तस्य कर्णो राजानमब्रवीत्। सूक्तं सुशर्म्मणा वाक्यं प्राप्तकालं हितं च नः।
तस्मात् क्षिप्रं विनिर्यामो योजयित्वा वरूथिनीं। विभज्य चाप्यनीकानि यथा वा मन्यसेऽनघ।
प्राज्ञो वा कुरुवृद्धोऽयं सर्व्वेषां नः पितामहः। आचार्य्यश्च यथा द्रोणः कृपः शारद्वतस्तथा। ९८५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

मन्यन्ते ते यथा सर्व्वे तथा यात्रा विधीयतां । सम्मन्त्र्य चाशु निर्यामः साधनार्थं महीपते ।
किञ्च नः पाण्डवैः कार्य्यं हीनार्थबलपौरुषैः । अत्यन्तं वा प्रनष्टास्ते प्राप्ता वाऽपि यमक्षयं ।
यामो राजन्निरुद्विग्ना विराटनगरं वयं । आदास्यामो हि गास्तस्य विविधानि वसूनि च ।
॥ वैशम्पायन उवाच ॥ ततो दुर्य्योधनो राजा वाक्यमादाय तस्य तत् । वैकर्त्तनस्य कर्णस्य चिप्रमाज्ञापयत्स्वयं । ९९०
शासने नित्यसंयुक्तं दुःशासनमनन्तरं । सह वृद्धैस्तु सम्मन्त्र्य चिप्रं योजय वाहिनीं ।
यथोद्दिशं च गच्छामः सहितास्तत्र कौरवैः । सुशर्म्मा च यथोद्दिष्टं देशं यातु महारथः ।
त्रिगर्त्तैः सहितो राजा समग्रबलवाहनः । प्रागेव हि सुसंवीतो मत्स्यस्य विषयं प्रति ।
जघन्यतो वयं तत्र यास्यामो दिवसान्तरे । विषयं मत्स्यराजस्य सुसमृद्धं सुसंहताः ।
ते यान्तु सहितास्तत्र विराटनगरं प्रति । चिप्रं गोपान् समासाद्य गृह्णन्तु विपुलं धनं । ९९५
गवां शतसहस्राणि श्रीमन्ति गुणवन्ति च । वयमप्यनुगृह्णीमो द्विधा कृत्वा वरूथिनीं ।
॥ वैशम्पायन उवाच ॥ ते स्म गत्वा यथोद्दिष्टां दिशं वह्नेर्महीपते । सन्नद्धा रथिनः सर्व्वे सपदाता बलोत्कटाः ।
प्रतिवैरं चिकीर्षन्तो गोषु गृद्धा महाबलाः । आदातुं गाः सुशर्म्माऽथ कृष्णपक्षस्य सप्तमीं ।
अपरे दिवसे सर्व्वे राजन् सम्भूय कौरवाः । अष्टम्यान्ते न्यगृह्णन्त गोकुलानि सहस्रशः ।
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि सुशर्म्मादिमत्स्यदेशयाने त्रिंशोऽध्यायः ॥ ३० ॥
॥ वैशम्पायन उवाच ॥ ततस्तेषां महाराज तत्रैवामिततेजसां । छद्मलिङ्गप्रविष्टानां पाण्डवानां महात्मनां । १०००
व्यतीतः समयः सम्यक् वसतां वै पुरोत्तमे । कुर्व्वतां तस्य कर्म्माणि विराटस्य महीपतेः ।
कीचके तु हते राजा विराटः परवीरहा । परां सम्भावनाञ्चक्रे कुन्तीपुत्त्रेषु वीर्य्यवान् ।
ततस्त्रयोदशस्यान्ते तस्य वर्षस्य भारत । सुशर्म्मणा गृहीतन्तद्गोधनं तरसा बहु ।
ततो जवेन महता गोपः पुरमथाव्रजत् । स दृष्ट्वा मत्स्यराजञ्च रथात् प्रस्कन्द्य कुण्डली ।
शूरैः परिवृतं योधैः कुण्डलाङ्गदधारिभिः । संवृतं मन्त्रिभिः सार्द्धं पाण्डवैश्च महात्मभिः । १००५
तं सभायां महाराजमासीनं राष्ट्रवर्द्धनं । सोऽब्रवीदुपसङ्गम्य विराटं प्रणतस्तदा ।
अस्मान् युधि विनिर्ज्जित्य परिभूय सबान्धवान् । गवां शतसहस्राणि त्रिगर्त्ताः कालयन्ति ते ।
तान्परीप्सस्व राजेन्द्र मा नेशुः पशवस्तव । तच्छ्रुत्वा नृपतिः सेनां मत्स्यानां समयोजयत् ।
रथनागाश्वकलिलां पत्तिध्वजसमाकुलां । राजानो राजपुत्त्राश्च तनुत्राण्यथ भेजिरे ।
भानुमन्ति विचित्राणि शूरसेव्यानि भागशः । सवज्रायसगर्भन्तु कवचं तत्र काञ्चनं । १०१०
विराटस्य प्रियो भ्राता शतानीकोऽभ्यहारयत् । सर्व्वपारसवं वर्म्म कल्याणपटलं दृढं ।
शतानीकादवरजो मदिराक्षोऽभ्यहारयत् । शतसूर्य्यं शतावर्त्तं शतबिन्दु शताक्षिमत् ।
अभेद्यकल्पं मत्स्यस्य राजा कवचमाहरत् । उत्सेधे यस्य पद्मानि शतं सौगन्धिकानि च ।
सुवर्णपृष्ठं सूर्य्याभं सूर्य्यदत्तोऽभ्यहारयत् । दृढमायसगर्भञ्च श्वेतं वर्म्म शताक्षिमत् ।
विराटस्य सुतो ज्येष्ठो वीरः शङ्खोऽभ्यहारयत् । शतशश्च तनुत्राणि यथास्वन्ते महारथाः । १०१५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

योत्स्यमाना अनह्यन्त देवरूपाः प्रहारिणः । सूपस्करेषु शुभ्रेषु महत्सु च महारथाः ।
पृथक्काञ्चनसन्नाहान् रथेष्वश्वानयोजयन् । सूर्य्यचन्द्रप्रतीकाशे रथे दिव्ये हिरण्मये ।
महानुभावो मत्स्यस्य ध्वज उच्छिश्रिये तदा । अथान्यान् विविधाकारान् ध्वजान् हेमपरिष्कृतान् ।
यथास्वं क्षत्त्रियाः शूरा रथेषु समयोजयन् । अथ मत्स्योऽब्रवीद्राजा शतानीकं जघन्यजं ।
कङ्कबल्लवगोपाला दामग्रन्थिश्च वीर्य्यवान् । युध्येयुरिति मे बुद्धिर्व्वर्त्तते नात्र संशयः । १०२०
एतेषामपि दीयन्तां रथा ध्वजपताकिनः । कवचानि विचित्राणि दृढानि च मृदूनि च ।
प्रतिमुञ्चन्तु गात्रेषु दीयन्तामायुधानि च । वीराङ्गरूपाः पुरुषा नागराजकरोपमाः ।
नेमे जातु न युध्येयुरिति मे धीयते मतिः । एवं श्रुत्वा तु नृपतेर्व्वाक्यं त्वरितमानसः ।
शतानीकस्तु पार्थेभ्यो रथान् राजन् समादिशत् । सहदेवाय राज्ञे च भीमाय नकुलाय च ।
तान्प्रहृष्टांस्ततस्सूता राजभक्तिपुरस्कृताः । निर्द्दिष्टा नरदेवेन रथान् शीघ्रमयोजयन् । १०२५
कवचानि विचित्राणि मृदूनि च दृढानि च । विराटः प्रादिशद्यानि तेषामक्लिष्टकर्म्मणां ।
तान्यामुच्य शरीरेषु दंशितास्ते परन्तपाः । रथान् हयैः सुसम्पन्नानास्थाय च नरोत्तमाः ।
निर्य्ययुर्मुदिताः पार्थाः शत्रुसङ्घावमर्द्दिनः । तरस्विनश्छन्नरूपाः सर्व्वे युद्धविशारदाः ।
रथान्हेमपरिच्छन्नानास्थाय च महारथाः । विराटमन्वयुः पार्थाः सहिताः कुरुपुङ्गवाः ।
चत्वारो भ्रातरः शूराः पाण्डवाः सत्यविक्रमाः । भीमाश्च मत्तमातङ्गाः प्रभिन्नकरटामुखाः । १०३०
क्षरन्तश्चैव नागेन्द्राः सुदन्ताः षष्टिहायनाः । आरूढा युद्धकुशलैः शिक्षिता हस्तिसादिभिः ।
राजानमन्वयुः पश्चाच्चलन्त इव पर्व्वताः । विशारदानां मुख्यानां हृष्टानाञ्चानुयायिनां ।
अष्टौ रथसहस्राणि दशनागशतानि च । षष्टिश्चाश्वसहस्राणि मत्स्यानामभिनिर्य्ययुः ।
तदनीकं विराटस्य शुशुभे भरतर्षभ । सम्प्रयान्तं तदा राजन्निरीक्षन्तं गवां पदं ।
तद्बलाग्र्यं विराटस्य सम्प्रस्थितमशोभत । दृढायुधजनाकीर्णं गजाश्वरथसङ्कुलं । १०३५
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि मत्स्यराजरणोद्योगे एकत्रिंशोऽध्यायः ॥ ३१ ॥
॥ वैशम्पायन उवाच ॥ निर्याय नगराच्छूरा व्यूढानीकाः प्रहारिणः । त्रिगर्त्तानस्पृशन्मत्स्याः सूर्य्ये परिणते सति ।
ते त्रिगर्त्ताश्च मत्स्याश्च संरब्धा युद्धदुर्म्मदाः । अन्योऽन्यमभिगर्जन्तो गोषु गृद्धा महाबलाः ।
भीमाश्च मत्तमातङ्गास्तोमराङ्कुशचोदिताः । ग्रामणीयैः समारूढाः कुशलैर्हस्तिसादिभिः ।
तेषां समागमो घोरस्तुमुलो लोमहर्षणः । घ्नतां परस्परं राजन् यमराष्ट्रविवर्द्धनः ।
देवासुरसमो राजन्नासीन् सूर्य्येऽवलम्बति । पदातिरथनागेन्द्रहयारोहबलौघवान् । १०४०
अन्योऽन्यमभ्यापततां निघ्नतां चेतरेतरं । उदतिष्ठद्रजो भौमं न प्राज्ञायत किञ्चन ।
पक्षिणश्चापतन्भूमौ सैन्येन रजसावृताः । इषुभिर्व्यतिसर्पद्भिरादित्योऽन्तरधीयत ।
खद्योतैरिव संयुक्तमन्तरीक्षं व्यराजत । रुक्मपृष्ठानि चापानि व्यतिषिक्तानि धन्विनां ।
पततां लोकवीराणां सव्यदक्षिणमस्यतां । रथा रथैः समाजग्मुः पादातैश्च पदातयः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सादिनः सादिभिश्चैव गजैश्चापि महागजाः। असिभिः पट्टिशैः प्रासैः शक्तिभिस्तोमरैरपि। २०४५
संरब्धाः समरे राजन्निजघ्नुरितरेतरं। निघ्नन्तः समरेऽन्योऽन्यं शूराः परिघबाहवः।
नशेकुरभिसंरब्धाः शूरान्कर्त्तुं पराङ्मुखान्। कृत्तोत्तरोष्ठं सुनसं कृत्तकेशमलङ्कृतं।
अदृश्यत शिरश्छिन्नं रजोध्वस्तं सकुण्डलं। अदृश्यन्त च गात्राणि शरैश्छिन्नानि भागशः।
शालस्कन्धनिकाशानि चत्त्रियाणां महामृधे। नागभोगनिकाशैश्च बाहुभिश्चन्दनोचितैः।
आस्तीर्णा वसुधा भाति शिरोभिश्च सकुण्डलैः। रथिनां रथिभिश्चात्र सम्प्रहारोऽभ्यवर्त्तत। ०५०
सादिभिः सादिनाञ्चापि पदातीनां पदातिभिः। उपशाम्यद्रजो भौमं रुधिरेण प्रसर्पता।
कश्मलञ्चाविशद्घोरं निर्म्मर्य्यादमवर्त्तत। उपाविशन्गरुत्मन्तः शरैर्गाढं प्रवेजिताः।
अन्तरीक्षे गतिर्येषां दर्शनञ्चाप्यरुध्यत। ते घ्नन्तः समरेऽन्योऽन्यं शूराः परिघबाहवः।
नशेकुरतिसंरब्धाः शूरान्कर्त्तुं पराङ्मुखान्। शतानीकः शतं हत्वा विशालाक्षश्चतुःशतं।
प्रविष्टौ महतीं सेनां त्रिगर्त्तानां महारथौ। तौ प्रविष्टौ महासेनां बलवन्तौ मनस्विनौ। २०५५
आर्च्छेतां बाहुसंरम्भात् केशाकेशि रथारथि। लक्षयित्वा त्रिगर्त्तानां तौ प्रविष्टौ रथव्रजं।
अग्रतः सूर्य्यदत्तश्च मदिराक्षश्च पृष्ठतः। विराटस्तत्र सङ्ग्रामे हत्वा पञ्च शतान् रथान्।
हयानाञ्च शतान्यष्टौ हत्वा पञ्च महारथान्। चरन्स विविधान्मार्गान्रथेन रथसत्तमः।
त्रिगर्त्तानां सुशर्म्माणमार्च्छद्रुक्मरथं रणे। तौ व्यवाहरतां तत्र महात्मानौ महाबलौ।
अन्योऽन्यमभिगर्जन्तौ गोष्ठेषु वृषभाविव। ततो राजा त्रिगर्त्तानां सुशर्म्मा युद्धदुर्म्मदः। २०६०
मत्स्यं समीयाद्राजानं द्वैरथेन नरर्षभः। ततो रथाभ्यां रथिनौ व्यतीयतुरमर्षणौ।
शरान् व्यसृजतां शीघ्रं तोयधारा घना इव। अन्योऽन्यं चापि संरब्धौ विचेरतुरमर्षणौ।
कृतास्त्रौ निशितैर्ब्बाणैरसिशक्तिगदाभृतौ। ततो राजा सुशर्म्माणं विव्याध दशभिः शरैः।
पञ्चभिः पञ्चभिश्चास्य विव्याध चतुरो हयान्। तथैव मत्स्यराजानं सुशर्म्मा युद्धदुर्म्मदः।
पञ्चाशद्भिः शितैर्बाणैर्विव्याध परमास्त्रवित्। ततः सैन्यं महाराज मत्स्यराजसुशर्म्मणोः। २०६५
नाभ्यजानत्तदाऽन्योऽन्यं सैन्येन रजसा वृतं।
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि सुशर्म्मविराटयुद्धे द्वात्रिंशोऽध्यायः॥ ३२॥
॥ वैशम्पायन उवाच॥ तमसाऽभिप्लुते लोके रजसा चैव भारत। अतिष्ठन्वै मुहूर्त्तन्तु व्यूढानीकाः प्रहारिणः।
ततोऽन्धकारं प्रणुदन्नुदतिष्ठत चन्द्रमाः। कुर्व्वाणो विमलां रात्रिं नन्दयन् चत्त्रियान् युधि।
ततः प्रकाशमासाद्य पुनर्युद्धमवर्त्तत। घोररूपं ततस्तस्मिन् नावैचन्त परस्परं।
ततः सुशर्म्मा त्रैगर्त्तः सह भ्रात्रा यवीयसा। अभ्यद्रवन्मत्स्यराजं रथव्रातेन सर्व्वशः। २०७०
ततो रथाभ्यां प्रस्कन्द्य भ्रातरौ चत्त्रियर्षभौ। गदापाणी सुसंरब्धौ समभ्यद्रवतां रथान्।
तथैव तेषान्तु बलानि तानि क्रुद्धान्यथान्योऽन्यमभिद्रवन्ति। गदाऽसिखड्गैश्च परश्वधैश्च प्राशैश्च तीक्ष्णाग्रसुपीतधारैः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

बलन्तु मत्स्यस्य बलेन राजा सर्व्वं त्रिगर्त्ताधिपतिः सुशर्म्मा । प्रमथ्य जित्वा च प्रसह्य मत्स्यं विराटमोजस्विनमभ्यधावत् ।

तौ निहत्य पृथग्धुर्य्यावुभौ तौ पार्ष्णिसारथी । विरथं मत्स्यराजानं जीवग्राहमगृह्णतां ।

तमुन्मथ्य सुशर्म्माऽथ युवतीमिव कामुकः । स्यन्दनं स्वं समारोप्य प्रययौ शीघ्रवाहनः ।

तस्मिन् गृहीते विरथे विराटे बलवत्तरे । प्राद्रवन्त भयात् मत्स्यास्त्रिगर्त्तैरर्द्दिता भृशं ।

तेषु सन्त्रस्यमानेषु कुन्तीपुत्रो युधिष्ठिरः । प्रत्यभाषन्महाबाहुं भीमसेनमरिन्दमं ।

मत्स्यराजः परामृष्टस्त्रिगर्त्तेन सुशर्म्मणा । तं मोचय महाबाहो न गच्छेद्द्विषतां वशं ।

उषिताः स्म सुखं सर्व्वे सर्व्वकामैः सुपूजिताः । भीमसेन त्वया कार्य्या तस्य वासस्य निष्कृतिः ।

॥ भीमसेन उवाच । अहमेनं परित्रास्ये शासनात्तव पार्थिव । पश्य मे सुमहत्कर्म्म युध्यतः सह शत्रुभिः ।

स्वबाहुबलमाश्रित्य तिष्ठ त्वं भ्रातृभिः सह । एकान्तमाश्रितो राजन् पश्य मेऽद्य पराक्रमं ।

सुस्कन्धोऽयं महावृक्षो गदारूप इव स्थितः । एनमेव समारुह्य द्रावयिष्यामि शात्रवान् ।

॥ वैशम्पायन उवाच ॥ तं मत्तमिव मातङ्गं वीक्षमाणं वनस्पतिं । अब्रवीद्भ्रातरं वीरं धर्म्मराजो युधिष्ठिरः ।

मा भीम साहसं कार्षीस्तिष्ठत्वेष वनस्पतिः । मा त्वां वृक्षेण कर्म्माणि कुर्व्वाणमतिमानुषं ।

जनाः समवबुध्येरन् भीमोऽयमिति भारत । अन्यदेवायुधं किञ्चित् प्रतिपद्यस्व मानुषं ।

चापं वा यदि वा शक्तिं निस्त्रिंशं वा परश्वधं । यदेव मानुषं भीम भवेदन्यैरलक्षितं ।

तदेवायुधमादाय मोचयाशु महीपतिं । यमौ च चक्ररक्षौ ते भवितारौ महाबलौ । सहिताः समरे तत्र मत्स्यराजं परीप्सत ।

॥ वैशम्पायन उवाच ॥ एवमुक्तस्तु वेगेन भीमसेनो महाबलः । गृहीत्वा तु धनुःश्रेष्ठं जवेन सुमहाजवः ।

व्यमुञ्चच्छरवर्षाणि सतोय इव तोयदः । तं भीमो भीमकर्म्माणं सुशर्म्माणमथाद्रवत् ।

विराटं समवेक्ष्यैनं तिष्ठतिष्ठेति चावदत् । सुशर्म्मा चिन्तयामास कालान्तकयमोपमं ।

तिष्ठतिष्ठेति भाषन्तं पृष्ठतो रथपुङ्गवः । पश्यतां सुमहत् कर्म्म महद्युद्धमुपस्थितं ।

परावृत्तो धनुर्गृह्य सुशर्म्मा भ्रातृभिः सह । निमेषान्तरमात्रेण भीमसेनेन ते रथाः ।

रथानाञ्च गजानाञ्च वाजिनाञ्च ससादिनां । सहस्रशतसङ्घाताः शूराणामुग्रधन्विनां । पातिता भीमसेनेन विराटस्य समीपतः ।

पत्तयो निहतास्तेषां गदां गृह्य महात्मना । तदृष्ट्वा तादृशं युद्धं सुशर्म्मा युद्धदुर्म्मदः ।

चिन्तयामास मनसा किं शेषं हि बलस्य मे । अपरो दृश्यते सैन्ये पुरा मग्नो महाबले ।

आकर्णपूर्णेन तदा धनुषा प्रत्यदृश्यत । सुशर्म्मा सायकांस्तीक्ष्णान्क्षिपते च पुनःपुनः ।

ततः समस्तास्ते सर्व्वे तुरगानभ्यचोदयन् । दिव्यमस्त्रं विकुर्व्वाणास्त्रिगर्त्तान्प्रत्यमर्षणाः ।

तान्निवृत्तरथान् दृष्ट्वा पाण्डवान् सा महाचमू । वैराटिः परमक्रुद्धो युयुधे परमाद्भुतं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सहस्रमवधीत्तत्र कुन्तीपुत्रो युधिष्ठिरः। भीमः सप्त सहस्राणि यमलोकमदर्शयत्।
नकुलश्चापि सप्तैव शतानि प्राहिणोच्छरैः। शतानि त्रीणि शूराणां सहदेवः प्रतापवान्।
युधिष्ठिरसमादिष्टो निजघ्ने पुरुषर्षभः। ततोऽभ्यपतदत्युग्रः सुशर्म्माणमुदायुधः। हत्वा तां महतीं सेनां त्रिगर्त्तानां महारथ।
ततो युधिष्ठिरो राजा त्वरमाणो महारथः। अभिपत्य सुशर्म्माणं शरैरभ्याहनद्भृशं।
युधिष्ठिरसमादिष्टो निजघ्ने पुरुषर्षभः। सुशर्म्मापि सुसंरब्धस्त्वरमाणो युधिष्ठिरं।
अविध्यन्नवभिर्वाणैश्चतुर्भिश्चतुरो हयान्। ततो राजन्नाशुकारी कुन्तीपुत्रो वृकोदरः।
समासाद्य सुशर्म्माणमश्वानस्य व्यपोथयत्। पृष्ठगोपांश्च तस्याथ हत्वा परमसायकैः।
अथास्य सारथिं क्रुद्धो रथोपस्थादपातयत्। चक्ररक्षश्च शूरो वै मदिराक्षोऽतिविश्रुतः।
समायाद्विरथं दृष्ट्वा त्रिगर्त्तं प्राहरत्तदा। ततो विराटः प्रस्कन्द्य रथादथ सुशर्म्मणः।
गदां तस्य परामृश्य तमेवाभ्यद्रवद्बली। स चचार गदापाणिर्वृद्धोऽपि तरुणो यथा।
पलायमानं त्रैगर्त्तं दृष्ट्वा भीमोऽभ्यभाषत। राजपुत्र निवर्त्तस्व न ते युक्तं पलायनं।
अनेन वीर्य्येण कथं गास्त्वं प्रार्थयसे बलात्। कथं चानुचरांस्त्यक्त्वा शत्रुमध्ये विषीदसि।
इत्युक्तः स तु पार्थेन सुशर्म्मा रथयूथपः। तिष्ठतिष्ठेति भीमं स सहसाऽभ्यद्रवद्बली।
भीमस्तु भीमसङ्काशो रथात् प्रस्कन्द्य पाण्डवः। प्राद्रवत्तूर्णमव्यग्रो जीवितेप्सुः सुशर्म्मणः।
तं भीमसेनो धावन्तमभ्यधावत वीर्य्यवान्। त्रिगर्त्तराजमादातुं सिंहः क्षुद्रमृगं यथा।
अभिद्रुत्य सुशर्म्माणं केशपक्षे परामृशत्। समुद्यम्य तु रोषात्तं निष्पिपेष महीतले।
पदा मूर्द्ध्नि महाबाहुः प्राहरद्विलपिष्यतः। तस्य जानुं ददौ भीमो जघ्ने चैनमरत्निना।
स मोहमगमद्राजा प्रहारवरपीडितः। तस्मिन् गृहीते विरथे त्रिगर्त्तानां महारथे।
अभज्यत बलं सर्व्वं त्रैगर्त्तं तद्भयातुरं। निवर्त्त्य गास्ततः सर्व्वाः पाण्डुपुत्रा महारथाः।
अवजित्य सुशर्म्माणं धनं चादाय सर्व्वशः। स्वबाहुबलसम्पन्ना ह्रीनिषेवा यतव्रताः।
विराटस्य महात्मानः परिक्लेशविनाशनाः। स्थिताः समक्षन्ते सर्व्वे त्वथ भीमोऽभ्यभाषत।
नायं पापसमाचारो मत्तो जीवितुमर्हति। किन्तु शक्यं मया कर्त्तुं यद्राजा सततं घृणी।
गले गृहीत्वा राजानमानीय विवशं वशं। तत एनं विचेष्टन्तं बद्ध्वा पार्थो वृकोदरः।
रथमारोपयामास विसंज्ञं पांशुगुण्ठितं। अभ्येत्य रणमध्यस्थमभ्यगच्छद्युधिष्ठिरं।
दर्शयामास भीमस्तु सुशर्म्माणं नराधिपं। प्रोवाच पुरुषव्याघ्रो भीममाहवशोभिनं।
तं राजा प्राहसद्दृष्ट्वा मुच्यतां वै नराधमः। एवमुक्तोऽब्रवीद्भीमः सुशर्म्माणं महाबलं।
॥ भीम उवाच ॥ जीवितुं चेच्छसे मूढ हेतुं मे गदतः शृणु। दासोऽस्मीति त्वया वाच्यं संसत्सु च सभासु च।
एवन्ते जीवितं दद्यामेष युद्धजितो विधिः। तमुवाच ततो ज्येष्ठो भ्राता सप्रणयं वचः।
॥ युधिष्ठिर उवाच ॥ मुञ्च मुञ्चाधमाचारं प्रमाणं यदि ते वयं। दासभावं गतो ह्येष विराटस्य महीपतेः।
अदासो गच्छ मुक्तोऽसि मैवं कार्षीः कदाचन।
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि सुशर्म्मनिग्रहे द्वात्रिंशोऽध्यायः ॥ ३२ ॥

CC-0. In Public Domain. Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

॥ वैशम्पायन उवाच ॥ एवमुक्ते तु सव्रीडः सुशर्म्माऽभीदधोमुखः । स मुक्तोऽभ्येत्य राजानमभिवाद्य प्रतस्थिवान् ।
विसृज्य तु सुशर्म्माणं पाण्डवास्ते हतद्विषः । स्वबाहुबलसम्पन्ना ह्रीनिषेवा यतव्रताः । ११३०
सङ्ग्रामशिरसो मध्ये तां रात्रिं सुखिनोऽवसन् । ततो विराटः कौन्तेयानतिमानुषविक्रमान् ।
अर्च्चयामास वित्तेन मानेन च महारथान् ।
॥ विराट उवाच ॥ यथैव मम रत्नानि युष्माकं तानि वै तथा । कार्य्यं कुरुत वै सर्व्वे यथाकामं यथासुखं ।
ददाम्यलङ्कृताः कन्या वसूनि विविधानि च । मनसश्चाप्यभिप्रेतं युद्धे शत्रुनिवर्हणाः ।
युष्माकं विक्रमादद्य मुक्तोऽहं स्वस्तिमानिह । तस्माद्भवन्तो मत्स्यानामीश्वराः सर्व्व एव हि । ११३५
॥ वैशम्पायन उवाच ॥ तथैतिवादिनं मत्स्यं कौरवेयाः पृथक् पृथक् । ऊचुः प्राञ्जलयः सर्व्वे युधिष्ठिरपुरोगमाः ।
प्रतिनन्दाम ते वाक्यं सर्व्वञ्चैव विशाम्पते । एतेनैव प्रतीताः स्म यत्त्वं मुक्तोऽद्य शत्रुभिः ।
ततोऽब्रवीत् प्रीतमना मत्स्यराजो युधिष्ठिरं । पुनरेव महाबाहुर्व्विराटो राजसत्तमः ।
एहि त्वामभिषेक्ष्यामि मत्स्यराजस्तु नो भवान् । मनसश्चाप्यभिप्रेतं यथेष्टं भुवि दुर्ल्लभं ।
तत्तेऽहं सम्प्रदास्यामि सर्व्वमर्हति नो भवान् । रत्नानि गाः सुवर्णञ्च मणिमुक्तमथापि च । ११४०
वैयाघ्रपद्य विप्रेन्द्र सर्व्वथैव नमोऽस्तु ते । त्वत्कृते ह्यद्य पश्यामि राज्यं सन्तानमेव च ।
यतश्च जातसंरम्भो न च शत्रुवशङ्गतः । ततो युधिष्ठिरो मत्स्यं पुनरेवाभ्यभाषत ।
प्रतिनन्दामि ते वाक्यं मनोज्ञं मत्स्य भाषसे । आनृशंस्यपरो नित्यं सुसुखी सततं भव ।
गच्छन्तु दूतास्त्वरितं नगरं तव पार्थिव । सुहृदां प्रियमाख्यातुं घोषयन्तु च ते जयं ।
ततस्तद्वचनान्मत्स्यो दूतान् राजा समादिशत् । आचक्षध्वं पुरं गत्वा सङ्ग्रामे विजयं मम । ११४५
कुमार्य्यः समलङ्कृत्य पर्य्यागच्छन्तु मे पुरात् । वादित्राणि च सर्व्वाणि गणिकाश्च स्वलङ्कृताः ।
एताञ्चाज्ञां ततः श्रुत्वा राज्ञा मत्स्येन चोदिताः । तामाज्ञां शिरसा कृत्वा प्रस्थिता हृष्टमानसाः ।
ते गत्वा तत्र तां रात्रिमथ सूर्य्योदयं प्रति । विराटस्य पुराभ्यासे दूता जयमघोषयन् ।
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि विराटजयघोषे चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥
॥ वैशम्पायन उवाच ॥ याते त्रिगर्त्तान्मत्स्ये तु पशूंस्तान्वै परीप्सति । दुर्य्योधनः सहामात्यो विराटमुपयादथ ।
भीष्मो द्रोणश्च कर्णश्च कृपश्च परमास्त्रवित् । द्रौणिश्च सौबलश्चैव तथा दुःशासनः प्रभो । ११५०
विविंशतिर्व्विकर्णश्च चित्रसेनश्च वीर्य्यवान् । दुर्मुखो दुःसहश्चैव ये चैवान्ये महारथाः ।
एते मत्स्यानुपागम्य विराटस्य महीपतेः । घोषान्विद्राव्य तरसा गोधनं जह्रुरोजसा ।
षष्टिं गवां सहस्राणि कुरवः कालयन्ति च । महता रथवंशेन परिवार्य्य समन्ततः ।
गोपालानान्तु घोषस्य हन्यतां तैर्म्महारथैः । आरावः सुमहानासीत् सम्प्रहारे भयङ्करे ।
गोपाध्यक्षो भयत्रस्तो रथमास्थाय सत्वरः । जगाम नगरायैव परिक्रोशंस्तदार्त्तवत् । ११५५
संप्रविश्य पुरं राज्ञो नृपवेश्माभ्ययात्ततः । अवतीर्य्य रथात्तूर्णमाख्यातुं प्रविवेश ह ।
दृष्ट्वा भूमिञ्जयं नाम पुत्त्रं मत्स्यस्य मानिनं । तस्मै तत् सर्व्वमाचष्ट राष्ट्रस्य पशुकर्षणं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

षष्टिं गवां सहस्राणि कुरवः कालयन्ति ते। तद्विजेतुं समुत्तिष्ठ गोधनं राष्ट्रवर्द्धन।
राजपुत्त्र हितप्रेप्सुः चिप्रं निर्याहि च स्वयं। त्वां हि मत्स्यो महीपालः शून्यपालमिहाकरोत्।
त्वया परिषदो मध्ये स्लाघते स नराधिपः। पुत्त्रो ममानुरूपश्च शूरश्चेति कुलोद्वहः। ११६०
इष्वस्त्रे निपुणो योधः सदा वीरश्च मे सुतः। तस्य तत्सत्यमेवास्तु मनुष्येन्द्रस्य भाषितं।
आवर्त्तय कुरून् जित्वा पशून्पशुमतांम्बर। निर्द्दहैषामनीकानि भीमेन शरतेजसा।
धनुश्च्युतैरुक्मपुङ्खैः शरैः सन्नतपर्व्वभिः। द्विषतां भिन्ध्यनीकानि गजानामिव यूथपः।
पाशोपधानां ज्यातन्त्रीञ्चापदण्डां महास्वनां। शरवर्णां धनुर्व्वीणां शत्रुमध्ये प्रवादय।
श्वेता रजतसङ्काशा रथे युज्यन्तु ते हयाः। ध्वजञ्च सिंहसौवर्णमुच्छ्रयन्तु तव प्रभो। ११६५
रुक्मपुङ्खाः प्रसन्नाग्रा मुक्ता हस्तवता त्वया। छादयन्तु शराः सूर्य्यं राज्ञां मार्गनिरोधकाः।
रणे जित्वा कुरून्सर्व्वान्वज्रपाणिरिवासुरान्। यशो महदवाप्य त्वं प्रविशेदं पुरं पुनः।
त्वं हि राष्ट्रस्य परमा गतिर्मत्स्यपतेः सुतः। यथाहि पाण्डुपुत्त्राणामर्ज्जुनो जयतां वरः।
एवमेव गतिर्नूनं भवान् विषयवासिनां। गतिमन्तो भवन्त्वद्य सर्व्वे विषयवासिनः।
॥ वैशम्पायन उवाच ॥ स्त्रीमध्य उक्तस्तेनासौ तद्वाक्यमभयङ्करं। अन्तःपुरे स्लाघ्यमान इदं वचनमब्रवीत्। ११७०
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि उत्तरप्रशंसायां पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥
॥ उत्तर उवाच ॥ अद्याहमनुगच्छेयं दृढधन्वा गवां पदं। यदि मे सारथिः कश्चिद्भवेदश्वेषु कोविदः।
तन्त्वहं नावगच्छामि यो मे यन्ता भवेन्नरः। पश्यध्वं सारथिं चिप्रं मम युक्तं प्रयास्यतः।
अष्टाविंशतिरात्रं वा मासं वा नूनमन्ततः। यत्तदासीन्महद्युद्धं तत्र मे सारथिर्हतः।
स लभेयं यदा त्वन्यं हययानविदं नरं। त्वरावानद्य यात्वाऽहं समुच्छ्रितमहाध्वजं।
विगाह्य तत्परानीकं गजवाजिरथाकुलं। शस्त्रप्रतापनिर्व्वीर्य्यान् कुरून् जित्वानये पशून्। ११७५
दुर्य्योधनं शान्तनवं कर्णं वैकर्त्तनं कृपं। द्रोणञ्च सहपुत्त्रेण महेष्वासान्समागतान्।
वित्रासयित्वा सङ्ग्रामे दानवानिव वज्रभृत्। अनेनैव मुहूर्त्तेन पुनः प्रत्यानये पशून्।
शून्यमासाद्य कुरवः प्रयान्त्यादाय गोधनं। किन्नु शक्यं मया कर्त्तुं यदहं तत्र नाभवं।
पश्येयुरद्य मे वीर्य्यं कुरवस्ते समागताः। किन्नु पार्थोऽर्ज्जुनः साचादयमस्मान्प्रबाधते।
॥ वैशम्पायन उवाच ॥ श्रुत्वा तदर्ज्जुनो वाक्यं राज्ञः पुत्त्रस्य भाषतः। अतीतः समये काले प्रियां भार्य्यामनिन्दितां। ११८०
द्रुपदस्य सुतान्तन्वीं पाञ्चालीं पावकात्मजां। सत्यार्जवगुणोपेतां भर्त्तुः प्रियहिते रतां।
उवाच रहसि प्रीतः कृष्णां सर्व्वार्थकोविदः। उत्तरं ब्रूहि कल्याणि चिप्रं मद्वचनादिदं।
अयं वै पाण्डवस्यासीत्सारथिः सम्मतो दृढः। महायुद्धेषु संसिद्धः स ते यन्ता भविष्यति।
॥ वैशम्पायन उवाच ॥ तस्य तद्वचनं स्त्रीषु भाषतश्च पुनः पुनः। न साऽमर्षत पाञ्चाली बीभत्सोः परिकीर्त्तनं।
अथैनमुपसङ्गम्य स्त्रीमध्यात् सा तपस्विनी। व्रीडमानेव शनकैरिदं वचनमब्रवीत्। ११८५
योऽसौ बृहद्वारणाभो युवा सुप्रियदर्शनः। बृहन्नलेति विख्यातः पार्थस्यासीत् स सारथिः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

धनुष्यनवरस्त्वासीत्तस्य शिष्यो महात्मनः । दृष्टपूर्व्वो मया वीर चरन्त्या पाण्डवान्प्रति ।

यदा तत्पावको दावमदहत् खाण्डवं वनं । अर्ज्जुनस्य तदाऽनेन सङ्गृहीता हयोत्तमाः ।

तेन सारथिना पार्थः सर्व्वभूतानि सर्व्वशः । अजयत् खाण्डवप्रस्थे न हि यन्ताऽस्ति तादृशः ।

॥ उत्तर उवाच ॥ सैरिन्ध्रि जानासि तथा युवानं नपुंसको नैव भवेद्यथाऽसौ । अहं न शक्नोमि बृहन्नलां शुभे वक्तुं स्वयं

यत्स्व हयान्ममेति वै । ११९०

॥ द्रौपद्युवाच ॥ येयं कुमारी सुश्रोणी भगिनी ते यवीयसी । अस्याः स वीर वचनं करिष्यति न संशयः ।

यदि वै सारथिः स स्यात् कुरून् सर्व्वान् संशयः । जित्वा गाश्च समादाय ध्रुवमागमनं भवेत् ।

एवमुक्तः स सैरिन्ध्र्या भगिनीं प्रत्यभाषत । गच्छ त्वमनवद्याङ्गि तामानय बृहन्नलां ।

सा भ्रात्रा प्रेषिता शीघ्रमगच्छन्नर्त्तनागृहं । यत्रास्ते स महाबाहुश्छन्नः सत्रेण पाण्डवः ।

इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि बृहन्नलासारथ्यकथने षट्त्रिंशोऽध्यायः ॥ ३६ ॥

॥ वैशम्पायन उवाच ॥ सा प्राद्रवत्काञ्चनमाल्यधारिणी ज्येष्ठेन भ्रात्रा प्रहिता यशस्विनी । सुदक्षिणा वेदिविलग्नमध्या सा पद्म

पत्राभनिभा शिखण्डिनी । ११९५

तन्वी शुभाङ्गी मणिचित्रमेखला मत्स्यस्य राज्ञो दुहिता श्रिया वृता । तन्नर्त्तनागारमरालपक्ष्मा शतह्रदा मेघमिवाभ्यपद्यत ।

सा हस्तिहस्तोपमसंहतोरू स्वनिन्दिता चारुदती सुमध्यमा । आसाद्य तं वै वरमाल्यधारिणी पार्थं शुभा नागवधूरिव

द्विपं ।

सा रत्नभूता मनसः प्रियाऽर्च्चिता सुता विराटस्य यथेन्द्रलक्ष्मीः । सुदर्शनीया प्रमुखे यशस्विनी प्रत्याब्रवीदर्ज्जुनमायते

क्षणा ।

सुसंहतोरुं कनकोज्ज्वलत्वचं पार्थः कुमारीं स तदाऽभ्यभाषत । किमागमः काञ्चनमाल्यधारिणि मृगाक्षि किन्त्वं त्वरिते

व भाविनी ।

किं ते मुखं सुन्दरि न प्रसन्नमाचक्ष्व तत्त्वं मम शीघ्रमङ्गने । १२००

॥ वैशम्पायन उवाच ॥ स तां दृष्ट्वा विशालाक्षीं राजपुत्त्रीं सखीं सखा । प्रहसन्नब्रवीद्राजन्किमागमनमित्युत ।

तमब्रवीद्राजपुत्त्री समुपेत्य नरर्षभं । प्रणयम्भावयन्ती सा सखीमध्य इदं वचः ।

गावो राष्ट्रस्य कुरुभिः काल्यन्ते नो बृहन्नले । तान् विजेतुं मम भ्राता प्रयास्यति धनुर्द्धरः ।

नचिरं निहतस्तस्य सङ्ग्रामे रथसारथिः । तेन नास्ति समः सूतो योऽस्य सारथ्यमाचरेत् ।

तस्मै प्रयतमानाय सारथ्यार्थं बृहन्नले । आचचक्षे हयज्ञाने सैरिन्ध्री कौशलं तव । १२०५

अर्ज्जुनस्य किलासीस्त्वं सारथिर्दयितः पुरा । त्वयाऽजयत् सहायेन पृथिवीं पाण्डवर्षभः । सा सारथ्यं मम भ्रातुः कुरु साधु

बृहन्नले ।

दूराद्दूरतरं गावो ह्रियन्ते कुरुभिर्हि नः । अथैतद्वचनं मेऽद्य नियुक्ता न करिष्यसि ।

प्रणयादुच्यमाना त्वं परित्यक्ष्यामि जीवितं । एवमुक्तस्तु सुश्रोण्या तया सख्या परन्तपः ।

जगाम राजपुत्त्रस्य सकाशममितौजसः । तमाव्रजन्तन्त्वरितं प्रभिन्नमिव कुञ्जरं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अन्वगच्छद्विशालाची शिशुं गजवधूरिव। दूरादेव तु तां प्रेक्ष्य राजपुत्रोऽभ्यभाषत। १२१०
त्वया सारथिना पार्थः खाण्डवेऽग्निमतर्पयत्। पृथिवीमजयत् कृत्स्नां कुन्तीपुत्रो धनञ्जयः।
सैरिन्ध्री त्वां समाचष्टे सा हि जानाति पाण्डवान्। संयच्छ मामकानश्वांस्तथैव त्वं बृहन्नले।
कुरुभिर्योत्स्यमानस्य गोधनानि परीप्सतः। अर्ज्जुनस्य किलासीस्त्वं सारथिर्दयितः पुरा।
त्वयाऽजयत्सहायेन पृथिवीं पाण्डवर्षभः। एवमुक्ता प्रत्युवाच राजपुत्रं बृहन्नला।
का शक्तिर्म्मम सारथ्यं कर्त्तुं सङ्ग्राममूर्द्धनि। गीतं वा यदि वा नृत्यं वादित्रं वा पृथग्विधं। १२१५
तत्करिष्यामि भद्रन्ते सारथ्यं तु कुतो मम।
॥ उत्तर उवाच ॥ बृहन्नले गायनो वा नर्त्तनो वा पुनर्भव। चिप्रं मे रथमास्थाय निगृह्णीष्व हयोत्तमान्।
॥ वैशम्पायन उवाच ॥ स तत्र नर्म्मसंयुक्तमकरोत् पाण्डवो बहु। उत्तरायाः प्रमुखतः सर्व्वं जानन्नरिन्दमः।
ऊर्द्ध्वमुत्चिप्य कवचं शरीरे प्रत्यमुञ्चत। कुमार्य्यस्तत्र तं दृष्ट्वा प्राहसन्पृथुलोचनाः।
स तु दृष्ट्वा विमुह्यन्तं स्वयमेवोत्तरस्ततः। कवचेन महार्हेण समनह्यद्बृहन्नलां। १२२०
स बिभ्रत् कवचञ्चाग्र्यं स्वयमप्यंशुमत्तरं। ध्वजञ्च सिंहमुच्छ्रित्य सारथ्ये समकल्पयत्।
धनूंषि च महार्हाणि वाणांश्च रुचिरान्बहून्। आदाय प्रययौ वीरः स बृहन्नलसारथिः।
अथोत्तरा च कन्याश्च सख्यस्तामब्रुवंस्तदा। बृहन्नले आनयेथा वासांसि रुचिराणि च।
पाञ्चालिकार्थं चित्राणि सूक्ष्माणि च मृदूनि च। विजित्य सङ्ग्रामगतान् भीष्मद्रोणमुखान् कुरून्।
एवं ता ब्रुवतीः कन्याः सहिताः पाण्डुनन्दनः। प्रत्युवाच हसन्पार्थो मेघदुन्दुभिनिस्वनः। १२२५
॥ बृहन्नलोवाच ॥ यद्युत्तरोऽयं सङ्ग्रामे विजेष्यति महारथान्। अथाहरिष्ये वासांसि दिव्यानि रुचिराणि च।
॥ वैशम्पायन उवाच ॥ एवमुक्ता तु बीभत्सुस्ततः प्राचोदयद्धयान्। कुरूनभिमुखः शूरो नानाध्वजपताकिनः।
तमुत्तरं वीक्ष्य रथोत्तमे स्थितं बृहन्नलया सहितं महाभुजं। स्त्रियश्च कन्याश्च द्विजाश्च सुव्रताः प्रदक्षिणं चक्रुरथोचुरङ्गनाः।
यदर्ज्जुनस्यर्षभतुल्यगामिनः पुराऽभवत् खाण्डवदाहमङ्गलं। कुरून्समासाद्य रणे बृहन्नले सहोत्तरेणाद्य तदस्तु मङ्गलं।
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि उत्तरनिर्याणे सप्तत्रिंशोऽध्यायः॥ ३७॥
॥ वैशम्पायन उवाच ॥ स राजधान्या निर्याय वैराटिरकुतोभयः। प्रयाहीत्यब्रवीत् सूतं यत्र ते कुरवो गताः। १२२०
समवेतान् कुरून्सर्व्वान् जिगीषूनवजित्य वै। गास्तेषां चिप्रमादाय पुनरेष्याम्यहं पुरं।
ततस्तांश्चोदयमास सदश्वान्पाण्डुनन्दनः। ते हया नरसिंहेन चोदिता वातरंहसः।
आलिखन्त इवाकाशमूहुः काञ्चनमालिनः। नातिदूरमथो गत्वा मत्स्यपुत्रधनञ्जयौ।
अवेचेताममित्रघ्नौ कुरूणाम्बलिनां वलं। श्मशानमभितो गत्वा आससाद कुरूनथ।
तां शमीमन्ववीचेतां व्यूढानीकांश्च सर्व्वशः। तदनीकं महत्तेषां विबभौ सागरोपमं। १२१५
सर्पमाणमिवाकाशे वनं बहुलपादपं। ददृशे पार्थिवो रेणुर्ज्जनितस्तेन सर्पता।
दृष्टिप्रणाशो भूतानां दिवस्पृक्कुरुसत्तम। तदनीकं महद्दृष्ट्वा गजाश्वरथसङ्कुलं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कर्णदुर्य्योधनकृपैर्गुप्तं शान्तनवेन च। द्रोणेन च सपुत्रेण महेष्वासेन धीमता ।
हृष्टरोमा भयोद्विग्नः पार्थं वैराटिरब्रवीत्।
॥ उत्तर उवाच ॥ नोत्सहे कुरुभिर्य्योद्धुं रोमहर्षं हि पश्य मे। बहुप्रवीरमत्युग्रं देवैरपि दुरासदं। १२४०
प्रतियोद्धुं न शक्ष्यामि कुरुसैन्यमनन्तकं। नाशंसे भारतीं सेनां प्रवेष्टुं भीमकार्मुकां।
रथनागाश्वकलिलां पत्तिध्वजसमाकुलां। दृष्ट्वैव हि परानाजौ मनः प्रव्यथतीव मे।
यत्र द्रोणश्च भीष्मश्च कृपः कर्णो विविंशतिः। अश्वत्थामा विकर्णश्च सोमदत्तश्च वाह्लिकः।
दुर्य्योधनस्तथा वीरो राजा च रथिनां वरः। द्युतिमन्तो महेष्वासाः सर्व्वे युद्धविशारदाः।
दृष्ट्वैव हि कुरूनेतान् व्यूढानीकान्प्रहारिणः। हृषितानि च रोमाणि कश्मलञ्चागतं मम। १२४५
॥ वैशम्पायन उवाच ॥ अविजातो विजातस्य मौर्ख्याद्धूर्त्तस्य पश्यतः। परिदेवयते मन्दः सकाशे सव्यसाचिनः।
त्रिगर्त्तान्मे पिता यातः शून्ये सम्प्रणिधाय मां। सर्व्वां सेनामुपादाय न मे सन्तीह सैनिकाः।
सोऽहमेको बहून्बालः कृतास्त्रानकृतश्रमः। प्रतियोद्धुं न शक्ष्यामि निवर्त्तस्व बृहन्नले।
॥ बृहन्नलोवाच ॥ भयेन दीनरूपोऽसि द्विषतां हर्षवर्द्धनः। न च तावत् कृतं कर्म्म परैः किञ्चित् रणाजिरे।
स्वयमेव च मामात्थ वह मां कौरवान्प्रति। सोऽहं त्वां तत्र नेष्यामि यत्रैते बहुला ध्वजाः। १२५०
मध्यमामिषगृध्राणां कुरूणामाततायिनां। नेष्यामि त्वां महाबाहो पृथिव्यामपि युध्यतां।
तथा स्त्रीषु प्रतिश्रुत्य पौरुषं पुरुषेषु च। कत्थमानोऽभिनिर्याय किमर्थं न युयुत्ससे।
न चेद्विजित्य गास्तास्त्वं गृहान्वै प्रतियास्यसि। प्रहसिष्यन्ति वीरास्त्वां नरा नार्य्यश्च सङ्गताः।
अहमप्यत्र सैरिन्ध्र्या ख्यातः सारथ्यकर्म्मणि। न च शक्ष्याम्यनिर्ज्जित्य गाः प्रयातुं पुरं प्रति।
स्तोत्रेण चैव सैरिन्ध्र्यास्तव वाक्येन तेन च। कथं न युध्येयमहं कुरून् सर्व्वान् स्थिरो भव। १२५५
॥ उत्तर उवाच ॥ कामं हरन्तु मत्स्यानां भूयांसः कुरवो धनं। प्रहसन्तु च मां नार्य्यो नरा वाऽपि बृहन्नले।
सङ्ग्रामे न च कार्य्यं मे गावो गच्छन्तु चापि मे। शून्यं मे नगरञ्चापि पितुश्चैव बिभेम्यहं।
॥ वैशम्पायन उवाच ॥ इत्युक्त्वा प्राद्रवद्भीतो रथात् प्रस्कन्द्य कुण्डली। त्यक्त्वा मानं च दर्पञ्च विसृज्य सशरन्धनुः।
॥ बृहन्नलोवाच ॥ नैष शूरैः स्मृतो धर्म्मः क्षत्त्रियस्य पलायनं। श्रेयस्तु मरणं युद्धे न भीतस्य पलायनं।
॥ वैशम्पायन उवाच ॥ एवमुक्त्वा तु कौन्तेयः सोऽवप्लुत्य रथोत्तमात्। तमन्वधावद्धावन्तं राजपुत्रं धनञ्जयः। १२६०
दीर्घां वेणीं विधुन्वानः साधुशुक्ले च वाससी। विधूय वेणीं धावन्तमजानन्तोऽर्जुनं तदा।
सैनिकाः प्राहसन् केचित्तथारूपमवेक्ष्य तं। तं शीघ्रमभिधावन्तं सम्प्रेक्ष्य कुरवोऽब्रुवन्।
क एष वेशसंच्छन्नो भस्मन्येव हुताशनः। किञ्चिदस्य यथा पुंसः किञ्चिदस्य यथा स्त्रियः।
सारूप्यमर्ज्जुनस्येव क्लीवरूपं बिभर्त्ति च। तदेवैतच्छिरोग्रीवं तौ बाहू परिघोपमौ।
तद्वदेवास्य विक्रान्तं नायमन्यो धनञ्जयात्। अमरेष्विव देवेन्द्रो मानुषेषु धनञ्जयः। १२६५
एकः कोऽस्माननुपायायादन्यो लोके धनञ्जयात्। एकः पुत्रो विराटस्य शून्ये सन्निहितः पुरे।
स एष किल निर्य्यातो बालभावान्न पौरुषात्। सत्रेण नूनं छन्नं हि चरन्तं पार्थमर्ज्जुनं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

उत्तरः सारथिं कृत्वा निर्य्यातो नगराद्बहिः । स नो मन्यामहे दृष्ट्वा भीत एष पलायते।
तन्नूनमेष धावन्तं जिघृक्षति धनञ्जयः।
॥ वैशम्पायन उवाच ॥ इति स्म कुरवः सर्व्वे विमृशन्तः पृथक् पृथक्। न च व्यवसितुं किञ्चिदुत्तरं शक्नुवन्ति ते। १२७०
छन्नं तथा तं सत्रेण पाण्डवं प्रेक्ष्य भारत। उत्तरन्तु प्रधावन्तमभिद्रुत्य धनञ्जयः।
गत्वा पदशतं तूर्णं केशपक्षे परामृशत्। सोऽर्जुनेन परामृष्टः पर्य्यदेवयदार्त्तवत्।
बहुलं कृपणञ्चैव विराटस्य सुतस्तदा।
॥ उत्तर उवाच ॥ शृणुयास्त्वं हि कल्याणि बृहन्नले सुमध्यमे। निवर्त्तय रथं क्षिप्रं जीवन् भद्राणि पश्यति।
शातकुम्भस्य शुद्धस्य शतं निष्कान् ददामि ते। मणीनष्टौ च वैदूर्य्यान् हेमबद्धान्महाप्रभान्। १२७५
हेमदण्डप्रतिच्छन्नं रथं युक्तञ्च सुव्रतैः। मत्तांश्च दश मातङ्गान् मुञ्च मान्त्वं बृहन्नले।
॥ वैशम्पायन उवाच ॥ एवमादीनि वाक्यानि विलपन्तमचेतसं। प्रहस्य पुरुषव्याघ्रो रथस्यान्तिकमानयत्।
अथैनमब्रवीत् पार्थो भयार्त्तं नष्टचेतसं। यदि नोत्सहसे योद्धुं शत्रुभिः शत्रुकर्षण।
एहि मे त्वं हयान्यच्छ युध्यमानस्य शत्रुभिः। प्रयाह्येतद्रथानीकं मद्बाहुबलरक्षितः।
अप्रधृष्यतमं घोरं गुप्तं वीरैर्महारथैः। माभैस्त्वं राजपुत्राग्र्य क्षत्रियोऽसि परन्तप। १२८०
कथं पुरुषशार्द्दूल शत्रुमध्ये विषीदसि। अहं वै कुरुभिर्योत्स्ये विजेष्यामि च ते पशून।
प्रविश्यैतद्रथानीकमप्रधृष्यं दुरासदं। यन्ता भव नरश्रेष्ठ योत्स्येऽहं कुरुभिः सह।
एवं ब्रुवाणो बीभत्सुर्वैराटिमपराजितः। समाश्वास्य मुहूर्त्तन्तमुत्तरं भरतर्षभ।
तत एनं विचेष्टन्तमकामं भयपीडितं। रथमारोपयामास पार्थः प्रहरताम्वरः।
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि उत्तराश्वासने अष्टात्रिंशोऽध्यायः ॥ ३८ ॥
॥ वैशम्पायन उवाच ॥ तं दृष्ट्वा क्लीववेशेन रथस्थं नरपुङ्गवं। शमीमभिमुखं यान्तं रथमारोप्य चोत्तरं। १२८५
भीष्मद्रोणमुखास्तत्र कुरवो रथिसत्तमाः। वित्रस्तमनसः सर्व्वे धनञ्जयकृताद्भयात्।
तानवेक्ष्य हतोत्साहानुत्पातानपि चाद्भुतान्। गुरुः शस्त्रभृतां श्रेष्ठो भारद्वाजोऽभ्यभाषत।
चण्डाश्च वाताः संवान्ति रुक्षाः शर्करवर्षिणः। भस्मवर्णप्रकाशेन तमसा सम्भृतं नभः।
रुक्षवर्णाश्च जलदा दृश्यन्ते ऽद्भुतदर्शनाः। प्रसरन्ति च कोशेभ्यः शस्त्राणि विविधानि च।
शिवाश्च विनदन्त्येता दीप्तायां दिशि दारुणाः। हयास्चाश्रूणि मुञ्चन्ति ध्वजाः कम्पन्त्यकम्पिताः। १२९०
यादृशान्यत्र रूपाणि सन्दृश्यन्ते बहूनि च। यत्ता भवन्तस्तिष्ठन्तु साध्वसं समुपस्थितं।
रक्षध्वमपि चात्मानं व्यूहध्वं वाहिनीमपि। वैशसंच प्रतीक्षध्वं रक्षध्वञ्चापि गोधनं।
एष वीरो महेष्वासः सर्व्वशस्त्रभृताम्वरः। आगतः क्लीववेशेन पार्थो नास्त्यत्र संशयः।
नदीज लङ्केशवनारिकेतुर्नगाह्वयो नाम नगारिसूनुः। एषोऽङ्गनावेशधरः किरीटी जित्वा वयं नेष्यति चाद्य गा वः।
स एष पार्थो विक्रान्तः सव्यसाची परन्तपः। नायुद्धेन निवर्त्तेत सर्व्वैरपि सुरासुरैः। १२९५

नदीज देमी लङ्केश्वनारिकेतः हनुमकेतुः ... किरीटी अर्जुनः अयं

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon.

क्लेशितस्य वने शूरो वासवेनापि शिक्षितः । अमर्षवशमापन्नो वासवप्रतिमो युधि ।
नेहास्य प्रतियोद्धारमहम्पश्यामि कौरवाः । महादेवोऽपि पार्थेन श्रूयते युधि तोषितः ।
किरातवेशप्रच्छन्नो गिरौ हिमवति प्रभुः ।
॥ कर्ण उवाच ॥ सदा भवान्फाल्गुनस्य गुणैरस्मान्विकत्थसे । न चार्जुनः कलापूर्णो मम दुर्योधनस्य च ।
॥ दुर्योधन उवाच ॥ यद्येष पार्थो राधेय कृतं कार्य्यं भवेन्मम । ज्ञाताः पुनश्चरिष्यन्ति द्वादशाब्दान्विशाम्पते ।
अथैष कश्चिदेवान्यः क्लीववेशेन मानवः । शरैरेनं सुनिशितैः पातयिष्यामि भूतले ।
॥ वैशम्पायन उवाच ॥ तस्मिन् ब्रुवति तद्वाक्यं धार्त्तराष्ट्रे परन्तप । भीष्मो द्रोणः कृपो द्रौणिः पौरुषन्तदपूजयन् ।
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि अर्ज्जुनप्रशंसायां एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥
॥ वैशम्पायन उवाच ॥ तां शमीमुपसङ्गम्य पार्थो वैराटिमब्रवीत् । सुकुमारं समाज्ञाय सङ्ग्रामे नातिकोविदं ।
समादिष्टो मया क्षिप्रं धनूंष्यवहरोत्तर । नेमानि हि त्वदीयानि सोढुं शक्ष्यन्ति मे बलं ।
भारञ्चापि गुरुं वोढुं कुञ्जराश्वान् प्रमर्द्दतः । मम वा बाहुविक्षेपं शत्रूनिह विजेष्यतः ।
तस्माद्भूमिञ्जयारोह शमीमेतां पलाशिनीं । अस्यां हि पाण्डुपुत्त्राणां धनूंषि निहितान्युत ।
युधिष्ठिरस्य भीमस्य बीभत्सोर्यमयोस्तथा । ध्वजाः शराश्च शूराणां दिव्यानि कवचानि च ।
अत्र चैतन्महावीर्य्यं धनुः पार्थस्य गाण्डिवं । एकं शतसहस्रेण सम्मितं राष्ट्रवर्द्धनं ।
व्यायामसहमत्यर्थं तृणराजसमं महत् । सर्व्वायुधमहामात्रं शत्रुसम्बाधकारकं ।
सुवर्णविकृतं दिव्यं श्लक्ष्णमायतमव्रणं । अलम्भारं गुरुं वोढुं दारुणं चारुदर्शनं ।
तादृशान्येव सर्व्वाणि बलवन्ति दृढानिच । युधिष्ठिरस्य भीमस्य बीभत्सोर्यमयोस्तथा ।
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि अर्ज्जुनास्त्रकथने चत्वारिंशोऽध्यायः ॥ ४० ॥
॥ उत्तर उवाच ॥ अस्मिन् वृक्षे किलोद्बद्धं शरीरमिति नः श्रुतं । तदहं राजपुत्त्रः सन् स्पृशेयं पाणिना कथं ।
नैवंविधं मया युक्तमालब्धुं क्षत्त्रयोनिना । महता राजपुत्त्रेण मन्त्रव्रतविदा सदा ।
स्पृष्टवन्तं शरीरं मां शववाहमिवाशुचिं । कथं वा व्यवहार्य्यं वै कुर्व्वीथास्त्वं बृहन्नले ।
॥ बृहन्नलोवाच ॥ व्यवहार्य्यश्च राजेन्द्र शुचिश्चैव भविष्यसि । धनूंष्येतानि मा भैस्त्वं शरीरं नात्र विद्यते ।
दायादं मत्स्यराजस्य कुले जातं मनस्विनं । त्वां कथं निन्दितं कर्म्म कारयेऽहं नृपात्मज ।
॥ वैशम्पायन उवाच ॥ एवमुक्तः स पार्थेन रथात् प्रस्कन्द्य कुण्डली । आरुरोह शमीवृक्षं वैराटिरवशस्तदा ।
तमन्वशासत् शत्रुघ्नो रथे तिष्ठन् धनञ्जयः । अवरोपय वृक्षाग्रात् धनूंष्येतानि माचिरं ।
परिवेष्टनमेतेषां क्षिप्रं चैव व्यपानुद । सोऽपहृत्य महार्हाणि धनूंषि पृथुवक्षसां ।
परिवेष्टनपत्त्राणि विमुच्य समुपानयत् । तथा सन्नहनान्येषां परिमुच्य समन्ततः ।
अपश्यद्गाण्डिवं तत्र चतुर्भिरपरैः सह । तेषां विमुच्यमानानां धनुषामर्कवर्चसां ।
विनिश्चेरुः प्रभा दिव्या ग्रहाणामुदयेष्विव । स तेषां रूपमालोक्य भोगिनामिव जृम्भतां ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

हृष्टरोमा भयोद्विग्नः चणेन समपद्यत। संस्पृश्य तानि चापानि भानुमन्ति वृहन्निच।
वैराटिरर्ज्जुनं राजन्निदं वचनमब्रवीत्।
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि अस्त्रारोपणे एकचत्वारिंशोऽध्यायः॥ ४१ ॥
॥ उत्तर उवाच॥ विन्दवो जातरूपस्य शतं यस्मिन्निपातिताः। सहस्रकोटिसौवर्णाः कस्यैतद्धनुरुत्तमं। १२२५
वरणा यत्र सौवर्णाः पृष्ठे भासन्ति दंशिताः। सुपार्श्वं सुग्रहञ्चैव कस्यैतद्धनुरुत्तमं।
तपनीयस्य शुद्धस्य पृष्ठे यस्येन्द्रगोपकाः। पृष्ठे विभक्ताः शोभन्ते कस्यैतद्धनुरुत्तमं।
सूर्य्या यत्र च सौवर्णास्त्रयो भासन्ति दंशिताः। तेजसा प्रज्वलन्तो हि कस्यैतद्धनुरुत्तमं।
शलभा यत्र सौवर्णास्तपनीयविभूषिताः। सुवर्णमणिचित्रञ्च कस्यैतद्धनुरुत्तमं।
इमे च कस्य नाराचाः साहस्रा लोमवाहिनः। समन्तात् कलधौताग्रा उपासङ्गे हिरण्मये। १२३०
विपाठाः पृथवः कस्य गार्द्धपत्राः शिलाशिताः। हारिद्रवर्णाः सुसमाः पीताः सर्व्वायसाः शराः।
कस्यायमसितश्चापः पञ्चशार्दूललच्चणः। वराहकर्णव्यामिश्रान् शरान् धारयते दश।
कस्येमे पृथवो दीर्घाश्चन्द्रविम्बार्द्धदर्शनाः। शतानि सप्त तिष्ठन्ति नाराचा रुधिराशनाः।
कस्येमे शुकपत्राभैः पूर्व्वैरर्द्धैः सुवाससः। उत्तरैरायसैः पीतैर्हेमपुङ्खैः शिलाशितैः।
गुरुभारसहो दिव्यः शात्रवाणां भयङ्करः। कस्यायं सायको दीर्घः शिलीपृष्ठः शिलीमुखः। १२३५
वैयाघ्रकोशे निहितो हेमचित्रत्सरुर्म्महान्। पृथुलश्चित्रकोशस्य किङ्किणीसायको महान्।
कस्य हेमत्सरुर्दिव्यः खड्गः परमनिर्म्मलः। कस्यायं विमलः खड्गो गव्ये कोशे समर्पितः।
हेमत्सरुरनाधृष्यो नैषध्यो भारसाधनः। कस्य पाञ्चनखे कोशे सायको हेमविग्रहः।
प्रमाणरूपसम्पन्नः पीत आकाशसन्निभः। कस्य हेममये कोशे सुतप्ते पावकप्रभे।
निस्त्रिंशोऽयं गुरुः पीतः सायकः परनिर्व्रणः। कस्यायमसितः खड्गो हेमविन्दुभिरावृतः। १२४०
आशीविषसमस्पर्शः परकायप्रभेदनः। गुरुभारसहो दिव्यः सपत्नानां भयप्रदः।
निर्दिशस्व यथातत्त्वं यथा पृष्टा वृहन्नले। विस्मयो मे परो जातो दृष्ट्वा सर्व्वमिदं महत्।
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि उत्तरस्यास्त्रदर्शने द्विचत्वारिंशोऽध्यायः॥ ४२ ॥
॥ वृहन्नला उवाच॥ यन्मां पूर्व्वमिहापृच्छः शत्रुसेनापहारिणं। गाण्डीवमेतत्पार्थस्य लोकेषु विदितं धनुः।
सर्व्वायुधमहामात्रं शातकुम्भपरिष्कृतं। एतत्तदर्ज्जुनस्यासीत् गाण्डीवं परमायुधं।
यत्तच्छतसहस्रेण सम्मितं राष्ट्रवर्द्धनं। येन देवान् मनुष्यांश्च पार्थो विजयते मृधे। १२४५
चित्रमुच्चावचैर्व्वर्णैः श्लक्ष्णमायतमव्रणं। देवदानवगन्धर्व्वैः पूजितं शाश्वतीः समाः।
एतद्वर्षसहस्रन्तु ब्रह्मा पूर्व्वमधारयत्। ततोऽनन्तरमेवाथ प्रजापतिरधायत।
त्रीणि पञ्चशतं चैव शक्रोऽशीतिं च पञ्च च। सोमः पञ्चशतं राजा तथैव वरुणः शतं।
पार्थः पञ्च च षष्टिञ्च वर्षाणि श्वेतवाहनः। महावीर्य्यं महादिव्यमेतत्तद्धनुरुत्तमं।
एतत्पार्थमनुप्राप्तं वरुणाच्चारुदर्शनं। पूजितं सुरमर्त्त्येषु बिभर्त्ति परमं वपुः। १२५०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सुपार्श्वं भीमसेनस्य जातरूपग्रहं धनुः। येन पार्थोऽजयत् कृत्स्नां दिशं प्राचीं परन्तपः।
इन्द्रगोपकचित्रञ्च यदेतच्चारुदर्शनं। राज्ञो युधिष्ठिरस्यैतद्वैराटे धनुरुत्तमं।
सूर्या यस्मिंस्तु सौवर्णाः प्रकाशन्ते प्रकाशिनः। तेजसा प्रज्वलन्तो वै नकुलस्यैतदायुधं।
शलभा यत्र सौवर्णास्तपनीयविचित्रिताः। एतन्माद्रीसुतस्यापि सहदेवस्य कार्मुकं।
ये त्विमे क्षुरसङ्काशाः सहस्रा लोमवाहिनः। एतेऽर्ज्जुनस्य वैराटे शराः सर्पविषोपमाः। १२५५
एते ज्वलन्तः सङ्ग्रामे तेजसा शीघ्रगामिनः। भवन्ति वीरस्याक्षय्या व्यूहतः समरे रिपून्।
ये चेमे पृथवो दीर्घाश्चन्द्रबिम्बार्द्धदर्शनाः। एते भीमस्य निशिता रिपुक्षयकराः शराः।
हारिद्रवर्णा ये त्वेते हेमपुङ्खाः शिलाशिताः। नकुलस्य कलापोऽयं पञ्चशार्दूललक्षणः।
येनासौ व्यजयत्कृत्स्नां प्रतीचीं दिशमाहवे। कलापो ह्येष तस्यासीन्माद्रीपुत्त्रस्य धीमतः।
ये त्विमे भास्कराकाराः सर्व्वपारसवाः शराः। एते चित्रक्रियोपेताः सहदेवस्य धीमतः। १२६०
ये त्विमे निशिताः पीताः पृथवो दीर्घवाससः। हेमपुङ्खास्त्रिपर्व्वाणो राज्ञ एते महाशराः।
यस्त्वयं सायको दीर्घः शिलीपृष्ठः शिलीमुखः। अर्ज्जुनस्यैष सङ्ग्रामे गुरुभारसहो दृढः।
वैयाघ्रकोशः सुमहान् भीमसेनस्य सायकः। गुरुभारसहो दिव्यः शात्रवाणां भयङ्करः।
सुफलश्चित्रकोशस्य हेमत्सरुरनुत्तमः। निस्त्रिंशः कौरवस्यैष धर्म्मराजस्य धीमतः।
यस्तु पाञ्चनखे कोशे निहितश्चित्रयोधने। नकुलस्यैष निस्त्रिंशो गुरुभारसहो दृढः। १२६५
यस्त्वयं विपुलः खड्गो गव्ये कोशे समर्पितः। सहदेवस्य विद्ध्येनं सर्व्वभारसहं दृढं।
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि उत्तरस्यास्त्रदर्शने त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥
॥ उत्तर उवाच ॥ सुवर्णविकृतानीमान्यायुधानि महात्मनां। रुचिराणि प्रकाशन्ते पार्थानामाशुकारिणां।
क्व नु स्विदर्ज्जुनः पार्थः कौरव्यो वा युधिष्ठिरः। नकुलः सहदेवश्च भीमसेनश्च पाण्डवः।
सर्व्वे एव महात्मानः सर्व्वामित्रविनाशनाः। राज्यमक्षैः पराकीर्य्य न श्रूयन्ते कथञ्चन।
द्रौपदी क्व च पाञ्चाली स्त्रीरत्नमितिविश्रुता। जितानक्षैस्तदा कृष्णा तानेवान्वगमद्वनं। १२७०
॥ अर्ज्जुन उवाच ॥ अहमस्म्यर्ज्जुनः पार्थः सभास्तारो युधिष्ठिरः। बल्लवो भीमसेनस्तु पितुस्ते रसपाचकः।
अश्वबन्धोऽथ नकुलः सहदेवस्तु गोकुले। सैरिन्ध्रीं द्रौपदीं विद्धि यत्कृते कीचका हताः।
॥ उत्तर उवाच ॥ दश पार्थस्य नामानि यानि पूर्व्वं श्रुतानि मे। प्रब्रूयास्तानि यदि मे श्रद्दध्यां सर्व्वमेव ते।
॥ अर्ज्जुन उवाच ॥ हन्त तेऽहं समाचक्षे दश नामानि यानि वै। वैराटे शृणु तानि त्वं यानि पूर्व्वं श्रुतानि ते।
एकाग्रमानसो भूत्वा शृणु सर्व्वं समाहितः। अर्ज्जुनः फाल्गुनो जिष्णुः किरीटी श्वेतवाहनः। १२७५
बीभत्सुर्व्विजयः कृष्णः सव्यसाची धनञ्जयः।
॥ उत्तर उवाच ॥ केनासि विजयो नाम केनासि श्वेतवाहनः। किरीटी नाम केनासि सव्यसाची कथं भवान्।
अर्ज्जुनः फाल्गुनो जिष्णुः कृष्णो बीभत्सुरेव च। धनञ्जयश्च केनासि ब्रूहि तन्मम तत्त्वतः।
श्रुता मे तस्य वीरस्य केवला नामहेतवः। तत्सर्व्वं यदि मां ब्रूयाः श्रद्दध्यां सर्व्वमेव ते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ अर्ज्जुन उवाच ॥ सर्व्वान् जनपदान् जित्वा वित्तमादाय केवलं। मध्ये धनस्य तिष्ठामि तेनाहुर्म्मां धनञ्जयं। १३८०
अभिप्रयामि सङ्ग्रामे यदहं युद्धदुर्म्मदान्। नाजित्वा विनिवर्त्तामि तेन मां विजयं विदुः।
श्वेताः काञ्चनसन्नाहा रथे युज्यन्ति मे हयाः। सङ्ग्रामे युध्यमानस्य तेनाहं श्वेतवाहनः।
उत्तराभ्यां फल्गुनीभ्यां नक्षत्राभ्यामहं दिवा। जातो हिमवतः पृष्ठे तेन मां फाल्गुनं विदुः।
पुरा शक्रेण मे दत्तं युध्यतो दानवर्षभैः। किरीटं मूर्द्ध्नि सूर्य्याभं तेनाहुर्म्मां किरीटिनं।
न कुर्य्यां कर्म्म बीभत्सं युध्यमानं कथञ्चन। तेन देवमनुष्येषु बीभत्सुरिति विश्रुतः। १३८५
उभौ मे दक्षिणौ पाणी गाण्डीवस्य विकर्षणे। तेन देवमनुष्येषु सव्यसाचीति मां विदुः।
पृथिव्यां चतुरन्तायां वर्णो मे दुर्लभः समः। करोमि कर्म्म शुक्लञ्च तेन मामर्ज्जुनं विदुः।
अहं दुरापो दुर्द्धर्षो दमनः पाकशासनिः। तेन देवमनुष्येषु जिष्णुनामाऽस्मि विश्रुतः।
कृष्ण इत्येव दशमं नाम चक्रे पिता मम। कृष्णावदातस्य सतः प्रियत्वाद्बालकस्य वै।
॥ वैशम्पायन उवाच ॥ ततः स पार्थं वैराटिरभ्यवादयदन्तिकात्। अहं भूमिञ्जयो नाम नाम्नाऽहमपि चोत्तरः। १३९०
दिष्ट्या त्वां पार्थ पश्यामि स्वागतं ते धनञ्जय। लोहिताक्ष महाबाहो नागराजकरोपम।
यदज्ञानादवोचं त्वां क्षन्तुमर्हसि तन्मम। यतस्त्वया कृतं पूर्व्वं चित्रं कर्म्म सुदुष्करं।
अतो भयं व्यतीतं मे प्रीतिश्च परमा त्वयि।
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि अर्ज्जुनपरिचये चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥
॥ उत्तर उवाच ॥ आस्थाय रुचिरं वीर रथं सारथिना मया। कतमं यास्यसेऽनीकमुक्तो यास्याम्यहं त्वया।
॥ अर्ज्जुन उवाच ॥ प्रीतोऽस्मि पुरुषव्याघ्र न भयं विद्यते तव। सर्व्वान्नुदामि ते शत्रून् रणे रणविशारद। १३९५
स्वस्थो भव महाबाहो पश्य मां शत्रुभिः सह। युध्यमानं विमर्द्देऽस्मिन् कुर्व्वाणं भैरवं महत्।
एतान्सर्व्वानुपासङ्गान् क्षिप्रं बध्नीहि मे रथे। एकञ्चाहर निस्त्रिंशं जातरूपपरिष्कृतं।
॥ वैशम्पायन उवाच ॥ अर्ज्जुनस्य वचः श्रुत्वा त्वरावानुत्तरस्तदा। अर्ज्जुनस्यायुधान् गृह्य शीघ्रेणावतरत्ततः।
॥ अर्ज्जुन उवाच ॥ अहं वै कुरुभिर्य्योत्स्याम्यवजेष्यामि ते पशून्। सङ्कल्पपक्षविक्षेपं बाहुप्राकारतोरणं।
त्रिदण्डतूणसम्बाधमनेकध्वजसङ्कुलं। ज्याक्षेपणं क्रोधकृतं नेमीनिनददुन्दुभिं। १४००
नगरं ते मया गुप्तं रथोपस्थं भविष्यति। अधिष्ठितो मया सङ्ख्ये रथो गाण्डीवधन्वना।
अजेयः शत्रुसैन्यानां वैराटे व्येतु ते भयं।
॥ उत्तर उवाच ॥ बिभेमि नाहमेतेषां जानामि त्वां स्थिरं युधि। केशवेनापि सङ्ग्रामे साक्षादिन्द्रेण वा समं।
इदन्तु चिन्तयन्नेवं परिमुह्यामि केवलं। निश्चयञ्चापि दुर्म्मेधा न गच्छामि कथञ्चन।
एवं युक्ताङ्गरूपस्य लक्षणैः सूचितस्य च। केन कर्म्मविपाकेन क्लीवत्वमिदमागतं। १४०५
मन्ये त्वां क्लीववेशेन चरन्तं शूलपाणिनं। गन्धर्व्वराजप्रतिमं देवं वाऽपि शतक्रतुं।
॥ अर्ज्जुन उवाच ॥ भ्रातुर्न्नियोगात् ज्येष्ठस्य सम्वत्सरमिदं व्रतं। चरामि व्रतचर्य्यञ्च सत्यमेतद्ब्रवीमि ते।
नास्मि क्लीबो महाबाहो परवान्धर्म्मसंयुतः। समाप्तव्रतमुत्तीर्णं विद्धि मां त्वं नृपात्मज।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ उत्तर उवाच ॥ परमोऽनुग्रहो मेऽद्य यतस्तर्कों न मे वृथा । नहीदृशाः क्लीवरूपा भवन्ति तु नरोत्तम ।
सहायवानस्मि रणे युध्येयममरैरपि । साध्वसं हि प्रनष्टं मे किं करोमि ब्रवीहि मे । ४१०
अहन्ते संग्रहीष्यामि हयान्शत्रुरथारुजान् । शिक्षितो ह्यस्मि सारथ्ये तीर्थतः पुरुषर्षभ ।
दारुको वासुदेवस्य यथा शक्रस्य मातलिः । तथा मां विद्धि सारथ्ये शिक्षितं नरपुङ्गव ।
यस्य याते न पश्यन्ति भूमौ क्षिप्तं पदं पदं । दक्षिणां यो धुरं युक्तः सुग्रीवसदृशो हयः ।
योऽयं धुरं धुर्य्यवरो वामं वहति शोभनः । तं मन्ये मेघपुष्पस्य जवने सदृशं हयं ।
योऽयं काञ्चनसन्नाहः पार्ष्णिं वहति शोभनः । समं शैव्यस्य तं मन्ये जवेन बलवत्तरं । १४१५
योऽयं वहति मे पार्ष्णिं दक्षिणामभितः स्थितः । बलाहकादभिमतः स जवे वीर्य्यवत्तरः ।
त्वामेवायं रथो वोढुं सङ्ग्रामेऽर्हति धन्विनं । तथेमं रथमास्थाय योद्धुमर्हो मतो मम ।
॥ वैशम्पायन उवाच ॥ ततो विमुच्य बाहुभ्यां वलयानि स वीर्य्यवान् । चित्रे काञ्चनसन्नाहे प्रत्यमुञ्चत्तदा शुभे ।
कृष्णान् भङ्गिमतः केशान् श्वेतेनोद्ग्रथ्य वाससा । अथासौ प्राङ्मुखो भूत्वा शुचिः प्रयतमानसः ।
अपि दध्यौ महाबाहुः सर्व्वास्त्राणि रथोत्तमे । ऊचुश्च पार्थं सर्व्वाणि प्राञ्जलीनि नृपात्मजं । १४२०
इमे स्म परमोदाराः किङ्कराः पाण्डुनन्दन । प्रणिपत्य ततः पार्थः समालभ्य च पाणिना ।
सर्व्वाणि मानसानीह भवतेत्यभ्यभाषत । प्रतिगृह्य ततोऽस्त्राणि प्रहृष्टवदनोऽभवत् ।
अधिज्यन्तरसा कृत्वा गाण्डीवं व्याक्षिपद्धनुः । तस्य विक्षिप्यमाणस्य धनुषोऽभून्महाध्वनिः ।
यथा शैलस्य महतः शैलेनैवावजघ्नतः । सनिर्घाताऽभवद्भूमिर्दिक्षु वायुर्ववौ भृशं ।
पपात महती चोल्का दिशो न प्रचकाशिरे । भ्रान्तध्वजं खन्तदासीत् प्रकम्पितमहाद्रुमं । १४२५
तं शब्दं कुरवोऽजानन् विस्फोटमशनेरिव । यदर्ज्जुनो धनुःश्रेष्ठं बाहुभ्यामाक्षिपद्रथे ।
॥ उत्तर उवाच ॥ एकस्त्वं पाण्डवश्रेष्ठ बहूनेतान्महारथान् । कथं जेष्यसि सङ्ग्रामे सर्व्वशस्त्रास्त्रपारगान् ।
असहायोऽसि कौन्तेय ससहायाश्च कौरवाः । अतएव महाबाहो भीतस्तिष्ठामि तेऽग्रतः ।
उवाच पार्थो मा भैषीः प्रहस्य स्वनवत्तदा । युध्यमानस्य मे वीर गन्धर्व्वैः सुमहाबलैः ।
सहायो घोषयात्रायां कस्तदासीत् सखा मम । तथा प्रतिभये तस्मिन् देवदानवसङ्कुले । १४३०
खाण्डवे युध्यमानस्य कस्तदासीत् सखा मम । निवातकवचैः सार्द्धं पौलोमैश्च महाबलैः ।
युध्यतो देवराजार्थे कः सहायस्तदाऽभवत् । स्वयम्वरे तु पाञ्चाल्या राजभिः सह संयुगे ।
युध्यतो बहुभिस्तात कः सहायस्तदाऽभवत् । उपजीव्य गुरुं द्रोणं शक्रं वैश्रवणं यमं ।
वरुणं पावकञ्चैव कृपं कृष्णं च माधवं । पिनाकपाणिनं चैव कथमेतान्न योधये ।
रथं वाहय मे शीघ्रं व्येतु ते मानसो ज्वरः । १४३५
इतिश्री महाभारते विराटपर्व्वणि गोहरणपर्व्वणि अर्ज्जुनयुद्धारम्भे पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥
॥ वैशम्पायन उवाच ॥ उत्तरं सारथिं कृत्वा शमीं कृत्वा प्रदक्षिणां । आयुधं सर्व्वमादाय प्रययौ पाण्डुनन्दनः ।
ध्वजं सिंहं रथात्तस्मादपनीय महारथः । प्रणिधाय शमीमूले प्रायादुत्तरसारथिः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant & Equipment Heritage Foundation, Jalgaon

दैवीं मायां रथेयुक्ता विहितां विश्वकर्म्मणा । काञ्चनं सिंहलाङ्गूलं ध्वजं वानरलक्षणं ।
मनसा चिन्तयामास प्रसादं पावकस्यच । स च तच्चिन्तितं ज्ञात्वा ध्वजे भूतान्यदेशयत् ।
सपताकं विचित्राङ्गं सोपासङ्गं हिरण्मयं । खात्पपात रथस्तूर्णं दिव्यरूपं मनोरथं । १४४८
रथं तमागतं दृष्ट्वा दक्षिणं प्राकरोत्तदा । रथमास्थाय बीभत्सुः कौन्तेयः श्वेतवाहनः
बद्धगोधाङ्गुलित्राणः प्रगृहीतशरासनः । ततः प्रायादुदीचीं च कपिप्रवरकेतनः ।
स्वनवन्तं महाशङ्खं बलवानरिमर्द्दनः । प्राधमद्बलमास्थाय द्विषतां लोमहर्षणं ।
ततस्ते जवना धुर्य्या जानुभ्यामगमन्महीं । उत्तरश्चापि सन्त्रस्तो रथोपस्थ उपाविशत् ।
संस्थाप्य चाश्वान् कौन्तेयः समुद्यम्य च रश्मिभिः । उत्तरं च परिष्वज्य समाश्वासयदर्ज्जुनः । १४४९
॥ अर्ज्जुन उवाच ॥ माभैस्त्वं राजपुत्राग्र्य क्षत्रियोऽसि परन्तप । कथं पुरुषशार्दूल शत्रुमध्ये विषीदसि ।
श्रुतास्ते शङ्खशब्दाश्च भेरीशब्दाश्च पुष्कलाः । कुञ्जराणां च नदतां व्यूढानीकेषु तिष्ठतां ।
स त्वं कथमिहानेन शङ्खशब्देन भीषितः । विषन्नरूपो वित्रस्तः पुरुषः प्राकृतो यथा ।
॥ उत्तर उवाच ॥ श्रुता मे शङ्खशब्दाश्च भेरीशब्दाश्च पुष्कलाः । कुञ्जराणां च नदतां व्यूढानीकेषु तिष्ठतां ।
नैवंविधः शङ्खशब्दः पुरा जातु मया श्रुतः । ध्वजस्य चापिरूपं मे दृष्टपूर्व्वं नहीदृशं । १४५०
धनुषश्चापि निर्घोषः श्रुतपूर्व्वो न मे क्वचित् । अस्य शङ्खस्य शब्देन धनुषो निःस्वनेन च ।
अमानुषेण शब्देन भूतानां ध्वजवासिनां । रथस्य च निनादेन मनो मुह्यति मे भृशं ।
व्याकुलाश्च दिशः सर्व्वा हृदयं व्यथतीव मे । ध्वजेन पिहिताः सर्व्वा दिशो न प्रतिभान्ति मे ।
गाण्डीवस्य च शब्देन कर्णौ मे बधिरीकृतौ ।
॥ अर्ज्जुन उवाच ॥ एकान्तं रथमास्थाय पद्भ्यां त्वमवपीडय । दृढं च रश्मीन् संयच्छ शङ्खं ध्मास्याम्यहं पुनः । १४५५
॥ वैशम्पायन उवाच ॥ ततः शङ्खमुपाध्मासीद्दारयन्निव पर्व्वतान् । द्विषतां दुःखजनकं सुहृदां हर्षवर्द्धनं ।
गुहा गिरीणां च तदा दिशः शैलांस्तथैव च । उत्तरश्चापि संलीनो रथोपस्थ उपाविशत् ।
तस्य शङ्खस्य शब्देन रथनेमिस्वनेन च । गाण्डीवस्य च शब्देन पृथिवी समकम्पत ।
तं समाश्वासयामास पुनरेव धनञ्जयः ।
॥ द्रोणउवाच ॥ यथा रथस्य निर्घोषो यथा मेघ उदीर्य्यते । प्रकम्पते यथा भूमिर्नैषोऽन्यः सव्यसाचिनः । १४६०
शस्त्राणि न प्रकाशन्ते न प्रहृष्यन्ति वाजिनः । अग्नयश्च न भासन्ते समिद्धास्तन्न शोभनं ।
प्रत्यादित्यं च नः सर्व्वे मृगा घोरप्रवादिनः । ध्वजेषु च निलीयन्ते वायसास्तन्न शोभनं ।
शकुनाश्चापसव्या नो वेदयन्ति महद्भयं । गोमायुरेष सेनाया रुवन्मध्ये प्रधावति ।
अनाहतश्च निष्क्रान्तो महद्वेदयते भयं । भवतां रोमकूपानि प्रहृष्टान्युपलक्षये ।
ध्रुवं विनाशो युद्धेषु क्षत्रियाणां प्रदृश्यते । ज्योतींषि न प्रकाशन्ते दारुणा मृगपक्षिणः । १४६५
उत्पाता विविधा घोरा दृश्यन्ते क्षत्रनाशनाः । विशेषत इहास्माकं निमित्तानि विनाशने ।
उल्काभिश्च प्रदीप्ताभिर्ब्बाध्यते पृतना तव । वाहनान्यप्रहृष्टानि रुदन्तीव विशाम्पते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding: IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

उपासते च सैन्यानि गृध्रास्तव समन्ततः। तथास्य वाहिनीं दृष्ट्वा पार्थवाणप्रपीडितां।
पराभूता च नः सेना न कश्चिद्योद्धुमिच्छति। विवर्णमुखभूयिष्ठाः सर्व्वे योधा विचेतसः।
गाश्च प्रस्थाप्य तिष्ठामो व्यूढानीकाः प्रहारिणः। १४७०
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि उत्पातदर्शने षट्चत्वारिंशोऽध्यायः॥ ४६ ॥
॥ वैशम्पायन उवाच॥ अथ दुर्य्योधनो राजा समरे भीष्ममब्रवीत्। द्रोणं च रथशार्दूलं कृपं च सुमहारथं।
उक्तोऽयमर्थ आचार्य्यो मया कर्णेन चासकृत्। पुनरेव च वक्ष्यामि नहि तृप्यामि तं ब्रुवन्।
पराजितैर्हि वस्तव्यं तैश्च द्वादशवत्सरान्। वने जनपदेऽज्ञातैरेष एव पणो हि नः।
तेषां न तावन्निर्वृत्तं वर्त्तते तु त्रयोदशं। अज्ञातवासो बीभत्सुरथास्माभिः समागतः।
अनिर्वृत्तेऽपि निर्व्वासे यदि बीभत्सुरागतः। पुनर्द्वादशवर्षाणि वने वत्स्यन्ति पाण्डवाः। १४७५
लोभाद्वा ते न जानीयुरस्मान्वा मोह आविशत्। हीनातिरिक्तमेतेषां भीष्मो वेदितुमर्हति।
अर्थानां हि पुनर्द्वैधे नित्यं भवति संशयः। अन्यथा चिन्तितो ह्यर्थः पुनर्भवति चान्यथा।
स्वार्थे सर्व्वे विमुह्यन्ति येऽपि धर्म्मविदो जनाः। उत्तरं मार्गमाणानां मत्स्यानाञ्च युयुत्सतां।
यदि बीभत्सुरायातस्तदा कस्यापराङ्मुखः। त्रिगर्त्तानां वयं हेतोर्मत्स्यान् योद्धुमिहागताः।
मत्स्यानां विप्रकारांस्ते बहूनस्मानकीर्त्तयन्। तेषां भयाभिभूतानां तदस्माभिः प्रतिश्रुतं। १४८०
प्रथमं तैर्गृहीतव्यं मत्स्यानां गोधनं महत्। सप्तम्यामपराह्ने वै तथा नस्तैः समाहितं।
अष्टम्यां पुनरस्माभिरादित्यस्योदयं प्रति। इमा गावो गृहीतव्या गते मत्स्ये गवाम्पदं।
ते वा गास्तानयिष्यन्ति यदि वा स्युः पराजिताः। अस्मान्वा ह्युपसन्धाय कुर्य्युर्मत्स्येन सङ्गतं।
अथवा तानपाहाय मत्स्यो जनपदैः सह। सर्व्वया सेनया सार्द्धं संवृतो भीमरूपया।
आयातः केवलां रात्रिमस्मान् योद्धुमुपागतः। तेषामेव महावीर्य्यः कश्चिदेष पुरःसरः। १४८५
अस्मान् योद्धुमुपायातो मत्स्यो वा हि स्वयं भवेत्। यद्येष राजा मत्स्यानां यदि बीभत्सुरागतः।
सर्व्वैर्योद्धव्यमस्माभिरिति नः समयः कृतः। अथ कस्मात्स्थिता ह्येते रथेषु नरसत्तमाः।
भीष्मो द्रोणः कृपश्चैव विकर्णो द्रौणिरेव च। सम्भ्रान्तमनसः सर्व्वे काले ह्यस्मिन्महारथाः।
नान्यत्र युद्धाच्छ्रेयो ऽस्ति तथात्मा प्रणिधीयतां। आच्छिन्ने गोधनेऽस्माकमपि देवेन वज्रिणा।
यमेन वाऽपि सङ्ग्रामे को हास्तिनपुरं व्रजेत्। शरैरेभिः प्रणुन्नानां भग्नानां गहने वने।
को हि जीवेत्पदातीनां भवेदश्वेषु संशयः। आचार्य्यं पृष्ठतः कृत्वा तथा नीतिर्व्विधीयतां। १४९०
जानाति हि मतं तेषां मनस्त्रासयतीव नः। अर्ज्जुने चास्य सम्प्रीतिमधिकामुपलक्षये।
दृष्ट्वा हि पाण्डवा नित्यमाचार्य्यस्य विशेषतः। तथाहि दृष्ट्वा बीभत्सुमुपायान्तं प्रशंसति।
यथा सेना न भज्येत तथा नीतिर्विधीयतां। द्वेषितं ह्युपश्रुण्वाने द्रोणे सर्व्वं विघट्टितं।
अदेशिका महारण्ये ग्रीष्मे शत्रुवशङ्गता। यथा न विभ्रमेत्सेना तथा नीतिर्व्विधीयतां।
दृष्ट्वा हि पाण्डवा नित्यमाचार्य्यस्य विशेषतः। आसयन्नपरार्थांश्च कथ्यते स्म स्वयं तथा। १४९५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

अश्वानां ह्रेषितं श्रुत्वा कः प्रशंसापरो भवेत्। स्थाने वा ऽपि व्रजन्तो वा सदा ह्रेषन्ति वाजिनः।
सदा च वायवो वान्ति नित्यं वर्षति वासवः। स्तनयित्नोश्च निर्घोषः श्रूयते बहुशस्तथा।
किमत्र कार्य्यं पार्थस्य कथं वा स प्रशस्यते। अन्यत्र कामाद्द्वेषाद्वा रोषाद्वाऽस्मासु केवलात्।
आचार्य्या वै कारुणिकाः प्राज्ञाश्चापायदर्शिनः। नैते महाभये प्राप्ते सम्प्रष्टव्याः कथञ्चन। १५००
प्रासादेषु विचित्रेषु गोष्ठीषूपवनेषु च। कथा विचित्राः कुर्व्वाणाः पण्डितास्तत्र शोभनाः।
बह्वन्याश्चर्य्यरूपाणि कुर्व्वन्तो जनसंसदि। इष्वस्त्रे चोपसन्धाने पण्डितास्तत्र शोभनाः।
परेषां विवरज्ञाने मनुष्यचरितेषु च। हस्त्यश्वरथचर्य्यासु खरोष्ट्राजाविकर्म्मणि।
गोधनेषु प्रतोलीषु वरद्वारमुखेषु च। अन्नसंस्कारदोषेषु पण्डितास्तत्र शोभनाः।
पण्डितान् पृष्ठतः कृत्वा परेषां गुणवादिनः। विधीयतां तथा नीतिर्यथा वध्येत वै परः। १५०५
गावश्च सम्प्रतिष्ठाप्य सेनां व्यूह्य समन्ततः। आरक्षाश्च विधीयन्तां यत्र योत्स्यामहे परान्।
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि दुर्य्योधनवाक्ये सप्तचत्वारिंशोऽध्यायः॥ ४७॥
॥ कर्ण उवाच॥ सर्व्वानायुष्मतो भीतान् सन्त्रस्तानिव लक्षये। अयुद्धमनसश्चैव सर्व्वांश्चैवानवस्थितान्।
यद्येष राजा मत्स्यानां यदि बीभत्सुरागतः। अहमावारयिष्यामि वेलेव मकरालयं।
मम चापप्रयुक्तानां शराणां नतपर्व्वणां। नावृत्तिर्गच्छतामस्ति सर्प्पाणामिव सर्प्पतां।
रुक्मपुङ्खाः सुतीक्ष्णाग्रा मुक्ता हस्तवता मया। छादयन्तु शराः पार्थं शलभा इव पादपं। १५१०
शराणां पुङ्खसक्तानां मौर्व्याऽभिहतया दृढं। श्रूयतां तलयोः शब्दो भेर्य्योराहतयोरिव।
समाहितो हि बीभत्सुर्व्वर्षाण्यष्टौ च पञ्च च। जातस्नेहस्य युद्धेऽस्मिन् मयि सम्प्रहरिष्यति।
पात्रीभूतश्च कौन्तेयो ब्राह्मणो गुणवानिव। शरौघान् प्रतिगृह्णातु मया मुक्तान्सहस्रशः।
एष चैव महेष्वासस्त्रिषु लोकेषु विश्रुतः। अहं चापि नरश्रेष्ठादर्ज्जुनान्नावरः क्वचित्।
इतश्चेतश्च निर्मुक्तैः काञ्चनैर्गार्द्ध्रवाजितैः। दृश्यतामद्य वै व्योम शलभैरिव संवृतं। १५१५
अद्याहमृणमक्षय्यं पुरा वाचा प्रतिश्रुतं। धार्त्तराष्ट्रस्य दास्यामि निहत्य समरेऽर्ज्जुनं।
अन्तराच्छिद्यमानानां पुङ्खानां व्यतिशीर्य्यतां। शलभानामिवाकाशे प्रचारः सम्प्रदृश्यतां।
इन्द्राशनिसमस्पर्शं महेन्द्रसमतेजसं। अर्द्दयिष्याम्यहं पार्थमुल्काभिरिव कुञ्जरं।
रथादतिरथं शूरं सर्व्वशस्त्रभृतां वरं। विवशं पार्थमादास्ये गरुत्मानिव पन्नगं।
तमग्निमिव दुर्द्धर्षं मसिशक्तिशरेन्धनं। पाण्डवाग्निमहं दीप्तं प्रदहन्तमिवाहितान्। १५२०
अश्ववेगपुरोवातो रथौघस्तनयित्नुमान्। शरधारो महामेघः शमयिष्यामि पाण्डवं।
मत्कार्मुकविनिर्मुक्ताः पार्थमाशीविषोपमाः। शराः समभिसर्प्पन्तां वल्मीकमिव पन्नगाः।
सुतेजनैरुक्मपुङ्खैः सुपीतैर्नतपर्व्वभिः। आचितं पश्य कौन्तेयं कर्णिकारैरिवाचलं।
जामदग्न्यान्मया ह्यस्त्रं सम्प्राप्तमृषिसत्तमात्। तदुपाश्रित्य वीर्य्यञ्च युध्येयममरैरपि।
ध्वजाग्रे वानरस्तिष्ठन् भल्लेन निहतो मया। अद्यैव पततां भूमौ विनदन् भैरवान् रवान्। १५२५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शरैर्मया विपन्नानां भूतानां ध्वजवासिनां । दिशः प्रतिष्ठमानानामस्तु शब्दो दिवङ्गमः ।
अद्य दुर्य्योधनस्याहं शल्यं हृदि चिरस्थितं । समूलमुद्धरिष्यामि बीभत्सुं पातयन् रथात् ।
हताश्वं विरथं पार्थं पौरुषे पर्य्यवस्थितं । निश्वसन्तं यथा नागमद्य पश्यन्तु कौरवाः ।
कामं गच्छन्तु कुरवो धनमादाय केवलं । रथेषु वाऽपि तिष्ठन्तो युद्धं पश्यन्तु मामकं ।
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि कर्णविकत्थने अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥
॥ कृप उवाच ॥ सदैव तव राधेय युद्धे क्रूरतरा मतिः । अर्थानां प्रकृतिं वेत्सि नानुबन्धमवेक्षसे । १५२०
माया हि बहवः सन्ति शास्त्रमाश्रित्य चिन्तिताः । तेषां युद्धन्तु पापिष्ठं वेदयन्ति पुराविदः ।
देशकालेन संयुक्तं युद्धं विजयदं भवेत् । हीनकालं तदेवेह फलं न लभते पुनः ।
देशे काले च विक्रान्तं कल्याणाय विधीयते । आनुकूल्येन कार्य्याणामन्तरं संविधीयते ।
भारं हि रथकारस्य न व्यवस्यन्ति पण्डिताः । परिचिन्त्य तु पार्थेन सन्निपातो न नः क्षमः ।
एकः कुरूनभ्यरक्षदेकश्चाग्निमतर्पयत् । एकश्च पञ्चवर्षाणि ब्रह्मचर्य्यमधारयत् । १५२५
एकः सुभद्रामारोप्य द्वैरथे कृष्णमाह्वयत् । एकः किरातरूपेण स्थितं रुद्रमयोधयत् ।
अस्मिन्नेव वने पार्थो हृतां कृष्णामवाजयत् । एकश्च पञ्चवर्षाणि शक्रादस्त्राण्यशिक्षत ।
एकः सोऽयमरिं जित्वा कुरूणामकरोद्यशः । एको गन्धर्व्वराजानं चित्रसेनमरिन्दमं ।
विजिग्ये तरसा सङ्ख्ये सेनां प्राप्य सुदुर्ज्जयां । तथा निवातकवचाः कालकञ्जाश्च दानवाः ।
दैवतैरप्यवध्यास्ते एकेन युधि पातिताः । एकेन हि त्वया कर्ण किं नामेह कृतं पुरा । १५४०
एकैकेन यथा तेषां भूमिपाला वशे कृताः । इन्द्रोऽपि नहि पार्थेन संयुगे योद्धुमर्हति ।
यस्तेनाशंसते योद्धुं कर्त्तव्यं तस्य भेषजं । आशीविषस्य क्रुद्धस्य पाणिमुद्यम्य दक्षिणं ।
अविमुच्य प्रदेशिन्या दंष्ट्रामादातुमिच्छसि । अथवा कुञ्जरं मत्तमेक एव चरन्वने ।
अनङ्कुशः समारुह्य नगरं गन्तुमिच्छसि । समिद्धं पावकं वाऽपि घृतमेदोवसाहुतं ।
घृताक्तचीरवासास्त्वं मध्येनोत्सर्त्तुमिच्छति । आत्मानं कः समुद्बध्य कण्ठे बध्वा महाशिलां । १५४४
समुद्रं प्रतरेद्दोर्भ्यां तत्र किं नाम पौरुषं । अकृतास्त्रः कृतास्त्रं वै बलवन्तं सुदुर्ब्बलः ।
तादृशं कर्ण यः पार्थं योद्धुमिच्छेत्स दुर्मतिः । अस्माभिर्ह्येष निकृतो वर्षाणीह त्रयोदश ।
सिंहः पाशविनिर्मुक्तो न नः शेषं करिष्यति । एकान्ते पार्थमासीनं कूपेऽग्निमिव संवृतं ।
अज्ञानादभ्यवस्कन्द्य प्राप्ताः स्मो भयमुत्तमं । सह युध्यामहे पार्थमागतं युद्धदुर्मदं ।
सैन्यास्तिष्ठन्तु सन्नद्धा व्यूढानीकाः प्रहारिणः । द्रोणो दुर्य्योधनो भीष्मो भवान् द्रौणिस्तथा वयं । १५५०
सर्व्वे युध्यामहे पार्थं कर्ण मा साहसं कृथाः । वयं व्यवसिताः पार्थं वज्रपाणिमिवोद्धतं ।
षड्रथाः प्रतियुध्येम तिष्ठेम संहता यदि । व्यूढानीकानि सैन्यानि यत्ताः परमधन्विनः ।
युध्यामहेऽर्ज्जुनं सङ्ख्ये दानवा इव वासवं ।
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि कृपवाक्ये एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

॥ अश्वत्थामोवाच ॥ न च तावज्जिता गावो न च सीमान्तरङ्गताः । न हास्तिनपुरं प्राप्तास्त्वन्तु कर्ण विकत्थसे ।
सङ्ग्रामान् सुबहून् जित्वा लब्ध्वा च विपुलं धनं । विजित्य च परां सेनां नाहुः किञ्चन पौरुषं । २५५५
दहत्यग्निरवाक्यस्तु तूष्णीं भाति दिवाकरः । तूष्णीं धारयते लोकान् वसुधा सचराचरान् ।
चातुर्व्वर्ण्यस्य कर्म्माणि विहितानि स्वयम्भुवा । धनं यैरधिगन्तव्यं यच्च कुर्व्वन्न दुष्यति ।
अधीत्य ब्राह्मणो वेदान् याजयेत यजेत च । क्षत्त्रियो धनुराश्रित्य यजेच्चैव न याजयेत् ।
वैश्योऽधिगम्य वित्तानि ब्रह्मकर्म्माणि कारयेत् । शूद्रः शुश्रूषणं कुर्य्यात्त्रिषु वर्णेषु नित्यशः ।
वञ्चनायोगविधिभिर्व्वैतसीं वृत्तिमास्थितः । २५६०
वर्त्तमाना यथाशास्त्रं प्राप्य चापि महीमिमां । सत्कुर्व्वन्ति महाभागा गुरून् सुविगुणानपि ।
प्राप्य द्यूतेन को राज्यं क्षत्त्रियस्तोष्टुमर्हति । तथा नृशंसरूपोऽयं धार्त्तराष्ट्रस्य निर्घृणः ।
तथाऽभिगम्य वित्तानि को विकत्थेद्विचक्षणः । निकृत्या वञ्चनायोगैश्चरन्वैतंसिको यथा ।
कतमद्वैरथं युद्धं यत्राजैषीर्द्धनञ्जयं । नकुलं सहदेवं वा धनं येषां त्वया हृतं ।
युधिष्ठिरो जितः कस्मिन् भीमो वा बलिनां वरः । इन्द्रप्रस्थं त्वया कस्मिन् सङ्ग्रामे विजितं पुरा । २५६५
तथैव कतमद्युद्धं यस्मिन् कृष्णा जिता पुरा । एकवस्त्रा सभां नीता दुष्टकर्म्मन् रजस्वला ।
मूलमेषां महत्कृत्तं सारार्थी चन्दनं यथा । कर्म्म कारयिथाः सूत तत्र किं विदुरोऽब्रवीत् ।
यथाशक्ति मनुष्याणां शममालक्षयामहे । अन्येषां चैव सत्त्वानामपि कीटपिपीलिकैः ।
द्रौपद्यास्तं परिक्लेशं न क्षन्तुं पाण्डवोऽर्हति । क्षयाय धार्त्तराष्ट्राणां प्रादुर्भूतो धनञ्जयः ।
त्वं पुनः पण्डितो भूत्वा वाचं वक्तुमिहेच्छसि । वैरान्तकरणो जिष्णुर्न नः शेषं करिष्यति । २५७०
नैष देवान्न गन्धर्व्वान्नासुरान्न च राक्षसान् । भयादिह न युध्येत कुन्तीपुत्त्रो धनञ्जयः ।
यं यमेषोऽभिसंक्रुद्धः सङ्ग्रामे निपतिष्यति । वृक्षं गरुत्मान्वेगेन विनिहत्य तमेष्यति ।
त्वत्तो विशिष्टं वीर्य्येण धनुष्यमरराट्समं । वासुदेवसमं युद्धे पार्थं को वा न पूजयेत् ।
दैवेन दैवं युध्येत मानुषेण च मानुषं । अस्त्रं ह्यस्त्रेण यो हन्यात्कोऽर्जुनेन समः पुमान् ।
पुत्त्रादनन्तरः शिष्य इति धर्म्मविदो विदुः । एतेनापि निमित्तेन प्रियो द्रोणस्य पाण्डवः । २५७५
यथा त्वमकरोर्द्यूतमिन्द्रप्रस्थं यथाऽहरः । यथाऽनैषीः सभां कृष्णां तथा युध्यस्व पाण्डवं ।
अयं ते मातुलः प्राज्ञः क्षात्त्रधर्म्मस्य कोविदः । दुर्द्यूतदेवी गान्धारः शकुनिर्युध्यतामिह ।
नाक्षान् क्षिपति गाण्डीवं न कृतं द्वापरं न च । ज्वलतो निशितान् वाणांस्तीक्ष्णान् क्षिपति गाण्डिवं ।
न हि गाण्डीवनिर्मुक्ता गार्द्धपत्राः सुतेजनाः । नान्तरेष्ववतिष्ठन्ते गिरीणामपि दारुणाः ।
अन्तकः पवनो मृत्युस्तथाऽग्निर्व्वडवामुखः । कुर्य्युरेते क्वचिच्छेषं न तु क्रुद्धो धनञ्जयः । २५८०
यथा सभायां द्यूतं त्वं मातुलेन सहाकरोः । तथा युध्यस्व सङ्ग्रामे सौवलेन सुरक्षितः ।
युध्यन्तां कामतो योधा नाहं योत्स्ये धनञ्जयं । मत्स्यो ह्यस्माभिरायोध्यो यद्यागच्छेद्गवां पदं ।
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि अश्वत्थामभर्त्सनवाक्ये पञ्चाशोऽध्यायः ॥ ५० ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ भीष्म उवाच ॥ साधु पश्यति वै द्रौणिः कृपस्य साधु पश्यति । कर्णस्तु चात्त्रधर्म्मेण केवलं योद्धुमिच्छति ।
आचार्य्यो नाभिवक्तव्यः पुरुषेण विजानता । देशकालौ तु सम्प्रेक्ष्य योद्धव्यमिति मे मतिः ।
यस्य सूर्य्यसमाः पञ्च सपत्नाः सुप्रहारिणः । कथमभ्युदये तेषां न प्रमुह्येत पण्डितः ।
स्वार्थे सर्व्वे विमुह्यन्ति येऽपि धर्म्मविदो जनाः । तस्माद्राजन् ब्रवीम्येतद्वाक्यं ते यदि रोचते ।
कर्णो हि यदवोचत्त्वां तेजःसञ्जननाय तत् । आचार्य्यपुत्त्रः क्षमतां महत् कार्य्यमुपस्थितं ।
नायं कालो विरोधस्य कौन्तेये समुपस्थिते । क्षन्तव्यं भवता सर्व्वमाचार्य्येण कृपेण च ।
भवतां हि कृतास्त्रत्वं यथादित्ये प्रभा तथा । यथा चन्द्रमसो लक्ष्मीः सर्व्वथा नापकृष्यते ।
एवं भवत्सु ब्राह्मण्यं ब्रह्मास्त्रञ्च प्रतिष्ठितं । चत्वार एकतो वेदाः चात्त्रमेकत्र दृश्यते ।
नैतत्समस्तमुभयं कस्मिंश्चिदनुशुश्रुमः । अन्यत्र भारताचार्य्यात् सपुत्त्रादिति मे मतिः ।
ब्रह्मास्त्रं ब्रह्म वेदाश्च नैतदन्यत्र दृश्यते । अन्यत्र भारताचार्य्यात् द्रोणात् पुरुषसत्तमात् ।
वेदान्ताश्च पुराणानि इतिहासं पुरातनं । जामदग्न्यमृते राजन् को द्रोणादधिको भवेत् ।
आचार्य्यपुत्त्रः क्षमतां नायं कालस्य भेदने । सर्व्वे संहत्य युध्यामः पाकशासनिमागतं ।
बलस्य व्यसनानीह यान्युक्तानि मनीषिभिः । मुख्यो भेदो हि तेषान्तु पापिष्ठो विदुषां मतः ।
॥ द्रौणिरुवाच ॥ नैवं न्याय्यमिदं वाक्यमस्माकं पुरुषर्षभ । किन्तु रोषपरीतेन गुरुणा भाषिता गुणाः ।
शत्रोरपि गुणा वाच्या दोषा वाच्या गुरोरपि । सर्व्वथा सर्व्वयत्नेन पुत्त्रे शिष्ये हितं वदेत् ।
॥ दुर्य्योधन उवाच ॥ आचार्य्य एष क्षमतां शान्तिरस्मिन्विधीयतां । अभिद्यमाने तु गुरौ तद्वृत्तं रोषकारितं ।
॥ वैशम्पायन उवाच ॥ ततो दुर्य्योधनो द्रोणं क्षमयामास भारत । सह कर्णेन भीष्मेण कृपेण च महात्मना ।
॥ द्रोण उवाच ॥ यदेतत्प्रथमं वाक्यं भीष्मः शान्तनवोऽब्रवीत् । तेनैवाहं प्रसन्नो वै नीतिरत्र विधीयतां ।
यथा दुर्य्योधनं पार्थो नोपसर्पति सङ्गरे । यथा दुर्य्योधनो राजा न गच्छेद्द्विषतां वशं ।
साहसाद्यदि वा मोहात्तथा नीतिर्विधीयतां । वनवासे ह्यनिर्वृत्ते दर्शयेन्न स्वमर्ज्जुनः ।
धनञ्जयलभमानोऽत्र नाद्य तत् क्षन्तुमर्हति । यथा नायं समायुञ्ज्याद्धार्त्तराष्ट्रं कथञ्चन ।
न च सेना पराजय्यात्तथा नीतिर्व्विधीयतां । उक्तं दुर्य्योधनेनापि पुरस्ताद्वाक्यमीदृशं ।
तदनुस्मृत्य गाङ्गेयो यथावद्वक्तुमर्हति ।
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि द्रोणवाक्ये एकपञ्चाशोऽध्यायः ॥ ५१ ॥
॥ भीष्म उवाच ॥ कलाकाष्ठाश्च युज्यन्ते मूहूर्त्ताश्च दिनानि च । अर्द्धमासाश्च मासाश्च नक्षत्राणि ग्रहास्तथा ।
ऋतवश्चापि युज्यन्ते तथा सम्वत्सरा अपि । एवं कालविभागेन कालचक्रं प्रवर्त्तते ।
तेषां कालातिरेकेण ज्योतिषाञ्च व्यतिक्रमात् । पञ्चमे पञ्चमे वर्षे द्वौ मासावुपजायतः ।
एषामप्यधिका मासाः पञ्च च द्वादश क्षपाः । त्रयोदशानां वर्षाणामिति मे वर्त्तते मतिः ।
सर्व्वं यथावच्चरितं यद्यदेभिः परिश्रुतं । एवमेतद्ध्रुवं ज्ञात्वा ततो बीभत्सुरागतः ।
सर्व्वे चैव महात्मानः सर्व्वे धर्म्मार्थकोविदाः । येषां युधिष्ठिरो राजा कस्माद्धर्म्मेऽपराङ्मुखः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अलुब्धाश्चैव कौन्तेयाः कृतवन्तश्च दुष्करं । न चापि केवलं राज्यमिच्छेयुस्तेऽनुपायतः ।
तदैव ते हि विक्रान्तुमीषुः कौरवनन्दनाः । धर्म्मपाशनिबद्धास्ते न चेलुः क्षत्त्रियव्रतात् ।
यश्चानृतइति ख्यायाद्यः स गच्छेत्पराभवं । वृणुयुर्मरणं पार्था नानृतत्वं कथञ्चन ।
प्राप्ते काले तु प्राप्तव्यं नोत्सृजेयुर्नरर्षभाः । अपि वज्रभृता गुप्तं तथावीर्य्या हि पाण्डवाः । १९१५
प्रतियुध्येम समरे सर्व्वशस्त्रभृतां वरं । तस्माद्यदत्र कल्याणं लोके सद्भिरनुष्ठितं ।
तत्संविधीयतां शीघ्रं मा नो ह्यर्थोऽभ्यगात्परं । न हि पश्यामि सङ्ग्रामे कदाचिदपि कौरव ।
एकान्तसिद्धिं राजेन्द्र सम्प्राप्तश्च धनञ्जयः । सम्प्रवृत्ते तु सङ्ग्रामे भावाभावौ जयाजयौ ।
अवश्यमेकं स्पृशतो दृष्टमेतदसंशयं ।
तस्माद्युद्धोचितं कर्म्म कर्म्म वा धर्म्मसंहितं । क्रियतामाशु राजेन्द्र सम्प्राप्तो हि धनञ्जयः । १९२०
॥ दुर्य्योधन उवाच ॥ नाहं राज्यं प्रदास्यामि पाण्डवानां पितामह । युद्धोपचारिकं यत्तु तच्छीघ्रं संविधीयतां ।
॥ भीष्म उवाच ॥ अत्र या मामिका बुद्धिः श्रूयतां यदि रोचते । सर्व्वथा हि मया श्रेयो वक्तव्यं कुरुनन्दन ।
क्षिप्रं बलं चतुर्भागं गृह्य गच्छ पुरं प्रति । ततोऽपरश्चतुर्भागो गाः समादाय गच्छतु ।
वयं त्वर्द्धेन सैन्येन प्रतियोत्स्याम पाण्डवं । अहं द्रोणश्च कर्णश्च द्रौणिः शारद्वतस्तथा ।
प्रतियोत्स्याम बीभत्सुमागतं कृतनिश्चयं । मत्स्यं वा पुनरायातमागतं वा शतक्रतुं । अहमावारयिष्यामि वेलेव मकरालयं । १९२५
॥ वैशम्पायन उवाच ॥ तद्वाक्यं रुरुचे तेषां भीष्मेणोक्तं महात्मना । तथैव कृतवान् राजा कौरवाणामनन्तरं ।
भीष्मः प्रस्थाप्य राजानं गोधनं तदनन्तरं । सेनामुख्यान् व्यवस्थाप्य व्यूहितुं सम्प्रचक्रमे ।
॥ भीष्म उवाच ॥ आचार्य्य मध्ये तिष्ठ त्वमश्वत्थामा तु सव्यतः । कृपः शारद्वतो धीमान् पार्श्वं रक्षतु दक्षिणं ।
अग्रतः सूतपुत्त्रस्तु कर्णस्तिष्ठतु दंशितः । अहं सर्व्वस्य सैन्यस्य पश्चात्स्थास्यामि पालयन् ।
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि भीष्मसैन्यव्यूहे द्विपञ्चाशोऽध्यायः ॥ ५२ ॥
॥ वैशम्पायन उवाच ॥ तथा व्यूढेष्वनीकेषु कौरवाणां महारथैः । उपायादर्ज्जुनस्तूर्णं रथघोषेण नादयन् । १९३०
ददृशुस्ते ध्वजाग्रं वै शुश्रुवुश्च रथस्वनं । दोधूयमानस्य भृशं गाण्डीवस्य च निःस्वनं ।
ततः सर्व्वं समालोक्य द्रोणो वचनमब्रवीत् । महारथमनुप्राप्तं दृष्ट्वा गाण्डीवधन्विनं ।
॥ द्रोण उवाच ॥ एतद्ध्वजाग्रं पार्थस्य दूरतः संप्रकाशते । एष घोषः सरथजो रोरवीति च वानरः ।
वानरः सर्व्वसेनायां करोति भयमुत्तमं । एष तिष्ठन्रथश्रेष्ठे रथे च रथिनाम्वरः ।
उत्कर्षति धनुःश्रेष्ठं गाण्डीवमशनिस्वनं । इमौ हि बाणौ सहितौ पादयोर्म्मे व्यवस्थितौ । १९३५
अपरौ चाप्यतिक्रान्तौ कर्णौ संस्पृश्य मे शरौ । निरुष्य हि वने वासं कृत्वा कर्म्मातिमानुषं ।
अभिवादयते पार्थः श्रोत्रे च परिपृच्छति । चिरदृष्टोऽयमस्माभिः प्रज्ञावान् बान्धवप्रियः ।
अतीव ज्वलितो लक्ष्म्या पाण्डुपुत्त्रो धनञ्जयः ।
रथी शरी चारुतली निषङ्गी शङ्खी पताकी कवची किरीटी । खड्गी च धन्वी विरराज पार्थः शिखी घृतस्रुग्भिरिवावसिक्तः ।
॥ वैशम्पायन उवाच ॥ ततोऽर्ज्जुनः कुरून् दृष्ट्वा सङ्ग्रामे समवस्थितान् । तत्कालसदृशं वाक्यं मत्स्यपुत्त्रमभाषत । १९४०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ अर्ज्जुन उवाच ॥ इषुपाते च सेनायां हयान्संयच्छ सारथे। यावत्समीक्षे सैन्येऽस्मिन् क्वासौ कुरुकुलाधमः ।
सर्व्वानेताननादृत्य दृष्ट्वा तमतिमानिनं । तस्य मूर्द्ध्नि पतिष्यामि तत एते पराजिताः ।
एष व्यवस्थितो द्रोणो द्रौणिश्च तदनन्तरः । भीष्मः कृपश्च कर्णश्च महेष्वासा व्यवस्थिताः ।
राजानं नात्र पश्यामि गाः समादाय गच्छति । दक्षिणं मार्गमास्थाय शङ्के जीवपरायणः ।
उत्सृज्यैतद्रथानीकं गच्छ यत्र सुयोधनः । तत्रैव योत्स्ये वैराटे नास्ति युद्धं निरामिषं । १६४५
तं जित्वा विनिवर्त्तिष्ये गाः समादाय सर्व्वशः ।
॥ वैशम्पायन उवाच ॥ एवमुक्तः स वैराटिर्हयान्संयम्य यत्नतः । नियम्य च ततो रश्मीन् यत्र ते कुरुपुङ्गवाः ।
अचोदयत्ततो वाहान् यतो राजा सुयोधनः । उत्सृज्य रथवंशन्तु प्रयाते श्वेतवाहने ।
अभिप्रायं विदित्वा तं कृपो वचनमब्रवीत् । नैषोऽन्तरेण राजानं बीभत्सुः स्थातुमिच्छति ।
तस्य पार्ष्णिं ग्रहीष्यामो जवेनाभिप्रयास्यतः । नह्येनमतिसंक्रुद्धमेको युध्येत संयुगे । १६५०
अन्यो देवात्सहस्राक्षात् कृष्णाद्वा देवकीसुतात् । आचार्य्याच्च सपुत्त्राद्वा भारद्वाजान्महारथात् ।
किं नो गावः करिष्यन्ति धनं वा विपुलं तथा । दुर्य्योधनः पार्थजले पुरा नौरिव मज्जति ।
तथैव गत्वा बीभत्सुर्नाम विश्राव्य चात्मनः । शलभैरिव तां सेनां शरैः शीघ्रमवाकिरत् ।
कीर्य्यमाणाः शरौघैस्तु योधास्ते पार्थचोदितैः । नापश्यन्नावृतां भूमिमन्तरीक्षञ्च पत्त्रिभिः ।
तेषामापततां युद्धे नापयाने ऽभवन्मतिः । शीघ्रत्वमेव पार्थस्य पूजयन्ति स्म चेतसा । १६५५
ततः शङ्खं प्रदध्मौ स द्विषतां लोमहर्षणं । विस्फार्य्य च धनुःश्रेष्ठं ध्वजे भूतान्यचोदयत् ।
तस्य शङ्खस्य शब्देन रथनेमिस्वनेन च । गाण्डीवस्य च घोषेण पृथिवी समकम्पत ।
अमानुषाणां सर्व्वेषां भूतानां ध्वजवासिनां । ऊर्द्ध्वं पुच्छान्विधुन्वाना धावमानाः समन्ततः ।
गावः प्रतिन्यवर्त्तन्त दिशमास्थाय दक्षिणां ।
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि गोनिवर्त्तने त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥
॥ वैशम्पायन उवाच ॥ स शत्रुसेनां तरसा प्रणुद्य गास्ता विजित्याऽथ धनुर्द्धराग्र्यः । दुर्य्योधनायाभिमुखः प्रयातो भूयो रणं सोऽभिचिकीर्षमाणः ।
१६६०
गोषु प्रयातासु जवेन मत्स्यान् किरीटिनं कृतकार्य्यञ्च मत्वा । दुर्य्योधनायाऽभिमुखं प्रयातं कुरुप्रवीराः सहसाऽभिपेतुः ।
तेषामनीकानि बहूनि गाढं व्यूढानि दृष्ट्वा बहुलध्वजानि । मत्स्यस्य पुत्त्रं द्विषतां निहन्ता वैराटिमामन्त्र्य ततोऽभ्युवाच ।
एतेन तूर्णं प्रतिपादयेमान् श्वेतान् हयान् काञ्चनरश्मियोक्त्रान् । जवेन सर्व्वेण कुरु प्रयत्नमासादयेयं कुरुसिंहवृन्दं ।
गजो गजेनेव मया दुरात्मा योद्धुं समाकाङ्क्षति सूतपुत्त्रः । तमेव मां प्रापय राजपुत्त्र दुर्य्योधनापाश्रयजातदर्प्पं ।
स तैर्हयैर्वातजवैर्बृहद्भिः पुत्त्रो विराटस्य सुवर्णकक्षैः । व्यध्वंसयत्तद्रथिनामनीकं ततोऽवहत्पाण्डवमाजिमध्ये ।
तं चित्रसेनो विशिखैर्व्विपाठैः संग्रामजिच्छत्रुसहो जयश्च । प्रत्युद्ययुर्भारतमापतन्तं महारथाः कर्णमभीप्समानाः । १६६५
ततः स तेषां पुरुषप्रवीरः शरासनार्च्चिःशरवेगतापः । व्रातं रथानामदहत्समन्युर्व्वनं यथाऽग्निः कुरुपुङ्गवानां ।
तस्मिंस्तु युद्धे तुमुले प्रवृत्ते पार्थं विकर्णोऽतिरथं रथेन । विपाटवर्षेण कुरुप्रवीरो भीमेन भीमानुजमाससाद ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding: KS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ततो विकर्णस्य धनुर्विकृष्य जाम्बूनदाग्र्योपचितं दृढज्यं। अपातयत्तं ध्वजमस्य मथ्य च्छिन्नध्वजः सोऽप्यपयाज्जवेन।
तं शात्रवाणां गणबाधितारं कर्म्माणि कुर्व्वन्तममानुषाणि। शत्रुन्तपः पार्थममृष्यमाणः समार्द्दयच्छरवर्षेण पार्थं। १६७०
स तेन राज्ञाऽतिरथेन विद्धो विगाहमानो ध्वजिनीं कुरूणां। शत्रुन्तपं पञ्चभिराशु विद्धा ततोऽस्य सूतं दशभिर्जघान।
ततः स विद्धो भरतर्षभेण वाणेन गात्रावरणातिगेन। गतासुराजौ निपपात भूमौ नगो नगाग्रादिव वातरुग्नः।
नरर्षभास्तेन नरर्षभेण वीरा रणे वीरतरेण भग्नाः। चकम्पिरे वातवशेन काले प्रकम्पितानीव महावनानि।
हतास्तु पार्थेन नरप्रवीराः गतासवोर्व्व्यां सुषुपुः सुवेशाः। वसुप्रदा वासवतुल्यवीर्य्याः पराजिता वासवजेन संख्ये।
सुवर्णकार्ष्णायसवर्म्मनद्धा नागा यथा हैमवताः प्रवृद्धाः। तथा स शत्रून्समरे विनिघ्नन् गाण्डीवधन्वा पुरुषप्रवीरः। १६७५
चचार संख्ये विदिशो दिशश्च दहन्निवाग्निर्व्वनमातपान्ते। प्रकीर्णपर्णानि यथा वसन्ते विशातयित्वा पवनोऽम्बुदांश्च।
तथा सपत्नान्विकिरन् किरीटी चचार संख्येऽतिरथो रथेन। शोणाश्ववाहस्य हयान्निहत्य वैकर्त्तनभ्रातुरदीनसत्त्वः।
एकेन सङ्ग्रामजितः शरेण शिरो जहाराशु किरीटमाली। तस्मिन् हते भ्रातरि सूतपुत्त्रो वैकर्त्तनो वीर्य्यमथाददानः।
प्रगृह्य दन्ताविव नागराजो महर्षभं व्याघ्र इवाभ्यधावत्। स पाण्डवं द्वादशभिः पृषत्कैर्व्वैकर्त्तनः शीघ्रमथो जघान।
विव्याध गात्रेषु हयांश्च सर्व्वान्विराटपुत्त्रञ्च करे निजघ्ने। तमापतन्तं सहसा किरीटी वैकर्त्तनं वै तरसाऽभिपत्य। १६८०
प्रगृह्य वेगं न्यपतज्जवेन नागं गरुत्मानिव चित्रपक्षः। तावुत्तमौ सर्व्वधनुर्द्धराणां महाबलौ सर्व्वसपत्नसाहौ।
कर्णस्य पार्थस्य निशम्य युद्धं दिदृक्षमाणाः कुरवोऽवतस्थुः। स पाण्डवस्तूर्णमुदीर्णकोपः कृतागसं कर्णमुदीक्ष्य हर्षात्।
क्षणेन साश्वं सरथं ससूतमन्तर्द्दधे घोरशरौघवृष्ट्या। ततः सुविद्धाः सरथाः सनागा योधा विनेदुर्भरतर्षभाणां।
अन्तर्हिता भीष्ममुखाः सहाश्वाः किरीटिना कीर्णरथाः पृषत्कैः। स चापि तानर्ज्जुनबाहुमुक्तान् शरान्शरौघैः प्रतिहत्य वीरः।
तस्थौ महात्मा सधनुः सवाणः सविस्फुलिङ्गाग्निरिवाशु कर्णः। ततस्त्वभूद्वै तलतालशब्दः सशङ्खभेरीपणवप्रणादः। १७८५
प्रक्ष्वेडितज्यातलनिस्वनन्तं वैकर्त्तनं पूजयतां कुरूणां। उद्धूतलाङ्गूलमहापताकध्वजोत्तमांसाकुलभीषणान्तं।
गाण्डीवनिर्घोषकृतप्रणादं किरीटिनं प्रेक्ष्य ननाद कर्णः। स चापि वैकर्त्तनमर्द्दयित्वा साश्वं ससूतं सरथं पृषत्कैः।
तमाववर्ष प्रसभं किरीटी पितामहं द्रोणकृपौ च दृष्ट्वा। स चापि पार्थं बहुभिः पृषत्कैर्व्वैकर्त्तनो मेघ इवाभ्यवर्षत्।
तथैव कर्णञ्च किरीटमाली संछादयामास शितैः पृषत्कैः। तयोः सुतीक्ष्णान्सृजतोः शरौघान् महाशरौघास्त्रविवर्द्धने रणे।
रथे विलग्नाविव चन्द्रसूर्य्यौ घनान्तरेणानुददर्श लोकः। अथाशुकारी चतुरो हयांश्च पार्थस्य विव्याध शरैस्तु कर्णः। १६९०
त्रिभिस्तु यन्तारममृष्यमाणो विव्याध तूर्णं त्रिभिरेव केतुं। ततोऽभिविद्धः समरावमर्द्दी प्रबोधितः सिंह इव प्रसुप्तः।
गाण्डीवधन्वा प्रवरः कुरूणामजिह्मगैः कर्णमियाय जिष्णुः। शरास्त्रवृष्ट्या निहतो महात्मा प्रादुश्चकारातिमनुष्यकर्म्म।
प्राच्छादयत्कर्णरथं पृषत्कैर्लोकानिमान् सूर्य्य इवांशुजालैः। स हस्तिनेवाभिहतो गजेन्द्रः प्रगृह्य भल्लान्निशितान्निषङ्गात्।
आकर्णपूर्णञ्च धनुर्विकृष्य विव्याध गात्रेष्वथ सूतपुत्त्रं। अथास्य बाहूरुशिरोललाटं ग्रीवावराङ्गानि परावमर्द्दी।
शितैश्च वाणैर्युधि निर्ब्बिभेद गाण्डीवमुक्तैरशनिप्रकाशैः। स पार्थमुक्तैर्व्विशिखैः प्रणुन्नो गजो गजेनेव जितस्तरस्वी। विहाय
सङ्ग्रामशिरः प्रयातो वैकर्त्तनः पाण्डववाणतप्तः। १६९५

इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि कर्णापयाने चतुःपञ्चाशोऽध्यायः॥ ५४॥

॥ वैशम्पायन उवाच॥ अपयाते तु राधेये दुर्य्योधनपुरोगमाः। अनीकेन यथास्वेन शनैरार्च्छन्त पाण्डवं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

बहुधा तस्य सैन्यस्य व्यूढस्यापततः शरैः । अधारयत वेगं स वेलेव तु महोदधेः ।
ततः प्रहस्य बीभत्सुः कौन्तेयः श्वेतवाहनः । दिव्यमस्त्रं प्रकुर्व्वाणः प्रत्यायाद्रथसत्तमः ।
यथा रश्मिभिरादित्यः प्राच्छादयत मेदिनीं । तथा गाण्डीवनिर्मुक्तैः शरैः पार्थो दिशो दश ।
न रथानां न चाश्वानां न गजानां न वर्म्मणां । अनिविद्धं शितैर्ब्बाणैरासीद्द्व्यङ्गुलमन्तरं । १७००
दिव्ययोगाच्च पार्थस्य हयानामुत्तरस्य च । शिक्षाशिल्पोपपन्नत्वादस्त्राणाञ्च परिक्रमात् ।
वीर्य्यवत्त्वं द्रुतं चाग्र्यं दृष्ट्वा जिष्णोरपूजयन् । कालाग्निमिव बीभत्सुं निर्द्दहन्तमिव प्रजाः ।
नारयः प्रेक्षितुं शेकुर्ज्ज्वलन्तमिव पावकं । तानि शस्तान्यनीकानि रेजुरर्जुनमार्गणैः ।
शैलं प्रति बलाभ्राणि व्याप्तानीवार्करश्मिभिः । अशोकानां वनानीव फुल्लानि कुसुमैः शुभैः ।
रेजुः पार्थशरैस्तद्वत्तदा सैन्यानि भारत । सजोऽर्जुनशरैः शीर्णं शुष्यत्पुष्पं हिरण्मयं । १७०५
छत्राणि च पताकाश्च खे दधार सदागतिः । स्वबलत्रासनात्त्रस्ताः परिपेतुर्दिशो दश ।
रथाङ्गदेशानादाय पार्थच्छिन्नयुगा हयाः । कर्णकक्षविषाणेषु अन्तरोष्ठेषु चैव ह ।
मर्म्मस्वङ्गेषु चाहत्यापातयत्समरे गजान् । कौरवाग्रगजानान्तु शरीरैर्गतचेतसां ।
क्षणेन संवृता भूमिर्म्मेघैरिव नभस्तलं । युगान्तसमये सर्व्वं यथा स्थावरजङ्गमं ।
कालक्षयमशेषेण दहत्यग्रशिखः शिखी । तद्वत्पार्थो महाराज ददाह समरे रिपून् । १७१०
ततः सर्व्वास्त्रतेजोभिर्धनुषो निःस्वनेन च । शब्देनामानुषाणाञ्च भूतानां ध्वजवासिनां ।
भैरवं शब्दमत्यर्थं वानरस्य च कुर्व्वतः । दैवारिपाञ्च बीभत्सुस्तस्मिन्दौर्य्योधने बले ।
भयमुत्पादयामास बलवानरिमर्द्दनः । रथशक्तिममित्राणां प्रागेव निपतद्भुवि ।
सोऽप्ययात्सहसा पश्चात्साहसाच्चाभ्युपेयिवान् । शरव्रातैः सुतीक्ष्णाग्रैः समादिष्टैः खगैरिव ।
अर्जुनस्तु खमावव्रे लोहितप्राशनैः खगैः । अन्तमध्ये यथाऽर्कस्य रश्मयस्तिग्मतेजसः । १७१५
दिशासु च तथा राजन्नसंख्याताः शरास्तदा । सकृदेवानतं शेकू रथमभ्यसितुं परे ।
अलब्धः पुनरश्वैस्तु रथात्सोऽतिप्रयादयेत् । ते शरा द्विट्शरीरेषु यथैव न ससञ्जिरे ।
द्विडनीकेषु बीभत्सोर्न्न ससञ्जे रथस्तदा । स तद्विक्षोभयामास त्वरातिबलमञ्जसा ।
अनन्तभोगो भुजगः क्रीडन्निव महार्णवे । अस्यतो नित्यमत्यर्थं सर्व्वमेवातिगस्तथा ।
अश्रुतः श्रूयते भूतैर्धनुर्घोषः किरीटिनः । सन्ततास्तत्र मातङ्गा वाणैरल्पान्तरान्तरे । १७२०
संवृतास्तेन दृश्यन्ते मेघा इव गभस्तिभिः । दिशोऽनुभ्रमतः सर्व्वाः सव्यदक्षिणमस्यतः ।
सततं दृश्यते युद्धे सायकासनमण्डलं । पतन्त्यरूपेषु यथा चक्षूंषि न कदाचन ।
नालक्ष्येषु शराः पेतुस्तथा गाण्डीवधन्वनः । मार्गो गजसहस्रस्य युगपद्गच्छतो वने ।
यथा भवेत्तथा जज्ञे रथमार्गः किरीटिनः । नूनं पार्थजयैषिलाच्छक्रः सर्व्वामरैः सह ।
हन्त्यस्मानित्यमन्यन्त पार्थेन निहताः परे । घ्नन्तमत्यर्थमहितान्विजयन्तत्र मेनिरे । १७२५
कालमर्ज्जुनरूपेण संहरन्तमिव प्रजाः । कुरुसेनाशरीराणि पार्थेनैवाहतान्यपि ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding: KS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सेदुः पार्थहतानीव पार्थकर्म्मानुशासनात्। ओषधीनां शिरांसीव द्विषच्छीर्षाणि सोऽन्वयात्।
अवनेशुः कुरूणां हि वीर्य्याण्यर्ज्जुनजाद्भयात्। अर्जुनानिलभिन्नानि वनान्यर्ज्जुनविद्विषां।
चक्रुर्लोहितधाराभिर्धरणीं लोहितान्तरां। लोहितेन समायुक्तैः पांशुभिः पवनोद्धुतैः।
बभूवुर्लोहितास्तत्र भृशमादित्यरश्मयः। सार्कं खन्तत् क्षणेनासीत्सन्ध्यायामिव लोहितं। १०३०
अप्यस्तं प्राप्य सूर्य्योऽपि निवर्त्तेत न पाण्डवः। तान्सर्व्वान्समरे शूरः पौरुषे समवस्थितान्।
दिव्यैरस्त्रैरचिन्त्यात्मा सर्व्वानार्च्छद्धनुर्द्धरान्। स तु द्रोणं त्रिसप्तत्या क्षुरप्राणां समार्पयत्।
दुःसहं दशभिर्व्बाणैर्द्रौणिमष्टाभिरेव च। दुःशासनं द्वादशभिः कृपं शारद्वतं त्रिभिः।
भीष्मं शान्तनवं षष्ट्या राजानं च शतेन ह। कर्णञ्च कर्णिना कर्णे विव्याध परवीरहा।
तस्मिन्विद्धे महेष्वासे कर्णे सर्व्वास्त्रकोविदे। हताश्वसूते विरथे ततोऽनीकमभज्यत। १०३५
तत्प्रभग्नं बलं दृष्ट्वा पार्थमाजिस्थितं पुरः। अभिप्रायं समाज्ञाय वैराटिः पार्थमब्रवीत्।
॥ उत्तर उवाच ॥ आस्थाय रुचिरं पार्थ रथं सारथिना मया। कतमद्यास्यसेऽनीकमुक्तो यास्याम्यहं त्वया।
॥ अर्ज्जुन उवाच ॥ लोहिताश्वमरिष्टं यं वैयाघ्रमनुपश्यसि। नीलां पताकामाश्रित्य रथे तिष्ठन्तमुत्तर।
कृपस्यैतदनीकाग्रं प्रापयस्वैतदेव मां। एतस्य दर्शयिष्यामि शीघ्रास्त्रं दृढधन्विनः।
कमण्डलुर्ध्वजे यस्य शातकुम्भमयः शुभः। आचार्य्य एष हि द्रोणः सर्व्वशस्त्रभृतां वरः। १०४०
सदा ममैष मान्यस्तु सर्व्वशस्त्रभृतामपि। सुप्रसन्नं महावीरं कुरुष्वैनं प्रदक्षिणं।
अत्रैव चावरोहैनमेष धर्म्मः सनातनः। यदि मे प्रथमं द्रोणः शरीरे प्रहरिष्यति।
ततोऽस्य प्रहरिष्यामि नास्य कोपो भवेदिति। अस्याविदूरे च धनुर्ध्वजाग्रे यस्य दृश्यते।
आचार्य्यस्यैष पुत्रो वै अश्वत्थामा महारथः। सदा ममैष मान्यश्च सर्व्वशस्त्रभृतामपि।
एतस्य त्वं रथं प्राप्य निवर्त्तेथाः पुनः पुनः। य एष तु रथानीके सुवर्णकवचावृतः। १०४५
सेनाग्र्येण तृतीयेन व्यावहार्य्येण तिष्ठति। यस्य नागो ध्वजाग्रे वै हेमकेतनसंवृतः।
धृतराष्ट्रसुतः श्रीमानेष राजा सुयोधनः। एतस्याभिमुखं वीर रथं पररथारुजं।
प्रापयस्वैष राजा हि प्रमाथी युद्धदुर्म्मदः। एष द्रोणस्य शिष्याणां शीघ्रास्त्रे प्रथमो मतः।
एतस्य दर्शयिष्यामि शीघ्रास्त्रं विपुलं रणे। नागकक्षा तु रुचिरा ध्वजाग्रे यस्य तिष्ठति।
एष वैकर्त्तनः कर्णो विदितः पूर्व्वमेव ते। एतस्य रथमासाद्य राधेयस्य दुरात्मनः। १०५०
यत्तो भवेथाः सङ्ग्रामे स्पर्द्धते हि सदा मया। यस्तु नीलानुसारेण पञ्चतारेण केतुना।
हस्तावापी बृहद्धन्वा रथे तिष्ठति वीर्य्यवान्। यस्य तारार्कचित्रोऽसौ रथे ध्वजवरः स्थितः।
यस्यैतत्पाण्डुरं छत्रं विमलं मूर्द्ध्नि तिष्ठति। महतो रथवंशस्य नानाध्वजपताकिनः।
बलाहकाग्रे सूर्य्यो वा य एष प्रमुखे स्थितः। हैमचन्द्रार्कसङ्काशं कवचं यस्य दृश्यते।
जातरूपशिरस्त्राणं मनस्तापयतीव मे। एष शान्तनवो भीष्मः सर्व्वेषां नः पितामहः। १०५५
राजश्रियाऽभिवृद्धस्य दुर्य्योधनवशानुगः। पश्चादेष प्रयातव्यो न मे विघ्नकरो भवेत्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

एतेन युध्यमानस्य यत्तः संयच्छ मे हयान् । ततोऽभ्यवहदव्यग्रो वैराटिः सव्यसाचिनं ।
यत्रातिष्ठत् कृपो राजन् योत्स्यमानो धनञ्जयं ।
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि अर्ज्जुनकृपसङ्ग्रामे पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥
॥ वैशम्पायन उवाच ॥ तान्यनीकान्यदृश्यन्त कुरूणामुग्रधन्विनां । संसर्पन्ते यथा मेघा घर्म्मान्ते मन्दमारुताः ।
अभ्यासे वाजिनस्तस्थुः समारूढाः प्रहारिणः । भीमरूपाश्च मातङ्गास्तोमराङ्कुशचोदिताः ।
महामात्रैः समारूढा विचित्रकवचोज्ज्वलाः । ततः शक्रः सुरगणैः समारुह्य सुदर्शनं ।
सहोपायात्तदा राजन् विश्वाश्विमरुतां गणैः । तद्देवयक्षगन्धर्व्वमहोरगसमाकुलं ।
शुशुभेऽभ्रविनिर्मुक्तं ग्रहाणामिव मण्डलं । अस्त्राणाञ्च बलं तेषां मनुष्येषु प्रयुञ्जतां ।
तच्च घोरं महद्युद्धं कृपार्ज्जुनसमागमे । द्रष्टुमभ्यागता देवा विमानैः स्वैः पृथक् पृथक् ।
शतं शतसहस्राणां यत्र स्थूणा हिरण्मयी । मणिरत्नमयी चान्या प्रासादमुपधारयत् ।
ततः कामगमं दिव्यं सर्व्वरत्नविभूषितं । विमानं देवराजस्य शुशुभे खेचरं शुभं ।
तत्र देवास्त्रयस्त्रिंशत्तिष्ठन्ति सहवासवाः । गन्धर्व्वा राक्षसाः सर्प्पाः पितरश्च महर्षिभिः ।
तथा राजा वसुमना बलाक्षः सुप्रतर्द्दनः । अष्टकश्च शिबिश्चैव ययातिर्नहुषो गयः ।
मनुः पूरूरघुर्भानुः कृशाश्वः सगरो नलः । विमानन्देवराजस्य समदृश्यन्त सुप्रभाः ।
अग्नेरीशस्य सोमस्य वरुणस्य प्रजापतेः । तथा धातुर्व्विधातुश्च कुवेरस्य यमस्य च ।
अलम्बुषोग्रसेनानां गन्धर्व्वस्य च तुम्बुरोः । यथाभागं यथोद्देशं विमानानि चकाशिरे ।
सर्व्वदेवनिकायाश्च सिद्धाश्च परमर्षयः । अर्ज्जुनस्य कुरूणाञ्च युद्धं द्रष्टुमुपागताः ।
दिव्यानां तत्र माल्यानां गन्धः पुण्योऽथ सर्व्वशः । प्रससार वसन्तादौ वृक्षाणामिव पुष्पिणां ।
आतपत्राणि वासांसि ध्वजाश्च व्यजनानि च । तत्र रत्नानि देवानां समदृश्यन्त तिष्ठतां ।
उपाशाम्यद्रजो भौमं सर्व्वं व्याप्तं मरीचिभिः । दिव्यान्गन्धानुपादाय वायुर्योधानसेवत ।
प्रभासितमिवाकाशं चित्ररूपमलङ्कृतं । सम्पतद्भिः स्थितैश्चापि नानारत्नावभासितैः ।
विमानैर्व्विविधैश्चित्रैरुपानीतैः सुरोत्तमैः । वज्रभृच्छुशुभे तत्र विमानस्थः सुरैर्वृतः ।
बिभ्रन्मालां महातेजाः पद्मोत्पलसमायुतां । विप्रेक्षमाणो बहुभिर्नातृप्यत्सूनुमाहवे ।
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि देवागमने षट्पञ्चाशोऽध्यायः ॥ ५६ ॥
॥ वैशम्पायन उवाच ॥ दृष्ट्वा व्यूढान्यनीकानि कुरूणां पाण्डुनन्दनः । तत्र वैराटिमामन्त्र्य पार्थो वचनमब्रवीत् ।
जाम्बुनदमयी वेदी ध्वजे यस्य प्रदृश्यते । तस्य दक्षिणतो याहि कृपः शारद्वतो यतः ।
॥ वैशम्पायन उवाच ॥ धनञ्जयवचः श्रुत्वा वैराटिस्त्वरितस्तदा । हयान् रजतसङ्काशान् हेमभाण्डानचोदयत् ।
आनुपूर्व्या तु तत्सर्व्वं जवमास्थाय चोत्तमं । प्राहिणोच्चन्द्रसङ्काशान् कुपितानिव तान् हयान् ।
स गत्वा कुरुसेनायाः समीपं हयकोविदः । पुनरावर्त्तयामास तान् हयान् वातरंहसः ।
प्रदक्षिणमुपावृत्य मण्डलं सव्यमेव च । कुरून् संमोहयामास मत्स्यो यानेन तत्त्ववित् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कृपस्य रथमास्थाय वैराटिरकुतोभयः। प्रदक्षिणमुपावृत्य तस्थौ तस्याग्रतो बली।
ततोऽर्ज्जुनः शङ्खवरं देवदत्तं महास्वनं। प्रदध्मौ बलमास्थाय नाम विश्राव्य चात्मनः। १७८५
तस्य शब्दो महानासीद्ध्मायमानस्य जिष्णुना। तथावीर्य्यवता सङ्ख्ये पर्व्वतस्येव दीर्य्यतः।
पूजयाञ्चक्रिरे शङ्खं कुरवः सहसैनिकाः। अर्ज्जुनेन समाध्मातः शतधा यन्न दीर्य्यते।
दिवमावृत्य शब्दस्तु निवृत्तः शुश्रुवे पुनः। सृष्टो मघवता वज्रः प्रपतन्निव पर्व्वते।
एतस्मिन्नन्तरे वीरो बलदर्प्पसमन्वितः। अमृष्यमाणस्तं शब्दं कृपः शारद्वतस्तथा।
अर्ज्जुनं प्रति संरब्धो युद्धार्थी स महारथः। महोदधिजमादाय दध्मौ वेगेन वीर्य्यवान्। १७९०
स तु शब्देन लोकांस्त्रीनावृत्य रथिनां वरः। धनुरादाय सुमहज्ज्याशब्दमकरोत्तदा।
तौ रथौ सूर्य्यसङ्काशौ योत्स्यमानौ महाबलौ। शारदाविव जीमूतौ व्यरोचेतां व्यवस्थितौ।
ततः शारद्वतस्तूर्णं पार्थं दशभिराशुगैः। विव्याध परवीरघ्नं निशितैर्म्मर्म्मभेदिभिः।
पार्थोऽपि विश्रुतं लोके गाण्डीवं परमायुधं। विकृष्य चिक्षेप बहून्नाराचान्मर्म्मभेदिनः।
तानप्राप्तांश्छितैर्व्वाणैर्नाराचान् रक्तभोजनान्। कृपश्चिच्छेद पार्थस्य शतशोऽथ सहस्रशः। १७९५
ततः पार्थस्तु संक्रुद्धश्चित्रान्मार्गान्प्रदर्शयन्। दिशः प्रच्छादयामास बाणौघैः प्रदिशस्तथा।
एकच्छायमिवाकाशमकरोत्सर्व्वतः प्रभुः। प्राच्छादयदमेयात्मा पार्थः शरशतैः कृपं।
स शरैरर्द्दितः क्रुद्धः शितैरग्निशिखोपमैः। तूर्णं दशसहस्रेण पार्थमप्रतिमौजसं।
अर्द्दयित्वा महात्मानं ननाद समरे कृपः। ततः कनकपर्व्वाग्रैर्वीरः सन्नतपर्व्वभिः।
धनुरादाय विव्याध पार्थं दशभिराशुगैः। त्वरन् गाण्डीवनिर्मुक्तैरर्ज्जुनस्तस्य वाजिनः। १८००
चतुर्भिश्चतुरस्तीक्ष्णैरविध्यत् परमेषुभिः। ते हया निशितैर्व्विद्धा ज्वलद्भिरिव पावकैः।
उत्पेतुः सहसा सर्व्वे कृपः स्थानादथाच्यवत्। च्युतन्तु गौतमं दृष्ट्वा स्थानात् कुन्तीसुतस्तदा।
नाविध्यत्परवीरघ्नो रक्षमाणोऽस्य गौरवं। स तु लब्ध्वा पुनः स्थानं गौतमः सव्यसाचिनं।
विव्याध दशभिर्व्वाणैस्त्वरितः कङ्कपत्रिभिः। ततः पार्थो धनुस्तस्य भल्लेन निशितेन च।
चिच्छेदैकेन भूयस्तु हस्तावापमथाहरत्। अथास्य कवचं बाणैर्निशितैर्म्मर्म्मभेदिभिः। १८०५
व्यधमन्नच पार्थोऽस्य शरीरमवपीडयत्। तस्य निर्मुच्यमानस्य कवचात्काय आबभौ।
समये मुच्यमानस्य सर्पस्येव तनुर्यथा। छिन्ने धनुषि पार्थेन सोऽन्यदादाय कार्म्मुकं।
चकार गौतमः सज्जं तदद्भुतमिवाभवत्। स तदप्यस्य कौन्तेयश्चिच्छेद नतपर्व्वणा।
एवमन्यानि चापानि बहूनि कृतहस्तवत्। शारद्वतस्य चिच्छेद पाण्डवः परवीरहा।
स छिन्नधनुरादाय रथशक्तिं प्रतापवान्। प्राहिणोत्पाण्डुपुत्राय प्रदीप्तामशनीमिव। १८१०
तामर्ज्जुनस्तदायान्तीं शक्तिं हेमविभूषितां। वियद्गतां महोल्काभां चिच्छेद दशभिः शरैः।
साऽपतद्दशधा छिन्ना भूमौ पार्थेन धीमता। युगपच्चैव भल्लैस्तु ततः सज्यधनुः कृपः।
तमाशु निशितैः पार्थं बिभेद दशभिः शरैः। ततः पार्थो महातेजा विशिखानग्नितेजसः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

चिक्षेप समरे क्रुद्धस्त्रयोदश शिलाशितान् । अथास्य युगमेकेन चतुर्भिश्चतुरो हयान् ।
षष्ठेन च शिरः कायाच्छरेण रथसारथेः । त्रिभिस्त्रिवेणुं समरे द्वाभ्यामक्षं महारथः । १८१५
द्वादशेन तु भल्लेन चकर्त्तास्य ध्वजोत्तमं । ततो वज्रनिकाशेन फाल्गुनः प्रहसन्निव ।
त्रयोदशेनेन्द्रसमः कृपं वक्षस्यविध्यत । स च्छिन्नधन्वा विरथो हताश्वो हतसारथिः ।
गदापाणिरवप्लुत्य तूर्णं चिक्षेप तां गदां । सा च मुक्ता गदा गुर्वी कृपेण सुपरिष्कृता ।
अर्ज्जुनेन शरैर्नुन्ना प्रतिमार्गमथागमत् । तन्तु योधाः परीप्सन्तः शारद्वतममर्षणं ।
सर्व्वतः समरे पार्थं शरवर्षैरवाकिरन् । ततो विराटस्य सुतः सव्यमावृत्य वाजिनः । १८२०
यमकं मण्डलं कृत्वा तान्योधान् प्रत्यवारयत् । ततः कृपमुपादाय विरथं ते नरर्षभाः ।
अपजह्रुर्महावेगाः कुन्तीपुत्राद्धनञ्जयात् ।

इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि कृपापनयने सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥

॥ वैशम्पायन उवाच ॥ कृपेऽपनीते द्रोणस्तु प्रगृह्य सशरं धनुः । अभ्यद्रवदनाधृष्यः शोणाश्वः श्वेतवाहनं ।
स तु रुक्मरथं दृष्ट्वा गुरुमायान्तमन्तिकात् । अर्ज्जुनो जयतां श्रेष्ठ उत्तरं वाक्यमब्रवीत् ।
॥ अर्ज्जुन उवाच ॥ यत्रैषा काञ्चनी वेदी ध्वजे यस्य प्रकाशते । उच्छ्रिता प्रवरे दण्डे पताकाभिरलङ्कृता । १८२५
तत्र मां वह भद्रं ते द्रोणानीकाय सारथे । अश्वाः शोणाः प्रकाशन्ते बृहन्तश्चारुवाहिनः ।
स्निग्धविद्रुमसङ्काशास्ताम्रास्याः प्रियदर्शनाः । युक्ता रथवरे यस्य सर्व्वशिक्षाविशारदाः ।
दीर्घबाहुर्महातेजा बलरूपसमन्वितः । सर्व्वलोकेषु विक्रान्तो भारद्वाजः प्रतापवान् ।
बुद्ध्या तुल्यो ह्युशनसा बृहस्पतिसमो नये । वेदास्तथैव चत्वारो ब्रह्मचर्य्यं तथैव च ।
ससंहाराणि सर्व्वाणि दिव्यान्यस्त्राणि मारिष । धनुर्व्वेदश्च कार्त्स्न्येन यस्मिन्नित्यं प्रतिष्ठितः । १८३०
क्षमा दमश्च सत्यञ्च आनृशंस्यमथार्ज्जवं । एते चान्ये च बहवो यस्मिन्नित्यं द्विजे गुणाः ।
तेनाहं योद्धुमिच्छामि महाभागेन संयुगे । तस्मात्त्वं प्रापयाचार्य्यं क्षिप्रमुत्तर वाहय ।
॥ वैशम्पायन उवाच ॥ अर्ज्जुनेनैवमुक्तस्तु वैराटिर्हेमभूषणान् । चोदयामास तानश्वान् भारद्वाजरथं प्रति ।
तमापतन्तं वेगेन पाण्डवं रथिनां वरं । द्रोणः प्रत्युद्ययौ पार्थं मत्तो मत्तमिव द्विपं ।
ततः प्राध्मापयच्छङ्खं भेरीशतनिनादितं । प्रचुक्षुभे बलं सर्व्वमुद्धूत इव सागरः । १८३५
अथ शोणान् सदश्वांस्तान् हंसवर्णैर्मनोजवैः । मिश्रितान् समरे दृष्ट्वा व्यस्मयन्त रणे नराः ।
तौ रथौ वीर्य्यसम्पन्नौ दृष्ट्वा सङ्ग्राममूर्द्धनि आचार्य्यशिष्यावजितौ कृतविद्यौ मनस्विनौ ।
समाश्लिष्टौ तदाऽन्योन्यं द्रोणपार्थौ महाबलौ । दृष्ट्वा प्राकम्पत मुहुर्भरतानां महद्बलं ।
हर्षयुक्तस्ततः पार्थः प्रहसन्निव वीर्य्यवान् । रथं रथेन द्रोणस्य समासाद्य महारथः ।
अभिवाद्य महाबाहुः सामपूर्व्वमिदं वचः । उवाच श्लक्ष्णया वाचा कौन्तेयः परवीरहा । १८४०
उषिताः स्मो वने वासं प्रतिकर्म्म चिकीर्षवः । कोपं नार्हसि नः कर्त्तुं सदा समरदुर्ज्जय ।
अहन्तु प्रहृते पूर्व्वं प्रहरिष्यामि तेऽनघ । इति मे वर्त्तते बुद्धिस्तद्भवान् कर्त्तुमर्हति ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ततोऽस्मै प्राहिणोद्द्रोणः शरानधिकविंशतिं। अप्राप्तांश्चैव तान्पार्थश्चिच्छेद कृतहस्तवत्।
ततः शरसहस्रेण रथं पार्थस्य वीर्य्यवान्। अवाकिरत्ततो द्रोणः शीघ्रमस्त्रं विदर्शयन्।
हयांश्च रजतप्रख्यान्कङ्कपत्रैः शिलाशितैः। अवाकिरदमेयात्मा पार्थं संकोपयन्निव।
एवं प्रवृत्ते युद्धं भारद्वाजकिरीटिनोः। समं विमुञ्चतोः संख्ये विशिखान् दीप्ततेजसः।
तावुभौ ख्यातकर्म्माणावुभौ वायुसमौ जवे। उभौ दिव्यास्त्रविदुषावुभावुत्तमतेजसौ।
क्षिपन्तौ शरजालानि मोहयामासतुर्नृपान्। व्यस्मयन्त ततो योधाः ये तत्रासन्समागताः।
शरान् विसृजतोस्तूर्णं साधुसाध्वित्यपूजयन्। द्रोणं हि समरे कोऽन्यो योद्धुमर्हति फाल्गुनात्।
रौद्रः क्षत्रियधर्म्मोऽयं गुरुणा यदयुध्यत। इत्यब्रुवन् जनास्तत्र सङ्ग्रामशिरसि स्थिताः।
वीरौ तावभिसंरब्धौ सन्निकृष्टौ महाभुजौ। छादयेतां शरव्रातैरन्योऽन्यमपराजितौ।
विष्फार्य्य सुमहच्चापं हेमपृष्ठं दुरासदं। भारद्वाजोऽथ संरब्धः फाल्गुनं प्रत्यविध्यत।
स सायकमयैर्जालैरर्ज्जुनस्य रथं प्रति। भानुमद्भिः शिलाधौतैर्भानोराच्छादयत्प्रभां।
पार्थश्च सुमहाबाहुर्म्महावेगैर्म्महारथः। विव्याध निशितैर्व्वाणैर्म्मेघो वृष्ट्येव पर्व्वतं।
तथैव दिव्यं गाण्डीवं धनुरादाय पाण्डवः। शत्रुघ्नं वेगवान् हृष्टो भारसाधनमुत्तमं।
विससर्ज्ज शरांश्चित्रान् सुवर्णविकृतान्बहून्। नाशयञ्छरवर्षाणि भारद्वाजस्य वीर्य्यवान्।
तूर्णं चापविनिर्म्मुक्तैस्तदद्भुतमिवाभवत्। स रथेन चरन् पार्थः प्रेक्षणीयो धनञ्जयः।
युगपद्दिक्षु सर्व्वासु सर्व्वतोऽस्त्राण्यदर्शयत्। एकच्छायमिवाकाशं वाणैश्चक्रे समन्ततः।
नादृश्यत तदा द्रोणो नीहारेणेव संवृतः। तस्याभवत्तदा रूपं संवृतस्य शरोत्तमैः।
जाज्वल्यमानस्य तदा पर्व्वतस्येव सर्व्वतः। दृष्ट्वा तु पार्थस्य रणे शरैः स्वरथमावृतं।
स विस्फार्य्य धनुःश्रेष्ठं मेघस्तनितनिस्वनं। अग्निचक्रोपमं घोरं व्यकर्षत्परमायुधं।
व्यपातयच्छरांस्तीक्ष्णान्द्रोणः समितिशोभनः। महानभूत्ततः शब्दो वंशानामिव दह्यतां।
जाम्बूनदमयैः पुङ्खैश्चित्रचापविनिर्गतैः। प्राच्छादयदमेयात्मा दिशः सूर्य्यस्य च प्रभां।
ततः कनकपुङ्खानां शराणां नतपर्व्वणां। वियच्चराणां वियति दृश्यन्ते बहवो व्रजाः।
द्रोणस्य पुङ्खसक्ताश्च प्रभवन्तः शरासनात्। एको दीर्घ इवादृश्यदाकाशे संहतः शरः।
एवं तौ स्वर्णविकृतान्विमुञ्चन्तौ महाशरान्। आकाशं संवृतं वीरावुल्काभिरिव चक्रतुः।
शरास्तयोस्तु विबभुः कङ्कबर्हिणवाससः। पङ्क्तयः शरदि खस्थानां हंसानां चरतामिव।
युद्धं समभवत्तत्र सुसंरब्धं महात्मनोः। द्रोणपाण्डवयोर्घोरं वृत्रवासवयोरिव।
तौ गजाविव चासाद्य विषाणाग्रैः परस्परं। शरैः पूर्णायतोत्सृष्टैरन्योऽन्यमभिजघ्नतुः।
तौ व्यवाहरतां युद्धे संरब्धौ रणशोभिनौ। उदीरयन्तौ समरे दिव्यान्यस्त्राणि भागशः।
अथ त्वाचार्य्यमुख्येन शरान्सृष्टान् शिलाशितान्। न्यवारयच्छितैर्व्वाणैरर्ज्जुनो जयतां वरः।
दर्शयन् वीक्षमाणानामस्त्रमुग्रपराक्रमः। इषुभिस्तूर्णमाकाशं बहुभिश्च समावृणोत्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

जिघांसन्तं नरव्याघ्रमर्जुनं तिग्मतेजसं । आचार्य्यमुख्यः समरे द्रोणः शस्त्रभृताम्बरः ।
अर्जुनेन सहाक्रीडच्छरैः सन्नतपर्व्वभिः । दिव्यान्यस्त्राणि मुञ्चन्तं भारद्वाजो महारणे ।
अस्त्रैरस्त्राणि संवार्य्य फाल्गुनं समयोधयत् । तयोरासीत्सम्प्रहारः क्रुद्धयोर्नरसिंहयोः । १८७५
अमर्षिणोस्तदाऽन्योऽन्यं देवदानवयोरिव । ऐन्द्रं वायव्यमाग्नेयमस्त्रमस्त्रेण पाण्डवः ।
द्रोणेन मुक्तमात्रन्तु ग्रसति स्म पुनःपुनः । एवं शूरौ महेष्वासौ विसृजन्तौ शिताञ्छरान् ।
एकच्छायं चक्रतुस्तावाकाशं शरवृष्टिभिः । तत्रार्जुनेन मुक्तानां पततां वै शरीरिषु ।
पर्व्वतेष्विव वज्राणां शराणां श्रूयते स्वनः । ततो नागा रथाश्चैव वाजिनश्च विशाम्पते ।
शोणिताक्ता व्यदृश्यन्त पुष्पिता इव किंशुकाः । बाहुभिश्च सकेयूरैर्व्विचित्रैश्च महारथैः । १८८०
सुवर्णचित्रैः कवचैर्ध्वजैश्च विनिपातितैः । योधैश्च निहतैस्तत्र पार्थवाणप्रपीड़ितैः ।
बलमासीत्समुद्भ्रान्तं द्रोणार्जुनसमागमे । विधुन्वानौ तु तौ तत्र धनुषी भारसाधने ।
आच्छादयेतामन्योऽन्यं ततचतुरथेषुभिः । तयोः समभवद्युद्धन्तुमुलं भरतर्षभ ।
द्रोणकौन्तेययोस्तत्र बलिवासवयोरिव । अथ पूर्णायतोत्सृष्टैः शरैः सन्नतपर्व्वभिः ।
व्यदारयेतामन्योऽन्यं प्राणद्यूते प्रवर्त्तिते । अथान्तरीक्षे नादोऽभूत् द्रोणं तत्र प्रशंसतां । १८८५
दुष्करं कृतवान् द्रोणो यदर्ज्जुनमयोधयत् । प्रमाथिनं महावीर्य्यं दृढमुष्टिं दुरासदं ।
जेतारं देवदैत्यानां सर्व्वेषाञ्च महारथं । अविभ्रमञ्च शिक्षाञ्च लाघवं दूरपातितां ।
पार्थस्य समरे दृष्ट्वा द्रोणस्याभूच्च विस्मयः । अथ गाण्डीवमुद्यम्य दिव्यं धनुरमर्षणः ।
विचकर्ष रणे पार्थो बाहुभ्यां भरतर्षभ । तस्य वाणमयं वर्षं शलभानामिवायतिं ।
दृष्ट्वा ते विस्मिताः सर्व्वे साधुसाध्वित्यपूजयन् । न च वाणान्तरे वायुरस्य शक्नोति सर्पितुं ॥ १८९०
अनिशं सन्दधानस्य शरानुत्सृजतस्तथा । ददर्श नान्तरं कश्चित्पार्थस्याददतोऽपि च ।
तथा शीघ्रास्त्रयुद्धे तु वर्त्तमाने सुदारुणे । शीघ्रं शीघ्रतरं पार्थः शरानन्यानुदीरयन् ।
ततः शतसहस्राणि शराणां नतपर्व्वणां । युगपत्प्रापतंस्तत्र द्रोणस्य रथमन्तिकात् ।
आकीर्य्यमाणे द्रोणे तु शरैर्गाण्डीवधन्वना । हाहाकारो महानासीत्सैन्यानां भरतर्षभ ।
पाण्डवस्य तु शीघ्रास्त्रं मघवान् प्रत्यपूजयत् । गन्धर्व्वाप्सरसश्चैव ये च तत्र समागताः । १८९५
ततो वृन्देन महता रथानां रथयूथपः । आचार्य्यपुत्त्रः सहसा पाण्डवं प्रत्यवारयत् ।
अश्वत्थामा तु तत्कर्म्म हृदयेन महात्मनः । पूजयामास पार्थस्य कोपञ्चास्याकरोद्भृशं ।
स मन्युवशमापन्नः पार्थमभ्यद्रवद्रणे । किरंश्छरसहस्राणि पर्ज्जन्य इव वृष्टिमान् ।
आवृत्य तु महाबाहुर्यतो द्रौणिस्ततो हयान् । अन्तरं प्रददौ पार्थो द्रोणस्य व्यपसर्पितुं ।
स तु लब्ध्वाऽन्तरं तूर्णं व्यपायाज्जवनैर्हयैः । छिन्नवर्म्मध्वजः शूरो निकृत्तः परमेषुभिः । १९००
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि द्रोणापयानेऽष्टपञ्चाशोऽध्यायः ॥ ५८ ॥
॥ वैशम्पायन उवाच ॥ ततो द्रौणिर्म्महाराज प्रययावर्ज्जुनं रणे । तं पार्थः प्रतिजग्राह वायुवेगमिवोद्धतं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शरजालेन महता वर्षमाणमिवाम्बुदं । तयोर्द्देवासुरसमः सन्निपाते महानभूत् ।
किरतोः शरजालानि वृत्रवासवयोरिव । न स्म सूर्य्यस्तदा भाति न च वाति समीरणः ।
शरजालावृते व्योम्नि च्छायाभूते समन्ततः । महान् चटचटाशब्दो योधयोर्हन्यमानयोः ।
दह्यतामिव वेणूनामासीत्परपुरञ्जय । हयानस्यार्ज्जुनः सर्व्वान्कृतवानल्पजीवितान् । १९०५
ते राजन्नप्रजानन्त दिशं काञ्चन मोहिताः । ततो द्रौणिर्महावीर्य्यः पार्थस्य विचरिष्यतः ।
विवरं सूक्ष्ममालोक्य ज्यां चिच्छेद क्षुरेण ह । तदस्यापूजयन् देवाः कर्म्म दृष्ट्वाऽतिमानुषं ।
द्रोणो भीष्मश्च कर्णश्च कृपश्चैव महारथः । साधुसाध्विति भाषन्तोऽपूजयन् कर्म्म तस्य तत् ।
ततो द्रौणिर्धनुश्रेष्ठमपकृष्य रथर्षभं । पुनरेवाहनत्पार्थं हृदये कङ्कपत्रिभिः ।
ततः पार्थो महाबाहुः प्रहस्य स्वनवत्तदा । योजयामास नवया मौर्व्या गाण्डीवमोजसा । १९१०
ततोऽर्द्धचन्द्रमावृत्य तेन पार्थः समागमत् । वारणेनेव मत्तेन मत्तो वारणयूथपः ।
ततः प्रववृते युद्धं पृथिव्यामेकवीरयोः । रणमध्ये द्वयोरेवं सुमहल्लोमहर्षणं ।
तौ वीरौ ददृशुः सर्व्वे कुरवो विस्मयान्विताः । युध्यमानौ महावीर्य्यौ यूथपाविव सङ्गतौ ।
तौ समाजघ्नतुर्व्वीरावन्योऽन्यं पुरुषर्षभौ । शरैराशीविषाकारैर्ज्वलद्भिरिव पन्नगैः ।
अक्षय्याविषुधी दिव्यौ पाण्डवस्य महात्मनः । तेन पार्थो रणे शूरस्तस्थौ गिरिरिवाचलः । १९१५
अश्वत्थाम्नः पुनर्व्वाणाः क्षिप्रमभ्यस्यतो रणे । जग्मुः परिक्षयं तूर्णमभूत्तेनाधिकोऽर्ज्जुनः ।
ततः कर्णो महाचापं विकृष्याभ्यधिकं तथा । अवाक्षिपत्ततः शब्दो हाहाकारो महानभूत् ।
ततश्चक्षुर्द्दधे पार्थो यत्र विस्फार्य्यते धनुः । ददर्श तत्र राधेयं तस्य कोपो व्यवर्द्धत ।
स रोषवशमापन्नः कर्णमेव जिघांसया । तमैक्षत विवृत्ताभ्यां नेत्राभ्यां कुरुपुङ्गवः ।
तथा तु विमुखे पार्थे द्रोणपुत्रस्य सायकान् । त्वरिताः पुरुषा राजन्नुपाजह्रुः सहस्रशः । १९२०
उत्सृज्य च महाबाहुर्द्रोणपुत्रं धनञ्जयः । अभिदुद्राव सहसा कर्णमेव सपत्नजित् ।
तमभिद्रुत्य कौन्तेयः क्रोधसंरक्तलोचनः । कामयन् द्वैरथं तेन युद्धं वचनमब्रवीत् ।
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि अर्ज्जुनाश्वत्थामयुद्धे एकोनषष्टितमोऽध्यायः ॥ ५९ ॥
॥ अर्ज्जुन उवाच ॥ कर्ण यत्ते सभामध्ये बहु वाचा विकत्थितं । न मे युधि समोऽस्तीति तदिदं समुपस्थितं ।
सोऽद्य कर्ण मया सार्द्धं व्यवहृत्य महामृधे । ज्ञास्यसे बलमात्मीयं न चान्यानवमन्यसे ।
अवोचः परुषा वाचो धर्म्ममुत्सृज्य केवलं । इदं तु दुष्करं मन्ये यदिदं ते चिकीर्षितं । १९२५
यत्त्वया कथितं पूर्व्वं मामनासाद्य किञ्चन । तदद्य कुरु राधेय कुरुमध्ये मया सह ।
यत्सभायां स पाञ्चालीं क्लिश्यमानां दुरात्मभिः । दृष्टवानसि तस्याद्य फलमाप्नुहि केवलं ।
धर्म्मपाशनिबद्धेन यन्मया मर्षितं पुरा । तस्य राधेय कोपस्य विजयं पश्य मे मृधे ।
वने द्वादशवर्षाणि यानि सोढानि दुर्म्मते । तस्याद्य प्रतिकोपस्य फलमाप्नुहि केवलं ।
एहि कर्ण मया सार्द्धं प्रतियुध्यस्व सङ्गरे । प्रेक्षकाः कुरवः सर्व्वे भवन्तु तव सैनिकाः । १९३०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ कर्ण उवाच ॥ ब्रवीषि वाचा यत्पार्थ कर्म्मणा तत्समाचर । अतिशेते हि ते वाक्यं कर्म्मैतत् प्रथितं भुवि ।
यत्त्वया मर्षितं पूर्व्वं तदशक्तेन मर्षितं । इतो गृह्णीमहे पार्थ तव दृष्ट्वा पराक्रमं ।
धर्म्मपाशनिबद्धेन यत्त्वया मर्षितं पुरा । तथैव बद्धमात्मानमबद्धमिव मन्यसे ।
यदि तावद्वने वासो यथोक्तश्चरितस्त्वया । तत्त्वं धर्म्मार्थवित् क्लिष्टः स मया योद्धुमिच्छसि ।
यदि शक्रः स्वयं पार्थ युध्यते तव कारणात् । तथाऽपि न व्यथा काचिन्मम स्यादिक्रमिष्यतः । १९३५
अयं कौन्तेय कामस्ते न चिरात्समुपस्थितः । योत्स्यसे हि मया सार्द्धमद्य द्रक्ष्यसि मे बलं ।
॥ अर्ज्जुन उवाच ॥ इदानीमेव तावत्त्वमपयातो रणान्मम । तेन जीवसि राधेय निहतस्त्वनुजस्तव ।
भ्रातरं घातयित्वा कस्त्यक्त्वा रणशिरश्च कः । त्वदन्यः कः पुमान् सत्सु ब्रूयादेवं व्यवस्थितः ।
॥ वैशम्पायन उवाच ॥ इति कर्णं ब्रुवन्नेव बीभत्सुरपराजितः । अभ्ययाद्विसृजन् बाणान् कायावरणभेदिनः ।
प्रतिजग्राह तं कर्णः प्रीयमाणो महारथः । महता शरवर्षेण वर्षमाणमिवाम्बुदं । १९४०
उत्पेतुः शरजालानि घोररूपाणि सर्व्वशः । अविध्यदश्वान् बाह्वोश्च हस्तावापं पृथक् पृथक् ।
सोऽमृष्यमाणः कर्णस्य निषङ्गस्यावलम्बनं । चिच्छेद निशिताग्रेण शरेणानतपर्व्वणा ।
उपासङ्गादुपादाय कर्णो बाणानथापरान् । विव्याध पाण्डवं हस्ते तस्य मुष्टिरशीर्य्यत ।
ततः पार्थो महाबाहुः कर्णस्य धनुरच्छिनत् । स शक्तिं प्राहिणोत्तस्मै तां पार्थो व्यधमच्छरैः ।
ततो निपेतुर्ब्बहवो राधेयस्य पदानुगाः । तांश्च गाण्डीवनिर्म्मुक्तैः प्राहिणोद्यमसादनं । १९४५
ततोऽस्याश्वाञ्छरैस्तीक्ष्णैर्ब्बीभत्सुर्भारसाधनैः । आकर्णमुक्तैरभ्यघ्नंस्ते हताः प्रापतन्भुवि ।
अथापरेण बाणेन ज्वलितेन महौजसा । विव्याध कर्णं कौन्तेयस्तीक्ष्णेनोरसि वीर्य्यवान् ।
तस्य भित्त्वा तनुत्राणं कायमभ्यगमच्छरः । ततः सतमसाविष्टो न स्म किञ्चित्प्रजज्ञिवान् ।
स गाढवेदनो हित्वा रणं प्रायादुदङ्मुखः । ततोऽर्ज्जुन उदक्रोशदुत्तरश्च महारथः ।
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि कर्णापयाने षष्टितमोऽध्यायः ॥ ६० ॥
॥ वैशम्पायन उवाच ॥ ततो वैकर्त्तनं जित्वा पार्थो वैराटिमब्रवीत् । एतन्मां प्रापयानीकं यत्र तालो हिरण्मयः । १९५०
यत्र शान्तनवो भीष्मो रथेऽस्माकं पितामहः । काङ्क्षमाणो मया युद्धं तिष्ठत्यमरदर्शनः ।
अथ सैन्यं महद्दृष्ट्वा रथनागहयाकुलं । अब्रवीदुत्तरः पार्थमपविद्धः शरैर्भृशं ।
नाहं शक्ष्यामि वीरेह नियन्तुं ते हयोत्तमान् । विषीदन्ति मम प्राणा मनो विह्वलतीव मे ।
अस्त्राणामिह दिव्यानां प्रभावात् सम्प्रयुज्यतां । त्वया च कुरुभिश्चैव द्रवन्तीव दिशो दश ।
गन्धेन मूर्च्छितश्चाहं वसारुधिरमेदसां । द्वैधीभूतं मनो मेऽद्य तव चैव प्रपश्यतः । १९५५
अदृष्टपूर्व्वः शूराणां मया सङ्ख्ये समागमः । गदाघातेन महता शङ्खानां निस्वनेन च ।
सिंहनादैश्च शूराणां गजानां बृंहितैस्तथा । गाण्डीवशब्देन भृशमशनिप्रतिमेन च ।
श्रुतिः स्मृतिश्च मे वीर प्रनष्टाः मूढचेतसः । अलातचक्रप्रतिमं मण्डलं सततं त्वया ।
व्याक्षिप्यमाणं समरे गाण्डीवञ्च प्रकर्षतः । दृष्टिः प्रचलिता वीर हृदयं दीर्य्यतीव मे ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वपुश्चोग्रं तव रणे क्रुद्धस्येव पिनाकिनः। व्यायच्छतस्तव भुजं दृष्ट्वा भीमे भवत्यपि। १९६०
नाददानं न सन्धानं न मुञ्चन्तं शरोत्तमान्। त्वामहं न प्रपश्यामि पश्यन्नपि विचेतनः।
अवसीदन्ति मे प्राणा भूरियं चलतीव च। नच प्रतोदं रश्मींश्च संयन्तुं शक्तिरस्ति मे।
॥ अर्ज्जुन उवाच ॥ माभैषीस्त्वं भयात्मानं त्वयाऽपि नरपुङ्गव। अत्यद्भुतानि कर्म्माणि कृतानि रणमूर्द्धनि।
राजपुत्त्रोऽसि भद्रन्ते कुले मत्स्यस्य विश्रुते। जातस्त्वं शत्रुदमने नावसादितुमर्हसि।
धृतिं कृत्वा सुविपुलां राजपुत्त्र रथे पुनः। युध्यमानस्य समरे हयान् संयच्छ शत्रुहन्। १९६५
॥ वैशम्पायन उवाच ॥ एवमुक्त्वा महाबाहुर्वैराटिं नरसत्तमः। अर्ज्जुनो रथिनां श्रेष्ठ उत्तरं वाक्यमब्रवीत्।
सेनाग्रमाशु भीष्मस्य प्रापयस्वैतदेव मां। आच्छेत्स्याम्यहमेतस्य धनुर्ज्यामपि चाहवे।
अस्यन्तं दिव्यमस्त्रं मां चित्रमद्य निशामय। शतह्रदामिवायान्तीं स्तनयित्नोरिवाम्बरे।
सुवर्णपृष्ठं गाण्डीवं द्रक्ष्यन्ति कुरवो मम। दक्षिणेनाथ वामेन कतरेण स्विदस्यति।
इति मां सङ्गताः सर्व्वे तर्कयिष्यन्ति शत्रवः। शोणितोदां रथावर्त्तां नागनक्रां दुरत्ययां। १९७०
नदीं प्रस्कन्दयिष्यामि परलोकप्रवाहिनीं। पाणिपादशिरःपृष्ठबाहुशाखानिरन्तरं।
वनं कुरूणां छेत्स्यामि शरैः सन्नतपर्व्वभिः। जयतः कौरवीं सेनामेकस्य मम धन्विनः।
शतं मार्गा भविष्यन्ति पावकस्येव कानने। मया चक्रमिवाविद्धं सैन्यं द्रक्ष्यसि केवलं।
इष्वस्त्रे शिक्षितं चित्रमहं दर्शयिताऽस्मि ते। असम्भ्रान्तो रथे तिष्ठ समेषु विषमेषु च।
दिवमावृत्य तिष्ठन्तं गिरिं भिन्द्यां स्म पत्त्रिभिः। अहमिन्द्रस्य वचनात्सङ्ग्रामेऽभ्यहनं पुरा। १९७५
पौलोमान् कालकञ्जांश्च सहस्राणि शतानि च। अहमिन्द्राद्दृढां मुष्टिं ब्रह्मणः कृतहस्ततां।
प्रगाढे तुमुलं चित्रमतिविद्धं प्रजापतेः। अहं पारे समुद्रस्य हिरण्यपुरवासिनां।
जित्वा षष्टिं सहस्राणि रथिनामुग्रधन्विनां। शीर्य्यमाणानि कूलानि प्रवृद्धेनेव वायुना।
मया कुरूणां वृन्दानि पात्यमानानि पश्य वै। ध्वजवृक्षं पत्तितृणं रथसिंहगणायुतं।
वनमादीपयिष्यामि कुरूणामस्त्रतेजसा। तानहं रथनीडेभ्यः शरैः सन्नतपर्व्वभिः। १९८०
पत्तीन् सर्व्वानतिबलान् योत्स्यमानानवस्थितान्। एकः सङ्कालयिष्यामि वज्रपाणिरिवासुरान्।
रौद्रं रुद्रादहं ह्यस्त्रं वरुणादपि वारुणं। अस्त्रमाग्नेयमग्नेश्च वायव्यं मातरिश्वनः। वज्रादीनि तथाऽस्त्राणि शक्रादहमवाप्तवान्।
धार्त्तराष्ट्रं वनं घोरं नरसिंहाभिरक्षितं। अहमुत्पाटयिष्यामि वैराटे व्येतु ते भयं।
॥ वैशम्पायन उवाच ॥ एवमाश्वासितस्तेन वैराटिः सव्यसाचिना। व्यवागाहद्रथानीकं भीमं भीष्माभिरक्षितं।
तमायान्तं महाबाहुं जिगीषन्तं रणे कुरून्। अभ्यवारयदव्यग्रः क्रूरकर्म्माऽपगासुतः। १९८५
तस्य जिष्णुरुपावृत्य ध्वजं मूलादपातयत्। विकृष्य कलधौताग्रैः स विद्धः प्रापतद्भुवि।
तं चित्रमाल्याभरणाः कृतविद्या मनस्विनः। आगच्छन्भीमधन्वानं चत्वारश्च महाबलाः।
दुःशासनो विकर्णश्च दुःसहोऽथ विविंशतिः। आगत्य भीमधन्वानं बीभत्सुं पर्य्यवारयन्।
दुःशासनस्तु भल्लेन विद्ध्वा वैराटिमुत्तरं। द्वितीयेनार्ज्जुनं वीरः प्रत्यविध्यत् स्तनान्तरे।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तस्य जिष्णुरुपावृत्य पृथुधारेण कार्म्मुकं । चकर्त्त गार्द्धपत्रेण जातरूपपरिष्कृतं । १९९०
अथैनं पञ्चभिः पश्चात्प्रत्यविध्यत् स्तनान्तरे । सोऽपयातो रणं हित्वा पार्थबाणप्रपीडितः ।
तं विकर्णः शरैस्तीक्ष्णैर्गार्द्धपत्रैरजिह्मगैः । विव्याध परवीरघ्नमर्जुनं धृतराष्ट्रजः ।
ततस्तमपि कौन्तेयः शरेणानतपर्व्वणा । ललाटेऽभ्यहनत्तूर्णं स विद्धः प्रापतद्रथात् ।
ततः पार्थमभिद्रुत्य दुःसहः सविविंशतिः । अवाकिरच्छरैस्तीक्ष्णैः परीप्सुर्भ्रातरं रणे ।
तावुभौ गार्द्धपत्राभ्यां निशिताभ्यां धनञ्जयः । विद्ध्वा युगपदव्यग्रस्तयोर्व्वाहानसूदयत् । १९९५
तौ हताश्वौ विभिन्नाङ्गौ धृतराष्ट्रात्मजावुभौ । अभिपत्य रथैरन्यैरपनीतौ पदानुगैः ।
सर्व्वा दिशश्चाभ्यपतद्बीभत्सुरपराजितः । किरीटमाली कौन्तेयो लब्धलक्षो महाबलः ।
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि अर्ज्जुनदुःशासनादियुद्धे एकषष्टोऽध्यायः ॥ ६१ ॥
॥ वैशम्पायन उवाच ॥ अथ सङ्गम्य सर्व्वे ते कौरवाणां महारथाः । अर्ज्जुनं सहिता यत्ताः प्रत्यविध्यन्त भारत ।
स सायकमयैर्ज्जालैः सर्व्वतस्तान्महारथान् । प्राच्छादयदमेयात्मा नीहारेणेव पर्व्वतान् ।
नर्द्दद्भिश्च महानागैर्हेषमाणैश्च वाजिभिः । भेरीशङ्खनिनादैश्च स शब्दस्तुमुलोऽभवत् । २०००
नागाश्वकायान्निर्भिद्य लौहानि कवचानि च । पार्थस्य शरजालानि विनिष्पेतुः सहस्रशः ।
त्वरमाणः शरानस्यन् पाण्डवः प्रबभौ रणे । मध्यन्दिनगतोऽर्च्चिष्मान् शरदीव दिवाकरः ।
उपप्लवन्ति वित्रस्ता रथेभ्यो रथिनस्तथा । सादिनश्चाश्वपृष्ठेभ्यो भूमौ चैव पदातयः ।
शरैः संच्छिद्यमानानां कवचानां महात्मनां । ताम्रराजतलौहानाम्प्रादुरासीन्महास्वनः ।
छन्नमायोधनं सर्व्वं शरीरैर्गतचेतसां । गजाश्वसादिनां तत्र शितबाणात्तजीवितैः । २००५
रथोपस्थाभिपतितैरास्थिता मानवैर्म्मही । प्रनृत्यतीव सङ्ग्रामे चापहस्तो धनञ्जयः ।
श्रुत्वा गाण्डीवनिर्घोषं विस्फूर्जितमिवाशनेः । त्रस्तानि सर्व्वसैन्यानि व्यपागच्छन् महाहवात् ।
कुण्डलोष्णीषधारीणि जातरूपस्रजस्तथा । पतितानि स्म दृश्यन्ते शिरांसि रणमूर्द्धनि ।
विशिखोन्मथितैर्गात्रैर्ब्बाहुभिश्च सकार्मुकैः । सहस्ताभरणैश्चान्यैः प्रच्छन्ना भाति मेदिनी ।
शिरसां पात्यमानानामन्तरा निशितैः शरैः । अश्मवृष्टिरिवाकाशादभवद्भरतर्षभ । २०१०
दर्शयित्वा तथात्मानं रौद्रं रुद्रपराक्रमः । अवरुद्धोऽचरत्पार्थो वर्षाणि त्रिदशानि च ।
क्रोधाग्निमुत्सृजन् घोरो धार्त्तराष्ट्रेषु पाण्डवः । तस्य तद्दहतः सैन्यं दृष्ट्वा घोरं पराक्रमं ।
सर्व्वे शान्तिपरा भूत्वा धार्त्तराष्ट्रस्य पश्यतः । वित्रासयित्वा तत्सैन्यन्द्रावयित्वा महारथान् ।
अर्जुनो जयतां श्रेष्ठः पर्य्यवर्त्तत भारत । प्रावर्त्तयन्नदीं घोरां शोणितोदां तरङ्गिणीं ।
अस्थिशैवालसम्बाधां युगान्ते कालनिर्म्मितां । शरचापप्लवां घोरां केशशैवलशाद्वलां । २०१५
तनुत्रोष्णीषसम्बाधां नागकूर्म्मां महाद्विपां । मेदोवसासृक्प्रवहां महाभयविवर्द्धिनीं ।
रौद्ररूपां महाभीमां श्वापदैरभिनादितां । तीक्ष्णशस्त्रमहाग्राहां क्रव्यादगणसेवितां ।
मुक्ताहारोर्म्मिकलिलां चित्रालङ्कारबुद्बुदां । शरसङ्घमहावर्त्तां नागनक्रान्दुरत्ययां ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

महारथमहाद्वीपां शङ्खदुन्दुभिनिस्वनां । चकार च तदा पार्थो नदीं दुस्तरशोणितां ।
आददानस्य हि शरान् सन्धायच विमुञ्चतः । विकर्षतस्य गाण्डीवं न किञ्चिद्ददृशे जनः । २०२१
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि अर्ज्जुनसङ्कुलयुद्धे द्विषष्टोऽध्यायः ॥ ६२ ॥
॥ वैशम्पायन उवाच ॥ ततो दुर्य्योधनः कर्णो दुःशासनविविंशती । द्रोणश्च सह पुत्रेण कृपश्चापि महारथः ।
पुनर्य्ययुश्च संरब्धा धनञ्जयजिघांसवः । विष्फारयन्तश्चापानि बलवन्ति दृढानि च ।
तान्विकीर्णपताकेन रथेनादित्यवर्च्चसा । प्रत्युद्ययौ महाराज समन्ताद्वानरध्वजः ।
ततः कृपश्च कर्णश्च द्रोणश्च रथिनां वरः । तं महास्त्रैर्म्महावीर्य्यैः परिवार्य्य धनञ्जयं ।
शरौघान् सम्यगस्यन्तो जीमूता इव वार्षिकाः । ववर्षुः शरवर्षाणि पातयन्तो धनञ्जयं । २०२५
इषुभिर्ब्बहुभिस्तूर्णं समरे लोमवाहिभिः । अदूरात्पर्य्यवस्थाप्य पूरयामासुराहृताः ।
तथा तैरवकीर्णस्य दिव्यैरस्त्रैः समन्ततः । न तस्य द्व्यङ्गुलमपि विवृतं सम्प्रदृश्यते ।
ततः प्रहस्य बीभत्सुर्दिव्यमैन्द्रं महारथः । अस्त्रमादित्यसङ्काशं गाण्डीवे समयोजयन् ।
शररश्मिरिवादित्यः प्रतस्थे समरे बली । किरीटमाली कौन्तेयः सर्व्वान् प्रच्छादयन् कुरून् ।
यथा बलाहके विद्युत्पावको वा शिलोच्चये । तथा गाण्डीवमभवदिन्द्रायुधमिवाततं । २०३०
यथा वर्षति पर्ज्जन्ये विद्युद्विभ्राजते दिवि । द्योतयन्तो दिशः सर्व्वाः पृथिवीञ्च समन्ततः ।
तथा दश दिशः सर्व्वाः पतद्गाण्डीवमावृणोत् । नागाश्च रथिनः सर्व्वे मुमुहुस्तत्र भारत ।
सर्व्वे शान्तिपरा योधाः स्वचित्तानि न लेभिरे । सङ्ग्रामे विमुखाः सर्व्वे योधास्ते हतचेतसः ।
एवं सर्व्वाणि सैन्यानि भग्नानि भरतर्षभ । व्यद्रवन्त दिशः सर्व्वा निराशानि स्वजीविते ।
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि अर्ज्जुनसङ्कुलयुद्धे त्रिषष्टोऽध्यायः ॥ ६३ ॥
॥ वैशम्पायन उवाच ॥ ततः शान्तनवो भीष्मो भरतानां पितामहः । वध्यमानेषु योधेषु धनञ्जयमुपाद्रवत् । २०३५
प्रगृह्य कार्म्मुकश्रेष्ठं जातरूपपरिष्कृतं । शरानादाय तीक्ष्णाग्रान्मर्म्मभेदान्प्रमाथिनः ।
पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्द्धनि । शुशुभे स नरव्याघ्रो गिरिः सूर्य्योदये यथा ।
प्रध्माय शङ्खं गाङ्गेयो धार्त्तराष्ट्रान्प्रहर्षयन् । प्रदक्षिणमुपावृत्य बीभत्सुं समवारयत् ।
तमुदीक्ष्य समायान्तं कौन्तेयः परवीरहा । प्रत्यगृह्णात्प्रहृष्टात्मा धाराधरमिवाचलः ।
ततो भीष्मः शरानष्टौ ध्वजे पार्थस्य वीर्य्यवान् । समर्प्पयन्महावेगान् श्वसमानानिवोरगान् । २०४०
ते ध्वजं पाण्डुपुत्रस्य समासाद्य पतत्रिणः । ज्वलन्तं कपिमाजघ्नुः ध्वजाग्रनिलयांश्च तान् ।
ततो भल्लेन महता पृथुधारेण पाण्डवः । छत्रं चिच्छेद भीष्मस्य तूर्णं तदपतद्भुवि ।
ध्वजं चैवास्य कौन्तेयः शरैरभ्यहनद्भृशं । शीघ्रकृद्रथवाहांश्च तयोभौ पार्ष्णिसारथी ।
अमृष्यमाणस्तद्भीष्मो जानन्नपि स पाण्डवं । दिव्येनास्त्रेण महता धनञ्जयमवाकिरत् ।
तथैव पाण्डवो भीष्मे दिव्यमस्त्रमुदीरयन् । प्रत्यगृह्णादमेयात्मा महामेघमिवाचलः । २०४५
तयोस्तदभवद्युद्धं तुमुलं लोमहर्षणं । भीष्मस्य सह पार्थेन बलिवासवयोरिव ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding: KS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रेक्षन्ते कुरवः सर्व्वे योधाश्च सहसैनिकाः । भल्लैर्भल्लाः समागम्य भीष्मपाण्डवयोर्युधि ।
अन्तरीक्षे व्यराजन्त खद्योताः प्रावृषीव हि । अग्निचक्रमिवाविद्धं सव्यदक्षिणमस्यतः ।
गाण्डीवमभवद्राजन् पार्थस्य सृजतः शरान् । ततः संछादयामास भीष्मं शरशतैः शितैः ।
पर्व्वतं वारिधाराभिश्छादयन्निव तोयदः । तां स वेलामिवोद्भूतां शरवृष्टिं समुत्थितां । २०५०
व्यधमत्सायकैर्भीष्मः पाण्डवं समवारयत् । ततस्तानि निकृत्तानि शरजालानि भागशः ।
समरे च व्यशीर्य्यन्त फाल्गुनस्य रथं प्रति । ततः कनकपुङ्खानां शरवृष्टिं समुत्थितां ।
पाण्डवस्य रथात्तूर्णं शलभानामिवायतिं । व्यधमत्तां पुनस्तस्य भीष्मः शरशतैः शितैः ।
ततस्ते कुरवः सर्व्वे साधुसाध्विति चाब्रुवन् । दुष्करं कृतवान् भीष्मो यदर्जुनमयोधयत् ।
बलवांस्तरुणो दक्षः क्षिप्रकारी धनञ्जयः । कोऽन्यः समर्थः पार्थस्य वेगन्धारयितुं रणे । २०५५
ऋते शान्तनवात् भीष्मात् कृष्णाद्वा देवकीसुतात् । आचार्य्यप्रवराद्वापि भारद्वाजान्महाबलात् ।
अस्त्रैरस्त्राणि संवार्य्य क्रीडन्तौ भरतर्षभौ । चक्षूंषि सर्व्वभूतानां मोहयन्तौ महाबलौ ।
प्राजापत्यं तथैवैन्द्रमाग्नेयं रौद्रदारुणं । कौवेरं वारुणञ्चैव याम्यं वायव्यमेव च ।
प्रयुञ्जानौ महात्मानौ समरे तौ विचेरतुः । विस्मितान्यथ भूतानि तौ दृष्ट्वा संयुगे तदा ।
साधु पार्थ महाबाहो साधु भीष्मेति चाब्रुवन् । नायं युक्तो मनुष्येषु योऽयं संदृश्यते महान् । २०६०
महास्त्राणां सम्प्रयोगः समरे भीष्मपार्थयोः ।
॥ वैशम्पायन उवाच ॥ एवं सर्व्वास्त्रविदुषोरस्त्रयुद्धमवर्त्तत । अस्त्रयुद्धे तु निर्वृत्ते शरयुद्धमवर्त्तत ।
अथ जिष्णुरुपावृत्य क्षुरधारेण कार्म्मुकं । चकर्त्त भीष्मस्य तदा जातरूपपरिष्कृतं ।
निमेषान्तरमात्रेण भीष्मोऽन्यत्कार्म्मुकं रणे । समादाय महाबाहुः सज्यं चक्रे महारथः ।
शरांश्च सुबहून् क्रुद्धो मुमोचाशु धनञ्जये । अर्जुनोऽपि शरांस्तीक्ष्णान् भीष्माय निशितान् बहून् । २०६५
चिक्षेप सुमहातेजास्तथा भीष्मश्च पाण्डवे । तयोर्दिव्यास्त्रविदुषोरस्यतोर्निशिताञ्छरान् ।
न विशेषस्तदा राजन् लक्ष्यते स्म महात्मनोः । अथावृणोद्दशदिशः शरैरतिरथस्तदा ।
किरीटमाली कौन्तेयः शूरः शान्तनवस्तथा । अतीव पाण्डवो भीष्मं भीष्मश्चातीव पाण्डवं ।
बभूव तस्मिन् सङ्ग्रामे राजन् लोके तदद्भुतं । पाण्डवेन हताः शूरा भीष्मस्य रथरक्षिणः ।
शेरते स्म तदा राजन् कौन्तेयस्याभितो रथं । ततो गाण्डीवनिर्म्मुक्ता निरमित्रं चिकीर्षवः । २०७०
आगच्छन्पुङ्खसंश्लिष्टाः श्वेतवाहनपत्रिणः । निष्पतन्तो रथात्तस्य धौता हैरण्यवाससः ।
आकाशे समदृश्यन्त हंसानामिव पङ्क्तयः । तस्य तद्दिव्यमस्त्रं हि विगाढं चित्रमस्यतः ।
प्रेक्षन्ते स्मान्तरीक्षस्थाः सर्व्वे देवाः सवासवाः । तं दृष्ट्वा परमप्रीतो गन्धर्व्वश्चित्रमद्भुतं ।
शशंस देवराजाय चित्रसेनः प्रतापवान् । पश्येमान्पार्थनिर्म्मुक्तान्संसक्तानिव गच्छतः ।
चित्ररूपमिदञ्जिष्णोर्दिव्यमस्त्रमुदीर्य्यतः । नेदं मनुष्याः संदध्युर्न्नहीदं तेषु विद्यते । २०७५
पौराणानां महास्त्राणां विचित्रोऽयं समागमः । आददानस्य हि शरान् सन्धाय च विमुञ्चतः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

विकर्षतस्य गाण्डीवं नान्तरं समदृश्यत। मध्यन्दिनगतं सूर्य्यं प्रतपन्तमिवाम्बरे।
न शक्नुवन्ति सैन्यानि पाण्डवं प्रतिवीक्षितुं। तथैव भीष्मं गाङ्गेयं द्रष्टुं नोत्सहते जनः।
उभौ विश्रुतकर्म्माणावुभौ तीव्रपराक्रमौ। उभौ सदृशकर्म्माणावुभौ युधि सुदुर्ज्जयौ।
इत्युक्तो देवराजस्तु पार्थभीष्मसमागमं। पूजयामास दिव्येन पुष्पवर्षेण भारत। २०८०
ततः शन्तनवो भीष्मो वामं पार्श्वमताडयत्। पश्यतः प्रतिसन्धाय विध्यतः सव्यसाचिनः।
ततः प्रहस्य वीभत्सुः पृथुधारेण कार्म्मुकं। चिच्छेद गार्द्ध्रपत्रेण भीष्मस्यादित्यतेजसः।
अथैनं दशभिर्व्वाणैः प्रत्यविध्यत्स्तनान्तरे। यतमानं पराक्रान्तं कुन्तीपुत्रो धनञ्जयः।
स पीडितो महाबाहुर्गृहीत्वा रथकूवरं। गाङ्गेयो युद्धदुर्द्धर्षस्तस्थौ दीर्घमिवान्तरं।
तं विसंज्ञमपोवाह संयन्ता रथवाजिनां। उपदेशमनुस्मृत्य रक्षमाणो महारथं। २०८५
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि भीष्मापयाने चतुःषष्टोऽध्यायः ॥ ६४ ॥
॥ वैशम्पायन उवाच ॥ भीष्मे तु सङ्ग्रामशिरो विहाय पलायमाने धृतराष्ट्रपुत्त्रः। उत्सृज्य केतुं विनदन्महात्मा धनुर्व्विगृह्यार्ज्जुनमाससाद।
स भीमधन्वानमुदग्रवीर्य्यं धनञ्जयं शत्रुगणे चरन्तं। आकर्णपूर्णायतचोदितेन विव्याध भल्लेन ललाटमध्ये।
स तेन वाणेन समर्प्पितेन जाम्बूनदाग्रेण सुसंहितेन। रराज राजन् रजनीयकर्म्मा यथैकपर्व्वा रुचिरैकशृङ्गः।
अथास्य वाणेन विदारितस्य प्रादुर्व्वभूवासृगजस्रमुष्णं। स तस्य जाम्बूनदपुङ्खचित्रो भित्वा ललाटं सुविराजते स्म।
स तेन वाणाभिहतस्तरस्वी दुर्य्योधनेनोद्धतमन्युवेगः। शरानुपादाय विषाग्निकल्पान् विव्याध राजानमदीनसत्त्वः। २०९०
दुर्य्योधनश्चापि तमुग्रतेजाः पार्थश्च दुर्य्योधनमेकवीरः। अन्योऽन्यमाजौ पुरुषप्रवीरौ समौ समाजघ्नतुराजमीढौ।
ततः प्रभिन्नेन महागजेन महीधराभेन पुनर्व्विकर्णः। रथैश्चतुर्भिर्गजपादरक्षैः कुन्तीसुतं जिष्णुमथाभ्यधावत्।
तमापतन्तं त्वरितं गजेन्द्रं धनञ्जयः कुम्भविभागमध्ये। आकर्णपूर्णेन महायसेन वाणेन विव्याध महाजवेन।
पार्थेन सृष्टः स तु गार्द्ध्रपत्रः आपुङ्खदेशात् प्रविवेश नागं। विदार्य्य शैलप्रवरप्रकाशं यथाऽशनिः पर्व्वतमिन्द्रसृष्टः।
शरप्रतप्तः स तु नागराजः प्रवेपिताङ्गो व्यथितान्तरात्मा। संसीदमानो निपपात मह्यां वज्राहतं शृङ्गमिवाचलस्य। २०९५
निपातिते दन्तिवरे पृथिव्यां त्रासाद्विकर्णः सहसाऽवतीर्य्य। तूर्णं पदान्यष्टशतानि गत्वा विविंशतेः स्यन्दनमारुरोह।
निहत्य नागन्तु शरेण तेन वज्रोपमेनाद्रिवराम्बुदाभं। तथाविधेनैव शरेण पार्थो दुर्य्योधनं वक्षसि निर्व्विभेद।
ततो गजे राजनि चैव भिन्ने भग्ने विकर्णे च सपादरक्षे। गाण्डीवमुक्तैर्व्विशिखैः प्रणुन्नास्ते योधमुख्याः सहसाऽपजग्मुः।
दृष्ट्वैव पार्थेन हतञ्च नागं योधांश्च सर्व्वान् द्रवतो निशम्य। रथं समावृत्य कुरुप्रवीरो रणात्प्रदुद्राव यतो न पार्थः।
तं भीमरूपं त्वरितं द्रवन्तं दुर्य्योधनं शत्रुसहोऽभिषङ्गात्। प्रास्फोटयद्योद्धुमनाः किरीटी वाणेन विद्धं रुधिरं वमन्तं। २१००
॥ अर्ज्जुन उवाच ॥ विहाय कीर्त्तिं विपुलां यशश्च युद्धात्पराबृत्य पलायसे किं। न तेऽद्य तूर्य्याणि समाहतानि तथैव राज्यादवरोपितस्य।
युधिष्ठिरस्यास्मि निदेशकारी पार्थस्तृतीयो युधि संस्थितोऽस्मि। तदर्थमावृत्य मुखं प्रयच्छ नरेन्द्र वृत्तं स्मर धार्त्तराष्ट्र।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मोघं तवेदं भुवि नामधेयं दुर्य्योधनेतीह कृतं पुरस्तात्। नहीह दुर्य्योधनता तवास्ति पलायमानस्य रणं विहाय।
न ते पुरस्तादथ पृष्ठतो वा पश्यामि दुर्य्योधन रक्षितारं। अपेहि युद्धात्पुरुषप्रवीर प्राणान् प्रियान् पाण्डवतोऽद्य रक्ष।

इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि दुर्य्योधनपलायने पञ्चषष्टोऽध्यायः॥ ६५ ॥

॥ वैशम्पायन उवाच॥ आहूयमानस्तु स तेन संख्ये महात्मना वै धृतराष्ट्रपुत्रः। निवर्त्तितस्तस्य गिराङ्कुशेन महागजो
मत्त इवाङ्कुशेन। २१०५
सोऽमृष्यमाणो वचसाऽभिमृष्टो महारथेनातिरथस्तरस्वी। पर्य्याववर्त्ताथ रथेन वीरो भोगी यथा पादतलाभिमृष्टः।
तं प्रेक्ष्य कर्णः परिवर्त्तमानं निवर्त्य संस्तभ्य च विद्धगात्रं। दुर्य्योधनस्योत्तरतोऽभ्यगच्छत्पार्थं नृवीरो युधि हेममाली।
भीष्मस्ततः शान्तनवो विवृत्य हिरण्यकक्ष्यस्त्वरयाऽभिपत्ती। दुर्य्योधनं पश्चिमतोऽभ्यरक्षत्पार्थान्महाबाहुरधिज्यधन्वा।
द्रोणः कृपश्चैव विविंशतिश्च दुःशासनश्चैव विवृत्य शीघ्रं। सर्व्वे पुरस्ताद्विततेषुचापा दुर्य्योधनार्थं त्वरिताभ्युपेयुः।
स तान्यनीकानि निवर्त्तमानान्यालोक्य पूर्णौघनिभानि पार्थः। हंसो यथा मेघमिवापतन्तं धनञ्जयः प्रत्यपतत्तरस्वी। २११०
ते सर्व्वतः सम्परिवार्य्य पार्थं शस्त्राणि दिव्यानि समाददानाः। ववर्षुरभ्येत्य शरैः समन्तान्मेघा यथा भूधरमम्बुवेगैः।
ततोऽस्त्रमस्त्रेण निवार्य्य तेषां गाण्डीवधन्वा कुरुपुङ्गवानां। संमोहनं शत्रुहहोऽन्यदस्त्रं प्रादुश्चकारैन्द्रिरवारणीयं।
ततो दिशश्चानुदिशो विवृत्य शरैः सुधारैर्निशितैः सुपत्रैः। गाण्डीवघोषेण मनांसि तेषां महाबलः प्रव्यथयाञ्चकार।
ततः पुनर्भीमरवम्प्रगृह्य दोर्भ्यां महाशङ्खमुदारघोषं। व्यनादयत् स प्रदिशो दिशः खं भुवञ्च पार्थो द्विषतां निहन्ता।
ते शङ्खनादेन कुरुप्रवीराः संमोहिताः पार्थसमीरितेन। उत्सृज्य चापानि दुरासदानि सर्व्वे तदा शान्तिपरा बभूवुः। २११५
तथा विसंज्ञेषु बलेषु पार्थः स्मृत्वा च वाक्यानि तथोत्तरायाः। निर्य्याहि मध्यादिति मत्स्यपुत्त्रमुवाच यावत् कुरवो
विसंज्ञाः।
आचार्य्यशारद्वतयोः सुशुक्ले कर्णस्य पीतं रुचिरञ्च वस्त्रं। द्रौणेश्च राज्ञश्च तथैव नीले वस्त्रे समादत्स्व नरप्रवीर।
भीष्मस्य संज्ञान्तु तथैव मन्ये जानाति सोऽस्त्रप्रतिघातमेषः। एतस्य वाहान् कुरु सव्यतस्त्वमेवं हि यातव्यममूढसंज्ञैः।
रश्मीन्समुत्सृज्य ततो महात्मा रथादवप्लुत्य विराटपुत्त्रः। वस्त्राण्युपादाय महारथानां तूर्णं पुनः स्वं रथमारुरोह।
ततोऽन्वशासच्चतुरः सदश्वान् पुत्त्रो विराटस्य हिरण्यकक्षान्। ते तद्व्यतीयुर्ध्वजिनामनीकं श्वेता वहन्तोऽर्जुनमाजिमध्यात्। २१२०
तथाऽनुयान्तं पुरुषप्रवीरं भीष्मः शरैरभ्यहनत्तरस्वी। सचापि भीष्मस्य हयान्निहत्य विव्याध पार्थो दशभिः पृषत्कैः।
ततोऽर्जुनो भीष्ममपास्य युद्धे विश्वास्य यन्तारमरिष्टधन्वा। तस्थौ विमुक्तो रथवृन्दमध्याद्मेघं विदार्य्येव सहस्ररश्मिः।
लब्ध्वा हि संज्ञां तु कुरुप्रवीराः पार्थं निरीक्ष्याथ सुरेन्द्रकल्पं। रणे विमुक्तं स्थितमेकमाजौ स धार्त्तराष्ट्रस्त्वरितं बभाषे।
अयं कथं स्विद्भवतो विमुक्तस्तथा प्रमथ्नीत यथा न मुच्येत्। तमब्रवीत् शान्तनवः प्रहस्य क्व ते गता बुद्धिरभूत् क्व वीर्य्यं।
शान्तिं परां प्राप्य यदा स्थितोऽभूरुत्सृज्य वाणांश्च धनुर्व्विचित्रं। न त्वेष बीभत्सुरलं नृशंसं कर्त्तुं न पापेऽस्य मनो विशिष्टं। २१२५
त्रैलोक्यहेतोर्न्नजहेत्स्वधर्म्मं सर्व्वे न तस्मान्निहता रणेऽस्मिन्। क्षिप्रं कुरून् याहि कुरुप्रवीर विजित्य गाश्च प्रतियातु पार्थः।
मा ते स्वकोऽर्थो निपतेत मोहात्तत्त्वं विधातव्यमरिष्टवन्धं।
॥ वैशम्पायन उवाच ॥ दुर्य्योधनस्तस्य तु तन्निशम्य पितामहस्यात्महितं वचोऽथ। अतीतकामो युधि सोऽत्यमर्षी राजा विनि
श्वस्य बभूव तूष्णीं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

तङ्गीष्मवाक्यं हितमीक्ष्य सर्व्वे धनञ्जयाग्निञ्च विवर्द्धमानं। निवर्त्तनायैव मनो निदध्युर्दुर्य्योधनं ते परिरक्षमाणाः।
तान्प्रस्थितान् प्रीतमनाः स पार्थो धनञ्जयः प्रेक्ष्य कुरुप्रवीरान्। आभाषमाणोऽनुनयं मुहूर्त्तं वचोऽब्रवीत्सम्परिहृत्य भूयः। २१३०
पितामहं शान्तनवञ्च वृद्धं द्रोणं गुरुञ्च प्रणिपत्य मूर्द्ध्ना। द्रौणिं कृपञ्चैव कुरूंश्च मान्याञ्छरैर्व्विचित्रैरभिवाद्य चैव।
दुर्य्योधनस्योत्तमरत्नचित्रं चिच्छेद पार्थो मुकुटं शरेण। आमन्त्र्य वीरांश्च तथैव मान्यान् गाण्डीवघोषेण विनाद्य लोकान्।
स देवदत्तं सहसा विनाद्य विदार्य्य वीरो द्विषतां मनांसि। ध्वजेन सर्व्वानभिभूय शत्रून् सहेमजालेन विराजमानः।
दृष्ट्वा प्रयातांस्तु कुरून् किरीटी हृष्टोऽब्रवीत्तत्र स मत्स्यपुत्त्रं। आवर्त्तयाश्वान् पशवो जितास्ते याताः परे याहि पुरं प्रहृष्टः।
देवास्तु दृष्ट्वा महदद्भुतं तद्युद्धं कुरूणां सह फाल्गुनेन। जग्मुर्यथा स्वं भवनं प्रतीताः पार्थस्य कर्म्माणि विचिन्तयन्तः। २१३५

इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि अर्ज्जुनयुद्धनिवर्त्तने षडधिकषष्टोऽध्यायः॥ ६६॥

॥ वैशम्पायन उवाच॥ ततो विजित्य सङ्ग्रामे कुरून्स वृषभेक्षणः। समानयामास तदा विराटस्य धनं महत्।
गतेषु च प्रभग्नेषु धार्त्तराष्ट्रेषु सर्व्वशः। वनान्निष्क्रम्य गहनाद्बहवः कुरुसैनिकाः।
भयात्सन्त्रस्तमनसः समाजग्मुस्ततस्ततः। मुक्तकेशास्त्वदृश्यन्त स्थिताः प्राञ्जलयस्तदा।
क्षुत्पिपासापरिश्रान्ता विदेशस्था विचेतसः। ऊचुः प्रणम्य सम्भ्रान्ताः पार्थं किङ्करवाम ते।
॥ अर्ज्जुन उवाच॥ स्वस्ति व्रजत वो भद्रं न भेतव्यं कथञ्चन। नाहमार्त्तान् जिघांसामि भृशमाश्वासयामि वः। २१४०
॥ वैशम्पायन उवाच॥ तस्य तामभयां वाचं श्रुत्वा योधाः समागताः। आयुःकीर्त्तियशोदाभिस्तमाशीर्भिरनन्दयन्।
ततोऽर्जुनं नागमिव प्रभिन्नमुत्सृज्य शत्रून् विनिवर्त्तमानं। विराटराष्ट्राभिमुखं प्रयान्तं नाशक्नुवंस्तं कुरवोऽभियातुं।
ततः स तन्मेघमिवापतन्तं विद्राव्य पार्थः कुरुमेघसैन्यं। मत्स्यस्य पुत्त्रं द्विषतां निहन्ता वचोऽब्रवीत्संपरिरभ्य भूयः।
पितुः सकाशे तव तात सर्व्वे वसन्ति पार्था विदितास्तवैव। तान्मा प्रशंसेर्न्नगरं प्रविश्य भीतः प्रणश्येद्धि स मत्स्यराजः।
मया जिता सा ध्वजिनी कुरूणां मया च गावो विजिता द्विषद्भ्यः। पितुः सकाशं नगरं प्रविश्य त्वमात्मनः कर्म्म कृतं ब्रवीहि। २१४५
॥ उत्तर उवाच॥ यत्ते कृतं कर्म्म न पारणीयं तत्कर्म्म कर्त्तुं मम नास्ति शक्तिः। न त्वां प्रवक्ष्यामि पितुः सकाशे यावन्न मां वक्ष्यसि सव्यसाचिन्।
॥ वैशम्पायन उवाच॥ स शत्रुसेनामवजित्य जिष्णुराच्छिद्य सर्व्वञ्च धनं कुरुभ्यः। श्मशानमागत्य पुनः शमीं तामभ्येत्य तस्थौ शरविक्षताङ्गः।
ततः स वह्निप्रतिमो महाकपिः सहैव भूतैर्द्दिवमुत्पपात। तथैव माया विहिता बभूव ध्वजञ्च सैंहं युयुजे रथे पुनः।
विधाय तत्रायुधमाजिवर्द्धनं कुरूत्तमानामिषुधीः शरांस्तथा। प्रायात्स मत्स्यो नगरं प्रहृष्टः किरीटिना सारथिना महात्मना।
पार्थस्तु कृत्वा परमार्य्यकर्म्म निहत्य शत्रून् द्विषतां निहन्ता। चकार वेणीञ्च तथैव भूयो जग्राह रश्मीन् पुनरुत्तरस्य। २१५०
विवेश हृष्टो नगरं महात्मा बृहन्नलारूपमुपेत्य सारथिः।
॥ वैशम्पायन उवाच॥ ततो निवृत्ताः कुरवः प्रभग्ना वशमास्थिताः। हस्तिनापुरमुद्दिश्य सर्व्वे दीना ययुस्तदा।
पन्थानमुपसङ्गम्य फाल्गुनो वाक्यमब्रवीत्। राजपुत्त्र प्रत्यवेक्ष समानीतानि सर्व्वशः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

गोकुलानि महाबाहो वीर गोपालकैः सह । ततोऽपराह्णे यास्यामो विराटनगरं प्रति ।
आश्वास्य पाययित्वा च परिप्लाव्य च वाजिनः । गच्छन्तु त्वरितास्त्विमे गोपालाः प्रेषितास्त्वया । २१५५
नगरे प्रियमाख्यान्तु घोषयन्तु च ते जयं ।
॥ वैशम्पायन उवाच ॥ अथोत्तरस्त्वरमाणः स दूतानाज्ञापयद्वचनात्फाल्गुनस्य । आचक्षध्वं विजयं पार्थिवस्य भग्नाः परे विजिताश्चापि गावः ।
इत्येवं तौ भारतमत्स्यवीरौ संमन्त्र्य सङ्गम्य ततः शमीं तां । अभ्येत्य भूयो विजयेन तृप्तावुत्सृष्टमारोपयतां स्वभाण्डं ।
स शत्रुसेनामभिभूय सर्व्वामाच्छिद्य सर्व्वञ्च धनं कुरुभ्यः । वैराटिरायान्नगरं प्रतीतो बृहन्नलासारथिना प्रवीरः ।

इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि उत्तरागमने सप्तषष्टोऽध्यायः ॥ ६७ ॥

॥ वैशम्पायन उवाच ॥ धनं चापि विजित्याशु विराटो वाहिनीपतिः । विवेश नगरं हृष्टश्चतुर्भिः पाण्डवैः सह । २१६०
जित्वा त्रिगर्त्तान् सङ्ग्रामे गाश्चैवादाय सर्व्वशः । अशोभत महाराज सहपार्थैः श्रिया वृतः ।
तमासनगतं वीरं सुहृदां हर्षवर्द्धनं । उपासाञ्चक्रिरे सर्व्वे सह पार्थैः परन्तपाः ।
उपतस्थुः प्रकृतयः समस्ता ब्राह्मणैः सह । सभाजितः ससैन्यस्तु प्रतिनन्द्याथ मत्स्यराट् ।
विसर्ज्जयामास तदा द्विजांश्च प्रकृतीस्तथा । तथा स राजा मत्स्यानां विराटो वाहिनीपतिः ।
उत्तरं परिपप्रच्छ क यात इति चाब्रवीत् । आचख्युस्तस्य तत्सर्व्वाः स्त्रियः कन्याश्च वेश्मनि । २१६५
अन्तःपुरचराश्चैव कुरुभिर्गोधनं हृतं । विजेतुमभिसंरब्ध एक एवातिसाहसात् ।
बृहन्नलासहायश्च निर्गतः पृथिवीञ्जयः । उपायातानतिरथान् भीष्मं शान्तनवं कृपं ।
कर्णं दुर्य्योधनं द्रोणं द्रोणपुत्त्रञ्च षड्रथान् ।
॥ वैशम्पायन उवाच ॥ राजा विराटोऽथ भृशाभितप्तः श्रुत्वा सुतं त्वेकरथेन यातं । बृहन्नलासारथिमाजिवर्द्धनं प्रोवाच सर्व्वानथ मन्त्रिमुख्यान् ।
सर्व्वथा कुरवस्ते हि ये चान्ये वसुधाधिपाः । त्रिगर्त्तान्निःसृतान् श्रुत्वा न स्थास्यन्ति कदाचन । २१७०
तस्माद्गच्छन्तु मे योधा बलेन महता वृताः । उत्तरस्य परीप्सार्थं ये त्रिगर्त्तैरविक्षताः ।
हयांश्च नागांश्च रथांश्च शीघ्रं पदातिसङ्घांश्च ततः प्रवीरान् । प्रस्थापयामास सुतस्य हेतोर्व्विचित्रशस्त्राभरणोपपन्नान् ।
एवं स राजा मत्स्यानां विराटो वाहिनीपतिः । व्यादिदेशाथ तां क्षिप्रं वाहिनीं चतुरङ्गिणीं ।
कुमारमाशु जानीत यदि जीवति वा नवा । यस्य यन्ता गतः षण्डो मन्येऽहं स न जीवति ।
॥ वैशम्पायन उवाच ॥ तमब्रवीद्धर्म्मराजो विहस्य विराटराजं तु भृशाभितप्तं । बृहन्नलासारथिश्चेन्नरेन्द्र परे न नेष्यन्ति तवाद्य गास्ताः ।
सर्व्वान् महीपान्सहितान् कुरूंश्च तथैव देवासुरसिद्धयक्षान् । अलं विजेतुं समरे सुतस्ते स्वनुष्ठितः सारथिना हि तेन । २१७५
॥ वैशम्पायन उवाच ॥ अथोत्तरेण प्रहिता दूतास्ते शीघ्रगामिनः । विराटनगरं प्राप्य विजयं समवेदयन् ।
राज्ञस्तत्सर्व्वमाचख्यौ मन्त्री विजयमुत्तमं । पराजयं कुरूणाञ्चाप्युपायान्तं तथोत्तरं ।
सर्व्वा विनिर्ज्जिता गावः कुरवश्च पराजिताः । उत्तरः सह सूतेन कुशली च परन्तपः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ युधिष्ठिर उवाच ॥ दिष्ट्या विनिर्जिता गावः कुरवश्च पलायिताः। नाद्भुतं त्वेव मन्येऽहं यत्ते पुत्त्रोऽजयत् कुरून्। २१८०
ध्रुव एव जयस्तस्य यस्य यन्ता बृहन्नला।
॥ वैशम्पायन उवाच ॥ ततो विराटो नृपतिः सम्प्रहृष्टतनूरुहः। श्रुत्वा स विजयं तस्य कुमारस्यामितौजसः।
आच्छादयित्वा दूतांस्तान् मन्त्रिणः सोऽभ्यचोदयत्। राजमार्गाः क्रियन्तां मे पताकाभिरलङ्कृताः।
पुष्पोपहारैरर्च्यन्तां देवताश्चापि सर्व्वशः। कुमारा योधमुख्याश्च गणिकाश्च स्वलङ्कृताः।
वादित्राणि च सर्व्वाणि प्रत्युद्यान्तु सुतं मम। घण्टावान्मानवः शीघ्रं मत्तमारुह्य वारणं। २१८५
शृङ्गाटकेषु सर्व्वेषु समाख्यातु जयं मम। उत्तरा च कुमारीभिर्ब्बह्वीभिः परिवारिता।
शृङ्गारवेशाभरणा प्रत्युद्यातु सुतं मम।
॥ वैशम्पायन उवाच ॥ श्रुत्वा चेदं वचनं पार्थिवस्य सर्व्वं पुरं स्वस्तिकपाणि भूतं। भेर्य्यश्च तूर्य्याणि च वारिजाश्च वेशैः परार्द्ध्यैः प्रमदाः शुभाश्च।
तथैव सूतैः सह मागधैश्च नान्दीरवाद्याः पणवास्तूर्य्यवाद्याः। पुराद्विराटस्य महाबलस्य प्रत्युद्ययुः पुत्त्रमनन्तवीर्य्यं।
॥ वैशम्पायन उवाच ॥ प्रस्थाप्य सेनां कन्याश्च गणिकाश्च स्वलङ्कृताः। मत्स्यराजो महाप्राज्ञः प्रहृष्ट इदमब्रवीत्। २१९०
अक्षानाहर सैरिन्ध्रि कङ्क द्यूतं प्रवर्त्ततां। तं तथा वादिनं दृष्ट्वा पाण्डवः प्रत्यभाषत।
न देवितव्यं हृष्टेन कितवेनेति नः श्रुतं। तं त्वामद्य मुदायुक्तं नाहं देवितुमुत्सहे।
प्रियं तु ते चिकीर्षामि वर्त्ततां यदि मन्यसे।
॥ विराट उवाच ॥ स्त्रियो गावो हिरण्यञ्च यच्चान्यद्वसु किञ्चन। न मे किञ्चित्त्वु रक्ष्यन्ते अन्तरेणापि देवितुं।
॥ कङ्क उवाच ॥ किन्ते द्यूतेन राजेन्द्र बहुदोषेण मानद। देवने बहवो दोषास्तस्मात्तत्परिवर्जयेत्। २१९५
श्रुतस्ते यदि वा दृष्टः पाण्डवेयो युधिष्ठिरः। स राष्ट्रं सुमहत् स्फीतं भ्रातॄंश्च त्रिदशोपमान्।
राज्यं हारितवान् सर्व्वं तस्माद्द्यूतं न रोचये। अथ वा मन्यसे राजन् दीव्याम यदि रोचते।
॥ वैशम्पायन उवाच ॥ प्रवर्त्तमाने द्यूते तु मत्स्यः पाण्डवमब्रवीत्। पश्य पुत्त्रेण मे युद्धे तादृशाः कुरवो जिताः।
ततोऽब्रवीन्महात्मा स एनं राजा युधिष्ठिरः। बृहन्नला यस्य यन्ता कथं स न जयेत् युधि।
इत्युक्तः कुपितो राजा मत्स्यः पाण्डवमब्रवीत्। समं पुत्त्रेण मे षण्डं ब्रह्मबन्धो प्रशंससि। २२००
वाच्यावाच्यं न जानीषे नूनं मामवमन्यसे। भीष्मद्रोणमुखान् सर्व्वान् कस्मान्न स विजेष्यति।
वयस्यत्वात्तु ते ब्रह्मन्नपराधमिमं क्षमे। नेदृशं तु पुनर्व्वाच्यं यदि जीवितुमिच्छसि।
॥ युधिष्ठिर उवाच ॥ यत्र द्रोणस्तथा भीष्मो द्रौणिर्व्वैकर्त्तनः कृपः। दुर्य्योधनश्च राजेन्द्रस्तथाऽन्ये च महारथाः।
मरुद्गणैः परिवृतः साक्षादपि मरुत्पतिः। कोऽन्यो बृहन्नलायास्तान् प्रतियुध्येत सङ्गतान्।
यस्य बाहुबले तुल्यो न भूतो न भविष्यति। अतीव समरं दृष्ट्वा हर्षो यस्योपजायते। २२०५
यो जयेत्सहितान् सर्व्वान् ससुरासुरमानवान्। तादृशेन सहायेन कस्मात्स न विजेष्यते।
॥ विराट उवाच ॥ बहुशः प्रतिषिद्धोऽसि न च वाचं नियच्छसि। नियन्ता चेन्न विद्येत न कश्चिद्धर्म्ममाचरेत्।
॥ वैशम्पायन उवाच ॥ ततः प्रकुपितो राजा तमक्षेणाहनद्भृशं। मुखे युधिष्ठिरं कोपान्नैवमित्येव भर्त्सयन्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

बलवत्प्रतिविद्धस्य नस्तः शोणितमावहत् । तदप्राप्तं महीं पार्थः पाणिभ्यां प्रत्यगृह्लत ।
अवैक्षत स धर्म्मात्मा द्रौपदीं पार्श्वतः स्थितां । सा ज्ञात्वा तमभिप्रायं भर्त्तुश्चित्तवशानुगा । २२१०
पात्रं गृहीत्वा सौवर्णं जलपूर्णमनिन्दिता । तच्छोणितं प्रत्यगृह्लाद्यत्प्रसुस्राव नस्ततः ।
अथोत्तरः शुभैर्गन्धैर्म्माल्यैश्च विविधैस्तथा । अवकीर्य्यमाणः संहृष्टो नगरं स्वैरमागतः ।
सभाज्यमानः पौरैश्च स्त्रीभिर्ज्जानपदैस्तथा । आसाद्य भवनद्वारं पित्रे संप्रत्यवेदयत् ।
ततो द्वास्थः प्रविश्यैव विराटमिदमब्रवीत् । बृहन्नलासहायश्च पुत्त्रो द्वार्य्युत्तरः स्थितः ।
ततो हृष्टो मत्स्यराजः क्षत्तारमिदमब्रवीत् । प्रवेश्यतामुभौ तूर्णं दर्शनेप्सुरहं तयोः । २२१५
क्षत्तारं कुरुराजस्तु शनैः कर्णमुपाजपत् । उत्तरः प्रविशत्वेको न प्रवेश्या बृहन्नला ।
एतस्य हि महाबाहो व्रतमेतत्समाहितं । यो ममाङ्गे व्रणं कुर्य्याच्छोणितं वाऽपि दर्शयेत् ।
अन्यत्र सङ्ग्रामगतान्न स जीवेत्कथञ्चन । न मृष्याद्भृशसंक्रुद्धो मां दृष्ट्वा तु सशोणितं ।
विराटमिह सामात्यं हन्यात्सबलवाहनं ।
॥ वैशम्पायन उवाच ॥ ततो राज्ञः सुतो ज्येष्ठः प्राविशत् पृथिवीञ्जयः । सोऽभिवाद्य पितुः पादौ कङ्कञ्चाप्युपतिष्ठत । २२२०
ततो रुधिरसंयुक्तमनेकाग्रमनागसं । भूमावासीनमेकान्ते सैरिन्ध्र्या प्रत्युपस्थितं ।
ततः पप्रच्छ पितरं त्वरमाण इवोत्तरः । केनायं ताडितो राजन् केन पापमिदं कृतं ।
॥ विराट उवाच ॥ मयाऽयं ताडितो जिह्मो नचाप्येतावदर्हति । प्रशस्यमाने यत् शूरे त्वयि षण्ढं प्रशंसति ।
॥ उत्तर उवाच ॥ अकार्य्यं ते कृतं राजन् क्षिप्रमेव प्रसाद्यतां । मा त्वां ब्रह्मविषं घोरं समूलमिह निर्द्दहेत् ।
॥ वैशम्पायन उवाच ॥ स पुत्त्रस्य वचः श्रुत्वा विराटो राष्ट्रवर्द्धनः । क्षमयामास कौन्तेयं भस्मच्छन्नमिवानलं । २२२५
क्षमयन्तन्तु राजानं पाण्डवः प्रत्यभाषत । चिरं क्षान्तमिदं राजन्न मन्युर्व्विद्यते मम ।
यदि ह्येतत्पतेद्भूमौ रुधिरं मम नस्ततः । सराष्ट्रस्त्वं महाराज विनश्येथा न संशयः ।
न दूषयामि ते राजन् यद्वै हन्याददूषकं । बलवन्तं प्रभुं राजन क्षिप्रं दारुणमाप्नुयात् ।
॥ वैशम्पायन उवाच ॥ शोणिते तु व्यतिक्रान्ते प्रविवेश बृहन्नला । अभिवाद्य विराटन्तु कङ्कं चाप्युपतिष्ठत ।
क्षामयित्वा तु कौरव्यं रणादुत्तरमागतं । प्रशशंस ततो मत्स्यः शृण्वतः सव्यसाचिनः । २२३०
त्वया दायादवानस्मि कैकेयीनन्दिवर्द्धन । त्वया मे सदृशः पुत्त्रो न भूतो न भविष्यति ।
पदं पदसहस्रेण यश्चरन्नापराध्नुयात् । तेन कर्णेन ते तात कथमासीत्समागमः ।
मनुष्यलोके सकले यस्य तुल्यो न विद्यते । तेन भीष्मेण ते तात कथमासीत्समागमः ।
आचार्य्यो वृष्णिवीराणां कौरवाणाञ्च यो द्विजः । सर्व्वक्षत्त्रस्य चाचार्य्यः सर्व्वशस्त्रभृताम्वरः ।
तेन द्रोणेन ते तात कथमासीत्समागमः । आचार्य्यपुत्त्रो यः शूरः सर्व्वशस्त्रभृतामपि । २२३५
अश्वत्थामेति विख्यातस्तेनासीत्सङ्गरः कथं । रणे यं प्रेक्ष्य सीदन्ति हृतस्वा वणिजो यथा ।
कृपेण तेन ते तात कथमासीत्समागमः । पर्व्वतं योऽभिविध्येत राजपुत्त्रो महेषुभिः ।
दुर्य्योधनेन ते तात कथमासीत्समागमः । अवगाढा द्विषन्तो मे सुखो वातोऽभिवाति मां ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यत्त्वं धनमथाजैषीः कुरुभिर्ग्रस्तमाहवे । तेषां भयाभिपन्नानां सर्व्वेषां बलशालिनां ।
नूनं प्रकाल्य तान् सर्व्वांस्त्वया युधि नरर्षभ । आच्छिन्नं गोधनं सर्व्वं शार्दूलेनामिषं यथा । २२४०
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि विराटोत्तरसंवादे अष्टषष्टोऽध्यायः ॥ ६८॥
॥ उत्तर उवाच ॥ न मया निर्ज्जिता गावो न मया निर्ज्जिताः परे । कृतं तत्सकलं तेन देवपुत्त्रेण केनचित् ।
स हि भीतं द्रवन्तं मां देवपुत्त्रो न्यवारयत् । स चातिष्ठद्रथोपस्थे वज्रसन्नहनो युवा ।
तेन ते निर्ज्जिता गावः कुरवश्च पराजिताः । तस्य तत् कर्म्म वीरस्य न मया तात तत्कृतं ।
स हि शारद्वतं द्रोणं द्रोणपुत्त्रञ्च षड्रथान् । सूतपुत्त्रञ्च भीष्मञ्च चकार विमुखान् शरैः ।
दुर्य्योधनं विकर्णञ्च सनागमिव यूथपं । प्रभग्नमब्रवीद्भीतं राजपुत्त्रं महाबलः ।
न हास्तिनपुरे त्राणं तव पश्यामि किञ्चन । व्यायामेन परीप्सस्व जीवितं कौरवात्मज । २२४५
न मोक्ष्यसे पलायंस्त्वं राजन् युद्धे मनः कुरु । पृथिवीं भोक्ष्यसे जित्वा हतो वा स्वर्गमाप्स्यसि ।
स निवृत्तो नरव्याघ्रो मुञ्चन् वज्रनिभान् शरान् । सचिवैः संवृतो राजा रथे नाग इव श्वसन् ।
तं दृष्ट्वा रोमहर्षोऽभूदूरुकम्पश्च मारिष । स तत्र सिंहसङ्काशमनीकं व्यधमच्छरैः ।
तत्प्रणुद्य रथानीकं सिंहसंहननो युवा । कुरूंस्तान् प्रहसन् राजन् संस्थितान् हृतवाससः ।
एकेन तेन वीरेण षड्रथाः परिनिर्ज्जिताः । शार्दूलेनेव मत्तेन यथा वनचरा मृगाः । २२५०
॥ विराट उवाच ॥ क्व स वीरो महाबाहुर्द्देवपुत्त्रो महायशाः । यो मे धनमथाजैषीत् कुरुभिर्ग्रस्तमाहवे ।
इच्छामि तमहं द्रष्टुमर्च्चितुञ्च महाबलं । येन मे त्वञ्च गावश्च रक्षिता देवसूनुना ।
॥ उत्तर उवाच ॥ अन्तर्धानं गतस्तत्र देवपुत्त्रो महाबलः । स तु श्वो वा परश्वो वा मन्ये प्रादुर्भविष्यति ।
॥ वैशम्पायन उवाच ॥ एवमाख्यायमानन्तु च्छन्नं सत्रेण पाण्डवं । वसन्तं तत्र नाज्ञासीद्विराटो वाहिनीपतिः । २२५५
ततः पार्थोऽभ्यनुज्ञातो विराटेन महात्मना । प्रददौ तानि वासांसि विराटदुहितुः स्वयं ।
उत्तरा तु महार्हाणि विविधानि नवानि च । प्रतिगृह्याभवत्प्रीता तानि वासांसि भाविनी ।
मन्त्रयित्वा तु कौन्तेय उत्तरेण महात्मना । इति कर्त्तव्यतां सर्व्वां राजन् पार्थे युधिष्ठिरे ।
ततस्तथा तद्व्यदधाद्यथावत्पुरुषर्षभ । सह पुत्त्रेण मत्स्यस्य प्रहृष्टा भरतर्षभाः ।
इति श्रीमहाभारते विराटपर्व्वणि गोहरणपर्व्वणि विराटोत्तरसंवादे एकोनसप्ततितमोऽध्यायः समाप्तञ्च गोहरण पर्व्व ॥ ६९ ॥

॥ अथ वैवाहिकपर्व्व ॥ ४ ॥

॥ वैशम्पायन उवाच ॥ ततस्तृतीये दिवसे भ्रातरः पञ्च पाण्डवाः । स्नाताः शुक्लाम्बरधराः समये चरितव्रताः । २२६०
युधिष्ठिरं पुरस्कृत्य सर्व्वाभरणभूषिताः । द्वारि मत्ता यथा नागा भ्राजमाना महारथाः ।
विराटस्य सभां गत्वा भूमिपालासनेष्वथ । निषेदुः पावकप्रख्याः सर्व्वे धिष्ण्येष्विवाग्नयः ।
तेषु तत्रोपविष्टेषु विराटः पृथिवीपतिः । आजगाम सभां कर्त्तुं राजकार्य्याणि सर्व्वशः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

श्रीमतः पाण्डवान् दृष्ट्वा ज्वलतः पावकानिव । मुहूर्त्तमिव च ध्यात्वा सरोषः पृथिवीपतिः ।
अथ मत्स्योऽब्रवीत्कङ्कं देवरूपमवस्थितं । मरुद्गणैरुपासीनं त्रिदशानामिवेश्वरं । २२६५
स किलाचातिवापस्त्वं सभास्तारो मया वृतः । अथ राजासने कस्मादुपविष्टस्त्वलङ्कृतः ।
॥ वैशम्पायन उवाच ॥ परिहासेप्सया वाक्यं विराटस्य निशम्य तत् । स्मयमानोऽर्जुनो राजन्निदं वचनमब्रवीत् ।
॥ अर्जुन उवाच ॥ इन्द्रस्याप्यर्द्धासनं राजन्नयमारोढुमर्हति । ब्रह्मण्यः श्रुतवांस्त्यागी यज्ञशीलो दृढव्रतः ।
एष विग्रहवान् धर्म्म एष वीर्य्यवताम्वरः । एष बुद्ध्याऽधिको लोके तपसाञ्च परायणः ।
एषोऽस्त्रं विविधं वेत्ति त्रैलोक्ये सचराचरे । न चैवान्यः पुमान् वेत्ति न वेत्स्यति कदाचन । २२७०
नदेवा नासुराः केचिन्न मनुष्या न राक्षसाः । गन्धर्व्वयक्षप्रवराः सकिन्नरमहोरगाः ।
दीर्घदर्शी महातेजाः पौरजानपदप्रियः । पाण्डवानामतिरथो यज्वा धर्म्मपरो वशी ।
महर्षिकल्पो राजर्षिः सर्व्वलोकेषु विश्रुतः । बलवान् धृतिमान् दक्षः सत्यवादी जितेन्द्रियः ।
धनैश्च सञ्चयैश्चैव शक्रवैश्रवणोपमः । यथामनुर्म्महातेजा लोकानां परिरक्षिता ।
एवमेष महातेजाः प्रजानुग्रहकारकः । अयं कुरूणामृषभो धर्म्मराजो युधिष्ठिरः । २२७५
अस्य कीर्त्तिः स्थिता लोके सूर्य्यस्येवोद्यतः प्रभा । संसरन्ति दिशः सर्व्वा यशसोऽस्य द्रुतांशवः ।
उदितस्येव सूर्य्यस्य तेजसो नु गभस्तयः । एनं दशसहस्राणि कुञ्जराणां तरस्विनां ।
अन्वयुः पृष्ठतो राजन् यावदध्यावसत् कुरून् । त्रिंशदेवं सहस्राणि रथाः काञ्चनमालिनः ।
सदश्वैरुपसंपन्नाः पृष्ठतोऽनुययुस्तदा । एनमष्टशताः सूताः सुमृष्टमणिकुण्डलाः ।
अस्तुवन्मागधैः सार्द्धं पुरा शक्रमिवर्षयः । इमं नित्यमुपासन्त कुरवः किङ्करा यथा । २२८०
सर्व्वे च राजन् राजानो धनेश्वरमिवामराः । एष सर्व्वान् महीपालान् करदान्समकारयत् ।
वैश्यानिव महाभागो विवशान् स्ववशानपि । अष्टाशीतिसहस्राणि स्नातकानां महात्मनां ।
उपजीवन्ति राजानमेनं सुचरितव्रतं । एष वृद्धाननाथांश्च पङ्गूनन्धांश्च मानवान् ।
पुत्त्रवत्पालयामास प्रजा धर्म्मेण वै विभुः । एष धर्म्मे दमे चैव क्रोधे चापि जितव्रतः ।
महाप्रसादो ब्रह्मण्यः सत्यवादी च पार्थिवः । श्रीप्रतापेन चैतस्य तप्यते स सुयोधनः । २२८५
सगणः सह कर्णेन सौबलेनापि वा विभुः । न शक्यन्तेऽह्यस्य गुणाः प्रसङ्ख्यातुं नरेश्वर ।
एष धर्म्मपरो नित्यमानृशंस्यश्च पाण्डवः । एवमुक्तो महाराजः पाण्डवः पार्थिवर्षभः ।
कथं नार्हति राजार्हमासनं पृथिवीपते ।
इति श्रीमहाभारते विराटपर्व्वणि वैवाहिकपर्व्वणि पाण्डवप्रकाशे सप्ततितमोऽध्यायः ॥ ७० ॥
॥ विराट उवाच ॥ यद्येष राजा कौरव्यः कुन्तीपुत्त्रो युधिष्ठिरः । कतमोऽस्यार्जुनो भ्राता भीमश्च कतमो बली ।
नकुलः सहदेवो वा द्रौपदी वा यशस्विनी । यदा द्यूतजिताः पार्था न प्राज्ञायन्त ते क्वचित् । २२९०
॥ अर्जुन उवाच ॥ य एष बल्लवो ब्रूते सूदस्तव नराधिप । एष भीमो महाराज भीमवेगपराक्रमः ।
एष क्रोधवशान्हत्वा पर्व्वते गन्धमादने । सौगन्धिकानि दिव्यानि कृष्णार्थे समुपाहरत् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

गन्धर्व्व एष वै हन्ता कीचकानां दुरात्मनां। व्याघ्रानृक्षान्वराहांश्च हतवान्स्त्रीपुरे तत्र।
यश्चासीदश्वबन्धस्ते नकुलोऽयं परन्तपः। गोसङ्ख्यः सहदेवश्च माद्रीपुत्त्रौ महारथौ।
शृङ्गारवेशाभरणौ रूपवन्तौ यशस्विनौ। महारथसहस्राणां समर्थौ भरतर्षभौ। २२९५
एषा पद्मपलाशाक्षी सुमध्या चारुहासिनी। सैरिन्ध्री द्रौपदी राजन्यस्यार्थे कीचका हताः।
अर्जुनोऽहं महाराज व्यक्तं ते श्रोत्रमागतः। भीमादवरजः पार्थो यमाभ्यां चापि पूर्व्वजः।
उषिताः स्मो महाराज सुखं तव निवेशने। अज्ञातवासमुषिता गर्भवास इव प्रजाः।
॥ वैशम्पायन उवाच॥ यदाऽर्जुनेन ते वीराः कथिताः पञ्च पाण्डवाः। तदाऽर्जुनस्य वैराटिः कथयामास विक्रमं।
पुनरेव च तान् पार्थान् दर्शयामास चोत्तरः। २३००
॥ उत्तर उवाच॥ य एष जाम्बूनदशुद्धगौरतनुर्महान्सिंह इव प्रवृद्धः। प्रचण्डघोणः पृथुदीर्घनेत्रस्ताम्रायताक्षः कुरुराज एषः।
अयं पुनर्मत्तगजेन्द्रगामी प्रतप्तचामीकरशुद्धगौरः। पृथ्वायतांसो गुरुदीर्घबाहुर्वृकोदरः पश्यत पश्यतैनं।
यस्त्वेष पार्श्वेऽस्य महाधनुष्मान्श्यामो युवा वारणयूथपोपमः। सिंहोन्नतांसो गजराजगामी पद्मायताक्षोऽर्जुन एष वीरः।
राज्ञः समीपे पुरुषोत्तमौ तु यमाविमौ विष्णुमहेन्द्रकल्पौ। मनुष्यलोके सकले समोऽस्ति ययोर्न रूपेण बलेन शीले।
आभ्यान्तु पार्श्वे कनकोत्तमाङ्गी यैषा प्रभा मूर्त्तिमतीव गौरी। नीलोत्पलाभा सुरदेवतेव कृष्णा स्थिता मूर्त्तिमतीव लक्ष्मीः। २३०५
॥ वैशम्पायन उवाच॥ एवं निवेद्य तान् पार्थान् पाण्डवान् पञ्च भूपतेः। ततोऽर्जुनस्य वैराटिः कथयामास विक्रमं।
॥ उत्तर उवाच॥ अयं स द्विषतां हन्ता मृगाणामिव केशरी। अचरद्रथवृन्देषु निघ्नंस्तांस्तान् वरान् रथान्।
अनेन विद्धो मातङ्गो महानेकेषुणा हतः। सुवर्णकक्ष्यः सङ्ग्रामे दन्ताभ्यामगमन्महीं।
अनेन विजिता गावो जिताश्च कुरवो युधि। अस्य शङ्खप्रणादेन कर्णौ मे बधिरीकृतौ।
॥ वैशम्पायन उवाच॥ तस्य तद्वचनं श्रुत्वा मत्स्यराजः प्रतापवान्। उत्तरं प्रत्युवाचेममभिपन्नो युधिष्ठिरे। २३१०
प्रसादनं पाण्डवस्य प्राप्तकालं हि रोचये। उत्तराञ्च प्रयच्छामि पार्थाय यदि मन्यसे।
॥ उत्तर उवाच॥ आर्य्याः पूज्याश्च मान्याश्च प्राप्तकालं च मे मतं। पूज्यन्तां पूजनार्हाश्च महाभागाश्च पाण्डवाः।
॥ विराट उवाच॥ अहं खल्वपि सङ्ग्रामे शत्रूणां वशमागतः। मोचितो भीमसेनेन गावश्चापि जितास्तथा।
एतेषां बाहुवीर्य्येण अस्माकञ्च जयो मृधे। एवं सर्व्वे सहामात्याः कुन्तीपुत्त्रं युधिष्ठिरं।
प्रसादयामो भद्रन्ते सानुजं पाण्डवर्षभं। यदस्माभिरजानद्भिः किञ्चिदुक्तो नराधिप। २३१५
क्षन्तुमर्हति तत्सर्व्वं धर्म्मात्मा ह्येष पाण्डवः।
॥ वैशम्पायन उवाच॥ ततो विराटः प्रथमं प्रहृष्टः समेत्य राज्ञा समयञ्चकार। राज्यञ्च सर्व्वं विससर्ज तस्मै सदण्ड कोषं सपुरं महात्मा।
पाण्डवांश्च ततः सर्व्वान् मत्स्यराजः प्रतापवान्। धनञ्जयं पुरस्कृत्य दिष्ट्या दिष्ट्येति चाब्रवीत्।
समुपाघ्राय मूर्द्धानं संश्लिष्य च पुनःपुनः। युधिष्ठिरञ्च भीमञ्च माद्रीपुत्त्रौ च पाण्डवौ।
नातृप्यद्दर्शने तेषां विराटो वाहिनीपतिः। स प्रीयमाणो राजानं युधिष्ठिरमथाब्रवीत्। २३२०
दिष्ट्या भवन्तः सम्प्राप्ताः सर्व्वे कुशलिनो वनात्। दिष्ट्या सम्पालितं कृच्छ्रं अज्ञातं वै दुरात्मभिः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इदञ्च राज्यं पार्थाय यच्चान्यदपि किञ्चन। प्रतिगृह्णन्तु तत्सर्व्वं पाण्डवा अविशङ्कया।
उत्तरां प्रतिगृह्णातु सव्यसाची धनञ्जयः। अयं ह्यौपयिको भर्त्ता तस्याः पुरुषसत्तमः।
एवमुक्तो धर्म्मराजः पार्थमैक्षद्धनञ्जयं। ईक्षितश्चार्जुनो भ्रात्रा मत्स्यं वचनमब्रवीत्।
प्रतिगृह्णाम्यहं राजन् स्नुषां दुहितरं तव। युक्त एव हि सम्बन्धो मत्स्यभारतयोरपि। २२३५
इति श्रीमहाभारते विराटपर्व्वणि वैवाहिकपर्व्वणि उत्तराविवाहप्रस्तावे एकसप्ततोऽध्यायः ॥ ७१ ॥
॥ विराट उवाच ॥ किमर्थं पाण्डवश्रेष्ठ भार्य्यां दुहितरं मम। प्रतिग्रहीतुं नेमां त्वं मया दत्तामिहेच्छसि।
॥ अर्जुन उवाच ॥ अन्तःपुरेऽहमुषितः सदा पश्यन् सुतां तव। रहस्यञ्च प्रकाशञ्च विश्वस्ता पितृवन्मयि।
प्रियो बहुमतश्चासं नर्त्तको गीतकोविदः। आचार्य्यवच्च मां नित्यं मन्यते दुहिता तव।
वयःस्थया तया राजन् सह सम्वत्सरोषितः। अतिशङ्का भवेत् स्थाने तव लोकस्य वा विभो।
तस्मान्निमन्त्रयेऽहन्ते दुहितां मनुजाधिप। शुद्धो जितेन्द्रियो दान्तस्तस्याः शुद्धिः कृता मया। २२४०
स्नुषायां दुहितुश्चापि पुत्त्रे चात्मनि वा पुनः। अत्र शङ्कां न पश्यामि तेन शुद्धिर्भविष्यति।
अभिशापादहं भीतो मिथ्यावादात् परन्तप। स्नुषार्थमुत्तरां राजन् प्रतिगृह्णामि ते सुतां।
स्वस्त्रीयो वासुदेवस्य साक्षाद्देवशिशुर्यथा। दयितश्चक्रहस्तस्य बाल एवास्त्रकोविदः।
अभिमन्युर्महाबाहुः पुत्त्रो मम विशाम्पते। जामाता तव युक्तो वै भर्त्ता च दुहितुस्तव।
॥ विराट उवाच ॥ उपपन्नं कुरुश्रेष्ठे कुन्तीपुत्त्रे धनञ्जये। य एवं धर्म्मनित्यश्च जातज्ञानश्च पाण्डवः। २२४५
यत् कृत्यं मन्यसे पार्थ क्रियतां तदनन्तरं। सर्व्वे कामाः समृद्धाश्च सम्बन्धी यस्य मेऽर्जुनः।
॥ वैशम्पायन उवाच ॥ एवं ब्रुवति राजेन्द्रे कुन्तीपुत्त्रो युधिष्ठिरः। अन्वशासत् समं योगं समये मत्स्यपार्थयोः।
ततो मित्रेषु सर्व्वेषु वासुदेवे च भारत। प्रेषयामास कौन्तेयो विराटश्च महीपतिः।
ततस्त्रयोदशे वर्षे निवृत्ते पञ्च पाण्डवाः। उपप्लव्ये विराटस्य समपद्यन्त सर्व्वशः।
अभिमन्युञ्च बीभत्सुरानिनाय जनार्द्दनं। आनर्त्तेभ्योऽपि दाशार्हानानयामास पाण्डवः। २२५०
काशीराजश्च शैव्यश्च प्रीयमाणौ युधिष्ठिरे। अक्षौहिणीभ्यां सहितावागतौ पृथिवीपती।
अक्षौहिण्या च सहितो यज्ञसेनो महाबलः। द्रौपद्याश्च सुता वीरा शिखण्डी चापराजितः।
धृष्टद्युम्नश्च दुर्द्धर्षः सर्व्वशस्त्रभृताम्वरः। समस्ताक्षौहिणीपाला यज्वानो भूरिदक्षिणाः।
वेदाध्ययनसम्पन्नाः सर्वे शूरास्तनुत्यजः। तानागतानभिप्रेक्ष्य मत्स्यो धर्म्मभृताम्वरः।
पूजयामास विधिवत् सभृत्यबलवाहनान्। प्रीतोऽभवद्दुहितरं दत्त्वा तामभिमन्यवे। २२५५
ततः प्रत्युपयातेषु पार्थिवेषु ततस्ततः। तत्रागमद्वासुदेवो वनमाली हलायुधः।
कृतवर्म्मा च हार्दिक्यो युयुधानश्च सात्यकिः। अनाधृष्टिस्तथाऽक्रूरः शाम्बो निषठ एव च।
अभिमन्युमुपादाय सह मात्रा परन्तपाः। इन्द्रसेनादयश्चैव रथैस्तैः सुसमाहितैः।
आययुः सहिताः सर्व्वे परिसम्वत्सरोषिताः। दशनागसहस्राणि हयानाञ्च दशायुतं।
रथानामर्व्वुदं पूर्णं निखर्व्वञ्च पदातिनां। वृष्ण्यन्धकाश्च बहवो भोजाश्च परमौजसः। २२६०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant & Equipment Heritage Foundation, Jalgaon

अन्वयुर्वृष्णिशार्दूलं वासुदेवं महाद्युतिं । स्त्रियो रत्नानि वासांसि पृथक्पृथगनेकशः ।
ततो विवाहो विधिवद्ववृधे मत्स्यपार्थयोः । ततः शङ्खाश्च भेर्य्यश्च गोमुखाडम्बरास्तथा ।
पार्थैः संयुज्यमानस्य नेदुर्मत्स्यस्य वेश्मनि । उच्चावचान्मृगान् जघ्नुर्मेध्यांश्च शतशः पशून् ।
सुरामैरेयपानानि प्रभूतान्यभ्यहारयन् । गायनाख्यानशीलाश्च नटवैतालिकास्तथा ।
स्तुवन्तस्तानुपातिष्ठन् सूताश्च सह मागधैः । सुदेष्णाञ्च पुरस्कृत्य मत्स्यानाञ्च वरस्त्रियः । २२६५
आजग्मुश्चारुसर्व्वाङ्ग्यः सुमृष्टमणिकुण्डलाः । वर्णोपपन्नास्ता नार्य्यो रूपवत्यः स्वलङ्कृताः ।
सर्व्वाश्चाभ्यभवत्कृष्णा रूपेण यशसा श्रिया । परिवार्य्योत्तरां तास्तु राजपुत्त्रीमलङ्कृतां ।
सुतामिव महेन्द्रस्य पुरस्कृत्योपतस्थिरे । तां प्रत्यगृह्णात्कौन्तेयः सुतस्यार्थे धनञ्जयः ।
सौभद्रस्यानवद्याङ्गीं विराटतनयां तदा । तत्रातिष्ठन्महाराजो रूपमिन्द्रस्य धारयन् ।
स्नुषां तां प्रतिजग्राह कुन्तीपुत्त्रो युधिष्ठिरः । प्रतिगृह्य च तां पार्थः पुरस्कृत्य जनार्दनं । २२७०
विवाहं कारयामास सौभद्रस्य महात्मनः । तस्मै सप्तसहस्राणि हयानां वातरंहसां ।
द्वे च नागशते मुख्ये प्रादाद्बहुधनं तदा । हुत्वा सम्यक् समिद्धाग्निं अर्चयित्वा द्विजन्मनः ।
राज्यं बलञ्च कोषञ्च सर्व्वमात्मानमेव च । कृते विवाहे तु तदा धर्म्मपुत्त्रो युधिष्ठिरः ।
ब्राह्मणेभ्यो ददौ वित्तं यदुपाहरदच्युतः । गोसहस्राणि रत्नानि वस्त्राणि विविधानि च ।
भूषणानि च मुख्यानि यानानि शयनानि च । भोजनानि च हृद्यानि पानानि विविधानि च । २२७५
तन्महोत्सवसङ्काशं हृष्टपुष्टजनावृतं । नगरं मत्स्यराजस्य शुशुभे भरतर्षभ ।

इति श्रीमहाभारते विराटपर्व्वणि वैवाहिकपर्व्वणि उत्तराविवाहे द्विसप्ततोऽध्यायः समाप्तं वैवाहिकपर्व्व समाप्तञ्च विराटपर्व्व ॥ ७२ ॥

अत्र विराटपर्व्वणि अध्यायानां श्लोकानाञ्च व्यासोक्तसङ्ख्याऽधिकसङ्ख्या दृश्यते लिपिकरप्रमादात् कुत्रकुत्राधिक्यं तन्निश्चयो न भवतीति ॥

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

श्रीमहाभारतं

॥ उद्योगपर्व्व ॥

॥ श्रीगणेशाय नमः ॥ नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं। देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत्।
॥ वैशम्पायन उवाच ॥ कृत्वा विवाहन्तु कुरुप्रवीरास्तदाऽभिमन्योर्मुदिताः स्वपक्षाः। विश्रम्य रात्रावुषसि प्रतीताः सभां विराटस्य ततोऽभिजग्मुः।
सभा तु सा मत्स्यपतेः समृद्धा मणिप्रवेकोत्तमरत्नचित्रा। न्यस्तासना माल्यवती सुगन्धा तामभ्ययुस्ते नरराजवृद्धाः।
अथासनान्याविशतां पुरस्तादुभौ विराटद्रुपदौ नरेन्द्रौ। वृद्धाश्च मान्याः पृथिवीपतीनां पित्रा समं रामजनार्द्दनौ च।
पाञ्चालराजस्य समीपतस्तु शिनिप्रवीरः सहरौहिणेयः। मत्स्यस्य राज्ञस्तु सुसन्निकृष्टे जनार्दनश्चैव युधिष्ठिरश्च।
सुताश्च सर्व्वे द्रुपदस्य राज्ञो भीमार्जुनौ माद्रवतीसुतौ च। प्रद्युम्नशाम्बौ च युधि प्रवीरौ विराटपुत्त्रैश्च सहाभिमन्युः। ५
सर्व्वे च शूराः पितृभिः समाना वीर्य्येण रूपेण तथा बलेन। उपाविशन् द्रौपदेयाः कुमाराः सुवर्णचित्रेषु वरासनेषु।
तत्रोपविष्टेषु महारथेषु विभ्राजमानाभरणाम्बरेषु। रराज सा राजवती समृद्धा ग्रहैरिव द्यौर्व्विमलैरुपेता॥
ततः कथास्ते समवाययुक्ताः कृत्वा विचित्राः पुरुषप्रवीराः। तस्थुर्मुहूर्त्तं परिचिन्तयन्तः कृष्णं नृपास्ते समुदीक्षमाणाः।
कथान्तमासाद्य च माधवेन सङ्घट्टिताः पाण्डवकार्य्यहेतोः। ते राजसिंहाः सहिता ह्यश्रृण्वन्वाक्यं महार्थञ्च महोदयञ्च।
॥ श्रीकृष्ण उवाच ॥ सर्व्वैर्भवद्भिर्व्विदितं यथाऽयं युधिष्ठिरः सौबलेनाक्षवत्यां। जितो निकृत्याऽपहृतञ्च राज्यं वनप्रवासे समयः कृतश्च।
१०
शक्तैर्व्विजेतुं तरसा महीं च सत्ये स्थितैः सत्यरथैर्यथावत्। पाण्डोः सुतैस्तद्व्रतमुग्ररूपं वर्षाणि षट्सप्त च चीर्णमग्र्यैः।
त्रयोदशश्चैव सुदुस्तरोऽयमज्ञायमानैर्भवतां समीपे। क्लेशानसह्यान् विविधान् सहद्भिर्यथोदितं तद्विदितञ्च सर्व्वैः।
एतैः परप्रेष्यनियोगयुक्तैस्तीर्णो महद्भिः स्वबलेन राजन्। एवं गते धर्म्मसुतस्य राज्ञो दुर्य्योधनस्यापि च यद्धितं स्यात्।
तच्चिन्तयध्वं कुरुपाण्डवानां धर्म्म्यं च युक्तञ्च यशस्करञ्च। अधर्म्मयुक्तं नच कामयेत राज्यं सुराणामपि धर्म्मराजः।
धर्म्मार्थयुक्तन्तु महीपतित्वं ग्रामेऽपि कस्मिंश्चिदयं बुभूषेत्। पित्र्यं हि राज्यं विदितं नृपाणां यथाऽपकृष्टं धृतराष्ट्रपुत्त्रैः। १५
मिथ्योपचारेण यथाह्यनेन कृच्छ्रं महत्प्राप्तमसह्यरूपं। न चापि पार्थो विजितो रणे तैः स्वतेजसा धृतराष्ट्रस्य पुत्त्रैः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

तथाऽपि राजा सहितः सुहृद्भिरभीप्सतेऽनामयमेव तेषां। यत्तु स्वयं पाण्डुसुतैर्व्विजित्य समाहृतं भूमिपतीन् निपीड्य।
तत्प्रार्थयन्ते पुरुषप्रवीराः कुन्तीसुता माद्रवतीसुतौ च। बालास्त्विमे तैर्व्विविधैरुपायैः संप्रार्थिता हन्तुममित्रसङ्घैः।
राज्यं जिहीर्षद्भिरसद्भिरुग्रैः सर्व्वं च तद्वो विदितं यथावत्। तेषाञ्च लोभं प्रसमीक्ष्य वृद्धं धर्म्मज्ञतां चापि युधिष्ठिरस्य।
सम्बन्धितां चापि समीक्ष्य तेषां मतिं कुरुध्वं सहिताः पृथक् च। इमे च सत्येऽभिरताः सदैव तं पालयित्वा समयं यथावत्।
२०
अतोऽन्यथा तैरुपचर्य्यमाणा हन्युः समेतान् धृतराष्ट्रपुत्त्रान्। तैर्व्विप्रकारञ्च निशम्य कार्य्ये सुहृज्जनास्तान्परिवारयेरन्।
युद्धेन बाधेयुरिमांस्तथैव तैर्बध्यमाना युधि तांश्च हन्युः। अथाऽपि नेमेऽल्पतया समर्थास्तेषां जयायेति भवेन्मतं वः।
समेत्य सर्व्वे सहिताः सुहृद्भिस्तेषां विनाशाय यतेयुरेव। दुर्य्योधनस्यापि मतं यथावन्न ज्ञायते किन्नु करिष्यतीति।
अज्ञायमाने च मते परस्य किं स्यात् समारभ्यतमं मतं वः। तस्मादितो गच्छतु धर्म्मशीलः शुचिः कुलीनः पुरुषोऽप्रमत्तः।
दूतः समर्थः प्रशमाय तेषां राज्यार्द्धदानाय युधिष्ठिरस्य। निशम्य वाक्यं तु जनार्दनस्य धर्म्मार्थयुक्तं मधुरं समञ्च। २५
समाददे वाक्यमथाग्रजोऽस्य सम्पूज्य वाक्यं तदतीव राजन्।

इति श्रीमहाभारते उद्योगपर्व्वणि सेनोद्योगपर्व्वणि पुरोहितयाने प्रथमोऽध्यायः ॥ १ ॥

॥ बलदेव उवाच ॥ श्रुतं भवद्भिर्गदपूर्व्वजस्य वाक्यं यथा धर्म्मवदर्थवच्च। अजातशत्रोश्च हितं हितञ्च दुर्य्योधनस्यापि तथैव राज्ञः।
अर्द्धं हि राज्यस्य विसृज्य वीराः कुन्तीसुतास्तस्य कृते यतन्ते। प्रदाय चार्द्धं धृतराष्ट्रपुत्त्रः सुखी सहास्माभिरतीव मोदेत्।
लब्ध्वा हि राज्यं पुरुषप्रवीराः सम्यक् प्रवृत्तेषु परेषु चैव। ध्रुवं प्रशान्ताः सुखमाविशेयुस्तेषां प्रशान्तिश्च हितं प्रजानां।
दुर्य्योधनस्यापि मतञ्च वेत्तुं वक्तुं च वाक्यानि युधिष्ठिरस्य। प्रियं मम स्याद्यदि चात्र कश्चिद्व्रजेत्शमार्थं कुरुपाण्डवानां। ३०
स भीष्ममामन्त्र्य कुरुप्रवीरं वैचित्रवीर्य्यञ्च महानुभावं। द्रोणं सपुत्त्रं विदुरं कृपञ्च गान्धारराजञ्च ससूतपुत्त्रं।
सर्व्वे च येऽन्ये धृतराष्ट्रपुत्त्रा बलप्रधाना निगमप्रधानाः। स्थिताश्च धर्म्मेषु यथा स्वकेषु लोकप्रवीराः श्रुतकालवृत्ताः।
एतेषु सर्व्वेषु समागतेषु पौरेषु वृद्धेषु च सङ्गतेषु। ब्रवीतु वाक्यं प्रणिपातयुक्तं कुन्तीसुतस्यार्थकरं यथा स्यात्।
सर्व्वास्ववस्थासु च ते न कोप्या ग्रस्तो हि सोऽर्थो बलमाश्रितैस्तैः। प्रियाभ्युपेतस्य युधिष्ठिरस्य द्यूते प्रमत्तस्य हृतं स्वराज्यं।
निवार्य्यमाणश्च कुरुप्रवीरैः सर्व्वैः सुहृद्भिर्ह्ययमप्यतज्ज्ञः। गान्धारराजस्य सुतं मताक्षं समाह्वयद्देवितुमाजमीढः। ३५
दुरोदरास्तत्र सहस्रशोऽन्ये युधिष्ठिरो यान्विषहेत जेतुं। उत्सृज्य तान् सौबलमेव चायं समाह्वयन्तेन जितोऽक्षवत्यां।
स दीव्यमानः प्रतिदीव्यदेनं अक्षेषु नित्यं तु पराङ्मुखेषु। संरम्भमाणो विजितः प्रसह्य तत्रापराधः शकुनेर्न कश्चित्।
तस्मात्प्रणम्यैव वचो ब्रवीतु वैचित्रवीर्य्यं बहुसामयुक्तं। तथा हि शक्यो धृतराष्ट्रपुत्त्रः स्वार्थे नियोक्तुं पुरुषेण तेन।
अयुद्धमाकाङ्क्षत कौरवाणां साम्नैव दुर्य्योधनमाह्वयध्वं। साम्ना जितोऽर्थोऽर्थकरो भवेत युद्धेन यो भविता नेह सोऽर्थः।
॥ वैशम्पायन उवाच ॥ एवं ब्रुवत्येव मधुप्रवीरे शिनिप्रवीरः सहसोत्पपात। तच्चापि वाक्यं परिनिन्द्य तस्य समाददे वाक्यमिदं समन्युः। ४०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यादृशः पुरुषस्यात्मा तादृशं सम्प्रभाषते। यथारूपोऽन्तरात्मा ते तथा रूपं प्रभाषसे।
सन्ति वै पुरुषाः शूराः सन्ति कापुरुषास्तथा। उभाविमौ दृढौ पक्षौ दृश्येते पुरुषान्प्रति।
एकस्मिन्नेव जायेते कुले क्लीवमहाबलौ। फलाफलवती शाखे यथैकस्मिन् वनस्पतौ।
नाभ्यसूयामि ते वाक्यं ब्रुवतो लाङ्गलध्वज। ये तु शृण्वन्ति ते वाक्यं तानसूयामि माधव।
कथं हि धर्मराजस्य दोषमल्पमपि ब्रुवन्। लभते परिषन्मध्ये व्याहर्तुमकुतोभयः। ४५
समाहूय महात्मानं जितवन्तोऽक्षकोविदाः। अनक्षज्ञं यथाश्रद्धं तेषु धर्मजयः कुतः।
यदि कुन्तीसुतं गेहे क्रीडन्तं भ्रातृभिः सह। अभिगम्य जयेयुस्ते तत्तेषां धर्मतो भवेत्।
समाहूय तु कौन्तेयं क्षत्रधर्मरतं सदा। निकृत्या जितवन्तस्ते किन्नु तेषां परं शुभं।
कथं प्रणिपतेच्चायमिह कृत्वा पणं परं। वनवासाद्विमुक्तस्तु प्राप्तः पैतामहं पदं।
यद्ययं परवित्तानि कामयेत युधिष्ठिरः। एवमप्ययमत्यन्तं परं नार्हति याचितुं। ५०
कथञ्च धर्मयुक्तास्ते न च राज्यं जिहीर्षवः। निवृत्तवासान् कौन्तेयान् यआहुर्विदिता इति।
अनुनीता हि भीष्मेण द्रोणेन च महात्मना। न व्यवस्यन्ति पाण्डूनां प्रदातुं पैतृकं पदं।
अहन्तु तां शितैर्बाणैरनुनीय रणे बलात्। पादयोः पातयिष्यामि कौन्तेयस्य महात्मनः।
अथ ते न व्यवस्यन्ति प्रणिपाताय धीमतः। गमिष्यन्ति सहामात्या यमस्य सदनं प्रति।
न हि ते युयुधानस्य संरब्धस्य युयुत्सतः। वेगं समर्थाः संसोढुं वज्रस्येव महीधराः। ५५
को हि गाण्डीवधन्वानं कश्च चक्रायुधं युधि। माञ्चापि विषहेत् को नु कश्च भीमं दुरासदं।
यमौ च दृढधन्वानौ यमकालोपमद्युती। को जिजीविषुरासीदेद्धृष्टद्युम्नञ्च पार्षतं।
पञ्चेमान्पाण्डवेयांस्तु द्रौपद्याः कीर्त्तिवर्द्धनान्। समप्रमाणान् पाण्डूनां समवीर्य्यान् मदोत्कटान्।
सौभद्रञ्च महेष्वासममरैरपि दुःसहं। गदप्रद्युम्नशाम्बांश्च कालवज्रानलोपमान्।
ते वयं धृतराष्ट्रस्य पुत्रं शकुनिना सह। कर्णेन तु निहत्याजावभिषेक्ष्याम पाण्डवं। ६०
नाधर्म्मो विद्यते कश्चिच्छत्रून्हत्वाततायिनः। अधर्म्म्यमयशस्यञ्च शात्रवाणां प्रयाचनं।
हृद्गतस्तस्य यः कामस्तं कुरुध्वमतन्द्रिताः। विसृष्टं धृतराष्ट्रेण राज्यं प्राप्नोतु पाण्डवः।
अद्य पाण्डुसुतो राज्यं लभतां वा युधिष्ठिरः। निहता वा मया सर्व्वे शेष्यन्ति वसुधातले।
इति श्रीमहाभारते उद्योगपर्व्वणि सैन्योद्योगपर्व्वणि सात्यकिक्रोधवाक्ये द्वितीयोऽध्यायः ॥ २ ॥
॥ द्रुपद उवाच॥ एवमेतन्महाबाहो भविष्यति न संशयः। न हि दुर्य्योधनो राज्यं मधुरेण प्रदास्यति।
अनुवर्त्स्यति तञ्चापि धृतराष्ट्रः सुतप्रियः। भीष्मद्रोणौ च कार्पण्यात् मौर्ख्याद्राधेयसौबलौ। ६५
बलदेवस्य वाक्यन्तु मम ज्ञाने न युज्यते। एतद्धि पुरुषेणाग्रे कार्य्यं सुनयमिच्छता।
न तु वाच्यो मृदुवचो धार्त्तराष्ट्रः कथञ्चन। न हि मार्दवसाध्योऽसौ पापबुद्धिर्मतो मम।
मार्दवं गर्दभे कुर्य्याद्गोषु तीक्ष्णं समाचरेत्। मृदु दुर्य्योधने वाक्यं यो ब्रूयात्पापचेतसि।
मृदुं वै मन्यते पापो भाषमाणमशक्तिकं। जितमर्थं विजानीयादबुधो मार्दवे सति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri, Sarayu Trust. Funding IKS MoE Grant 2 Equipment Heritage Foundation, Jalgaon

एतच्चैव करिष्यामो यत्नश्च क्रियतामिह । प्रस्थापयामो मित्रेभ्यो बलान्युद्योजयन्तु नः ।
शल्यस्य धृष्टकेतोश्च जयत्सेनस्य वा विभो । कैकेयानाञ्च सर्व्वेषां दूता गच्छन्तु शीघ्रगाः ।
स च दुर्य्योधनो नूनं प्रेरयिष्यति सर्व्वशः । पूर्व्वाभिपन्नाः सन्तश्च भजन्ते पूर्व्वचोदनं ।
तत्त्वरध्वं नरेन्द्राणां पूर्व्वमेव प्रचोदने । महद्धि कार्य्यं वोढव्यमिति मे वर्त्तते मतिः ।
शल्यस्य प्रेष्यतां शीघ्रं ये च तस्यानुगा नृपा । भगदत्ताय राज्ञे च पूर्व्वसागरवासिने ।
अमितौजसे तथोग्राय हार्द्दिक्यायाहुकाय च । दीर्घप्रज्ञाय शूराय रोचमानाय वा विभो ।
आनीयतां बृहन्तश्च सेनाबिन्दुश्च पार्थिवः । सेनजित्प्रतिविन्ध्यश्च चित्रवर्मा सुवास्तुकः ।
वाह्लीको मुञ्जकेशश्च चैद्याधिपतिरेव च । सुपार्श्वश्च सुबाहुश्च पौरवश्च महारथः ।
शकानां पह्लवानाञ्च दरदानाञ्च ये नृपाः । सुरारिश्च नदीजश्च कर्णवेष्टश्च पार्थिवः ।
नीलश्च वीरधर्म्मा च भूमिपालश्च वीर्य्यवान् । दुर्जयो दन्तवक्रश्च रुक्मी च जनमेजयः ।
आषाढो वायुवेगश्च पूर्व्वपाली च पार्थिवः । भूरितेजा देवकश्च एकलव्यः सहात्मजैः ।
कारूषकाश्च राजानः क्षेमधूर्त्तिश्च वीर्य्यवान् । काम्बोजा ऋषिका ये च पश्चिमानूपकाश्च ये ।
जयत्सेनश्च काश्यश्च तथा पञ्चनदा नृपाः । क्राथपुत्त्रश्च दुर्द्धर्षः पार्व्वतीयाश्च ये नृपाः ।
जानकिश्च सुशर्म्मा च मणिमान्पोतिमत्स्यकः । पांशुराष्ट्राधिपश्चैव धृष्टकेतुश्च वीर्य्यवान् ।
पौण्ड्रश्च दण्डधारश्च बृहत्सेनश्च वीर्य्यवान् । अपराजितो निषादश्च श्रेणिमान्वसुमानपि ।
बृहद्बलो महौजाश्च बाहुः परपुरञ्जयः । समुद्रसेनो राजा च सह पुत्त्रेण वीर्य्यवान् ।
उद्भवः क्षेमकश्चैव वाटधानश्च पार्थिवः । श्रुतायुश्च दृढायुश्च शाल्वपुत्त्रश्च वीर्य्यवान् ।
कुमारश्च कलिङ्गानामीश्वरो युद्धदुर्म्मदः । एतेषां प्रेष्यतां शीघ्रमेतद्धि मम रोचते ।
अयञ्च ब्राह्मणो विद्वान् मम राजन् पुरोहितः । प्रेष्यतां धृतराष्ट्राय वाक्यमस्मै प्रदीयतां ।
यथा दुर्य्योधनो वाच्यो यथा शान्तनवो नृपः । धृतराष्ट्रो यथा वाच्यो द्रोणश्च रथिनां वरः ।
इति श्रीमहाभारते उद्योगपर्व्वणि सेनोद्योगपर्व्वणि पुरोहितयाने तृतीयोऽध्यायः ॥ ३ ॥
॥ वासुदेव उवाच ॥ उपपन्नमिदं वाक्यं सोमकानां धुरन्धरे । अर्थसिद्धिकरं राज्ञः पाण्डवस्यामितौजसः ।
एतच्च पूर्व्वकार्य्यं नः सुनीतमभिकाङ्क्षतां । अन्यथा ह्याचरन् कर्म्म पुरुषः स्यात् सुबालिशः ।
किन्तु सम्बन्धकं तुल्यमस्माकं कुरुपाण्डुषु । यथेष्टं वर्त्तमानेषु पाण्डवेषु च तेषु च ।
ते विवाहार्थमानीता वयं सर्व्वे तथा भवान् । कृते विवाहे मुदिता गमिष्यामो गृहान् प्रति ।
भवान् वृद्धतमो राज्ञां वयसा च श्रुतेन च । शिष्यवत्ते वयं सर्व्वे भवामेह न संशयः ।
भवन्तं धृतराष्ट्रस्च सततं बहु मन्यते । आचार्य्ययोः सखा चासि द्रोणस्य च कृपस्य च ।
स भवान् प्रेषयत्वद्य पाण्डवार्थकरं वचः । सर्व्वेषां निश्चितं तन्नः प्रेषयिष्यति यद्भवान् ।
यदि तावच्छमं कुर्य्यात् न्यायेन कुरुपुङ्गवः । न भवेत् कुरुपाण्डूनां सौभ्रात्रेण महान् क्षयः ।
अथ दर्पान्वितो मोहान्नकुर्य्याद्धृतराष्ट्रजः । अन्येषां प्रेषयित्वा च पश्चादस्मान् समाह्वयेः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ततो दुर्य्योधनो मन्दः सहामात्यः सबान्धवः । निष्ठामापत्स्यते मूढः क्रुद्धे गाण्डीवधन्वनि ।
॥ वैशम्पायन उवाच ॥ ततः सत्कृत्य वार्ष्णेयं विराटः पृथिवीपतिः । गृहान्प्रस्थापयामास सगणं सहबान्धवं । १००
द्वारकान्तु गते कृष्णे युधिष्ठिरपुरोगमाः । चक्रुः साङ्ग्रामिकं सर्व्वं विराटस्य महीपतिः ।
ततः सम्प्रेषयामास विराटः सह बान्धवैः । सर्व्वेषां भूमिपालानां द्रुपदस्य महीपतिः ।
वचनात् कुरुसिंहानां मत्स्यपाञ्चालयोश्च ते । समाजग्मुर्महीपालाः सम्प्रहृष्टा महाबलाः ।
तच्छ्रुत्वा पाण्डुपुत्त्राणां समागच्छन्महद्बलं । धृतराष्ट्रसुताश्चापि समानिन्युर्महीपतीन् ।
समाकुला मही राजन् कुरुपाण्डवकारणात् । तदा समभवत्कृत्स्ना सम्प्रयाणे महीचितां । १०५
सङ्कुला च तदा भूमिश्चतुरङ्गबलान्विता । बलानि तेषां वीराणामागच्छन्ति ततस्ततः ।
चालयन्तीव गां देवीं सपर्व्वतवनामिमां । ततः प्रज्ञावयोवृद्धं पाञ्चाल्यः स्वपुरोहितं ।
कुरुभ्यः प्रेषयामास युधिष्ठिरमते स्थितः ।
इति श्रीमहाभारते उद्योगपर्व्वणि सेनोद्योगपर्व्वणि पाञ्चाल्यपुरोहितयाने चतुर्थोऽध्यायः ॥ ४ ॥
॥ द्रुपद उवाच ॥ भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः । बुद्धिमत्सु नराः श्रेष्ठा नरेष्वपि द्विजातयः ।
द्विजेषु वैद्याः श्रेयांसो वैद्येषु कृतबुद्धयः । कृतबुद्धिषु कर्त्तारः कर्त्तृषु ब्रह्मवेदिनः । ११०
स भवान् कृतबुद्धीनां प्रधान इति मे मतिः । कुलेन च विशिष्टोऽसि वयसा च श्रुतेन च ।
प्रज्ञया सदृशश्चासि शुक्रेणाङ्गिरसेन च । विदितश्चापि ते सर्व्वं यथावृत्तः स कौरवः ।
पाण्डवश्च यथावृत्तः कुन्तीपुत्त्रो युधिष्ठिरः । धृतराष्ट्रस्य विदिते वञ्चिताः पाण्डवाः परैः ।
विदुरेणानुनीतोऽपि पुत्त्रमेवानुवर्त्तते । शकुनिर्बुद्धिपूर्व्वं हि कुन्तीपुत्त्रं समाह्वयत् ।
अनक्षज्ञं मताक्षः सन् क्षत्त्रवृत्ते स्थितं शुचिं । ते तथा वञ्चयित्वा तु धर्म्मराजं युधिष्ठिरं । ११५
न कस्याञ्चिदवस्थायां राज्यं दास्यन्ति वै स्वयं । भवांस्तु धर्म्मसंयुक्तं धृतराष्ट्रं ब्रुवन्वचः ।
मनांसि तस्य योधानां ध्रुवमावर्त्तयिष्यति । विदुरश्चापि तद्वाक्यं साधयिष्यति तावकं ।
भीष्मद्रोणकृपादीनां भेदं संजनयिष्यति । अमात्येषु च भिन्नेषु योधेषु विमुखेषु च ।
पुनरेकत्रकरणं तेषां कर्म्म भविष्यति । एतस्मिन्नन्तरे पार्थाः सुखमेकाग्रबुद्धयः ।
सेनाकर्म्म करिष्यन्ति द्रव्याणां चैव सञ्चयं । भिद्यमानेषु च स्वेषु लम्बमाने तथा त्वयि । १२०
न तथा ते करिष्यन्ति सेनाकर्म्म न संशयः । एतत्प्रयोजनं चात्र प्राधान्येनोपलभ्यते ।
सङ्गत्या धृतराष्ट्रस्य कुर्य्याद्धर्म्म्यं वचस्तव । स भवान् धर्म्मयुक्तस्य धर्म्म्यं तेषु समाचरन् ।
कृपालुषु परिक्लेशान्पाण्डवीयान् प्रकीर्त्तयन् । वृद्धेषु कुलधर्म्मञ्च ब्रुवन् पूर्व्वैरनुष्ठितं ।
विभेत्स्यति मनांस्येषामिति मे नात्र संशयः । न च तेभ्यो भयं तेऽस्ति ब्राह्मणो ह्यसि वेदवित् ।
दूतकर्म्मणि युक्तश्च स्थविरश्च विशेषतः । स भवान्पुष्ययोगेन मुहूर्त्तेन जयेन च ।
कौरवेयान्प्रयात्वाशु कौन्तेयस्यार्थसिद्धये । १२५
॥ वैशम्पायन उवाच ॥ तथाऽनुशिष्टः प्रययौ द्रुपदेन महात्मना । पुरोधा वृत्तसम्पन्नो नगरं नागसाह्वयं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

शिष्यैः परिवृतो विद्वान् नीतिशास्त्रार्थकोविदः। पाण्डवानां हितार्थाय कौरवान् प्रति जग्मिवान्।
इति श्रीमहाभारते उद्योगपर्व्वणि सेनोद्योगपर्व्वणि पुरोहितयाने पञ्चमोऽध्यायः॥ ५॥
॥ वैशम्पायन उवाच॥ पुरोहितं ते प्रस्थाप्य नगरं नागसाह्वयं। दूतान् प्रस्थापयामासुः पार्थिवेभ्यस्ततस्ततः।
प्रस्थाप्य दूतानन्यत्र द्वारकां पुरुषर्षभः। स्वयं जगाम कौरव्यः कुन्तीपुत्रो धनञ्जयः।
गते द्वारवतीं कृष्णे बलदेवे च माधवे। सह वृष्ण्यन्धकैः सर्व्वैर्भोजैश्च शतशस्तदा।
सर्व्वमागमयामास पाण्डवानां विचेष्टितं। धृतराष्ट्रात्मजो राजा गूढैः प्रणिहितैश्चरैः।
स श्रुत्वा माधवं यान्तं सदश्वैरनिलोपमैः। बलेन नातिमहता द्वारकामभ्ययात्पुरीं।
तमेव दिवसं चापि कौन्तेयः पाण्डुनन्दनः। आनर्त्तनगरीं रम्यां जगामाशु धनञ्जयः।
तौ यात्वा पुरुषव्याघ्रौ द्वारकां कुरुनन्दनौ। सुप्तं ददृशतुः कृष्णं शयानं चाभिजग्मतुः।
ततः शयाने गोविन्दे प्रविवेश सुयोधनः। तच्छीर्षतश्च कृष्णस्य निषसाद वरासने।
ततः किरीटी तस्यानु प्रविवेश महामनाः। पश्चार्द्धे च स कृष्णस्य प्रह्वोऽतिष्ठत्कृताञ्जलिः।
प्रतिबुद्धः स वार्ष्णेयो ददर्शाग्रे किरीटिनं। स तयोः स्वागतं कृत्वा यथावत्प्रतिपूज्य तौ।
तदागमनजं हेतुं पप्रच्छ मधुसूदनः। ततो दुर्य्योधनः कृष्णमुवाच प्रहसन्निव।
विग्रहेऽस्मिन् भवान् साह्यं मम दातुमिहार्हति। समं हि भवतः सख्यं मयि चैवार्जुनेऽपि च।
तथा सम्बन्धकं तुल्यमस्माकं त्वयि माधव। अहं चाभिगतः पूर्व्वं त्वामद्य मधुसूदन।
पूर्व्वं चाभिगतं सन्तो भजन्ते पूर्व्वसारिणः। त्वञ्च श्रेष्ठतमो लोके सतामद्य जनार्द्दन।
सततं सम्मतश्चैव सद्वृत्तमनुपालय।
॥ कृष्ण उवाच॥ भवानभिगतः पूर्व्वमत्र मे नास्ति संशयः। दृष्टस्तु प्रथमं राजन् मया पार्थो धनञ्जयः।
तव पूर्व्वाभिगमनात्पूर्व्वं चाप्यस्य दर्शनात्। साहाय्यमुभयोरेव करिष्यामि सुयोधन।
प्रवारणन्तु बालानां पूर्व्वं कार्य्यमिति श्रुतिः। तस्मात्प्रवारणं पूर्व्वमर्हः पार्थो धनञ्जयः।
मत्संहननतुल्यानां गोपानामर्ब्बुदं महत्। नारायणा इति ख्याताः सर्व्वे सङ्ग्रामयोधिनः।
ते वा युधि दुराधर्षा भवन्त्वेकस्य सैनिकाः। अयुध्यमानः सङ्ग्रामे न्यस्तशस्त्रोऽहमेकतः।
आभ्यामन्यतरं पार्थ यत्ते हृद्यतरं मतं। तद्वृणीतां भवानग्रे प्रवार्य्यस्त्वं हि धर्म्मतः।
॥ वैशम्पायन उवाच॥ एवमुक्तस्तु कृष्णेन कुन्तीपुत्रो धनञ्जयः। अयुध्यमानं सङ्ग्रामे वरयामास केशवं।
नारायणममित्रघ्नं कामाज्जातमजं नृषु। सर्व्वक्षत्रस्य पुरतो देवदानवयोरपि।
दुर्य्योधनस्तु तत्सैन्यं सर्व्वमावरयत्तदा। सहस्राणां सहस्रन्तु योधानां प्राप्य भारत।
कृष्णं चापहृतं ज्ञात्वा सम्प्राप परमां मुदं। दुर्य्योधनस्तु तत्सैन्यं सर्व्वमादाय पार्थिवः।
ततोऽभ्ययाद्भीमबलो रौहिणेयं महाबलं। सर्व्वं चागमने हेतुं स तस्मै संन्यवेदयत्।
प्रत्युवाच ततः शौरिर्द्धार्त्तराष्ट्रमिदं वचः।
॥ बलदेव उवाच॥ विदितं ते नरव्याघ्र सर्व्वं भवितुमर्हति। यन्मयोक्तं विराटस्य पुरा वैवाहिके तदा।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

निग्टह्योक्तो हृषीकेशस्त्वदर्थे कुरुनन्दन। मया सम्बन्धकं तुल्यमिति राजन् पुनः पुनः।
नच तद्वाक्यमुक्तं वै केशवः प्रत्यपद्यत। नचाहमुत्सहे कृष्णं विना स्थातुमपि चणं।
नाहं सहायः पार्थस्य नापि दुर्य्योधनस्य वै। इति मे निश्चिता बुद्धिर्वासुदेवमवेच्य ह। १६०
जातोऽसि भारते वंशे सर्व्वपार्थिवपूजिते। गच्छ युध्यस्व धर्म्मेण चात्त्रेण भरतर्षभ।
॥ वैशम्पायन उवाच ॥ इत्येवमुक्तस्तु तदा परिष्वज्य हलायुधं। कृष्णं चापहृतं ज्ञात्वा युद्धान्मेने जितं जय।
सोऽभ्ययात्कृतवर्म्माणं धृतराष्ट्रसुतो नृपः। कृतवर्म्मा ददौ तस्य सेनामचौहिणीं तदा।
स तेन सर्व्वसैन्येन भीमेन कुरुनन्दनः। वृतः परिययौ हृष्टः सुहृदः सम्प्रहर्षयन्।
ततः पीताम्बरधरो जगत्स्रष्टा जनार्दनः। गते दुर्य्योधने कृष्णः किरीटिनमथाब्रवीत्। ६५
अयुध्यमानः कां बुद्धिमास्थायाहं वृतस्त्वया।
॥ अर्ज्जुन उवाच ॥ भवान् समर्थस्तान् सर्व्वान्निहन्तुं नात्र संशयः। निहन्तुमहमप्येकः समर्थः पुरुषर्षभ।
भवांस्तु कीर्त्तिमाल्लोके तद्यशस्त्वां गमिष्यति। यशसा चाहमप्यर्थी तस्मादसि मया वृतः।
सारथ्यन्तु त्वया कार्य्यमिति मे मानसं सदा। चिररात्रेप्सितं कामं तद्भवान् कर्त्तुमर्हति।
॥ वासुदेव उवाच ॥ उपपन्नमिदं पार्थ यत्स्पर्द्धसि मया सह। सारथ्यं ते करिष्यामि कामः सम्पद्यतां तव। १७०
॥ वैशम्पायन उवाच ॥ एवं प्रमुदितः पार्थः कृष्णेन सहितस्तदा। गतो दाशार्हप्रवरैः पुनरायाद्युधिष्ठिरं।
इति श्रीमहाभारते उद्योगपर्व्वणि सैन्योद्योगपर्व्वणि कृष्णसारथ्यस्वीकारे षष्ठोऽध्यायः ॥ ६ ॥
॥ वैशम्पायन उवाच ॥ शल्यः श्रुत्वा तु दूतानां सैन्येन महता वृतः। अभ्ययात्पाण्डवान् राजन् सह पुत्रैर्म्महारथैः।
तस्य सेनानिवेशोऽभूदध्यर्द्धमिव योजनं। तथा हि विपुलां सेनां बिभर्त्ति स नरर्षभः।
अचौहिणीपतीराजन् महावीर्य्यपराक्रमः। विचित्रकवचाः शूरा विचित्रध्वजकार्म्मुकाः।
विचित्राभरणाः सर्व्वे विचित्ररथवाहनाः। विचित्रस्रग्धराः सर्व्वे विचित्राम्बरभूषणाः। १७५
स्वदेशवेशाभरणा वीराः शतसहस्रशः। तस्य सेनाप्रणेतारो बभूवुः चत्त्रियर्षभाः।
व्यथयन्निव भूतानि कम्पयन्निव मेदिनीं। शनैर्व्विश्रामयन् सेनां स ययौ येन पाण्डवः।
ततो दुर्य्योधनः श्रुत्वा महात्मानं महारथं। उपायान्तमभिद्रुत्य स्वयमानर्च्च भारत।
कारयामास पूजार्थं तस्य दुर्य्योधनः सभाः। रमणीयेषु देशेषु रत्नचित्राः स्वलङ्कृताः।
शिल्पिभिर्व्विविधैश्चैव क्रीडास्तत्र प्रयोजिताः। तत्र माल्यानि मांसानि भक्ष्यं पेयञ्च सत्कृतं। १८०
कूपाश्च विविधाकारा मनोहर्षविवर्द्धनाः। वाप्यश्च विविधाकारा औदकानि गृहाणि च।
स ताः सभाः समासाद्य पूज्यमानो यथाऽमरः। दुर्य्योधनस्य सचिवैर्देशे देशे समन्ततः।
आजगाम सभामन्यां देवावसथवर्च्चसं। स तत्र विषयैर्युक्तैः कल्याणैरतिमानुषैः।
मेनेऽभ्यधिकमात्मानमवमेने पुरन्दरं। पप्रच्छ स ततः प्रेष्यान् प्रहृष्टः चत्त्रियर्षभः।
युधिष्ठिरस्य पुरुषाः केऽत्र चक्रुः सभा इमाः। आनीयन्तां सभाकाराः प्रदेयार्हा हि मे मताः। १८५
प्रसादमेषां दास्यामि कुन्तीपुत्त्रोऽनुमन्यतां। दुर्य्योधनाय तत्सर्व्वं कथयन्ति स्म विस्मिताः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

संप्रहृष्टो यदा शल्यो दिदित्सुरपि जीवितं । गूढो दुर्य्योधनस्तत्र दर्शयामास मातुलं ।
तं दृष्ट्वा मद्रराजस्तु ज्ञात्वा यत्नञ्च तस्य तं । परिष्वज्याब्रवीत्प्रीत इष्टोऽर्थो गृह्यतामिति ।
॥ दुर्य्योधन उवाच ॥ सत्यवाग्भव कल्याण वरो वै मम दीयतां । सर्व्वसेनाप्रणेता वै भवान् भवितुमर्हति ।
॥ वैशम्पायन उवाच ॥ कृतमित्यब्रवीच्छल्यः किमन्यत् क्रियतामिति । कृतमित्येव गान्धारिः प्रत्युवाच पुनः पुनः । १९०
॥ शल्य उवाच ॥ गच्छ दुर्य्योधन पुरं स्वकमेव नरर्षभ । अहं गमिष्ये द्रष्टुं वै युधिष्ठिरमरिन्दमं ।
दृष्ट्वा युधिष्ठिरं राजन् क्षिप्रमेष्ये नराधिप । अवश्यं चापि द्रष्टव्यः पाण्डवः पुरुषर्षभः ।
॥ दुर्य्योधन उवाच ॥ क्षिप्रमागम्यतां राजन् पाण्डवं वीक्ष्य पार्थिव । त्वय्यधीनाः स्म राजेन्द्र वरदानं स्मरस्व नः ।
॥ शल्य उवाच ॥ क्षिप्रमेष्यामि भद्रन्ते गच्छस्व स्वपुरं नृप । परिष्वज्य तथाऽन्योऽन्यं शल्यदुर्य्योधनावुभौ ।
स तथा शल्यमामन्त्र्य पुनरायात्स्वकं पुरं । शल्यो जगाम कौन्तेयानाख्यातुं कर्म्म तस्य तत् । १९५
उपप्लव्यं स गत्वा तु स्कन्धावारं प्रविश्य च । पाण्डवानथ तान् सर्व्वान् शल्यस्तत्र ददर्श ह ।
समेत्य च महाबाहुः शल्यः पाण्डुसुतैस्तदा । पाद्यमर्घ्यञ्च गाञ्चैव प्रत्यगृह्णाद्यथाविधि ।
ततः कुशलपूर्व्वं हि मद्रराजोऽरिसूदनः । प्रीत्या परमया युक्तः समाश्लिष्य युधिष्ठिरं ।
तथा भीमार्ज्जुनौ कृष्णौ स्वस्रीयौ च यमावुभौ । आसने चोपविविशुः शल्यः पार्थमुवाच ह ।
कुशलं राजशार्दूल कच्चित्ते कुरुनन्दन । अरण्यवासाद्दिष्ट्याऽसि विमुक्तो जयतां वर । २००
सुदुष्करं कृतं राजन्निर्जने वसता त्वया । भ्रातृभिः सह राजेन्द्र कृष्णया चानया सह ।
अज्ञातवासं घोरञ्च वसता दुष्करं कृतं । दुःखमेव कुतः सौख्यं भ्रष्टराज्यस्य भारत ।
दुःखस्यैतस्य महतो धार्त्तराष्ट्रकृतस्य वै । अवाप्स्यसि सुखं राजन् हत्वा शत्रून् परन्तप ।
विदितं ते महाराज लोकतन्त्रं नराधिप । तस्माल्लोभकृतं किञ्चित्तव तात न विद्यते ।
राजर्षीणां पुराणानां मार्गमन्विच्छ भारत । दाने तपसि सत्ये च भव तात युधिष्ठिर । २०५
क्षमा दमश्च सत्यञ्च अहिंसा च युधिष्ठिर । अद्भुतश्च पुनर्लोकस्त्वयि राजन् प्रतिष्ठितः ।
मृदुर्व्वदान्यो ब्रह्मण्यो दाता धर्म्मपरायणः । धर्म्मास्ते विदिता राजन् बहवो लोकसाक्षिकाः ।
स वै जगदिदं तात विदितं ते परन्तप । दिष्ट्या कृच्छ्रमिदं राजन् पारितं भरतर्षभ ।
दिष्ट्या पश्यामि राजेन्द्र धर्म्मात्मानं सहानुगं । निस्तीर्णं दुष्करं राजंस्त्वां धर्म्मनिचयं प्रभो ।
॥ वैशम्पायन उवाच ॥ ततोऽस्याकथयद्राजा दुर्य्योधनसमागमं । तच्च शुश्रूषितं सर्व्वं वरदानञ्च भारत । २१०
॥ युधिष्ठिर उवाच ॥ सुकृतं ते कृतं राजन् प्रहृष्टेनान्तरात्मना । दुर्य्योधनस्य यद्वीर त्वया वाचा प्रतिश्रुतं ।
एकं त्विच्छामि भद्रन्ते क्रियमाणं महीपते । राजन्नकर्त्तव्यमपि कर्त्तुमर्हसि सत्तम ।
मम त्ववेक्षया वीर शृणु विज्ञापयामि ते । भवानिह महाराज वासुदेवसमो युधि ।
कर्णार्ज्जुनाभ्यां सम्प्राप्ते द्वैरथे राजसत्तम । कर्णस्य भवता कार्य्यं सारथ्यं नात्र संशयः ।
तत्र पाल्योऽर्ज्जुनो राजन् यदि मत्प्रियमिच्छसि । तेजोवधश्च ते कार्य्यः सौतेरस्मज्जयावहः । २१५
अकर्त्तव्यमपि ह्येतत् कर्त्तुमर्हसि मातुल ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ शल्यउवाच ॥ शृणु पाण्डव भद्रं ते यद्ब्रवीषि दुरात्मनः । तेजोवधनिमित्तं मां सूतपुत्त्रस्य संयुगे ।
अहं तस्य भविष्यामि सङ्ग्रामे सारथिर्ध्रुवं । वासुदेवेन हि समं नित्यं मां स हि मन्यते ।
तस्याहं कुरुशार्दूल प्रतीपमहितं वचः । ध्रुवं सङ्कथयिष्यामि योद्धुकामस्य संयुगे ।
यथा स हृतदर्पश्च हृततेजाश्च पाण्डव । भविष्यति सुखं हन्तुं सत्यमेतद्ब्रवीमि ते । २२०
एवमेतत्करिष्यामि यथा तात त्वमात्थ मां । यच्चान्यदपि शक्ष्यामि तत्करिष्यामि ते प्रियं ।
यच्च दुःखं त्वया प्राप्तं द्यूते वै कृष्णया सह । परुषाणि च वाक्यानि सूतपुत्त्रकृतानि वै ।
जटासुरात्परिक्लेशः कीचकाच्च महाद्युते । द्रौपद्याऽधिगतं सर्व्वं दमयन्त्या यथाऽशुभं ।
सर्व्वं दुःखमिदं वीर सुखोदर्कं भविष्यति । नात्र मन्युस्त्वया कार्य्यो विधिर्हि बलवत्तरः ।
दुःखानि हि महात्मानः प्राप्नुवन्ति युधिष्ठिर । देवैरपि हि दुःखानि प्राप्तानि जगतीपते । २२५
इन्द्रेण श्रूयते राजन् सभार्य्येण महात्मना । अनुभूतं महद्दुःखं देवराजेन भारत ।
इति श्रीमहाभारते उद्योगपर्व्वणि सेनोद्योगपर्व्वणि शल्यवाक्ये सप्तमोऽध्यायः ॥ ७ ॥

॥ युधिष्ठिर उवाच ॥ कथमिन्द्रेण राजेन्द्र सभार्य्येण महात्मना । दुःखं प्राप्तं परं घोरमेतदिच्छामि वेदितुं ।
॥ शल्यउवाच ॥ शृणु राजन् पुरावृत्तमितिहासं पुरातनं । सभार्य्येण यथा प्राप्तं दुःखमिन्द्रेण भारत ।
त्वष्टा प्रजापतिर्ह्यासीद्देवश्रेष्ठो महातपाः । स पुत्त्रं वै त्रिशिरसमिन्द्रद्रोहात्किलासृजत् ।
ऐन्द्रं स प्रार्थयत्स्थानं विश्वरूपो महाद्युतिः । तैस्त्रिभिर्व्वदनैर्घोरैः सूर्य्येन्दुज्वलनोपमैः । २३
वेदानेकेन सोऽधीते सुरामेकेन चापिवत् । एकेन च दिशः सर्व्वाः पिबन्निव निरीक्षते ।
स तपस्वी मृदुर्दान्तो धर्म्मे तपसि चोद्यतः । तपस्तस्य महत्तीव्रं सुदुश्चरमरिन्दम ।
तस्य दृष्ट्वा तपोवीर्य्यं सत्यं चामिततेजसः । विषादमगमच्छक्र इन्द्रोऽयं मा भवेदिति ।
कथं सज्जेच्च भोगेषु न च तप्येन्महत्तपः । विवर्द्धमानस्त्रिशिराः सर्व्वं हि भुवनं ग्रसेत् ।
इति सञ्चिन्त्य बहुधा बुद्धिमान् भरतर्षभ । आज्ञापयत्सोऽप्सरसस्त्वष्टृपुत्त्रप्रलोभने । २३५
यथा स सज्जेत्त्रिशिराः कामं भोगेषु वै भृशं । क्षिप्रं कुरुत गच्छध्वं प्रलोभयत मा चिरं ।
शृङ्गारवेशाः सुश्रोण्यो हारैर्युक्ता मनोहरैः । हावभावसमायुक्ताः सर्व्वाः सौन्दर्य्यशोभिताः ।
प्रलोभयत भद्रं वः शमयध्वं भयं मम । अस्वस्थं ह्यात्मनात्मानं लक्षयामि वराङ्गनाः ।
भयं तन्मे महाघोरं क्षिप्रं नाशयताबलाः ।
॥ अप्सरस ऊचुः ॥ तथा यत्नं करिष्यामः शक्र तस्य प्रलोभने । यथा नावाप्स्यसि भयं तस्माद्बलनिसूदन ।
निर्द्दहन्निव चक्षुर्भ्यां योऽसावास्ते तपोनिधिः । तं प्रलोभयितुं देव गच्छामः सहिता वयं । २४०
यतिष्यामो वशे कर्त्तुं व्यपनेतुञ्च ते भयं ।
॥ शल्य उवाच ॥ इन्द्रेण तास्त्वनुज्ञाता जग्मुस्त्रिशिरसोऽन्तिकं । तत्र ता विविधैर्हावैर्लोभयन्त्यो वराङ्गनाः ।
नित्यं सन्दर्शयामासुस्तथैवाङ्गेषु सौष्ठवं । नाभ्यगच्छत् प्रहर्षन्ताः स पश्यन् सुमहातपाः ।
इन्द्रियाणि वशे कृत्वा पूर्णसागरसन्निभः । तास्तु यत्नं परं कृत्वा पुनः शक्रमुपस्थिताः । २४५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कृताञ्जलिपुटाः सर्व्वा देवराजमथाब्रुवन् । न स शक्यः सुदुर्द्धर्षो धैर्य्याच्चालयितुं प्रभो ।
यत्ते कार्य्यं महाभाग क्रियतां तदनन्तरं । सम्पूज्याप्सरसः शक्रो विसृज्य च महामतिः ।
चिन्तयामास तस्यैव बधोपायं युधिष्ठिर । स तूष्णीं चिन्तयन् वीरो देवराजः प्रतापवान् ।
विनिश्चितमतिर्द्धीमान् बधे त्रिशिरसोऽभवत् । वज्रमस्य क्षिपाम्यद्य स क्षिप्रं न भविष्यति ।
शत्रुः प्रवृद्धो नोपेक्ष्यो दुर्व्वलोऽपि बलीयसा । शास्त्रबुद्ध्या विनिश्चित्य कृत्वा बुद्धिं बधे दृढां । २५०
अथ वैश्वानरनिभं घोररूपं भयावहं । मुमोच वज्रं संक्रुद्धः शक्रस्त्रिशिरसं प्रति ।
स पपात हतस्तेन वज्रेण दृढमाहतः । पर्व्वतस्येव शिखरं प्रणुन्नं मेदिनीतले ।
तन्तु वज्रहतं दृष्ट्वा शयानमचलोपमं । न शर्म्म लेभे देवेन्द्रो दीपितस्तस्य तेजसा ।
हतोऽपि दीप्ततेजाः स जीवन्निव हि दृश्यते । घातितस्य शिरांस्याजौ जीवन्तीवाद्भुतानि वै ।
ततोऽतिभीतो रूपात्तु शक्र आस्ते विचारयन् । अथाजगाम परशुं स्कन्धेनादाय वर्द्धकिः । २५५
तदरण्यं महाराज यत्रास्तेऽसौ निपातितः । स भीतस्तत्र तक्षाणं घटमानं शचीपतिः ।
अपश्यदब्रवीच्चैनं सत्वरं पाकशासनः । क्षिप्रं छिन्धि शिरांस्यस्य कुरुष्व वचनं मम ।
॥ तक्षोवाच ॥ महास्कन्धो भृशं ह्येष परशुर्न भविष्यति । कर्त्तुञ्चाहं न शक्ष्यामि कर्म्म सद्भिर्विगर्हितं ।
॥ इन्द्र उवाच ॥ माभैस्त्वं शीघ्रमेतद्वै कुरुष्व वचनं मम । मत्प्रसादाद्धि ते शस्त्रं वज्रकल्पं भविष्यति ।
॥ तक्षोवाच ॥ कं भवन्तमहं विद्यां घोरकर्म्माणमद्य वै । एतदिच्छाम्यहं श्रोतुं तत्त्वेन कथयस्व मे । २६०
॥ इन्द्र उवाच ॥ अहमिन्द्रो देवराजस्तक्षन्विदितमस्तु ते । कुरुष्वैतद्यथोक्तं मे तक्षन्मा त्वं विचारय ।
॥ तक्षोवाच ॥ क्रूरेण नापत्रपसे कथं शक्रेह कर्म्मणा । ऋषिपुत्त्रमिमं हत्वा ब्रह्महत्याभयं न ते ।
॥ शक्र उवाच ॥ पश्चाद्धर्म्मं चरिष्यामि पावनार्थं सुदुश्चरं । शत्रुरेष महावीर्य्यो वज्रेण निहतो मया ।
अद्यापि चाहमुद्विग्नस्तक्षन्नस्माद्बिभेमि वै । क्षिप्रं छिन्धि शिरांसि त्वं करिष्येऽनुग्रहं तव ।
शिरः पशोस्ते दास्यन्ति भागं यज्ञेषु मानवाः । एष तेऽनुग्रहस्तक्षन् क्षिप्रं कुरु मम प्रियं । २६५
॥ शल्य उवाच ॥ एतच्छ्रुत्वा तु तक्षा स महेन्द्रवचनात्तदा । शिरांस्यथ त्रिशिरसः कुठारेणाच्छिनत्तदा ।
निकृत्तेषु ततस्तेषु निष्क्रामन्नण्डजास्त्वथ । कपिञ्जलास्तित्तिराश्च कलविङ्काश्च सर्व्वशः ।
येन वेदानधीते स्म पिबते सोममेव च । तस्माद्वक्त्राद्विनिष्पेतुः क्षिप्रं तस्य कपिञ्जलाः ।
येन सर्व्वा दिशो राजन् पिबन्निव निरीक्षते । तस्माद्वक्त्राद्विनिष्पेतुस्तित्तिरास्तस्य पाण्डव ।
यत्सुरापन्तु तस्यासीद्वक्त्रं त्रिशिरसस्तदा । कलविङ्काः समुत्पेतुः श्येनाश्च भरतर्षभ । २७०
ततस्तेषु निकृत्तेषु विज्वरो मघवानथ । जगाम त्रिदिवं हृष्टस्तक्षाऽपि स्वगृहान्ययौ ।
मेने कृतार्थमात्मानं हत्वा शत्रुं सुरारिहा । त्वष्टा प्रजापतिः श्रुत्वा शक्रेणाथ हतं सुतं ।
क्रोधसंरक्तनयन इदं वचनमब्रवीत् ।
॥ त्वष्टोवाच ॥ तप्यमानं तपो नित्यं क्षान्तं दान्तं जितेन्द्रियं । विनाऽपराधेन यतः पुत्त्रं हिंसितवान्मम ।
तस्माच्छक्रविनाशाय वृत्रमुत्पादयाम्यहं । लोकाः पश्यन्तु मे वीर्य्यं तपसश्च बलं महत् । २७५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding by MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स च पश्यतु देवेन्द्रो दुरात्मा पापचेतनः। उपस्पृश्य ततः क्रुद्धस्तपस्वी सुमहायशाः।
अग्नौ हुत्वा समुत्पाद्य घोरं वृत्रमुवाच ह। इन्द्रशत्रो विवर्द्धस्व प्रभावात्तपसो मम।
सोऽवर्द्धत दिवं स्तब्ध्वा सूर्य्यवैश्वानरोपमः। किङ्करोमीति चोवाच कालसूर्य्य इवोदितः।
शक्रं जहीति चाप्युक्तो जगाम त्रिदिवं ततः। ततो युद्धं समभवद्वृत्रवासवयोर्महत्।
संक्रुद्धयोर्महाघोरं प्रसक्तं कुरुसत्तम। ततो जग्राह देवेन्द्रं वृत्रो वीरः शतक्रतुं। १८०
अपावृत्याक्षिपद्वक्त्रे शक्रं कोपसमन्वितः। ग्रस्ते वृत्रेण शक्रे तु सम्भ्रान्तास्त्रिदिवेश्वराः।
असृजंस्ते महासत्त्वा जृम्भिकां वृत्रनाशिनीं। विजृम्भमाणस्य ततो वृत्रस्यास्यादपावृतात्।
स्वान्यङ्गान्यभिसङ्क्षिप्य निष्क्रान्तो बलनाशनः। ततः प्रभृति लोकस्य जृम्भिका प्राणसंश्रिता।
जहृषुश्च सुराः सर्व्वे शक्रं दृष्ट्वा विनिःसृतं। ततः प्रववृते युद्धं वृत्रवासवयोः पुनः।
संरब्धयोस्तदा घोरं सुचिरं भरतर्षभ। यदा व्यवर्द्धत रणे वृत्रो बलसमन्वितः। १८५
त्वष्टुस्तेजोबलाविद्धस्तदा शक्रो न्यवर्त्तत। निवृत्ते च तदा देवा विषादमगमन्परं।
समेत्य सह शक्रेण त्वष्टुस्तेजोविमोहिताः। अमन्त्रयन्त ते सर्व्वे मुनिभिः सह भारत।
किं कार्य्यमिति वै राजन् विचिन्त्य भयमोहिताः। जग्मुः सर्व्वे महात्मानं मनोभिर्व्विष्णुमव्ययं।
उपविष्टा मन्दराग्रे सर्व्वे वृत्रवधेप्सवः।
इति श्रीमहाभारते उद्योगपर्व्वणि सेनोद्योगपर्व्वणि इन्द्रविजये अष्टमोऽध्यायः॥ ८ ॥
॥ इन्द्र उवाच ॥ सर्व्वं व्याप्तमिदं देवा वृत्रेण जगदव्ययं। नह्यस्य सदृशं किञ्चित् प्रतीघाताय यद्भवेत्। १९०
समर्थो ह्यभवं पूर्व्वमसमर्थोऽस्मि साम्प्रतं। कथं नु कुर्य्यां भद्रं वो दुर्द्धर्षः स हि मे मतः।
तेजस्वी च महात्मा च युद्धे चामितविक्रमः। ग्रसेत्त्रिभुवनं सर्व्वं सदेवासुरमानुषं।
तस्माद्विनिश्चयमिमं शृणुध्वं त्रिदिवौकसः। विष्णोः क्षयमुपागम्य समेत्य च महात्मना।
तेन संमन्त्र्य वेत्स्यामो वधोपायं दुरात्मनः।
॥ शल्य उवाच ॥ एवमुक्ते मघवता देवाः सर्षिगणास्तदा। शरण्यं शरणं देवं जग्मुर्व्विष्णुं महाबलं। १९५
ऊचुश्च सर्व्वदेवेशं विष्णुं वृत्रभयार्द्दिताः। त्वया लोकास्त्रयः क्रान्तास्त्रिभिर्व्विक्रमणैः पुरा।
अमृतं चाहृतं विष्णो दैत्याश्च निहता रणे। बलिं बद्ध्वा महादैत्यं शक्रो देवाधिपः कृतः।
त्वं प्रभुः सर्व्वदेवानां त्वया सर्व्वमिदं ततं। त्वं हि देवो महादेवः सर्व्वलोकनमस्कृतः।
गतिर्भव त्वं देवानां सेन्द्राणाममरोत्तम। जगद्व्याप्तमिदं सर्व्वं वृत्रेणासुरसूदन।
॥ विष्णुरुवाच ॥ अवश्यं करणीयं मे भवतां हितमुत्तमं। तस्मादुपायं वक्ष्यामि यथाऽसौ न भविष्यति। २००
गच्छध्वं सर्षिगन्धर्व्वा यत्रासौ विश्वरूपधृक्। साम तस्य प्रयुञ्जध्वं तत एनं विजेष्यथ।
भविष्यति जयो देवाः शक्रस्य मम तेजसा। अदृश्यश्च प्रवेक्ष्यामि वज्रे ह्यस्यायुधोत्तमे।
गच्छध्वमृषिभिः सार्द्धं गन्धर्व्वैश्च सुरोत्तमाः। वृत्रस्य सह शक्रेण सन्धिं कुरुत माचिरं।
॥ शल्य उवाच ॥ एवमुक्ते तु देवेन ऋषयस्त्रिदशास्तथा। ययुः समेत्य सहिताः शक्रं कृत्वा पुरःसरं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding: KS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

समीपमेत्य च यदा सर्व्व एव महौजसः । तं तेजसा प्रज्वलितं प्रतपन्तं दिशो दश । २०५
ग्रसन्तमिव लोकांस्त्रीन सूर्य्याचन्द्रमसौ यथा । ददृशुस्ते ततो वृत्रं शक्रेण सह देवताः ।
ऋषयोऽथ ततोऽभ्येत्य वृत्रमूचुः प्रियं वचः । व्याप्तं जगदिदं सर्व्वं तेजसा तव दुर्ज्जय ।
न च शक्नोषि निर्ज्जेतुं वासवं बलिनाम्बर । युध्यतोश्चापि वां कालो व्यतीतः सुमहानिह ।
पीड्यन्ते च प्रजाः सर्वाः सदेवासुरमानुषाः । सख्यं भवतु ते वृत्र शक्रेण सह नित्यदा ।
अवाप्स्यसि सुखं त्वञ्च शक्रलोकांश्च शाश्वतान् । ऋषिवाक्यं निशम्याथ वृत्रः स तु महाबलः । २१०
उवाच तानृषीन् सर्व्वान् प्रणम्य शिरसाऽसुरः । सर्व्वे यूयं महाभागा गन्धर्व्वाश्चैव सर्व्वशः ।
यद्ब्रूथ तच्छ्रुतं सर्व्वं ममापि शृणुतानघाः । सन्धिः कथं वै भविता मम शक्रस्य चोभयोः ।
तेजसोर्हि द्वयोर्द्देवाः सख्यं वै भविता कथं ।

॥ ऋषय ऊचुः ॥ सकृत्सतां सङ्गतं लिप्सितव्यं ततः परम्भविता भव्यमेव । नातिक्रामेत्सत्पुरुषेण सङ्गतं तस्मात् सतां सङ्गतं लिप्सितव्यं ।

दृढं सतां सङ्गतं चापि नित्यं ब्रूयाच्चार्थं ह्यर्थकृच्छ्रेषु धीरः । महार्थवत् सत्पुरुषेण सङ्गतं तस्मात् सन्तं न जिघांसेत धीरः । २१५
इन्द्रः सतां सम्मतश्च निवासश्च महात्मनां । सत्यवादी ह्यनिन्द्यश्च धर्म्मवित्सूक्ष्मनिश्चयः ।
तेन ते सह शक्रेण सन्धिर्भवतु नित्यदा । एवं विश्वासमागच्छ मा ते भूद्बुद्धिरन्यथा ।
॥ शल्य उवाच ॥ महर्षिवचनं श्रुत्वा तानुवाच महाद्युतिः । अवश्यं भगवन्तो मे माननीयास्तपस्विनः ।
ब्रवीमि यदहं देवास्तत्सर्व्वं क्रियते यदि । ततः सर्व्वं करिष्यामि यदूचुर्म्मां द्विजर्षभाः ।
न शुष्केण नचार्द्रेण नाश्मना न च दारुणा । न शस्त्रेण न चास्त्रेण न दिवा न तथा निशि । २२०
बध्यो भवेयं विप्रेन्द्राः शक्रस्य सह दैवतैः । एवं मे रोचते सन्धिः शक्रेण सह नित्यदा ।
वाढमित्येव ऋषयस्तमूचुर्भरतर्षभ । एवं वृत्ते तु सन्धाने वृत्रः प्रमुदितोऽभवत् ।
युक्तः सदाऽभवच्चापि शक्रो हर्षसमन्वितः । वृत्रस्य बधसंयुक्तानुपायाननुचिन्तयन् ।
छिद्रान्वेषी समुद्विग्नः सदा वसति देवराट् । स कदाचित्समुद्रान्ते तमपश्यन्महासुरं ।
सन्ध्याकाल उपावृत्ते मुहूर्त्ते चातिदारुणे । ततः सञ्चिन्त्य भगवान् वरदानं महात्मनः । २२५
सन्ध्येयं वर्त्तते रौद्रा न रात्रिर्द्दिवसं न च । वृत्रश्चावश्यबध्योऽयं मम सर्वहरो रिपुः ।
वृत्रं यदि न हन्म्यद्य वञ्चयित्वा महासुरं । महाबलं महाकायं न मे श्रेयो भविष्यति ।
एवं सञ्चिन्तयन्नेव शक्रो विष्णुमनुस्मरन् । अथ फेनं तदाऽपश्यत् समुद्रे पर्व्वतोपमं ।
नायं शुष्को न चार्द्रोऽयं न च शस्त्रमिदं तथा । एनं चेप्स्यामि वृत्रस्य क्षणादेव नशिष्यति ।
सवज्रमथ फेनं तं क्षिप्रं वृत्रे निसृष्टवान् । प्रविश्य फेनं तं विष्णुरथ वृत्रं व्यनाशयत् । २३०
निहते तु ततो वृत्रे दिशो वितिमिराभवन् । प्रववौ च शिवो वायुः प्रजाश्च जहृषुस्तथा ।
ततो देवाः सगन्धर्व्वा यक्षरक्षोमहोरगाः । ऋषयश्च महेन्द्रं तमस्तुवन्विविधैः स्तवैः ।
नमस्कृतः सर्व्वभूतैः सर्व्वभूतान्यसान्त्वयत् । हत्वा शत्रुं प्रहृष्टात्मा वासवः सह दैवतैः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust - Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विष्णुं त्रिभुवनश्रेष्ठं पूजयामास धर्म्मवित्। ततो हते महावीर्य्ये वृत्रे देवभयङ्करे।
अनृतेनाभिभूतोऽभूच्छक्रः परमदुर्म्मनाः। त्रैशीर्षयाऽभिभूतश्च स पूर्व्वं ब्रह्महत्यया। २१५
सोऽन्तमाश्रित्य लोकानां नष्टसंज्ञो विचेतनः। न प्राज्ञायत देवेन्द्रस्त्वभिभूतः स्वकल्मषैः।
प्रतिच्छन्नोऽवसच्चाप्सु चेष्टमान इवोरगः। ततः प्रनष्टे देवेन्द्रे ब्रह्महत्याभयार्द्दिते।
भूमिः प्रध्वस्तसङ्काशा निर्वृक्षा शुष्ककानना। विच्छिन्नस्रोतसो नद्यः सरांस्यनुदकानि च।
संक्षोभश्चापि सत्त्वानामनावृष्टिकृतोऽभवत्। देवाश्चापि भृशं त्रस्तास्तथा सर्व्वे महर्षयः।
अराजकं जगत्सर्व्वमभिभूतमुपद्रवैः। ततो भीताभवन् देवाः को नो राजा भवेदिति। २४०
दिवि देवर्षयश्चापि देवराजविनाकृताः। न स्म कश्चन देवानां राज्ये वै कुरुते मतिं।
इति श्रीमहाभारते उद्योगपर्व्वणि सेनोद्योगपर्व्वणि वृत्रवधे नवमोऽध्यायः ॥ ९ ॥
॥ शल्य उवाच ॥ ऋषयोऽथाब्रुवन् सर्व्वे देवाश्च त्रिदिवेश्वराः। अयं वै नहुषः श्रीमान् देवराज्येऽभिषिच्यतां।
तेजस्वी च यशस्वी च धार्म्मिकश्चैव नित्यदा। ते गत्वा त्वब्रुवन् सर्व्वे राजा नो भव पार्थिव।
स तानुवाच नहुषो देवानृषिगणांस्तथा। पितृभिः सहितान् राजन् परीप्सन् हितमात्मनः।
दुर्ब्बलोऽहं न मे शक्तिर्भवतां परिपालने। बलवान् जायते राजा बलं शक्रे हि नित्यदा। २४५
तमब्रुवन् पुनः सर्व्वे देवा ऋषिपुरोगमाः। अस्माकं तपसा युक्तः पाहि राज्यं त्रिपिष्टपे।
परस्परभयं घोरमस्माकं हि न संशयः। अभिषिच्यस्व राजेन्द्र भव राजा त्रिपिष्टपे।
देवदानवयक्षाणामृषीणां रक्षसां तथा। पितृगन्धर्व्वभूतानां चक्षुर्व्विषयवर्त्तिनां।
तेज आदास्यसे पश्यन् बलवांश्च भविष्यसि। धर्म्मं पुरस्कृत्य सदा सर्वलोकाधिपो भव।
ब्रह्मर्षींश्चापि देवांश्च गोपयस्व त्रिपिष्टपे। अभ्यषिच्यत राजेन्द्र ततो राजा त्रिपिष्टपे। २५०
धर्मं पुरस्कृत्य तदा सर्व्वलोकाधिपोऽभवत्। सुदुर्लभं वरं लब्ध्वा प्राप्य राज्यं त्रिपिष्टपे।
धर्म्मात्मा सततं भूत्वा कामात्मा समपद्यत। देवोद्यानेषु सर्व्वेषु नन्दनोपवनेषु च।
कैलासे हिमवत्पृष्ठे मन्दरे श्वेतपर्व्वते। सह्ये महेन्द्रे मलये समुद्रेषु सरित्सु च।
अप्सरोभिः परिवृतो देवकन्यासमावृतः। नहुषो देवराजोऽथ क्रीडन् बहुविधं तदा।
शृण्वन् दिव्या बहुविधाः कथाः श्रुतिमनोहराः। वादित्राणि च सर्वाणि गीतञ्च मधुरस्वनं। २५५
विश्वावसुर्नारदश्च गन्धर्व्वाप्सरसां गणाः। ऋतवः षट् च देवेन्द्रं मूर्त्तिमन्त उपस्थिताः।
मारुतः सुरभिर्व्वाति मनोज्ञः सुखशीतलः। एवञ्च क्रीडतस्तस्य नहुषस्य दुरात्मनः।
सम्प्राप्ता दर्शनं देवी शक्रस्य महिषी प्रिया। स तां सन्दृश्य दुष्टात्मा प्राह सर्व्वान् सभासदः।
इन्द्रस्य महिषी देवी कस्मान्मां नोपतिष्ठति। अहमिन्द्रोऽस्मि देवानां लोकानाञ्च तथेश्वरः।
आगच्छतु शची मह्यं क्षिप्रमद्य निवेशनं। तच्छ्रुत्वा दुर्मना देवी बृहस्पतिमुवाच ह। २६०
रक्ष मां नहुषाद्ब्रह्मंस्त्वामस्मि शरणं गता। सर्व्वलक्षणसम्पन्नां ब्रह्मंस्त्वं मां प्रभाषसे।
देवराजस्य दयितामत्यन्तसुखभागिनीं। अवैधव्येन युक्तां चाप्येकपत्नीं पतिव्रतां।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

उक्तवानसि मां पूर्व्वमृतां तां कुरु वै गिरं। नोक्तपूर्व्वञ्च भगवन् वृथा ते किञ्चिदीश्वर।
तस्मादेतत् भवेत् सत्यं त्वयोक्तं द्विजसत्तम। बृहस्पतिरथोवाच शक्राणीं भयमोहितां।
यदुक्ताऽसि मया देवि सत्यं तद्भविता ध्रुवं। द्रक्ष्यसे देवराजानमिन्द्रं शीघ्रमिहागतं। २६५
न भेतव्यञ्च नहुषात्सत्यमेतद्ब्रवीमि ते। समानयिष्ये शक्रेण न चिराद्भवतीमहं।
अथ शुश्राव नहुषः शक्राणीं शरणं गतां। बृहस्पतेरङ्गिरसश्चुक्रोध स नृपस्तदा।
इति श्रीमहाभारते उद्योगपर्व्वणि सेनोद्योगपर्व्वणि इन्द्राणीभये दशमोऽध्यायः॥ १०॥
॥ शल्य उवाच॥ क्रुद्धं तु नहुषं दृष्ट्वा देवा ऋषिपुरोगमाः। अब्रुवन् देवराजानं नहुषं घोरदर्शनं।
देवराज जहि क्रोधं त्वयि क्रुद्धे जगद्विभो। त्रस्तं सासुरगन्धर्व्वं सकिन्नरमहोरगं।
जहि क्रोधमिमं साधो न कुप्यन्ति भवद्विधाः। परस्य पत्नी सा देवी प्रसीदस्व सुरेश्वर। २७०
निवर्त्तय मनः पापात्परदाराभिमर्षणात्। देवराजोऽसि भद्रं ते प्रजा धर्म्मेण पालय।
एवमुक्तो न जग्राह तद्वचः काममोहितः। अथ देवानुवाचेदमिन्द्रं प्रति सुराधिपः।
अहल्या धर्षिता पूर्व्वमृषिपत्नी यशस्विनी। जीवतो भर्त्तुरिन्द्रेण स वः किं न निवारितः।
बहूनि च नृशंसानि कृतानीन्द्रेण वै पुरा। वैधर्म्याण्युपधाश्चैव स वः किं न निवारितः।
उपतिष्ठतु देवी मामेतदस्या हितं परं। युष्माकञ्च सदा देवाः शिवमेवं भविष्यति। २७५
॥ देवा ऊचुः॥ इन्द्राणीमानयिष्यामो यथेच्छसि दिवस्पते। जहि क्रोधमिमं वीर प्रीतो भव सुरेश्वर।
॥ शल्य उवाच॥ इत्युक्त्वा तं तदा देवा ऋषिभिः सह भारत। जग्मुर्बृहस्पतिं वक्तुमिन्द्राणीं चाशुभं वचः।
जानीमः शरणं प्राप्तामिन्द्राणीं तव वेश्मनि। दत्ताभयाञ्च विप्रेन्द्र त्वया देवर्षिसत्तम।
ते त्वां देवाः सगन्धर्व्वा ऋषयश्च महाद्युते। प्रसादयन्ति चेन्द्राणी नहुषाय प्रदीयतां।
इन्द्राद्विशिष्टो नहुषो देवराजो महाद्युतिः। वृणोत्विमं वरारोहा भर्त्तृत्वे वरवर्णिनी। २८०
एवमुक्ते तु सा देवी बाष्पमुत्सृज्य सस्वनं। उवाच रुदती दीना बृहस्पतिमिदं वचः।
नाहमिच्छामि नहुषं पतिं देवर्षिसत्तम। शरणागताऽस्मि ते ब्रह्मंस्त्रायस्व महतो भयात्।
॥ बृहस्पतिरुवाच॥ शरणागतां न त्यजेयमिन्द्राणीं मम निश्चयः। धर्म्मज्ञां सत्यशीलाञ्च न त्यजेयमनिन्दिते।
नाकार्य्यं कर्त्तुमिच्छामि ब्राह्मणः सन् विशेषतः। श्रुतधर्म्मा सत्यशीलो जानन्धर्म्मानुशासनं।
नाहमेतत्करिष्यामि गच्छध्वं वै सुरोत्तमाः। अस्मिंश्चार्थे पुरा गीतं ब्रह्मणा श्रूयतामिदं। २८५
न तस्य बीजं रोहति बीजकाले न तस्य वर्षं वर्षति वर्षकाले। भीतं प्रपन्नं प्रददाति शत्रवे न स त्रातारं लभते त्राण
मिच्छन्।
मोघमन्नं बिन्दति चाप्यचेताः स्वर्गाल्लोकाद्भ्रश्यति नष्टचेष्टः। भीतं प्रपन्नं प्रददाति यो वै न तस्य हव्यं प्रतिगृह्णन्ति देवाः।
प्रमीयते चास्य प्रजा ह्यकाले सदा विवासं पितरोऽस्य कुर्व्वते। भीतं प्रपन्नं प्रददाति शत्रवे सेन्द्रा देवाः प्रहरन्त्यस्य वज्रं।
एतदेवं विजानन्वै न दास्यामि शचीमिमां। इन्द्राणीं विश्रुतां लोके शक्रस्य महिषीं प्रियां।
अस्या हितं भवेद्यच्च मम चापि हितं भवेत्। क्रियतां तत्सुरश्रेष्ठा न हि दास्याम्यहं शचीं। २९०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding: IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ शल्य उवाच ॥ अथ देवाः सगन्धर्व्वा गुरुमाङ्गिरिदं वचः। कथं सुनीतं नु भवेन्मन्त्रयस्व बृहस्पते।
॥ बृहस्पतिरुवाच ॥ नहुषं याचतां देवी किञ्चित्कालान्तरं शुभा। इन्द्राणी हितमेतद्धि तथाऽस्माकं भविष्यति।
बहुविघ्नः सुराः कालः कालं कालो नयिष्यति। गर्व्वितो बलवांश्चापि नहुषो वरसंश्रयात्।
॥ शल्य उवाच ॥ ततस्तेन तथोक्ते तु प्रीता देवास्तदाऽब्रुवन्। ब्रह्मन्साध्विदमुक्तं ते हितं सर्व्वदिवौकसां।
एवमेतद्द्विजश्रेष्ठ देवी चेयं प्रसाद्यतां। ततः समस्ता इन्द्राणीं देवास्त्वग्निपुरोगमाः। ३९५
ऊचुर्व्वचनमव्यग्रा लोकानां हितकाम्यया।
॥ देवा ऊचुः ॥ त्वया जगदिदं सर्व्वं धृतं स्थावरजङ्गमं। एकपत्न्यसि सत्या च गच्छस्व नहुषं प्रति।
क्षिप्रं त्वामभिकामश्च विनशिष्यति पापकृत्। नहुषो देवि शक्रश्च सुरैश्वर्य्यमवाप्स्यति।
एवं विनिश्चयं कृत्वा इन्द्राणी कार्य्यसिद्धये। अभ्यगच्छत सव्रीडा नहुषं घोरदर्शनं।
दृष्ट्वा तां नहुषश्चापि वयोरूपसमन्वितां। समहृष्यत दुष्टात्मा कामोपहतचेतनः। ४००
इति श्रीमहाभारते उद्योगपर्व्वणि सेनोद्योगपर्व्वणि इन्द्राणीकालयाचने एकादशोऽध्यायः ॥ ११ ॥
॥ शल्य उवाच ॥ अथ तामब्रवीद्दृष्ट्वा नहुषो देवराट् तदा। त्रयाणामपि लोकानामहमिन्द्रः शुचिस्मिते।
भजस्व मां वरारोहे पतित्वे वरवर्णिनि। एवमुक्ता तु सा देवी नहुषेण पतिव्रता।
प्रावेपत भयोद्विग्ना प्रवाते कदली यथा। प्रणम्य सा हि ब्रह्माणं शिरसा तु कृताञ्जलिः।
देवराजमथोवाच नहुषं घोरदर्शनं। कालमिच्छाम्यहं लब्धुं त्वत्तः कञ्चित् सुरेश्वर।
न हि विज्ञायते शक्रः किं वा प्राप्तः क्व वा गतः। तत्त्वमेतत्तु विज्ञाय यदि न ज्ञायते प्रभो। ४०५
ततोऽहं त्वामुपस्थास्ये सत्यमेतद्ब्रवीमि ते। एवमुक्तः स इन्द्राण्या नहुषः प्रीतिमानभूत्।
॥ नहुष उवाच ॥ एवं भवतु सुश्रोणि यथा मामिह भाषसे। ज्ञात्वा चागमनं कार्य्यं सत्यमेतदनुस्मरेः।
नहुषेण विसृष्टा च निश्चक्राम ततः शुभा। बृहस्पतिनिकेतं च सा जगाम यशस्विनी।
तस्याः संश्रुत्य च वचो देवास्त्वग्निपुरोगमाः। चिन्तयामासुरेकाग्राः शक्रार्थं राजसत्तम।
देवदेवेन सङ्गम्य विष्णुना प्रभविष्णुना। ऊचुश्चैनं समुद्विग्ना वाक्यं वाक्यविशारदाः। ४१०
ब्रह्मवध्याभिभूतो वै शक्रः सुरगणेश्वरः। गतिश्च नस्त्वं देवेश पूर्व्वजो जगतः प्रभुः।
रक्षार्थं सर्व्वभूतानां विष्णुत्वमुपजग्मिवान्। त्वद्वीर्य्यान्निहते वृत्रे वासवो ब्रह्महत्यया।
वृतः सुरगणश्रेष्ठ मोक्षं तस्य विनिर्द्दिश। तेषां तद्वचनं श्रुत्वा देवानां विष्णुरब्रवीत्।
मामेव यजतां शक्रः पावयिष्यामि वज्रिणं। पुण्येन हयमेधेन मामिष्ट्वा पाकशासनः।
पुनरेष्यति देवानामिन्द्रत्वमकुतोभयः। दुष्कर्म्मभिश्च नहुषो नाशं यास्यति दुर्म्मतिः। ४१५
कञ्चित्कालमिमं देवा मर्षयध्वमतन्द्रिताः। श्रुत्वा विष्णोः शुभां सत्यां वाणींताममृतोपमां।
ततः सर्व्वे सुरगणाः सोपाध्यायाः सहर्षिभिः। यत्र शक्रो भयोद्विग्नस्तं देशमुपचक्रमुः।
तत्राश्वमेधः सुमहान्महेन्द्रस्य महात्मनः। वर्त्तते पावनार्थं वै ब्रह्महत्यापहो नृप।
विभज्य ब्रह्महत्यान्तु वृक्षेषु च नदीषु च। पर्व्वतेषु पृथिव्याञ्च स्त्रीषु चैव युधिष्ठिर।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

स विभज्य च भूतेषु विसृज्य च सुरेश्वरः । विज्वरो धूतपाप्मा च वासवोऽभवदात्मवान् ।
अकम्पनं नहुषं स्थानाद्दृष्ट्वा बलनिसूदनः । तेजोघ्नं सर्व्वभूतानां वरदानाच्च दुःसहं ।
ततः शचीपतिर्द्देवः पुनरेव व्यनश्यत । अदृश्यः सर्व्वभूतानां कालाकाङ्क्षी चचार ह ।
प्रनष्टे तु ततः शक्रे शची शोकसमन्विता । हा शक्रेति तदा देवी विललाप सुदुःखिता ।
यदि दत्तं यदि हुतं गुरवस्तोषिता यदि । एकभर्त्तृत्वमेवास्तु सत्यं यद्यस्ति वा मयि ।
पुण्यां चेमामहं दिव्यां प्रवृत्तामुत्तरायणे । देवीं रात्रिं नमस्यामि सिध्यतां मे मनोरथः ।
प्रयताच्च निशां देवीमुपातिष्ठत तत्र सा । पतिव्रतात्वात्सत्येन सोपश्रुतिमथाकरोत् ।
यत्रास्ते देवराजोऽसौ तं देशं दर्शयस्व मे । इत्याहोपश्रुतिं देवीं सत्यं सत्येन दृश्यतां ।
इति श्रीमहाभारते उद्योगपर्व्वणि सेनोद्योगपर्व्वणि उपश्रुतियाचने द्वादशोऽध्यायः ॥ १२ ॥
॥ शल्य उवाच ॥ अथैनां रूपिणीं साध्वीमुपातिष्ठदुपश्रुतिः । तां वयोरूपसम्पन्नां दृष्ट्वा देवीमुपस्थितां ।
इन्द्राणी सम्प्रहृष्टात्मा सम्पूज्यैनामथाब्रवीत् । इच्छामि त्वामहं ज्ञातुं का त्वं ब्रूहि वरानने ।
॥ उपश्रुतिरुवाच ॥ उपश्रुतिरहं देवि तवान्तिकमुपागता । दर्शने चैव सम्प्राप्ता तव सत्येन भाविनि ।
पतिव्रता च युक्ता च यमेन नियमेन च । दर्शयिष्यामि ते शक्रं देवं वृत्रनिसूदनं ।
क्षिप्रमन्वेहि भद्रं ते द्रक्ष्यसे सुरसत्तमं । ततस्तां प्रस्थितां देवीमिन्द्राणी सा समन्वगात् ।
देवारण्यान्यतिक्रम्य पर्व्वतांश्च बहूंस्ततः । हिमवन्तमतिक्रम्य उत्तरं पार्श्वमागमत् ।
समुद्रञ्च समासाद्य बहुयोजनविस्तृतं । आससाद महाद्वीपं नानाद्रुमलतावृतं ।
तत्रापश्यत्सरो दिव्यं शुभं शकुनिभिर्वृतं । शतयोजनविस्तीर्णं तावदेवायतं शुभं ।
तत्र दिव्यानि पद्मानि पञ्चवर्णानि भारत । षट्पदैरुपगीतानि प्रफुल्लानि सहस्रशः ।
सरसस्तस्य मध्ये तु पद्मिनी महती शुभा । गौरेणोन्नतनालेन पद्मेन महता वृता ।
पद्मस्य भित्त्वा नालञ्च विवेश सहिता तया । विसतन्तुप्रविष्टञ्च तत्रापश्यच्छतक्रतुं ।
तं दृष्ट्वा च सुसूक्ष्मेण रूपेणावस्थितं प्रभुं । सूक्ष्मरूपधरा देवी बभूवोपश्रुतिश्च सा ।
इन्द्रं तुष्टाव चेन्द्राणी विश्रुतैः पूर्व्वकर्मभिः । स्तूयमानस्ततो देवः शचीमाह पुरन्दरः ।
किमर्थमसि सम्प्राप्ता विज्ञातश्च कथं त्वहं । ततः सा कथयामास नहुषस्य विचेष्टितं ।
इन्द्रत्वं त्रिषु लोकेषु प्राप्य वीर्य्यसमन्वितः । दर्पाविष्टश्च दुष्टात्मा मामुवाच शतक्रतो ।
उपतिष्ठेति स क्रूरः कालञ्च कृतवान्मम । यदि न त्रास्यसि विभो करिष्यति स मां वशे ।
एतेन चाहं सम्प्राप्ता नूनं शक्र तवान्तिकं । जहि रौद्रं महाबाहो नहुषं पापनिश्चयं ।
प्रकाशयात्मनात्मानं दैत्यदानवसूदनं । तेजः समाप्नुहि विभो देवराज्यं प्रशाधि च ।
इति श्रीमहाभारते उद्योगपर्व्वणि सेनोद्योगपर्व्वणि इन्द्राणीन्द्रस्तवे त्रयोदशोऽध्यायः ॥ १३ ॥
॥ शल्य उवाच ॥ एवमुक्तः स भगवान् शच्या तां पुनरब्रवीत् । विक्रमस्य न कालोऽयं नहुषो बलवत्तरः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding by MoE Grant2 Equipment Heritage Foundation, Jalgaon

विवर्द्धितश्च ऋषिभिर्हव्यैः कव्यैश्च भाविनि। नीतिमत्र विधास्यामि देवि तां कर्त्तुमर्हसि।
गुह्यं चैतत्त्वया कार्य्यं नाख्यातव्यं शुभे क्वचित्। गत्वा नहुषमेकान्ते ब्रवीहि च सुमध्यमे।
ऋषियानेन दिव्येन मामुपैहि जगत्पते। एवं तव वशे प्रीता भविष्यामीति तं वद।
इत्युक्ता देवराजेन पत्नी सा कमलेक्षणा। एवमस्त्वित्यथोक्त्वा तु जगाम नहुषं प्रति। ४५०
नहुषस्तां ततो दृष्ट्वा सस्मितो वाक्यमब्रवीत्। स्वागतं ते वरारोहे किङ्करोमि शुचिस्मिते।
भक्तं मां भज कल्याणि किमिच्छसि मनस्विनि। तव कल्याणि यत्कार्य्यं तत्करिष्ये सुमध्यमे।
न च व्रीडा त्वया कार्य्या सुश्रोणि मयि विश्वसेः। सत्येन वै शपे देवि करिष्ये वचनं तव।
॥ इन्द्राण्युवाच ॥ यो मे कृतस्त्वया कालस्तमाकाङ्क्षे जगत्पते। ततस्त्वमेव भर्त्ता मे भविष्यसि सुराधिप।
कार्य्यञ्च हृदि मे यत्तद्देवराजावधारय। वक्ष्यामि यदि मे राजन् प्रियमेतत्करिष्यसि। ४५५
वाक्यं प्रणयसंयुक्तं ततः स्यां वशगा तव। इन्द्रस्य वाजिनो वाहा हस्तिनोऽथ रथास्तथा।
इच्छाम्यहमथापूर्व्वं वाहनं ते सुराधिप। यन्न विष्णोर्न रुद्रस्य नासुराणां न रक्षसां।
वहन्तु त्वां महाभागा ऋषयः सङ्गता विभो। सर्व्वे शिविकया राजन्नेतद्धि मम रोचते।
नासुरेषु न देवेषु तुल्यो भवितुमर्हसि। सर्व्वेषां तेज आदत्से स्वेन वीर्य्येण दर्शनात्।
न ते प्रमुखतः स्थातुं कश्चिच्छक्नोति वीर्य्यवान्। ४६०
॥ शल्य उवाच ॥ एवमुक्तस्तु नहुषः प्राहृष्यत तदा किल। उवाच वचनं चापि सुरेन्द्रस्तामनिन्दितां।
॥ नहुष उवाच ॥ अपूर्व्ववाहनमिदं त्वयोक्तं वरवर्णिनि। दृढं मे रुचितं देवि त्वद्वशोऽस्मि वरानने।
न ह्यल्पवीर्य्यो भवति यो वाहान् कुरुते मुनीन्। अहं तपस्वी बलवान् भूतभव्यभवत्प्रभुः।
मयि क्रुद्धे जगन्न स्यान्मयि सर्व्वं प्रतिष्ठितं। देवदानवगन्धर्व्वाः किन्नरोरगराक्षसाः।
न मे क्रुद्धस्य पर्य्याप्ताः सर्व्वे लोकाः शुचिस्मिते। चक्षुषा यं प्रपश्यामि तस्य तेजो हराम्यहं। ४६५
तस्मात्ते वचनं देवि करिष्यामि न संशयः। सप्तर्षयो मां वक्ष्यन्ति सर्व्वे ब्रह्मर्षयस्तथा।
पश्य माहात्म्यमस्माकमृद्धिञ्च वरवर्णिनि।
॥ शल्य उवाच ॥ एवमुक्त्वा तु तां देवीं विसृज्य च वराननां। विमाने योजयित्वा स ऋषीन्नियममास्थितान्।
अब्रह्मण्यो बलोपेतो मत्तो मदबलेन च। कामवृत्तः स दुष्टात्मा वाहयामास तानृषीन्।
नहुषेण विसृष्टा च बृहस्पतिमथाब्रवीत्। समयोऽल्पावशेषो मे नहुषेणेह यः कृतः। ४७०
शक्रं मृगय शीघ्रं त्वं भक्तायाः कुरु मे दयां। वाढमित्येव भगवान् बृहस्पतिरुवाच तां।
न भेतव्यं त्वया देवि नहुषाद्दुष्टचेतसः। नह्येष स्थास्यति चिरं गत एव नराधमः।
अधर्म्मज्ञो महर्षीणां वाहनाच्च ततः शुभे। इष्टिञ्चाहं करिष्यामि विनाशायास्य दुर्म्मतेः।
शक्रं चाधिगमिष्यामि माभैस्त्वं भद्रमस्तु ते। ततः प्रज्वाल्य विधिवज्जुहाव परमं हविः।
बृहस्पतिर्महातेजा देवराजोपलब्धये। हुत्वाऽग्निं सोऽब्रवीद्राजन् शक्रमन्विष्यतामिति। ४७५
तस्माच्च भगवान् देवः स्वयमेव हुताशनः। स्त्रीवेशमद्भुतं कृत्वा तत्रैवान्तरधीयत।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

स दिशः प्रदिशश्चैव पर्व्वतांश्च वनानि च । पृथिवीञ्चान्तरिक्षञ्च विचित्याथ मनोगतिः ।
निमेषान्तरमात्रेण बृहस्पतिमुपागमत् ।
॥ अग्निरुवाच ॥ बृहस्पते न पश्यामि देवराजमिह क्वचित् । आपः शेषाः सदा चापः प्रवेष्टुं नोत्सहाम्यहं ।
न मे तत्र गतिर्ब्रह्मन् किमन्यत्करवाणि ते । तमब्रवीद्देवगुरुरपो विश महाद्युते । ४८०
॥ अग्निरुवाच ॥ नापः प्रवेष्टुं शक्ष्यामि क्षयो मेऽत्र भविष्यति । शरणं त्वां प्रपन्नोऽस्मि स्वस्ति तेऽस्तु महाद्युते ।
अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितं । तेषां सर्व्वत्रगन्तेजः स्वासु योनिषु शाम्यति ।
इति श्रीमहाभारते उद्योगपर्व्वणि सेनोद्योगपर्व्वणि बृहस्पत्यग्निसंवादे चतुर्द्दशोऽध्यायः ॥ १४ ॥
॥ बृहस्पतिरुवाच ॥ त्वमग्ने सर्व्वदेवानां मुखं त्वमसि हव्यवाट् । त्वमन्तः सर्व्वभूतानां गूढश्चरसि साक्षिवत् ।
त्वामाहुरेकं कवयस्त्वामाहुस्त्रिविधं पुनः । त्वया त्यक्तं जगच्चेदं सद्यो नश्येद्धुताशन ।
कृत्वा तुभ्यं नमो विप्राः स्वकर्म्मविजितां गतिं । गच्छन्ति सह पत्नीभिः सुतैरपि च शाश्वतीं । ४८५
त्वमेवाग्ने हव्यवाहस्त्वमेव परमं हविः । यजन्ति सत्रैस्त्वामेव यज्ञैश्च परमाध्वरे ।
सृष्ट्वा लोकांस्त्रीनिमान् हव्यवाह प्राप्ते काले पचसि पुनः समिद्धः । त्वं सर्व्वस्य भुवनस्य प्रसूतिस्त्वमेवाग्ने भवसि पुनः प्रतिष्ठा ।
त्वामग्ने जलदानाहुर्व्विद्युतश्च मनीषिणः । वहन्ति सर्व्वभूतानि त्वत्तो निष्क्रम्य हेतयः ।
त्वय्यापो निहिताः सर्व्वास्त्वयि सर्व्वमिदं जगत् । न तेऽस्त्यविदितं किञ्चित् त्रिषु लोकेषु पावक ।
स्वयोनिं भजते सर्व्वो विशस्वापोऽविशङ्कितः । अहं त्वां वर्द्धयिष्यामि ब्राह्मैर्म्मन्त्रैः सनातनैः । ४९०
एवं स्तुतो हव्यवाट् स भगवान् कविरुत्तमः । बृहस्पतिमथोवाच प्रीतिमान्वाक्यमुत्तमं ।
दर्शयिष्यामि ते शक्रं सत्यमेतद्ब्रवीमि ते ।
॥ शल्य उवाच ॥ प्रविश्यापस्ततो वह्निः ससमुद्राः सपल्वलाः । आजगाम सरस्तच्च गूढो यत्र शतक्रतुः ।
अथ तत्रापि पद्मानि विचिन्वन् भरतर्षभ । अन्वपश्यत् स देवेन्द्रं बिसमध्यगतं तदा ।
आगत्य च ततस्तूर्णं तमाचष्ट बृहस्पतेः । अणुमात्रेण वपुषा पद्मतन्त्वाश्रितं प्रभुं । ४९५
गत्वा देवर्षिगन्धर्व्वैः सहितोऽथ बृहस्पतिः । पुराणैः कर्म्मभिर्द्देवं तुष्टाव बलसूदनं ।
महासुरो हतः शक्र नमुचिर्द्दारुणस्त्वया । शम्बरश्च बलश्चैव तथोभौ घोरविक्रमौ ।
शतक्रतो विवर्द्धस्व सर्व्वान् शत्रून्निसूदय । उत्तिष्ठ शक्र सम्पश्य देवर्षींश्च समागतान् ।
महेन्द्र दानवान् हत्वा लोकास्त्रातास्त्वया विभो । अपां फेनं समासाद्य विष्णुतेजोऽतिबृंहितं ।
त्वया वृत्रो हतः पूर्व्वं देवराज जगत्पते । ५००
त्वं सर्व्वभूतेषु शरण्य ईड्यस्त्वया समं विद्यते नेह भूतं । त्वया धार्य्यन्ते सर्वभूतानि शक्र त्वं देवानां महिमानं चकर्थ ।
पाहि सर्व्वान्सलोकांश्च महेन्द्र बलमाप्नुहि । एवं संस्तूयमानश्च सोऽवर्द्धत शनैः शनैः ।
स्वञ्चैव वपुरास्थाय बभूव स बलान्वितः । अब्रवीच्च गुरुं देवो बृहस्पतिमवस्थितं ।
किं कार्य्यमवशिष्टं वो हतस्त्वाष्ट्रो महासुरः । वृत्रश्च सुमहाकायो यो वै लोकानताशयत् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ बृहस्पतिरुवाच ॥ मानुषो नहुषो राजा देवर्षिगणतेजसा । देवराज्यमनुप्राप्तः सर्व्वान्नो बाधते भृशं । ५०५
॥ इन्द्र उवाच ॥ कथञ्च नहुषो राज्यं देवानां प्राप दुर्लभं । तपसा केन वा युक्तः किंवीर्य्यो वा बृहस्पते ।
॥ बृहस्पतिरुवाच ॥ देवा भीताः शक्रमकामयन्त त्वया त्यक्तं महदैन्द्रं पदं तत् । तदा देवाः पितरोऽथर्षयश्च गन्धर्व्वमुख्याश्च समेत्य सर्व्वे ।
गत्वाऽब्रुवन्नहुषं तत्र शक्र त्वं नो राजा भव भुवनस्य गोप्ता । तानब्रवीन्नहुषो नास्मि शक्त आप्यायध्वं तपसा तेजसा मां ।
एवमुक्तैर्व्वर्द्धितश्चापि देवैराजाऽभवन्नहुषो घोरवीर्य्यः । त्रैलोक्ये च प्राप्य राज्यं महर्षीन् कृत्वा वाहान् याति लोकान् दुरात्मा ।
तेजोहरं दृष्टिविषं सुघोरं मा त्वं पश्येर्नहुषं वै कदाचित् । देवाश्च सर्व्वे नहुषं भयार्त्ता न पश्यन्ते गूढरूपाश्चरन्तः । ५१०
॥ शल्य उवाच ॥ एवं वदत्यङ्गिरसां वरिष्ठे बृहस्पतौ लोकपालः कुवेरः । वैवस्वतश्चैव यमः पुराणो देवश्च सोमो वरुणश्चाजगाम ॥
ते वै समागम्य महेन्द्रमूचुर्द्दिष्ट्या त्वाष्ट्रो निहतश्चैव वृत्रः । दिष्ट्या च त्वां कुशलिनमक्षतञ्च पश्यामो वै निहतारिञ्च शक्र ।
स तान् यथावच्च हि लोकपालान् समेत्य वै प्रीतमना महेन्द्रः । उवाच चैतान् प्रतिभाष्य शक्रः सञ्चोदयिष्यन्नहुषस्यान्तरेण ।
राजा देवानां नहुषो घोररूपस्तत्र सह्यं दीयतां मे भवद्भिः । ते चाब्रुवन्नहुषो घोररूपो दृष्टीविषस्तस्य बिभीम देव ।
त्वं चेद्राजानं नहुषं पराजयेस्ततो वयं भागमर्हाम शक्र । इन्द्रोऽब्रवीद्भवतु भवानपाम्पतिर्यमः कुवेरश्च मयाऽभिषेकं । ५१५
सम्प्राप्नुवन्त्वद्य सहैव दैवतैरिपुं जयामो नहुषं घोरदृष्टिं । ततः शक्रं ज्वलनोऽप्याह भागं प्रयच्छ मह्यं भवतः सह्यं करिष्ये ।
तं प्राह शक्रो भविताऽग्ने तवापि चैन्द्राग्न्यो वै भाग एको महाक्रतौ ।
॥ शल्य उवाच ॥ एवं सञ्चिन्त्य भगवान् महेन्द्रः पाकशासनः । कुवेरं सर्व्वयक्षाणां धनानाञ्च प्रभुं तथा ।
वैवस्वतं पितॄणाञ्च वरुणञ्चाप्यपां तथा । आधिपत्यं ददौ शक्रः सञ्चिन्त्य वरदस्तथा ।
इति श्रीमहाभारते उद्योगपर्व्वणि सेनोद्योगपर्व्वणि इन्द्रवरुणादिसंवादे पञ्चदशोऽध्यायः ॥ १५ ॥
॥ शल्य उवाच ॥ अथ सञ्चिन्तयानस्य देवराजस्य धीमतः । नहुषस्य वधोपायं लोकपालैः सदैव तैः । ५२०
तपस्वी तत्र भगवानगस्त्यः प्रत्यदृश्यत । सोऽब्रवीदर्च्च्य देवेन्द्रं दिष्ट्या वै वर्द्धते भवान् ।
विश्वरूपविनाशेन वृत्रासुरवधेन च । दिष्ट्या च नहुषो भ्रष्टो देवराज्यात्पुरन्दर ।
दिष्ट्या हतारिं पश्यामि भवन्तं बलसूदन ।
॥ इन्द्र उवाच ॥ स्वागतं ते महर्षेऽस्तु प्रीतोऽहं दर्शनात्तव । पाद्यमाचमनीयञ्च गामर्घ्यञ्च प्रतीच्छ मे ।
॥ शल्य उवाच ॥ पूजितं चोपविष्टं तमासने मुनिसत्तमं । पर्य्यपृच्छत देवेशः प्रहृष्टो ब्राह्मणर्षभं । ५२५
एतदिच्छामि भगवन् कथ्यमानं द्विजोत्तम । परिभ्रष्टः कथं स्वर्गान्नहुषः पापनिश्चयः ।
॥ अगस्त्य उवाच ॥ शृणु शक्र प्रियं वाक्यं यथा राजा दुरात्मवान् । स्वर्गाद्भ्रष्टो दुराचारो नहुषो बलदर्पितः ।
श्रमार्त्तास्तु वहन्तस्तं नहुषं पापकारिणं । देवर्षयो महाभागास्तथा ब्रह्मर्षयोऽमलाः ।
पप्रच्छुर्नहुषं देव संशयं जयतां वर । य इमे ब्राह्मणाः प्रोक्ता मन्त्रा वै प्रोक्षणे गवां ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

एते प्रमाणं भवत उताहो नेति वासव। नहुषो नेति तानाह तमसा मूढचेतनः। ५१०
॥ ऋषय ऊचुः ॥ अधर्म्मे संप्रवृत्तस्त्वन्धर्म्मं न प्रतिपद्यसे। प्रमाणमेतदस्माकं पूर्व्वं प्रोक्तं महर्षिभिः।
॥ अगस्त्य उवाच ॥ ततो विवदमानः स मुनिभिः सह वासव। अथ मामस्पृशन्मूर्द्ध्नि पादेनाधर्म्मयोजितः।
तेनाभूद्धततेजाश्च निःश्रीकश्च महीपतिः। ततस्तं सहसाविग्नमवोचं भयपीडितं।
यस्मात्पूर्व्वैः कृतं ब्रह्म ब्रह्मर्षिभिरनुष्ठितं। अदुष्टं दूषयसि वै यच्च मूर्द्ध्न्यस्पृशः पदा।
यच्चापि त्वमृषीन्मूढ ब्रह्मकल्पान् दुरासदान्। वाहान् कृत्वा वाहयसि तेन स्वर्गाद्धतप्रभः। ५१५
ध्वंस पाप परिभ्रष्टः क्षीणपुण्यो महीतलं। दशवर्षसहस्राणि सर्पेरूपधरो महान्।
विचरिष्यसि पूर्णेषु पुनः स्वर्गमवाप्स्यसि। एवं भ्रष्टो दुरात्मा स देवराज्यादरिन्दम।
दिष्ट्या वर्द्धामहे शक्र हतो ब्राह्मणकण्टकः। त्रिपिष्टपं प्रपद्यस्व पाहि लोकाञ्शचीपते।
जितेन्द्रियो जितामित्रस्तूयमानो महर्षिभिः।
॥ शल्य उवाच ॥ ततो देवा भृशं तुष्टा महर्षिगणसंवृताः। पितरश्चैव यक्षाश्च भुजगा राक्षसास्तथा। ५२०
गन्धर्व्वा देवकन्याश्च सर्व्वे चाप्सरसां गणाः। सरांसि सरितः शैलाः सागराश्च विशांपते।
उपागम्याब्रुवन् सर्व्वे दिष्ट्या वर्द्धसि शत्रुहन्। हतश्च नहुषः पापो दिष्ट्याऽगस्त्येन धीमता।
दिष्ट्या पापसमाचारः कृतः सर्पो महीतले।

इति श्रीमहाभारते उद्योगपर्व्वणि सेनोद्योगपर्व्वणि इन्द्रागस्त्यसंवादे नहुषभ्रंशे षोडशोऽध्यायः॥ १६॥

॥ शल्य उवाच॥ ततः शक्रः स्तूयमानो गन्धर्व्वाप्सरसां गणैः। ऐरावतं समारुह्य द्विपेन्द्रं लक्षणैर्युतं।
पावकः सुमहातेजा महर्षिश्च बृहस्पतिः। यमश्च वरुणश्चैव कुवेरश्च धनेश्वरः। ५२५
सर्व्वैर्देवैः परिवृतः शक्रो वृत्रनिसूदनः। गन्धर्व्वैरप्सरोभिश्च यातस्त्रिभुवनं प्रभुः।
स समेत्य महेन्द्राण्या देवराजः शतक्रतुः। मुदा परमया युक्तः पालयामास देवराट्।
ततः स भगवांस्तत्र अङ्गिराः समदृश्यत। अथर्व्ववेदमन्त्रैश्च देवेन्द्रं समपूजयत्।
ततस्तु भगवानिन्द्रः प्रहृष्टः समपद्यत। वरञ्च प्रददौ तस्मै अथर्व्वाङ्गिरसे तदा।
अथर्व्वाङ्गिरसो नाम वेदेऽस्मिन् वै भविष्यति। उदाहरणमेतद्धि यज्ञभागञ्च लप्स्यसे। ५३०
एवं सम्पूज्य भगवानथर्व्वाङ्गिरसं तदा। व्यसर्जयन्महाराज देवराजः शतक्रतुः।
सम्पूज्य सर्व्वांस्त्रिदशानृषींश्चापि तपोधनान्। इन्द्रः प्रमुदितो राजा धर्म्मेणापालयत् प्रजाः।
एवं दुःखमनुप्राप्तमिन्द्रेण सह भार्य्यया। अज्ञातवासश्च कृतः शत्रूणां वधकाङ्क्षया।
नात्र मन्युस्त्वया कार्य्यो यत् क्लिष्टोऽसि महावने। द्रौपद्या सह राजेन्द्र भ्रातृभिश्च महात्मभिः।
एवं त्वमपि राजेन्द्र राज्यं प्राप्स्यसि भारत। वृत्रं हत्वा यथा प्राप्तः शक्रः कौरवनन्दन। ५३५
दुराचारश्च नहुषो ब्रह्मद्विट् पापचेतनः। अगस्त्यशापाभिहतो विनष्टः शाश्वतीः समाः।
एवं तव दुरात्मानः शत्रवः शत्रुसूदन। क्षिप्रं नाशङ्गमिष्यन्ति कर्णदुर्य्योधनादयः।
ततः सागरपर्य्यन्तां भोक्ष्यसे मेदिनीमिमां। भ्रातृभिः सहितो वीर द्रौपद्या च सहानया।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

उपाख्यानमिदं शक्रविजयं वेदसम्मितं। राज्ञा व्यूढेष्वनीकेषु श्रोतव्यं जयमिच्छता।
तस्मात्त्वंश्रावयामि त्वां विजये जयतां वर। संस्तूयमाना वर्द्धन्ते महात्मानो युधिष्ठिर। ५६०
क्षत्रियाणामभावोऽयं युधिष्ठिर महात्मनां। दुर्य्योधनापराधेन भीमार्जुनबलेन च।
आख्यानमिन्द्रविजयं य इदं नियतः पठेत्। धूतपाप्मा जितस्वर्गः परत्रेह च मोदते।
न चारिजं भयं तस्य नापुत्त्रो वा भवेन्नरः। नापदं प्राप्नुयात्काञ्चिद्दीर्घमायुश्च विन्दति।
सर्व्वत्र जयमाप्नोति न कदाचित् पराजयं।
॥ वैशम्पायन उवाच ॥ एवमाश्वासितो राजा शल्येन भरतर्षभ। पूजयामास विधिवच्छल्यं धर्म्मभृतां वरः। ५६५
श्रुत्वा तु शल्यवचनं कुन्तीपुत्त्रो युधिष्ठिरः। प्रत्युवाच महाबाहुर्मद्रराजमिदं वचः।
भवान् कर्णस्य सारथ्यं करिष्यति न संशयः। तत्र तेजोवधः कार्य्यः कर्णस्यार्जुनसंस्तवः।
॥ शल्य उवाच ॥ एवमेतत्करिष्यामि यथा मां सम्प्रभाषसे। यच्चान्यदपि शक्ष्यामि तत्करिष्याम्यहं तव।
॥ वैशम्पायन उवाच ॥ ततस्त्वामन्त्र्य कौन्तेयाञ्छल्यो मद्राधिपस्तदा। जगाम सबलः श्रीमान् दुर्य्योधनमरिन्दम।
इति श्रीमहाभारते उद्योगपर्व्वणि सैन्योद्योगपर्व्वणि शल्यगमने सप्तदशोऽध्यायः ॥ १७ ॥
॥ वैशम्पायन उवाच ॥ युयुधानस्ततो वीरः सात्वतानां महारथः। महता चतुरङ्गेण बलेनागाद्युधिष्ठिरं। ५७०
तस्य योधा महावीर्य्या नानादेशसमागताः। नानाप्रहरणा वीराः शोभयाञ्चक्रिरे बलं।
परश्वधैर्भिन्दिपालैः शूलतोमरमुद्गरैः। परिघैर्यष्टिभिः पाशैः करवालैश्च निर्म्मलैः।
खड्गकार्मुकनिर्य्यूहैः शरैश्च विविधैरपि। तैलधौतैः प्रकाशद्भिः तदशोभत वै बलं।
तस्य मेघप्रकाशस्य शस्त्रैस्तैः शोभितस्य च। बभूव रूपं सैन्यस्य मेघस्येव सविद्युतः।
अक्षौहिणी तु सा सेना तदा यौधिष्ठिरं बलं। प्रविश्यान्तर्दधे राजन् सागरं कुनदी यथा। ५७५
तथैवाक्षौहिणीं गृह्य चेदीनामृषभो बली। धृष्टकेतुरुपागच्छत्पाण्डवानमितौजसः।
मागधश्च जयत्सेनो जरासन्धिर्म्महाबलः। अक्षौहिण्यैव सैन्यस्य धर्म्मराजमुपागमत्।
तथैव पाण्ड्यो राजेन्द्र सागरानूपवासिभिः। वृतो बहुविधैर्य्योधैर्युधिष्ठिरमुपागमत्।
तस्य सैन्यमतीवासीत्तस्मिन् बलसमागमे। प्रेक्षणीयतरं राजन् सुवेशं बलवत्तदा।
द्रुपदस्याप्यभूत्सेना नानादेशसमागतैः। शोभिता पुरुषैः शूरैः पुत्त्रैश्चास्य महारथैः। ५८०
तथैव राजा मत्स्यानां विराटो वाहिनीपतिः। पार्व्वतीयैर्महीपालैः सहितः पाण्डवानियात्।
इतश्चेतश्च पाण्डूनां समाजग्मुर्महात्मनां। अक्षौहिण्यस्तु सेना विविधध्वजसङ्कुलाः।
युयुत्समानाः कुरुभिः पाण्डवान् समहर्षयन्। तथैव धार्त्तराष्ट्रस्य हर्षं समभिवर्द्धयन्।
भगदत्तो महीपालः सेनामक्षौहिणीं ददौ। तस्य चीनैः किरातैश्च काञ्चनैरिव संवृतं।
बभौ बलमनाधृष्यं कर्णिकारवनं यथा। तथा भूरिश्रवाः शूरः शल्यश्च कुरुनन्दन। ५८५
दुर्य्योधनमुपायातामक्षौहिण्या पृथक् पृथक्। कृतवर्म्मा च हार्दिक्यो भोजान्धककुकुरैः सह।
अक्षौहिण्यैव सेनाया दुर्य्योधनमुपागमत्। तस्य तैः पुरुषव्याघ्रैर्व्वनमालाधरैर्ब्बलं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant2-Equipment Heritage Foundation, Jalgaon

अशोभत यथा मत्तैर्व्वनं प्रक्रीडितैर्गजैः। जयद्रथमुखाश्चान्ये सिन्धुसौवीरवासिनः।
आजग्मुः पृथिवीपालाः कम्पयन्त इवाचलान्। तेषामक्षौहिणी सेना बहुला विबभौ तदा।
विधूयमानो वातेन बहुरूप इवाम्बुदः। सुदक्षिणश्च काम्बोजो यवनैश्च शकैस्तथा। ५९०
उपाजगाम कौरव्यमक्षौहिण्या विशाम्पते। तस्य सेनासमावायः शलभानामिवाबभौ।
स च सम्प्राप्य कौरव्यं तत्रैवान्तर्द्दधे तदा। तथा माहिष्मतीवासी नीलो नीलायुधैः सह।
महीपालो महावीर्य्यैर्द्दक्षिणापथवासिभिः। आवन्त्यौ च महीपालौ महाबलसुसंवृतौ।
पृथगक्षौहिणीभ्यां तावभियातौ सुयोधनं। कैकेयाश्च नरव्याघ्राः सोदर्य्याः पञ्च पार्थिवाः।
संहर्षयन्तः कौरव्यमक्षौहिण्या समाद्रवन्। ततस्ततस्तु सर्व्वेषां भूमिपानां महात्मनां। ५९५
तिस्रोऽन्याः समवर्त्तन्त वाहिन्यो भरतर्षभ। एवमेकादशावृत्ताः सेना दुर्य्योधनस्य ताः।
युयुत्समानाः कौन्तेयान् नानाध्वजसमाकुलाः। न हास्तिनपुरे राजन्नवकाशोऽभवत्तदा।
राज्ञां स्वबलमुख्यानां प्राधान्येनापि भारत। ततः पञ्चनदञ्चैव कृत्स्नञ्च कुरुजाङ्गलं।
तथा रोहितकारण्यं मरुभूमिश्च केवला। अहिच्छत्रं कालकूटं गङ्गाकूलञ्च भारत।
वारणं वाटधानञ्च यामुनश्चैव पर्व्वतः। एष देशः सुविस्तीर्णः प्रभूतधनधान्यवान्। ६००
बभूव कौरवेयाणां बलेनातीव संवृतः। तत्तु सैन्यं तथायुक्तं ददर्श स पुरोहितः।
यः स पाञ्चालराजेन प्रेषितः कौरवान्प्रति।
इति श्रीमहाभारते उद्योगपर्व्वणि पुरोहितसैन्यदर्शने अष्टादशोऽध्यायः समाप्तञ्च सेनोद्योगपर्व्व ॥ १८ ॥

॥ अथ सञ्जययानपर्व्व ५ ॥

॥ वैशम्पायन उवाच ॥ स च कौरव्यमासाद्य द्रुपदस्य पुरोहितः। सत्कृतो धृतराष्ट्रेण भीष्मेण विदुरेण च।
सर्व्वं कौशल्यमुक्त्वादौ पृष्ट्वा चैवमनामयं। सर्व्वसेनाप्रणेतॄणां मध्ये वाक्यमुवाच ह।
सर्व्वैर्भवद्भिर्व्विदितो राजधर्म्मः सनातनः। वाक्योपादानहेतोस्तु वक्ष्यामि विदिते सति। ६०५
धृतराष्ट्रश्च पाण्डुश्च सुतावेकस्य विश्रुतौ। तयोः समानं द्रविणं पैतृकं नात्र संशयः।
धृतराष्ट्रस्य ये पुत्त्राः प्राप्तन्तैः पैतृकं पदं। पाण्डुपुत्त्राः कथं नाम न प्राप्ताः पैतृकं वसु।
एवं गते पाण्डवेयैर्व्विदितं वः पुरा यथा। न प्राप्तं पैतृकं द्रव्यं धार्त्तराष्ट्रेण संवृतं।
प्राणान्तिकैरप्युपायैः प्रयतद्भिरनेकशः। शेषवन्तो न शकिता नेतुं वै यमसादनं।
पुनश्च वर्द्धितं राज्यं स्वबलेन महात्मभिः। छद्मनाऽपहृतं क्षुद्रैर्धार्त्तराष्ट्रैः ससौबलैः। ६१०
तदप्यनुमतं कर्म्म यथा युक्तमनेन वै। वासिताश्च महारण्ये वर्षाणीह त्रयोदश।
सभायां क्लेशितैर्व्वीरैः सहभार्य्यैस्तथा भृशं। अरण्ये विविधाः क्लेशाः सम्प्राप्तास्तैः सुदारुणाः।
तथा विराटनगरे योन्यन्तरगतैरिव। प्राप्तः परमसंक्लेशो यथा पापैर्म्महात्मभिः।
ते सर्व्वे पृष्ठतः कृत्वा तत्सर्व्वं पूर्व्वकिल्बिषं। सामैव कुरुभिः सार्द्धमिच्छन्ति कुरुपुङ्गवाः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तेषाञ्च वृत्तमाज्ञाय वृत्तं दुर्य्योधनस्य च। अनुनेतुमिहार्हन्ति धार्त्तराष्ट्रं सुहृज्जनाः। ६१५
न हि ते विग्रहं वीराः कुर्व्वन्ति कुरुभिः सह। अविनाशेन लोकस्य काङ्क्षन्ते पाण्डवाः स्वकं।
यश्चापि धार्त्तराष्ट्रस्य हेतुः स्याद्विग्रहं प्रति। स च हेतुर्न मन्तव्यो बलीयांसस्तथा हि ते।
अक्षौहिण्यश्च सप्तैव धर्म्मपुत्त्रस्य सङ्गताः। युयुत्समानाः कुरुभिः प्रतीचन्तेऽस्य शासनं।
अपरे पुरुषव्याघ्राः सहस्राक्षौहिणीसमाः। सात्यकिर्भीमसेनश्च यमौ च सुमहाबलौ।
एकादशैताः पृतना एकतश्च समागताः। एकतश्च महाबाहुर्बहुरूपो धनञ्जयः। ६२०
यथा किरीटी सर्व्वाभ्यः सेनाभ्योऽप्यतिरिच्यते। एवमेव महाबाहुर्वासुदेवो महाद्युतिः।
बहुलत्वञ्च सेनानां विक्रमञ्च किरीटिनः। बुद्धिमत्त्वञ्च कृष्णस्य बुद्धा युध्येत को नरः।
ते भवन्तो यथाधर्म्मं यथा समयमेव च। प्रयच्छन्तु प्रदातव्यं मा वः कालोऽत्यगादयं।
इति श्रीमहाभारते उद्योगपर्व्वणि सञ्जययानपर्व्वणि पुरोहितवाक्ये एकोनविंशोऽध्यायः॥ १९॥
॥ वैशम्पायन उवाच ॥ तस्य तद्वचनं श्रुत्वा प्रज्ञावृद्धो महाद्युतिः। सम्पूज्यैनं यथाकालं भीष्मो वचनमब्रवीत्।
दिष्ट्या कुशलिनः सर्व्वे सह दामोदरेण ते। दिष्ट्या सहायवन्तश्च दिष्ट्या धर्म्मे च ते रताः। ६२५
दिष्ट्या च सन्धिकामास्ते भ्रातरः कुरुनन्दनाः। दिष्ट्या न युद्धमनसः पाण्डवाः सह बान्धवैः।
भवता सत्यमुक्तन्तु एवमेतन्न संशयः। अतितीक्ष्णन्तु ते वाक्यं ब्राह्मण्यादिति मे मतिः।
असंशयं क्लेशितास्ते वने चेह च पाण्डवाः। प्राप्ताश्च धर्म्मतः सर्व्वं पितुर्धनमसंशयं।
किरीटी बलवान्पार्थः कृतास्त्रश्च महारथः। को हि पाण्डुसुतं युद्धे विषहेत धनञ्जयं।
अपि वज्रधरः साक्षात्किमुतान्ये धनुर्भृतः। त्रयाणामपि लोकानां समर्थ इति मे मतिः। ६३०
भीष्मे ब्रुवति तद्वाक्यं धृष्टमाक्षिप्य मन्युना। दुर्य्योधनं समालोक्य कर्णो वचनमब्रवीत्।
न तत्राविदितं ब्रह्मन् लोके भूतेन केनचित्। पुनरुक्तेन किन्तेन भाषितेन पुनः पुनः।
दुर्य्योधनार्थे शकुनिर्द्यूते निर्ज्जितवान्पुरा। समयेन गतोऽरण्यं पाण्डुपुत्त्रो युधिष्ठिरः।
न तं समयमादृत्य राज्यमिच्छन्ति पैतृकं। बलमाश्रित्य मत्स्यानां पञ्चालानाञ्च मूर्खवत्।
दुर्य्योधनो भयाद्विद्वन्न दद्यात्पादमन्ततः। धर्म्मतस्तु महीं कृत्स्नां प्रदद्याच्छत्रवेऽपि च। ६३५
यदि काङ्क्षन्ति ते राज्यं पितृपैतामहं पुनः। यथाप्रतिज्ञं कालं तं चरन्तु वनमाश्रिताः।
ततो दुर्य्योधनस्याङ्के वर्त्तन्तामकुतोभयाः। अधार्म्मिकीं तु मा बुद्धिं मौर्ख्यात् कुर्व्वन्तु केवलां।
अथ ते धर्म्ममुत्सृज्य युद्धमिच्छन्ति पाण्डवाः। आसाद्येमान् कुरुश्रेष्ठान् स्मरिष्यन्ति वचो मम।
॥ भीष्म उवाच॥ किन्तु राधेय वाचा ते कर्म्म तत्स्मर्त्तुमर्हसि। एक एव यदा पार्थः षड्रथान्जितवान् युधि।
न चेदेवं करिष्यामो यदयं ब्राह्मणोऽब्रवीत्। ध्रुवं युधि हतास्तेन भक्षयिष्याम पांशुकान्। ६४०
॥ वैशम्पायन उवाच ॥ धृतराष्ट्रस्ततो भीष्ममनुमान्य प्रसाद्य च। अवभर्त्स्य च राधेयमिदं वचनमब्रवीत्।
अस्मद्धितं वाक्यमिदं भीष्मः शान्तनवोऽब्रवीत्। पाण्डवानां हितं चैव सर्व्वस्य जगतस्तथा।
चिन्तयित्वा तु पार्थेभ्यः प्रेषयिष्यामि सञ्जयं। स भवान् प्रतियात्वद्य पाण्डवानेव माचिरं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स तं सत्कृत्य कौरव्यः प्रेषयामास पाण्डवान् । सभामध्ये समाहूय सञ्जयं वाक्यमब्रवीत् ।

इति श्रीमहाभारते उद्योगपर्व्वणि सञ्जययानपर्व्वणि सञ्जयाह्वाने विंशोऽध्यायः ॥ २० ॥

॥ धृतराष्ट्र उवाच ॥ प्राप्तानाहुः सञ्जय पाण्डुपुत्त्रानुपप्लव्ये तान् विजानीहि गत्वा । अजातशत्रुञ्च सभाजयेथा दिष्ट्यानघ स्थानमुपस्थितस्त्वं ।
९४५
सर्व्वान्वदेः सञ्जय स्वस्तिमन्तः कृच्छ्रं वासमतदर्हा निरुष्य । तेषां शान्तिर्व्विद्यतेऽस्मासु शीघ्रं मिथ्यापेतानामुपकारिणा सतां ।

नाहं कचित्सञ्जय पाण्डवानां मिथ्यावृत्तिं काञ्चन जात्वपश्यं । सर्व्वां श्रियं ह्यात्मवीर्य्येण लब्धां पर्य्याकार्षुः पाण्डवा मह्यमेव ।

दोषं ह्येषां नाध्यगच्छं परीच्छन्नित्यं कञ्चिद्येन गर्हाम पार्थान् । धर्मार्थाभ्यां कर्म कुर्व्वन्ति नित्यं सुखप्रिये नानुरुध्यन्ति कामान् ।

घर्म्मं शीतं क्षुत्पिपासे तथैव निद्रां तन्द्रीं क्रोधहर्षौ प्रमादं । धृत्या चैव प्रज्ञया चाभिभूय धर्म्मार्थयोगात प्रतयन्ति पार्थाः।

त्यजन्ति मित्रेषु धनानि काले न संवासाज्जीर्य्यति तेषु मैत्री । यथार्हमानार्थकरा हि पार्थास्तेषां द्वेष्टा नास्त्याजमीढस्य पक्षे ।
९५०
अन्यत्र पापाद्विषमान्मन्दबुद्धेर्दुर्य्योधनात् क्षुद्रतराच्च कर्णात् । तेषां हीमौ हीनसुखप्रियाणां महात्मनां वर्द्धयतो हि तेजः ।

उत्थानवीर्य्यः सुखमेधमानो दुर्य्योधनः सुकृतं मन्यते तत् । तेषां भागं यच्च मन्येत बालः शक्यं हर्त्तुं जीवतां पाण्डवानां ।

यस्यार्जुनः पदवीं केशवश्च वृकोदरः सात्यकोऽजातशत्रोः । माद्रीपुत्त्रौ सृञ्जयाश्चापि यान्ति पुरा युद्धात्साधु तस्य प्रदानं ।

स ह्येवैकः पृथिवीं सव्यसाची गाण्डीवधन्वा प्रणुदेद्रथस्थः । तथा जिष्णुः केशवोऽप्यप्रधृष्यो लोकत्रयस्याधिपतिर्महात्मा ।

तिष्ठेत कस्तस्य मर्त्यः पुरस्ताद्यः सर्व्वलोकेषु वरेण्य एकः । पर्जन्यघोषान् प्रवपञ्छरौघान् पतङ्गसङ्घानिव शीघ्रवेगान् । ९५५

दिशं ह्युदीचीमपि चोत्तरान् कुरून् गाण्डीवधन्वैकरथो जिगाय । धनं चैषामाहरत्सव्यसाची सेनानुगान् द्राविडांश्चैव चक्रे ।

यश्चैव देवान् खाण्डवे सव्यसाची गाण्डीवधन्वा प्रजिगाय सेन्द्रान् । उपाहरत् फाल्गुनो जातवेदसे यशोमानं वर्द्धयन्पाण्डवानां ।

गदाभृतां नास्ति समोऽत्र भीमाद्धस्त्यारोहो नास्ति समश्च तस्य । रथेऽर्जुनादाहुरहीनमेनं बाह्वोर्ब्बलेनायुतनागवीर्य्यं ।

सुशिक्षितः कृतवैरस्तरस्वी दहेत क्रुद्धस्तरसा धार्त्तराष्ट्रान् । सदाऽत्यमर्षी बलवान्न शक्यो युद्धे जेतुं वासवेनापि साक्षात् ।

सुचेतसा बलिनौ शीघ्रहस्तौ सुशिक्षितौ भ्रातरौ फाल्गुनेन । श्येनौ यथा पक्षिपूगान् रुजन्तौ माद्रीपुत्त्रौ शेषयतो न शत्रून् ।
९६०
एतद्बलं पूर्णमस्माकमेवं यत्सत्यं तान् प्राप्य नास्तीति मन्ये । तेषां मध्ये वर्त्तमानस्तरस्वी धृष्टद्युम्नः पाण्डवानामिहैकः ।

सहामात्यः सोमकानां प्रवर्हः सन्त्यक्तात्मा पाण्डवार्थे श्रुतो मे । अजातशत्रुं प्रसहेत कोऽन्यो येषां स स्यादग्रणीर्वृष्णिसिंहः ।

सहोषितश्चरितार्थो वयःस्थो मात्स्येयानामधिपो वै विराटः । स वै सपुत्त्रः पाण्डवार्थे च शश्वद्युधिष्ठिरे भक्त इति श्रुतं मे ।

अवरुद्धा बलिनः कैकयेभ्यो महेष्वासा भ्रातरः पञ्च सन्ति । कैकेयेभ्यो राज्यमाकाङ्क्षमाणा युद्धार्थिनश्चानु वसन्ति पार्थान् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सर्व्वे च वीराः पृथिवीपतीनां समानीताः पाण्डवार्थे निविष्टाः। शूरानर्हान् भक्तिमतः शृणोमि प्रीत्या युक्तान् संश्रितान् धर्म्मराजं।

गिर्य्याश्रया दुर्गनिवासिनश्च योधाः पृथिव्यां कुलजाश्च वृद्धाः। म्लेच्छाश्च नानायुधवीर्य्यवन्तः समागताः पाण्डवार्थे निविष्टाः।

पाण्ड्यश्च राजा समितीन्द्रकल्पो युधि प्रवीरैर्ब्बहुभिः समेतः। समागतः पाण्डवाथ महात्मा लोकप्रवीरोऽप्रतिवीर्य्यतेजाः।

अस्त्रं द्रोणादर्ज्जुनाद्वासुदेवात् कृपाद्भीष्माद्येन वृतं शृणोमि। यन्तं कार्ष्णिप्रतिममाहुरेकं स सात्यकिः पाण्डवार्थे निविष्टः।

उपाश्रितांश्चेदिकरूषकाश्च सर्व्वोद्योगैर्भूमिपालाः समेताः। तेषां मध्ये सूर्य्यमिवातपन्तं श्रिया वृतं चेदिपतिं ज्वलन्तं।

अस्तम्भनीयं युधि मन्यमानो ज्यां कर्षतां श्रेष्ठतमं पृथिव्यां। सर्व्वोत्साहं क्षत्त्रियाणां निहत्य प्रसह्य कृष्णस्तरसा संममर्द्द।

यशोमानौ वर्द्धयन् पाण्डवानां पुराऽभिनच्छिशुपालं समीक्ष्य। यस्य सर्व्वे वर्द्धयन्ति स्म मानं करूषराजप्रमुखा नरेन्द्राः।

तमसह्यं केशवं तत्र मत्वा सुग्रीवयुक्तेन रथेन कृष्णं। सम्प्राद्रवंश्चेदिपतिं विहाय सिंहं दृष्ट्वा क्षुद्रमृगा इवान्ये।

कस्तं प्रतीपस्तरसा प्रत्युदीयादाशंसमानो द्वैरथे वासुदेवं। सोऽशेत कृष्णेन हतः परासुर्वातेनेवोन्मथितः कर्णिकारः।

पराक्रमं मे यदवेदयन्त तेषामर्थे सञ्जय केशवस्य। अनुस्मरंस्तस्य कर्म्माणि विष्णोर्गावल्गणे नाधिगच्छामि शान्तिं।

न जातु ताञ्छत्रुरन्यः सहेत येषां स स्यादग्रणीर्वृष्णिसिंहः। प्रवेपते मे हृदयं भयेन श्रुत्वा कृष्णावेकरथे समेतौ।

न चेद्गच्छेत् सङ्गरं मन्दबुद्धिस्ताभ्यां लभेच्छर्म्म तदा सुतो मे। नोचेत् कुरून् सञ्जय निर्द्दहेतामिन्द्रो विष्णुर्दैत्यसेनां यथैव।

मतो हि मे शक्रसमो धनञ्जयः सनातनो वृष्णिवीरश्च विष्णुः। धर्म्मारामो ह्रीनिषेवस्तरस्वी कुन्तीपुत्त्रः पाण्डवोऽजातशत्रुः।

दुर्य्योधनेन निकृतो मनस्वी नोचेत् क्रुद्धः प्रदहेद्धार्त्तराष्ट्रान्। नाहं तथा ह्यर्ज्जुनाद्वासुदेवाद्भीमाद्वापि यमयोर्व्वा बिभेमि।

यथा राज्ञः क्रोधदीप्तस्य सूत मन्योरहं भीततरः सदैव। महातपा ब्रह्मचर्य्येण युक्तः सङ्कल्पोऽयं मानसस्तस्य सिध्येत्।

तस्य क्रोधं सञ्जयाहं समीक्ष्य स्थाने जानन् भृशमस्म्यद्य भीतः। स गच्छ शीघ्रं प्रहितो रथेन पञ्चालराजस्य चमूनिवेशनं।

अजातशत्रुं कुशलं स्म पृच्छेः पुनः पुनः प्रीतियुक्तं वदेस्त्वं। जनार्द्दनं चापि समेत्य तात महामात्रं वीर्य्यवतामुदारं।

अनामयं मद्वचनेन पृच्छेर्धृतराष्ट्रः पाण्डवैः शान्तिमीप्सुः। न तस्य किञ्चिद्वचनं न कुर्य्यात् कुन्तीपुत्त्रो वासुदेवस्य सूत।

प्रियश्चैषामात्मसमश्च कृष्णो विद्वांश्चैषां कर्म्मणि नित्ययुक्तः। समानीतान् पाण्डवान् सृञ्जयांश्च जनार्द्दनं युयुधानं विराटं।

अनामयं मद्वचनेन पृच्छेः सर्व्वांस्तथा द्रौपदेयांश्च पञ्च। यद्यत्तत्र प्राप्तकालं परेभ्यस्त्वं मन्येथा भारतानां हितञ्च।

तत्तद्भाषेथाः सञ्जय राजमध्ये न मूर्च्छयेद्यत्र च युद्धहेतुः।

इति श्रीमहाभारते उद्योगपर्व्वणि सञ्जययानपर्व्वणि धृतराष्ट्रकथायामेकविंशोऽध्यायः॥ २१ ॥

॥ वैशम्पायन उवाच ॥ राज्ञस्तु वचनं श्रुत्वा धृतराष्ट्रस्य सञ्जयः। उपप्लव्यं ययौ द्रष्टुं पाण्डवानमितौजसः।

स तु राजानमासाद्य कुन्तीपुत्त्रं युधिष्ठिरं। अभिवाद्य ततः पूर्व्वं सूतपुत्त्रोऽभ्यभाषत।

गावल्गणिः सञ्जयः सूतसूनुरजातशत्रुमवदत् प्रतीतः। दिष्ट्या राजंस्त्वामरोगं प्रपश्ये सहायवन्तञ्च महेन्द्रकल्पं।

अनामयं पृच्छति त्वाऽम्बिकेयो वृद्धो राजा धृतराष्ट्रो मनीषी। कच्चिद्भीमः कुशली पाण्डवाग्र्यो धनञ्जयस्तौ च माद्रीतनूजौ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कच्चित्कृष्णा द्रौपदी राजपुत्री सत्यव्रता वीरपत्नी सपुत्रा। मनस्विनी यत्र च वाञ्छसि त्वमिष्टान् कामान् भारत स्वस्ति कामः।

॥ युधिष्ठिर उवाच ॥ गावल्गणे सञ्जय स्वागतं ते प्रीयामहे ते वयं दर्शनेन। अनामयं प्रतिजाने तवाहं सहानुजैः कुशली चास्मि विद्वन्।

६९०

चिरादिदं कुशलं भारतस्य श्रुत्वा राज्ञः कुरुवृद्धस्य सूत। मन्ये साक्षाद्दृष्टमहं नरेन्द्रं दृष्ट्वैव त्वां सञ्जय प्रीतियोगात्।

पितामहो नः स्थविरो मनस्वी महाप्राज्ञः सर्व्वधर्म्मोपपन्नः। स कौरव्यः कुशली तात भीष्मो यथा पूर्व्वं वृत्तिरस्त्यस्य कच्चित्।

कच्चिद्राजा धृतराष्ट्रः सपुत्रो वैचित्रवीर्य्यः कुशली महात्मा। महाराजो बाह्लिकः प्रातिपेयः कच्चिद्विद्वान् कुशलो सूत पुत्र।

स सोमदत्तः कुशली तात कच्चिद्भूरिश्रवाः सत्यसन्धः शलश्च। द्रोणः सपुत्रश्च कृपश्च विप्रो महेष्वासाः कच्चिदेतेऽप्यरोगाः।

सर्व्वे कुरुभ्यः स्पृहयन्ति सञ्जय धनुर्द्धरा ये पृथिव्यां प्रधानाः। महाप्रज्ञाः सर्व्वे शास्त्रावदाता धनुर्भृतां मुख्यतमा पृथिव्यां।

६९५

कच्चिन्मानं तात लभन्त एते धनुर्भृतः कच्चिदेतेऽप्यरोगाः। येषां राष्ट्रे निवसति दर्शनीयो महेष्वासः शीलवान् द्रोणपुत्रः।

वैश्यापुत्रः कुशली तात कच्चिन्महाप्राज्ञो राजपुत्रो युयुत्सुः। कर्णोऽमात्यः कुशली तात कच्चित्सुयोधनो यस्य मन्दो विधेयः।

स्त्रियो वृद्धा भारतानां जनन्यो महानस्यो दासभार्य्याश्च सूत। वध्वः पुत्रा भागिनेया भगिन्यो दौहित्रा वा कच्चिदप्यव्यलीकाः।

कच्चिद्राजा ब्राह्मणानां यथावत् प्रवर्त्तते पूर्व्ववत्तात वृत्तिं। कच्चिद्दायान्मामकान् धार्त्तराष्ट्रो द्विजातीनां सञ्जय नोपहन्ति।

कच्चिद्राजा धृतराष्ट्रः सपुत्र उपेक्षते ब्राह्मणातिक्रमान्वै। स्वर्गस्य कच्चिन्न तथा वर्त्मभूतामुपेक्षते तेषु सदैव वृत्तिं। ७००

एतज्ज्योतिरुत्तमं जीवलोके शुक्लं प्रजानां विहितं विधात्रा। ते चेद्दोषं न नियच्छन्ति मन्दाः कृत्स्नो नाशो भविता कौरवाणां।

कच्चिद्राजा धृतराष्ट्रः सपुत्रो बुभूषते वृत्तिममात्यवर्गे। कच्चिन्न भेदेन जिजीविषन्ति सुहृद्रूपा दुर्हृदश्चैकमत्यात्।

कच्चिन्न पापं कथयन्ति तात ते पाण्डवानां कुरवः सर्व एव। द्रोणः सपुत्रश्च कृपश्च वीरो नास्मासु पापानि वदन्ति कच्चित्।

कच्चिद्राजानं धृतराष्ट्रं सपुत्रं समेत्याहुः कुरवः सर्व्व एव। कच्चिद्दृष्ट्वा दस्युसङ्घान्समेतान् स्मरन्ति पार्थस्य युधाम्प्रणेतुः।

मौर्व्वीभुजाग्रप्रहितान् स्म तात दोधूयमानेन धनुर्गुणेन। गाण्डीवमुक्तान्स्तनयित्नुघोषानजिह्मगान् कच्चिदनुस्मरन्ति। ७०५

न चापश्यं कच्चिदहं पृथिव्यां योधं समं चाऽधिकञ्चार्जुनेन। यस्यैकषष्टिर्निशितास्तीक्ष्णधाराः सुवाससः सम्मतोहस्तचापः।

गदापाणिर्भीमसेनस्तरस्वी प्रवेपयञ्छत्रुसङ्घाननीके। नागः प्रभिन्न इव नड्वलेषु चङ्क्रम्यते कच्चिदेनं स्मरन्ति।

माद्रीपुत्रः सहदेवः कलिङ्गान् समागतानजयद्दन्तकूरे। वामेनास्यन्दक्षिणेनैव यो वै महाबलं कच्चिदेनं स्मरन्ति।

पुराजेतुं नकुलः प्रेषितोऽयं शिवींस्त्रिगर्त्तान् सञ्जय पश्यतस्ते। दिशं प्रतीचीं वशमानयन्मे माद्रीसुतं कच्चिदेनं स्मरन्ति।

पराभवो द्वैतवने य आसीद्दुर्म्मन्त्रिते घोषयात्रागतानां। यत्र मन्दाञ्छत्रुवशं प्रयातानमोचयद्भीमसेनो जयश्च। ७१०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

अहं पश्चादर्जुनमभ्यरक्षं माद्रीपुत्त्रौ भीमसेनोऽप्यरक्षत्। गाण्डीवभृच्छत्रुसङ्घानुदस्य स्वस्त्यागमत्कच्चिदेनं स्मरन्ति।
न कर्म्मणा साधुनैकेन नूनं सुखं शक्यं वै भवतीह सञ्जय। सर्व्वात्मना परिजेतुं वयश्चेन्न शक्नुमो धृतराष्ट्रस्य पुत्त्रं।

इति श्रीमहाभारते उद्योगपर्व्वणि सञ्जययानपर्व्वणि युधिष्ठिरप्रश्ने द्वाविंशोऽध्यायः॥ २२ ॥

॥ सञ्जय उवाच ॥ यथात्थ मे पाण्डव तत्तथैव कुरून् कुरुश्रेष्ठजनञ्च पृच्छसि। अनामयास्तात मनस्विनस्ते कुरुश्रेष्ठान् पृच्छसि पार्थ यांस्त्वं।
सन्त्येव वृद्धाः साधवो धार्त्तराष्ट्रे सन्त्येव पापाः पाण्डव तस्य विद्धि। दद्याद्रिपुभ्योऽपि हि धार्त्तराष्ट्रः कुतो दायाल्लोपयेद्ब्राह्मणानां।
यद्युष्माकं वर्त्तते सोऽनधर्म्यमद्रुग्धेषु द्रुग्धवत्तन्न साधु। मित्रध्रुक् स्याद्धृतराष्ट्रः सपुत्त्रो युष्मान् द्विषन् साधुवृत्तानसाधुः।
न चानुजानाति भृशञ्च तप्यते शोचत्यन्तः स्थविरोऽजातशत्रो। शृणोति हि ब्राह्मणानां समेत्य मित्रद्रोहः पातकेभ्यो गरीयान्।
स्मरन्ति तुभ्यं नरदेव संयुगे युद्धे च जिष्णोश्च युधां प्रणेतुः। समुत्कुष्टे दुन्दुभिशङ्खशब्दे गदापाणिं भीमसेनं स्मरन्ति।
माद्रीसुतौ चापि रणाजिरेषु सर्व्वा दिशः सम्पतन्तौ स्मरन्ति। सेनां वर्षन्तौ शरवर्षैरजस्रं महारथौ समरे दुःप्रकम्प्यौ।
न त्वेव मन्ये पुरुषस्य राजन्ननागतं ज्ञायते यद्भविष्यं। त्वञ्चेत्तथा सर्व्वधर्म्मोपपन्नः प्राप्तः क्लेशं पाण्डव कृच्छ्ररूपं।
त्वमेवैतत्सर्व्वमतश्च भूयः समीकुर्य्याः प्रज्ञयाऽजातशत्रो। न कामार्थं सन्त्यजेयुर्हि धर्मं पाण्डोः सुताः सर्व्व एवेन्द्रकल्पाः।
त्वमेवैतत्प्रज्ञयाऽजातशत्रो समीकुर्य्या येन शर्म्माप्नुयुस्ते। धार्त्तराष्ट्राः पाण्डवाः सृञ्जयाश्च ये चाप्यन्ये सन्निविष्टा नरेन्द्राः।
यन्माब्रवीद्धृतराष्ट्रो निशायामजातशत्रो वचनं पिता ते। सहामात्यः सहपुत्त्रश्च राजन् समेत्य तां वाचमिमां निबोध।

इति श्रीमहाभारते उद्योगपर्व्वणि सञ्जययानपर्व्वणि सञ्जयवाक्ये त्रयोविंशोऽध्यायः॥ २३ ॥

॥ युधिष्ठिर उवाच ॥ समागताः पाण्डवाः सृञ्जयाश्च जनार्द्दनो युयुधानो विराटः। यत्ते वाक्यं धृतराष्ट्रानुशिष्टं गावल्गणे ब्रूहि तत्सूतपुत्त्र।
॥ सञ्जय उवाच ॥ अजातशत्रुञ्च वृकोदरञ्च धनञ्जयं माद्रवतीसुतौ च। आमन्त्रये वासुदेवञ्च शौरिं युयुधानं चेकितानं विराटं।
पञ्चालानामधिपञ्चैव वृद्धं धृष्टद्युम्नं पार्षतं याज्ञसेनिं। सर्व्वे वाचं शृणुतेमां मदीयां वक्ष्यामि यां भूतिमिच्छन् कुरूणां।
शमं राजा धृतराष्ट्रोऽभिनन्दन्नयोजयत्त्वरमाणो रथं मे। सभ्रातृपुत्त्रस्वजनस्य राज्ञस्तद्रोचतां पाण्डवानां शमोऽस्तु।
सर्व्वैर्धर्म्मैः समुपेतास्तु पार्थाः संस्थानेन मार्दवेनार्जवेन। कुले जाता ह्यनृशंसा वदान्या ह्रीनिषेवाः कर्म्मणां निश्चयज्ञाः।
न युज्यते कर्म्म युष्मासु हीनं सत्त्वं हि वस्तादृशं भीमसेनाः। उद्भासते ह्यञ्जनबिन्दुवत्तच्छुभ्रे वस्त्रे यद्भवेत्किल्बिषं वः।
सर्व्वक्षयो दृश्यते यत्र कृत्स्नः पापोदयो निरयोऽभावसंस्थः। कस्तत्र कुर्य्याज्जातु कर्म प्रजानन्पराजयो यत्र समो जयश्च।
ते वै धन्या यैः कृतं ज्ञातिकार्य्यं ते वै पुत्त्राः सुहृदो बान्धवाश्च। उपक्रुष्टं जीवितं सन्त्यजेयुर्यतः कुरूणां नियतो वैभवः स्यात्।
ते चेत् कुरूननुशिष्याथ पार्था निर्णीय सर्व्वान् द्विषतो निगृह्य समञ्च वस्तज्जीवितं मृत्युना स्याद्यज्जीवध्वं ज्ञातिवधेनसाधु।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

को ह्येव युष्मान् सह केशवेन सचेकितान्पार्षतवाहुगुप्तान्। ससात्यकीन्विषहेतेह जेतुं लब्ध्वापि देवान् सचिवानपीन्द्रः।
को वा कुरून् द्रोणभीष्माभिगुप्तानश्वत्थाम्ना शल्यकृपादिभिश्च। रणे विजेतुं विषहेत राजन् राधेयगुप्तान् सह भूमिपालैः।
महद्बलं धार्त्तराष्ट्रस्य राज्ञः को वै शक्तो हन्तुमक्षीयमाणः। सोऽहं जये चैव पराजये च निःश्रेयसं नाधिगच्छामि किञ्चित्।
कथं हि नीचा इव दौष्कुलेया निर्धर्म्मार्थं कर्म्म कुर्य्युश्च पार्थाः। सोऽहं प्रसाद्य प्रणतो वासुदेवं पञ्चालानामधिपं चैव वृद्धं।
कृताञ्जलिः शरणं वः प्रपद्ये कथं स्वस्ति स्यात् कुरुसृञ्जयानां। न ह्येवमेवं वचनं वासुदेवो धनञ्जयो वा जातु किञ्चिन्न कुर्य्यात्।
प्राणान् ददौ याच्यमानः कुतोऽन्यदेतद्विद्वन् साधनार्थं ब्रवीमि। एतद्राज्ञो भीष्मपुरोगमस्य मतं यद्वः शान्तिरिहोत्तमा स्यात्।

इति श्रीमहाभारते उद्योगपर्व्वणि सञ्जययानपर्व्वणि सञ्जयवाक्ये चतुर्व्विंशोऽध्यायः ॥ २४ ॥

॥ युधिष्ठिर उवाच ॥ कां नु वाचं सञ्जय मे शृणोषि युद्धैषिणीं येन युद्धाद्बिभेषि। अयुद्धं वै तात युद्धाद्गरीयः कस्तल्लब्ध्वा जातु युध्येत सूत।
अकुर्व्वतश्चेत्पुरुषस्य सञ्जय सिध्येत् सङ्कल्पो मनसा यंयमिच्छेत्। न कर्म्म कुर्य्यादिदितं वै ममैतदन्यत्र युद्धाद्बहु यल्लघीयः।
कुतो युद्धं जातु नरोऽवगच्छेत्को देवशप्तो हि वृणीत युद्धं। सुखैषिणः कर्म्म कुर्व्वन्ति पार्था धर्म्मादहीनं यच्च लोकस्य पथ्यं।
धर्म्मोदयं सुखमाशंसमानाः कृच्छ्रोपायं तत्त्वतः कर्म्म दुःखं। सुखम्प्रेप्सुर्व्विजिघांसुश्च दुःखं य इन्द्रियाणां प्रीतिवशानुगामी।
कामाभिध्या स्वशरीरं दुनोति यया प्रमुक्तो न करोति दुःखं। यथेध्यमानस्य समिद्धतेजसो भूयो बलं वर्द्धते पावकस्य।
कामार्थलाभेन तथैव भूयो न तृप्यते सर्पिषेवाग्निरिद्धः। सम्पश्येमं भोगचयं महान्तं सहास्माभिर्धृतराष्ट्रस्य राज्ञः।
नाश्रेयानीश्वरो विग्रहाणां नाश्रेयान् वै गीतशब्दं शृणोति। नाश्रेयान्वै सेवते माल्यगन्धान्न चाप्यश्रेयाननुलेपनानि।
नाश्रेयान्वै प्रावारान् सन्निवस्ते कथं तस्मात्संप्रणुदेत् कुरुभ्यः। अत्रैव स्यादबुधस्यैव कामः प्रायः शरीरे हृदयं दुनोति।
स्वयं राजा विषमस्थः परेषु सामर्थ्यमन्विच्छति तन्न साधु। यथात्मनः पश्यति वृत्तमेव तथा परेषामपि सोऽभ्युपैतु।
आसन्नमग्निन्तु निदाघकाले गम्भीरकक्षे गहने विसृज्य। यथा वृद्धं वायुवशेन शोचेत्क्षेमं मुमुक्षुः शिशिरव्यपाये।
प्राप्तैश्वर्य्यो धृतराष्ट्रोऽद्य राजा लालप्यते सञ्जय कस्य हेतोः। प्रगृह्य दुर्ब्बुद्धिमनार्जवे रतं पुत्त्रं मन्दं मूढममन्त्रिणन्तु।
अनाप्तवच्चाप्ततमस्य वाचः सुयोधनो विदुरस्यावमन्य। सुतस्य राजा धृतराष्ट्रः प्रियैषी सम्बुध्यमानो विशतेऽधर्म्ममेव।
मेधाविनं ह्यर्थकामं कुरूणां बहुश्रुतं वाग्मिनं शीलवन्तं। स तं राजा धृतराष्ट्रः कुरुभ्यो न सस्मार विदुरं पुत्त्रकाम्यात्।
मानघ्नस्यासौ मानकामस्य चेर्षोः संरम्भिणश्चार्थधर्मातिगस्य। दुर्भाषिणो मन्युवशानुगस्य कामात्मनो दौर्हृदैर्भावितस्य।
अनेयस्याश्रेयसो दीर्घमन्योर्म्मित्रद्रुहः सञ्जय पापबुद्धेः। सुतस्य राजा धृतराष्ट्रः प्रियैषी प्रपश्यमानः प्राजहाद्धर्म्मकामौ।
तदैव मे सञ्जय दीव्यतोऽभून्मतिः कुरूणामागतः स्यादभावः। काव्यां वाचं विदुरो भाषमाणो न विन्दते यद्धृतराष्ट्रात् प्रशंसां।
क्षत्तुर्यदा नान्ववर्त्तन्त बुद्धिं कृच्छ्रं कुरून् सूत तदाऽभ्याजगाम। यावत्प्रज्ञामन्ववर्त्तन्त तस्य तावत्तेषां राष्ट्रवृद्धिर्ब्बभूव।
तदर्थलुब्धस्य निबोध मेऽद्य ये मन्त्रिणो धार्त्तराष्ट्रस्य सूत। दुःशासनः शकुनिः सूतपुत्त्रो गावल्गणे पश्य सम्मोहमस्य।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding: IKS-MoE Grant - Equipment Heritage Foundation, Jalgaon

सोऽहं न पश्यामि परीक्षमाणः कथं स्वस्ति स्यात् कुरुसृञ्जयानां । आत्तैश्वर्य्यो धृतराष्ट्रः परेभ्यः प्रव्राजिते विदुरे दीर्घदृष्टौ ।
आशंसते वै धृतराष्ट्रः सपुत्रो महाराज्यमसपत्नं पृथिव्यां । तस्मिन् शमः केवलो नोपलभ्यः सर्व्वं स्वकं मद्गतं मन्यतेऽर्थं ।
यत्तत्कर्णो मन्यते पारणीयं युद्धे गृहीतायुधमर्जुनं वै । आसंश्च युद्धानि पुरा महान्ति कथं कर्णो नाभवद्द्वीप एषां ।
कर्णश्च जानाति सुयोधनश्च द्रोणश्च जानाति पितामहश्च । अन्ये च ये कुरवस्तत्र सन्ति यथाऽर्जुनान्नास्त्यपरो धनुर्द्धरः ।
जानन्त्येतत् कुरवः सर्व्व एव ये चाप्यन्ये भूमिपालाः समेताः । दुर्य्योधने राज्यमिहाभवद्यथा अरिन्दमे फाल्गुने विद्यमाने । ७६०
तेनानुबन्धं मन्यते धार्त्तराष्ट्रः शक्यं हर्त्तुं पाण्डवानां ममत्वं । किरीटिना तालमात्रायुधेन तद्वेदिना संयुगं तत्र गत्वा ।
गाण्डीवविस्फारितशब्दमाजावशृण्वाना धार्त्तराष्ट्रा ध्रियन्ते । क्रुद्धं न चेद्वीक्षते भीमसेनं सुयोधनो मन्यते सिद्धमर्थं ।
इन्द्रोऽप्येतन्नोत्सहेत्तात हर्त्तुमैश्वर्य्यं नो जीवति भीमसेने । धनञ्जये नकुले चैव सूत तथा वीरे सहदेवे सहिष्णौ ।
स चेदेतां प्रतिपद्येत बुद्धिं वृद्धो राजा सह पुत्त्रेण सूत । एवं रणे पाण्डवकोपदग्धा न नश्येयुः सञ्जय धार्त्तराष्ट्राः ।
जानासि त्वं क्लेशमस्मासु वृत्तं त्वां पूजयन् सञ्जयाहं क्षमेयं । यच्चास्माकं कौरवैर्भूतपूर्व्वं या नो वृत्तिर्धार्त्तराष्ट्रे तदासीत् ७६५
अद्यापि तत्तत्र तथैव वर्त्ततां शान्तिं गमिष्यामि यथा त्वमात्थ । इन्द्रप्रस्थे भवतु ममैव राज्यं सुयोधनो यच्छतु भारताग्र्यः ।

इति श्रीमहाभारते उद्योगपर्व्वणि सञ्जययानपर्व्वणि युधिष्ठिरवाक्ये पञ्चविंशोऽध्यायः ॥ २५ ॥

॥ सञ्जय उवाच ॥ धर्म्मनित्या पाण्डव ते विचेष्टा लोके श्रुता दृश्यते चापि पार्थ । महास्रावं जीवितं चाप्यनित्यं सम्पश्य त्वं पाण्डव मा व्यनीनशः ।
न ते भागं कुरवोऽन्यत्र युद्धात्प्रयच्छेरंस्तुभ्यमजातशत्रो । भैक्ष्येण चर्य्यामन्धकवृष्णिराज्ये श्रेयो मन्ये न तु युद्धेन राज्यं ।
अल्पकालं जीवितं यन्मनुष्ये महास्रावं नित्यदुःखं चलञ्च । भूयश्च तद्यशसो नानुरूपं तस्मात्पापं पाण्डव मा कृथास्त्वं ।
कामा मनुष्यं प्रसजन्त एते धर्म्मस्य ये विघ्नमूलं नरेन्द्र । पूर्व्वं नरस्तान्मतिमान्प्रणिघ्नन् लोके प्रशंसां लभतेऽनवद्यां । ७७०
निबन्धनी ह्यर्थतृष्णेह पार्थ तामिच्छतां बाध्यते धर्म्म एव । धर्म्मन्तु यः प्रवृणीते स बुद्धः कामे गृद्धो हीयतेऽर्थानुरोधात् ।
धर्म्मं कृत्वा कर्म्मणां तात मुख्यं महाप्रतापः सवितेव भाति । हीनो हि धर्म्मेण महीमपीमां लब्ध्वा नरः सीदति पापबुद्धिः ।
वेदोऽधीतश्चरितं ब्रह्मचर्य्यं यज्ञैरिष्टं ब्राह्मणेभ्यश्च दत्तं । परं स्थानं मन्यमानेन भूय आत्मा दत्तो वर्षपूगं सुखेभ्यः ।
सुखप्रिये सेवमानोऽतिवेलं योगाभ्यासे यो न करोति कर्म्म । वित्तक्षये हीनसुखोऽतिवेलं दुःखं शेते कामवेगप्रणुन्नः ।
एवं पुनर्ब्रह्मचर्य्याप्रसक्तो हित्वा धर्म्मं यः प्रकरोत्यधर्म्मं । अश्रद्दधत्परलोकाय मूढो हित्वा देहं तप्यते प्रेत्य मन्दः । ७७५
न कर्म्मणां विप्रणाशोऽस्त्यमुत्र पुण्यानां वाऽप्यथवा पापकानां । पूर्व्वं कर्त्तुर्गच्छति पुण्यपापं पश्चाच्चैनमनुयात्येव कर्त्ता ।
न्यायोपेतं ब्राह्मणेभ्यो यदन्नं श्रद्धापूतं गन्धरसोपपन्नं । अन्वाहार्य्येषूत्तमदक्षिणेषु तथारूपं कर्म्म विख्यायते ते ।
इह क्षेत्रे क्रियते पार्थ कार्य्यं न वै किञ्चित् क्रियते प्रेत्य कार्य्यं । त्वया कृतं पारलोक्यञ्च कर्म्म पुण्यं महत्सद्भिरतिप्रशस्तं ।
जहाति मृत्युञ्च जरां भयञ्च क्षुत्पिपासे मनसश्चाप्रियाणि । न कर्त्तव्यं विद्यते तत्र किञ्चिदन्यत्र वै चेन्द्रियप्रीणनाद्धि ।
एवंरूपं कर्म्मफलं नरेन्द्र मात्रावहं हृदयस्य प्रियेण । स क्रोधजं पाण्डव हर्षजञ्च लोकावुभौ मा प्रहासीश्चिराय । ७८०
अन्तं गत्वा कर्म्मणां मा प्रजह्याः सत्यं दमञ्चार्जवमानृशंस्यं । अश्वमेधं राजसूयं यजेष्ठाः पापस्यान्तं कर्म्मणां मा पुनर्गाः ।
तच्चेदेवं द्वेषरूपेण पार्थाः करिष्यध्वं कर्म पापं चिराय । निवसध्वं वर्षपूगान्वनेषु दुःखं वासं पाण्डवा धर्म्म एव ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अप्रवज्येमास्त्र हित्वा पुरस्तादात्माधीनं यद्बलं ह्येतदासीत्। नित्यञ्च वश्याः सचिवास्तवेमे जनार्द्दनो युयुधानश्च वीरः।
मत्स्यो राजा रुक्मरथः सपुत्त्रः प्रहारिभिः सह पुत्त्रैर्व्विराटः। राजानश्च ये विजिताः पुरस्तात्त्वामेव ते संश्रयेयुः समस्ताः।
महासहायः प्रतपन् बलस्थः पुरस्कृतो वासुदेवार्जुनाभ्यां। वरान् हनिष्यन् द्विषतो रङ्गमध्ये व्यनेष्यथा धार्त्तराष्ट्रस्य दर्पं। ७८५
बलङ्कस्मादर्द्धयित्वा परस्य निजान्कस्मात्कर्षयित्वा सहायान्। निरुष्य कस्माद्वर्षपूगान्वनेषु युयुत्ससे पाण्डव हीनकालं।
अप्राज्ञो वा पाण्डव युध्यमानो धर्मज्ञो वा भूतिमयोऽभ्युपैति। प्रज्ञावान्वा बुध्यमानोऽपि धर्म्मं संरम्भाद्वा सोऽपि भूतेरपैति।
नाधर्म्मे ते धीयते पार्थ बुद्धिर्न्न संरम्भात् कर्म्म चकर्थ पापं। अथो किं तत्कारणं यस्य हेतोः प्रज्ञाविरुद्धं कर्म्म चिकीर्षसीदं।
अव्याधिजं कटुकं शीर्षरोगि यशोमुषं पापफलोदयञ्च। सतां पेयं यन्न पिबन्त्यसन्तो मन्युं महाराज पिब प्रशाम्य।
पापानुबन्धं को नु तं कामयेत क्षमैव ते ज्यायसी नोत भोगाः। यत्र भीष्मः शान्तनवो हतः स्याद्यत्र द्रोणः सहपुत्त्रो हतः स्यात्। ७९०
कृपः शल्यः सौमदत्तिर्व्विकर्णो विविंशतिः कर्णदुर्य्योधनौ च। एतान् हत्वा कीदृशं तत्सुखं स्याद्यद्विन्देयास्तदनुब्रूहि पार्थ।
लब्ध्वाऽपीमां पृथिवीं सागरान्तां जरामृत्यू नैव हि त्वं प्रजह्याः। प्रियाप्रिये सुखदुःखे च राजन्नेवं विद्वन्नैव युद्धं कुरु त्वं।
अमात्यानां यदि कामस्य हेतोरेवं युक्तं कर्म्म चिकीर्षसि त्वं। अपक्रामेः सम्प्रदायैव तेषां मागास्त्वं वै देवयानात्पथोऽद्य।
इति श्रीमहाभारते उद्योगपर्व्वणि सञ्जययानपर्व्वणि सञ्जयवाक्ये षड्विंशोऽध्यायः॥ २६ ॥
॥ युधिष्ठिर उवाच॥ असंशयं सञ्जय सत्यमेतद्धर्म्मो वरः कर्म्मणां यत्त्वमात्थ। ज्ञात्वा तु मां सञ्जय गर्हयेस्त्वं यदि धर्म्मं यद्य धर्म्मं चरेयं।
यत्राधर्म्मो धर्म्मरूपाणि धत्ते धर्म्मः कृत्स्नो दृश्यतेऽधर्म्मरूपः। बिभ्रद्धर्म्मो धर्म्मरूपं तथा च विद्वांसस्तं सम्प्रपश्यन्ति बुद्ध्या। ७९५
एवं तथैवापदि लिङ्गमेतद्धर्म्माधर्म्मौ नित्यवृत्ती भजेतां। आद्यं लिङ्गं यस्य तस्य प्रमाणमापद्धर्म्मं सञ्जय तन्निबोध।
अस्तत्यामापदि कर्म्मनि वर्त्तमानो विकर्म्मस्थः सञ्जय गर्हये तं। लुप्तायान्तु प्रकृतौ येन कर्म्म निष्पादयेत्तत्परीप्सेद्विहीनः।
प्रकृतिस्थश्चापदि वर्त्तमान उभौ गर्ह्यौ भवतः सञ्जयैतौ। अविनाशमिच्छतां ब्राह्मणानां प्रायश्चित्तं विहितं यद्विधात्रा।
सम्पश्येथाः कर्म्मसु वर्त्तमानान् विकर्म्मस्थान् सञ्जय गर्हयेस्त्वं। मनीषिणां सत्त्वविच्छेदनाय विधीयते सत्सु वृत्तिः सदैव।
अब्राह्मणाः सन्ति तु ये न वैद्याः सर्व्वोत्सङ्गं साधु मन्येत तेभ्यः। तदर्थानः पितरो ये च पूर्व्वे पितामहा ये च तेभ्यः परेऽन्ये। ८००
प्रज्ञैषिणो ये च हि कर्म्म कुर्य्युर्नान्यं ततो नास्तिकोऽस्मीति मन्ये। यत्किञ्चनेदं वित्तमस्यां पृथिव्यां यद्देवानां त्रिदशानां परं यत्।
प्राजापत्यं त्रिदिवं ब्रह्मलोकं नाधर्म्मतः सञ्जय कामयेयं। धर्म्मेश्वरः कुशलो नीतिमांश्चाप्युपासिता ब्राह्मणानां मनीषी।
नानाविधांश्चैव महाबलांश्च राज्ञो विजानन्ननुशास्ति कृष्णः। यदि ह्यहं विसृजन् स्यामगर्ह्यो युध्यमानो यदि जह्यां स्वधर्म्मं।
महायशाः केशवस्तद्ब्रवीतु वासुदेवस्तूभयोरर्थकामः। शैनेयोऽयञ्चेदयश्चान्धकाश्च वार्ष्णेयभोजाः कुकुराः सृञ्जयाश्च।
उपासीना वासुदेवस्य बुद्धिं निगृह्य शत्रून् सुहृदो नन्दयन्ति। वृष्ण्यन्धका ह्युग्रसेनादयो वै कृष्णप्रणीताः सर्व्व एवेन्द्रकल्पाः। ८०५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

मनस्विनः सत्यपरायणाश्च महाबला यादवा भोगवन्तः। काश्यो बभ्रुः श्रियमुत्तमाङ्गतो लब्ध्वा कृष्णं भ्रातरमीशितारं।

यस्मै कामान्वर्षति वासुदेवो ग्रीष्मात्यये मेघ इव प्रजाभ्यः। ईदृशोऽयं केशवस्तात भूयान् विद्धि ह्येनं कर्म्मणो निश्चयज्ञं।

प्रियश्च नः साधुतमश्च कृष्णो नातिक्रमे वचनं केशवस्य।

इति श्रीमहाभारते उद्योगपर्व्वणि सञ्जययानपर्व्वणि युधिष्ठिरवाक्ये सप्तविंशोऽध्यायः॥ २७॥

॥ वासुदेव उवाच॥ अविनाशं सञ्जय पाण्डवानामिच्छाम्यहं भूतिमेषां प्रियञ्च। तथा राज्ञो धृतराष्ट्रस्य सूत समाशंसे बहुपुत्त्रस्य वृद्धिं।

कामो हि मे सञ्जय नित्यमेव नान्यद्ब्रूयां तान्प्रति शाम्यतेति। राज्ञश्च हि प्रियमेतदृणोमि मन्ये वै तत्पाण्डवानां समक्षं। ८१०

सुदुष्करस्तत्र शमो हि नूनं प्रदर्शितः सञ्जय पाण्डवेन। यस्मिन्गृद्धो धृतराष्ट्रः सपुत्त्रः कस्मादेषां कलहो नावमूर्च्छेत्।

न त्वं धर्म्मं विचरं सञ्जयेह मत्तश्च जानासि युधिष्ठिराच्च। अथो कस्मात्सञ्जय पाण्डवस्य उत्साहिनः पूरयतः स्वकर्म्म।

यथा ख्यातमावसतः कुटुम्बं पुरा कस्मात्साधु विलोपमात्थ। अस्मिन्विधौ वर्त्तमाने यथावदुच्चावचा मतयो ब्राह्मणानां।

कर्म्मणाऽऽहुः सिद्धिमेके परत्र हित्वा कर्म्म विद्यया सिद्धिमेके। नाभुञ्जानो भक्ष्यभोज्यस्य तृप्येद्विद्वानपीह विदितं ब्राह्मणानां।

या वै विद्याः साधयन्तीह कर्म्म तासां फलं विद्यते नेतरासां। तत्रेह वै दृष्टफलन्तु कर्म्म पीत्वोदकं शाम्यति तृष्णयार्त्तः। ८१५

सोऽयं विधिर्विहितः कर्म्मणैव संवर्त्तते सञ्जय तत्र कर्म्म। तत्र योऽन्यत्कर्म्मणः साधु मन्ये मोघं तस्यालपितं दुर्ब्बलस्य।

कर्म्मणाऽमी भान्ति देवाः परत्र कर्म्मणैवेह प्लवते मातरिश्वा। अहोरात्रे विदधत्कर्म्मणैव अतन्द्रितो शश्वदुदेति सूर्य्यः।

मासार्द्धमासानथ नक्षत्रयोगानतन्द्रितश्चन्द्रमाश्चाभ्युपैति। अतन्द्रितो दहते जातवेदाः समिद्धमानः कर्म्म कुर्व्वन् प्रजाभ्यः।

अतन्द्रिता भारमिमं महान्तं बिभर्त्ति देवी पृथिवी बलेन। अतन्द्रिताः शीघ्रमपो वहन्ति सन्तर्पयन्त्यः सर्व्वभूतानि नद्यः।

अतन्द्रितो वर्षति भूरितेजाः सन्नादयन्नन्तरीक्षं दिशश्च। अतन्द्रितो ब्रह्मचर्य्यं चचार श्रेष्ठत्वमिच्छन्बलभिद्देवतानां। ८२०

हित्वा सुखं मनसश्च प्रियाणि देवः शक्रः कर्म्मणा श्रैष्ठ्यमाप। सत्यधर्म्मौ पालयन्नप्रमत्तो दमन्तितिक्षां समतां प्रियञ्च।

एतानि सर्व्वाण्युपसेवमानः सदेव राज्यं मघवान्प्राप मुख्यं। बृहस्पतिर्ब्रह्मचर्य्यं चचार समाहितः संशितात्मा यथावत्।

हित्वा सुखं प्रतिरुध्येन्द्रियाणि तेन देवानामगमद्गौरवं सः। तथा नक्षत्राणि कर्म्मणाऽमुत्र भान्ति रुद्रादित्या वसवोऽथापि विश्वे।

यमो राजा वैश्रवणः कुवेरो गन्धर्व्वयक्षाप्सरसश्च सूत। ब्रह्मविद्यां ब्रह्मचर्य्यं क्रियाश्च निषेवमाणा ऋषयोऽमुत्र भान्ति।

जानन्निमं सर्व्वलोकस्य धर्म्मं विप्रेन्द्राणां क्षत्त्रियाणां विशाञ्च। स कस्मात्त्वं जानतां ज्ञानवान् सन् व्यायच्छसे सञ्जय कौरवार्थे। ८२५

आम्नायेषु नित्यसंयोगमस्य तथाऽश्वमेधे राजसूये च विद्धि। संयुज्यते धनुषा वर्म्मणा च हस्त्यश्वपृष्ठे रथशस्त्रैश्च भूयः।

ते चेदिमे कौरवाणामुपायमवगच्छेयुरवधेनैव पार्थाः। धर्म्मत्राणं पुण्यमेषां कृतं स्यादार्य्ये वृत्ते भीमसेनं निगृह्य।

ते चेत्पित्र्ये कर्म्मणि वर्त्तमाना आपद्येरन् दिष्टवशेन मृत्युं। यथाशक्त्या पूरयन्तः स्वकर्म्म तदप्येषां निधनं स्यात् प्रशस्तं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding KS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

उताहो त्वं मन्यसे शाम्यमेव राज्ञां युद्धे वर्त्तते धर्म्मतन्त्वं। अयुद्धे वा वर्त्तते धर्म्मतन्त्वं तथैव ते वाचमिमां शृणोमि।
चातुर्व्वर्ण्यस्य प्रथमं विभागमवेच्य त्वं सञ्जय स्वञ्च कर्म्म। निशम्याथो पाण्डवानां स्वकर्म्म प्रशंस वा निन्द वा या मतिस्ते। ८३०
अधीयीत ब्राह्मणो वै यजेत दद्यादियात्तीर्थमुख्यानि चैव। अध्यापयेद्याजयेच्चापि याज्यान् प्रतिग्रहान्वा विदितान्प्रतीच्छेत्।
तथा राजन्यो रक्षणं वै प्रजानां कृत्वा धर्म्मेणाप्रमत्तोऽथ दत्त्वा। यज्ञैरिष्ट्वा सर्व्ववेदानधीत्य दारान् कृत्वा पुण्यकृदावसेद्गृहान्।
स धर्म्मात्मा धर्म्ममधीत्य पुण्यं यदिच्छया व्रजति ब्रह्मलोकं। वैश्योऽधीत्य कृषिगोरक्षपण्यैर्व्वित्तं चिन्वा पालयन्नप्रमत्तः।
प्रियं कुर्व्वन् ब्राह्मणक्षत्रियाणां धर्म्मशीलः पुण्यकृदावसेद्गृहान्। परिचर्य्या वन्दनं ब्राह्मणानां नाधीयीत प्रतिषिद्धोऽस्य यज्ञः।
नित्योत्थितो भूतयेऽतन्द्रितः स्यादेवं स्मृतः शूद्रधर्म्मः पुराणः। एतान् राजा पालयन्नप्रमत्तो नियोजयन् सर्व्ववर्णान् स्वधर्म्मे। ८३५
अकामात्मा समवृत्तिः प्रजासु नाधार्म्मिकाननुरुध्येत कामान्। श्रेयांस्तस्माद्यदि विद्येत कश्चिदभिज्ञातः सर्व्वधर्म्मोपपन्नः।
स तं दुष्टमनुशिष्यात्प्रजानामेतद्बुध्येन्न च तस्मिन्नसाधुः। यदा गृध्येत्परभूतौ नृशंसो विधिप्रकोपाद्बलमाददानः।
ततो राज्ञां समभवद्युद्धमेतत्तत्र जातं वर्म्म शस्त्रं धनुश्च। इन्द्रेणैतद्दस्युवधाय कर्म्म उत्पादितं वर्म्म शस्त्रं धनुश्च।
तत्र पुण्यं दस्युवधेन लभ्यते सोऽयं दोषः कुरुभिस्तीव्ररूपः। अधर्म्मज्ञैर्धर्म्ममबुध्यमानैः प्रादुर्भूतः सञ्जय तत्र साधु।
तत्र राजा धृतराष्ट्रस्य पुत्त्रो धर्म्म्यं हरन्पाण्डवानामकस्मात्। नावेक्षते राजधर्म्मं पुराणं तदन्वयाः कुरवः सर्व्व एव। ८४०
स्तेनो हरेद्यत्र धनं ह्यदृष्टः प्रसह्य वा यत्र हरेत दृष्टः। उभौ गर्ह्यौ भवतः सञ्जयैतौ किं वै पृथक्त्वं धृतराष्ट्रस्य पुत्त्रे।
सोऽयं लोभान्मन्यते धर्म्ममेतं यमिच्छति क्रोधवशानुगामी। भागः पुनः पाण्डवानां निविष्टस्तन्नोऽकस्मादाददीरन् परे वै।
अस्मिन्पदे युध्यतां नो बधोऽपि श्लाघ्यः पित्र्यं परराज्याद्विशिष्टं। एतान् धर्म्मान् कौरवाणां पुराणानाचक्षीथाः सञ्जय राजमध्ये।
ये ते मन्दा मृत्युवशाभिपन्नाः समानीता धार्त्तराष्ट्रेण मूढाः। इदं पुनः कर्म्म पापीय एव सभामध्ये पश्य वृत्तं कुरूणां।
प्रियां भार्य्यां द्रौपदीं पाण्डवानां यशस्विनीं शीलवृत्तोपपन्नां। यदुपैक्षन्त कुरवो भीष्ममुख्याः कामानुगेनोपरुद्धां रुदन्तीं। ८४५
तां चेत्तदा ते सकुमारवृद्धा अवारयिष्यन् कुरवः समेताः। मम प्रियं धृतराष्ट्रोऽकरिष्यत् पुत्त्राणाञ्च कृतमस्याऽभविष्यत्।
दुःशासनः प्रातिलोम्यान्निनाय सभामध्ये श्वशुराणाञ्च कृष्णां। सा तत्र नीता करुणं व्यपेक्ष्य नान्यं क्षत्तुर्नाथमवाप किञ्चित्।
कार्पण्यादेव सहितास्तत्र भूपा नाशक्नुवन् प्रतिवक्तुं सभायां। एकः क्षत्ता धर्म्म्यमर्थं ब्रुवाणो धर्मबुद्ध्या प्रत्युवाचाल्पबुद्धिं।
अनुक्त्वा त्वं धर्म्ममेतं सभायामथेच्छसे पाण्डवस्योपदेष्टुं। कृष्णा त्वेतत्कर्म्म चकार शुद्धं सुदुष्करं तत्र सभां समेत्य।
येन कृच्छ्रात्पाण्डवानुज्जहार तथात्मानं नौरिव सागरौघात्। यत्राब्रवीत्सूतपुत्त्रः सभायां कृष्णां स्थितां श्वशुराणां समीपे। ८५०
न ते गतिर्व्विद्यते याज्ञसेनि प्रपद्य दासी धार्त्तराष्ट्रस्य वेश्म। पराजितास्ते पतयो न सन्ति पतिं चान्यं भाविनि त्वं वृणीष्व।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यो बीभत्सोर्हृदये प्रोत आसीदस्थि च्छिन्दन् मर्म्मघाती सुघोरः। कर्णाच्छरो वाङ्मयस्तिग्मतेजाः प्रतिष्ठितो हृदये फाल्गुनस्य।

कृष्णाजिनानि परिधित्समानान् दुःशासनः कटुकान्यभ्यभाषत। एते सर्व्वे षण्ढतिला विनष्टाः क्षयं गता नरकं दीर्घकालं।

गान्धारराजः शकुनिर्निकृत्या यदब्रवीत् द्यूतकाले स पार्थं। पराजितो नकुलः किं तवास्ति कृष्णया त्वं दीव्य वै याज्ञसेन्या।

जानासि त्वं सञ्जय सर्व्वमेतत् द्यूते वाक्यं गर्ह्यमेवं यथोक्तं। स्वयं त्वहं प्रार्थये तत्र गन्तुं समाधातुं कार्य्यमेतद्विपन्नं। ८८५

अहापयित्वा यदि पाण्डवार्थं शमं कुरूणामपि चेच्चरेयं। पुण्यञ्च मे स्याच्चरितं महोदयं मुच्येरंश्च कुरवो मृत्युपाशात्।

अपि मे वाचं भाषमाणस्य काव्यां धर्म्मारामामर्थवतीमहिंस्रां। अवेक्षेरन् धार्त्तराष्ट्राः समक्षं माञ्च प्राप्तं कुरवः पूजयेयुः।

अतोऽन्यथा रथिना फाल्गुनेन भीमेन चैवाहवदंशितेन। पराषिक्तान् धार्त्तराष्ट्रांस्तु विद्धि प्रदह्यमानान् कर्म्मणा स्वेन पापान्।

पराजितान् पाण्डवेयांस्तु वाचो रौद्रा रूक्षा भाषते धार्त्तराष्ट्रः। गदाहस्तो भीमसेनोऽप्रमत्तो दुर्य्योधनं स्मारयिता हि काले।

सुयोधनो मन्युमयो महाद्रुमः स्कन्धः कर्णः शकुनिस्तस्य शाखा। दुःशासनः पुष्पफले समृद्धे मूलं राजा धृतराष्ट्रो मनीषी। ८९०

युधिष्ठिरो धर्म्ममयो महाद्रुमः स्कन्धोऽर्जुनो भीमसेनोऽस्य शाखा। माद्रीसुतौ पुष्पफले समृद्धे मूलन्त्वहं ब्रह्म च ब्राह्मणाश्च।

वनं राजा धृतराष्ट्रः सपुत्रो व्याघ्रास्ते वै सञ्जय पाण्डुपुत्राः। मा वनं छिन्धि सव्याघ्रं मा व्याघ्रा नीनशन्वनात्।

निर्वनो वध्यते व्याघ्रो निर्व्याघ्रं छिद्यते वनं। तस्माद्व्याघ्रो वनं रक्षेद्वनं व्याघ्रञ्च पालयेत्।

लताधर्म्मा धार्त्तराष्ट्राः शालाः सञ्जय पाण्डवाः। न लता वर्द्धते जातु महाद्रुममनाश्रिता।

स्थिताः शुश्रूषितुं पार्थाः स्थिता योद्धुमरिन्दमाः। यत्कृत्यं धृतराष्ट्रस्य तत्करोतु नराधिपः। ८९५

स्थिताः शमे महात्मानः पाण्डवा धर्म्मचारिणः। योधाः समर्थास्तद्विद्वन्नाचक्षीथा यथातथं।

इति श्रीमहाभारते उद्योगपर्व्वणि सञ्जययानपर्व्वणि कृष्णवाक्ये अष्टाविंशोऽध्यायः॥ २८॥

॥ सञ्जय उवाच॥ आमन्त्रये त्वां नरदेव देव गच्छाम्यहं पाण्डव स्वस्ति तेऽस्तु। कच्चिन्न वाचा वृजिनं हि किञ्चिदुच्चारितं मे मनसोऽभिषङ्गात्।

जनार्द्दनं भीमसेनार्जुनौ च माद्रीसुतौ सात्यकिं चेकितानं। आमन्त्र्य गच्छामि शिवं सुखं वः सौम्येन मां पश्यत चक्षुषा नृपाः।

॥ युधिष्ठिर उवाच॥ अनुज्ञातः सञ्जय स्वस्ति गच्छ न नः स्मरस्यप्रियं जातु विद्वन्। विद्मश्च त्वां ते च वयञ्च सर्व्वे शुद्धात्मानं मध्यगतं सभास्थं।

आप्तो दूतः सञ्जय सुप्रियो मे कल्याणवाक् शीलवांस्तृप्तिमांश्च। न मुह्येस्त्वं सञ्जय जातु मत्या न च क्रुध्येरुच्यमानो दुरुक्तैः। ९००

न मर्म्मगां जातु वक्ताऽसि रूक्षां नापस्रुतिं कटुकां नो तु मुक्तां। धर्म्मारामामर्थवतीमहिंस्रामेतां वाचं तव जानीम सूत।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

त्वमेव नः प्रियतमोऽसि दूत इहागच्छेद्विदुरो वा द्वितीयः। अभीक्ष्णदृष्टोऽसि पुरा हि नस्त्वं धनञ्जयस्यात्मसमः सखाऽसि।
इतो गत्वा सञ्जय चिप्रमेव उपातिष्ठेथा ब्राह्मणान् ये तदर्हाः । विशुद्धवीर्य्यांश्चरणोपपन्नाः कुले जाताः सर्व्वधर्म्मोपपन्नाः।
स्वाध्यायिनो ब्राह्मणा भिक्षवश्च तपस्विनो ये च नित्या वनेषु। अभिवाद्या वै मद्वचनेन वृद्धास्तथेतरेषां कुशलं वदेथाः।
पुरोहितं धृतराष्ट्रस्य राज्ञस्तथाचार्य्यानृत्विजो ये च तस्य। तैश्च त्वं तात सहितैर्यथार्हं सङ्गच्छेथाः कुशलेनैव सूत। ८७५
अश्रोत्रिया ये च वसन्ति वृद्धा मनस्विनः शीलबलोपपन्नाः। आशंसन्तोऽस्माकमनुस्मरन्तो यथाशक्ति धर्म्ममात्रां चरन्तः।
श्लाघयस्व मां कुशलिनं स्म तेभ्यो ह्यनामयं तात पृच्छेर्जघन्यं। ये जीवन्ति व्यवहारेण राष्ट्रे ये पालयन्तो निवसन्ति राष्ट्रे।
आचार्य्य इष्टो नयगो विधेयो वेदानभीप्सन् ब्रह्मचर्य्यं चचार। योऽस्त्रं चतुष्पात्पुनरेव चक्रे द्रोणः प्रसन्नोऽभिवाद्यस्त्वयाऽसौ।
अधीतविद्यश्चरणोपपन्नो योऽस्त्रं चतुष्पात्पुनरेव चक्रे। गन्धर्व्वपुत्त्रप्रतिमं तरस्विनं तमश्वत्थामानं कुशलं स्म पृच्छेः।
शारद्वतस्यावसथं स्म गत्वा महारथस्यात्मविदां वरस्य। त्वं मामभीक्ष्णं परिकीर्त्तयन् वै कृपस्य पादौ सञ्जय पाणिना स्पृशेः। ८८०
यस्मिन् शौर्य्यमानृशंस्यं तपश्च प्रज्ञा शीलं श्रुतिसत्त्वे धृतिश्च। पादौ गृहीत्वा कुरुसत्तमस्य भीष्मस्य मां तत्र निवेदयेथाः।
प्रज्ञाचक्षुर्यः प्रणेता कुरूणां बहुश्रुतो वृद्धसेवी मनीषी। तस्मै राज्ञे स्थविरायाभिवाद्य आचक्षीथाः सञ्जय मामरोगं।
ज्येष्ठः पुत्त्रो धृतराष्ट्रस्य मन्दो मूर्खः शठः सञ्जय पापशीलः। प्रशास्ता वै पृथिवी येन सर्व्वा सुयोधनं कुशलं तात पृच्छेः।
भ्राता कनीयानपि तस्य मन्दस्तथाशीलः सञ्जय सोऽपि शश्वत्। महेश्वासः शूरतमः कुरूणां दुःशासनः कुशलं तात वाच्यः।
यस्य कामो वर्त्तते नित्यमेव नान्यः शमाद्भारतानामिति स्म। स वाह्लिकानामृषभो मनीषी त्वयाऽभिवाद्यः सञ्जय साधुशीलः। ८८५
गुणैरनेकैः प्रवरैश्च युक्तो विज्ञानवान्नैवच निष्ठुरो यः। स्नेहादमर्षं सहते सदैव स सोमदत्तः पूजनीयो मतो मे।
अर्हत्तमः कुरुषु सौमदत्तिः स नो भ्राता सञ्जय मत्सहायः। महेष्वासो रथिनामुत्तमोऽर्हः सहामात्यः कुशलं तस्य पृच्छेः।
ये चैवान्ये कुरुमुख्या युवानः पुत्त्राः पौत्त्रा भ्रातरश्चैव ये नः। यंयमेषां मन्यसे येन योग्यं तत्तत्प्रोच्यानामयं सूत वाच्याः।
ये राजानः पाण्डवायोधनाय समानीता धार्त्तराष्ट्रेण केचित्। वशातयः शाल्वकाः केकयाश्च तथाम्बष्ठा ये त्रिगर्त्ताश्च मुख्याः।
प्राच्योदीच्या दाक्षिणात्याश्च शूरास्तथा प्रतीच्याः पार्व्वतीयाश्च सर्व्वे। अनृशंसाः शीलवृत्तोपपन्नास्तेषां सर्व्वेषां कुशलं सूत पृच्छेः। ८९०
हस्त्यारोहा रथिनः सादिनश्च पदातयश्चार्य्यसङ्घा महान्तः। आख्याय मां कुशलिनं स्म नित्यमनामयं परिपृच्छेः समग्रान्।
तथा राज्ञो ह्यर्थयुक्तानमात्यान् दौवारिकान् ये च सेनान्नयन्ति। आयव्ययं ये गणयन्ति नित्यमर्थांश्च ये महतश्चिन्तयन्ति।
वृन्दारकं कुरुमध्येष्वमूढं महाप्रज्ञं सर्व्वधर्म्मोपपन्नं। न तस्य युद्धं रोचते वै कदाचित् वैश्यापुत्त्रं कुशलं तात पृच्छेः।
निकर्त्तने देवने योऽद्वितीयश्छन्नोपधः साधुदेवी मताक्षः। यो दुर्जयो देवितव्येन सङ्ख्ये सचित्रसेनः कुशलं तात वाच्यः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding: IKS-MoE Grant, Equipment Heritage Foundation, Jagadhri

गान्धारराजः शकुनिः पार्व्वतीयो निकर्त्तने योऽद्वितीयोऽक्षदेवी । मानं कुर्व्वन् धार्त्तराष्ट्रस्य सूत मिथ्याबुद्धेः कुशलं तात पृच्छेः । ८९५

यः पाण्डवानेकरथेन वीरः समुत्सहत्यप्रधृष्यान् विजेतुं । यो मुह्यतां मोहयिताऽद्वितीयो वैकर्त्तनः कुशलं तस्य पृच्छेः ।

स एव भक्तः स गुरुः स भर्त्ता स वै पिता स च माता सुहृच्च । अगाधबुद्धिर्व्विदुरो दीर्घदर्शी स नो मन्त्री कुशलं तं स्म पृच्छेः ।

वृद्धाः स्त्रियो याश्च गुणोपपन्ना ज्ञायन्ते नः सञ्जय मातरस्ताः । ताभिः सर्व्वाभिः सहिताभिः समेत्य स्त्रीभिः सवृद्धाभिरभिवादं वदेथाः ।

कच्चित्पुत्रा जीवपुत्राः सुसम्यग्वर्त्तन्ते वो वृत्तिमनृशंसरूपाः । इति स्मोक्ता सञ्जय ब्रूहि पश्चादजातशत्रुः कुशली सपुत्रः ।

यो नो भार्य्याः सञ्जय वेत्थ तत्र तासां सर्व्वासां कुशलं तात पृच्छेः । सुसङ्गुप्ताः सुरभयोऽनवद्या कच्चिद्गृहानावसथाऽप्रमत्ताः । ९००

कच्चिद्वृत्तिं श्वशुरेषु भद्राः कल्याणीं वर्त्तध्वमनृशंसरूपां । यथा च स्युः पतयोऽनुकूलास्तथा वृत्तिमात्मनः स्थापयध्वं ।

या नः स्नुषाः सञ्जय वेत्थ तत्र प्राप्ताः कुलेभ्यश्च गुणोपपन्नाः । प्रजावत्यो ब्रूहि समेत्य ताश्च युधिष्ठिरो वोऽभ्यवदत्प्रसन्नः ।

कन्याः स्वजेयाः सदनेषु सञ्जय अनामयं मद्वचनेन पृष्ट्वा । कल्याणा वः सन्तु पतयोऽनुकूला यूयं पतीनां भवतानुकूलाः ।

अलङ्कृता वस्त्रवत्यः सुगन्धा अबीभत्साः सुखिता भोगवत्यः । लघु यासां दर्शनं वाक्च लघ्वी वेशस्त्रियः कुशलं तात पृच्छेः ।

दास्यः स्युर्या ये च दासाः कुरूणां तदाश्रया बहवः कुब्जखञ्जाः । आख्याय मां कुशलिनं स्म तेभ्योऽप्यनामयं परिपृच्छेर्जघन्यं । ९०५

कच्चिद्वृत्तिं वर्त्तते वै पुराणीं कच्चिद्भोगान् धार्त्तराष्ट्रो ददाति। अङ्गहीनान् कृपणान् वामनान्वा यानानृशंस्यो धृतराष्ट्रो बिभर्त्ति।

अन्धांश्च सर्व्वान् स्थविरांस्तथैव हस्त्याजीवा बहवो येऽत्र सन्ति । आख्याय मां कुशलिनं स्म तेभ्योऽप्यनामयं परिपृच्छेर्जघन्यं ।

माभैष्ट दुःखेन कुजीवितेन नूनं कृतं परलोकेषु पापं । निगृह्य शत्रून् सुहृदोऽनुगृह्य वासोभिरन्नेन च वो भरिष्ये ।

सन्त्येव मे ब्राह्मणेभ्यः कृतानि भावीन्यथो नो वत वर्त्तयन्ति । तान् पश्यामि युक्तरूपांस्तथैव तामेव सिद्धिं श्रावयेथा नृपन्तं ।

ये चानाथा दुर्व्बलाः सर्व्वकालमात्मन्येव प्रयतन्तेऽथ मूढाः । तांश्चापि त्वं कृपणान् सर्व्वथैवअस्मद्वाक्यात्कुशलं तात पृच्छेः। ९१०

ये चाप्यन्ये संश्रिता धार्त्तराष्ट्रान्नानादिग्भ्योऽभ्यागताः सूतपुत्र । दृष्ट्वा तांश्चैवार्हतश्चापि सर्व्वान्संपृच्छेथाः कुशलं चाव्ययञ्च ।

एवं सर्व्वानागताभ्यागतांश्च राज्ञो दूतान् सर्व्वदिग्भ्योऽभ्युपेतान् । पृष्ट्वा सर्व्वान् कुशलं तांश्च सूत पश्चादहं कुशली तेषु वाच्यः ।

न हीदृशाः सन्त्यपरे पृथिव्यां ये योधका धार्त्तराष्ट्रेण लब्धाः । धर्म्मस्तु नित्यो मम धर्म्म एव महाबलः शत्रुनिबर्हणाय ।

इदं पुनर्व्वचनं धार्त्तराष्ट्रं सुयोधनं सञ्जय श्रावयेथाः । यस्ते शरीरे हृदयं दुनोति कामः कुरून् स सपत्नोऽनु शिष्यां ।

न विद्यते युक्तिरेतस्य काचिन्नैवं विधाः स्याम यथा प्रियं ते । ददस्व वा शक्रपुरीं ममैव युध्यस्व वा भारतमुख्य वीर । ९१५

इति श्रीमहाभारते उद्योगपर्व्वणि सञ्जययानपर्व्वणि युधिष्ठिरवाक्ये एकोनत्रिंशोऽध्यायः ॥ २९ ॥

॥ युधिष्ठिर उवाच ॥ ॥ उत सन्तमसन्तं वा बालं वृद्धं च सञ्जय । उताबलं बलीयांसं धाता प्रकुरुते वशे ।

उत बालाय पाण्डित्यं पण्डितायोत बालतां । ददाति सर्व्वमीशानः पुरस्ताच्छुक्रमुच्चरन् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri Sarayu Trust, Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

बलं जिज्ञासमानस्य आचचीथा यथातथं । अथ मन्त्रं मन्त्रयित्वा याथातथ्येन हृष्टवत् ।
गावल्गणे कुरून् गत्वा धृतराष्ट्रं महाबलं । अभिवाद्योपसंगृह्य ततः पृच्छेरनामयं ।
ब्रूयाश्चैनं त्वमासीनं कुरुभिः परिवारितं । तवैव राजन् वीर्य्येण सुखं जीवन्ति पाण्डवाः । ९२०
तव प्रसादाद्बालास्ते प्राप्ता राज्यमरिन्दम । राज्ये तान् स्थापयित्वाऽग्रे नोपेक्षीर्व्विनशिष्यतः ।
सर्व्वमप्येतदेकस्य नालं सञ्जय कस्यचित् । तात संहत्य जीवामो द्विषतां मा वशं गमः ।
तथा भीष्मं शान्तनवं भारतानां पितामहं । शिरसाऽभिवदेथास्त्वं मम नाम प्रकीर्त्तयन् ।
अभिवाद्य च वक्तव्यस्ततोऽस्माकं पितामहः । भवता शान्तनोर्व्वंशो निमग्नः पुनरुद्धृतः ।
स त्वं कुरु तथा तात स्वमतेन पितामह । यथा जीवन्ति ते पौत्राः प्रीतिमन्तः परस्परं । ९२५
तथैव विदुरं ब्रूयाः कुरूणां मन्त्रधारिणं । अयुद्धं सौम्य भाषस्व हितकामो युधिष्ठिरे ।
अथ दुर्य्योधनं ब्रूया राजपुत्त्रममर्षणं । मध्ये कुरूणामासीनमनुनीय पुनः पुनः ।
अपापां यदुपैक्षस्त्वं कृष्णामेकां सभागतां । तद्दुःखमतितिक्षाम मावधिष्म कुरूनिति ।
एवं पूर्व्वापरान् क्लेशान् तितिक्षन्ते स्म पाण्डवाः । बलीयांसोऽपि सन्तो यत्तत्सर्व्वं कुरवो विदुः ।
यन्नः प्राव्राजयः सौम्य अजिनैः प्रतिवासितान् । अतितिक्षाम हि च तत् मावधिष्म कुरूनिति । ९३०
यत्तत् कुन्तीमतिक्रम्य कृष्णां केशेष्वधर्षयत् । दुःशासनस्तेऽनुमते तच्चास्माभिरुपेक्षितं ।
यथोचितं स्वकं भागं लभेमहि परन्तप । निवर्त्तय परद्रव्यात् बुद्धिं गृद्धां नरर्षभ ।
शान्तिरेवं भवेद्राजन् प्रीतिश्चैव परस्परं । राज्यैकदेशमपि नः प्रयच्छ शममिच्छतां ।
कुशस्थलं वृकस्थलं माकन्दीं वारणावतं । अवसानं भवेदत्र कञ्चिदेकञ्च पञ्चमं ।
भ्रातॄणां देहि पञ्चानां पञ्चग्रामान् सुयोधन । शान्तिर्नोऽस्तु महाप्राज्ञ ज्ञातिभिः सह सञ्जय । ९३५
भ्राता भ्रातरमन्वेतु पिता पुत्त्रेण युज्यतां । स्मयमानाः समायान्तु पाञ्चालाः कुरुभिः सह ।
अक्षतान् कुरुपाञ्चालान् पश्येयमिति कामये । सर्व्वे सुमनसस्तात शाम्याम भरतर्षभ ।
अलमेव शमायास्मि तथा युद्धाय सञ्जय । धर्म्मार्थयोरलञ्चाहं मृदवे दारुणाय च ।
इति श्रीमहाभारते उद्योगपर्व्वणि सञ्जययानपर्व्वणि युधिष्ठिरवाक्ये त्रिंशोऽध्यायः ॥ ३० ॥
॥ वैशम्पायन उवाच ॥ अनुज्ञातः पाण्डवेन प्रययौ सञ्जयस्तदा । शासनं धृतराष्ट्रस्य सर्व्वं कृत्वा महात्मनः ।
सम्प्राप्य हास्तिनपुरं शीघ्रमेव प्रविश्य च । अन्तःपुरं समास्थाय द्वाःस्थं वचनमब्रवीत् । ९४०
आचक्ष्व धृतराष्ट्राय द्वाःस्थ मां समुपागतं । सकाशात्पाण्डुपुत्त्राणां सञ्जयं मा चिरं कृथाः ।
जागर्त्ति चेदभिवदेस्त्वं हि द्वाःस्थ प्रविशेयं विदितो भूमिपस्य । निवेद्यमत्रात्ययिकं हि मेऽस्ति द्वाःस्थोऽथ श्रुत्वा नृपतिं जगाद ।
॥ द्वाःस्थ उवाच ॥ सञ्जयोऽयं भूमिपते नमस्ते दिदृक्षया द्वारमुपागतस्ते । प्राप्तो दूतः पाण्डवानां सकाशात् प्रशाधि राजन् किमयं करोतु ।
॥ धृतराष्ट्र उवाच ॥ आचक्ष्व मां सुखिनं कल्यमस्मै प्रवेश्यतां स्वागतं सञ्जयाय । न हि चाहमेतस्य भवाम्यकल्यः स मे कस्मा द्वारि तिष्ठेच्च सक्तः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ वैशम्पायन उवाच ॥ ततः प्रविश्यानुमते नृपस्य महद्वेश्म प्राज्ञशूरार्य्यगुप्त । सिंहासनस्थं पार्थिवमाससाद वैचित्रवीर्य्यं प्रा
ञ्जलिः सूतपुत्त्रः । ९४५

॥ सञ्जय उवाच ॥ सञ्जयोऽहं भूमिपते नमस्ते प्राप्तोऽस्मि गत्वा नरदेव पाण्डवान् । अभिवाद्य त्वां पाण्डुपुत्त्रो मनस्वी युधि
ष्ठिरः कुशलं चान्वपृच्छत् ।

स ते पुत्त्रान् पृच्छति प्रीयमाणः कच्चित्पुत्त्रैः प्रीयसे नप्तृभिश्च । तथा सुहृद्भिः सचिवैश्च राजन् ये चापि त्वामुपजीवन्ति तैश्च ।

॥ धृतराष्ट्र उवाच ॥ अभिनन्द्य त्वां तात वदामि सञ्जय अजातशत्रुञ्च सुखेन पार्थं । कच्चित्स राजा कुशली सपुत्त्रः सहामात्यः
सानुजः कौरवाणां ।

॥ सञ्जय उवाच ॥ सहामात्यः कुशली पाण्डुपुत्त्रो बुभूषते यच्च तेऽग्रे मनोऽभूत् । निर्णिक्तधर्म्मार्थकरो मनस्वी बहुश्रुतो दृष्टि
मान् शीलवांश्च ।

परो धर्म्मः पाण्डवस्यानृशंस्यं धर्म्मः परो वित्तचयान्मतोऽस्य । सुखप्रिये धर्म्महीनेऽनपार्थे नु रुध्यते भारत तस्य बुद्धिः । ९५०

परप्रयुक्तः पुरुषो विचेष्टते सूत्रप्रोता दारुमयीव योषा । इमं दृष्ट्वा नियमं पाण्डवस्य मन्ये परं कर्म्म दैवं मनुष्यात् ।

इमञ्च दृष्ट्वा तव कर्म्मदोषं पापोदर्कं घोरमवर्णरूपं । यावत्परः कामयतेऽतिवेलं तावन्नरोऽयं लभते प्रशंसां ।

अजातशत्रुस्तु विहाय पापं जीर्णां त्वचं सर्प इवासमर्थां । विरोचतेऽहार्य्यवृत्तेन धीरो युधिष्ठिरस्त्वयि पापं विसृज्य ।

हन्तात्मनः कर्म्म निबोध राजन् धर्म्मार्थयुक्तादार्य्यवृत्तादपेतं । उपक्रोशं चेह गतोऽसि राजन् भूयश्च पापं प्रसजेदमुत्र ।

स त्वमर्थं संशयितं विना तैराशंससे पुत्त्रवशानुगोऽस्य । अधर्म्मशब्दश्च महान् पृथिव्यां नेदं कर्म्म त्वत्समं भारताग्र्य । ९५५

हीनप्रज्ञो दौष्कुलेयो नृशंसो दीर्घवैरी क्षत्त्रविद्यास्वधीरः । एवंधर्म्मानापदः संश्रयेयुर्हीनो वीर्य्ये यश्च भवेदशिष्टः ।

कुले जातो बलवान् यो यशस्वी बहुश्रुतः सुखजीवी जितात्मा । धर्म्माधर्म्मौ ग्रथितौ यो बिभर्त्ति स ह्यस्य दिष्टस्य वशादुपैति ।

कथं हि मन्त्राग्र्यधरो मनीषी धर्म्मार्थयोरापदि संप्रणेता । एवमुक्तः सर्व्वमन्त्रैरहीनो नरो नृशंसं कर्म कुर्य्यादमूढः ।

तव ह्यमी मन्त्रविदः समेत्य समासते कर्म्मसु नित्ययुक्ताः । तेषामयं बलवान्निश्चयश्च कुरुक्षयो नियमेनोदपादि ।

अकालिकं कुरवो नाभविष्यन् पापेन चेत्पापमजातशत्रुः । इच्छेज्जातु त्वयि पापं विसृज्य निन्दा चेयं तव लोकेऽभविष्यत् । ९६०

किमन्यत्र विषयादीश्वराणां यत्र पार्थः परलोकं स्म द्रष्टुं । अत्यक्रामत्स तथा सम्मतः स्यान्न संशयो नास्ति मनुष्यकारः ।

एतान् गुणान् कर्म्मकृतानवेक्ष्य भावाभावौ वर्त्तमानावनित्यौ । बलिर्हि राजा पारमविन्दमानो नान्यत्कालात्कारणं तत्र मेने ।

चक्षुः श्रोत्रे नासिका त्वक् च जिह्वा ज्ञानस्यैतान्यायतनानि जन्तोः । तानि प्रीतान्येव तृष्णाक्षयान्ते तान्यव्यथो दुःखहीनः
प्रणुद्यात् ।

न त्वेव मन्ये पुरुषस्य कर्म्म संवर्त्तते सुप्रयुक्तं यथावत् । मातुः पितुः कर्म्मणाऽभिप्रसूतः संवर्द्धते विधिवद्भोजनेन ।

प्रियाप्रिये सुखदुःखे च राजन्निन्दाप्रशंसे च भजन्त एव । परस्त्वेनं गर्हयतेऽपराधे प्रशंसते साधुवृत्तं तमेव । ९६५

स त्वां गर्हे भारतानां विरोधादन्तो नूनं भवितायं प्रजानां । नोचेदिदं तव कर्म्मापराधात् कुरून् दहेत्कृष्णवर्त्मेव कक्षं ।

त्वमेवैको जातु पुत्त्रस्य राजन् वशं गत्वा सर्व्वलोके नरेन्द्र । कामात्मनः श्लाघनो द्यूतकाले नागाः शमं पश्य विपाकमस्य ।

अनाप्तानां संग्रहात्त्वं नरेन्द्र तथाप्तानां निग्रहाच्चैव राजन् । भूमिं स्फीतां दुर्व्बलत्वादनन्तामशक्तस्त्वं रक्षितुं कौरवेन्द्र ।

अनुज्ञातो रथवेगावधूतः श्रान्तोऽभिपद्ये शयनं नृसिंह । प्रातः श्रोतारः कुरवः सभायामजातशत्रोर्व्वचनं समेताः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ धृतराष्ट्र उवाच ॥ अनुज्ञातोऽस्यावसथं परैहि सुखं प्रपद्यस्व शयनं सूतपुत्त्र । प्रातः श्रोतारः कुरवः सभायामजातशत्रोर्व्वचनं समेताः । ९७०

इति श्रीमहाभारते उद्योगपर्व्वणि सञ्जययानपर्व्वणि धृतराष्ट्रसञ्जयसंवादे एकत्रिंशोऽध्यायः समाप्तञ्च सञ्जययानपर्व्व ॥ ३१॥

॥ अथ प्रजागरपर्व्व ॥ ६ ॥

॥ वैशम्पायन उवाच ॥ द्वाःस्थं प्राह महाप्राज्ञो धृतराष्ट्रो महीपतिः । विदुरं द्रष्टुमिच्छामि तमिहानय मा चिरं।
प्रहितो धृतराष्ट्रेण दूतः चत्तारमब्रवीत्। ईश्वरस्त्वां महाराजो महाप्राज्ञ दिदृक्षति ।
एवमुक्तस्तु विदुरः प्राप्य राजनिवेशनं । अब्रवीद्धृतराष्ट्राय द्वाःस्थं मां प्रतिवेदय ।
॥ द्वाःस्थ उवाच ॥ विदुरोऽयमनुप्राप्तो राजेन्द्र तव शासनात्। द्रष्टुमिच्छति ते पादौ किं करोतु प्रशाधि मां।
॥ धृतराष्ट्र उवाच ॥ प्रवेशय महाप्रज्ञं विदुरं दीर्घदर्शिनं। अहं हि विदुरस्यास्य नाकल्यो जातु दर्शने । ९७५
॥ द्वाःस्थ उवाच ॥ प्रविशान्तःपुरं चत्तर्महाराजस्य धीमतः । न हि ते दर्शने ऽकल्यो जातु राजाऽब्रवीद्धि मां।
॥ वैशम्पायन उवाच ॥ ततः प्रविश्य विदुरो धृतराष्ट्रनिवेशनं। अब्रवीत्प्राञ्जलिर्व्वाक्यं चिन्तयानं नराधिपं।
विदुरोऽहं महाप्रज्ञ सम्प्राप्तस्तव शासनात् । यदि किञ्चन कर्त्तव्यमयमस्मि प्रशाधि मां।
॥ धृतराष्ट्र उवाच ॥ सञ्जयो विदुर प्राप्तो गर्हयित्वा च माङ्गतः। अजातशत्रोः श्वो वाक्यं सभामध्ये स वक्ष्यति ।
तस्याद्य कुरुवीरस्य न विज्ञातं वचो मया । तन्मे दहति गात्राणि तदकार्षीत्प्रजागरं। ९८०
जाग्रतो दह्यमानस्य श्रेयो यदनुपश्यसि। तद्ब्रूहि त्वं हि नस्तात धर्म्मार्थकुशलो ह्यसि।
यतः प्राप्तः सञ्जयः पाण्डवेभ्यो न मे यथावन्मनसः प्रशान्तिः। सर्व्वेन्द्रियाण्यप्रकृतिं गतानि किं वक्ष्यतीत्येव हि मेऽद्य चिन्ता।
॥ विदुर उवाच ॥ अभियुक्तं बलवता दुर्ब्बलं हीनसाधनं। हृतस्वं कामिनं चौरमाविशन्ति प्रजागराः।
कच्चिदेतैर्म्महादोषैर्न स्पृष्टोऽसि नराधिप। कच्चिच्च परवित्तेषु गृध्यन्न परितप्यसे।
॥ धृतराष्ट्र उवाच ॥ श्रोतुमिच्छामि ते धर्म्म्यं परं नैःश्रेयसं वचः। अस्मिन् राजर्षिवंशे हि त्वमेकः प्राज्ञसम्मतः। ९८५
॥ विदुर उवाच ॥ राजा लक्षणसम्पन्नस्त्रैलोक्यस्याधिपो भवेत्। प्रेष्यस्ते प्रेषितश्चैव धृतराष्ट्र युधिष्ठिरः ।
विपरीततरश्च त्वं भागधेये न सम्मतः। अर्च्चिषां प्रक्षयाच्चैव धर्म्मात्मा धर्म्मकोविदः।
आनृशंस्यादनुक्रोशाद्धर्म्मात् सत्यात् पराक्रमात्। गुरुत्वात्त्वयि सम्प्रेक्ष्य बहून् क्लेशान् तितिक्षते।
दुर्य्योधने सौबले च कर्णे दुःशासने तथा। एतेष्वैश्वर्य्यमाधाय कथं त्वं भूतिमिच्छसि।
आत्मज्ञानं समारम्भस्तितिक्षा धर्म्मनित्यता। यमर्थान्नापकर्षन्ति स वै पण्डित उच्यते। ९९०
निषेवते प्रशस्तानि निन्दितानि न सेवते। अनास्तिकः श्रद्दधान एतत्पण्डितलक्षणं।
क्रोधो हर्षश्च दर्पश्च ह्रीः स्तम्भो मान्यमानिता। यमर्थान्नापकर्षन्ति स वै पण्डित उच्यते।
यस्य कृत्यं न जानन्ति मन्त्रं वा मन्त्रितं परे। कृतमेवास्य जानन्ति स वै पण्डित उच्यते।
यस्य कृत्यं न विघ्नन्ति शीतमुष्णं भयं रतिः। समृद्धिरसमृद्धिर्व्वा स वै पण्डित उच्यते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

यस्य संसारिणी प्रज्ञा धर्म्मार्थावनुवर्त्तते। कामादर्थं वृणीते यः स वै पण्डित उच्यते।
यथाशक्ति चिकीर्षन्ति यथाशक्ति च कुर्व्वते। न किञ्चिदवमन्यन्ते नराः पण्डितबुद्धयः।
क्षिप्रं विजानाति चिरं शृणोति विज्ञाय चार्थं भजते न कामात्। नासम्पृष्टो ह्युपयुङ्क्ते परार्थे तत्प्रज्ञानं प्रथमं पण्डितस्य।
नाप्राप्यमभिवाञ्छन्ति नष्टं नेच्छन्ति शोचितुं। आपत्सु च न मुह्यन्ति नराः पण्डितबुद्धयः।
निश्चित्य यः प्रक्रमते नान्तर्व्वसति कर्म्मणः। अवन्ध्यकालो वश्यात्मा स वै पण्डित उच्यते।
आर्य्यकर्म्मणि रज्यन्ते भूतिकर्म्माणि कुर्व्वते। हितञ्च नाभ्यसूयन्ति पण्डिता भरतर्षभ।
न हृष्यत्यात्मसम्माने नावमाने न तप्यते। गाङ्गो ह्रद इवाक्षोभ्यो यः स पण्डित उच्यते।
तत्त्वज्ञः सर्व्वभूतानां योगज्ञः सर्व्वकर्मणां। उपायज्ञो मनुष्याणां नरः पण्डित उच्यते।
प्रवृत्तवाक् चित्रकथ ऊहवान् प्रतिभानवान्। आशुग्रन्थार्थवक्ता च यः स पण्डित उच्यते।
श्रुतं प्रज्ञानुगं यस्य प्रज्ञा चैव श्रुतानुगा। असम्भिन्नार्य्यमर्य्यादः पण्डिताख्यां लभेत सः।
अश्रुतश्च समुन्नद्धो दरिद्रश्च महामनाः। अर्थांश्चाकर्म्मणा प्रेप्सुर्मूढ इत्युच्यते बुधैः।
स्वमर्थं यः परित्यज्य परार्थमनुतिष्ठति। मिथ्या चरति मित्रार्थे यश्च मूढः स उच्यते।
अकामान् कामयति यः कामयानान् परित्यजेत्। बलवन्तञ्च यो द्वेष्टि तमाहुर्मूढचेतसं।
अमित्रं कुरुते मित्रं मित्रं द्वेष्टि हिनस्ति च। कर्म्म चारभते दुष्टं तमाहुर्मूढचेतसं।
संसारयति कृत्यानि सर्व्वत्र विचिकित्सते। चिरं करोति क्षिप्रार्थे स मूढो भरतर्षभ।
श्राद्धं पितृभ्यो न ददाति दैवतानि न चार्चति। सुहृन्मित्रं न लभते तमाहुर्मूढचेतसं।
अनाहूतः प्रविशति अपृष्टो बहु भाषते। अविश्वस्ते विश्वसिति मूढचेता नराधमः।
परं क्षिपति दोषेण वर्त्तमानः स्वयं तथा। यश्च क्रुध्यत्यनीशानः स च मूढतमो नरः।
आत्मनो बलमज्ञाय धर्म्मार्थपरिवर्ज्जितं। अलभ्यमिच्छन्नैष्कर्म्यान्मूढबुद्धिरिहोच्यते।
अशिष्यं शास्ति यो राजन् यश्च शून्यमुपासते। कदर्य्यं भजते यश्च तमाहुर्मूढचेतसं।
अर्थं महान्तमासाद्य विद्यामैश्वर्य्यमेव वा। विचरत्यसमुन्नद्धो यः स पण्डित उच्यते।
एकः सम्पन्नमश्नाति वस्ते वासश्च शोभनं। योऽसंविभज्य भृत्येभ्यः को नृशंसतरस्ततः।
एकः पापानि कुरुते फलं भुङ्क्ते महाजनः। भोक्तारो विप्रमुच्यन्ते कर्त्ता दोषेण लिप्यते।
एकं हन्यान्नवा हन्यादिषुर्मुक्तो धनुष्मता। बुद्धिर्बुद्धिमतोत्सृष्टा हन्याद्राष्ट्रं सराजकं।
एकया द्वे विनिश्चित्य त्रींश्चतुर्भिर्व्वशे कुरु। पञ्च जित्वा विदित्वा षट् सप्त हित्वा सुखी भव।
एकं विषरसो हन्ति शस्त्रेणैकश्च वध्यते। सराष्ट्रं सप्रजं हन्ति राजानं मन्त्रविप्लवः।
एकः स्वादु न भुञ्जीत एकश्चार्थान्न चिन्तयेत्। एको न गच्छेदध्वानं नैकः सुप्तेषु जागृयात्।
एकमेवाद्वितीयं तद्यद्राजन्नावबुध्यसे। सत्यं स्वर्गस्य सोपानं पारावारस्य नौरिव।
एकः क्षमावतां दोषो द्वितीयो नोपपद्यते। यदेनं क्षमया युक्तमशक्तं मन्यते जनः।
सोऽस्य दोषो न मन्तव्यः क्षमा हि परमं धनं। क्षमा गुणो ह्यशक्तानां शक्तानां भूषणं क्षमा।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अप्रव्रज्येमास्त्र हित्वा पुरस्तादात्माधीनं यद्बलं ह्येतदासीत्। नित्यञ्च वश्याः सचिवास्तवेमे जनार्द्दनो युयुधानश्च वीरः।

मत्स्यो राजा रुक्मरथः सपुत्त्रः प्रहारिभिः सह पुत्त्रैर्व्विराटः। राजानश्च ये विजिताः पुरस्तात्त्वामेव ते संश्रयेयुः समस्ताः।

महासहायः प्रतपन् बलस्थः पुरस्कृतो वासुदेवार्जुनाभ्यां। वरान्हनिष्यन् द्विषतो रङ्गमध्ये व्यनेष्यथा धार्त्तराष्ट्रस्य दर्प्पं। ७८५

बलङ्कस्मादर्द्धयित्वा परस्य निजान्कस्मात्कर्षयित्वा सहायान्। निरुष्य कस्मादर्षपूगान्वनेषु युयुत्ससे पाण्डव हीनकालं।

अप्राज्ञो वा पाण्डव युध्यमानो धर्मज्ञो वा भूतिमथोऽभ्युपैति। प्रज्ञावान्वा बुध्यमानोऽपि धर्म्मं संरम्भाद्वा सोऽपि भूतैरपैति।

नाधर्म्मे ते धीयते पार्थ बुद्धिर्न संरम्भात् कर्म्म चकर्थ पापं। अथो किं तत्कारणं यस्य हेतोः प्रज्ञाविरुद्धं कर्म्म चिकीर्षसीदं।

अव्याधिजं कटुकं शीर्षरोगि यशोमुषं पापफलोदयञ्च। सतां पेयं यन्न पिबन्त्यसन्तो मन्युं महाराज पिब प्रशाम्य।

पापानुबन्धं को नु तं कामयेत क्षमैव ते ज्यायसी नोत भोगाः। यत्र भीष्मः शान्तनवो हतः स्याद्यत्र द्रोणः सहपुत्त्रो हतः स्यात्। ७९०

कृपः शल्यः सौमदत्तिर्व्विकर्णो विविंशतिः कर्णदुर्य्योधनौ च। एतान् हत्वा कीदृशं तत्सुखं स्याद्यद्विन्देथास्तदनुब्रूहि पार्थ।

लब्ध्वाऽपीमां पृथिवीं सागरान्तां जरामृत्यू नैव हि त्वं प्रजह्याः। प्रियाप्रिये सुखदुःखे च राजन्नेवं विद्वन्नैव युद्धं कुरु त्वं।

अमात्यानां यदि कामस्य हेतोरेवं युक्तं कर्म्म चिकीर्षसि त्वं। अपक्रामेः सम्प्रदायैव तेषां मागास्त्वं वै देवयानात्पथोऽद्य।

इति श्रीमहाभारते उद्योगपर्व्वणि सञ्जययानपर्व्वणि सञ्जयवाक्ये षड्विंशोऽध्यायः॥ २६ ॥

॥ युधिष्ठिर उवाच॥ असंशयं सञ्जय सत्यमेतद्धर्म्मो वरः कर्म्मणां यत्त्वमात्थ। ज्ञात्वा तु मां सञ्जय गर्हयेस्त्वं यदि धर्म्मं यद्य धर्म्मं चरेयं।

यत्राधर्म्मो धर्म्मरूपाणि धत्ते धर्म्मः कृत्स्नो दृश्यतेऽधर्म्मरूपः। बिभ्रद्धर्म्मो धर्म्मरूपं तथाच विद्वांसस्तं सम्प्रपश्यन्ति बुद्ध्या। ७९५

एवं तथैवापदि लिङ्गमेतद्धर्म्माधर्म्मौ नित्यवृत्ती भजेतां। आद्यं लिङ्गं यस्य तस्य प्रमाणमापद्धर्म्मं सञ्जय तन्निबोध।

असत्यामापदि कर्म्मणि वर्त्तमानो विकर्म्मस्थः सञ्जय गर्हये तं। लुप्तायान्तु प्रकृतौ येन कर्म्म निष्पादयेत्तत्परीप्सेद्विहीनः।

प्रकृतिस्थश्चापदि वर्त्तमान उभौ गर्ह्यौ भवतः सञ्जयैतौ। अविनाशमिच्छतां ब्राह्मणानां प्रायश्चित्तं विहितं यद्विधात्रा।

सम्पश्येथाः कर्म्मसु वर्त्तमानान् विकर्म्मस्थान् सञ्जय गर्हयेस्त्वं। मनीषिणां सत्त्वविच्छेदनाय विधीयते सत्सु वृत्तिः सदैव।

अब्राह्मणाः सन्ति तु ये न वैद्याः सर्व्वोत्सङ्गं साधु मन्येत तेभ्यः। तदध्वानः पितरो ये च पूर्व्वे पितामहा ये च तेभ्यः परेऽन्ये। ८००

प्रज्ञैषिणो ये च हि कर्म्म कुर्य्युर्नान्यं ततो नास्तिकोऽस्मीति मन्ये। यत्किञ्चनेदं वित्तमस्यां पृथिव्यां यद्देवानां त्रिदशानां परं यत्।

प्राजापत्यं त्रिदिवं ब्रह्मलोकं नाधर्म्मतः सञ्जय कामयेयं। धर्म्मेश्वरः कुशलो नीतिमांश्चाप्युपासिता ब्राह्मणानां मनीषी।

नानाविधांश्चैव महाबलांश्च राज्ञो विजानन्ननुशास्ति कृष्णः। यदि ह्यहं विसृजन् स्यामगर्ह्यो युध्यमानो यदि जह्यां स्वधर्म्मं।

महायशाः केशवस्तद्ब्रवीतु वासुदेवस्तूभयोरर्थकामः। शैनेयोऽयञ्चेदयश्चान्धकाश्च वार्ष्णेयभोजाः कुकुराः सृञ्जयाश्च।

उपासीना वासुदेवस्य बुद्धिं निगृह्य शत्रून् सुहृदो नन्दयन्ति। वृष्ण्यन्धका ह्युग्रसेनादयो वै कृष्णप्रणीताः सर्व्वे एवेन्द्रकल्पाः। ८०५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मनस्विनः सत्यपरायणाश्च महाबला यादवा भोगवन्तः । काश्यो बभ्रुः श्रियमुत्तमाङ्गतो लब्ध्वा कृष्णं भ्रातरमीशितारं।
यस्मै कामान्वर्षति वासुदेवो ग्रीष्मात्यये मेघ इव प्रजाभ्यः। ईदृशोऽयं केशवस्तात भूयान् विद्धि ह्येनं कर्म्मणो निश्चयज्ञं।

प्रियश्च नः साधुतमश्च कृष्णो नातिक्रमे वचनं केशवस्य।

इति श्रीमहाभारते उद्योगपर्व्वणि सञ्जययानपर्व्वणि युधिष्ठिरवाक्ये सप्तविंशोऽध्यायः ॥ २७ ॥

॥ वासुदेव उवाच ॥ अविनाशं सञ्जय पाण्डवानामिच्छाम्यहं भूतिमेषां प्रियञ्च । तथा राज्ञो धृतराष्ट्रस्य सूत समाशंसे बहुपुत्रस्य वृद्धिं।

कामो हि मे सञ्जय नित्यमेव नान्यद्ब्रूयां तान्प्रति शाम्यतेति । राज्ञश्च हि प्रियमेतद्दृणोमि मन्ये वै तत्पाण्डवानां समक्षं। ८१०

सुदुष्करस्तत्र शमो हि नूनं प्रदर्शितः सञ्जय पाण्डवेन। यस्मिन्गृद्धो धृतराष्ट्रः सपुत्त्रः कस्मादेषां कलहो नावमूर्च्छेत्।
न त्वं धर्म्मं विचरं सञ्जयेह मत्तश्च जानासि युधिष्ठिराच। अथो कस्मात्सञ्जय पाण्डवस्य उत्साहिनः पूरयतः स्वकर्म्म।
यथा ख्यातमावसतः कुटुम्बं पुरा कस्मात्साधु विलोपमात्थ। अस्मिन्विधौ वर्त्तमाने यथावदुच्चावचा मतयो ब्राह्मणानां।
कर्म्मणाऽऽहुः सिद्धिमेके परत्र हित्वा कर्म्म विद्यया सिद्धिमेके। नाभुञ्जानो भक्ष्यभोज्यस्य तृप्येद्विद्वानपीह विदितं ब्राह्मणानां।

या वै विद्याः साधयन्तीह कर्म्म तासां फलं विद्यते नेतरासां। तत्रेह वै दृष्टफलन्तु कर्म्म पीत्वोदकं शाम्यति तृष्णयार्त्तः। ८१५
सोऽयं विधिर्विहितः कर्म्मणैव संवर्त्तते सञ्जय तत्र कर्म्म। तत्र योऽन्यत्कर्म्मणः साधु मन्ये मोघं तस्यालपितं दुर्ब्बलस्य।
कर्म्मणाऽमी भान्ति देवाः परत्र कर्म्मणैवेह प्लवते मातरिश्वा। अहोरात्रे विदधत्कर्म्मणैव अतन्द्रितो शश्वदुदेति सूर्य्यः।
मासार्द्धमासानथ नक्षत्रयोगानतन्द्रितश्चन्द्रमाश्चाभ्युपैति। अतन्द्रितो दहते जातवेदाः समिद्धमानः कर्म्म कुर्व्वन् प्रजाभ्यः।
अतन्द्रिता भारमिमं महान्तं बिभर्त्ति देवी पृथिवी बलेन। अतन्द्रिताः शीघ्रमपो वहन्ति सन्तर्पयन्त्यः सर्व्वभूतानि नद्यः।
अतन्द्रितो वर्षति भूरितेजाः सन्नादयन्नन्तरीक्षं दिशश्च। अतन्द्रितो ब्रह्मचर्य्यं चचार श्रेष्ठत्वमिच्छन्बलभिद्देवतानां। ८२०
हित्वा सुखं मनसश्च प्रियाणि देवः शक्रः कर्म्मणा श्रैष्ठ्यमाप। सत्यधर्म्मा पालयन्नप्रमत्तो दमन्तितिक्षां समतां प्रियञ्च।
एतानि सर्व्वाण्युपसेवमानः सदेव राज्यं मघवान्प्राप मुख्यं। बृहस्पतिर्ब्रह्मचर्य्यं चचार समाहितः संशितात्मा यथावत्।
हित्वा सुखं प्रतिरुध्येन्द्रियाणि तेन देवानामगमद्गौरवं सः। तथा नक्षत्राणि कर्म्मणाऽमुत्र भान्ति रुद्रादित्या वसवोऽथापि विश्वे।

यमो राजा वैश्रवणः कुवेरो गन्धर्व्वयक्षाप्सरसश्च सूत। ब्रह्मविद्यां ब्रह्मचर्य्यं क्रियाश्च निषेवमाणा ऋषयोऽमुत्र भान्ति।
जानन्निमं सर्व्वलोकस्य धर्म्मं विप्रेन्द्राणां क्षत्रियाणां विशाञ्च। स कस्मात्त्वं जानतां ज्ञानवान् सन् व्यायच्छसे सञ्जय कौरवार्थे।

आम्नायेषु नित्यसंयोगमस्य तथाऽश्वमेधे राजसूये च विद्धि। संयुज्यते धनुषा वर्म्मणा च हस्त्यश्वपृष्ठे रथशस्त्रैश्च भूयः। ८२५
ते चेदिमे कौरवाणामुपायमवगच्छेयुरवधेनैव पार्थाः। धर्म्मत्राणं पुण्यमेषां कृतं स्यादार्य्ये वृत्ते भीमसेनं निगृह्य।
ते चेत्पित्र्ये कर्म्मणि वर्त्तमाना आपद्येरन् दिष्टवशेन मृत्युं। यथाशक्त्या पूरयन्तः स्वकर्म्म तदप्येषां निधनं स्यात् प्रशस्तं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

उताहो त्वं मन्यसे शाम्यमेव राज्ञां युद्धे वर्त्तते धर्म्मतन्त्वं। अयुद्धे वा वर्त्तते धर्म्मतन्त्वं तथैव ते वाचमिमां शृणोमि।
चातुर्व्वर्ण्यस्य प्रथमं विभागमवेच्य त्वं सञ्जय स्वञ्च कर्म्म। निशम्याथो पाण्डवानां स्वकर्म्म प्रशंस वा निन्द वा या मतिस्ते। ८३०
अधीयीत ब्राह्मणो वै यजेत दद्यादियात्तीर्थमुख्यानि चैव। अध्यापयेद्याजयेच्चापि याज्यान् प्रतिग्रहान्वा विदितान्प्रतीच्छेत्।
तथा राजन्यो रक्षणं वै प्रजानां कृत्वा धर्म्मेणाप्रमत्तोऽथ दत्त्वा। यज्ञैरिष्ट्वा सर्व्ववेदानधीत्य दारान् कृत्वा पुण्यकृदा वसेद्गृहान्।
स धर्म्मात्मा धर्म्ममधीत्य पुण्यं यदिच्छया व्रजति ब्रह्मलोकं। वैश्योऽधीत्य कृषिगोरक्षपण्यैर्व्वित्तं चिन्वा पालयन्न प्रमत्तः।
प्रियं कुर्व्वन् ब्राह्मणक्षत्त्रियाणां धर्म्मशीलः पुण्यकृदावसेद्गृहान्। परिचर्य्या वन्दनं ब्राह्मणानां नाधीयीत प्रतिषिद्धोऽस्य यज्ञः।
नित्योत्थितो भूतयेऽतन्द्रितः स्यादेवं स्मृतः शूद्रधर्म्मः पुराणः। एतान् राजा पालयन्नप्रमत्तो नियोजयन् सर्व्ववर्णान् स्वधर्म्मे। ८३५
अकामात्मा समवृत्तिः प्रजासु नाधार्म्मिकाननुरुध्येत कामान्। श्रेयांस्तस्माद्यदि विद्येत कश्चिदभिज्ञातः सर्व्वधर्म्मोपपन्नः।
स तं दुष्टमनुशिष्यात्प्रजानामेतद्बुध्येन्न च तस्मिन्नसाधुः। यदा गृध्येत्परभूतौ नृशंसो विधिप्रकोपाद्बलमाददानः।
ततो राज्ञां समभवद्युद्धमेतत्तत्र जातं वर्म्म शस्त्रं धनुश्च। इन्द्रेणैतद्दस्युवधाय कर्म्म उत्पादितं वर्म्म शस्त्रं धनुश्च।
तत्र पुण्यं दस्युबधेन लभ्यते सोऽयं दोषः कुरुभिस्तीव्ररूपः। अधर्म्मज्ञैर्धर्म्ममबुध्यमानैः प्रादुर्भूतः सञ्जय तन्न साधु।
तत्र राजा धृतराष्ट्रस्य पुत्रो धर्म्म्यं हरन्पाण्डवानामकस्मात्। नावेक्षते राजधर्म्मं पुराणं तदन्वयाः कुरवः सर्व्व एव। ८४०
स्तेनो हरेद्यत्र धनं ह्यदृष्टः प्रसह्य वा यत्र हरेत दृष्टः। उभौ गर्ह्यौ भवतः सञ्जयैतौ किं वै पृथक्त्वं धृतराष्ट्रस्य पुत्रे।
सोऽयं लोभान्मन्यते धर्म्ममेतं यमिच्छति क्रोधवशानुगामी। भागः पुनः पाण्डवानां निविष्टस्तन्नोऽकस्मादाददीरन् परे वै।
अस्मिन्पदे युध्यतां नो बधोऽपि श्लाघ्यः पित्र्यं परराज्याद्विशिष्टं। एतान् धर्म्मान् कौरवाणां पुराणानाचक्षीथाः सञ्जय राजमध्ये।
ये ते मन्दा मृत्युवशाभिपन्नाः समानीता धार्त्तराष्ट्रेण मूढाः। इदं पुनः कर्म्म पापीय एव सभामध्ये पश्य वृत्तं कुरूणां।
प्रियां भार्य्यां द्रौपदीं पाण्डवानां यशस्विनीं शीलवृत्तोपपन्नां। यदुपेक्षन्त कुरवो भीष्ममुख्याः कामानुगेनोपरुद्धां रुदन्तीं। ८४५
तान्चेत्तदा ते सकुमारवृद्धा अवारयिष्यन् कुरवः समेताः। मम प्रियं धृतराष्ट्रोऽकरिष्यत् पुत्राणाञ्च कृतमस्याऽभविष्यत्।
दुःशासनः प्रातिलोम्यान्निनाय सभामध्ये श्वशुराणाञ्च कृष्णां। सा तत्र नीता करुणं व्यपेक्ष्य नान्यं क्षत्तुर्नाथमवाप किञ्चित्।
कार्पण्यादेव सहितास्तत्र भूपा नाशक्नुवन् प्रतिवक्तुं सभायां। एकः क्षत्ता धर्म्म्यमर्थं ब्रुवाणो धर्मबुद्ध्या प्रत्युवाचाल्पबुद्धिं।
अनुक्त्वा त्वं धर्म्ममेतं सभायामथेच्छसे पाण्डवस्योपदेष्टुं। कृष्णा त्वेतत्कर्म्म चकार शुद्धं सुदुष्करं तत्र सभां समेत्य।
येन कृच्छ्रात्पाण्डवानुज्जहार तथात्मानं नौरिव सागरौघात्। यत्राब्रवीत्सूतपुत्त्रः सभायां कृष्णां स्थितां श्वशुराणां समीपे। ८५०
न ते गतिर्व्विद्यते याज्ञसेनि प्रपद्य दासी धार्त्तराष्ट्रस्य वेश्म। पराजितास्ते पतयो न सन्ति पतिं चान्यं भाविनि त्वं वृणीष्व।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यो बीभत्सोर्हृदये प्रोत आसीदस्थि च्छिन्दन् मर्म्मघाती सुघोरः । कर्णाच्छरो वाङ्मयस्तिग्मतेजाः प्रतिष्ठितो हृदये फाल्गुनस्य ।

कृष्णाजिनानि परिधित्समानान् दुःशासनः कटुकान्यभ्यभाषत । एते सर्व्वे षण्डतिला विनष्टाः क्षयं गता नरकं दीर्घकालं ।

गान्धारराजः शकुनिर्निकृत्या यदब्रवीत् द्यूतकाले स पार्थं । पराजितो नकुलः किं तवास्ति कृष्णया त्वं दीव्य वै याज्ञसेन्या ।

जानासि त्वं सञ्जय सर्व्वमेतत् द्यूते वाक्यं गर्ह्यमेवं यथोक्तं । स्वयं त्वहं प्रार्थये तत्र गन्तुं समाधातुं कार्य्यमेतद्विपन्नं । ८५५

अहापयित्वा यदि पाण्डवार्थं समं कुरूणामपि चेच्छकेयं । पुण्यञ्च मे स्याच्चरितं महोदयं मुच्येरंश्च कुरवो मृत्युपाशात् ।

अपि मे वाचं भाषमाणस्य काव्यां धर्म्मारामामर्थवतीमहिंस्रां । अवेक्षेरन् धार्त्तराष्ट्राः समक्षं माञ्च प्राप्तं कुरवः पूजयेयुः ।

अतोऽन्यथा रथिना फाल्गुनेन भीमेन चैवाहवदंशितेन । परासिक्तान् धार्त्तराष्ट्रांस्तु विद्धि प्रदह्यमानान् कर्म्मणा स्वेन पापान् ।

पराजितान् पाण्डवेयांस्तु वाचो रौद्रा रूक्षा भाषते धार्त्तराष्ट्रः । गदाहस्तो भीमसेनोऽप्रमत्तो दुर्य्योधनं स्मारयिता हि काले ।

सुयोधनो मन्युमयो महाद्रुमः स्कन्धः कर्णः शकुनिस्तस्य शाखा । दुःशासनः पुष्पफले समृद्धे मूलं राजा धृतराष्ट्रो मनीषी। ८६०

युधिष्ठिरो धर्म्ममयो महाद्रुमः स्कन्धोऽर्जुनो भीमसेनोऽस्य शाखा । माद्रीसुतौ पुष्पफले समृद्धे मूलन्त्वहं ब्रह्म च ब्राह्मणाश्च ।

वनं राजा धृतराष्ट्रः सपुत्त्रो व्याघ्रास्ते वै सञ्जय पाण्डुपुत्त्राः । मा वनं छिन्धि सव्याघ्रं मा व्याघ्रा नीनशन्वनात् ।

निर्वनो वध्यते व्याघ्रो निर्व्याघ्रं छिद्यते वनं । तस्माद्व्याघ्रो वनं रक्षेद्वनं व्याघ्रञ्च पालयेत् ।

लताधर्म्मा धार्त्तराष्ट्राः शालाः सञ्जय पाण्डवाः । न लता वर्द्धते जातु महाद्रुममनाश्रिता ।

स्थिताः शुश्रूषितुं पार्थाः स्थिता योद्धुमरिन्दमाः । यत्कृत्यं धृतराष्ट्रस्य तत्करोतु नराधिपः । ८६५

स्थिताः शमे महात्मानः पाण्डवा धर्म्मचारिणः । योधाः समर्थास्तद्विद्वन्नाचक्षीथा यथातथं ।

इति श्रीमहाभारते उद्योगपर्व्वणि सञ्जययानपर्व्वणि कृष्णवाक्ये अष्टाविंशोऽध्यायः ॥ २८ ॥

॥ सञ्जय उवाच ॥ आमन्त्रये त्वां नरदेव देव गच्छाम्यहं पाण्डव स्वस्ति तेऽस्तु । कच्चिन्न वाचा वृजिनं हि किञ्चिदुच्चारितं मे मनसोऽभिषङ्गात् ।

जनार्द्दनं भीमसेनार्जुनौ च माद्रीसुतौ सात्यकिं चेकितानं । आमन्त्र्य गच्छामि शिवं सुखं वः सौम्येन मां पश्यत चक्षुषा नृपाः ।

॥ युधिष्ठिर उवाच ॥ अनुज्ञातः सञ्जय स्वस्ति गच्छ न नः स्मरस्यप्रियं जातु विद्वन् । विद्मश्च त्वां ते च वयञ्च सर्व्वे शुद्धात्मानं मध्यगतं सभास्थं ।

आप्तो दूतः सञ्जय सुप्रियो मे कल्याणवाक् शीलवांस्तृप्तिमांश्च । न मुह्येस्त्वं सञ्जय जातु मत्या न च क्रुध्येरुच्यमानो दुरुक्तैः । ८७०

न मर्म्मगां जातु वक्तासि रूक्षां नापश्रुतिं कटुकां नो तु मुक्तां । धर्म्मारामामर्थवतीमहिंस्रामेतां वाचं तव जानीम सूत ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

क्षमा वशीकृतिर्लोके क्षमया किं न साध्यते । शान्तिखड्गः करे यस्य किं करिष्यति दुर्जनः । १०२०
अतृणे पतितो वह्निः स्वयमेवोपशाम्यति । अक्षमावान् परं दोषैरात्मानमेव योजयेत् ।
एको धर्म्मः परं श्रेयः क्षमैका शान्तिरुत्तमा । विद्यैका परमा तृप्तिरहिंसैका सुखावहा ।
द्वाविमौ ग्रसते भूमिः सर्पो बिलशयानिव । राजानं चाप्ययोद्धारं ब्राह्मणं चाप्रवासिनं ।
द्वे कर्म्मणी नरः कुर्व्वन्नस्मिल्लोके विरोचते । अब्रुवन् परुषं किञ्चिदसतोऽनर्चयंस्तथा ।
द्वाविमौ पुरुषव्याघ्र परप्रत्ययकारिणौ । स्त्रियः कामितकामिन्यो लोकः पूजितपूजकः । १०२५
द्वाविमौ कण्टकौ तीक्ष्णौ शरीरपरिशोषणौ । यश्चाधनः कामयते यश्च कुप्यत्यनीश्वरः ।
द्वाविमौ न विराजेते विपरीतेन कर्म्मणा । गृहस्थश्च निरारम्भः कार्य्यवांश्चैव भिक्षुकः ।
द्वाविमौ पुरुषौ राजन् स्वर्गस्योपरि तिष्ठतः । प्रभुश्च क्षमया युक्तो दरिद्रश्च प्रदानवान् ।
न्यायागतस्य द्रव्यस्य बोद्धव्यौ द्वावतिक्रमौ । अपात्रे प्रतिपत्तिश्च पात्रे चाप्रतिपादनं ।
द्वावम्भसि निवेष्टव्यौ गाढं बद्ध्वा गले शिलां । धनिनञ्चाप्रदातारं दरिद्रं चातपस्विनं । १०३०
द्वाविमौ पुरुषव्याघ्र सूर्य्यमण्डलभेदिनौ । परिव्राड्योगयुक्तश्च रणे चाभिमुखो हतः ।
त्रयोपाया मनुष्याणां श्रूयन्ते भरतर्षभ । कनीयान्मध्यमः श्रेष्ठ इति वेदविदो विदुः ।
त्रिविधाः पुरुषा राजन् उत्तमाधममध्यमाः । नियोजयेद्यथावत्तांस्त्रिविधेष्वेव कर्म्मसु ।
त्रय एवाधना राजन् भार्य्या दासस्तथा सुतः । यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनं ।
हरणञ्च परस्वानां परदाराभिमर्षणं । सुहृदश्च परित्यागस्त्रयो दोषा भयप्रदाः । १०३५
त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः । कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ।
भक्तञ्च भजमानञ्च तवास्मीति च वादिनं । त्रीनेतान्छरणं प्राप्तान्विषमेऽपि न संत्यजेत् ।
वरप्रदानं राज्यञ्च पुत्त्रजन्म च भारत । शत्रोश्च मोक्षणं कृच्छ्रात्त्रीणि चैकञ्च तत्समं ।
चत्वारि राज्ञा तु महाबलेन वर्ज्यान्याहुः पण्डितस्तानि विद्यात् । अल्पप्रज्ञैः सह मन्त्रं न कुर्य्यान्न दीर्घसूत्रैरलसैश्चारणैश्च ।
चत्वारि ते तात गृहे वसन्तु श्रियाऽभिजुष्टस्य गृहस्थधर्म्मे । वृद्धो ज्ञातिरवसन्नः कुलीनः सखा दरिद्रो भगिनी चानपत्या । १०४०
चत्वार्य्याह महाराज साद्यस्कानि बृहस्पतिः । पृच्छते त्रिदशेन्द्राय तानीमानि निबोध मे ।
देवतानाञ्च सङ्कल्पमनुभावञ्च धीमतां । विनयं कृतविद्यानां विनाशं पापकर्मणां ।
चत्वारि कर्म्माण्यभयङ्कराणि भयं प्रयच्छन्त्ययथाकृतानि । मानाग्निहोत्रमुत मानमौनं मानेनाधीतमुत मानयज्ञः ।
पञ्चाग्नयो मनुष्येण परिचर्य्याः प्रयत्नतः । पिता माताऽग्निरात्मा च गुरुश्च भरतर्षभ ।
पञ्चैव पूजयन् लोके यशः प्राप्नोति केवलं । देवान् पितॄन् मनुष्यांश्च भिक्षूनतिथिपञ्चमान् । १०४५
पञ्च त्वाऽनुगमिष्यन्ति यत्र यत्र गमिष्यसि । मित्राण्यमित्रा मध्यस्था उपजीव्योपजीविनः ।
पञ्चेन्द्रियस्य मर्त्यस्य छिद्रं चेदेकमिन्द्रियं । ततोऽस्य स्रवति प्रज्ञा दृतेः पात्रादिवोदकं ।
षड्दोषाः पुरुषेणेह हातव्या भूतिमिच्छता । निद्रा तन्द्रीर्भयं क्रोध आलस्यं दीर्घसूत्रता ।
षडिमान्पुरुषो जह्याद्भिन्नां नावमिवार्णवे । अप्रवक्तारमाचार्य्यमनधीयानमृत्विजं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अरक्षितारं राजानं भार्य्यां चाप्रियवादिनीं। ग्रामकामञ्च गोपालं वनकामञ्च नापितं। १०५०

षडेव तु गुणाः पुंसा न हातव्याः कदाचन। सत्यं दानमनालस्यमनसूया क्षमा धृतिः।

षडिमानि विनश्यन्ति मुहूर्त्तमनवेक्षणात्। गावः सेवा कृषिर्भार्य्या विद्या वृषलसङ्गतिः।

षडेते ह्यवमन्यन्ते नित्यं पूर्व्वोपकारिणं। आचार्य्यं शिक्षिताः शिष्याः कृतदाराश्च मातरं।

नारीं विगतकामास्तु कृतार्थास्तु प्रयोजनं। नावं निस्तीर्णकान्तारा आतुराश्च चिकित्सकं।

आरोग्यमानृण्यमविप्रवासः सद्भिर्मनुष्यैः सह संप्रयोगः। स्वप्रत्यया वृत्तिरभीतवासः षड्जीवलोकस्य सुखानि राजन्। १०५५

ईर्षुर्घृणी त्वसन्तुष्टः क्रोधनो नित्यशङ्कितः। परभाग्योपजीवी च षडेते नित्यदुःखिताः।

अर्थागमो नित्यमरोगिता च प्रिया च भार्य्या प्रियवादिनी च। वश्यश्च पुत्त्रोऽर्थकरी च विद्या षड्जीवलोकस्य सुखानि राजन्।

षण्णामात्मनि नित्यानामैश्वर्य्यं योऽधिगच्छति। न स पापैः कुतोऽनर्थैर्युज्यते विजितेन्द्रियः।

षडिमे षट्सु जीवन्ति सप्तमो नोपलभ्यते। चौराः प्रमत्ते जीवन्ति व्याधितेषु चिकित्सकाः।

प्रमदाः कामयानेषु यजमानेषु याजकाः। राजा विवदमानेषु नित्यं मूर्खेषु पण्डिताः। १०६०

सप्त दोषाः सदा राज्ञा हातव्या व्यसनोदयाः। प्रायशो यैर्व्विनश्यन्ति कृतमूला अपीश्वराः।

स्त्रियोऽक्षा मृगया पानं वाक्पारुष्यञ्च पञ्चमं। महच्च दण्डपारुष्यमर्थदूषणमेव च।

अष्टौ पूर्व्वनिमित्तानि नरस्य विनशिष्यतः। ब्राह्मणान् प्रथमं द्वेष्टि ब्राह्मणैश्च विरुध्यते।

ब्राह्मणस्वानि चादत्ते ब्राह्मणांश्च जिघांसति। रमते निन्दया चैषां प्रशंसां नाभिनन्दति।

नैतान् स्मरति कृत्येषु याचितश्चाभ्यसूयति। एतान् दोषान् नरः प्राज्ञो बुध्येद्बुद्ध्वा विसर्जयेत्। १०६५

अष्टाविमानि हर्षस्य नवनीतानि भारत। वर्त्तमानानि दृश्यन्ते तान्येव सुसुखान्यपि।

समागमश्च सखिभिर्महांश्चैव धनागमः। पुत्त्रेण च परिष्वङ्गः सन्निपातश्च मैथुने।

समये च प्रियालापः स्वयूथेषु समुन्नतिः। अभिप्रेतस्य लाभश्च पूजा च जनसंसदि।

अष्टौ गुणाः पुरुषं दीपयन्ति प्रज्ञा च कौल्यञ्च दमः श्रुतञ्च। पराक्रमश्चाबहुभाषिता च दानं यथाशक्ति कृतज्ञता च।

नवद्वारमिदं वेश्म त्रिस्थूणं पञ्चसाक्षिकं। क्षेत्रज्ञाधिष्ठितं विद्वान् यो वेद स परः कविः। १०७०

दश धर्म्मं न जानन्ति धृतराष्ट्र निबोध तान्। मत्तः प्रमत्त उन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः।

त्वरमाणश्च लुब्धश्च भीतः कामी च ते दश। तस्मादेतेषु सर्व्वेषु न प्रसज्जेत पण्डितः।

अत्रैवोदाहरन्तीममितिहासं पुरातनं। पुत्त्रार्थमसुरेन्द्रेण गीतञ्चैव सुधन्वना।

यः काममन्यू प्रजहाति राजा पात्रे प्रतिष्ठापयते धनञ्च। विशेषविच्छ्रुतवान् क्षिप्रकारी तं सर्व्वलोकः कुरुते प्रमाणं।

जानाति विश्वासयितुं मनुष्यान् विज्ञातदोषेषु दधाति दण्डं। जानाति मात्राञ्च तथा क्षमाञ्च तं तादृशं श्रीर्जुषते समग्रा। १०७५

सुदुर्व्बलं नावजानाति कञ्चिद्युक्तो रिपुं सेवते बुद्धिपूर्व्वं। न विग्रहं रोचयते बलस्थैः काले च यो विक्रमते स धीरः।

प्राप्यापदं न व्यथते कदाचिदुद्योगमन्विच्छति चाप्रमत्तः। दुःखञ्च काले सहते महात्मा धुरन्धरस्तस्य जिताः सपत्नाः।

अनर्थकं विप्रवासं गृहेभ्यः पापैः सन्धिं परदाराभिमर्षं। दम्भं स्तैन्यं पैशुनं मद्यपानं न सेवते यश्च सुखी सदैव।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri Sarayu Trust. Funding IKS-MoE Grant 2-Equipment Heritage Foundation, Jalgaon

न संरम्भेणारमते त्रिवर्गमाकारितः शंसति तत्त्वमेव । नमित्रार्थे रोचयते विवादं नापूजितः कुप्यति चाप्यमूढः ।
योऽभ्यसूयत्यनुकम्पते च न दुर्ब्बलः प्रातिभाव्यं करोति । नात्याह किञ्चित्क्षमते वै विवादं सर्व्वत्र तादृग्लभते प्रशंसां । १०८०
यो नोद्धतं कुरुते जातु वेशं न पौरुषेणापि विकत्थतेऽन्यान् । न मूर्च्छितः कटुकान्याह किञ्चित् प्रियं सदा तं कुरुते जनो हि ।
न वैरमुद्दीपयति प्रशान्तं न दर्पमारोहति नास्तमेति । न दुर्गतोऽस्मीति करोत्यकार्य्यं तमार्य्यशीलं परमाहुरार्य्याः ।
न स्वे सुखे वै कुरुते प्रहर्षं नान्यस्य दुःखे भवति प्रहृष्टः । दत्त्वा न पश्चात् कुरुतेऽनुतापं स कथ्यते सत्पुरुषार्य्यशीलः ।
देशाचारान् समयान् जातिधर्म्मान् बुभूषते यः स परावरज्ञः । स यत्र तत्रापि गतः सदैव महाजनस्याधिपत्यं करोति ।
दम्भं मोहं मत्सरं पापकृत्यं राजद्विष्टं पैशुनं पूगवैरं । मत्तोन्मत्तैर्दुर्जनैश्चापि वादं यः प्रज्ञावान् वर्ज्जयेत्स प्रधानः । १०८५
दमं शौचं दैवतं मङ्गलानि प्रायश्चित्तान् विविधाल्लोकवादान् । एतानि यः कुरुते नैत्यिकानि तस्योत्थानं देवता धारयन्ति ।
समैर्व्विवाहं कुरुते न हीनैः समैः सख्यं व्यवहारं कथाश्च । गुणैर्व्विशिष्टांश्च पुरो दधाति विपश्चितस्तस्य नयाः सुनीताः ।
मितं भुङ्क्ते संविभज्याश्रितेभ्यो मितं स्वपित्यमितं कर्म्म कृत्वा । ददात्यमित्रेष्वभियाचितः स्वं तमात्मवन्तं प्रजहत्यनर्थाः ।
चिकीर्षितं विप्रकृतञ्च यस्य नान्ये जनाः कर्म्म जानन्ति किञ्चित् । मन्त्रे गुप्ते सम्यगनुष्ठिते च नाल्पोऽप्यस्य च्यवते कश्चि
दर्थः ।
यः सर्व्वभूतप्रशमे निविष्टः सत्यो मृदुर्म्मानकृच्छुद्धभावः । अतीव स ज्ञायते ज्ञातिमध्ये महामणिर्जात्य इव प्रसन्नः । १०९०
य आत्मनाऽपत्रपते भृशं नरः स सर्व्वलोकस्य गुरुर्भवत्युत । अनन्ततेजाः सुमनाः समाहितः स तेजसा सूर्य्य इवावभासते ।
वने जाताः शापदग्धस्य राज्ञः पाण्डोः पुत्त्राः पञ्च पञ्चेन्द्रकल्पाः । त्वयैव बाला वर्द्धिताः शिक्षिताश्च तवादेशं पालयन्त्याम्बिकेय ।
प्रदायैषामुचितं तात राज्यं सुखी पुत्त्रैः सहितो मोदमानः । न देवानां नापि च मानुषाणां भविष्यसि त्वं तर्कणीयो नरेन्द्र ।
इति श्रीमहाभारते उद्योगपर्व्वणि प्रजागरपर्व्वणि विदुरहितवाक्ये द्वात्रिंशोऽध्यायः ॥ ३२ ॥
॥ धृतराष्ट्र उवाच ॥ जाग्रतो दह्यमानस्य यत्कार्य्यमनुपश्यसि । तद्ब्रूहि त्वं हि नस्तात धर्म्मार्थकुशलो ह्यसि ।
त्वं मां यथावद्विदुर प्रशाधि प्रज्ञापूर्व्वं सर्व्वमजातशत्रोः । यन्मन्यसे पथ्यमदीनसत्त्व श्रेयस्करं ब्रूहि तद्वै कुरूणां । १०९५
पापाशङ्की पापमेवानुपश्यन् पृच्छामि त्वां व्याकुलेनात्मनाऽहं । कवे तन्मे ब्रूहि सर्व्वं यथावन्मनीषितं सर्व्वमजातशत्रोः ।
॥ विदुर उवाच ॥ शुभं वा यदि वा पापं द्वेष्यं वा यदि वा प्रियं । अपृष्टस्तस्य तद्ब्रूयाद्यस्य नेच्छेत्पराभवं ।
तस्माद्वक्ष्यामि ते राजन् भवमिच्छन् कुरून्प्रति । वचः श्रेयस्करं धर्म्यं ब्रुवतस्तन्निबोध मे ।
मिथ्योपेतानि कर्म्माणि सिद्ध्येयुर्यानि भारत । अनुपायप्रयुक्तानि मास्म तेषु मनः कृथाः ।
तथैव योगविहितं न सिध्येत् कर्म्म यन्नृप । उपाययुक्तं मेधावी न तत्र ग्लपयेन्मनः । ११००
अनुबन्धानपेक्षेत सानुबन्धेषु कर्म्मसु । सम्प्रधार्य्य च कुर्व्वीत न वेगेन समाचरेत् ।
अनुबन्धञ्च सम्प्रेक्ष्य विपाकञ्चैव कर्म्मणां । उत्थानमात्मनश्चैव धीरः कुर्व्वीत वा न वा ।
यः प्रमाणं न जानाति स्थाने वृद्धौ तथा क्षये । कोषे जनपदे दण्डे न स राज्येऽवतिष्ठते ।
यस्त्वेतानि प्रमाणानि यथोक्तान्यनुपश्यति । युक्तो धर्म्मार्थयोर्ज्ञाने स राज्यमधिगच्छति ।
न राज्यं प्राप्तमित्येव वर्त्तितव्यमसाम्प्रतं । श्रियं ह्यविनयो हन्ति जरा रूपमिवोत्तमं । ११०५
भक्ष्योत्तमप्रतिच्छन्नं मत्स्यो वडिशमायसं । लोभाभिपाती ग्रसते नानुबन्धमपेक्षते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यच्छक्यं ग्रसितुं ग्रस्यं ग्रस्तं परिणमेच्च यत् । हितञ्च परिणामे यत्तदाद्यं भूतिमिच्छता ।
वनस्पतेरपक्वानि फलानि प्रचिनोति यः । स नाप्नोति रसं तेभ्यो वीजं चास्य विनश्यति ।
यस्तु पक्वमुपादत्ते काले परिणतं फलं । फलाद्रसं स लभते जीवाच्चैव फलं पुनः ।
यथा मधु समादत्ते रचन् पुष्पाणि षट्पदः । तद्वदर्थान्मनुष्येभ्य आदद्यादविहिंसया । १११०
पुष्पं पुष्पं विचिन्वीत मूलच्छेदं न कारयेत् । मालाकार इवारामे न यथाङ्गारकारकः ।
किं नु मे स्यादिदं कृत्वा किं नु मे स्यादकुर्व्वतः । इति कर्म्माणि सञ्चिन्त्य कुर्य्याद्वा पुरुषो न वा ।
अनारभ्या भवन्त्यर्थाः केचिन्नित्यं तथा गताः । कृतः पुरुषकारो हि भवेद्येषु निरर्थकः ।
प्रसादो निष्फलो यस्य क्रोधस्यापि निरर्थकः । न तं भर्त्तारमिच्छन्ति षण्डं पतिमिव स्त्रियः ।
कांश्चिदर्थान्नरः प्राज्ञो लघुमूलान्महाफलान् । क्षिप्रमारभते कर्त्तुं न विघ्नयति तादृशान् । १११५
ऋजुः पश्यति यः सर्व्वं चक्षुषा प्रपिवन्निव । आसीनमपि तुष्णीकमनुरज्यन्ति तं प्रजाः ।
सुपुष्पितः स्यादफलः फलितः स्याद्दुरारुहः । अपक्वः पक्वसङ्काशो न तु शीर्य्येत कर्हिचित् ।
चक्षुषा मनसा वाचा कर्म्मणा च चतुर्व्विधं । प्रसादयति यो लोकं तं लोकोऽनुप्रसीदति ।
यस्मात्त्रस्यन्ति भूतानि मृगव्याधान्मृगा इव । सागरान्तामपि महीं लब्ध्वा स परिहीयते ।
पितृपैतामहं राज्यं प्राप्तवान् स्वेन तेजसा । वायुरभ्रमिवासाद्य भ्रंशयत्यनये स्थितः । ११२०
धर्म्ममाचरतो राज्ञः सद्भिश्चरितमादितः । वसुधा वसुसम्पूर्णा वर्द्धते भूतिवर्द्धनी ।
अथ सन्त्यजतो धर्म्ममधर्म्मञ्चानुतिष्ठतः । प्रतिसंवेष्टते भूमिरग्नौ चर्म्माहितं यथा ।
य एव यत्नः क्रियते परराष्ट्रविमर्द्दने । स एव यत्नः कर्त्तव्यः स्वराष्ट्रपरिपालने ।
धर्म्मेण राज्यं विन्देत धर्म्मेण परिपालयेत् । धर्म्ममूलां श्रियं प्राप्य न जहाति न हीयते ।
अप्युन्मत्तात्प्रलपतो बालाच्च परिजल्पतः । सर्व्वतः सारमादद्यादश्मभ्य इव काञ्चनं । ११२५
सुव्याहृतानि सूक्तानि सुकृतानि ततस्ततः । सञ्चिन्वन् धीर आसीत शिलाहारी शिलं यथा ।
गन्धेन गावः पश्यन्ति वेदैः पश्यन्ति ब्राह्मणाः । चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः ।
भूयांसं लभते क्लेशं या गौर्भवति दुर्दुहा । अथ या सुदुहा राजन्नैव तां वितुदन्त्यपि ।
यदतप्तं प्रणमति न तत्सन्तापयन्त्यपि । यच्च स्वयं नतं दारु न तत्सन्तापयन्त्यपि ।
एतयोपमया धीरः सन्नमेत बलीयसे । इन्द्राय स प्रणमते नमते यो बलीयसे । ११३०
पर्जन्यनाथाः पशवो राजानो मन्त्रिबान्धवाः । पतयो बान्धवाः स्त्रीणां ब्राह्मणा वेदबान्धवाः ।
सत्येन रक्ष्यते धर्म्मो विद्या योगेन रक्ष्यते । मृजया रक्ष्यते रूपं कुलं वृत्तेन रक्ष्यते ।
मानेन रक्ष्यते धान्यमश्वान् रक्षत्यनुक्रमः । अभीक्ष्णं दर्शनं गाश्च स्त्रियो रक्षेत् कुचेलता ।
न कुलं वृत्तहीनस्य प्रमाणमिति मे मतिः । अन्त्येष्वपि हि जातानां वृत्तमेव विशिष्यते ।
य ईर्षुः परवित्तेषु रूपे वीर्य्ये कुलान्वये । सुखसौभाग्यसत्कारे तस्य व्याधिरनन्तकः । ११३५
अकार्य्यकरणाद्भीतः कार्य्याणाञ्च विवर्ज्जनात् । अकाले मन्त्रभेदाच्च येन माद्येन्न तत्पिवेत् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विद्यामदो धनमदस्तृतीयोऽभिजनो मदः । मदा एतेऽवलिप्तानामेत एव सतां दमाः ।
असन्तोऽभ्यर्थिताः सद्भिः कच्चित्कार्य्ये कदाचन । तावन्न तस्य सुकृतं किञ्चित्कार्य्ये कदाचन ।
मन्यन्ते सन्तमात्मानमसन्तमपि विश्रुतं । गतिरात्मवतां सन्तः सन्त एव सतां गतिः ।
असतां च गतिः सन्तो न त्वसन्तः सतां गतिः । जिता सभा वस्त्रवता मिष्टाशा गोमता जिता । १२४०
अध्वा जितो यानवता सर्व्वं शीलवता जितं ।
शीलं प्रधानं पुरुषे तद्यस्येह प्रणश्यति । न तस्य जीवितेनार्थो न धनेन न बन्धुभिः ।
आढ्यानां मांसपरमं मध्यानां गोरसोत्तरं । तैलोत्तरं दरिद्राणां भोजनं भरतर्षभ ।
सम्पन्नतरमेवान्नं दरिद्रा भुञ्जते सदा । क्षुत् स्वादुतां जनयति सा चाढ्येषु सुदुर्लभा ।
प्रायेण श्रीमतां लोके भोक्तुं शक्तिर्न विद्यते । जीर्य्यन्त्यपि तु काष्ठानि दरिद्राणां महीपते । १२४५
अवृत्तिर्भयमन्त्यानां मध्यानां मरणाद्भयं । उत्तमानान्तु मर्त्यानामवमानात्परं भयं ।
ऐश्वर्य्यमदपापिष्ठा मदाः पानमदादयः । ऐश्वर्य्यमदमत्तो हि नापतित्वा विबुध्यते ।
इन्द्रियैरिन्द्रियार्थेषु वर्त्तमानैरनिग्रहैः । तैरयं ताप्यते लोको नक्षत्राणि ग्रहैरिव ।
यो जितः पञ्चवर्गेण सहजेनानुकर्षिणा । आपदस्तस्य वर्द्धन्ते शुक्लपक्ष इवोडुराट् ।
अविजित्य य आत्मानममात्यान् विजिगीषते । अमित्रान्वाजितामात्यः सोऽवशः परिहीयते । १२५०
आत्मानमेव प्रथमं द्वेष्यरूपेण यो जयेत् । ततोऽमात्यानमित्रांश्च न मोघं विजिगीषते ।
वश्येन्द्रियं जितात्मानं धृतदण्डं विकारिषु । परीक्ष्य कारिणं धीरमत्यन्तं श्रीर्निषेवते ।
रथः शरीरं पुरुषस्य राजन्नात्मा नियन्तेन्द्रियाण्यस्य चाश्वाः । तैरप्रमत्तः कुशली सदश्वैर्दान्तैः सुखं याति रथीव धीरः ।
एतान्यनिगृहीतानि व्यापादयितुमप्यलं । अविधेया इवादान्ता हयाः पथि कुसारथिं ।
अनर्थमर्थतः पश्यन्नर्थञ्चैवाप्यनर्थतः । इन्द्रियैरजितैर्ब्बालः सुदुःखं मन्यते सुखं । १२५५
धर्म्मार्थौ यः परित्यज्य स्यादिन्द्रियवशानुगः । श्रीप्राणधनदारेभ्यः क्षिप्रं स परिहीयते ।
अर्थानामीश्वरो यः स्यादिन्द्रियाणामनीश्वरः । इन्द्रियाणामनैश्वर्य्यादैश्वर्य्याद्भ्रश्यते हि सः ।
आत्मनात्मानमन्विच्छेन्मनोबुद्धीन्द्रियैर्यतैः । आत्मा ह्येवात्मनो बन्धुरात्मैव रिपुरात्मनः ।
बन्धुरात्मात्मनस्तस्य येनैवात्मात्मना जितः । स एव नियतो बन्धुः स एव नियतो रिपुः ।
क्षुद्राक्षेणेव जालेन झषावपिहितावुभौ । कामश्च राजन्क्रोधश्च तौ प्रज्ञानं विलुम्पतः । १२६०
समवेक्ष्येह धर्म्मार्थौ सम्भारान् योऽधिगच्छति । स वै सम्भृतसम्भारः सततं सुखमेधते ।
यः पञ्चाभ्यन्तरान् शत्रूनविजित्य मनोमयान् । जिगीषति रिपूनन्यान् रिपवोऽभिभवन्ति तं ।
दृश्यन्ते हि दुरात्मानो बध्यमानाः स्वकर्म्मभिः । इन्द्रियाणामनीशत्वाद्राजानो राज्यविभ्रमैः ।
असन्त्यागात्पापकृतामपापांस्तुल्यो दण्डः स्पृशते मिश्रभावात् । शुष्केणार्द्रं दह्यते मिश्रभावात् तस्मात्पापैः सह सन्धिं न कुर्य्यात् ।
निजानुत्पततः शत्रून् पञ्च पञ्चप्रयोजनान् । यो मोहान्न निगृह्णाति तमापद्ग्रसते नरं । १२६५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अनसूयार्जवं शौचं सन्तोषः प्रियवादिता । दमः सत्यमनायासो न भवन्ति दुरात्मनां ।
आत्मज्ञानमनायासस्तितिक्षा धर्म्मनित्यता । वाक् चैव गुप्ता दानञ्च नैतान्यन्त्येषु भारत ।
आक्रोशपरिवादाभ्यां विहिंसन्त्यबुधा बुधान् । वक्ता पापमुपादत्ते क्षममाणो विमुच्यते ।
हिंसा बलमसाधूनां राज्ञां दण्डविधिर्बलं । शुश्रूषा तु बलं स्त्रीणां क्षमा गुणवतां बलं ।
वाक्संयमो हि नृपते सुदुष्करतमो मतः । अर्थवच्च विचित्रञ्च न शक्यं बहु भाषितुं । ११७०
अभ्यावहति कल्याणं विविधं वाक् सुभाषिता । सैव दुर्भाषिता राजन्ननर्थायोपपद्यते ।
रोहते सायकैर्व्विद्धं वनं परशुना हतं । वाचा दुरुक्तं बीभत्सं न संरोहति वाक्क्षतं ।
कर्णिनालीकनाराचा निर्हरन्ति शरीरतः । वाक्शल्यस्तु न निर्हर्तुं शक्यो हृदिशयो हि सः ।
वाक्सायका वदनान्निष्पतन्ति यैराहतः शोचति रात्र्यहानि । परस्य नामर्मसु ते पतन्ति तान्पण्डितो नावसृजेत् परेभ्यः ।
यस्मै देवाः प्रयच्छन्ति पुरुषाय पराभवं । बुद्धिं तस्यापकर्षन्ति सोऽवाचीनानि पश्यति । ११७५
बुद्धौ कलुषभूतायां विनाशे प्रत्युपस्थिते । अनयो नयसङ्काशो हृदयान्नापसर्पति ।
सेयं बुद्धिः परीता ते पुत्त्राणां भरतर्षभ । पाण्डवानां विरोधेन न चैनामवबुध्यसे ।
राजलक्षणसम्पन्नस्त्रैलोक्यस्यापि यो भवेत् । शिष्यस्ते शासिता सोऽस्तु धृतराष्ट्र युधिष्ठिरः ।
अतीत्य सर्व्वान्पुत्त्रांस्ते भागधेयपुरस्कृतः । तेजसा प्रज्ञया चैव युक्तो धर्म्मार्थतत्त्ववित् ।
आनुक्रोशादानृशंस्याद्योऽसौ धर्म्मभृतां वरः । गौरवात्तव राजेन्द्र बहून्क्लेशांस्तितिक्षति । ११८०
इति श्रीमहाभारते उद्योगपर्व्वणि प्रजागरपर्व्वणि विदुरवाक्ये त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥
॥ धृतराष्ट्र उवाच ॥ ब्रूहि भूयो महाबुद्धे धर्म्मार्थसहितं वचः । शृण्वतो नास्ति मे तृप्तिर्व्विचित्राणीह भाषसे ।
॥ विदुर उवाच ॥ सर्व्वतीर्थेषु वा स्नानं सर्व्वभूतेषु चार्जवं । उभे त्वेते समे स्यातामार्जवं वा विशिष्यते ।
आर्जवं प्रतिपद्यस्व पुत्त्रेषु सततं विभो । इह कीर्त्तिं परां प्राप्य प्रेत्य स्वर्गमवाप्स्यसि ।
यावत्कीर्त्तिर्मनुष्यस्य पुण्या लोके प्रगीयते । तावत्स पुरुषव्याघ्र स्वर्गलोके महीयते ।
अत्राप्युदाहरन्तीममितिहासं पुरातनं । विरोचनस्य संवादं केशिन्यर्थे सुधन्वना । ११८५
स्वयम्वरे स्थिता कन्या केशिनी नाम नामतः । रूपेणाप्रतिमा राजन् विशिष्टपतिकाम्यया ।
विरोचनोऽथ दैतेयस्तदा तत्राजगाम ह । प्राप्तुमिच्छंस्ततस्तत्र दैत्येन्द्रं प्राह केशिनी ।
॥ केशिन्युवाच ॥ किं ब्राह्मणाः स्विच्छ्रेयांसो दितिजाः स्विद्विरोचन । अथ केन स्म पर्य्यङ्कं सुधन्वा नाधिरोहति ।
॥ विरोचन उवाच ॥ प्राजापत्यास्तु वै श्रेष्ठा वयं केशिनि सत्तमाः । अस्माकं खल्विमे लोकाः के देवाः के द्विजातयः ।
॥ केशिन्युवाच ॥ इहैवावां प्रतीक्षाव उपस्थाने विरोचन । सुधन्वा प्रातरागन्ता पश्येयं वां समागतौ । ११९०
॥ विरोचन उवाच ॥ तथा भद्रे करिष्यामि यथा त्वं भीरु भाषसे । सुधन्वानञ्च माञ्चैव प्रातर्द्रष्टासि सङ्गतौ ।
॥ विदुर उवाच ॥ अतीतायाञ्च शर्व्वर्य्यामुदिते सूर्य्यमण्डले । अथाजगाम तं देशं सुधन्वा राजसत्तम ।
विरोचनो यत्र विभो केशिन्या सहितः स्थितः । सुधन्वा वै समागच्छत् प्राह्रादिं केशिनीं तथा ।
समागतं द्विजं दृष्ट्वा केशिनी भरतर्षभ । प्रत्युत्थायासनं तस्मै पाद्यमर्घ्यं ददौ पुनः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ सुधन्वोवाच ॥ अन्वालभे हिरण्मयं प्राह्लादेदं तवासनं। एकत्वमुपसम्पन्नो न त्वासेऽहं त्वया सह। ११९९
॥ विरोचन उवाच ॥ तवार्हते तु फलकी कूर्चं वाऽप्यथ वा वृषी। सुधन्वन्न त्वमर्होऽसि मया सह समासनं।
॥ सुधन्वोवाच ॥ पिता पुत्रौ सहासीतां द्वौ विप्रौ क्षत्रियावपि। वृद्धौ वैश्यौ च शूद्रौ च नत्वन्याावितरेतरं।
पिता हि ते समासीनमुपासीतैव मामधः। बालः सुखैधितो गेहे न त्वं किञ्चन बुध्यसे।
॥ विरोचन उवाच ॥ हिरण्यञ्च गवाश्वञ्च यद्वित्तमसुरेषु नः। सुधन्वन् विपणे तेन प्रश्नं पृच्छाव ये विदुः।
॥ सुधन्वोवाच ॥ हिरण्यञ्च गवाश्वञ्च तथैवास्तु विरोचन। प्राणयोस्तु पणं कृत्वा प्रश्नं पृच्छाव ये विदुः। १२००
॥ विरोचन उवाच ॥ आवां कुत्र गमिष्यावः प्राणयोर्व्विपणे कृते। न तु देवेष्वहं स्थाता न मनुष्येषु कर्हिचित्।
॥ सुधन्वोवाच ॥ पितरं ते गमिष्यावः प्राणयोर्व्विपणे कृते। पुत्त्रस्यापि स हेतोर्हि प्रह्लादो नानृतं वदेत्।
॥ विदुर उवाच ॥ एवं कृतपणौ क्रुद्धौ तत्राभिजग्मतुस्तदा। विरोचनसुधन्वानौ प्रह्लादो यत्र तिष्ठति।
॥ प्रह्लाद उवाच ॥ इमौ तौ सम्प्रदृश्येते याभ्यां न चरितं सह। आशीविषाविव क्रुद्धावेकमार्गाविहागतौ।
किं वै सहैवं चरथो न पुरा चरथः सह। विरोचनैतत्पृच्छामि किन्ते सख्यं सुधन्वना। १२०५
॥ विरोचन उवाच ॥ न मे सुधन्वना सख्यं प्राणयोर्व्विपणावहे। प्रह्लाद तत्त्वं पृच्छामि मा प्रश्नमनृतं वदेः।
॥ प्रह्लाद उवाच ॥ उदकं मधुपर्कं वाऽप्यानयन्तु सुधन्वने। ब्रह्मन्नभ्यर्चनीयोऽसि श्वेता गौः पीवरीकृता।
॥ सुधन्वोवाच ॥ उदकं मधुपर्कं वा पथिष्वेवार्पितं मम। प्रह्लाद त्वन्तु मे तथ्यं प्रश्नं प्रब्रूहि पृच्छतः।
किं ब्राह्मणाः स्विच्छ्रेयांस उताहोस्विद्विरोचनः।
॥ प्रह्लाद उवाच ॥ पुत्त्र एको मम ब्रह्मंस्त्वञ्च साक्षादिह स्थितः। तयोर्व्विवदतोः प्रश्नं कथमस्मद्विधो वदेत्। १२१०
॥ सुधन्वोवाच ॥ गां प्रदद्यास्त्वौरसाय यद्वान्यत् स्यात् प्रियं धनं। द्वयोर्व्विवदतोस्तथ्यं वाच्यञ्च मतिमंस्त्वया।
॥ प्रह्लाद उवाच ॥ अथ यो नैव प्रब्रूयात् सत्यं वा यदि वाऽनृतं। एतत् सुधन्वन् पृच्छामि दुर्व्विवक्ता स्म किं वसेत्।
॥ सुधन्वोवाच ॥ यां रात्रिमधिविन्ना स्त्री याञ्चैवाक्षपराजितः। याञ्च भाराभितप्ताङ्गो दुर्व्विवक्ता स्म तां वसेत्।
नगरे प्रतिरुद्धः सन् वहिर्द्वारे बुभुक्षितः। अमित्रान् भूयसः पश्येद्यः साक्ष्यमनृतं वदेत्।
पञ्च पश्वनृते हन्ति दश हन्ति गवानृते। शतमश्वानृते हन्ति सहस्रं पुरुषानृते। १२१५
हन्ति जातानजातांश्च हिरण्यार्थेऽनृतं वदन्। सर्व्वं भूम्यनृते हन्ति मास्म भूम्यनृतं वदेः।
॥ प्रह्लाद उवाच ॥ मत्तः श्रेयानङ्गिरा वै सुधन्वा त्वद्विरोचन। माताऽस्य श्रेयसी मातुस्तस्मात्त्वन्तेन वै जितः।
विरोचन सुधन्वाऽयं प्राणानामीश्वरस्तव। सुधन्वन् पुनरिच्छामि त्वया दत्तं विरोचनं।
॥ सुधन्वोवाच ॥ यद्धर्म्ममवृणीथास्त्वं न कामादनृतं वदीः। पुनर्ददामि ते पुत्त्रं तस्मात्प्रह्लाद दुर्लभं।
एष प्रह्लाद पुत्त्रस्ते मया दत्तो विरोचनः। पादप्रक्षालनं कुर्य्यात् कुमार्य्याः सन्निधौ मम। १२२०
॥ विदुर उवाच ॥ तस्माद्राजेन्द्र भूम्यर्थे नानृतं वक्तुमर्हसि। मा गमः ससुतामात्यो नाशं पुत्त्रार्थमब्रुवन्।
न देवा दण्डमादाय रक्षन्ति पशुपालवत्। यन्तु रक्षितुमिच्छन्ति बुद्ध्या संविभजन्ति तं।
यथा यथा हि पुरुषः कल्याणे कुरुते मनः। तथा तथाऽस्य सर्व्वार्थाः सिध्यन्ते नात्र संशयः।
नैनं छन्दांसि वृजिनात्तारयन्ति मायाविनं मायया वर्त्तमानं। नीडं शकुन्ता इव जातपक्षाश्छन्दांस्येनं प्रजहत्यन्तकाले।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मद्यपानं कलहं पूगवैरं भार्य्यापत्योरन्तरं ज्ञातिभेदं। राजद्विष्टं स्त्रीपुंसयोर्व्विवादं वर्ज्यान्याहुर्यश्च पन्थाः प्रदुष्टः।
सामुद्रिकं वणिजं चौरपूर्व्वं शलाकधूर्त्तञ्च चिकित्सकञ्च। अरिञ्च मित्रञ्च कुशीलवञ्च नैतान् साक्ष्ये विप्रकुर्वीत सप्त। १२२५
मानाग्निहोत्रमुतमानमौनं मानेनाधीतमुतमानयज्ञः। एतानि चत्वार्य्यभयङ्कराणि भयं प्रच्छन्त्ययथाकृतानि।
अगारदाही गरदः कुण्डाशी सोमविक्रयी। पर्व्वकारश्च सूची च मित्रध्रुक् पारदारिकः।
भ्रूणहा गुरुतल्पी च यश्च स्यात्पानपो द्विजः। अतितीक्ष्णश्च काकश्च नास्तिको वेदनिन्दकः।
स्रुवप्रग्रहणो व्रात्यः कीनाशश्चात्मवानपि। रक्षेत्युक्तश्च यो हिं स्यात् सर्व्वे ब्रह्महभिः समाः।
तृणोल्कया ज्ञायते जातरूपं वृत्तेन भद्रो व्यवहारेण साधुः। शूरो भयेष्वर्थकृच्छ्रेषु धीरः कृच्छ्रास्वापत्सु सुहृदश्चार
यश्च। १२३०
जरा रूपं हरति हि धैर्य्यमाशा मृत्युः प्राणान् धर्म्मचर्य्यामसूया। क्रोधः श्रिय शीलमनार्य्यसेवा ह्रियं कामः सर्व्वमेवाभिमानः।
श्रीर्मङ्गलात्प्रभवति प्रागल्भ्यात्सम्प्रवर्द्धते। दाक्ष्यात्तु कुरुते मूलं संयमात्प्रतितिष्ठति।
अष्टौ गुणाः पुरुषं दीपयन्ति प्रज्ञा च कौल्यञ्च दमः श्रुतञ्च। पराक्रमश्चाबहुभाषिता च दानं यथाशक्ति कृतज्ञता च।
एतान्गुणांस्तात महानुभावानेको गुणः संश्रयते प्रसह्य। राजा यदा संश्रयते मनुष्यं सर्व्वान्गुणानेष गुणो विभर्त्ति।
अष्टौ नृपेमानि मनुष्यलोके स्वर्गस्य लोकस्य निदर्शनानि। चत्वार्य्येषामन्ववेतानि सद्भिस्त्वारि चैषामनुयान्ति सन्तः। १२३५
यज्ञो दानमध्ययनं तपश्च चत्वार्य्येतान्यन्ववेतानि सद्भिः। दमः सत्यमार्ज्जवमानृशंस्यं चत्वार्य्येतान्यनुयान्ति सन्तः।
इज्याऽध्ययनदानानि नयः सत्यं क्षमा घृणा। अलोभ इति मार्गोऽयं धर्म्मस्याष्टविधः स्मृतः।
तत्र पूर्व्वश्चतुर्व्वर्गो दम्भार्थमपि सेव्यते। उत्तरश्च चतुर्व्वर्गो नामहात्मसु तिष्ठति।
न सा सभा यत्र न सन्ति वृद्धा न ते वृद्धा ये न वदन्ति धर्म्मं। नासौ धर्म्मो यत्र न सत्यमस्ति न तत्सत्यं यच्छलेनाभ्युपेत।
सत्यं रूपं श्रुतं विद्या कौल्यं शीलं बलं धनं। शौर्य्यञ्च चित्रभाष्यञ्च दशेमे स्वर्गयोनयः। १२४०
पापं कुर्व्वन् पापकीर्त्तिः पापमेवाश्नुते फलं। पुण्यं कुर्व्वन् पुण्यकीर्त्तिः पुण्यमत्यन्तमश्नुते।
तस्मात्पापं न कुर्व्वीत पुरुषः शंसितव्रतः। पापं प्रज्ञां नाशयति क्रियमाणं पुनः पुनः।
नष्टप्रज्ञः पापमेव नित्यमारभते नरः। पुण्यं प्रज्ञां वर्द्धयति क्रियमाणं पुनः पुनः।
वृद्धप्रज्ञः पुण्यमेव नित्यमारभते नरः। पुण्यं कुर्व्वन् पुण्यकीर्त्तिः पुण्यं स्थानं स्म गच्छति।
तस्मात्पुण्यं निषेवेत पुरुषः सुसमाहितः। असूयको दन्दशूको निष्ठुरो वैरकृच्छठः। १२४५
स कृच्छ्रं महदाप्नोति न चिरात्पापमाचरन्। अनसूयः कृतप्रज्ञः शोभनान्याचरन् सदा।
न कृच्छ्रं महदाप्नोति सर्व्वत्र च विरोचते। प्रज्ञामेवागमयति यः प्राज्ञेभ्यः स पण्डितः।
प्राज्ञो ह्यवाप्य धर्म्मार्थौ शक्नोति सुखमेधितुं। दिवसेनैव तत् कुर्य्याद्येन रात्रौ सुखं वसेत्।
अष्टमासेन तत् कुर्य्यात् येन वर्षाः सुखं वसेत्। पूर्व्वे वयसि तत् कुर्य्यात् येन वृद्धः सुखं वसेत।
यावज्जीवेन तत् कुर्य्याद्येनामुत्र सुखं वसेत। जीर्णमन्नं प्रशंसन्ति भार्य्याञ्च गतयौवनां। १२५०
शूरं विजितसङ्ग्रामं गतपारं तपस्विनं। धनेनाधर्म्मलब्धेन यच्छिद्रमपिधीयते।
असंवृतं तद्भवति ततोऽन्यदवदीर्य्यते। गुरुरात्मवतां शास्ता शास्ता राजा दुरात्मनां।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant & Equipment Heritage Foundation, Jalgaon

अथ प्रच्छन्नपापानां शास्ता वैवस्वतो यमः। ऋषीणाञ्च नदीनाञ्च कुलानाञ्च महात्मनां।
प्रभवो नाधिगन्तव्यः स्त्रीणां दुश्चरितस्य च। द्विजातिपूजाभिरतो दाता ज्ञातिषु चार्ज्जवी।
क्षत्रियः शीलभाग्राजंश्चिरं पालयते महीं। सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः। १२५५
शूरस्च कृतविद्यस्च यस्च जानाति सेवितुं। बुद्धिश्रेष्ठानि कर्म्माणि बाहुमध्यानि भारत।
तानि जङ्घाजघन्यानि भारप्रत्यवराणि च। दुर्य्योधने च शकुनौ मूढे दुःशासने तथा।
कर्णे चैश्वर्य्यमाधाय कथं त्वं भूतिमिच्छसि। सर्व्वैर्गुणैरुपेतास्तु पाण्डवा भरतर्षभ।
पितृवत्त्वयि वर्त्तन्ते तेषु वर्त्तस्व पुत्त्रवत्।

इति श्रीमहाभारते उद्योगपर्व्वणि प्रजागरपर्व्वणि विदुरहितवाक्ये चतुस्त्रिंशोऽध्यायः॥ ३४ ॥

॥ विदुर उवाच ॥ अत्रैवोदाहरन्तीममितिहासं पुरातनं। आत्रेयस्य च संवादं साध्यानां चेति नः श्रुतं। १२६०
चरन्तं हंसरूपेण महर्षिं संशितव्रतं। साध्या देवा महाप्रज्ञं पर्य्यपृच्छन्त वै पुरा।
॥ साध्या ऊचुः ॥ साध्या देवा वयमेते महर्षे दृष्ट्वा भवन्तं न शक्नुमोऽनुमातुं। श्रुतेन धीरो बुद्धिमांस्त्वं मतो नः काव्यां वाचं वक्तुमर्हस्युदारां।
॥ हंस उवाच ॥ एतत्कार्य्यममराः संश्रुतं मे धृतिः शमः सत्यधर्म्मानुवृत्तिः। ग्रन्थिं विनीय हृदयस्य सर्व्वं प्रियाप्रिये चात्मसमं नयीत।
आक्रुश्यमानो नाक्रोशेन्मन्युरेव तितिक्षितः। आक्रोष्टारं निर्दहति सुकृतं चास्य विन्दति।
नाक्रोशी स्यान्नावमानी परस्य मित्रद्रोही नोत नीचोपसेवी। न चाभिमानी नच हीनवृत्तो रूक्षां वाचमुषतीं वर्ज्जयीत। १२६५
मर्म्माण्यस्थीनि हृदयं तथाऽसून् रूक्षा वाचो निर्दहन्तीह पुंसां। तस्माद्वाचमुषतीं रूक्षरूपां धर्म्मारामो नित्यशो वर्ज्जयीत।
अरुन्तुदं परुषं रूक्षवाचं वाक्कण्टकैर्व्वितुदन्तं मनुष्यान्। विद्यादलक्ष्मीकतमं जनानां मुखे निबद्धां निर्ऋतिं वै वहन्त।
यस्चैदेवमभिविध्येत वाणैर्भृशं सुतीक्ष्णैरनलार्कप्रदीप्तैः। स विध्यमानोऽप्यतिदह्यमानो विद्यात्कविः सुकृतं मे दधाति।
यदि सन्तं सेवति यद्यसन्तं तपस्विनं यदि वा स्तेनमेव। वासो यथा रङ्गवशं प्रयाति तथा स तेषां वशमभ्युपैति।
अतिवादं न प्रवदेन्नवादयेद्यो नाहतः प्रतिहन्यान्न घातयेत्। हन्तुञ्च यो नेच्छति पापकं वै तस्मै देवाः स्पृहयन्त्यागताय। १२७०
अव्याहृतं व्याहृताच्छ्रेय आहुः सत्यं वदेद्व्याहृतं तद्द्वितीयं। प्रियं वदेद्व्याहृतं तत्तृतीयं धर्म्यं वदेद्व्याहृतं तच्चतुर्थं।
यादृशैः संनिविशते यादृशांश्चोपसेवते। यादृगिच्छेच्च भवितुं तादृग्भवति पूरुषः।
यतो यतो निवर्त्तते ततस्ततो विमुच्यते। निवर्त्तनाद्धि सर्व्वतो न वेत्ति दुःखमण्वपि।
न जीयते नानुजिगीषतेऽन्यान्न वैरकृच्चाप्रतिघातकस्च। निन्दाप्रशंसासु समस्वभावो न शोचते हृष्यति नैव चायं।
भावमिच्छति सर्व्वस्य नाभावे कुरुते मनः। सत्यवादी मृदुर्दान्तो यः स उत्तमपूरुषः। १२७५
नानर्थकं सान्त्वयति प्रतिज्ञाय ददाति च। रन्ध्रं परस्य जानाति यः स मध्यमपूरुषः।
दुःशासनस्तूपहतोऽभिशस्तो नावर्त्तते मन्युवशात् कृतघ्नः। न कस्यचिन्मित्त्रमथो दुरात्मा कलाश्चैता अधमस्येह पुंसः।
न श्रद्दधाति कल्याणं परेभ्यो ह्यात्मशङ्कितः। निराकरोति मित्राणि यो वै सोऽधमपूरुषः।
उत्तमानेव सेवेत प्राप्तकाले तु मध्यमान्। अधमांस्तु न सेवेत य इच्छेद्भूतिमात्मनः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्राप्नोति वै वित्तमसद्बलेन नित्योत्थानात्प्रज्ञया पौरुषेण। न त्वेव सम्यग्लभते प्रशंसां न वृत्तमाप्नोति महाकुलानां। १२८०
॥ धृतराष्ट्र उवाच ॥ महाकुलेभ्यः स्पृहयन्ति देवा धर्म्मार्थनित्याश्च बहुश्रुताश्च। पृच्छामि त्वां विदुर प्रश्नमेतं भवन्ति वै कानि महाकुलानि।
॥ विदुर उवाच ॥ तपो दमो ब्रह्मवित्तं वितानाः पुण्या विवाहाः सततान्नदानं। येष्वेवैते सप्त गुणा भवन्ति सम्यग्वृत्तास्तानि महाकुलानि।
येषां वृत्तं न व्यथते न योनिश्चित्तप्रसादेन चरन्ति धर्म्मं। ये कीर्त्तिमिच्छन्ति कुले विशिष्टां त्यक्तानृतास्तानि महाकुलानि।
अनिज्यया कुविवाहैर्व्वेदस्योत्सादनेन च। कुलान्यकुलतां यान्ति धर्म्मस्यातिक्रमेण च।
देवद्रव्यविनाशेन ब्रह्मस्वहरणेन च। कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च। १२८५
ब्राह्मणानां परिभवात् परिवादाच्च भारत। कुलान्यकुलतां यान्ति न्यासापहरणेन च।
कुलानि समुपेतानि गोभिः पुरुषतोऽर्थतः। कुलसङ्ख्यां न गच्छन्ति यानि हीनानि वृत्ततः।
वृत्ततस्त्वविहीनानि कुलान्यल्पधनान्यपि। कुलसङ्ख्याञ्च गच्छन्ति कर्षन्ति च महद्यशः।
वृत्तं यत्नेन संरक्षेद्वित्तमेति च याति च। अक्षीणो वृत्ततः क्षीणो वृत्ततस्तु हतो हतः।
गोभिः पशुभिरश्वैश्च कृष्या च सुसमृद्धया। कुलानि न प्ररोहन्ति यानि हीनानि वृत्ततः। १२९०
मा नः कुले वैरकृत् कश्चिदस्तु राजामात्यो मा परस्वापहारी। मित्रद्रोही नैकृतिकोऽनृती वा पूर्व्वाशी वा पितृदेवातिथिभ्यः।
यश्च नो ब्राह्मणान् हन्याद्यश्च नो ब्राह्मणान् द्विषेत्। न नस्य समितिं गच्छेद्यश्च नो निर्व्वपेत् कृषीन्।
तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता। सतामेतानि गेहेषु नोच्छिद्यन्ते कदाचन।
श्रद्धया परया राजन्नुपनीतानि सत्कृतिं। प्रवृत्तानि महाप्राज्ञ धर्म्मिणां पुण्यकर्म्मिणां।
सूक्ष्मोऽपि भारं नृपते स्यन्दनो वै शक्तो वोढुं न तथाऽन्ये महीजाः। एवं युक्ता भारसहा भवन्ति महाकुलीना न तथाऽन्ये मनुष्याः। १२९५
न तन्मित्रं यस्य कोपाद्बिभेति यद्वा मित्रं शङ्कितेनोपचर्य्यं। यस्मिन्मित्रे पितरीवाश्वसीत तद्वै मित्रं सङ्गतानीतराणि।
यः कश्चिदप्यसम्बद्धो मित्रभावेन वर्त्तते। स एव बन्धुस्तन्मित्रं सा गतिस्तत्परायणं।
चलचित्तस्य वै पुंसो वृद्धाननुपसेवतः। पारिप्लवमतेर्नित्यमध्रुवो मित्रसंग्रहः।
चलचित्तमनात्मानमिन्द्रियाणां वशानुगं। अर्थाः समतिवर्त्तन्ते हंसाः शुष्कं सरो यथा।
अकस्मादेव कुप्यन्ति प्रसीदन्त्यनिमित्ततः। शीलमेतदसाधूनामभ्रं पारिप्लवं यथा। १३००
सत्कृताश्च कृतार्थाश्च मित्राणां न भवन्ति ये। तान्मृतानपि क्रव्यादाः कृतघ्नान्नोपभुञ्जते।
अर्च्चयेदेव मित्राणि सति वाऽसति वा धने। नानर्थयन् प्रजानाति मित्राणां सारफल्गुतां।
सन्तापाद्भ्रश्यते रूपं सन्तापाद्भ्रश्यते बलं। सन्तापाद्भ्रश्यते ज्ञानं सन्तापाद्व्याधिमृच्छति।
अनवाप्यञ्च शोकेन शरीरं चोपतप्यते। अमित्राश्च प्रहृष्यन्ति मास्म शोके मनः कृथाः।
पुनर्नरो म्रियते जायते च पुनर्नरो हीयते वर्द्धते च। पुनर्नरो याचति याच्यते च पुनर्नरः शोचति शोच्यते च। १३०५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सुखञ्च दुःखञ्च भवाभवौ च लाभालाभौ मरणं जीवितंच। पर्य्यायशः सर्व्वमेते स्पृशन्ति तस्माद्धीरो नच हृष्येन्न शोचेत्।
चलानि हीमानि षडिन्द्रियाणि तेषां यद्यद्वर्द्धते यत्र यत्र। ततस्ततः स्रवते बुद्धिरस्य छिद्रोदकुम्भादिव नित्यमम्भः।
॥ धृतराष्ट्र उवाच ॥ तनुरुद्धः शिखी राजा मिथ्योपचरितो मया। मन्दानाम्मम पुत्त्राणां युद्धेनान्तं करिष्यति।
नित्योद्विग्नमिदं सर्व्वं नित्योद्विग्नमिदं मनः। यत्तत् पदमनुद्विग्नं तन्मे वद महामते।
॥ विदुर उवाच॥ नान्यत्र विद्यातपसोर्नान्यत्रेन्द्रियनिग्रहात्। नान्यत्र लोभसन्त्यागाच्छान्तिं पश्यामि तेऽनघ। १२१०
बुद्ध्या भयं प्रणुदति तपसा विन्दते महत्। गुरुशुश्रूषया ज्ञानं शान्तिं योगेन विन्दति।
अनाश्रिता दानपुण्यं वेदपुण्यमनाश्रिताः। रागद्वेषविनिर्मुक्ता विचरन्तीह मोक्षिणः।
स्वधीतस्य सुयुद्धस्य सुकृतस्य च कर्म्मणः। तपसश्च सुतप्तस्य तस्यान्ते सुखमेधते।
स्वास्तीर्णानि शयनानि प्रपन्ना नं वै भिन्ना जातु निद्रां लभन्ते। न स्त्रीषु राजन्रतिमाप्नुवन्ति न मागधैः स्तूयमाना नं सूतैः।
नवै भिन्ना जातु चरन्ति धर्म्मं न वै सुखं प्राप्नुवन्तीह भिन्नाः। न वै भिन्ना गौरवं प्राप्नुवन्ति न वै भिन्नाः प्रशमं रोचयन्ति। १२१५
न वै तेषां स्वदते पथ्यमुक्तं योगक्षेमङ्कल्पते नैव तेषां। भिन्नानां वै मनुजेन्द्र परायणं न विद्यते किञ्चिदन्यद्विनाशात्।
सम्पन्नं गोषु सम्भाव्यं सम्भाव्यं ब्राह्मणे तपः। सम्भाव्यं चापलं स्त्रीषु सम्भाव्यं ज्ञातितो भयं।
तन्तवोऽप्यायिता नित्यं तनवो बहुलाः समाः। बहून् बहुलादायासान् सहन्तीत्युपमा सतां।
धूमायन्ते व्यपेतानि ज्वलन्ति सहितानि च। धृतराष्ट्रोल्मुकानीव ज्ञातयो भरतर्षभ।
ब्राह्मणेषु च ये शूराः स्त्रीषु ज्ञातिषु गोषु च। वृन्तादिव फलं पक्वं धृतराष्ट्र पतन्ति ते। १२२०
महानप्येकजो वृक्षो बलवान् सुप्रतिष्ठितः। प्रसह्य एव वातेन सस्कन्धो मर्द्दितुं क्षणात्।
अथ ये सहिता वृक्षाः सङ्घशः सुप्रतिष्ठिताः। ते हि शीघ्रतमान वातान् सहन्तेऽन्योन्यसंश्रयात्।
एवं मनुष्यमप्येकं गुणैरपि समन्वितं। शक्यं द्विषन्तो मन्यन्ते वायुर्द्रुममिवैकजं।
अन्योन्यसमुपष्टम्भादन्योन्यापाश्रयेण च। ज्ञातयः सम्प्रवर्द्धन्ते सरसीवोत्पलान्युत।
अवध्या ब्राह्मणा गावो ज्ञातयः शिशवः स्त्रियः। येषाञ्चान्नानि भुञ्जीत ये च स्युः शरणागताः। १२२५
न मनुष्ये गुणः कश्चिद्राजन्सधनतामृते। अनातुरत्वाद्भद्रं ते मृतकल्पा हि रोगिणः।
अव्याधिजं कटुकं शीर्षरोगि पापानुबन्धं परुषं तीक्ष्णमुष्णं। सतां पेयं यन्न पिबन्त्यसन्तो मन्युं महाराज पिब प्रशाम्य।
रोगार्द्दिता न फलान्याद्रियन्ते न वै लभन्ते विषयेषु तत्त्वं। दुःखोपेता रोगिणो नित्यमेव न बुध्यन्ते धनभोगान्न सौख्यं।
पुरा ह्युक्तं नाकरोस्त्वं वचो मे द्यूते जितां द्रौपदीं प्रेक्ष्य राजन्। दुर्य्योधनं वारयेत्यक्षवत्यां कितवत्वं पण्डिता वर्ज्जयन्ति।
न तद्बलं यन्मृदुना विरुध्यते सूक्ष्मो हि धर्म्मस्तरसा सेवितव्यः। प्रध्वंसिनी क्रूरसमाहिता श्रीर्मृदुप्रौढा गच्छति पुत्त्रपौत्त्रान्। १२३०
धार्त्तराष्ट्राः पाण्डवान् पालयन्तु पाण्डोः सुतास्तव पुत्त्रांश्च पान्तु। एकारिमित्राः कुरवो ह्येकधर्म्मा जीवन्तु राजन् सुखिनः समृद्धाः।
मेढीभूतः कौरवाणां त्वमद्य त्वय्याधीनं कुरुकुलमाजमीढ। पार्थान् बालान् वनवासप्रतप्तान् गोपायस्व स्वंयशस्तात रक्षन्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सन्धत्स्व त्वं कौरवान् पाण्डुपुत्त्रैर्मा तेऽन्तरं रिपवः प्रार्थयन्तु । सत्ये स्थितास्ते नरदेव सर्व्वे दुर्य्योधनं स्थापय त्वं नरेन्द्र ।

इति श्रीमहाभारते उद्योगपर्व्वणि प्रजागरपर्व्वणि विदुरहितवाक्ये पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

॥ विदुर उवाच ॥ सप्तदशेमान् राजेन्द्र मनुः स्वायम्भुवोऽब्रवीत् । वैचित्त्रवीर्य्य पुरुषानाकाशं मुष्टिभिर्घ्नतः ।
दानवेन्द्रस्य हि धनुरनाम्यं नमतोऽब्रवीत् । अथो मरीचिनः पादानग्राह्यान् गृह्णतस्तथा । १२३५
यश्चाशिष्यं शास्ति वै यश्च तुष्येद्यश्चातिवेलं भजते द्विषन्तं । स्त्रियश्च यो रक्षति भद्रमस्तु ते यश्चायाच्यं याचते कत्थते च ।
यश्चाभिजातः प्रकरोत्यकार्य्यं यश्चाबलो बलिना नित्यवैरी । अश्रद्दधानाय च यो ब्रवीति यश्चाकाम्यं कामयते नरेन्द्र ।
बध्वाऽवहासं श्वशुरो मन्यते यो बध्वावसन्नभयो मानकामः । परक्षेत्रे निर्वपति यश्च वीजं स्त्रियञ्च यः परिवदतेऽतिवेलं ।
यश्चापि लब्ध्वा न स्मरामीतिवादी दत्त्वा च यः कत्थति याच्यमानः । यश्चासतः सत्त्वमुपानयीत एतान्नयन्ति निरय पाशहस्ताः ।
यस्मिन् यथा वर्त्तते यो मनुष्यस्तस्मिंस्तथा वर्त्तितव्यं स धर्म्मः । मायाचारो मायया वर्त्तितव्यः साध्वाचारः साधुना प्रत्युपेयः । १२४०
जरा रूपं हरति हि धैर्य्यमाशा मृत्युः प्राणान् धर्म्मचर्य्यामसूया । कामो ह्रियं वृत्तमनार्य्यसेवा क्रोधः श्रियं सर्व्वमेवाभिमानः ।
॥ धृतराष्ट्र उवाच ॥ शतायुरुक्तः पुरुषः सर्व्ववेदेषु वै यदा । नाप्नोत्यथ च तत्सर्व्वमायुः केनेह हेतुना ।
॥ विदुर उवाच ॥ अतिमानोऽतिवादश्च तथाऽत्यागो नराधिप । क्रोधश्चात्मविधित्सा च मित्रद्रोहश्च तानि षट् ।
एत एवासयस्तीक्ष्णाः कृन्तन्त्यायूंषि देहिनां । एतानि मानवान् घ्नन्ति न मृत्युर्भद्रमस्तु ते ।
विश्वस्तस्यैति यो दारान् यश्चापि गुरुतल्पगः । वृषलीपतिर्द्विजो यश्च पानपश्चैव भारत । १२४५
आदेशकृद्वृत्तिहन्ता द्विजानां प्रेषकश्च यः । शरणागतहा चैव सर्व्वे ब्रह्महणः समाः । एतैः समेत्य कर्त्तव्यं प्रायश्चित्तमिति श्रुतिः ।
गृहीतवाक्यो नयविद्वदान्यः शेषान्नभोक्ता ह्यविहिंसकश्च । नानर्थकृत्याकुशलः कृतज्ञः सत्यो मृदुः स्वर्गमुपैति विद्वान् ।
सुलभाः पुरुषा राजन् सततं प्रियवादिनः । अप्रियस्य तु पथ्यस्य वक्ता श्रोता च दुर्लभः ।
यो हि धर्म्मं समाश्रित्य हित्वा भर्त्तुः प्रियाप्रिये । अप्रियाण्याह पथ्यानि तेन राजा सहायवान् ।
त्यजेत् कुलार्थे पुरुषं ग्रामस्यार्थे कुलं त्यजेत् । ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् । १२५०
आपदर्थे धनं रक्षेद्दारान् रक्षेद्धनैरपि । आत्मानं सततं रक्षेद्दारैरपि धनैरपि ।
द्यूतमेतत् पुराकल्पे दृष्टं वैरकरं नृणां । तस्माद्द्यूतं न सेवेत हास्यार्थमपि बुद्धिमान् ।
उक्तं मया द्यूतकालेऽपि राजन्नेह युक्तं वचनं प्रातिपेयं । तदौषधं पथ्यमिवातुरस्य न रोचते तव वैचित्त्रवीर्य्य ।
काकैरिमांश्चित्रवर्हान्मयूरान् पराजयेथाः पाण्डवान् धार्त्तराष्ट्रैः । हित्वा सिंहान् क्रोष्टुकान् गूहमानः प्राप्ते काले शोचिता त्वं नरेन्द्र ।
यस्तात न क्रुध्यति सर्व्वकालं भृत्यस्य भक्तस्य हितेरतस्य । तस्मिन् भृत्या भर्त्तरि विश्वसन्ति नचैनमापत्सु परित्यजन्ति । १२५५
न भृत्यानां वृत्तिसंरोधनेन राज्यं धनं संजिघृक्षेदपूर्व्वं । त्यजन्ति ह्येनं वञ्चिता वै विरुद्धा स्निग्धा ह्यमात्याः परिहीन भोगाः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कृत्यानि पूर्व्वं परिसंख्याय सर्व्वाण्यायव्यये चानुरूपाञ्च वृत्तिं। सङ्गृह्णीयादनुरूपान् सहायान् सहायसाध्यानि हि दुष्कराणि।

अभिप्रायं यो विदित्वा तु भर्त्तुः सर्व्वाणि कार्य्याणि करोत्यतन्द्रीः। वक्ता हितानामनुरक्त आर्य्यः शक्तिज्ञ आत्मेव हि सोऽनुकम्प्यः।

वाक्यन्तु यो नाद्रियतेऽनुशिष्टः प्रत्याह यश्चापि नियुज्यमानः। प्रज्ञाभिमानी प्रतिकूलवादी त्याज्यः स तादृक् त्वरयैव भृत्यः।

अस्तब्धमक्लीवमदीर्घसूत्रं सानुक्रोशं श्लक्ष्णमहार्य्यमन्यैः। अरोगजातीयमुदारवाक्यं भृत्यं वदन्त्यष्टगुणोपपन्नं। १२६०

न विश्वासाज्जातु परस्य गेहे गच्छेन्नरश्चेतयानो विकाले। न चत्वरे निशि तिष्ठेन्निगूढो न राजकाम्यां योषितं प्रार्थयीत।

न निह्नवं मन्त्रगतस्य गच्छेत्संसृष्टमन्त्रस्य कुसङ्गतस्य। न च ब्रूयान्नाश्वसिमि त्वयीति सकारणं व्यपदेशन्तु कुर्य्यात्।

घृणी राजा पुंश्चली राजभृत्यः पुत्त्रो भ्राता विधवा बालपुत्त्रा। सेनाजीवी चोद्धृतभूतिरेव व्यवहारेषु वर्जनीयाः स्युरेते।

अष्टौ गुणास्तात पुरुषन्दीपयन्ति प्रज्ञा च कौल्यञ्च श्रुतन्दमश्च। पराक्रमश्चाबहुभाषिता च दानं यथाशक्ति कृतज्ञता च।

एतान्गुणांस्तात महानुभावानेको गुणः संश्रयते प्रसह्य। राजा यदा सत्कुरुते मनुष्यं सर्व्वान् गुणानेष गुणो बिभर्त्ति। १२६५

गुणा दश स्नानशीलं भजन्ते बलं रूपं स्वरवर्णप्रशुद्धिः। स्पर्शश्च गन्धश्च विशुद्धता च श्रीः सौकुमार्य्यं प्रवराश्च नार्य्यः।

गुणाश्च षण्मितभुक्तं भजन्ते आरोग्यमायुश्च बलं सुखञ्च। अनाविलं चास्य भवत्यपत्यं न चैनमाद्यून इति क्षिपन्ति।

अकर्म्मशीलञ्च महाशनञ्च लोकद्विष्टं बहुमायं नृशंसं। अदेशकालज्ञमनिष्टवेशमेतान् गृहे न प्रतिवासयेत।

कदर्य्यमाक्रोशकमश्रुतं च वनौकसं धूर्त्तममान्यमानिनं। निष्ठूरिणं कृतवैरं कृतघ्नमेतान् भृशार्त्तोऽपि न जातु याचेत्।

संक्लिष्टकर्म्माणमतिप्रमादं नित्यानृतञ्चादृढभक्तिकञ्च। विसृष्टरागं पटुमानिनञ्चाप्येतान्न सेवेत नराधमान् षट्। १२७०

सहायबन्धना ह्यर्थाः सहायाश्चार्थबन्धनाः। अन्योन्यबन्धनावेतौ विनान्योन्यं न सिध्यतः।

उत्पाद्य पुत्त्राननृणांश्च कृत्वा वृत्तिञ्च तेभ्योऽनुविधाय कांचित्। स्थाने कुमाराः प्रतिपाद्य सर्व्वा अरण्यसंस्थोऽथमुनिर्बुभूषेत्।

हितं यत्सर्व्वभूतानामात्मनश्च सुखावहं। तत्कुर्य्यादीश्वरे ह्येतन्मूलं सर्व्वार्थसिद्धये।

बुद्धिः प्रभावस्तेजश्च सत्त्वमुत्थानमेव च। व्यवसायश्च यस्य स्यात् तस्यावृत्तिभयं कुतः।

पश्य दोषान् पाण्डवैर्विग्रहे त्वं यत्र व्यथेयुरपि देवाः सशक्राः। पुत्त्रैर्व्वैरं नित्यमुद्विग्नवासो यशःप्रणाशो द्विषतां च हर्षः। १२७५

भीष्मस्य कोपस्तव चैवेन्द्रकल्पद्रोणस्य राज्ञश्च युधिष्ठिरस्य। उत्सादयेल्लोकमिमं प्रवृद्धः श्वेतो ग्रहस्तिर्य्यगिवापतन् खे।

तव पुत्त्रशतञ्चैव कर्णः पञ्च च पाण्डवाः। पृथिवीमनुशासेयुरखिलां सागराम्बरां।

धार्त्तराष्ट्रा वनं राजन् व्याघ्राः पाण्डुसुता मताः। मा वनं छिन्धि सव्याघ्रं मा व्याघ्रा नीनशन्वनात्।

तस्माद्वनमृते व्याघ्रान् व्याघ्रा न स्युर्ऋते वनं। वनं हि रक्ष्यते व्याघ्रै र्व्याघ्रान्रक्षति काननं।

न तथेच्छन्ति कल्याणान् परेषां वेदितुं गुणान्। यथैषां ज्ञातुमिच्छन्ति नैर्गुण्यं पापचेतसः। १२८०

अर्थे सिद्धिं परामिच्छन् धर्म्ममेवादितश्चरेत्। न हि धर्म्मादपैत्यर्थः स्वर्गलोकादिवामृतं।

यस्यात्मा विरतः पापात् कल्याणे च निवेशितः। तेन सर्व्वमिदं बुद्धं प्रकृति र्व्विकृतिश्च या।

यो धर्म्ममर्थं कामञ्च यथाकालं निषेवते। धर्म्मार्थकामसंयोगं सोऽमुत्रेह च विन्दति।

सन्नियच्छति यो वेगमुत्थितं क्रोधहर्षयोः। स श्रियो भाजनं राजन् यश्चापत्सु न मुह्यति।

बलं पञ्चविधं नित्यं पुरुषाणां निबोध मे। यत्तु बाहुबलं नाम कनिष्ठं बलमुच्यते। १२८५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jagaon

अमात्यलाभो भद्रं ते द्वितीयं बलमुच्यते। तृतीयं धनलाभन्तु बलमाहुर्मनीषिणः।

यत्त्वस्य सहजं राजन् पितृपैतामहं बलं। अभिजातबलं नाम तच्चतुर्थं बलं स्मृतं।

येन त्वेतानि सर्व्वाणि संगृहीतानि भारत। यद्बलानां बलं श्रेष्ठं तत्प्रज्ञाबलमुच्यते।

महते योऽपकाराय नरस्य प्रभवेन्नरः। तेन वैरं समासज्य दूरस्थोऽस्मीति नाश्वसेत्।

स्त्रीषु राजसु सर्पेषु स्वाध्यायप्रभुशत्रुषु। भोगेष्वायुषि विश्वासं कः प्राज्ञः कर्त्तुमर्हति। १३९०

प्रज्ञाशरेणाभिहतस्य जन्तोश्चिकित्सकाः सन्ति न चौषधानि। न होममन्त्रा न च मङ्गलानि नाथर्व्वणा नाप्यगदाः सुसिद्धाः।

सर्पश्चाग्निश्च सिंहश्च कुलपुत्त्रश्च भारत। नावज्ञेया मनुष्येण सर्व्वे ह्येतेऽतितेजसः।

अग्निस्तेजो महल्लोके गूढस्तिष्ठति दारुषु। न चोपयुङ्क्ते तद्दारु यावन्नोद्दीप्यते परैः।

स एव खलु दारुभ्यो यदा निर्मथ्य दीप्यते। तद्दारु च वनं चान्यन्निर्दहत्याशु तेजसा।

एवमेव कुले जाताः पावकोपमतेजसः। क्षमावन्तो निराकाराः काष्ठेऽग्निरिव शेरते। १३९५

लताधर्म्मा सपुत्त्रस्त्वं शालाः पाण्डुसुता मताः। न लता वर्द्धते जातु महाद्रुममनाश्रिता।

वनं राजंस्त्वं सपुत्त्रोऽम्बिकेय सिंहान् वने पाण्डवांस्तात विद्धि। सिंहैर्विहीनं हि वनं विनश्येत्सिंहा विनश्येयु र्ऋते वनेन।

इति श्रीमहाभारते उद्योगपर्व्वणि प्रजागरपर्व्वणि विदुरवाक्ये षट्त्रिंशोऽध्यायः ॥ ३६ ॥

॥ विदुर उवाच ॥ ऊर्द्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति। प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यते।

पीठं दत्वा साधवेऽभ्यागताय आनीयापः परिनिर्णिज्य पादौ। सुखं पृष्ट्वा प्रतिवेद्यात्मसंस्थां ततो दद्यादन्नमवेक्ष्य धीरः।

यस्योदकं मधुपर्कञ्च गाञ्च न मन्त्रवित् प्रतिगृह्णाति गेहे। लोभाद्भयादथ कार्प्पण्यतो वा तस्यानर्थं जीवितमाहुरार्य्याः। १४००

चिकित्सकः शल्यकर्त्तावकीर्णी स्तेनः क्रूरो मद्यपो भ्रूणहा च। सेनाजीवी श्रुतिविक्रायकश्च भृशं प्रियोऽप्यतिथिर्नोदकार्हः।

अविक्रेयं लवणं पक्वमन्नं दधि क्षीरं मधु तैलं घृतञ्च। तिला मांसं फलमूलानि शाकं रक्तं वासः सर्व्वगन्धा गुडाश्च।

अरोषणो यः समलोष्टाश्मकाञ्चनः प्रहीणशोको गतसन्धिविग्रहः। निन्दाप्रशंसोपरतः प्रियाप्रिये त्यजन्नुदासीनवदेष भिक्षुकः।

नीवारमूलेङ्गुदशाकवृत्तिः सुसंयतात्माग्निकार्य्येषु चोद्यः। वने वसन्नतिथिष्वप्रमत्तो धुरन्धरः पुण्यकृदेष तापसः।

अपकृत्य बुद्धिमतो दूरस्थोऽस्मीति नाश्वसेत्। दीर्घौ बुद्धिमतो बाहू याभ्यां हिंसति हिंसितः। १४०५

न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत्। विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति।

अनीर्षुर्गुप्तदारश्च संविभागी प्रियंवदः। श्लक्ष्णो मधुरवाक् स्त्रीणां न चासां वशगो भवेत्।

पूजनीया महाभागाः पुण्याश्च गृहदीप्तयः। स्त्रियः श्रियो गृहस्योक्तास्तस्माद्रक्ष्या विशेषतः।

पितुरन्तःपुरं दद्यान्मातुर्दद्यान्महानसं। गोषु चात्मसमं दद्यात् स्वयमेव कृषिं व्रजेत्।

भृत्यैर्वाणिज्यचारञ्च पुत्त्रैः सेवेत च द्विजान्। अद्भ्योऽग्निर्ब्रह्मतः क्षत्त्रमश्मनो लोहमुत्थितं। १४१०

तेषां सर्व्वत्रगं तेजः स्वासु योनिषु शाम्यति। नित्यं सन्तः कुले जाताः पावकोपमतेजसः।

क्षमावन्तो निराकाराः काष्ठेऽग्निरिव शेरते। यस्य मन्त्रं न जानन्ति बाह्याश्चाभ्यन्तराश्च ये।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स राजा सर्व्वतश्चक्षुश्चिरमैश्वर्य्यमश्नुते। करिष्यन्न प्रभाषेत कृतान्येव तु दर्शयेत्।
धर्म्मकामार्थकार्य्याणि तथा मन्त्रो न भिद्यते। गिरिपृष्ठमुपारुह्य प्रासादं वा रहोगतः।
अरण्ये निःशलाके वा तत्र मन्त्रो विधीयते। नासुहृत्परमं मन्त्रं भारतार्हति वेदितुं। १४१५
अपण्डितो वाऽपि सुहृत् पण्डितो वाप्यनात्मवान्। नापरीक्ष्य महीपालः कुर्य्यात्सचिवमात्मनः।
अमात्ये ह्यर्थलिप्सा च मन्त्ररक्षणमेव च। कृतानि सर्वकार्य्याणि यस्य पारिषदा विदुः।
धर्म्मे चार्थे च कामे च स राजा राजसत्तमः। गूढमन्त्रस्य नृपतेस्तस्य सिद्धिरसंशयं।
अप्रशस्तानि कार्य्याणि यो मोहादनुतिष्ठति। स तेषां विपरिभ्रंशाद्भ्रश्यते जीवितादपि।
कर्म्मणान्तु प्रशस्तानामनुष्ठानं सुखावहं। तेषामेवाननुष्ठानं पश्चात्तापकरं मतं। १४२०
अनधीत्य यथा वेदान्न विप्रः श्राद्धमर्हति। एवमश्रुतषाड्गुण्यो न मन्त्रं श्रोतुमर्हति।
स्थानवृद्धिक्षयज्ञस्य षाड्गुण्यविदितात्मनः। अनवज्ञातशीलस्य स्वाधीना पृथिवी नृप।
अमोघक्रोधहर्षस्य स्वयं कृत्यान्ववेक्षिणः। आत्मप्रत्ययकोषस्य स्वाधीनेयं वसुन्धरा।
नाममात्रेण तुष्येत छत्रेण च महीपतिः। भृत्येभ्यो विसृजेदर्थान्नैकः सर्व्वहरो भवेत्।
ब्राह्मणं ब्राह्मणो वेद भर्त्ता वेद स्त्रियं तथा। अमात्यं नृपतिर्व्वेद राजा राजानमेव च। १४२५
न शत्रुर्व्वशमापन्नो मोक्तव्यो बध्यतां गतः। न्यग्भूत्वा पर्युपासीत वध्यं हन्याद्बले सति।
अहताद्धि भयं तस्माज्जायते न चिरादिव। दैवतेषु प्रयत्नेन राजसु ब्राह्मणेषु च।
नियन्तव्यः सदा क्रोधो वृद्धबालातुरेषु च। निरर्थकलहं प्राज्ञो वर्जयेन्मूढसेवितं।
कीर्त्तिञ्च लभते लोके न चानर्थेन युज्यते। प्रसादो निष्फलो यस्य क्रोधश्चापि निरर्थकः।
न तं भर्त्तारमिच्छन्ति षण्ढं पतिमिव स्त्रियः। न बुद्धिर्धनलाभाय न जाड्यमसमृद्धये। १४३०
लोकपर्य्यायवृत्तान्तं प्राज्ञो जानाति नेतरः। विद्याशीलवयोवृद्धान् बुद्धिवृद्धांश्च भारत।
धनाभिजातवृद्धांश्च नित्यं मूढोऽवमन्यते। अनार्य्यवृत्तमप्राज्ञमसूयकमधार्म्मिकं।
अनर्थाः क्षिप्रमायान्ति वाग्दुष्टं क्रोधनं तथा। अविसंवादनन्दानं समयस्याव्यतिक्रमः।
आवर्त्तयन्ति भूतानि सम्यक् प्रणिहिता च वाक्। अविसंवादको दक्षः कृतज्ञो मतिमानृजुः।
अपि सङ्क्षीणकोषोऽपि लभते परिवारणं। धृतिः शमो दमः शौचं कारुण्यं वागनिष्ठुरा। १४३५
मित्राणां चानभिद्रोहः सप्तैताः समिधः श्रियः। असंविभागी दुष्टात्मा कृतघ्नो निरपत्रपः।
तादृङ्नराधमो लोके वर्जनीयो नराधिप। न च रात्रौ सुखं शेते ससर्प इव वेश्मनि।
यः कोपयति निर्द्दोषं सदोषोऽभ्यन्तरं जनं। येषु दुष्टेषु दोषः स्याद्योगक्षेमस्य भारत।
सदा प्रसादनं तेषां देवतानामिवाचरेत्। येऽर्थाः स्त्रीषु समायुक्ताः प्रमत्तपतितेषु च।
ये चानार्य्यसमासक्ताः सर्व्वे ते संशयं गताः। यत्र स्त्री यत्र कितवो बालो यत्रानुशासिता। १४४०
मज्जन्ति तेऽवशा राजन्नद्यामश्मप्लवा इव। प्रयोजनेषु ये शक्ता न विशेषेषु भारत।
तानहं पण्डितान्मन्ये विशेषा हि प्रसङ्गिनः। यं प्रशंसन्ति कितवा यं प्रशंसन्ति चारणाः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Haryana

यं प्रशंसन्ति बन्धक्यो न स जीवति मानवः । हित्वा तान् परमेष्वासान् पाण्डवानमितौजसः ।
आहितं भारतैश्वर्य्यं त्वया दुर्य्योधने महत् । तं द्रक्ष्यसि परिभ्रष्टं तस्मात्त्वमचिरादिव । १४४५
ऐश्वर्य्यमदसम्मूढं बलिं लोकत्रयादिव ।
इति श्रीमहाभारते उद्योगपर्व्वणि प्रजागरपर्व्वणि विदुरवाक्ये सप्तत्रिंशोऽध्यायः ॥ ३७ ॥
॥ धृतराष्ट्र उवाच ॥ अनीश्वरोऽयं पुरुषो भवाभवे सूत्रप्रोता दारुमयीव योषा । धात्रा तु दिष्टस्य वशे कृतोऽयं तस्माद्वद त्वं श्रवणे धृतोऽहं ।
॥ विदुर उवाच ॥ अप्राप्तकाले वचनं बृहस्पतिरपि ब्रुवन् । लभते बुद्ध्यवज्ञानमवमानञ्च भारत ।
प्रियो भवति दानेन प्रियवादेन चापरः । मन्त्रमूलबलेनान्यो यः प्रियः प्रिय एव सः ।
द्वेष्यो न साधुर्भवति न मेधावी न पण्डितः । प्रिये शुभानि कार्य्याणि द्वेष्ये पापानि चैव ह ।
उक्तं मया जातमात्रेऽपि राजन् दुर्य्योधनं त्यज पुत्रं त्वमेकं । तस्य त्यागात्पुत्त्रशतस्य वृद्धिरस्यात्यागात्पुत्त्रशतस्य नाशः। १४५०
न वृद्धिर्ब्बहु मन्तव्या या वृद्धिः क्षयमावहेत् । क्षयोऽपि बहु मन्तव्यो यः क्षयो वृद्धिमावहेत् ।
न स क्षयो महाराज यः क्षयो वृद्धिमावहेत् । क्षयः स त्विह मन्तव्यो यं लब्ध्वा बहु नाशयेत् ।
समृद्धा गुणतः केचिद्भवन्ति धनतोऽपरे । धनवृद्धान् गुणैर्हीनान् धृतराष्ट्र विवर्जय ।
॥ धृतराष्ट्र उवाच ॥ सर्व्वं त्वमायतीयुक्तं भाषसे प्राज्ञसम्मतं । न चोत्सहे सुतन्त्यक्तुं यतो धर्म्मस्ततो जयः ।
॥ विदुर उवाच ॥ अतीवगुणसम्पन्नो न जातु विनयान्वितः । सुसूक्ष्ममपि भूतानामुपमर्द्दमुपेक्षते । १४५५
परापवादनिरताः परदुःखोदयेषु च । परस्परविरोधे च यतन्ते सततोत्थिताः ।
सदोषं दर्शनं येषां संवासे सुमहद्भयं । अर्थादाने महान् दोषः प्रदाने च महद्भयं ।
ये वै भेदनशीलास्तु सकामा निस्त्रपाः शठाः । ते पापा इति विख्याताः संवासे परिगर्हिताः ।
युक्तांस्त्वन्यैर्महादोषैर्ये नरास्तान् विवर्जयेत् । निवर्त्तमाने सौहार्द्दे प्रीतिर्नीचे प्रणश्यति ।
या चैव फलनिर्वृत्तिः सौहृदे चैव यत्सुखं । यतते चापवादाय यत्नमारभते क्षये । १४६०
अल्पेऽप्यपकृते मोहान्न शान्तिमधिगच्छति । तादृशैः सङ्गतं नीचैर्नृशंसैरकृतात्मभिः ।
निशम्य निपुणं बुद्ध्या विद्वान् दूराद्विवर्जयेत् । यो ज्ञातिमनुगृह्णाति दरिद्रं दीनमातुरं ।
स पुत्त्रपशुभिर्वृद्धिं श्रेयश्चानन्त्यमश्नुते । ज्ञातयो वर्द्धनीयास्तैर्य इच्छन्त्यात्मनः शुभं ।
कुलवृद्धिञ्च राजेन्द्र तस्मात्साधु समाचर । श्रेयसा योक्ष्यते राजन् कुर्व्वाणो ज्ञातिसत्क्रियां ।
विगुणा ह्यपि संरक्ष्या ज्ञातयो भरतर्षभ । किं पुनर्गुणवन्तस्ते त्वत्प्रसादाभिकाङ्क्षिणः । १४६५
प्रसादं कुरु वीराणां पाण्डवानां विशाम्पते । दीयन्तां ग्रामकाः केचित्तेषां वृत्त्यर्थमीश्वर ।
एवं लोके यशः प्राप्तं भविष्यति नराधिप । वृद्धेन हि त्वया कार्य्यं पुत्त्राणां तात शासनं ।
मया चापि हितं वाच्यं विद्धि मां त्वद्धितैषिणं । ज्ञातिभिर्व्विग्रहस्तात न कर्त्तव्यः शुभार्थिना ।
सुखानि सह भोज्यानि ज्ञातिभिर्भरतर्षभ । सम्भोजनं सङ्कथनं सम्प्रीतिश्च परस्परं ।
ज्ञातिभिः सह कार्य्याणि न विरोधः कदाचन । ज्ञातयस्तारयन्तीह ज्ञातयो मज्जयन्ति च । १४७०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

सुवृत्तास्तारयन्तीह दुर्वृत्ता मज्जयन्ति च। सुवृत्तो भव राजेन्द्र पाण्डवान्प्रति मानद।
अधर्षणीयः शत्रूणां तैर्वृतस्त्वं भविष्यसि। श्रीमन्तं ज्ञातिमासाद्य यो ज्ञातिरवसीदति।
दिग्धहस्तं मृग इव स एनस्तस्य विन्दति। पश्चादपि नरश्रेष्ठ तव तापो भविष्यति।
तान्वा हतान्सुतान् वापि श्रुत्वा तदनुचिन्तय। येन खट्वां समारूढः परितप्येत कर्मणा।
आदावेव न तत् कुर्य्याद्ध्रुवे जीविते सति। न कश्चिन्नापनयति पुमानन्यत्र भार्गवात्। १३७५
शेषसम्प्रतिपत्तिस्तु बुद्धिमत्स्वेव तिष्ठति। दुर्य्योधनेन यद्येतत्पापन्तेषु पुरा कृतं।
त्वया तत् कुलवृद्धेन प्रत्यानेयं नरेश्वर। तांस्त्वं पदे प्रतिष्ठाप्य लोके विगतकल्मषः।
भविष्यसि नरश्रेष्ठ पूजनीयो मनीषिणां। सुव्याहृतानि धीराणां फलतः परिचिन्त्य यः।
अध्यवस्यति कार्य्येषु चिरं यशसि तिष्ठति। असम्यगुपयुक्तं हि ज्ञानं सुकुशलैरपि।
उपलभ्यञ्चाविदितं विदितं चाननुष्ठितं। पापोदयफलं विद्वान् यो नारभति वर्द्धते। १३८०
यस्तु पूर्व्वकृतं पापमविमृश्यानुवर्त्तते। अगाधपङ्के दुर्म्मेधा विषमे विनिपात्यते।
मन्त्रभेदस्य षट् प्राज्ञो द्वाराणीमानि लक्षयेत्। अर्थसन्ततिकामश्च रक्षेदेतानि नित्यशः।
मदं स्वप्नमविज्ञानमाकारं चात्मसम्भवं। दुष्टामात्येषु विश्रम्भं दूताच्चाकुशलादपि।
द्वाराण्येतानि यो ज्ञात्वा संवृणोति सदा नृपः। त्रिवर्गचरणे युक्तः स शत्रूनधितिष्ठति।
न वै श्रुतमविज्ञाय वृद्धाननुपसेव्य वा। धर्मार्थौ वेदितुं शक्यौ बृहस्पतिसमैरपि। १३८५
नष्टं समुद्रे पतितं नष्टं वाक्यमशृण्वति। अनात्मनि श्रुतं नष्टं नष्टं हुतमनग्निकं।
मत्या परीक्ष्य मेधावी बुद्ध्या सम्पाद्य चासकृत्। श्रुत्वा दृष्ट्वाऽथ विज्ञाय प्राज्ञैर्मैत्रीं समाचरेत्।
अकीर्त्तिं विनयो हन्ति हन्त्यनर्थं पराक्रमः। हन्ति नित्यं क्षमा क्रोधमाचारो हन्त्यलक्षणं।
परिच्छदेन क्षेत्रेण वेश्मना परिचर्य्यया। परीक्षेत कुलं राजन् भोजनाच्छादनेन च।
उपस्थितस्य कामस्य प्रतिवादो न विद्यते। अपि निर्मुक्तदेहस्य कामरक्तस्य किं पुनः। १३९०
राजोपसेवितं वैद्यं धार्म्मिकं प्रियदर्शनं। मित्रवन्तं सुवाक्यञ्च सुहृदं परिपालयेत्।
दुष्कुलीनः कुलीनो वा मर्य्यादां यो न लङ्घयेत्। धर्मापेक्षी मृदुर्ह्रीमान् स कुलीनशतादरः।
ययोश्चित्तेन वा चित्तं नैभृतं निभृतेन वा। समेति प्रज्ञया प्रज्ञा तयोर्मैत्री न जीर्य्यति।
दुर्बुद्धिमकृतप्रज्ञं छन्नं कूपं तृणैरिव। विवर्जयीत मेधावी तस्मिन्मैत्री प्रणश्यति।
अवलिप्तेषु मूर्खेषु रौद्रसाहसिकेषु च। तथैवापेतधर्मेषु न मैत्रीमाचरेद्बुधः। १३९५
कृतज्ञं धार्मिकं सत्यमक्षुद्रं दृढभक्तिकं। जितेन्द्रियं स्थितं स्थित्यां मित्रमत्यागि चेष्यते।
इन्द्रियाणामनुत्सर्गो मृत्युनाऽपि विशिष्यते। अत्यर्थं पुनरुत्सर्गः सादयेद्दैवतान्यपि।
मार्द्दवं सर्व्वभूतानामनसूया क्षमा धृतिः। आयुष्याणि बुधाः प्राहुर्मित्राणां चापि मानना।
अपनीतं सुनीतेन योऽर्थं प्रत्यानिनीषते। मतिमास्थाय सुदृढां तदकापुरुषव्रतं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

आयत्यां प्रतिकारज्ञस्तदात्वे दृढनिश्चयः । अतीते कार्य्यशेषज्ञो नरोऽर्थैर्न्न प्रहीयते ।
कर्म्मणा मनसा वाचा यदभीक्ष्णं निषेवते । तदेवापहरत्येनं तस्मात्कल्याणमाचरेत् ।
मङ्गलालम्भनं योगः श्रुतमुत्थानमार्जवं । भूतिमेतानि कुर्वन्ति सतां चाभीक्ष्णदर्शनं ।
अनिर्व्वेदः श्रियो मूलं लाभस्य च शुभस्य च । महान् भवत्यनिर्व्विण्णः सुखं चानन्त्यमश्नुते ।
नातःश्रीमत्तरं किञ्चिदन्यत्पथ्यतमं तथा । प्रभविष्णोर्यथा तात क्षमा सर्व्वत्र सर्व्वदा ।
क्षमेदशक्तः सर्व्वस्य शक्तिमान् धर्म्मकारणात् । अर्थानर्थौ समौ यस्य तस्य नित्यं क्षमा हिता ।
यत्सुखं सेवमानोऽपि धर्म्मार्थाभ्यां न हीयते । कामं तदुपसेवेत न मूढव्रतमाचरेत् ।
दुःखार्त्तेषु प्रमत्तेषु नास्तिकेष्वलसेषु च । न श्रीर्व्वसत्यदान्तेषु ये चोत्साहविवर्जिताः ।
आर्जवेन नरं युक्तमार्जवात्सव्यपत्रपं । अशक्तं मन्यमानास्तु धर्षयन्ति कुबुद्धयः ।
अत्यार्य्यमतिदातारमतिशूरमतिव्रतं । प्रज्ञाभिमानिनञ्चैव श्रीर्भयान्नोपसर्पति ।
न चातिगुणवत्स्वेषा नात्यन्तं निर्गुणेषु च । नैषा गुणान् कामयते नैर्गुण्यान्नानुरज्यते ।
उन्मत्ता गौरिवान्धा श्रीः क्वचिदेवावतिष्ठते । अग्निहोत्रफला वेदाः शीलवृत्तफलं श्रुतं ।
रतिपुत्रफला नारी दत्तभुक्तफलं धनं । अधर्म्मोपार्जितैरर्थैर्य्यः करोत्यौर्ध्वदेहिकं ।
न स तस्य फलं प्रेत्य भुङ्क्तेऽर्थस्य दुरागमात् । कान्तारे वनदुर्गेषु कृच्छ्रास्वापत्सु सम्भ्रमे ।
उद्यतेषु च शस्त्रेषु नास्ति सत्त्ववतां भयं । उत्थानं संयमो दाक्ष्यमप्रमादो धृतिः स्मृतिः ।
समीक्ष्य च समारम्भो विद्धि मूलं भवस्य तु । तपो बलं तापसानां ब्रह्म ब्रह्मविदां बलं ।
हिंसा बलमसाधूनां क्षमा गुणवतां बलं । अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः ।
हविर्ब्राह्मणकाम्या च गुरोर्व्वचनमौषधं । न तत्परस्य सन्दध्यात् प्रतिकूलं यदात्मनः ।
सङ्ग्रहेणैष धर्म्मः स्यात्कामादन्यः प्रवर्त्तते । अक्रोधेन जयेत् क्रोधमसाधुं साधुना जयेत् ।
जयेत्कदर्य्यं दानेन जयेत् सत्येन चानृतं । स्त्रीधूर्त्तकेऽलसे भीरौ चण्डे पुरुषमानिनि ।
चौरे कृतघ्ने विश्वासो न कार्य्यो नच नास्तिके । अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि सम्प्रवर्द्धन्ते कीर्त्तिरायुर्यशो बलं । अतिक्लेशेन येऽर्थाः स्युर्द्धर्मस्यातिक्रमेण च ।
अरेर्व्वा प्रणिपातेन मास्म तेषु मनः कृथाः । अविद्यः पुरुषः शोच्यः शोच्यं मैथुनमप्रजं ।
निराहाराः प्रजाः शोच्याः शोच्यं राष्ट्रमराजकं । अध्वा जरा देहवतां पर्व्वतानां जलं जरा ।
असम्भोगो जरा स्त्रीणां वाक्शल्यं मनसो जरा । अनाम्नायमला वेदा ब्राह्मणस्याव्रतं मलं ।
मलं पृथिव्या वाह्लीकाः पुरुषस्यानृतं मलं । कौतूहलमला साध्वी विप्रवासमलाः स्त्रियः ।
सुवर्णस्य मलं रूप्यं रूप्यस्यापि मलं त्रपु । ज्ञेयं त्रपुमलं सीसं सीसस्यापि मलं मलं ।
न स्वप्नेन जयेन्निद्रां न कामेन जयेत्स्त्रियः । नेन्धनेन जयेदग्निं न पानेन सुरां जयेत् ।
यस्य दानजितं मित्रं शत्रवो युधि निर्जिताः । अन्नपानजिता दाराः सफलं तस्य जीवितं ।
सहस्रिणोऽपि जीवन्ति जीवन्ति शतिनस्तथा । धृतराष्ट्र विमुञ्चेच्छां न कथञ्चिन्न जीव्यते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यत् पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः । नालमेकस्य तत्सर्व्वमिति पश्यन्न मुह्यति । १५३०
राजन्भूयो ब्रवीमि त्वां पुत्त्रेषु सममाचर । समता यदि ते राजन् स्वेषु पाण्डुसुतेषु वा ।
इति श्रीमहाभारते उद्योगपर्व्वणि प्रजागरपर्व्वणि विदुरवाक्ये अष्टत्रिंशोऽध्यायः ॥ ३८ ॥

॥ विदुर उवाच ॥ योऽभ्यर्चितः सद्भिरसज्जमानः करोत्यर्थं शक्तिमहापयित्वा । क्षिप्रं यशस्तं समुपैति सन्तमलं प्रसन्ना हि सुखाय सन्तः ।
महान्तमप्यर्थमधर्म्मयुक्तं यः सन्त्यजत्यनपाकृष्ट एव । सुखं सुदुःखान्यवमुच्य शेते जीर्णां त्वचं सर्प इवावमुच्य ।
अनृते च समुत्कर्षो राजगामि च पैशुनं । गुरोश्चालीकनिर्ब्बन्धः समानि ब्रह्महत्यया ।
असूयैकपदं मृत्युरतिवादः श्रियो वधः । अशुश्रूषा त्वरा श्लाघा विद्यायाः शत्रवस्त्रयः । १५३५
आलस्यं मदमोहौ च चापलं गोष्ठिरेव च । स्तब्धता चाभिमानित्वं तथाऽत्यागित्वमेव च ।
एते वै सप्त दोषाः स्युः सदा विद्यार्थिनां मताः । सुखार्थिनः कुतो विद्या नास्ति विद्यार्थिनः सुखं ।
सुखार्थी वा त्यजेद्विद्यां विद्यार्थी वा त्यजेत्सुखं । नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ।
नान्तकः सर्व्वभूतानां न पुंसां वामलोचना ।

आशा धृतिं हन्ति समृद्धिमन्तकः क्रोधः श्रियं हन्ति यशः कदर्य्यता । अपालनं हन्ति पशूंश्च राजन्नेकः क्रुद्धो ब्राह्मणो हन्ति राष्ट्रं । १५४०
अजाश्वकांस्यं रजतञ्च नित्यं मध्वाकर्षः शकुनिः श्रोत्रियश्च । वृद्धो ज्ञातिरवसन्नः कुलीन एतानि ते सन्तु गृहे सदैव ।
अजोक्षाचन्दनं वीणाआदर्शो मधुसर्पिषी । विषमौदुम्बरं शङ्खः स्वर्णनाभोऽथ रोचना ।
गृहे स्थापयितव्यानि धन्यानि मनुरब्रवीत् । देवब्राह्मणपूजार्थमतिथीनां च भारत ।
इदञ्च त्वां सर्वपरं ब्रवीमि पुण्यं पदं तात महाविशिष्टं । न जातु कामान्न भयान्न लोभाद्धर्म्मं जह्याज्जीवितस्यापि हेतोः ।
नित्यो धर्म्मः सुखदुःखे त्वनित्ये जीवो नित्यो हेतुरस्य त्वनित्यः । त्यक्त्वाऽनित्यं प्रतिष्ठस्व नित्ये सन्तुष्य त्वं तोषपरो हि लाभः । १५४५
महाबलान्पश्य महानुभावान् प्रशास्य भूमिं धनधान्यपूर्णां । राज्यानि हित्वा विपुलांश्च भोगान् गतान्नरेन्द्रान् वशमन्तकस्य ।
मृतं पुत्त्रं दुःखपुष्टं मनुष्या उत्क्षिप्य राजन् स्वगृहान्निर्हरन्ति । तं मुक्तकेशाः करुणं रुदन्ति चितामध्ये काष्ठमिव क्षिपन्ति ।
अन्यो धनं प्रेतगतस्य भुङ्क्ते वयांसि चाग्निश्च शरीरधातून् । द्वाभ्यामयं सह गच्छत्यमुत्र पुण्येन पापेन च वेष्ट्यमानः ।
उत्सृज्य विनिवर्त्तन्ते ज्ञातयः सुहृदः सुताः । अपुष्पानफलान् वृक्षान्यथा तात पतत्त्रिणः ।
अग्नौ प्रास्तं तु पुरुषं कर्म्मान्वेति स्वयं कृतं । तस्मात्तु पुरुषो यत्नाद्धर्मं सञ्चिनुयाच्छनैः । १५५०
अस्माल्लोकादूर्द्ध्वममुष्य चाधो महत्तमस्तिष्ठति ह्यन्धकारं । तद्वै महामोहनमिन्द्रियाणां बुध्यस्व मा त्वां प्रलभेत राजन् ।
इदं वचः शक्ष्यसि चेद्यथावन्निशम्य सर्व्वं प्रतिपत्तुमेव । यशः परं प्राप्स्यसि जीवलोके भयं न चामुत्र नचेह तेऽस्ति ।
आत्मा नदी भारत पुण्यतीर्था सत्योदका धृतिकूला दयोर्म्मिः । तस्यां स्नातः पूयते पुण्यकर्म्मा पुण्यो ह्यात्मा नित्यमलोभ एव ।
कामक्रोधग्राहवतीं पञ्चेन्द्रियजलां नदीं । नावं धृतिमयीं कृत्वा जन्मदुर्गाणि सन्तर ।
प्रज्ञावृद्धं धर्म्मवृद्धं स्वबन्धुं विद्यावृद्धं वयसा चापि वृद्धं । कार्य्याकार्य्ये पूजयित्वा प्रसाद्य यः सम्पृच्छेन्न स मुह्येत्कदाचित् । १५५५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

धृत्या शिश्नोदरं रक्षेत्पाणिपादञ्च चक्षुषा । चक्षुःश्रोत्रे च मनसा मनो वाचञ्च कर्म्मणा ।
नित्योदकी नित्ययज्ञोपवीती नित्यस्वाध्यायी पतितान्नवर्ज्जी । सत्यं ब्रुवन्गुरवे कर्म्म कुर्व्वन्नब्राह्मणः प्रच्यवते ब्रह्मलोकात् ।
अधीत्य वेदान्परिसंस्तीर्य्य चाग्नीनिष्ट्वा यज्ञैः पालयित्वा प्रजाश्च । गोब्राह्मणार्थे शस्त्रपूतान्तरात्मा हतः सङ्ग्रामे क्षत्रियः स्वर्गमेति ।
वैश्योऽधीत्य ब्राह्मणान् क्षत्रियांश्च धनैः काले संविभज्याश्रितांश्च । त्रेतापूतं धूममाघ्राय पुण्यं प्रेत्य स्वर्गे दिव्यसुखानि भुङ्क्ते ।
ब्रह्म क्षत्रं वैश्यवर्णञ्च शूद्रः क्रमेणैतान्न्यायतः पूजयानः । तुष्टेष्वेतेष्वव्यथो दग्धपापस्त्यक्त्वा देहं स्वर्गसुखानि भुङ्क्ते । १५६०
चातुर्व्वर्ण्यस्यैष धर्मस्तवोक्तो हेतुं चानु ब्रुवतो मे निबोध । क्षात्त्राद्धर्मात् हीयते पाण्डुपुत्त्रस्तं त्वं राजन् राजधर्मे नियुङ्क्ष्व ।
॥ धृतराष्ट्र उवाच ॥ एवमेतद्यथा त्वं मामनुशासषि नित्यदा । ममापि च मतिः सौम्य भवत्येवं यथात्थ मां ।
सा तु बुद्धिः कृताऽप्येवं पाण्डवान् प्रति मे सदा । दुर्य्योधनं समासाद्य पुनर्व्विपरिवर्त्तते ।
नदिष्टमप्यतिक्रान्तुं शक्यं भूतेन केनचित् । दिष्टमेव ध्रुवं मन्ये पौरुषन्तु निरर्थकं ।
इति श्रीमहाभारते उद्योगपर्व्वणि प्रजागरपर्व्वणि विदुरवाक्ये एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ समाप्तञ्च प्रजागरपर्व्व ॥

॥ अथ सनत्सुजातपर्व्व ॥

॥ धृतराष्ट्र उवाच ॥ अनुक्तं यदि ते किञ्चिद्वाचा विदुर विद्यते । तन्मे शुश्रूषतो ब्रूहि विचित्राणीह भाषसे । १५६५
॥ विदुर उवाच ॥ धृतराष्ट्र कुमारो वै यः पुराणः सनातनः । सनत्सुजातः प्रोवाच मृत्युर्नास्तीति भारत ।
स ते गुह्यान् प्रकाशांश्च सर्व्वान् हृदयसंश्रयान् । प्रवक्ष्यति महाराज सर्व्वबुद्धिमतां वरः ।
॥ धृतराष्ट्र उवाच ॥ किं त्वं न वेद तद्भूयो यन्मे ब्रूयात्सनातनः । त्वमेव विदुर ब्रूहि प्रज्ञाशेषोऽस्ति चेत्तव ।
॥ विदुर उवाच ॥ शूद्रयोनावहं जातो नातोऽन्यद्वक्तुमुत्सहे । कुमारस्य तु या बुद्धिर्व्वेद तां शाश्वतीमहं ।
ब्राह्मीं हि योनिमापन्नः सुगुह्यमपि यो वदेत् । न तेन गर्ह्यो देवानां तस्मादेतद्ब्रवीमि ते । १५७०
॥ धृतराष्ट्र उवाच ॥ ब्रवीहि विदुर त्वं मे पुराणं तं सनातनं । कथमेतेन देहेन स्यादिहैव समागमः ।
॥ वैशम्पायन उवाच ॥ चिन्तयामास विदुरस्तमृषिं शंसितव्रतं । स च तच्चिन्तितं ज्ञात्वा दर्शयामास भारत ।
स चैनं प्रतिजग्राह विधिदृष्टेन कर्म्मणा । सुखोपविष्टं विश्रान्तमथैनं विदुरोऽब्रवीत् ।
भगवन् संशयः कश्चिद्धृतराष्ट्रस्य मानसः । यो न शक्यो मया वक्तुं त्वमस्मै वक्तुमर्हसि ।
यं श्रुत्वाऽयं मनुष्येन्द्रः सर्व्वदुःखातिगो भवेत् । लाभालाभौ प्रियद्वेष्यौ यथैनं न जराऽन्तकौ । १५७५
विषहेरन् भयामर्षौ क्षुत्पिपासे मदोद्भवौ । अरतिश्चैव तन्द्रीश्च कामक्रोधौ क्षयोदयौ ।
इति महाभारते उद्योगपर्व्वणि सनत्सुजातपर्व्वणि विदुरप्रार्थने चत्वारिंशोऽध्यायः ॥ ४० ॥
॥ वैशम्पायन उवाच ॥ ततो राजा धृतराष्ट्रो मनीषी संपूज्य वाक्यं विदुरेरितं तत् । सनत्सुजातं रहिते महात्मा पप्रच्छ बुद्धिं परमां बुभूषन् ।
॥ धृतराष्ट्र उवाच ॥ सनत्सुजात यदिदं शृणोमि न मृत्युरस्तीति तव प्रवादं । देवासुरा ह्याचरन्ब्रह्मचर्य्यममृत्यवे तत्कतरन्नु सत्यं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ सनत्सुजात उवाच॥ अपृच्छः कर्म्मणा यच्च मृत्युर्नास्तीति चापरं। शृणु मे ब्रुवतो राजन्यथैतन्मा विशङ्किथाः।
उभे सत्ये क्षत्रियैतस्य विद्धि मोहान्मृत्युः सम्मतोऽयं कवीनां। प्रमादं वै मृत्युमहं ब्रवीमि तथाऽप्रमादममृतत्वं ब्रवीमि।
प्रमादाद्वै असुराः पराभवन्नप्रमादाद्ब्रह्मभूता भवन्ति। न वै मृत्युर्व्याघ्र इवात्ति जन्तून्नह्यस्य रूपमुपलभ्यते हि। १५८०
यमं त्वेके मृत्युमतोऽन्यमाहुरात्मावसन्नममृतं ब्रह्मचर्य्यं। पितृलोके राज्यमनुशास्ति देवः शिवः शिवानामशिवोऽशिवानाम्।
अस्यादेशान्निःसरते नराणां क्रोधः प्रमादो लोभरूपश्च मृत्युः। अहंगतेनैव चरन् विमार्गान्नचात्मनोयोगमुपैति कश्चित्।
ते मोहितास्तद्वशे वर्त्तमाना इतः प्रेतास्तत्र पुनः पतन्ति। ततस्तान्देवा अनुविप्लवन्ते अतो मृत्युर्मरणाख्यामुपैति।
कर्म्मोदये कर्म्मफलानुरागास्ते तत्रानुयान्ति न तरन्ति मृत्युं। सदर्थयोगानवगमात्समन्तात्प्रवर्त्तते भोगयोगेन देही।
तद्वै महामोहनमिन्द्रियाणां मिथ्याऽर्थयोगेऽस्य गतिर्हि नित्या। मिथ्याऽर्थयोगाभिहतान्तरात्मा स्मरन्नुपास्ते विषयान्समन्तात्। १५८५
अभिध्या वै प्रथमं हन्ति लोकान् कामक्रोधावनुगृह्याशु पश्चात्। एते बालान्मृत्यवे प्रापयन्ति धीरास्तु धैर्य्येण तरन्ति मृत्युं।
सोऽभिध्यायन्नुत्पतितान्निहन्यादनादरेणाप्रतिबुध्यमानः। नैनं मृत्युर्मृत्युरिवात्तिभूत्वा एवं विद्वान् यो विनिहन्ति कामान्।

कामानुसारी पुरुषः कामाननु विनश्यति। कामान्व्युदस्य धुनुते यत्किञ्चित्पुरुषो रजः।
तमोऽप्रकाशो भूतानां नरकोऽयं प्रदृश्यते। मुह्यन्त इव धावन्ति गच्छन्तः श्वभ्रवत्सुखं।

अमूढवृत्तेः पुरुषस्येह कुर्य्यात्किं वै मृत्युस्तार्ण इवास्य व्याघ्रः। अमन्यमानः क्षत्रिय किञ्चिदन्यन्नाधीयीत निर्णुदन्निवास्य चायुः। १५९०
स क्रोधलोभौ मोहवानन्तरात्मा स वै मृत्युस्त्वच्छरीरे य एषः। एवं मृत्युं जायमानं विदित्वा ज्ञाने तिष्ठन्न बिभेतीह मृत्योः। विनश्यते विषये तस्य मृत्युर्मृत्योर्यथा विषयं प्राप्य मर्त्यः।
॥ धृतराष्ट्र उवाच ॥ यानेवाहुरिज्यया साधुलोकान् द्विजातीनां पुण्यतमान्सनातनान्। तेषां परार्थं कथयन्तीह वेदा एतद्विद्वानुपैति कथं नु कर्म्म।
॥ सनत्सुजात उवाच ॥ एवं ह्यविद्वानुपयाति तत्र तथाऽर्थजातञ्च वदन्ति वेदाः। अनीह आयाति परं परात्मा प्रयाति मार्गेण निहत्य मार्गान्।
॥ धृतराष्ट्र उवाच ॥ कोऽसौ नियुङ्क्ते तमजं पुराणं स चेदिदं सर्व्वमनुक्रमेण। किं वाऽस्य कार्य्यमथ वा सुखञ्च तन्मे विद्वन् ब्रूहि सर्व्वं यथावत्।
॥ सनत्सुजात उवाच॥ दोषो महानत्र विभेदयोगे ह्यनादियोगेन भवन्ति नित्याः। तथाऽस्य नाधिक्यमपैति किञ्चिदनादियोगेन भवन्ति पुंसः। १५९५
य एतद्वा भगवान्स नित्यो विकारयोगेन करोति विश्वं। तथाच तच्छक्तिरितिस्म मन्यते तथाऽर्थयोगेच भवन्ति वेदाः।
॥ धृतराष्ट्र उवाच॥ येऽस्मिन्धर्म्मान्नाचरन्तीह केचित्तथा धर्म्मान् केचिदिहाचरन्ति। धर्म्मः पापेन प्रतिहन्यते स्विदुताहो धर्म्मः प्रतिहन्ति पापं।
॥ सनत्सुजात उवाच॥ उभयमेव तत्रोपयुज्यते फलं धर्म्मस्यैवेतरस्य च।
तस्मिन्स्थितो वाऽप्युभयं हि नित्यं ज्ञानेन विद्वान्प्रतिहन्ति सिद्धं। तथाऽन्यथा पुण्यमुपैति देही तथागतं पापमुपैति सिद्धं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

गत्वाभयं कर्म्मणा युज्यतेऽस्थिरं शुभस्य पापस्य स चापि कर्म्मणा। धर्म्मेण पापं प्रणुदतीह विद्वान्धर्म्मो बलीयानिति तस्य
सिद्धिः। १६००

॥ धृतराष्ट्र उवाच ॥ यानिहाहुः स्वस्य धर्म्मस्य लोकान्द्विजातीनां पुण्यकृतां सनातनान्। तेषां क्रमान्कथय ततोऽपि चान्या
न्नैतद्विद्वन्वेत्तुमिच्छामि कर्म्म।

॥ सनत्सुजात उवाच ॥ येषां व्रतेऽथ विस्पर्द्धा बले बलवतामिव। ते ब्राह्मणा इतः प्रेत्य ब्रह्मलोके प्रकाशकाः।

येषां धर्म्मे च विस्पर्द्धा तेषां तज्ज्ञानसाधनं। ते ब्राह्मणा इतो मुक्ताः स्वर्गं यान्ति त्रिविष्टपं।

तस्य सम्यक्समाचारमाहुर्वेदविदो जनाः। नैनं मन्येत भूयिष्ठं वाह्यमाभ्यन्तरं जनं।

यत्र मन्येत भूयिष्ठं प्रावृषीव तृणोलपं। अन्नं पानं ब्राह्मणस्य तज्जीवन्नानुसंज्वरेत्। १६०५

यत्राकथयमानस्य प्रयच्छत्यशिवं भयं। अतिरिक्तमिवाकुर्व्वन् स श्रेयान्नेतरो जनः।

यो वा कथयमानस्य ह्यात्मानं नानुसंज्वरेत्। ब्रह्मस्वं नोपभुञ्जीत तदन्नं सम्मतं सतां।

यथा स्वं वान्तमश्नाति श्वा वै नित्यमभूतये। एवन्ते वान्तमश्नन्ति स्ववीर्य्यस्योपसेवनात्।

नित्यमज्ञातचर्य्या मे इति मन्येत ब्राह्मणः। ज्ञातीनां तु वसन्मध्ये तंविदुर्ब्राह्मणं बुधाः।

को ह्यनन्तरमात्मानं ब्राह्मणो हन्तुमर्हति। निर्लिङ्गमचलं शुद्धं सर्व्वद्वैतविवर्जितं। तस्माद्धि क्षत्रियस्यापि ब्रह्मावसति
पश्यति। १६१०

योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते। किं तेन न कृतं पापं चौरेणात्मापहारिणा।

अश्रान्तः स्यादनादाता सम्मतो निरुपद्रवः। शिष्टो न शिष्टवत्स स्यात् ब्राह्मणो ब्रह्मवित्कविः।

अनाढ्या मानुषे वित्ते आढ्या दैवे तथा क्रतौ। ते दुर्धर्षा दुष्प्रकम्प्यास्तान्विद्याद्ब्रह्मणस्तनुं।

सर्व्वान्स्विष्टकृतो देवान् विद्याद्य इह कश्चन। न समानो ब्राह्मणस्य तस्मिन्प्रयतते स्वयं।

यमप्रयतमानन्तु मानयन्ति स मानितः। न मान्यमानो मन्येत न मान्यमभिसंज्वरेत्। १६१५

लोकः स्वभाववृत्तिर्हि निमेषोन्मेषवत्सदा। विद्वांसो मानयन्तीह इति मन्येत मानितः।

अधर्म्मनिपुणा मूढा लोके मायाविशारदाः। न मान्यं मानयिष्यन्ति मान्यानामवमानिनः।

नवै मानञ्च मौनञ्च सहितौ वसतः सदा। अयं हि लोको मानस्य असौ मौनस्य तद्विदः।

श्रीः सुखस्येह संवासः सा चापि परिपन्थिनी। ब्राह्मी सुदुर्लभा श्रीर्हि प्रज्ञाहीनेन क्षत्रिय।

द्वाराणि तस्येह वदन्ति सन्तो बहुप्रकाराणि दुराधराणि। सत्यार्जवे ह्रीर्दमशौचविद्या यथान मोहप्रतिबन्धकानि। १६२०

इति श्रीमहाभारते उद्योगपर्व्वणि सनत्सुजातपर्व्वणि सनत्सुजातवाक्ये एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

॥ धृतराष्ट्र उवाच ॥ कस्यैष मौनः कतरन्नु मौनं प्रब्रूहि विद्वन्निह मौनभावं। मौनेन विद्वानुत याति मौनं कथं मुने
मौनमिहाचरन्ति।

॥ सनत्सुजात उवाच ॥ यतो न वेदा मनसा सहैनमनुप्रविशन्ति ततोऽथ मौनं। यत्रोत्थितो वेदशब्दस्तथाऽयं स तन्मय
त्वेन विभाति राजन्।

॥ धृतराष्ट्र उवाच ॥ ऋचो यजूंषि यो वेद सामवेदञ्च वेद यः। पापानि कुर्व्वन्पापेन लिप्यते किं न लिप्यते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

॥ सनत्सुजात उवाच ॥ नैनं सामान्यृचो वाऽपि न यजूंष्यविचक्षणं। त्रायन्ते कर्म्मणः पापान्न ते मिथ्या ब्रवीम्यहं। न च्छन्दांसि वृजिनात्तारयन्ति मायाविनं मायया वर्त्तमानं। नीडं शकुन्ता इव जातपक्षाश्छन्दांस्येनं प्रजहत्यन्त काले।
१६२५
॥ धृतराष्ट्र उवाच ॥ नचेद्वेदा विना धर्म्मं त्रातुं शक्ता विचक्षण। अथ कस्मात्प्रलापोऽयं ब्राह्मणानां सनातनः।
॥ सनत्सुजात उवाच ॥ तस्यैव नामादिविशेषरूपैरिदं जगद्भाति महानुभाव। निर्द्दिश्य सम्यक्प्रवदन्ति वेदास्तद्विश्ववैरूप्यमुदाहरन्ति।

तदर्थमुक्तं तप एतदिज्या ताभ्यामसौ पुण्यमुपैति विद्वान्। पुण्येन पापं विनिहत्य पश्चात् संजायते ज्ञानविदीपितात्मा।
ज्ञानेन चात्मानमुपैति विद्वान् अथान्यथा वर्गफलानुकाङ्क्षी। अस्मिन् कृतं तत्परिगृह्य सर्व्वममुत्र भुङ्क्ते पुनरेति मार्गं।
अस्मिंल्लोके तपस्तप्तं फलमन्यत्र भुज्यते। ब्राह्मणानामिमे लोका धात्ते तपसि तिष्ठतां। १६३०
॥ धृतराष्ट्र उवाच ॥ कथं समृद्धमसमृद्धं तपो भवति केवलं। सनत्सुजात तद्ब्रूहि यथा विद्यामतद्वयं।
॥ सनत्सुजात उवाच ॥ निष्कल्मषं तपस्त्वेतत्केवलं परिचक्षते। एतत्समृद्धमप्यृद्धन्तपो भवति केवलं।
तपोमूलमिदं सर्व्वं यन्मां पृच्छसि क्षत्रिय। तपसा वेदविद्वांसः परं त्वमृतमाप्नुयुः।
॥ धृतराष्ट्र उवाच ॥ कल्मषं तपसो ब्रूहि श्रुतं निष्कल्मषं तपः। सनत्सुजात येनेदं विद्यां गुह्यं सनातनं।
॥ सनत्सुजात उवाच ॥ क्रोधादयो द्वादश यस्य दोषास्तथा नृशंसानि दशत्रि राजन्। धर्म्मादयो द्वादश ते पितॄणां शास्त्रे गुणा ये विदिता द्विजानां। १६३५
क्रोधः कामो लोभमोहौ विधित्साऽकृपासूये मानशोकौ स्पृहा च। ईर्ष्या जुगुप्सा च मनुष्यदोषा वर्ज्याः सदा द्वादशैते नराणां।
एकैकः पर्य्युपास्ते ह मनुष्यान्मनुजर्षभ। लिप्समानोऽन्तरं तेषां मृगाणामिव लुब्धकः।
विकत्थनः स्पृहयालुर्मनस्वी बिभ्रत्कोपं चपलोऽरक्षणश्च। एतान् पापाः षण्नराः पापधर्म्मान् प्रकुर्व्वते नोत्रसन्तः सुदुर्गे।
सम्भोगसम्विद्विषमोऽतिमानी दत्तानुतापी कृपणो बलीयान्। वर्गप्रशंसी वनितासु द्वेष्टा एते परे सप्त नृशंसवर्गाः।
धर्म्मश्च सत्यञ्च दमस्तपश्च अमात्सर्य्यं ह्रीस्तितिक्षाऽनसूया। यज्ञश्च दानञ्च धृतिः श्रुतञ्च व्रतानि वै द्वादश ब्राह्मणस्य। १६४०
यस्त्वेतेभ्यः प्रभवेत् द्वादशभ्यः सर्व्वामपीमां पृथिवीं स शिष्यात्। त्रिभिर्द्वाभ्यामेकतो वाऽर्थितो यस्तस्य स्वमस्तीति स वेदितव्यः।
दमस्त्यागो ऽप्रमादश्च एतेष्वमृतमाहितं। तानि सत्यमुखान्याहुर्ब्राह्मणा ये मनीषिणः।
दमो ह्यष्टादशगुणः प्रतिकूलं कृताकृते। अनृतं चाभ्यसूया च कामार्थौ च तथा स्पृहा।
क्रोधः शोकस्तथा तृष्णा लोभः पैशुन्यमेव च। मत्सरश्च विहिंसा च परितापस्तथाऽरतिः।
अपस्मारश्चातिवादस्तथा सम्भावनात्मनि। एतैर्व्विमुक्तो दोषैर्यः स दान्तः सद्भिरुच्यते। १६४५
मदोऽष्टादशदोषः स्यात्त्यागो भवति षड्विधः। विपर्य्ययाः स्मृता एते मददोषा उदाहृताः।
श्रेयांस्तु षड्विधस्त्यागस्तृतीयो दुष्करो भवेत्। तेन दुःखं तरत्येव भिन्नं तस्मिन् जितं कृते।
श्रेयांस्तु षड्विधस्त्यागः श्रियं प्राप्य न हृष्यति। इष्टापूर्त्ते द्वितीयं स्यान्नित्यं वैराग्ययोगतः।
कामत्यागश्च राजेन्द्र स तृतीय इति स्मृतः। अप्यवाच्यं वदन्त्येनं स तृतीयो गुणः स्मृतः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust-Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

त्यक्तैर्द्रव्यैर्यद्भवति नोपयुक्तैश्च कामतः। नच कर्म्मस्वसिद्धेषु दुःखं तेन च न ग्लपेत्। १६५०
सर्व्वैरेवगुणैर्युक्तो द्रव्यवानपि यो भवेत्। अप्रिये च समुत्पन्ने व्यथां जातु न गच्छति।
इष्टान् पुत्त्रांश्च दारांश्च न याचेत कदाचन। अर्हते याचमानाय प्रदेयं तच्छुभं भवेत्।
अप्रमादी भवेदेतैः स चाप्यष्टगुणो भवेत्। सत्यं ध्यानं समाधानं चोद्यं वैराग्यमेव च।
अस्तेयं ब्रह्मचर्य्यञ्च तथाऽसंग्रह एव च। एवं दोषा मदस्योक्तास्तान्दोषान्परिवर्जयेत्।
तथा त्यागोऽप्रमादश्च सचाप्यष्टगुणो मतः। अष्टौ दोषाः प्रमादस्य तान्दोषान्परिवर्जयेत्। १६५५
इन्द्रियेभ्यश्च पञ्चभ्यो मनसश्चैव भारत। अतीतानागतेभ्यश्च मुक्त्युपेतः सुखी भवेत्।
सत्यात्मा भव राजेन्द्र सत्ये लोकाः प्रतिष्ठिताः। तांस्तु सत्यमुखानाहुः सत्ये ह्यमृतमाहितं।
निवृत्तेनैव दोषेण तपोव्रतमिहाचरेत्। एतद्धात्रकृतं वृत्तं सत्यमेव सतां व्रतं।
दोषैरेतैर्व्वियुक्तस्तु गुणैरेतैः समन्वितः। एतत्समृद्धमत्यर्थं तपो भवति केवलं।
यन्मां पृच्छसि राजेन्द्र सङ्क्षेपात्प्रब्रवीमि ते। एतत्पापहरं पुण्यं जन्ममृत्युजरापहं। १६६०
॥ धृतराष्ट्र उवाच॥ आख्यानपञ्चमैर्व्वेदैर्भूयिष्ठं कथ्यते जनः। तथा चान्ये चतुर्वेदास्त्रिवेदाश्च तथा परे।
द्विवेदाश्चैकवेदाश्चाप्यनृचश्च तथा परे। तेषान्तु कतरः स स्याद्यमहं वेद वै द्विजं।
॥ सनत्सुजात उवाच ॥ एकस्य वेदस्याज्ञानाद्वेदास्ते बहवः कृताः। सत्यस्यैकस्य राजेन्द्र सत्ये कश्चिदवस्थितः।
एवं वेदमविज्ञाय प्राज्ञोऽहमिति मन्यते। दानमध्ययनं यज्ञो लोभादेतत् प्रवर्त्तते।
सत्यात्प्रच्यवमानानां सङ्कल्पश्च तथा भवेत्। ततो यज्ञः प्रतायेत सत्यस्यैवावधारणात्। १६६५
मनसाऽन्यस्य भवति वाचाऽन्यस्याथ कर्म्मणा। सङ्कल्पसिद्धः पुरुषः सङ्कल्पानधितिष्ठति।
अनैभृत्येन वै तस्य दीक्षितव्रतमाचरेत्। नामैतद्धातुनिर्वृत्तं सत्यमेव सतां परं।
ज्ञानं वै नाम प्रत्यक्षं परोक्षं जायते तपः। विद्याद्बहुपठन्तन्तु द्विजं वै बहुपाठिनं।
तस्मात्क्षत्त्रिय मामंस्था जल्पितेनैव वै द्विजं। य एव सत्यान्नापैति स ज्ञेयो ब्राह्मणस्त्वया।
छन्दांसि नाम क्षत्त्रिय तान्यथर्व्वा पुरा जगौ महर्षिसङ्घ एषः। छन्दोविदस्ते य उतानधीतवेदा न वेदवेद्यस्य विदुर्हि तत्त्वं। १६७०
छन्दांसि नाम द्विपदां वरिष्ठ स्वच्छन्दयोगेन भवन्ति तत्र। छन्दोविदस्तेन च तानधीत्य गता न वेदस्य नवेद्यमार्य्याः।
न वेदानां वेदिता कश्चिदस्ति कश्चित्त्वेतान् बुध्यते वापि राजन्। यो वेद वेदान्न स वेद वेद्यं सत्ये स्थितो यस्तु स वेद वेद्यं।
न वेदानां वेदिता कश्चिदस्ति वेद्ये न वेदं न विदुर्न वेद्यं। यो वेद वेदं सच वेद वेद्यं यो वेद वेद्यं न स वेद सत्यं।
यो वेद वेदान्सच वेद वेद्यं न तं विदुर्व्वेदविदो न वेदाः। तथाऽपि वेदेन विदन्ति वेदं ये ब्राह्मणा वेदविदो भवन्ति।
धामांशभागस्य तथाहि वेदा यथा च शाखा हि महीरुहस्य। संवेदने चैव यथामनन्ति तस्मिन्हि सत्ये परमात्मनोऽर्थे। १६७५
अभिजानामि ब्राह्मणं व्याख्यातारं विचक्षणं। यश्छिन्नविचिकित्सः स व्याचष्टे सर्व्वसंशयान्।
नास्य पर्य्येषणं गच्छेत्प्राचीनं नोत दक्षिणं। नार्व्वाचीनं कुतस्तिर्य्यङ्नादिशन्तु कथञ्चन।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तस्य पर्य्येषणं गच्छेत् प्रत्यर्थिषु कथञ्चन । अविचिन्वन्निमं वेदे तपः पश्यति तं प्रभुं ।
तूष्णीम्भूत उपासीत न चेष्टेन्मनसा पि च । अभ्यावर्त्तस्व तद्ब्रह्म अन्तरात्मनि विश्रुतं ।
मौनान्न स मुनिर्भवति नारण्यवसनान्मुनिः । स्वलक्षणन्तु यो वेद स मुनिः श्रेष्ठ उच्यते । १९८०
सर्व्वार्थानां व्याकरणाद्वैयाकरण उच्यते । तन्मूलतो व्याकरणं व्याकरोतीति तत्तथा ।
प्रत्यक्षदर्शी लोकानां सर्व्वदर्शी भवेन्नरः । सत्ये वै ब्राह्मणस्तिष्ठन् तद्विद्वान्सर्व्वविद्भवेत् ।
धर्म्मादिषु स्थितोऽप्येवं क्षत्रिय ब्रह्म पश्यति । वेदेषु चानुपूर्व्व्येण एतद्बुद्ध्या ब्रवीमि ते ।
इति श्रीमहाभारते उद्योगपर्व्वणि सनत्सुजातपर्व्वणि सनत्सुजातवाक्ये द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

॥ धृतराष्ट्र उवाच ॥ सनत्सुजात यामिमां परां त्वं ब्राह्मीं वाचं वदसे विश्वरूपां । परां हि कामेन सुदुर्लभां कथां तद्ब्रूहि मे वाक्यमेतत्कुमार ।

॥ सनत्सुजात उवाच ॥ नैतद्ब्रह्म त्वरमाणेन लभ्यं यन्मां पृच्छन्नतिहृष्यस्यतीव । बुद्धौ विलीने मनसि प्रचिन्त्या विद्या हि सा ब्रह्मचर्य्येण लभ्या । १९८५

॥ धृतराष्ट्र उवाच ॥ अत्यन्तविद्यामिति यत्सनातनीं ब्रवीषि त्वं ब्रह्मचर्य्येण सिद्धां । अनारभ्यां वसतीह कार्य्यकाले कथं ब्राह्मण्यममृतत्वं लभेत ।

॥ सनत्सुजात उवाच ॥ अव्यक्तविद्यामभिधास्ये पुराणीं बुद्ध्या च तेषां ब्रह्मचर्य्येण सिद्धां । यां प्राप्यैनं मर्त्यलोकं त्यजन्ति या वै विद्या गुरुवृद्धेषु नित्या ।

॥ धृतराष्ट्र उवाच ॥ ब्रह्मचर्य्येण या विद्या शक्या वेदितुमञ्जसा । तत्कथं ब्रह्मचर्य्यं स्यादेतद्ब्रह्मन्ब्रवीहि मे ।

॥ सनत्सुजात उवाच ॥ आचार्य्ययोनिमिह ये प्रविश्य भूत्वा गर्भं ब्रह्मचर्य्यं चरन्ति । इहैव ते शास्त्रकारा भवन्ति प्रहाय देहं परमं यान्ति योगं ॥

अस्मिँल्लोके वै जयन्तीह कामान्ब्राह्मीं स्थितिं ह्यनुतितिक्षमाणाः । त आत्मानं निर्हरन्तीह देहान्मुञ्जादिषीकामिव सत्त्वसंस्थाः । १९९०
शरीरमेतौ कुरुतः पिता माता च भारत । आचार्य्यशास्ता या जातिः सा पुण्या साऽजराऽमरा ।
यः प्रावृणोत्यवितथेन वर्णानृतं कुर्व्वन्नमृतं संप्रयच्छन् । तं मन्येत पितरं मातरञ्च तस्मै न द्रुह्येत्कृतमस्य जानन् ।
गुरुं शिष्यो नित्यमभिवादयीत स्वाध्यायमिच्छेच्छुचिरप्रमत्तः । मानं न कुर्य्यान्नादधीत रोषमेष प्रथमो ब्रह्मचर्य्यस्य पादः ।
शिष्यवृत्तिक्रमेणैव विद्यामाप्नोति यः शुचिः । ब्रह्मचर्य्यव्रतस्यास्य प्रथमः पाद उच्यते ।
आचार्य्यस्य प्रियं कुर्य्यात्प्राणैरपि धनैरपि । कर्म्मणा मनसा वाचा द्वितीयः पाद उच्यते । १९९५
समा गुरौ यथा वृत्तिर्गुरुपत्न्यां तथाचरेत् । तत्पुत्रे च तथा कुर्व्वन्द्वितीयः पाद उच्यते ।
आचार्य्येणात्मकृतं विजानन् ज्ञात्वा चार्थं भावितोऽस्मीत्यनेन । यन्मन्येत तं प्रति हृष्टबुद्धिः स वै तृतीयो ब्रह्मचर्य्यस्य पादः ।
नाचार्य्यस्यानपाकृत्य प्रवासं प्राज्ञः कुर्व्वीत नैतदहं करोमि । इतीव मन्येत न भाषयेत स वै चतुर्थो ब्रह्मचर्य्यस्य पादः ।
कालेन पादं लभते तथाऽर्थं ततश्च पादं गुरुयोगतश्च । उत्साहयोगेन च पादमृच्छेत् शास्त्रेण पादञ्च ततोऽभियाति ।
धर्म्मादयो द्वादश यस्य रूपमन्यानि चाङ्गानि तथा बलञ्च । आचार्य्ययोगे फलतीति चाहुर्ब्रह्मार्थयोगेन च ब्रह्मचर्य्यं । १०००

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

एवं प्रवृत्तो यदुपालभेत वै धनमाचार्य्याय तदनुप्रयच्छेत् । स तां वृत्तिं बहुगुणामेवमेति गुरोः पुत्रे भवति च वृत्तिरेषा ।
एवं वसन्सर्व्वतो वर्द्धतीह बहून् पुत्राल्लभते च प्रतिष्ठां । वर्षन्ति चास्मै प्रदिशो दिशश्च वसन्त्यस्मिन् ब्रह्मचर्य्ये जनाश्च ।

एतेन ब्रह्मचर्य्येण देवा देवत्वमाप्नुवन् । ऋषयश्च महाभागा ब्रह्मलोकं मनीषिणः ।

गन्धर्व्वाणामनेनैव रूपमप्सरसामभूत् । एतेन ब्रह्मचर्य्येण सूर्य्योऽप्यह्नाय जायते ।

आकाङ्क्षार्थस्य संयोगाद्रसभेदार्थिनामिव । एवं ह्येतत्समाज्ञाय तादृग्भावं गता इमे । १००५

य आश्रयेत्पावयेच्चापि राजन्सर्व्वं शरीरं तपसा तप्यमानः । एतेन वै बाल्यमभ्येति विद्वान् मृत्युन्तथा स जयत्यन्तकाले ।
अन्तवतः चत्रिय ते जयन्ति लोकान्जनाः कर्म्मणा निर्म्मलेन । ब्रह्मैव विद्वांस्तेन चाभ्येति सर्व्वं नान्यः पन्था अयनाय विद्यते ।
॥ धृतराष्ट्र उवाच ॥ आभाति शुक्लमिव लोहितमिवाथो कृष्णमथाञ्जनं काद्रवं वा । सद्ब्रह्मणः पश्यति योऽत्र विद्वान्कथं

रूपं तदमृतमचरं पदं ।

॥सनत्सुजात उवाच ॥ आभाति शुक्लमिव लोहितमिवाथो कृष्णमायसमर्कवर्णं । न पृथिव्यां तिष्ठति नान्तरिचे नैतत् समुद्रे

सलिलं बिभर्त्ति ।

न तारकासु नच विद्युदाश्रितं नचाभ्रेषु दृश्यते रूपमस्य । नचापि वायौ नच देवतासु नैतच्चन्द्रे दृश्यते नोत सूर्य्ये । १०१०
नवर्चु तन्नयजुःषु नाप्यथर्व्वसु न दृश्यते वै विमलेषु सामसु । रथन्तरे वार्हद्रथे वाऽपि राजन्महाव्रतेनैव दृश्येद्ध्रुवं तत् ।
अपारणीयं तमसः परस्तात्तदन्तकोऽप्येति विनाशकाले । अणीयोरूपं चुरधारयासमं महच्च रूपं तद्वै पर्व्वतेभ्यः ।
सा प्रतिष्ठा तदमृतं लोकास्तद्ब्रह्म तद्यशः । भूतानि जज्ञिरे तस्मात्प्रलयं यान्ति तत्र हि ।
अनामयं तन्महदुद्यतं यशो वाचो विकारं कवयो वदन्ति । यस्मिन् जगत्सर्व्वमिदं प्रतिष्ठितं ये तद्विदुरमृतास्ते भवन्ति ।

इति श्रीमहाभारते उद्योगपर्व्वणि सनत्सुजातपर्व्वणि सनत्सुजातवाक्ये त्रिचत्वारिंशोऽध्यायः ॥ ४२ ॥

॥ सनत्सुजात उवाच ॥ शोकः क्रोधश्च लोभश्च कामो मानः परासुता । ईर्ष्या मोहो विधित्सा च कृपाऽसूया जुगुप्सता ।१०१५

द्वादशैते महादोषा मनुष्यप्राणनाशनाः ।

एकैकमेते राजेन्द्र मनुष्यान्पर्य्युपासते । यैराविष्टो नरः पापं मूढसंज्ञो व्यवस्यति ।

स्पृहयालुरुग्रः परुषो वदान्यः क्रोधं बिभ्रन्मनसा वै विकत्थी । नृशंसधर्म्माः षडिमे जना वै प्राप्याप्यर्थं नोत सभाजयन्ते ।
सम्भोगसम्विद्विषमोऽतिमानी दत्त्वा विकत्थी कृपणो दुर्व्वलश्च । बहुप्रशंसी वनिताद्विट् सदैव सप्तैवोक्ताः पापशीलानृशंसाः ।
धर्म्मश्च सत्यञ्च तपो दमश्च अमात्सर्य्यं ह्रीस्तितिचाऽनसूया । दानं श्रुतञ्चैव धृतिः चमा च महाव्रता द्वादश ब्राह्मणस्य ।१०२०
यो नैतेभ्यः प्रच्यवेद्द्वादशभ्यः सर्व्वामपीमां पृथिवीं स शिष्यात् । त्रिभिर्द्वाभ्यामेकतो वार्थितो यो नास्य स्वमस्तीति च वेदितव्यं ।

दमस्त्यागोऽथाप्रमाद इत्येतेष्वमृतं स्थितं । एतानि ब्रह्ममुख्यानां ब्राह्मणानां मनीषिणां ।

सद्वाऽसद्वा परीवादो ब्राह्मणस्य न शस्यते । नरकप्रतिष्ठास्ते स्युर्य एवं कुर्व्वते जनाः ।

मदोऽष्टादशदोषः स स्यात्पुरा योऽप्रकीर्त्तितः । लोकद्वेष्यं प्रातिकुल्यमभ्यसूया मृषावचः ।

कामक्रोधौ पारतन्त्र्यं परिवादोऽथ पैशुनं । अर्थहानिर्व्विवादश्च मात्सर्य्यं प्राणिपीडनं । १०२५

ईर्ष्या मोदो ऽतिवादश्च संज्ञानाशोऽभ्यसूयिता । तस्मात्प्राज्ञो न माद्येत सदा ह्येतद्विगर्हितं ।

सौहृदे वै षड्गुणा वेदितव्याः प्रिये हृष्यन्त्यप्रिये च व्यथन्ते । स्यादात्मनः सुहितं याचते यो ददात्ययाच्यमपि देयं खलु स्यात् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

दृष्टान्पुत्रान्विभवान् स्वांश्च दारानभ्यर्थितस्यार्हति शुद्धभावः। त्यक्तद्रव्यः संवृतेनेह कामात् भुङ्क्ते कर्म स्वाशिषस्वाधते च।
द्रव्यवान् गुणवानेवं त्यागी भवति सात्त्विकः। पञ्चभूतानि पञ्चभ्यो निवर्त्तयति तादृशः।
एतत्समृद्धमप्यूर्द्धं तपो भवति केवलं। सत्त्वात्प्रच्यवमानानां सङ्कल्पेन समाहितम्। १०३०
यतो यज्ञाः प्रवर्द्धन्ते सत्यस्यैवावरोधनात्। मनसाऽन्यस्य भवति वाचाऽन्यस्याथ कर्म्मणा।
सङ्कल्पसिद्धं पुरुषमसङ्कल्पोऽधितिष्ठति। ब्राह्मणस्य विशेषेण किञ्चान्यदपि मे शृणु।
अध्यापयेन्महदेतद्यशस्यं वाचो विकारान् कवयो वदन्ति। अस्मिन् योगे सर्व्वमिदं प्रतिष्ठितं ये तद्विदुरमृतास्ते भवन्ति।
न कर्म्मणा सुकृतेनैव राजन्सत्यञ्जयेज्जुहुयाद्वा यजेद्वा। नैतेन बालोऽमृत्युमभ्येति राजन् रतिञ्चासौ न लभत्यन्तकाले।
तूष्णीमेक उपासीत चेष्टेत मनसाऽपि न। तथा संस्तुतिनिन्दाभ्यां प्रीतिरोषौ विवर्जयेत्। १०३५
अत्रैव तिष्ठन् क्षत्रिय ब्रह्माविशति पश्यति। वेदेषु चानुपूर्व्येण एतद्विद्वन्ब्रवीमि ते।
इतिश्री महाभारते उद्योगपर्व्वणि सनत्सुजातपर्व्वणि सनत्सुजातवाक्ये चतुश्चत्वारिंशोऽध्यायः॥ ४४ ॥
॥ सनत्सुजात उवाच॥ यत्तच्छुक्रं महज्ज्योतिर्दीप्यमानं महद्यशः। तद्वै देवा उपासते तस्मात्सूर्य्यो विराजते।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनं।
शुक्राद्ब्रह्म प्रभवति ब्रह्म शुक्रेण वर्द्धते। तच्छुक्रं ज्योतिषां मध्येऽतप्तं तपति तापनं।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनं। १०४०
आपोऽथ अद्भ्यः सलिलस्य मध्ये उभौ देवौ शिश्रियातेऽन्तरिक्षे। अतन्द्रितः सवितुर्व्विवस्वानुभौ बिभर्त्ति पृथिवीं दिवञ्च।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनं।
उभौच देवौ पृथिवीं दिवं च दिशः शुक्रो भुवनं बिभर्त्ति। तस्माद्दिशः सरितश्च स्रवन्ति तस्मात्समुद्रा विहिता महान्तः।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनं।
चक्रे रथस्य तिष्ठन्तोऽध्रुवस्याव्ययकर्म्मणः। केतुमन्तं वहन्त्यश्वास्तं दिव्यमजरं दिवि। १०४५
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनं।
न सादृश्ये तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चिदेनं। मनीषयाऽथोमनसा हृदा च य एनं विदुरमृतास्ते भवन्ति।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनं।
द्वादशपूगां सरितं पिबन्तो देवरक्षितां। मध्वीक्षन्तश्च ते तस्याः सञ्चरन्तीह घोरां।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनं। १०५०
तदर्द्धमासं पिबति सञ्चित्य भ्रमरो मधु। ईशानः सर्व्वभूतेषु हविर्भूतमकल्पयत्।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनं।
हिरण्यपर्णमश्वत्थमभिपत्य ह्यपक्षकाः। तत्र ते पक्षिणो भूत्वा प्रपतन्ति यथादिशं।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनं।
पूर्णात्पूर्णान्युद्धरन्ति पूर्णात्पूर्णानि चक्रिरे। हरन्ति पूर्णात्पूर्णानि पूर्णमेवावशिष्यते। १०५५
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तस्माद्वै वायुरायातस्तस्मिंश्च प्रयतः सदा । तस्मादग्निश्च सोमश्च तस्मिंश्च प्राण आततः ।
सर्व्वमेव ततो विद्यात्तत्तद्वक्तुं न शक्नुमः ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनं । १०६०
अपानं गिरति प्राणः प्राणं गिरति चन्द्रमाः । आदित्यो गिरते चन्द्रमादित्यं गिरते परः ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनं ।
एकं पादं नोत्क्षिपति सलिलाद्धंस उच्चरन् । तञ्चेत्सततमूर्द्धाय न मृत्युर्नामृतं भवेत् ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनं ।
अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा लिङ्गस्य योगेन स याति नित्यं । तमीशमीड्यमनुकल्पमाद्यं पश्यन्ति मूढा न विराजमानं । १०६५
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनं ।
असाधना वाऽपि ससाधना वा समानमेतद्दृश्यते मानुषेषु । समानमेतदमृतस्येतरस्य मुक्तास्तत्र मध्व उत्सं समापुः ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनं ।
उभौ लोकौ विद्यया व्याप्य याति तदा हुतं चाहुतमग्निहोत्रं । मा ते ब्राह्मी लघुतामादधीत प्रज्ञानं स्यान्नाम धीरा लभन्ते ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनं ।
एवंरूपो महात्मा स पावकं पुरुषो गिरन् । यो वै तं पुरुषं वेद तस्येहार्थो न रिष्यते । १०७०
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनं ।
यः सहस्रं सहस्राणां पक्षान् सन्तत्य सम्पतेत् । मध्यमे मध्य आगच्छेदपि चेत्स्यान्मनोजवः ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनं ।
न दर्शने तिष्ठति रूपमस्य पश्यन्ति चैनं सुविशुद्धसत्त्वाः । हितो मनीषी मनसा न तप्यते ये प्रव्रजेयुरमृतास्ते भवन्ति । १०७५
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनं ।
गूहन्ति सर्पा इव गह्वराणि स्वशिक्षया स्वेन वृत्तेन मर्त्याः । तेषु प्रमुह्यन्ति जना विमूढा यथाऽध्वानं मोहयन्ते भयाय ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनं ।
नाहं सदाऽसत्कृतः स्यां न मृत्युर्नचामृत्युरमृतं मे कुतः स्यात् । सत्यानृते सत्यसमानबन्धे सतश्च योनिरसतश्चैक एव ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनं ।
न साधुना नोत असाधुना वा समानमेतद्दृश्यते मानुषेषु । समानमेतदमृतस्य विद्यादेवं युक्तो मधु तद्वै परीप्सेत् । १०८०
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनं ।
नास्यातिवादा हृदयं तापयन्ति नानधीतं नाहुतमग्निहोत्रं । मनो ब्राह्मी लघुतामादधीत प्रज्ञाञ्चास्मै नाम धीरा लभन्ते ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनं ।
एवं यः सर्व्व भूतेषु आत्मानमनुपश्यति । अन्यत्रान्यत्र युक्तेषु किं स शोचेत्ततः परं ।
यथोदपाने महति सर्व्वतः सम्प्लुतोदके । एवं सर्व्वेषु वेदेषु आत्मानमनुजानतः । १०८५
अङ्गुष्ठमात्रः पुरुषो महात्मा न दृश्यतेऽसौ हृदि सन्निविष्टः । अजश्चरो दिवारात्रमतन्द्रितश्च स तं मत्वा कविरास्ते प्रसन्नः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अहमेव स्मृतो माता पिता पुत्रोऽस्म्यहं पुनः । आत्माऽहमपि सर्व्वस्य यच्च नास्ति यदस्तिच ।
पितामहोऽस्मि स्थविरः पिता पुत्रश्च भारत । ममैव यूयमात्मस्था न मे यूयं न वो ह्यहं ।
आत्मैव स्थानं मम जन्म चात्मा ओतप्रोतो ऽहमजरःप्रतिष्ठः । अजश्चाहो रात्रमतन्द्रितोऽहं मां विज्ञाय कविरास्ते प्रसन्नः ।
अणोरणीयान् सुमनाः सर्व्वभूतेषु जायति । पितरं सर्व्वभूतेषु पुष्करे निहितं विदुः । १७९०
इति श्रीमहाभारते उद्योगपर्व्वणि सनत्सुजातपर्व्वणि सनत्सुजातवाक्ये पञ्चचत्वारिंशोऽध्यायः॥४५॥ समाप्तञ्च सनत्सुजातपर्व्व ।

॥ अथयानसन्धिपर्व्व ॥

॥ वैशम्पायन उवाच ॥ एवं सनत्सुजातेन विदुरेण च धीमता । सार्द्धं कथयतो राज्ञः सा व्यतीयाय शर्व्वरी ।
तस्यां रजन्यां व्युष्टायां राजानः सर्व्व एव ते । सभामाविविशुर्हृष्टाः सूतस्योपदिदृक्षया ।
शुश्रूषमाणाः पार्थानां वाचो धर्म्मार्थसंहिताः । धृतराष्ट्रमुखाः सर्व्वे ययूराजसभां शुभां ।
सुधावदातां विस्तीर्णां कनकाजिरभूषणां । चन्द्रप्रभां सुरुचिरां सिक्तां चन्दनवारिणा ।
रुचिरैरासनैस्तीर्णां काञ्चनैर्दारवैरपि । अश्मसारमयैर्दान्तैः स्वास्तीर्णैः सोत्तरच्छदैः । १७९५
भीष्मो द्रोणः कृपः शल्यः कृतवर्म्मा जयद्रथः । अश्वत्थामा विकर्णश्च सोमदत्तश्च वाह्लिकः ।
विदुरश्च महाप्राज्ञो युयुत्सुश्च महारथः । सर्व्वे च सहिताः शूराः पार्थिवा भरतर्षभ ।
धृतराष्ट्रं पुरस्कृत्य विविशुस्तां सभां शुभां । दुःशासनश्चित्रसेनः शकुनिश्चापि सौवलः ।
दुर्म्मुखो दुःसहः कर्ण उलूकोऽथ विविंशतिः । कुरुराजं पुरस्कृत्य दुर्योधनममर्षणं ।
विविशुस्तां सभां राजन् सुराः शक्रसदो यथा । आविशद्भिस्तदा राजन् शूरैः परिघवाहुभिः । १८००
शुशुभे सा सभा राजन् सिंहैरिव गिरेर्गुहा । ते प्रविश्य महेष्वासाः सभां सर्व्वे महौजसः ।
आसनानि विचित्राणि भेजिरे सूर्य्यवर्च्चसः । आसनस्थेषु सर्व्वेषु तेषु राजसु भारत ।
द्वाःस्थो निवेदयामास सूतपुत्त्रमुपस्थितं । अयं स रथ आयाति योऽयासीत्पाण्डवान्प्रति ।
दूतो नस्तूर्णमायातः सैन्धवैः साधुवाहिभिः । उपेयाय तु स क्षिप्रं रथात्प्रस्कन्द्य कुण्डली ।
प्रविवेश सभां पूर्णां महीपालैर्म्महात्मभिः । १८०५
॥ सञ्जय उवाच ॥ प्राप्तोऽस्मि पाण्डवान् गत्वा तं विजानीत कौरवाः । यथावयः कुरून्सर्व्वान् प्रतिनन्दन्ति पाण्डवाः ।
अभिवादयन्ति वृद्धांश्च वयस्यांश्च वयस्यवत् । यूनश्चाभ्यवदन् पार्थाः प्रतिपूज्य यथावयः ।
यथाऽहं धृतराष्ट्रेण शिष्टः पूर्व्वमितो गतः । अब्रुवं पाण्डवान् गत्वा तन्निबोधत पार्थिवाः ।
इति श्रीमहाभारते उद्योगपर्व्वणि यानसन्धिपर्व्वणि सञ्जयप्रत्यागमने षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥
॥ धृतराष्ट्र उवाच ॥ पृच्छामि त्वां सञ्जय राजमध्ये किमब्रवीद्वाक्यमदीनसत्त्वः । धनञ्जयस्तात युधां प्रणेता दुरात्मनां जीवितच्छिन्महात्मा ।
॥ सञ्जय उवाच ॥ दुर्य्योधनो वाचमिमां शृणोतु यदब्रवीदर्ज्जुनो योत्स्यमानः । युधिष्ठिरस्यानुमते महात्मा धनञ्जयः शृण्वतः केशवस्य । १८१०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अन्वत्रस्तो बाहुवीर्य्यं विदान उपह्वरे वासुदेवस्य वीरः । अवोचन्मां योत्स्यमानः किरीटी मध्ये ब्रूया धार्त्तराष्ट्रं कुरूणां।
संशृण्वतस्तस्य दुर्भाषिणो वै दुरात्मनः सूतपुत्रस्य सूत । यो योद्धुमाशंसति मां सदैव मन्दप्रज्ञः कालपक्वोऽतिमूढः।
ये वै राजानः पाण्डवायोधनाय समानीताः शृण्वतां चापि तेषां । यथा समग्रं वचनं मयोक्तं सहामात्यं श्रावयेथा नृपं तत्।
यथा नूनं देवराजस्य देवाः शुश्रूषन्ते वज्रहस्तस्य सर्व्वे। तथाऽशृण्वन् पाण्डवाः सृञ्जयाश्च किरीटिना वाचमुक्तां समर्थां।
इत्यब्रवीदर्ज्जुनो योत्स्यमानो गाण्डीवधन्वा लोहितपद्मनेत्रः। न चेद्राज्यं मुञ्चति धार्त्तराष्ट्रो युधिष्ठिरस्याजमीढस्य
राज्ञः । १८१५
अस्ति नूनं कर्म्म कृतं पुरस्तादनिर्विष्टं पापकं धार्त्तराष्ट्रैः । येषां युद्धं भीमसेनार्ज्जुनाभ्यां तथाऽश्विभ्यां वासुदेवेन चैव।
शैनेयेन ध्रुवमात्तायुधेन धृष्टद्युम्नेनाऽथ शिखण्डिना च। युधिष्ठिरेणेन्द्रकल्पेन चैव योऽपध्यानान्निर्दहेद्गां दिवञ्च।
तैश्चेद्योद्धुं मन्यते धार्त्तराष्ट्रो निर्वृत्तोऽर्थः सकलः पाण्डवानां। मा तत्कार्षीः पाण्डवस्यार्थहेतोरुपैहि युद्धं यदि मन्यसे त्वं।
यां तां वने दुःखशय्यामवात्सीत्प्रव्राजितः पाण्डवो धर्म्मचारी। आप्नोतु तां दुःखतरामनर्थामन्त्यां शय्यां धार्त्तराष्ट्रः परासुः।
ह्रिया ज्ञानेन तपसा दमेन शौर्य्येणाथो धर्म्मगुप्त्या बलेन। अन्यायवृत्तिः कुरु पाण्डवे यानध्यातिष्ठद्धार्त्तराष्ट्रो दुरात्मा। १८२०
मायोपधः प्रणिपातार्ज्जवाभ्यां तपोदमाभ्यां धर्म्मगुप्त्या बलेन। सत्यं ब्रुवन्प्रतिपन्नो नृपो नस्तितिक्षमाणः क्लिश्यमानोऽतिवेलं।
यदा ज्येष्ठः पाण्डवः संशितात्मा क्रोधं यत्तं वर्षपूगान्सुघोरं। अवस्रष्टा कुरुषूद्वृत्तचेतास्तदा युद्धं धार्त्तराष्ट्रोऽन्वतप्स्यत्।
कृष्णवर्त्मेव ज्वलितः समिद्धो यथा दहेत्कक्षमग्निर्निदाघे। एवं दग्धा धार्त्तराष्ट्रस्य सेनां युधिष्ठिरः क्रोधदीप्तोऽन्ववेक्ष्य।
यदा द्रष्टा भीमसेनं रथस्थं गदाहस्तं क्रोधविषं वमन्तं। अमर्षणं पाण्डवं भीमवेगं तदा युद्धं धार्त्तराष्ट्रोऽन्वतप्स्यत्।
सेनाऽग्रगं दंशितं भीमसेनं स्वालक्षणं वीरहणं परेषां। घ्नन्तञ्चमूमन्तकसन्निवेशं तदा स्मर्त्ता वचनस्याभिमानी। १८२५
यदा द्रष्टा भीमसेनेन नागान् निपातितान् गिरिकूटप्रकाशान्। कुम्भैरिवासृग्वमतो भिन्नकुम्भांस्तदा युद्धं धार्त्तराष्ट्रोऽन्वत
प्स्यत्।
महासिंहो गाव इव प्रविश्य गदापाणिर्धार्त्तराष्ट्रानुपेत्य। यदा भीमो भीमरूपो निहन्ता तदा युद्धं धार्त्तराष्ट्रोऽन्व
तप्स्यत्।
महाभये वीतभयः कृतास्त्रः समागमे शत्रुबलावमर्द्दी। सकृद्रथेनाप्रतिमान्रथौघान् पदातिसङ्घान् गदयाऽभिनिघ्नन्।
शैक्येन नागांस्तरसा विगृह्णन् यदा चेत्ता धार्त्तराष्ट्रस्य सैन्यं। छिन्दन्वनं परशुनेव शूरस्तदा युद्धं धार्त्तराष्ट्रोऽन्वतप्स्यत्।
तृणप्रायं ज्वलनेनेव दग्धं ग्रामं यथा धार्त्तराष्ट्रान्समीक्ष्य। पक्वं सस्यं वैद्युतेनेव दग्धं परासिक्तं विपुलं स्वम्बलौघं। १८३०
हतप्रवीरं विमुखं भयार्त्तं पराङ्मुखं प्रायशो धृष्टयोधं। शस्त्रार्च्चिषा भीमसेनेन दग्धं तदा युद्धं धार्त्तराष्ट्रोऽन्वतप्स्यत्।
उपासङ्गेनाचरन् दक्षिणेन परं शतान्नकुलश्चित्रयोधी। यदा रथाग्र्यो रथिनः प्रचेता तदा युद्धं धार्त्तराष्ट्रोऽन्वतप्स्यत्।
सुखोचितो दुःखशय्यां वनेषु दीर्घकालं नकुलो यामशेत। आशीविषः क्रुद्ध इवोद्वमन् विषं तदा युद्धं धार्त्तराष्ट्रोऽन्वतप्स्यत्।
त्यक्तात्मानः पार्थिवायोधनाय समादिष्टा धर्म्मराजेन सूत। रथैः शुभ्रैः सैन्यमभिद्रवन्तो दृष्ट्वा पश्चात्तप्स्यते धार्त्तराष्ट्रः।
शिशून् कृतास्त्रानशिशुप्रकाशान् यदा द्रष्टा कौरवः पञ्च शूरान्। त्यक्त्वा प्राणान् कौरवानाद्रवन्तस्तदा युद्धं धार्त्तराष्ट्रो
ऽन्वतप्स्यत्। १८३५
यदा गतोद्वाहमकूजनाक्षं सुवर्णतारं रथमाततायी। दान्तैर्युक्तं सहदेवोऽधिरूढः शिरांसि राज्ञां चेष्यते मार्गणौघैः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding: KS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

महाभये सम्प्रवृत्ते रथस्थं विवर्त्तमानं समरे कृतास्त्रं । सर्व्वा दिशः सम्पतन्तं समीक्ष्य तदा युद्धं धार्त्तराष्ट्रोऽन्वतप्स्यत् ।
ह्रीनिषेवो निपुणः सत्यवादी महाबलः सर्व्वधर्म्मोपपन्नः । गान्धारिमर्च्छंस्तुमुले क्षिप्रकारी क्षेप्ता जनान् सहदेवस्तरस्वी ।
यदा द्रष्टा द्रौपदेयान्महेषून् शूरान् कृतास्त्रान्रथयुद्धकोविदान् । आशीविषान् घोरविषानिवायतस्तदा युद्धं धार्त्तराष्ट्रो
ऽन्वतप्स्यत् ।
यदाऽभिमन्युः परवीरघाती शरैः परान्मेघ इवाभिवर्षन् । विगाहिता कृष्णसमः कृतास्त्रस्तदा युद्धं धार्त्तराष्ट्रोऽन्वतप्स्यत् । १८४०
यदा द्रष्टा बालमबालवीर्य्यं द्विषच्चमूं मृत्युमिवापतन्तं । सौभद्रमिन्द्रप्रतिमं कृतास्त्रं तदा युद्धं धार्त्तराष्ट्रो ऽन्वतप्स्यत् ।
प्रभद्रकाः शीघ्रतरा युवानो विशारदाः सिंहसमानवीर्य्याः । यदा क्षेप्तारो धार्त्तराष्ट्रान्ससैन्यांस्तदा युद्धं धार्त्तराष्ट्रोऽन्वतप्स्यत् ।
द्वौ विराटद्रुपदौ महारथौ पृथक् चमूभ्यामभिवर्त्तमानौ । यदा द्रष्टारौ धार्त्तराष्ट्रान् ससैन्यांस्तदा युद्धं धार्त्तराष्ट्रोऽन्व
तप्स्यत् ।
यदा कृतास्त्रो द्रुपदः प्रचिन्वन् शिरांसि यूनां समरे रथस्थः । क्रुद्धः शरैश्छेत्स्यति चापमुक्तैस्तदा युद्धं धार्त्तराष्ट्रोऽन्वत
प्स्यत् ।
यदा विराटः परवीरघाती सहोत्तरः शत्रुचमूं प्रवेष्टा । मत्स्यैः सार्द्धमनृशंसरूपैस्तदा युद्धं धार्त्तराष्ट्रोऽन्वतप्स्यत् । १८४५
ज्येष्ठं मात्स्यमनृशंसार्य्यरूपं विराटपुत्त्रं रथिनं पुरस्तात् । यदा द्रष्टा दंशितं पाण्डवार्थे तदा युद्धं धार्त्तराष्ट्रोऽन्वतप्स्यत् ।
रणे हते कौरवाणां प्रवीरे शिखण्डिना सत्तमे शान्तनूजे । न जातु नः शत्रवो धारयेयुरसंशयं सत्यमेतद्ब्रवीमि ।
यदा शिखण्डी रथिनः प्रचिन्वन् भीष्मं रथेनाभियातो वरूथी । दिव्यैर्हयैरवमृद्नन्रथौघांस्तदा युद्धं धार्त्तराष्ट्रोऽन्वत
प्स्यत् ।
यदा द्रष्टा सृञ्जयानामनीके धृष्टद्युम्नं प्रमुखे रोचमानं । अस्त्रं यस्मै गुह्यमुवाच धीमान् द्रोणस्तदा तप्स्यति धार्त्तराष्ट्रः ।
यदा स सेनापतिरप्रमेयः परामृद्नन्निषुभिर्द्धार्त्तराष्ट्रान् । द्रोणं रणे शत्रुसहोऽभियाता तदा युद्धं धार्त्तराष्ट्रोऽन्वतप्स्यत् । १८५०
धीमान्मनीषी बलवान्मनस्वी स लक्ष्मीवान् सोमकानां प्रबर्हः । न जातु तं शत्रवोऽन्ये सहेरन् येषां स स्यादग्रणीर्वृष्णिसिंहः ।
इदञ्च ब्रूया माऽवृणीष्वेति लोके युद्धे द्वितीयं सचिवं रथस्थं । शिनेर्नप्तारं प्रवृणीम सात्यकिं महाबलं वीतभयं कृतास्त्रं ।
महोरस्को दीर्घबाहुः प्रमाथी युद्धेऽद्वितीयः परमास्त्रवेदी । शिनेर्नप्ता तालमात्रायुधोऽयं महारथो वीतभयः कृतास्त्रः ।
यदा शिनीनामधिपो मयोक्तः शरैः परान्मेघ इव प्रवर्षन् । प्रच्छादयिष्यत्यरिहा योधमुख्यांस्तदा युद्धं धार्त्तराष्ट्रोऽन्व
तप्स्यत् ।
यदा धृतिं कुरुते योत्स्यमानः स दीर्घबाहुर्दृढधन्वा महात्मा । सिंहस्येव गन्धमाघ्राय गावः सञ्चेष्टन्ते शत्रवोऽस्माद्रणाग्रे । १८५५
स दीर्घबाहुर्दृढधन्वा महात्मा भिन्द्यादृगिरीन् संहरेत्सर्व्वलोकान् । अस्त्रे कृती निपुणः क्षिप्रहस्तो दिवि स्थितः सूर्य्य इवा
भिभाति ।
चित्रः सूक्ष्मः सुकृतो यादवस्य अस्त्रे योगो वृष्णिसिंहस्य भूयान् । यथाविधं योगमाहुः प्रशस्तं सर्व्वैर्गुणैः सात्यकिस्तै
रुपेतः ।
हिरण्मयं श्वेतहयैश्चतुर्भिर्यदा युक्तं स्यन्दनं माधवस्य । द्रष्टा युद्धे सात्यकेर्धार्त्तराष्ट्रस्तदा तप्स्यत्यकृतात्मा स मन्दः ।
यदा रथं हेममणिप्रकाशं श्वेताश्वयुक्तं वानरकेतुमुग्रं । द्रष्टा समास्थितं केशवेन तदा तप्स्यत्यकृतात्मा स मन्दः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यदा मौर्व्यास्तलनिष्पेषमुग्रं महाशब्दं वज्रनिष्पेषतुल्यं । विधूयमानस्य महारणे मया स गाण्डीवस्य श्रोष्यति मन्दबुद्धिः॥१८६०
तदा मूढो धृतराष्ट्रस्य पुत्त्रस्तप्ता युद्धे दुर्म्मतिर्दुःसहायः । दृष्ट्वा सैन्यं बाणवर्षान्धकारे प्रभज्यन्तं गोकुलवद्रणाग्रे ।
बलाहकादुच्चरतः सुभीमान् विद्युत्स्फुलिङ्गानिव घोररूपान् । सहस्रघ्नान् द्विषतां सङ्गरेषु अस्थिच्छिदो मर्म्मभिदः सुपु
ङ्खान् ।
यदा द्रष्टा ज्यामुखाद्बाणसङ्घान् गाण्डीवमुक्तानापततः शिताग्रान् । हयान् गजान्वर्म्मिणश्चाददानांस्तदा युद्धं धार्त्तराष्ट्रो
ऽन्वतप्स्यत् ।
यदा मन्दः परबाणान्विमुक्तान्ममेषुभिर्ह्रियमाणान् प्रतीपान् । तिर्य्यग्विध्य छिद्यमानान् क्षुरप्रैस्तदा युद्धं धार्त्तराष्ट्रो
ऽन्वतप्स्यत् ।
यदा विपाठा मद्भुजविप्रमुक्ता द्विजाः फलानीव महीरुहाग्रात् । प्रचेतार उत्तमाङ्गानि यूनां तदा युद्धं धार्त्तराष्ट्रोऽन्वत
प्स्यत् । १८६५
यदा द्रष्टा पततः स्यन्दनेभ्यो महागजेभ्योऽश्वगतान् सुयोधान् । शरैर्हतान् पातितांश्चैव रङ्गे तदा युद्धं धार्त्तराष्ट्रोऽन्वतप्स्यत् ।
असम्प्राप्तानस्त्रपथं परस्य यदा द्रष्टा नश्यतो धार्त्तराष्ट्रान् । अकुर्व्वतः कर्म्म युद्धं समन्तात्तदा युद्धं धार्त्तराष्ट्रोऽन्वतप्स्यत् ।
पदातिसङ्घान्रथसङ्घान्समन्ताद्व्यात्ताननः काल इवाततेषुः । प्रणोत्स्यामि ज्वलितैर्बाणवर्षैः शत्रूंस्तदा तप्स्यति मन्दबुद्धिः ।
सर्व्वा दिशः सम्पतता रथेन रजोध्वस्तं गाण्डीवेन प्रकृत्तं । यदा द्रष्टा स्वबलं सम्प्रमूढं तदा पश्चात्तप्स्यति मन्दबुद्धिः ।
कान्दिग्भूतं छिन्नगात्रं विसंज्ञं दुर्य्योधनो द्रक्ष्यति सर्व्वसैन्यं । हताश्ववीराग्र्यनरेन्द्रनागं पिपासितं श्रान्तपत्रं भयार्त्तं । १८७०
आर्त्तस्वरं हन्यमानं हतञ्च विकीर्णकेशास्थिकपालसङ्घं । प्रजापतेः कर्म्म यथाऽर्थनिष्ठितं तदा दृष्ट्वा तप्स्यति मन्दबुद्धिः ।
यदा रथे गाण्डिवं वासुदेवं दिव्यं शङ्खं पाञ्चजन्यं हयांश्च । तूणावक्षय्यौ देवदत्तञ्च माञ्च दृष्ट्वा युद्धे धार्त्तराष्ट्रोऽन्वतप्स्यत् ।
उद्वर्त्तयन् दस्युसङ्घान्समेतान् प्रवर्त्तयन् युगमन्यद्युगान्ते । यदा धक्ष्याम्यग्निवत्कौरवेयांस्तदा तप्ता धार्त्तराष्ट्रः सपुत्त्रः ।
सभ्राता वै सहसैन्यः सभृत्यो भ्रष्टैश्वर्य्यः क्रोधवशोऽल्पचेताः । दर्पस्यान्ते विहतो वेपमानः पश्चान्मन्दस्तप्स्यति धार्त्तराष्ट्रः ।
पूर्व्वाह्णे मां कृतजप्यं कदाचिद्विप्रः प्रोवाचोदकान्ते मनोज्ञं । कर्त्तव्यन्ते दुष्करं कर्म्म पार्थ योद्धव्यं ते शत्रुभिः सव्यसाचिन् ।१८७५
इन्द्रो वा ते हरिमान्वज्रहस्तः पुरस्ताद्यातु समरेऽरीन् विनिघ्नन् । सुग्रीवयुक्तेन रथेन वा ते पश्चात् कृष्णो रक्षतु वासुदेवः ।
वव्रे चाहं वज्रहस्तान्महेन्द्रादस्मिन् युद्धे वासुदेवं सहायं । स मे लब्धो दस्युवधाय कृष्णो मन्ये चैतद्विहितं दैवतैर्म्मे ।
स बाहुभ्यां सागरमुत्तितीर्षेन्महोदधिं सलिलस्याप्रमेयं । तेजस्विनं कृष्णमत्यन्तशूरं युद्धेन यो वासुदेवं जिगीषेत् ।
गिरिं य इच्छेत्तु तलेन भेत्तुं शिलोच्चयं श्वेतमतिप्रमाणं । तस्यैव पाणिः सनखो विशीर्य्येन्नचापि किञ्चित्स गिरेस्तु कुर्य्यात् ।
अग्निं समिद्धं शमयेद्भुजाभ्यां चन्द्रञ्च सूर्य्यञ्च निवारयेत । हरेद्देवानाममृतं प्रसह्य युद्धेन यो वासुदेवं जिगीषेत् । १८८०
यो रुक्मिणीमेकरथेन भोजानुत्साद्य राज्ञः समरे प्रसह्य । उवाह भार्य्यां यशसा ज्वलन्तीं यस्यां जज्ञे रौक्मिणेयो महात्मा।
अयं गान्धारांस्तरसा सम्प्रमथ्य जित्वा पुत्त्रान्नग्नजितः समग्रान् । बद्धं मुमोच विनदन्तं प्रसह्य सुदर्शनं वै देवतानां
ललामं ।
अयं कपाटेन जघान पाण्ड्यं तथा कलिङ्गान् दन्तकूरे ममर्द्द । अनेन दग्धा वर्षपूगाननाथा वाराणसी नगरी सम्ब
भूव ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

अयं स्म युद्धे मन्यतेऽन्यैरजेयं तमेकलव्यं नाम निषादराजं। वेगेनेव शैलमभिहत्य जम्भः शेते स कृष्णेन हतः परासुः।
तथोग्रसेनस्य सुतं सुदुष्टं वृष्ण्यन्धकानां मध्यगतं सभास्थं। अपातयद्बलदेवद्वितीयो हत्वा ददौ चोग्रसेनाय राज्यं। १८८५
अयं सौभं योधयामास खस्थं विभीषणं मायया शाल्वराजं। सौभद्वारि प्रत्यगृह्णाच्छतघ्नीं दोर्भ्यां क एनं विसहेत मर्त्यः।
प्राग्ज्योतिषं नाम बभूव दुर्गं पुरङ्घोरमसुराणामसह्यं। महाबलो नरकस्तत्र भौमो जहारादित्या मणिकुण्डले शुभे।
न तं देवाः सह शक्रेण शेकुः समागता युधि मृत्योरभीताः। दृष्ट्वा च तं विक्रमं केशवस्य बलं तथैवास्त्रमवारणीयं।
जानन्तोऽस्य प्रकृतिं केशवस्य न्ययोजयन् दस्युवधाय कृष्णं। स तत्कर्म्म प्रतिशुश्राव दुष्करमैश्वर्य्यवान् सिद्धिषु वासुदेवः।
निर्मोचने षट् सहस्राणि हत्वा सञ्छिद्य पाशान् सहसा क्षुरान्तान्। मुरं हत्वा विनिहत्यौघरक्षो निर्मोचनं चापि जगाम
वीरः। १८९०
तत्रैव तेनास्य बभूव युद्धं महाबलेनातिबलस्य विष्णोः। शेते स कृष्णेन हतः परासुर्वातेनेव मथितः कर्णिकारः।
आहृत्य कृष्णो मणिकुण्डले ते हत्वा च भौमं नरकं मुरञ्च। श्रिया वृतो यशसा चैव विद्वान् प्रत्याजगामाप्रतिमप्रभावः।
अस्मै वराण्यददंस्तत्र देवा दृष्ट्वा भीमं कर्म्म कृतं रणे तत्। श्रमश्च ते युध्यमानस्य न स्यादाकाशे चाप्सु च ते क्रमः स्यात्।
शस्त्राणि गात्रे नच ते क्रमेरन्नित्येव कृष्णश्च ततः कृतार्थः। एवंरूपे वासुदेवेऽप्रमेये महाबले गुणसम्पत्सदैव।
तमसह्यं विष्णुमनन्तवीर्य्यमाशंसते धार्त्तराष्ट्रो विजेतुं। सदा ह्येनं तर्कयते दुरात्मा तच्चाप्ययं सहतेऽस्मान् समीक्ष्य। १८९५
पर्य्यागतं मम कृष्णस्य चैव यो मन्यते कलहं संप्रसह्य। शक्यं न हर्त्तुं पाण्डवानां ममत्वं तद्वेदिता संयुगं तत्र गत्वा।
नमस्कृत्वा शान्तनवाय राज्ञे द्रोणायाथो सहपुत्राय चैव। शारद्वतायाप्रतिद्वन्द्विने च योत्स्याम्यहं राज्यमभीप्समानः।
धर्म्मेणास्तं निधनं तस्य मन्ये यो योत्स्यते पाण्डवैः पापबुद्धिः। मिथ्याग्लहे निर्ज्जिता वै नृशंसैः सम्वत्सरान् वै द्वादश राज
पुत्राः।
वासः कृच्छ्रो विहितश्चाप्यरण्ये दीर्घं कालं चैकमज्ञातवर्षं। तेषां कस्माज्जीवतां पाण्डवानां नन्दिष्यन्ते धार्त्तराष्ट्राः पदस्थाः।
ते चेदस्मान् युध्यमानान् जयेयुर्देवैरपीन्द्रप्रमुखैः सहायैः। धर्म्मादधर्म्मश्चरितो गरीयांस्ततो ध्रुवं नास्ति कृतञ्च साधु। १९००
न चेदिमं पुरुषं कर्म्मबद्धं नचेदस्मान्मन्यतेऽसौ विशिष्टान्। आशंसेऽहं वासुदेवद्वितीयो दुर्य्योधनं सानुबन्धं निहन्तुं।
न चेदिदं कर्म्म नरेन्द्र वन्ध्यं न चेत् भवेत्तत् कृतं निष्फलं वा। इदञ्च तच्चाभिसमीक्ष्य नूनं पराजयो धार्त्तराष्ट्रस्य साधुः।
प्रत्यक्षं वः कुरवो यत् ब्रवीमि युध्यमाना धार्त्तराष्ट्रा न सन्ति। अन्यत्र युद्धात् कुरवो यदि स्युर्नयुद्धे वै शेष इहास्ति
कश्चित्।
हत्वा त्वहं धार्त्तराष्ट्रान् सकर्णान्राज्यं कुरूणामवजेता समग्रं। यद्वः कार्य्यं तत्कुरुध्वं यथास्वमिष्टान्दारानात्मभोगान्
भजध्वं।
अप्येवं नो ब्राह्मणाः सन्ति वृद्धा बहुश्रुताः शीलवन्तः कुलीनाः। साम्वत्सरा ज्योतिषि चाभियुक्ता नक्षत्रयोगेषु च निश्च १९०५
यज्ञाः।
उच्चावचं दैवयुक्तं रहस्यं दिव्यप्रश्ना मृगचक्रा मुहूर्त्ताः। क्षयं महान्तं कुरुसृञ्जयानां निवेदयन्ते पाण्डवानां जयञ्च।
यथा हि नो मन्यतेऽजातशत्रुः संसिद्धार्थो द्विषतां निग्रहाय। जनार्द्दनश्चाप्यपरोक्षविद्यो न संशयं पश्यति वृष्णिसिंहः।
अहं तथैवं खलु भाविरूपं पश्यामि बुद्ध्या स्वयमप्रमत्तः। दृष्टिश्च मे न व्यथते पुराणी संयुध्यमाना धार्त्तराष्ट्रा न सन्ति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation-Jalgaon

अनालब्धं जृम्भति गाण्डिवं धनुरनाहता कम्पति मे धनुर्ज्या । बाणाश्च मे तूणमुखाद्विसृत्य मुहुर्मुहुर्गन्तुमुशन्ति चैव ।
खड्गः कोषान्निःसरति प्रसन्नो हित्वेव जीर्णामुरगस्त्वचं स्वां । ध्वजे वाचो रौद्ररूपा भवन्ति कदा रथो योक्ष्यते ते १९१०
किरीटिन् ।
गोमायुसङ्घाश्च नदन्ति रात्रौ रक्षांस्यथो निष्पतन्त्यन्तरीक्षात् । मृगाः शृगालाः शितिकण्ठाश्च काका गृध्रा बकाश्चैव
तरक्षवश्च ।
सुवर्णपत्राश्च पतन्ति पश्चात् दृष्ट्वा रथं श्वेतहयप्रयुक्तं । अहं ह्येकः पार्थिवान् सर्व्वयोधान् शरान्वर्षन् मृत्युलोकं
नयेयं ।
समाददानः पृथगस्त्रमार्गान् यथाऽग्निरिद्धो गहनं निदाघे । स्थूणाकर्णं पाशुपतं महास्त्रं ब्राह्मं चास्त्रं यच्च शक्रोऽप्यदान्मे ।
वधे धृतो वेगवतः प्रमुञ्चन्नाहं प्रजाः किञ्चिदिहावशिष्ये । शान्तिं लप्स्ये परमो ह्येष भावः स्थिरो मम ब्रूहि गावल्ग
णे तान् ।
ये वैजय्याः समरे सूत लब्ध्वा देवानपीन्द्रप्रमुखान् समेतान् । तैर्मन्यते कलहं सम्प्रसह्य स धार्त्तराष्ट्रः पश्यत मोह १९१५
मस्य ।
वृद्धो भीष्मः शान्तनवः कृपश्च द्रोणः सपुत्त्रो विदुरश्च धीमान् । एते सर्व्वे यद्वदन्त्येतदस्तु आयुष्मन्तः कुरवः सन्तु सर्व्वे ।

इति श्रीमहाभारते उद्योगपर्व्वणि यानसन्धिपर्व्वणि सञ्जयवाक्ये सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

॥ वैशम्पायन उवाच ॥ समवेतेषु सर्व्वेषु तेषु राजसु भारत । दुर्य्योधनमिदं वाक्यं भीष्मः शान्तनवोऽब्रवीत् ।
बृहस्पतिश्चोशना च ब्रह्माणं पर्य्युपस्थितौ । मरुतश्च महेन्द्रेण वसवश्चाग्निना सह ।
आदित्याश्चैव साध्याश्च ये च सप्तर्षयो दिवि । विश्वावसुश्च गन्धर्व्वः शुभाश्चाप्सरसाङ्गणाः ।
नमस्कृत्योपजग्मुस्ते लोकवृद्धं पितामहं । परिवार्य्य च विश्वेशं पर्य्यासत दिवौकसः । १९२०
तेषां मनश्च तेजश्चाप्याददानाविवौजसा । पूर्व्वदेवौ व्यतिक्रान्तौ नरनारायणावृषी ।
बृहस्पतिस्तु पप्रच्छ ब्रह्माणं काविमाविति । भवन्तं नोपतिष्ठेते तौ नः शंस पितामह ।
॥ ब्रह्मोवाच ॥ यावेतौ पृथिवीं द्याञ्च भासयन्तौ तपस्विनौ । ज्वलन्तौ रोचमानौ च व्याप्यातीतौ महाबलौ ।
नरनारायणावेतौ लोकाल्लोकं समास्थितौ । ऊर्ज्जितौ स्वेन तपसा महासत्त्वपराक्रमौ ।
एतौ हि कर्म्मणा लोकं नन्दयामासतुर्ध्रुवं द्विधाभूतौ महाप्रज्ञौ विद्धि ब्रह्मन्परन्तपौ । असुराणां विनाशाय देवगन्धर्व्वपू
जितौ । १९२५
॥ वैशम्पायन उवाच ॥ जगाम शक्रस्तच्छ्रुत्वा यत्र तौ तेपतुस्तपः । सार्द्धं देवगणैः सर्व्वैर्बृहस्पतिपुरोगमैः ।
तदा देवासुरे युद्धे भये जाते दिवौकसां । अयाचत महात्मानौ नरनारायणौ वरं ।
तावब्रूतां वृणीष्वेति तदा भरतसत्तम । अथैतावब्रवीच्छक्रः सह्यं नः क्रियतामिति ।
ततस्तौ शक्रमब्रूतां करिष्यावो यदिच्छसि । ताभ्याञ्च सहितः शक्रो विजिग्ये दैत्यदानवान् ।
नर इन्द्रस्य सङ्ग्रामे हत्वा शत्रून् परन्तपः । पौलोमान् कालकञ्जांश्च सहस्राणि शतानि च । १९३०
एष भ्रान्ते रथे तिष्ठन् भल्लेनापाहरच्छिरः । जम्भस्य ग्रसमानस्य तदा ह्यर्ज्जुनमाहवे ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

एष पारे समुद्रस्य हिरण्यपुरमारुजत् । जित्वा षष्टिं सहस्राणि निवातकवचान्रणे ।
एष देवान् सहेन्द्रेण जित्वा परपुरञ्जयः । अतर्पयन्महाबाहुरर्ज्जुनो जातवेदसं ।
नारायणस्तथैवात्र भूयसोऽन्यान् जघान ह । एवमेतौ महावीर्य्यौ तौ पश्यत समागतौ ।
वासुदेवार्ज्जुनौ वीरौ समवेतौ महारथौ । नरनारायणौ देवौ पूर्व्वदेवाविति श्रुतिः । १९३५
अजेयौ मानुषे लोके सेन्द्रैरपि सुरासुरैः । एष नारायणः कृष्णः फाल्गुनश्च नरः स्मृतः ।
नारायणो नरश्चैव सत्त्वमेकं द्विधाकृतं । एतौ हि कर्म्मणा लोकानश्नुवातेऽक्षयान् ध्रुवान् ।
तत्र तत्रैव जायेते युद्धकाले पुनः पुनः । तस्मात् कर्म्मैव कर्त्तव्यमिति होवाच नारदः ।
एतद्धि सर्व्वमाचष्ट वृष्णिचक्रस्य वेदवित् । शङ्खचक्रगदाहस्तं यदा द्रक्ष्यसि केशवं ।
पर्य्याददानं चास्त्राणि भीमधन्वानमर्ज्जुनं । सनातनौ महात्मानौ कृष्णावेकरथे स्थितौ । १९४०
दुर्य्योधन तदा तात स्मर्त्तासि वचनं मम । नोचेदयमभावः स्यात् कुरूणां प्रत्युपस्थितः ।
अर्थाच्च तात धर्म्माच्च तव बुद्धिरुपप्लुता । नचेत् गृहीष्यसे वाक्यं श्रोताऽसि सुबहून् हतान् ।
तवैव हि मतं सर्व्वे कुरवः पर्य्युपासते । त्रयाणामेव च मतं तत्त्वमेकोऽनुमन्यसे ।
रामेण चैव शप्तस्य कर्णस्य भरतर्षभ । दुर्ज्जातेः सूतपुत्त्रस्य शकुनेः सौबलस्य च ।
तथा क्षुद्रस्य पापस्य भ्रातुर्दुःशासनस्य च । १९४५
॥ कर्ण उवाच ॥ नैवमायुष्मता वाच्यं यन्मामात्थ पितामह । क्षत्रधर्म्मे स्थितो ह्यस्मि स्वधर्म्मादनपेयिवान् ।
किञ्चान्यन्मयि दुर्वृत्तं येन मां परिगर्हसे । नहि मे वृजिनं किञ्चित् धार्त्तराष्ट्रा विदुः क्वचित् ।
नाचरं वृजिनं किञ्चित् धार्त्तराष्ट्रस्य नित्यशः । अहं हि पाण्डवान् सर्व्वान्हनिष्यामि रणे स्थितान् ।
प्राग्विरुद्धैः शमं सद्भिः कथं वा क्रियते पुनः । राज्ञो हि धृतराष्ट्रस्य सर्व्वं कार्य्यं प्रियं मया ।
तथा दुर्य्योधनस्यापि स हि राज्ये समाहितः । १९५०
॥ वैशम्पायन उवाच ॥ कर्णस्य तु वचः श्रुत्वा भीष्मः शान्तनवः पुनः । धृतराष्ट्रं महाराजं सम्भाष्येदं वचोऽब्रवीत् ।
यदयं कत्थते नित्यं हन्ताऽहं पाण्डवानिति । नायं कलाऽपि सम्पूर्णा पाण्डवानां महात्मनां ।
अनयो योऽयमागन्ता पुत्त्राणां ते दुरात्मनां । तदस्य कर्म्म जानीहि सूतपुत्त्रस्य दुर्म्मतेः ।
एतमाश्रित्य पुत्त्रस्ते मन्दबुद्धिः सुयोधनः । अवामन्यत तान् वीरान् देवपुत्त्रानरिन्दमान् ।
किञ्चाप्येतेन तत्कर्म्म कृतपूर्व्वं सुदुष्करं । तैर्यथा पाण्डवैः सर्व्वैरेकैकेन कृतं पुरा । १९५५
दृष्ट्वा विराटनगरे भ्रातरं निहतं प्रियं । धनञ्जयेन विक्रम्य किमनेन तदा कृतं ।
सहितान् हि कुरून् सर्व्वानभियातो धनञ्जयः । प्रमथ्य चाच्छिनद्वासः किमयं प्रोषितस्तदा ।
गन्धर्व्वैर्घोषयात्रायां ह्रियते यत्सुतस्तव । क्व तदा सूतपुत्त्रोऽभूत् य इदानीं वृषायते ।
ननु तत्रापि भीमेन पार्थेन च महात्मना । यमाभ्यामेव सङ्गम्य गन्धर्व्वास्ते पराजिताः ।
एतान्यस्य मृषोक्तानि बहूनि भरतर्षभ । विकत्थनस्य भद्रन्ते सदा धर्म्मार्थलोपिनः । १९६०
भीष्मस्य तु वचः श्रुत्वा भारद्वाजो महामनाः । धृतराष्ट्रमुवाचेदं राजमध्येऽभिपूजयन् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यदाह भरतश्रेष्ठो भीष्मस्तत् क्रियतां नृप । न काममर्थलिप्सूनां वचनं कर्त्तुमर्हसि ।
पुरा युद्धात् साधु मन्ये पाण्डवैः सह सङ्गतं । यद्वाक्यमर्ज्जुनेनोक्तं सञ्जयेन निवेदितं ।
सर्व्वं तदभिजानामि करिष्यति च पाण्डवः । नह्यस्य त्रिषु लोकेषु सदृशोऽस्ति धनुर्द्धरः ।
अनादृत्य तु तद्वाक्यमर्थवद्द्रोणभीष्मयोः । ततः स सञ्जयं राजा पर्य्यपृच्छत पाण्डवान् । १९६५
तदैव कुरवः सर्व्वे निराशा जीवितेऽभवन् । भीष्मद्रोणौ यदा राजा न सम्यगनुभाषते ।
इति श्रीमहाभारते उद्योगपर्व्वणि यानसन्धिपर्व्वणि भीष्मवाक्ये अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥
॥ धृतराष्ट्र उवाच ॥ किमसौ पाण्डवो राजा धर्म्मपुत्त्रोऽभ्यभाषत । श्रुत्वेह बहुलाः सेनाः प्रीत्यर्थं नः समागताः ।
किमसौ चेष्टते सूत योत्स्यमानो युधिष्ठिरः । के वाऽस्य भ्रातृपुत्त्राणां पश्यन्त्याज्ञेप्सवो मुखं ।
के स्विदेनं वारयन्ति युद्धाच्छाम्येति वा पुनः । निकृत्या कोपितं मन्दैर्धर्म्मज्ञं धर्म्मचारिणं ।
॥ सञ्जय उवाच ॥ राज्ञो मुखमुदीक्षन्ते पाञ्चालाः पाण्डवैः सह । युधिष्ठिरस्य भद्रन्ते स सर्व्वाननुशास्ति च । १९७०
पृथग्भूताः पाण्डवानां पाञ्चालानां रथव्रजाः । आयान्तमभिनन्दन्ति कुन्तीपुत्त्रं युधिष्ठिरं ।
नभः सूर्य्यमिवोद्यन्तं कौन्तेयं दीप्ततेजसं । पाञ्चालाः प्रतिनन्दन्ति तेजोराशिमिवोदितं ।
आगोपाला विपालाश्च नन्दमाना युधिष्ठिरं । पाञ्चालाः केकया मत्स्याः प्रतिनन्दन्ति पाण्डवं ।
ब्राह्मण्यो राजपुत्त्र्यश्च विशो दुहितरश्च याः । क्रीडन्त्योऽभिसमायान्ति पार्थं सन्नद्धमीक्षितुं ।
॥ धृतराष्ट्र उवाच ॥ सञ्जयाचक्ष्व येनास्मान् पाण्डवा अभ्ययुञ्जत । धृष्टद्युम्नस्य सैन्येन सोमकानां बलेन च । १९७५
॥ वैशम्पायन उवाच ॥ गावल्गणिस्तु तत्पृष्टः सभायां कुरुसंसदि । निश्वस्य सुभृशं दीर्घं मुहुः सञ्चिन्तयन्निव ।
तत्रानिमित्ततो दैवात् सूतं कश्मलमाविशत् । तदाचचक्षे विदुरः सभायां कुरुसंसदि ।
सञ्जयोऽयं महाराज मूर्च्छितः पतितो भुवि । वाचं न सृजते काञ्चिद्धीनप्रज्ञोऽल्पचेतनः ।
॥ धृतराष्ट्र उवाच ॥ अपश्यत् सञ्जयो नूनं कुन्तीपुत्त्रान्महारथान् । तैरस्य पुरुषव्याघ्रैर्भृशमुद्वेजितं मनः ।
॥ वैशम्पायन उवाच ॥ सञ्जयश्चेतनां लब्ध्वा प्रत्याश्वस्येदमब्रवीत् । धृतराष्ट्रं महाराजं सभायां कुरुसंसदि । १९८०
॥ सञ्जय उवाच ॥ दृष्टवानस्मि राजेन्द्र कुन्तीपुत्त्रान्महारथान् । मत्स्यराजगृहावासनिरोधेनावकर्षितान् ।
शृणु यैर्हि महाराज पाण्डवा अभ्ययुञ्जत । धृष्टद्युम्नेन वीरेण युद्धे वस्तेऽभ्ययुञ्जत ।
यो नैव रोषान्नभयान्न लोभान्नार्थकारणात् । न हेतुवादात् धर्म्मात्मा सत्यं जह्यात्कदाचन ।
यः प्रमाणं महाराज धर्म्मे धर्म्मभृतांवरः । अजातशत्रुणा तेन पाण्डवा अभ्ययुञ्जत ।
यस्य बाहुबले तुल्यः पृथिव्यां नास्ति कश्चन । यो वै सर्व्वान्महीपालान् वशे चक्रे धनुर्द्धरः । १९८५
यः काशीवङ्गमगधान् कलिङ्गांश्च युधाऽजयत् । तेन वो भीमसेनेन पाण्डवा अभ्ययुञ्जत ।
यस्य वीर्य्येण सहसा चत्वारो भुवि मानवाः । निःसृता जतुगेहाद्वै हिडिम्बात् पुरुषादकात् ।
यश्चैषामभवद्द्वीपः कुन्तीपुत्त्रो वृकोदरः । याज्ञसेनीमथो यत्र सिन्धुराज्ञोऽपकृष्टवान् ।
तत्रैषामभवन् द्वीपः कुन्तीपुत्त्रो वृकोदरः । यश्च तान् पाण्डवान् सर्व्वान् सङ्गतान् वारणावते ।
दह्यतो मोचयामास तेन वस्तेऽभ्ययुञ्जत । कृष्णायाश्चरता प्रीतिं येन क्रोधवशा हताः । १९९०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रविश्य विषमं घोरं पर्व्वतं गन्धमादनं। यस्य नागायुतं वीर्य्यं भुजयोः सारमर्पितं।
तेन वो भीमसेनेन पाण्डवा अभ्ययुञ्जत। कृष्णद्वितीयो विक्रम्य तुष्ट्यर्थं जातवेदसः।
अजयत् यः पुरा वीरो युध्यमानं पुरन्दरं। यः स साक्षात् महादेवं गिरिशं शूलपाणिनं।
तोषयामास युद्धेन देवदेवमुमापतिं। यश्च सर्व्वान् वशे चक्रे लोकपालान् धनुर्द्धरः।
तेन वो विजयेनाजौ पाण्डवा अभ्ययुञ्जत। यः प्रतीचीं दिशं चक्रे वशे म्लेच्छगणायुतां।
स तत्र नकुलो योद्धा चित्रयोधी व्यवस्थितः। तेन वो दर्शनीयेन वीरेणातिधनुर्भृता।
माद्रीपुत्रेण कौरव्य पाण्डवा अभ्ययुञ्जत। यः काशीनङ्गमगधान् कलिङ्गांश्च युधाऽजयत्।
तेन वः सहदेवेन पाण्डवा अभ्ययुञ्जत। यस्य वीर्य्येण सदृशाश्चत्वारो भुवि मानवाः।
अश्वत्थामा धृष्टकेतू रुक्मी प्रद्युम्न एव च। तेन वः सहदेवेन युद्धं राजन्महात्यये।
यवीयसा नृवीरेण माद्रीनन्दिकरेण च। तपश्चचार या घोरं काशिकन्या पुरा सती।
भीष्मस्य वधमिच्छन्ती प्रेत्यापि भरतर्षभ। पाञ्चालस्य सुता जज्ञे दैवाच्च स पुनः पुमान्।
स्त्रीपुंसोः पुरुषव्याघ्र यः स वेद गुणागुणान्। यः कलिङ्गान् समापेदे पाञ्चाल्यो युद्धदुर्म्मदः।
शिखण्डिना वः कुरवः कृतास्त्रेणाभ्ययुञ्जत। यं यक्षः पुरुषं चक्रे भीष्मस्य निधनेच्छया।
महेष्वासेन रौद्रेण पाण्डवा अभ्ययुञ्जत। महेष्वासा राजपुत्रा भ्रातरः पञ्च केकयाः।
आमुक्तकवचाः शूरास्तैश्च वस्तेऽभ्ययुञ्जत। यो दीर्घबाहुः क्षिप्रास्त्रो धृतिमान् सत्यविक्रमः।
तेन वो वृष्णिवीरेण युयुधानेन सङ्गरः। य आसीच्छरणं काले पाण्डवानां महात्मनां।
रणे तेन विराटेन भविता वः समागमः। यः स काशीपतीराजा वाराणस्यां महारथः।
स तेषामभवत् योद्धा तेन वस्तेऽभ्ययुञ्जत। शिशुभिर्दुर्ज्जयैः सङ्ख्ये द्रौपदेयैर्म्महात्मभिः।
आशीविषसमस्पर्शैः पाण्डवा अभ्ययुञ्जत। यः कृष्णसदृशो वीर्य्ये युधिष्ठिरसमो दमे।
तेनाभिमन्युना सङ्ख्ये पाण्डवा अभ्ययुञ्जत। यश्चैवाप्रतिमो वीर्य्ये धृष्टकेतुर्म्महायशाः।
दुःसहः समरे क्रुद्धः शैशुपालिर्म्महारथः। तेन वश्चेदिराजेन पाण्डवा अभ्ययुञ्जत।
अक्षौहिण्या परिवृतः पाण्डवान् योऽभिसंश्रितः। यः संश्रयः पाण्डवानां देवानामिव वासवः।
तेन वो वासुदेवेन पाण्डवा अभ्ययुञ्जत। तथा चेदिपतेर्भ्राता शरभो भरतर्षभ।
करकर्षेण सहितस्ताभ्यां वस्तेऽभ्ययुञ्जत। जारासन्धिः सहदेवो जयत्सेनश्च तावुभौ।
युद्धेऽप्रतिरथौ वीरौ पाण्डवार्थे व्यवस्थितौ। द्रुपदस्य महातेजा बलेन महता वृतः।
त्यक्तात्मा पाण्डवार्थाय योत्स्यमानो व्यवस्थितः। एते चान्ये च बहवः प्राच्योदीच्या महीक्षितः।
शतशो यानुपाश्रित्य धर्म्मराजो व्यवस्थितः।

इति श्रीमहाभारते उद्योगपर्व्वणि यानसन्धिपर्व्वणि सञ्जयवाक्ये एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

॥ धृतराष्ट्र उवाच ॥ सर्व्व एते महोत्साहा ये त्वया परिकीर्त्तिताः। एकतस्त्वेव ते सर्व्वे समेता भीम एकतः।
भीमसेनाद्धि मे भूयो भयं सञ्जायते महत्। क्रुद्धादमर्षणात्तात व्याघ्रादिव महारुरोः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

जागर्म्मि रात्रयः सर्व्वा दीर्घमुष्णञ्च निःश्वसन्। भीतो वृकोदरात्तात सिंहात्पशुरिवापरः। २०२०
न हि तस्य महाबाहोः शक्रप्रतिमतेजसः। सैन्येऽस्मिन् प्रतिपश्यामि य एनं विषहेत् युधि।
अमर्षणस्च कौन्तेयो दृढवैरश्च पाण्डवः। अनर्म्महासी सोन्मादस्तिर्य्यक्प्रेची महास्वनः।
महावेगो महोत्साहो महाबाहुर्म्महाबलः। मन्दानां मम पुत्त्राणां युद्धेनान्तं करिष्यति।
गुरुग्राहग्टहीतानां गदां बिभ्रद्वृकोदरः। कुरूणामृषभो युद्धे दण्डपाणिरिवान्तकः।
अष्टाश्रिमायसीं घोरां गदां काञ्चनभूषणां। मनसाऽहं प्रपश्यामि ब्रह्मदण्डमिवोत्थितं। २०२५
यथा मृगाणां यूथेषु सिंहो जातबलश्चरेत्। मामकेषु तथा भीमो बलेषु विचरिष्यति।
सर्व्वेषां मम पुत्त्राणां स एकः क्रूरविक्रमः। बह्वाशी विप्रतीपश्च बाल्येऽपि रभसः सदा।
उद्वेपते मे हृदयं ये मे दुर्य्योधनादयः। बाल्येऽपि तेन युध्यन्तो वारणेनेव मर्द्दिताः।
तस्य वीर्य्येण संक्लिष्टा नित्यमेव सुता मम। स एव हेतुर्भेदस्य भीमो भीमपराक्रमः।
ग्रसमानमनीकानि नरवारणवाजिनां। पश्यामीवाग्रतो भीमं क्रोधमूर्च्छितमाहवे। २०३०
अस्त्रे द्रोणार्ज्जुनसमं वायुवेगसमं जवे। महेश्वरसमं क्रोधे को हन्याद्भीममाहवे।
सञ्जयाचच्व मे शूरं भीमसेनममर्षणं। अतिलाभन्तु मन्येऽहं यत्तेन रिपुघातिना।
तदैव न हताः सर्व्वे पुत्त्रा मम मनस्विना। येन भीमबला यक्षा राक्षसाश्च पुरा हताः।
कथं तस्य रणे वेगं मानुषः प्रसहिष्यति। न स जातु वशे तस्थौ मम बाल्येऽपि सञ्जय।
किं पुनर्म्मम दुष्पुत्त्रैः क्लिष्टः सम्प्रति पाण्डवः। निष्ठुरो रोषणोऽत्यर्थं भज्येतापि न सन्नमेत्। २०३५
तिर्य्यक्प्रेची संहतभ्रूः कथं शाम्येद्वृकोदरः। शूरस्तथाऽप्रतिबलो गौरस्ताल इवोन्नतः।
प्रमाणतो भीमसेनः प्रादेशेनाधिकोऽर्ज्जुनात्। जवेन वाजिनोऽत्येति बलेनात्येति कुञ्जरान्।
अव्यक्तजल्पी मध्वचो मध्यमः पाण्डवो बली। इति बाल्ये श्रुतः पूर्व्वं मया व्यासमुखात्पुरा।
रूपतो वीर्य्यतश्चैव याथातथ्येन पाण्डवः। आयसेन स दण्डेन रथान्नागान्नरान् हयान्।
हनिष्यति रणे क्रुद्धो रौद्रः क्रूरपराक्रमः। अमर्षी नित्यसंरब्धो भीमः प्रहरतां वरः। २०४०
मया तात प्रतीपानि कुर्व्वन् पूर्व्वं विमानितः। निष्कृर्णामायसीं स्थूलां सुपार्श्वां काञ्चनीं गदां।
शतघ्नीं शतनिर्ह्रादां कथं शच्यन्ति मे सुताः। अपारमप्लवागाधं समुद्रं शरवेगितं।
भीमसेनमयं दुर्गं तात मन्दास्तितीर्षवः। क्रोशतो मे न शृण्वन्ति बालाः पण्डितमानिनः।
विषमं नावमन्यन्ते प्रपातं मधुदर्शिनः। संयुगं ये गमिष्यन्ति नररूपेण मृत्युना।
नियतं चोदिता धात्रा सिंहेनेव हता मृगाः। शैक्यां तात चतुष्किष्कुं षडस्रिममितौजसं। २०४५
प्रहितां दुःखसंस्पर्शां कथं शच्यन्ति मे सुताः। गदां भ्रामयतस्तस्य भिन्दतो हस्तिमस्तकान्।
सृक्कणी लेलिहानस्य वाष्पमुत्सृजतो मुहुः। उद्दिश्य नागान् पततः कुर्व्वतो भैरवान्रवान्।
प्रतीपं पततो मत्तान् कुञ्जरान् प्रतिगर्ज्जतः। विगाह्य रथमार्गेषु वरानुद्दिश्य निघ्नतः।
अग्नेः प्रज्वलितस्येव अपि मुच्येत मे प्रजा। वीथीं कुर्व्वन् महाबाहुर्द्रावयन्मम वाहिनीं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नृत्यन्निव गदापाणिर्युगान्ते दर्शयिष्यति। प्रभिन्न इव मातङ्गः प्रभञ्जन् पुष्पितान् द्रुमान्। २०५०
प्रवेच्यति रणे सेनां पुत्त्राणां मे वृकोदरः। कुर्व्वन्नयान् विपुरुषान् विसारथिहयध्वजान्।
आरुजन् पुरुषव्याघ्रो रथिनः सादिनस्तथा। गङ्गावेग इवानूपांस्तीरजान् विविधान् द्रुमान्।
प्रभङ्च्यति रणे सेनां पुत्त्राणां मम सञ्जय। दिशो नूनं गमिष्यन्ति भीमसेनभयार्द्दिताः।
मम पुत्त्राश्च भृत्याश्च राजानश्चैव सञ्जय। येन राजा महावीर्य्यः प्रविश्यान्तःपुरं पुरा।
वासुदेवसहायेन जरासन्धो निपातितः। कृत्स्नेयं पृथिवी देवी जरासन्धेन धीमता। २०५५
मागधेन्द्रेण बलिना वशे कृत्वा प्रतापिता। भीष्मप्रभावात्कुरवो नयेनान्धकवृष्णयः।
यन्न तस्य वशे जग्मुः केवलं दैवमेव तत्। स गत्वा पाण्डुपुत्त्रेण तरसा बाहुशालिना।
अनायुधेन वीरेण निहतः किं ततोऽधिकं। दीर्घकालसमासक्तं विषमाशीविषो यथा।
स मोच्यति रणे तेजः पुत्त्रेषु मम सञ्जय। महेन्द्र इव वज्रेण दानवान्देवसत्तमः।
भीमसेनो गदापाणिः सूदयिष्यति मे सुतान्। अविषह्यमनावार्य्यं तीव्रवेगपराक्रमं। २०६०
पश्यामीवातिताम्राक्षमापतन्तं वृकोदरं। अगदस्याप्यधनुषो विरथस्य विवर्म्मणः।
बाहुभ्यां युध्यमानस्य कस्तिष्ठेदग्रतः पुमान्। भीष्मो द्रोणश्च विप्रोऽयं कृपः शारदतस्तथा।
जानन्त्येते यथैवाऽहं वीर्य्यज्ञस्तस्य धीमतः। आर्य्यव्रतन्तु जानन्तः सङ्ग्रामं विधित्सवः।
सेनामुखेषु स्थास्यन्ति मामकानां नरर्षभाः। बलीयः सर्व्वतो दिष्टं पुरुषस्य विशेषतः।
पश्यन्नपि जयं तेषां न नियच्छामि यत्सुतान। ते पुराणं महेष्वासा मार्गमैन्द्रं समाश्रिताः। २०६५
त्यच्यन्ति तुमुले प्राणान् रक्षन्तः पार्थिवं यशः। यथैषां मामकास्तात तथैषां पाण्डवा अपि।
पौत्त्रा भीष्मस्य शिष्याश्च द्रोणस्य च कृपस्य च। यत्त्वस्मादाश्रयं किञ्चिद्दत्तमिष्टञ्च सञ्जय।
तस्यापचितिमार्य्यत्वात् कर्त्तारः स्थविरास्त्रयः। आददानस्य शस्त्रं हि क्षत्त्रधर्म्मं परीप्सतः।
निधनं क्षत्त्रियस्याजौ वरमेवाहुरुत्तमं। स वै शोचामि सर्व्वान्वै ये युयुत्सन्ति पाण्डवैः।
विक्रुष्टं विदुरेणादौ तदेतद्भयमागतं। न तु मन्ये विघाताय ज्ञानं दुःखस्य सञ्जय। २०७०
भवत्यतिबलं ह्येतज्ज्ञानस्याप्युपघातकं। ऋषयोऽपि ह्यनिर्म्मुक्ताः पश्यन्तो लोकसंग्रहान्।
सुखैर्भवन्ति सुखिनस्तथा दुःखेन दुःखिताः। किंपुनर्य्योऽहमासक्तस्तत्र तत्र सहस्रधा।
पुत्त्रेषु राज्ये दारेषु पौत्त्रेष्वपि च बन्धुषु। संशये तु महत्यस्मिन् किं नु मे क्षेममुत्तमं।
विनाशं ह्येव पश्यामि कुरूणामनुचिन्तयन्। द्यूतप्रमुखमाभाति कुरूणां व्यसनं महत्।
मन्देनैश्वर्य्यकामेन लोभात्पापमिदं कृतं। मन्ये पर्य्यायधर्म्मोऽयं कालस्यात्यन्तगामिनः। २०८०
चक्रे प्रधिरिवासक्तो नास्य शक्यं पलायितुं। किं न कुर्य्यां कथं कुर्य्यां क्व नु गच्छामि सञ्जय।
एते नश्यन्ति कुरवो मन्दाः कालवशङ्गताः। अवशोऽहं तदा तात पुत्त्राणां निहते शते।
श्रोष्यामि निनदं स्त्रीणां कथं मां मरणं स्पृशेत्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यथा निदाघे ज्वलनः समिद्धो दहेत्कक्षं वायुना चोद्यमानः। गदाहस्तः पाण्डवो वै तथैव हन्ता मदीयान् सहितोऽर्ज्जुनेन ।

इति श्रीमहाभारते उद्योगपर्व्वणि यानसन्धिपर्व्वणि धृतराष्ट्रवाक्ये पञ्चाशोऽध्यायः ॥ ५० ॥

॥ धृतराष्ट्र उवाच॥ यस्य वै नानृता वाचः कदाचिदनुशुश्रुम । त्रैलोक्यमपि तस्य स्याद्यस्य योद्धा धनञ्जयः। २०८५
तस्यैव च न पश्यामि युधि गाण्डीवधन्वनः । अनिशं चिन्तयानोऽपि यः प्रतीयाद्रथेन तं।
अस्यतः कर्णिनालीकान् मार्गणान् हृदयच्छिदः। प्रत्येता न समः कश्चिद्युधि गाण्डीवधन्वनः ।
द्रोणकर्णौ प्रतीयातां यदि वीरौ नरर्षभौ। कृतास्त्रौ बलिनां श्रेष्ठौ समरेष्वपराजितौ।
महान् स्यात् संशयो लोके नत्वस्ति विजयो मम। घृणी कर्णः प्रमादी च आचार्य्यः स्थविरो गुरुः ।
समर्थो बलवान् पार्थो दृढधन्वा जितक्लमः। भवेत् सुतुमुलं युद्धं सर्व्वशोऽप्यपराजयः । २०९०
सर्व्वेऽप्यस्त्रविदः शूराः सर्व्वे प्राप्ता महद्यशः। अपि सर्व्वामरैश्वर्य्यं त्यजेयुर्न पुनर्ज्जयं।
बधे नूनं भवेच्छान्तिस्तयोर्व्वा फाल्गुनस्य वा। न च हन्ताऽर्ज्जुनस्यास्ति जेता चास्य न विद्यते।
मन्युस्तस्य कथं शाम्येत् मन्दान् प्रति य उत्थितः। अन्येऽप्यस्त्राणि जानन्ति जीयन्ते च जयन्ति च ।
एकान्तविजयस्त्वेव श्रूयते फाल्गुनस्य च। त्रयस्त्रिंशत्समाः सूत खाण्डवेऽग्निमतर्पयत्।
जिगाय च सुरान् सर्व्वान्नास्य विद्मः पराजयं। यस्य यन्ता हृषीकेशः शीलवृत्तसमो युधि । २०९५
ध्रुवं तस्य जयस्तात यथेन्द्रस्य जयस्तथा । कृष्णावेकरथे यत्तावधिज्यं गाण्डिवं धनुः।
युगपत् त्रीणि तेजांसि समेतान्यनुशुश्रुम। नैवास्ति नो धनुस्तादृङ्‌न योद्धा न च सारथिः ।
तच्च मन्दा न जानन्ति दुर्य्योधनवशानुगाः । शेषयेदशनिर्दीप्तो निपतन्मूर्द्ध्नि सञ्जय।
न तु शेषं शरास्तात कुर्य्युरस्ताः किरीटिना। अपि चास्यन्निवाभाति निघ्नन्निव धनञ्जयः।
उद्धरन्निव कायेभ्यः शिरांसि शरवृष्टिभिः। अपि वाणमयं तेजः प्रदीप्तमिव सर्व्वतः। २१००
गाण्डीवोत्थं दहेताजौ पुत्राणां मम वाहिनीं। अपि सा रथघोषेण भयार्त्ताः सव्यसाचिनः।
वित्रस्ता वहुधा सेना भारती प्रतिभाति मे। यथा कक्षं महानग्निः प्रदहेत् सर्व्वतश्चरन् ।
महार्च्चिरनिलोद्धूतस्तद्वद्धक्ष्यति मामकान्।
यदोद्वमन्निशितान् वाणसङ्घांस्तानाततायी समरे किरीटी । सृष्टोऽन्तकः सर्व्वहरो विधात्रा यथा भवेत्तद्वदवारणीयः।
यदा ह्यभीक्ष्णं सुवहून् प्रकारान् श्रोताऽस्मि तातावसथे कुरूणां। तेषां समन्ताच्च तथा रणाग्रे क्षयः किलाऽयं भरतानु
पैति। २१०५

इति श्रीमहाभारते उद्योगपर्व्वणि यानसन्धिपर्व्वणि धृतराष्ट्रवाक्ये एकपञ्चाशोऽध्यायः ॥ ५१ ॥

॥ धृतराष्ट्र उवाच ॥ यथैव पाण्डवाः सर्व्वे पराक्रान्ता जिगीषवः । तथैवाऽभिसरास्तेषां त्यक्तात्मानो जये धृताः।
त्वमेव हि पराक्रान्तानाचक्षीथाः परान्मम। पाञ्चालान् केकयान्मत्स्यान्मगधान् वत्सभूमिपान।
यश्च सेन्द्रानिमाल्लोकानिच्छन् कुर्य्याद्वशे वशी। स श्रेष्ठो जगतः कृष्णः पाण्डवानां जये धृतः।
समस्तामर्ज्जुनाद्विद्यां सात्यकिः क्षिप्रमाप्तवान्। शैनेयः समरे स्थाता वीजवत् प्रवपन् शरान्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

धृष्टद्युम्नश्च पाञ्चाल्यः क्रूरकर्म्मा महारथः। मामकेषु रणे कर्त्ता बलेषु परमास्त्रवित्। २११०
युधिष्ठिरस्य च क्रोधादर्ज्जुनस्य च विक्रमात्। यमाभ्यां भीमसेनाच्च भयं मे तात जायते।
अमानुषं मनुष्येन्द्रैर्जालं विततमन्तरा। न मे सैन्यास्तरिष्यन्ति ततः क्रोशामि सञ्जय।
दर्शनीयो मनस्वी च लक्ष्मीवान् ब्रह्मवर्च्चसी। मेधावी सुकृतप्रज्ञो धर्म्मात्मा पाण्डुनन्दनः।
मित्रामात्यैः सुसम्पन्नः सम्पन्नो युद्धयोजकैः। भ्रातृभिः श्वशुरैर्वीरैरुपपन्नो महारथैः।
धृत्या च पुरुषव्याघ्रो नैभृत्येन च पाण्डवः। अनृशंसो वदान्यश्च ह्रीमान् सत्यपराक्रमः। २११५
बहुश्रुतः कृतात्मा च वृद्धसेवी जितेन्द्रियः। तं सर्व्वगुणसम्पन्नं समिद्धमिव पावकं।
तपन्तमिव को मन्दः पतिष्यति पतङ्गवत्। पाण्डवाग्निमनावार्य्यं मुमूर्षुर्नष्टचेतनः।
तनुरुच्चः शिखी राजा मिथ्योपचरितो मया। मन्दानां मम पुत्त्राणां युद्धेनान्तं करिष्यति।
तैरयुद्धं साधु मन्ये कुरवस्तन्निबोधत। युद्धे विनाशः कृत्स्नस्य कुलस्य भविता ध्रुवं।
एषा मे परमा बुद्धिर्यया शाम्यति मे मनः। यदि त्वयुद्धमिष्टं वो वयं शान्त्यै यतामहे।
न तु नः क्लिश्यमानानामुपेक्षेत युधिष्ठिरः। जुगुप्सति ह्यधर्म्मेण मामेवोद्दिश्य कारणं। २१२०
इति श्रीमहाभारते उद्योगपर्व्वणि यानसन्धिपर्व्वणि धृतराष्ट्रवाक्ये द्विपञ्चाशोऽध्यायः ॥ ५२ ॥
॥ सञ्जय उवाच ॥ एवमेतन्महाराज यथा वदसि भारत। युद्धे विनाशः क्षत्रस्य गाण्डीवेन प्रदृश्यते।
इदन्तु नाऽभिजानामि तव धीरस्य नित्यशः। यत्पुत्त्रवशमागच्छेस्तत्त्वज्ञः सव्यसाचिनः।
नैष कालो महाराज तव शश्वत्कृतागसः। त्वया ह्येवादितः पार्था निकृता भरतर्षभ।
पिता श्रेष्ठः सुहृत् यश्च सम्यक् प्रणिहितात्मवान्। आस्थेयं हि हितं तेन न द्रोग्धा गुरुरुच्यते।
इदं जितमिदं लब्धमिति श्रुत्वा पराजितान्। द्यूतकाले महाराज स्मयसे स्म कुमारवत्। २१२५
परुषाण्युच्यमानांश्च पुरा पार्थानुपेक्षसे। कृत्स्नं राज्यं जयन्तीति प्रपातं नानुपश्यसि।
पित्र्यं राज्यं महाराज कुरवस्ते सजाङ्गलाः। अथ वीरैर्ज्जितामुर्व्वीमखिलां प्रत्यपद्यथाः।
बाहुवीर्य्यार्ज्जिता भूमिस्तव पार्थैर्निवेदिता। मयेदं कृतमित्येवं मन्यसे राजसत्तम।
ग्रस्तान् गन्धर्व्वराजेन मज्जतो ह्यप्लवेऽम्भसि। आनिनाय पुनः पार्थः पुत्त्रांस्ते राजसत्तम।
कुमारवच्च स्मयसे द्यूते विनिकृतेषु यत्। पाण्डवेषु वनं राजन् प्रव्रजत्सु पुनः पुनः। २१३०
प्रवर्षतः शरव्रातानर्ज्जुनस्य शितान् बहून्। अप्यर्णवा विशुष्येयुः किं पुनर्मांसयोनयः।
अस्यतां फाल्गुनः श्रेष्ठो गाण्डीवं धनुषां वरं। केशवः सर्व्वभूतानां चक्राणाञ्च सुदर्शनं।
वानरो रोचमानश्च केतुः केतुमतां वरः। एवमेतानि स रथो वहन् श्वेतहयो रणे।
क्षपयिष्यति ते राजन् कालचक्रमिवोद्यतं। तस्याद्य वसुधा राजन्निखिला भरतर्षभ।
यस्य भीमार्ज्जुनौ योधौ स राजा राजसत्तम। तथा भीमहतप्रायां मज्जन्तीं तव वाहिनीं। २१३५
दुर्य्योधनमुखा दृष्ट्वा क्षयं यास्यन्ति कौरवाः। न भीमार्ज्जुनयोर्भीता लप्स्यन्ते विजयं विभो।
तव पुत्त्रा महाराज राजानश्चानुसारिणः। मत्स्यास्त्वामद्य नार्चन्ति पाञ्चालाश्च सकेकयाः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शाल्वेयाः शूरसेनाश्च सर्व्वे त्वामवजानते। पार्थं ह्येते गताः सर्व्वे वीर्य्यज्ञास्तस्य धीमतः।
भक्त्या ह्यस्य विरुध्यन्ते तव पुत्त्रैः सदैव ते। अनर्हानेव तु वधे धर्म्मयुक्तान् विकर्म्मणा।
योऽक्लेशयत् पाण्डुपुत्त्रान् यो विद्वेष्टाऽधुनाऽपि वै। सर्व्वोपायैर्नियन्तव्यः सानुगः पापपूरुषः। २१८०
तव पुत्त्रो महाराज नानुशोचितुमर्हसि। द्यूतकाले मया प्रोक्तं विदुरेण च धीमता।
यदिदं ते विलपितं पाण्डवान् प्रति भारत। अनीशेनेव राजेन्द्र सर्व्वमेतन्निरर्थकं।
इति श्रीमहाभारते उद्योगपर्व्वणि यानसन्धिपर्व्वणि सञ्जयवाक्ये त्रिपञ्चाशोऽध्यायः॥ ५३ ॥
॥ दुर्य्योधन उवाच॥ न भेतव्यं महाराज न शोच्या भवता वयं। समर्थाः स्म परान् राजन् विजेतुं समरे प्रभो।
वने प्रव्राजितान् पार्थान् यदायान्मधुसूदनः। महता बलचक्रेण पराराष्ट्रावमर्द्दिना।
केकया धृष्टकेतुश्च धृष्टद्युम्नश्च पार्षतः। राजानश्चान्वयुः पार्थान् बहवोऽन्येऽनुयायिनः। २१८५
इन्द्रप्रस्थस्य चादूरात् समाजग्मुर्महारथाः। व्यगर्हयंश्च सङ्गम्य भवन्तं कुरुभिः सह।
ते युधिष्ठिरमासीनमजिनैः प्रतिवासितं। कृष्णप्रधानाः संहत्य पर्य्युपासत भारत।
प्रत्यादानञ्च राज्यस्य कार्य्यमूचुर्नराधिपाः। भवतः सानुबन्धस्य समुच्छेदं चिकीर्षवः।
श्रुत्वा चैवं मयोक्तास्तु भीष्मद्रोणकृपास्तदा। ज्ञातिक्षयभयाद्राजन् भीतेन भरतर्षभ।
ततः स्थास्यन्ति समये पाण्डवा इति मे मतिः। समुच्छेदं हि नः कृत्स्नं वासुदेवश्चिकीर्षति। २१९०
ऋते च विदुरात् सर्व्वे यूयं वध्या मता मम। धृतराष्ट्रस्तु धर्म्मज्ञो न वध्यः कुरुसत्तमः।
समुच्छेदञ्च कृत्स्नं नः कृत्वा तात जनार्द्दनः। एकराज्यं कुरूणां स्म चिकीर्षति युधिष्ठिरे।
तत्र किं प्राप्तकालं नः प्रणिपातः पलायनं। प्राणान् वा संपरित्यज्य प्रतियुद्ध्यामहे परान्।
प्रतियुद्धे तु नियतः स्यादस्माकं पराजयः। युधिष्ठिरस्य सर्व्वे वै पार्थिवा वशवर्त्तिनः।
विरक्तराष्ट्राश्च वयं मित्राणि कुपितानि नः। धिक्कृताः पार्थिवैः सर्व्वैः स्वजनेन च सर्व्वशः। २१९५
प्रणिपाते न दोषोऽस्ति सन्धिनः शाश्वतीः समाः। पितरन्त्वेव शोचामि प्रज्ञानेत्रं जनाधिपं।
मत्कृते दुःखमापन्नं क्लेशं प्राप्तमनन्तकं। कृतं हि तव पुत्त्रैश्च परेषामवरोधनं।
मत्प्रियार्थं पुरैवैतत् विदितं ते नरोत्तम। ते राज्ञो धृतराष्ट्रस्य सामात्यस्य महारथाः।
वैरं प्रतिकरिष्यन्ति कुलोच्छेदेन पाण्डवाः। ततो द्रोणोऽब्रवीत् भीष्मः कृपो द्रौणिश्च भारत।
मत्वा मां महतीं चिन्तामास्थितं व्यथितेन्द्रियं। अभिद्रुग्धाः परे चेन्नो न भेतव्यं परन्तप। २२००
न समर्थाः परे जेतुमस्मान् युधि समास्थितान्। एकैकशः समर्थाः स्मो विजेतुं सर्व्वपार्थिवान्।
आगच्छन्तु विनेष्यामो दर्पमेषां शितैः शरैः। पुरैकेन हि भीष्मेण विजिताः सर्व्वपार्थिवाः।
मृते पितर्य्यतिक्रुद्धो रथेनैकेन भारत। जघान सुबहूंस्तेषां संरब्धः कुरुसत्तमः।
ततस्ते शरणं जग्मुर्देवव्रतमिमं भयात्। स भीष्मः सुसमर्थोऽयमस्माभिः सहितो रणे।
परान् विजेतुं तस्मात्ते व्येतु भीर्भरतर्षभ। इत्येषां निश्चयो ह्यासीत् तत्कालेऽमिततेजसां। २२०५
पुरा परेषां पृथिवी कृत्स्नासीत् वशवर्त्तिनी। अस्मान् पुनरमी नाद्य समर्था जेतुमाहवे।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

छिन्नपक्षाः परे ह्यद्य वीर्य्यहीनाश्च पाण्डवाः । अस्मत्संस्था च पृथिवी वर्त्तते भरतर्षभ ।
एकार्था: सुखदुःखेषु समानीताश्च पार्थिवाः । अप्यग्निं प्रविशेयुस्ते समुद्रं वा परन्तप ।
मदर्थं पार्थिवाः सर्व्वे तद्विद्धि कुरुसत्तम । उन्मत्तमिव चापि त्वां प्रहसन्तीह दुःखितं ।
विलपन्तं बहुविधं भीतं परविकत्थने । एषां ह्येकैकशो राज्ञां समर्थः पाण्डवान् प्रति ।
आत्मानं मन्यते सर्व्वो व्येतु ते भयमागतं । जेतुं समग्रां सेनां मे वासवोऽपि न शक्नुयात् ।
हन्तुमक्षय्यरूपेयं ब्रह्मणोऽपि स्वयम्भुवः । युधिष्ठिरः पुरं हित्वा पञ्च ग्रामान् स याचते ।
भीतो हि मामकात् सैन्यात् प्रभावाच्चैव मे विभो । समर्थं मन्यसे यच्च कुन्तीपुत्त्रं वृकोदरं ।
तन्मिथ्या न हि मे कृत्स्नं प्रभावं वेत्सि भारत । मत्समो हि गदायुद्धे पृथिव्यां नास्ति कश्चन ।
नासीत् कश्चिदतिक्रान्तो भविता न च कश्चन । युक्तो दुःखोषितश्चाहं विद्यापारगतस्तथा ।
तस्मात् न भीमान्नान्येभ्यो भयं मे विद्यते क्वचित् । दुर्य्योधनसमो नास्ति गदायामिति निश्चयः ।
सङ्कर्षणस्य भद्रं ते यत्तदैनमुपावसं । युद्धे सङ्कर्षणसमो बलेनाभ्यधिको भुवि ।
गदाप्रहारं भीमो मे न जातु विसहेत् युधि । एकं प्रहारं यं दद्यां भीमाय रुषितो नृप ।
स एवैनं नयेत् घोरः क्षिप्रं वैवस्वतक्षयं । इच्छेयञ्च गदाहस्तं राजन् द्रष्टुं वृकोदरं ।
सुचिरं प्रार्थितो ह्येष मम नित्यमनोरथः । गदया निहतो ह्याजौ मया पार्थो वृकोदरः ।
विशीर्णगात्रः पृथिवीं परासुः प्रपतिष्यति । गदाप्रहाराभिहतो हिमवानपि पर्व्वतः ।
सकृन्मया विशीर्य्येत गिरिः शतसहस्रधा । स चाप्येतत् विजानाति वासुदेवार्ज्जुनौ तथा ।
दुर्य्योधनसमो नास्ति गदायामिति निश्चयः । तत्ते वृकोदरमयं भयं व्येतु महाहवे ।
व्यपनेष्याम्यहं ह्येनं मा राजन् विमना भव । तस्मिन् मया हते क्षिप्रमर्ज्जुनं बहवो रथाः ।
तुल्यरूपा विशिष्टा वा क्षेप्स्यन्ति भरतर्षभ । भीष्मो द्रोणः कृपो द्रौणिः कर्णो भूरिश्रवास्तथा ।
प्राग्ज्योतिषाधिपः शल्यः सिन्धुराजो जयद्रथः । एकैक एषां शक्तस्तु हन्तुं भारत पाण्डवान् ।
समेतास्तु क्षणेनैतान्नेष्यन्ति यमसादनं । समग्रा पार्थिवीसेना पार्थमेकं धनञ्जयं ।
कस्मादशक्ता निर्ज्जेतुमितिहेतुर्न विद्यते । शरव्रातैस्तु भीष्मेण शतशोऽथ सहस्रशः ।
द्रोणद्रौणिकृपैश्चैव गन्ता पार्थो यमक्षयं । पितामहोऽपि गाङ्गेयः शान्तनोरधि भारत ।
ब्रह्मर्षिसदृशो जज्ञे देवैरपि सुदुःसहः । न हन्ता विद्यते चापि राजन् भीष्मस्य कश्चन ।
पित्रा ह्युक्तः प्रसन्नेन नाकामस्त्वं मरिष्यसि । ब्रह्मर्षेश्च भरद्वाजात् द्रोणो द्रोण्यामजायत ।
द्रोणाज्जज्ञे महाराज द्रौणिश्च परमास्त्रवित् । कृपश्चाचार्य्यमुख्योऽयं महर्षेर्गौतमादपि ।
शरस्तम्बोद्भवः श्रीमानवध्य इति मे मतिः । अयोनिजास्त्रयस्त्वेते पिता माता च मातुलः ।
अश्वत्थाम्नो महाराज स च शूरः स्थितो मम । सर्व्व एते महाराज देवकल्पा महारथाः ।
शक्रस्यापि व्यथां कुर्य्युः संयुगे भरतर्षभ । नैतेषामर्ज्जुनः शक्त एकैकं प्रतिवीक्षितुं ।
सहितास्तु नरव्याघ्र हनिष्यन्ति धनञ्जयं । भीष्मद्रोणकृपाणाञ्च तुल्यः कर्णो मतो मम ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अनुज्ञातस्य रामेण मत्समोऽसीति भारत। कुण्डले रुचिरे चास्तां कर्णस्य सहजे शुभे।
ते शच्यर्थे महेन्द्रेण याचितः स परन्तपः। अमोघया महाराज शक्त्या परमभीमया।
तस्य शक्त्यापगूढस्य कस्माज्जीवेद्धनञ्जयः। विजयो मे ध्रुवं राजन फलं पाणाविवाहितं।
अभिव्यक्तः परेषाञ्च कृत्स्नो भुवि पराजयः। अह्ना ह्येकेन भीष्मोऽयं प्रयुतं हन्ति भारत। २२००
तत्समाश्च महेष्वासा द्रोणद्रौणिकृपा अपि। संसप्तकानां वृन्दानि क्षत्त्रियाणां परन्तप।
अर्ज्जुनं वयमस्मान्वा निहन्यात् कपिकेतनः। तच्चालमिति मन्यन्ते सव्यसाचिवधे कृताः।
पार्थिवाः स भवांस्तेभ्यो ह्यकस्माद्व्यथते कथं। भीमसेने च निहते कोऽन्यो युध्येत भारत।
परेषां तन्ममाचक्ष्व यदि वेत्थ परन्तप। पञ्च ते भ्रातरः सर्व्वे धृष्टद्युम्नोऽथ सात्यकिः।
परेषां समरे राजन् योधाः सारं बलं मतं। अस्माकन्तु विशिष्टा ये भीष्मद्रोणकृपादयः। २२०५
द्रौणिर्व्वैकर्त्तनः कर्णः सोमदत्तोऽथ वाह्लिकः। प्राग्ज्योतिषाधिपः शल्य आवन्त्योऽथ जयद्रथः।
दुःशासनो दुःसहस्च दुर्म्मुखस्च विशाम्पते। श्रुतायुश्चित्रसेनस्च पुरुमित्रो विविंशतिः।
शलो भूरिश्रवाश्चैव विकर्णस्च तवात्मजः। अक्षौहिण्यो हि मे राजन् दशैका च समाहृताः।
न्यूनाः परेषां सप्तैव कस्मान्मे स्यात् पराजयः। बलं त्रिगुणतो हीनं योध्यं प्राह बृहस्पतिः।
परेभ्यस्त्रिगुणा चेयं मम राजन्ननीकिनी। गुणहीनं परेषाञ्च बहु पश्यामि भारत। २२१०
गुणोदयं बहुगुणमात्मनस्च विशाम्पते। एतत् सर्व्वं समाज्ञाय बलाग्र्यं मम भारत।
न्यूनतां पाण्डवानाञ्च न मोहं गन्तुमर्हसि। इत्युक्त्वा सञ्जयं भूयः पर्य्यपृच्छत भारत।
विवित्सुः प्राप्तकालानि ज्ञात्वा परपुरञ्जयः।

इति श्रीमहाभारते उद्योगपर्व्वणि यानसन्धिपर्व्वणि दुर्य्योधनवाक्ये चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥

॥ दुर्य्योधन उवाच ॥ अक्षौहिणीः सप्त लब्ध्वा राजभिः सह सञ्जय। किंस्विदिच्छति कौन्तेयो युद्धप्रेप्सुर्युधिष्ठिरः।
॥ सञ्जय उवाच ॥ अतीव मुदितो राजन् युद्धप्रेप्सुर्य्युधिष्ठिरः। भीमसेनार्ज्जुनौ चोभौ यमावपि न बिभ्यतः। २२१५
रथन्तु दिव्यं कौन्तेयः सर्व्वा विभ्राजयन्दिशः। मन्त्रं जिज्ञासमानः सन् बीभत्सुः समयोजयत्।
तमपश्याम सन्नद्धं मेघं विद्युद्युतं यथा। समन्तात् समभिध्याय हृष्यमाणोऽभ्यभाषत।
पूर्व्वरूपमिदं पश्य वयं जेष्याम सञ्जय। बीभत्सुर्मां यथोवाच तथाऽवैम्यहमप्युत।
॥ दुर्य्योधन उवाच ॥ प्रशंसस्यभिनन्दंस्तान् पार्थानक्षपराजितान्। अर्ज्जुनस्य रथे ब्रूहि कथमश्वाः कथं ध्वजाः।
॥ सञ्जय उवाच ॥ भौमनः सह शक्रेण बहुचित्रं विशाम्पते। रूपाणि कल्पयामास त्वष्टा धाता सदा विभो। २२२०
ध्वजे हि तस्मिन् रूपाणि चक्रुस्ते देवमायया। महाधनानि दिव्यानि महान्ति च लघूनि च।
भीमसेनानुरोधाय हनूमान् मारुतात्मजः। आत्मप्रतिकृतिं तस्मिन् ध्वज आरोपयिष्यति।
सर्व्वा दिशो योजनमात्रमन्तरं स तिर्य्यगूर्द्ध्वञ्च रुरोध वै ध्वजः। न सज्जतेऽसौ तरुभिः संवृतोऽपि तथा हि माया विहिता भौमनेन।
यथाकाशे शक्रधनुः प्रकाशते न चैकवर्णं न च वेद्मि किन्नु तत्। तथा ध्वजो विहितो भौमनेन बह्वाकारं दृश्यते रूपमस्य।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यथाऽग्निधूमो दिवमेति रुद्धा वर्णान् बिभ्रत् तैजसांश्चित्ररूपान्। तथा ध्वजो विहितो भौमनेन न चेद्धारो भविता नोत रोधः।
श्वेतास्तस्मिन् वातवेगाः सदश्वा दिव्या रथाश्चित्ररथेन दत्ताः। भुव्यन्तरीचे दिवि वा नरेन्द्र एषां गतिर्हीयते नात्र सर्व्वा। २२२५
शतं यत्तत्पूर्य्यते नित्यकालं हतं हतं दत्तवरं पुरस्तात्। तथा राज्ञो दन्तवर्णा वृहन्तो रथे युक्ता भान्ति तद्वीर्य्यतुल्याः।
ऋचप्रख्या भीमसेनस्य वाहा रथे वायोस्तुल्यवेगा बभूवुः। कल्माषाङ्गास्तित्तिरिचित्रपृष्ठा भ्रात्रा दत्ताः प्रीयता फाल्गुनेन।
भ्रातुर्वीरस्य स्वैस्तुरङ्गैर्व्विशिष्टा मुदा युक्ताः सहदेवं वहन्ति। माद्रीसुतं नकुलं लाजमीढं महेन्द्रदत्ता हरयो वाजिमुख्याः।
समा वायोर्बलवन्तस्तरस्विनो वहन्ति वीरं वृत्रशत्रुं यथेन्द्रं। तुल्यास्वैभिर्व्वयसा विक्रमेण महाजवाश्चित्ररूपाः सदश्वाः। २२३०
सौभद्रादीन् द्रौपदेयान् कुमारान् वहन्त्यश्वा देवदत्ता वृहन्तः।

इति श्रीमहाभारते उद्योगपर्व्वणि यानसन्धिपर्व्वणि सञ्जयवाक्ये पञ्चःपञ्चाशोऽध्यायः ॥ ५५ ॥

॥ धृतराष्ट्र उवाच ॥ कांस्तत्र सञ्जयापश्यः प्रीत्यर्थेन समागतान्। ये योत्स्यन्ते पाण्डवार्थे पुत्त्रस्य मम वाहिनीं।
॥ सञ्जय उवाच ॥ मुख्यमन्धकवृष्णीनामपश्यं कृष्णमागतं। चेकितानञ्च तत्रैव युयुधानञ्च सात्यकिं।
पृथगचौहिणीभ्यां तु पाण्डवानभिसंश्रितौ। महारथौ समाख्यातावुभौ पुरुषमानिनौ।
अचौहिण्याऽथ पाञ्चाल्यो दशभिस्तनयैर्वृतः। सत्यजित्प्रमुखैर्व्वीरैर्धृष्टद्युम्नपुरोगमैः। २२३५
द्रुपदो वर्द्धयन्मानं शिखण्डिपरिपालितः। उपायात् सर्व्वसैन्यानां प्रतिच्छाद्य तदा वपुः।
विराटः सहपुत्त्राभ्यां शङ्खेनैवोत्तरेण च। सूर्य्यदत्तादिभिर्व्वीरैर्मदिराश्वपुरोगमैः।
सहितः पृथिवीपालो भ्रातृभिस्तनयैस्तथा। अचौहिण्यैव सैन्यानां वृतः पार्थं समाश्रितः।
जारासन्धिर्मागधस्य धृष्टकेतुश्च चेदिराट्। पृथक् पृथगनुप्राप्तौ पृथगचौहिणीवृतौ।
कैकेया भ्रातरः पञ्च सर्व्वे लोहितकध्वजाः। अचौहिणीपरिवृताः पाण्डवानभिसंश्रिताः। २२४०
एतानेतावतस्तत्र यानपश्यं समागतान्। ये पाण्डवार्थे योत्स्यन्ति धार्त्तराष्ट्रस्य वाहिनीं।
यो वेद मानुषं व्यूहं दैवं गान्धर्व्वमासुरं। स तत्र सेनाप्रमुखे धृष्टद्युम्नो महारथः।
भीष्मः शान्तनवो राजन् भागः कॢप्तः शिखण्डिनः। तं विराटोऽभिसंस्थाता सार्द्धं मत्स्यैः प्रहारिभिः।
ज्येष्ठस्य पाण्डुपुत्त्रस्य भागो मद्राधिपो बली। तौ तु तत्राब्रुवन् केचित् विषमौ नो मताविति।
दुर्य्योधनः सहसुतः सार्द्धं भ्रातृशतेन च। प्राच्याश्च दाचिणात्याश्च भीमसेनस्य भागतः। २२४५
अर्ज्जुनस्य तु भागेन कर्णो वैकर्त्तनो मतः। अश्वत्थामा विकर्णश्च सैन्धवश्च जयद्रथः।
अशक्याश्चैव ये केचित् पृथिव्यां शूरमानिनः। सर्व्वांस्तानर्ज्जुनः पार्थः कल्पयामास भागतः।
महेष्वासा राजपुत्त्रा भ्रातरः पञ्च कैकयाः। कैकेयानेव भागेन कृत्वा योत्स्यन्ति संयुगे।
तेषामेव कृतो भागो मालवाः शाल्वकास्तथा। त्रिगर्त्तानाञ्च वै मुख्यौ यौ तौ संसप्तकाविति।
दुर्य्योधनसुताः सर्व्वे तथा दुःशासनस्य च। सौभद्रेण कृतो भागो राजा चैव वृहद्बलः। २२५०
द्रौपदेया महेष्वासाः सुवर्णविकृतध्वजाः। धृष्टद्युम्नमुखा द्रोणमभियास्यन्ति भारत।
चेकितानः सोमदत्तं द्वैरथे योद्धुमिच्छति। भोजन्तु कृतवर्म्माणं युयुधानो युयुत्सति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सहदेवस्तु माद्रेयः शूरः सङ्क्रन्दनो युधि । स्वयं सङ्कल्पयामास श्यालं ते सुबलात्मजं ।
उलूकं चैव कैतव्यं ये च सारस्वता गणाः । नकुलः कल्पयामास भागं माद्रवतीसुतः ।
ये चान्ये पार्थिवा राजन् प्रत्युद्यास्यन्ति संयुगे । समाह्वानेन तांश्चापि पाण्डुपुत्ता अकल्पयन् । २२५५
एवमेषामनीकानि प्रविभक्तानि भागशः । यत्ते कार्य्यं सपुत्तस्य क्रियतां तदकालिकं ।
॥ धृतराष्ट्र उवाच ॥ न सन्ति सर्व्वे पुत्ता मे मूढा दुर्द्यूतदेविनः । येषां युद्धं बलवता भीमेन रणमूर्द्धनि ।
राजानः पार्थिवाः सर्व्वे प्रोक्षिताः कालधर्म्मणा । गाण्डीवाग्निं प्रवेक्ष्यन्ति पतङ्गा इव पावकं ।
विद्रुतां वाहिनीं मन्ये कृतवैरैर्म्महात्मभिः । तां रणे केऽनुयास्यन्ति प्रभग्नां पाण्डवैर्युधि ।
सर्व्वे ह्यतिरथाः शूराः कीर्त्तिमन्तः प्रतापिनः । सूर्य्यपावकयोस्तुल्यास्तेजसा समितिञ्जयाः । २२६०
येषां युधिष्ठिरो नेता गोप्ता च मधुसूदनः । योधौ च पाण्डवौ वीरौ सव्यसाचिवृकोदरौ ।
नकुलः सहदेवश्च धृष्टद्युम्नश्च पार्षतः । सात्यकिर्द्रुपदश्चैव धृष्टद्युम्नस्य सानुजः ।
उत्तमौजाश्च पाञ्चाल्यो युधामन्युश्च दुर्ज्जयः । शिखण्डी क्षत्त्रदेवश्च तथा वैराटिरुत्तरः ।
काशयश्चेदयश्चैव मत्स्याः सर्व्वे च सृञ्जयाः । विराटपुत्तो बभ्रुश्च पाञ्चालाश्च प्रभद्रकाः ।
येषामिन्द्रोऽप्यकामानां न हरेत् पृथिवीमिमां । वीराणां रणधीराणां ये भिन्द्युः पर्व्वतानपि । २२६५
तान् सर्व्वगुणसम्पन्नानमनुष्यप्रतापिनः । क्रोशतो मम दुष्पुत्तो योद्धुमिच्छति सञ्जय ।
॥ दुर्य्योधन उवाच ॥ उभौ स्व एकजातीयौ तथोभौ भूमिगोचरौ । अथ कस्मात् पाण्डवानामेकतो मन्यसे जयं ।
पितामहञ्च द्रोणञ्च कृपं कर्णञ्च दुर्ज्जयं । जयद्रथं सोमदत्तमश्वत्थामानमेव च ।
सुतेजसो महेष्वासानिन्द्रोऽपि सहितोऽमरैः । अशक्तः समरे जेतुं किं पुनस्तात पाण्डवाः ।
सर्व्वे च पृथिवीपाला मदर्थे तात पाण्डवान् । आर्य्या शस्त्रभृतः शूराः समर्थाः प्रतिबाधितुं । २२७०
न मामकान् पाण्डवास्ते समर्थाः प्रतिवीक्षितुं । पराक्रान्तो ह्यहं पाण्डून् सपुत्तान् योद्धुमाहवे ।
मत्प्रियं पार्थिवाः सर्व्वे ये चिकीर्षन्ति भारत । ते तानावारयिष्यन्ति ऐणेयानिव तन्तुना ।
महता रथवंशेन शरजालैश्च मामकैः । अभिद्रुता भविष्यन्ति पाञ्चालाः पाण्डवैः सह ।
॥ धृतराष्ट्र उवाच ॥ उन्मत्त इव मे पुत्तो विलपत्येष सञ्जय । नहि शक्तो रणे जेतुं धर्म्मराजं युधिष्ठिरं ।
जानाति हि यथा भीष्मः पाण्डवानां यशस्विनां । बलवत्तां सपुत्ताणां धर्म्मज्ञानां महात्मनां । २२७५
यतो नारोचयदयं विग्रहं तैर्म्महात्मभिः । किन्तु सञ्जय मे ब्रूहि पुनस्तेषां विचेष्टितं ।
कस्तांस्तरस्विनो भूयः सन्दीपयति पाण्डवान् । अर्च्चिष्मतो महेष्वासान् हविषा पावकानिव ।
॥ सञ्जय उवाच ॥ धृष्टद्युम्नः सदैवतान् सन्दीपयति भारत । युध्यध्वमिति माभैष्ट युद्धाद्भरतसत्तमाः ।
ये केचित् पार्थिवास्तत्र धार्त्तराष्ट्रेण संवृताः । युद्धे समागमिष्यन्ति तुमुले शस्त्रसङ्कुले ।
तान् सर्व्वानाहवे क्रुद्धान् सानुबन्धान् समागतान् । अहमेकः समादास्ये तिमिर्म्मत्स्यानिवोदकात् । २२८०
भीष्मं द्रोणं कृपं कर्णं द्रौणिं शल्यं सुयोधनं । एतांश्चापि निरोत्स्यामि वेलेव मकरालयं ।
तथा ब्रुवन्तं धर्म्मात्मा प्राह राजा युधिष्ठिरः । तव धैर्य्यञ्च वीर्य्यञ्च पाञ्चालाः पाण्डवैः सह ।
सर्व्वे समधिरूढाः स्म सङ्ग्रामान्नः समुद्धर । जानामि त्वां महाबाहो क्षत्त्रधर्म्मे व्यवस्थितं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

समर्थमेकं पर्य्याप्तं कौरवाणां विनिग्रहे। पुरस्तादुपयाताणां कौरवाणां युयुत्सतां।
भवता यद्विधातव्यं तन्नः श्रेयः परन्तप। सङ्ग्रामादपयातानां भग्नानां शरणैषिणां।
पौरुषं दर्शयन् शूरो यस्तिष्ठेदग्रतः पुमान्। क्रीणीयात्तं सहस्रेण इति नीतिमतां मतं। २२८५
स त्वं शूरस्य वीरस्य विक्रान्तस्य नरर्षभ। भयार्त्तानां परित्राता संयुगेषु न संशयः।
एवं ब्रुवति कौन्तेये धर्म्मात्मनि युधिष्ठिरे। धृष्टद्युम्न उवाचेदं मां वचो गतसाध्वसं।
सर्व्वान् जनपदान् सूत तथा दुर्य्योधनस्य ये। सवाह्लिकान् कुरून् ब्रूयाः प्रातिपेयान् शरद्वतः।
सूतपुत्रं तथा द्रोणं सहपुत्रं जयद्रथं। दुःशासनं विकर्णञ्च तथा दुर्य्योधनं नृपं। २२९०
भीष्मञ्च ब्रूहि गत्वा त्वमाशु गच्छत माचिरं।
युधिष्ठिरः साधुनैवाभ्युपेयो मा वोऽवधीदर्ज्जुनो देवगुप्तः। राज्यं दातुं धर्म्मराजस्य तूर्णं याचध्वं वै पाण्डवं लोकवीरं।
नैतादृशो हि योधोऽस्ति पृथिव्यामिह कश्चन। यथाविधः सव्यसाची पाण्डवः सत्यविक्रमः।
देवैर्हि संभृतो दिव्यो रथो गाण्डीवधन्वनः। न स जेयो मनुष्येण मास्म कृढ्वं मनो युधि।
इति श्रीमहाभारते उद्योगपर्व्वणि यानसन्धिपर्व्वणि सञ्जयवाक्ये षट्पञ्चाशोऽध्यायः॥ ५६ ॥
॥ धृतराष्ट्र उवाच॥ क्षत्त्रतेजा ब्रह्मचारी कौमारादपि पाण्डवः। तेन संयुगमेष्यन्ति मन्दा विलपतो मम। २२९५
दुर्य्योधन निवर्त्तस्व युद्धाद्भरतसत्तम। नहि युद्धं प्रशंसन्ति सर्व्वावस्थमरिन्दम।
अलमर्द्धं पृथिव्यास्ते सहामात्यस्य जीवितुं। प्रयच्छ पाण्डुपुत्राणां यथोचितमरिन्दम।
एतद्धि कुरवः सर्व्वे मन्यन्ते धर्म्मसंहितं। यत्त्वं प्रशान्तिं मन्येथाः पाण्डुपुत्रैर्महात्मभिः।
अङ्गेमां समवेक्षस्व पुत्र स्वामेव वाहिनीं। जात एष तवाभावस्त्वं तु मोहान्न बुध्यसे।
न ह्यहं योद्धुमिच्छामि नैतदिच्छति वाह्लिकः। नच भीष्मो नच द्रोणो नाश्वत्थामा न सञ्जयः। २३००
न सोमदत्तो न शलो न कृपो योद्धुमिच्छति। सत्यव्रतः पुरुमित्रो जयो भूरिश्रवास्तथा।
येषु सम्प्रतितिष्ठेयुः कुरवः पीडिताः परैः। ते योद्धुं नाभिनन्दन्ति तत्तुभ्यं तात रोचतां।
न त्वं करोषि कामेन कर्णः कारयिता तव। दुःशासनश्च पापात्मा शकुनिश्चापि सौवलः।
॥ दुर्य्योधन उवाच॥ नाहं भवति न द्रोणे नाश्वत्थाम्नि न सञ्जये। न भीष्मे नच काम्बोजे न कृपे नच वाह्लिके।
सत्यव्रते पुरुमित्रे भूरिश्रवसि वा पुनः। अन्येषु वा तावकेषु भारं कृत्वा समाह्वये। २३०५
अहञ्च तात कर्णश्च रणयज्ञं वितत्य वै। युधिष्ठिरं पशुं कृत्वा दीक्षितौ पुरुषर्षभौ।
रथो वेदी स्रुवः खड्गो गदा स्रुक् कवचं सदः। चातुर्होत्रञ्च धूर्य्यौ मे शरा दर्भा हविर्यशः।
आत्मयज्ञेन नृपते इष्ट्वा वैवस्वतं रणे। विजित्य च समेष्यावो हतामित्रौ श्रियावृतौ।
अहञ्च तात कर्णश्च भ्राता दुःशासनश्च मे। एते वयं हनिष्यामः पाण्डवान् समरे त्रयः।
अहं हि पाण्डवान् हत्वा प्रशास्ता पृथिवीमिमां। माञ्च हत्वा पाण्डुपुत्रा भोक्तारः पृथिवीमिमां। २३१०
त्यक्तं मे जीवितं राज्यं धनं सर्व्वञ्च पार्थिव। न जातु पाण्डवैः सार्द्धं वसेयमहमच्युत।
यावद्धि सूच्यास्तीक्ष्णाया विध्येदग्रेण मारिष। तावदप्यपरित्याज्यं भूमेर्नः पाण्डवान् प्रति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ धृतराष्ट्र उवाच ॥ सर्व्वान् वस्तात शोचामि त्यक्तो दुर्य्योधनो मया । ये मन्दमनुयास्यध्वं यान्तं वैवस्वतक्षयं ।
रुरूणामिव यूथेषु व्याघ्रः प्रहरतां वरः । वरान् वरान् हनिष्यन्ति समेता युधि पाण्डवाः ।
प्रतीपमिव मे भाति युयुधानेन भारती । व्यस्ता सीमन्तिनी ग्रस्ता प्रमृष्टा दीर्घबाहुना । २२१५
सम्पूर्णं पूरयन् भूयो बलं पार्थस्य माधवः । शैनेयः समरे स्थाता बीजवत् प्रवपन् शरान् ।
सेनामुखे प्रयुद्धानां भीमसेनो भविष्यति । तं सर्व्वे संश्रयिष्यन्ति प्राकारमकुतोभयं ।
यदा द्रक्ष्यसि भीमेन कुञ्जरान् विनिपातितान् । विशीर्णदन्तान् गिर्य्याभान् भिन्नकुम्भान् सशोणितान् ।
तानभिप्रेक्ष्य सङ्ग्रामे विशीर्णानिव पर्व्वतान् । भीतो भीमस्य संस्पर्शात् स्मर्त्तासि वचनस्य मे ।
निर्द्दग्धं भीमसेनेन सैन्यं हतरथद्विपं । गतिमग्नेरिव प्रेक्ष्य स्मर्त्तासि वचनस्य मे । २२२०
महद्वो भयमागामि न चेच्छाम्यथ पाण्डवैः । गदया भीमसेनेन हताः शममुपैष्यथ ।
महावनमिव छिन्नं यदा द्रक्ष्यसि पातितं । बलं कुरूणां भीमेन तदा स्मर्त्तासि मे वचः ।
॥ वैशम्पायन उवाच ॥ एतावदुक्त्वा राजा तु सर्व्वांस्तान् पृथिवीपतीन् । अनुभाष्य महाराज पुनः पप्रच्छ सञ्जय ।
इति श्रीमहाभारते उद्योगपर्व्वणि यानसन्धिपर्व्वणि धृतराष्ट्रवाक्ये सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥
॥ धृतराष्ट्र उवाच ॥ यदब्रूतां महात्मानौ वासुदेवधनञ्जयौ । तन्मे ब्रूहि महाप्राज्ञ शुश्रूषे वचनं तव ।
॥ सञ्जय उवाच ॥ शृणु राजन् यथादृष्टौ मया कृष्णधनञ्जयौ । ऊचतुश्चापि यद्वीरौ तत्ते वक्ष्यामि भारत ।
पादाङ्गुलीरभिप्रेक्ष्य प्रयतोऽहं कृताञ्जलिः । शुद्धान्तं प्राविशं राजन्नाख्यातुं नरदेवयोः । २२२५
नैवाभिमन्युर्न यमौ तं देशमभियान्ति वै । यत्र कृष्णौ च कृष्णा च सत्यभामा च भामिनी ।
उभौ मध्वासवक्षीबावुभौ चन्दनरूषितौ । स्रग्विणौ वरवस्त्रौ तौ दिव्याभरणभूषितौ ।
नैकरत्नविचित्रन्तु काञ्चनं महदासनं । विविधास्तरणाकीर्णं यत्रासातामरिन्दमौ ।
अर्ज्जुनोत्सङ्गगौ पादौ केशवस्योपलक्षये । अर्ज्जुनस्य च कृष्णायां सत्यायाञ्च महात्मनः ।
काञ्चनं पादपीठन्तु पार्थो मे प्रादिशत् पदा । तदहं पाणिना स्पृष्ट्वा ततो भूमावुपाविशं । २२३०
ऊर्द्ध्वरेखतलौ पादौ पार्थस्य शुभलक्षणौ । पादपीठादपहृतौ तत्रापश्यमहं शुभौ ।
श्यामौ बृहन्तौ तरुणौ शालस्कन्धाविवोद्गतौ । एकासनगतौ दृष्ट्वा भयं मां महदाविशत् ।
इन्द्रविष्णुसमावेतौ मन्दात्मा नावबुध्यते । संश्रयात् भीष्मद्रोणाभ्यां कर्णस्य च विकत्थनात् ।
निदेशस्थाविमौ यस्य मानसस्तस्य सेत्स्यते । सङ्कल्पो धर्म्मराजस्य निश्चयो मे तदाऽभवत् ।
सत्कृतश्चान्नपानाभ्यामाच्छन्नो लब्धसत्क्रियः । अञ्जलिं मूर्द्ध्नि सन्धाय तौ सन्देशमचोदयं । २२४०
धनुर्गुणकिणाङ्केन पाणिना शुभलक्षणं । पादमानमयन् पार्थः केशवं समचोदयत् ।
इन्द्रकेतुरिवोत्थाय सर्व्वाभरणभूषितः । इन्द्रवीर्य्योपमः कृष्णः संविष्टो मामभाषत ।
वाचं संवदतां श्रेष्ठो ह्लादिनीं वचनक्षमां । त्रासनीं धार्त्तराष्ट्राणां मृदुपूर्व्वां सुदारुणां ।
वाचं तां वचनार्हस्य शिक्षाक्षरसमन्वितां । अश्रौषमहमिष्टार्थां पश्चाद्धृदयहारिणीं ।
॥ वासुदेव उवाच ॥ सञ्जयेदं वचो ब्रूया धृतराष्ट्रं मनीषिणं । कुरुमुख्यस्य भीष्मस्य द्रोणस्यापि च शृण्वतः । २२४५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

आवयोर्वचनात् सूत ज्येष्ठानप्यभिवादयन्। यवीयसश्च कुशलं पश्चात् पृष्ट्वैवमुत्तरं।
यजध्वं विविधैर्यज्ञैर्विप्रेभ्यो दत्तदक्षिणाः। पुत्त्रैर्दारैश्च मोदध्वं महद्वो भयमागतं।
अर्थांस्त्यजत पात्रेभ्यः सुतान् प्राप्नुत कामजान्। प्रियं प्रियेभ्यश्चरत राजा हि त्वरते जये।
ऋणमेतत् प्रवृद्धं मे हृदयान्नापसर्प्पति। यद्गोविन्देति चुक्रोश कृष्णा मां दूरवासिनं।
तेजोमयं दुराधर्षं गाण्डीवं यस्य कार्म्मुकं। मद्द्वितीयेन तेनेह वैरं वः सव्यसाचिना। २२५०
मद्द्वितीयं पुनः पार्थं कः प्रार्थयितुमिच्छति। यो न कालपरीतो वाऽप्यपि साक्षात् पुरन्दरः।
बाहुभ्यामुद्वहेत् भूमिं दहेत् क्रुद्ध इमाः प्रजाः। पातयेत् त्रिदिवाद्देवान् योऽर्ज्जुनं समरे जयेत्।
देवासुरमनुष्येषु यक्षगन्धर्व्वभोगिषु। न तं पश्याम्यहं युद्धे पाण्डवं योऽभ्ययाद्रणे।
यत्तद्विराटनगरे श्रूयते महदद्भुतं। एकस्य च बहूनाञ्च पर्य्याप्तं तन्निदर्शनं।
एकेन पाण्डुपुत्त्रेण विराटनगरे यदा। भग्नाः पलायत दिशः पर्य्याप्तं तन्निदर्शनं। २२५५
बलं वीर्य्यञ्च तेजश्च शीघ्रता लघुहस्तता। अविषादश्च धैर्य्यञ्च पार्थान्नान्यत्र विद्यते।
इत्यब्रवीद्धृषीकेशः पार्थमुद्धर्षयन् गिरा। गर्जन् समयवर्षीव गगने पाकशासनः।
केशवस्य वचः श्रुत्वा किरीटी श्वेतवाहनः। अर्ज्जुनस्तन्महद्वाक्यमब्रवीद्रोमहर्षणं।
इति श्रीमहाभारते उद्योगपर्व्वणि यानसन्धिपर्व्वणि सञ्जयवाक्ये अष्टपञ्चाशोऽध्यायः॥ ५८॥
॥ वैशम्पायन उवाच॥ सञ्जयस्य वचः श्रुत्वा प्रज्ञाचक्षुर्जनेश्वरः। ततः सङ्ख्यातुमारेभे तद्वचो गुणदोषतः।
प्रसङ्ख्याय च सौक्ष्म्येण गुणदोषान्विचक्षणः। यथावन्मतितत्त्वेन जयकामः सुतान्प्रति। २२६०
बलाबलं विनिश्चित्य याथातथ्येन बुद्धिमान्। शक्तिं सङ्ख्यातुमारेभे तदा वै मनुजाधिपः।
देवमानुषयोः शक्त्या तेजसा चैव पाण्डवान्। कुरून् शक्त्याऽल्पतरया दुर्य्योधनमथाब्रवीत्।
दुर्य्योधनेयं चिन्ता मे शश्वन्न व्युपशाम्यति। सत्यं ह्येतदहं मन्ये प्रत्यक्षं नानुमानतः।
आत्मजेषु परं स्नेहं सर्व्वभूतानि कुर्व्वते। प्रियाणि चैषां कुर्व्वन्ति यथाशक्ति हितानि च।
एवमेवोपकर्त्तॄणां प्रायशो लक्षयामहे। इच्छन्ति बहुलं सन्तः प्रतिकर्त्तुं महत्प्रियं। २२६५
अग्निः साचिव्यकर्त्ता स्यात् खाण्डवे तत्कृतं स्मरन्। अर्ज्जुनस्यापि भीमेऽस्मिन् कुरुपाण्डुसमागमे।
जातिगृद्ध्याऽभिपन्नाश्च पाण्डवानामनेकशः। धर्म्मादयः समेष्यन्ति समाहूता दिवौकसः।
भीष्मद्रोणकृपादीनां भयादशनिसम्मितं। रिरक्षिषन्तः संरम्भं गमिष्यन्तीति मे मतिः।
ते देवैः सहिताः पार्था न शक्याः प्रतिवीक्षितुं। मानुषेण नरव्याघ्रा वीर्य्यवन्तोऽस्त्रपारगाः।
दुरासदं यस्य दिव्यं गाण्डीवं धनुरुत्तमं। वारुणौ चाक्षयौ दिव्यौ शरपूर्णौ महेषुधी। २२७०
वानरश्च ध्वजे दिव्यो निःसङ्गो धूमवद्गतिः। रथश्च चतुरन्तायां यस्य नास्ति समः क्षितौ।
महामेघनिभश्चापि निर्घोषः श्रूयते जनैः। महाशनिसमः शब्दः शात्रवाणां भयङ्करः।
यञ्चातिमानुषं वीर्य्यं कृत्स्नो लोको व्यवस्यति। देवानामपि जेतारं यं विदुः पार्थिवा रणे।
शतानि पञ्च चैवेषून् यो गृह्णन्नेव दृश्यते। निमेषान्तरमात्रेण मुञ्चन्दूरञ्च पातयन्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

यमाह भीष्मो द्रोणश्च कृपो द्रौणिस्तथैव च। मद्रराजस्तथा शल्यो मध्यस्था ये च मानवाः।
युद्धायावस्थितं पार्थं पार्थिवैरतिमानुषैः। अशक्यं रथशार्दूलं पराजेतुमरिन्दमं।
सदृशं बाहुवीर्य्येण कार्त्तवीर्य्यस्य पाण्डवं। क्षिपत्येकेन वेगेन पञ्चवाणशतानि यः।
तमर्ज्जुनं महेष्वासं महेन्द्रोपेन्द्रविक्रमं। निघ्नन्तमिव पश्यामि विमर्द्देऽस्मिन्महाहवे।
इत्येवं चिन्तयन् कृत्स्नमहोरात्राणि भारत। अनिद्रो निःसुखश्चास्मि कुरूणां शमचिन्तया।
क्षयोदयोऽयं सुमहान् कुरूणां प्रत्युपस्थितः। अस्य चेत् कलहस्यान्तः शमादन्यो न विद्यते।
शमो मे रोचते नित्यं पार्थैस्तात न विग्रहः। कुरुभ्यो हि सदा मन्ये पाण्डवान् शक्तिमत्तरान्।
इति श्रीमहाभारते उद्योगपर्व्वणि यानसन्धिपर्व्वणि धृतराष्ट्रविवेचने एकोनषष्टोऽध्यायः॥ ५९ ॥
॥ वैशम्पायन उवाच ॥ पितुरेतद्वचः श्रुत्वा धार्त्तराष्ट्रोऽत्यमर्षणः। आधाय विपुलं क्रोधं पुनरेवेदमब्रवीत्।
अशक्या देवसचिवाः पार्थाः स्युरिति यद्भवान्। मन्यते तद्भयं व्येतु भवतो राजसत्तम।
अकामद्वेषसंयोगात् लोभात् द्रोहाच्च भारत। उपेक्षया च भावानां देवा देवत्वमाप्नुवन्।
इति द्वैपायनो व्यासो नारदश्च महातपाः। जामदग्न्यश्च रामो नः कथामकथयत् पुरा।
नैव मानुषवद्देवाः प्रवर्त्तन्ते कदाचन। कामात् क्रोधात् तथा लोभात् द्वेषाच्च भरतर्षभ।
यदा ह्यग्निश्च वायुश्च धर्म्म इन्द्रोऽश्विनावपि। कामयोगात् प्रवर्त्तेरन्न पार्था दुःखमाप्नुयुः।
तस्मान्न भवता चिन्ता कार्य्यैषा स्यात् कथञ्चन। दैवेष्वपेक्षका ह्येते शश्वद्भावेषु भारत।
अथचेत कामसंयोगात द्वेषो लोभश्च लक्ष्यते। देवेषु देवप्रामाण्यान्नैषां तद्विक्रमिष्यति।
मयाऽभिमन्त्रितः शश्वज्जातवेदाः प्रशाम्यति। दिधक्षुः सकलाल्लोकान् परिक्षिप्य समन्ततः।
यद्वा परमकं तेजो येन युक्ता दिवौकसः। ममाप्यनुपमं भूयो देवेभ्यो विद्धि भारत।
विदीर्य्यमाणां वसुधां गिरीणां शिखराणि च। लोकस्य पश्यतो राजन् स्थापयाम्यभिमन्त्रणात्।
चेतनाचेतनस्यास्य जङ्गमस्थावरस्य च। विनाशाय समुत्पन्नं महाघोरं महास्वनं।
अश्मवर्षञ्च वायुञ्च शमयामीह नित्यशः। जगतः पश्यतोऽभीक्ष्णं भूतानामनुकम्पया।
स्तम्भितास्वप्सु गच्छन्ति मया रथपदातयः। देवासुराणां भावानामहमेकः प्रवर्त्तिता।
अक्षौहिणीभिर्य्यान् देशान् यामि कार्य्येण केनचित्। तत्राश्वा मे प्रवर्त्तन्ते यत्र यत्राभिकामये।
भयानकानि विषये व्यालादीनि न सन्ति मे। मन्त्रगुप्तानि भूतानि न हिंसन्ति भयङ्कराः।
निकामवर्षी पर्जन्यो राजन् विषयवासिनां। धर्म्मिष्ठाश्च प्रजाः सर्व्वा ईतयश्च न सन्ति मे।
अश्विनावथ वाय्वग्नी मरुद्भिः सह वृत्रहा। धर्म्मश्चैव मया द्विष्टान् नोत्सहन्तेऽभिरक्षितुं।
यदि ह्येते समर्थाः स्युर्मद्द्विषस्त्रातुमञ्जसा। न स्म त्रयोदशसमाः पार्था दुःखमवाप्नुयुः।
नैव देवा न गन्धर्व्वा नासुरा न च राक्षसाः। शक्तास्त्रातुं मया द्विष्टं सत्यमेतत् ब्रवीमि ते।
यदभिध्याम्यहं शश्वत् शुभं वा यदि वाऽशुभं। नैतद्विपन्नपूर्व्वं मे मित्रेष्वरिषु चोभयोः।
भविष्यतीदमिति वा यत्ब्रवीमि परन्तप। नान्यथा भूतपूर्व्वञ्च सत्यवागिति मां विदुः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

लोकसाक्षिकमेतन्मे माहात्म्यं दिक्षु विश्रुतं। आश्वासनार्थं भवतः प्रोक्तं न श्लाघया नृप।
नह्यहं श्लाघनो राजन् भूतपूर्व्वः कदाचन। असदाचरितं ह्येतद्यदात्मानं प्रशंसति। २४०५
पाण्डवांश्चैव मत्स्यांश्च पाञ्चालान् कैकयैः सह। सात्यकिं वासुदेवञ्च श्रोतासि विजितान्मया।
सरितः सागरं प्राप्य यथा नश्यन्ति सर्व्वशः। तथैव ते विनङ्क्ष्यन्ति मामासाद्य सहान्वयाः।
परा बुद्धिः परं तेजो वीर्य्यञ्च परमं मम। परा विद्या परो योगो मम तेभ्यो विशिष्यते।
पितामहस्य द्रोणस्य कृपः शल्यः शलस्तथा। अस्त्रेषु यत् प्रजानन्ति सर्व्वं तन्मयि विद्यते।
इत्युक्त्वा सञ्जयं भूयः पर्य्यपृच्छत भारत। ज्ञात्वा युयुत्सोः कार्य्याणि प्राप्तकालमरिन्दमः। २४१०

इति श्रीमहाभारते उद्योगपर्व्वणि यानसन्धिपर्व्वणि दुर्य्योधनवाक्ये षष्टोऽध्यायः ॥ ६० ॥

॥ वैशम्पायन उवाच ॥ तथा तु पृच्छन्तमतीव पार्थं वैचित्रवीर्य्यं तमचिन्तयित्वा। उवाच कर्णो धृतराष्ट्रपुत्रं प्रहर्षयन् संसदि कौरवाणां।
मिथ्या प्रतिज्ञाय मया यदस्त्रं रामाद्धृतं ब्रह्ममयं पुरस्तात्। विज्ञाय तेनास्मि तदैवमुक्तस्तेनान्तकाले प्रतिभाऽस्यतीति।
महापराधे ह्यपि यत्र तेन महर्षिणाऽहं गुरुणा च शप्तः। शक्तः प्रदग्धुं ह्यपि तिग्मतेजाः ससागरामप्यवनिं महर्षिः।
प्रसादितं ह्यस्य मया मनोऽभूत् शुश्रूषया स्वेन च पौरुषेण। तदस्ति चास्त्रं मम सावशेषं तस्मात् समर्थोऽस्मि ममैव भारः।
निमेषमात्रात्तमृषेः प्रसादमवाप्य पाञ्चालकरूषमत्स्यान्। निहत्य पार्थान् सहपुत्त्रपौत्त्रैर्लोकानहं शस्त्रजितान् प्रपत्स्ये। २४१५
पितामहस्तिष्ठतु ते समीपे द्रोणश्च सर्व्वे च नरेन्द्रमुख्याः। यथा प्रधानेन बलेन गत्वा पार्थान् हनिष्यामि ममैष भारः।
एवं ब्रुवन्तं तमुवाच भीष्मः किं कत्थसे कालपरीतबुद्धे। न कर्ण जानासि यथा प्रधाने हते हताः स्युर्धृतराष्ट्रपुत्त्राः।
यत् खाण्डवं दाहयता कृतं हि कृष्णद्वितीयेन धनञ्जयेन। श्रुत्वैव तत् कर्म्म नियन्तुमात्मा युक्तस्त्वया वै सह बान्धवेन।
याञ्चापि शक्तिं त्रिदशाधिपस्ते ददौ महात्मा भगवान्महेन्द्रः। भस्मीकृतां तां समरे विशीर्णां चक्राहतां द्रक्ष्यसि केशवेन।
यस्ते शरः सर्पमुखो विभाति सदाग्र्यमाल्यैर्महितः प्रयत्नात्। सपाण्डुपुत्त्राभिहतः शरौघैः सह त्वया यास्यति कर्ण नाशं। २४२०
बाणस्य भौमस्य च कर्ण हन्ता किरीटिनं रक्षति वासुदेवः। यस्त्वादृशानाञ्च वरीयसाञ्च हन्ता रिपूणां तुमुले प्रगाढे।
॥ कर्ण उवाच ॥ असंशयं वृष्णिपतिर्यथोक्तस्तथा च भूयांश्च ततो महात्मा। अहं यदुक्तं परुषन्तु किञ्चित् पितामहस्तस्य फलं शृणोतु।
न्यस्यामि शस्त्राणि न जातु सङ्ख्ये पितामहो द्रक्ष्यति मां सभायां। त्वयि प्रशान्ते तु मम प्रभावं द्रक्ष्यन्ति सर्व्वे भुवि भूमिपालाः।
॥ वैशम्पायन उवाच ॥ इत्येवमुक्त्वा स महाधनुष्मान् हित्वा सभां स्वं भवनं जगाम। भीष्मस्तु दुर्य्योधनमेव राजन् मध्ये कुरूणां प्रहसन्नुवाच।
सत्यप्रतिज्ञः किल सूतपुत्त्रस्तथा स भारं विषहेत कस्मात्। व्यूहं प्रतिव्यूह्य शिरांसि भित्त्वा लोकक्षयं पश्यत भीमसेनात्। २४२५
आवन्त्यकालिङ्गजयद्रथेषु चेदिध्वजे तिष्ठति बाह्लिके च। अहं हनिष्यामि सदा परेषां सहस्रशश्चायुतशश्च योधान्।
यदैव रामे भगवत्यनिन्द्ये ब्रह्मब्रुवाणः कृतवांस्तदस्त्रं। तदैव धर्म्मश्च तपश्च नष्टं वैकर्त्तनस्याधमपूरुषस्य।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तथोक्तवाक्ये नृपतीन्द्रभीष्मे निःक्षिप्य शस्त्राणि गते च कर्णे। वैचित्रवीर्य्यस्य सुतोऽल्पबुद्धिर्दुर्य्योधनः शान्तनवं बभाषे।

इति श्रीमहाभारते उद्योगपर्व्वणि यानसन्धिपर्व्वणि कर्णवाक्ये एकषष्टोऽध्यायः ॥ ६१ ॥

॥ दुर्य्योधन उवाच ॥ सदृशानां मनुष्येषु सर्व्वेषां तुल्यजन्मनां। कथमेकान्ततस्तेषां पार्थानां मन्यसे जयं।

वयञ्च तेऽपि तुल्या वै वीर्य्येण च पराक्रमैः। समेन वयसा चैव प्रातिभेन श्रुतेन च। २४९०

अस्त्रेण योधयुग्यासु शीघ्रत्वे कौशले तथा। सर्व्वे स्म समजातीयाः सर्व्वे मानुषयोनयः।

पितामह विजानीषे पार्थिषु विजयं कथं। नाहं भवति न द्रोणे न कृपे न च वाह्लिके।

अन्येषु च नरेन्द्रेषु पराक्रम्य समारभे। अहं वैकर्त्तनः कर्णो भ्राता दुःशासनश्च मे।

पाण्डवान् समरे पञ्च हनिष्यामः शितैः शरैः। ततो राजन्महायज्ञैर्व्विविधैर्भूरिदक्षिणैः।

ब्राह्मणांस्तर्पयिष्यामि गोभिरश्वैर्धनेन च। यदा परिहरिष्यन्ति ऐणेयानिव तन्तुना। २४९५

अतरित्रानिव जले बाहुभिर्म्मामका रणे। पश्यन्तस्ते परांस्तत्र रथनागसमाकुलान्।

तदादर्पं विमोक्ष्यन्ति पाण्डवाः स च केशवः।

॥ विदुर उवाच ॥ इह निःश्रेयसं प्राहुर्वृद्धा निश्चितदर्शिनः। ब्राह्मणस्य विशेषेण दमो धर्म्मः सनातनः।

तस्य दानं क्षमा सिद्धिर्यथावदुपपद्यते। दमो दानं तपो ज्ञानमधीतञ्चानुवर्त्तते।

दमस्तेजो वर्द्धयति पवित्रं दम उत्तमं। विपाप्मा वृद्धतेजास्तु पुरुषो विन्दते महत्। २५००

क्रव्याद्भ्य इव भूतानामदान्तेभ्यः सदाभयं। येषाञ्च प्रतिषेधार्थं क्षत्रं सृष्टं स्वयम्भुवा।

आश्रमेषु चतुर्ष्वाहुर्दममेवोत्तमं व्रतं। तस्य लिङ्गं प्रवक्ष्यामि येषां समुदयो दमः।

क्षमा धृतिरहिंसा च समता सत्यमार्जवं। इन्द्रियाभिजयो धैर्य्यं मार्द्दवं ह्रीरचापलं।

अकार्पण्यमसंरम्भः सन्तोषः श्रद्दधानता। एतानि यस्य राजेन्द्र स दान्तः पुरुषः स्मृतः।

कामो लोभश्च दर्पश्च मन्युर्निद्रा विकत्थनं। मान ईर्ष्या च शोकश्च नैतद्दान्तो निषेवते। २५०५

अजिह्ममशठं शुद्धमेतद्दान्तस्य लक्षणं। अलोलुपस्तथाऽल्पेप्सुः कामानामविचिन्तिता।

समुद्रकल्पः पुरुषः स दान्तः परिकीर्त्तितः। सुवृत्तः शीलसम्पन्नः प्रसन्नात्मात्मविद्बुधः।

प्राप्येह लोके सम्मानं सुगतिं प्रेत्य गच्छति। अभयं यस्य भूतेभ्यः सर्व्वेषामभयं यतः।

स वै परिणतप्रज्ञः प्रख्यातो मनुजोत्तमः। सर्व्वभूतहितो मैत्रस्तस्मान्नोद्विजते जनः।

समुद्र इव गम्भीरः प्रज्ञातृप्तः प्रशाम्यति। कर्म्मणा चरितं पूर्व्वं सद्भिराचरितञ्च यत्। २५१०

तदेवास्थाय मोदन्ते दान्ताः शमपरायणाः। नैष्कर्म्यं वा समास्थाय ज्ञानतृप्तो जितेन्द्रियः।

कालाकाङ्क्षी चरेल्लोके ब्रह्मभूयाय कल्पते। शकुनीनामिवाकाशे पदं नैवोपलभ्यते।

एवं प्रज्ञानतृप्तस्य मुनेर्वर्त्म न दृश्यते। उत्सृज्य वा गृहान् यस्तु मोक्षमेवाभिमन्यते।

लोकास्तेजोमयास्तस्य कल्पन्ते शाश्वता दिवि।

इति श्रीमहाभारते उद्योगपर्व्वणि यानसन्धिपर्व्वणि विदुरवाक्ये द्विषष्टोऽध्यायः ॥ ६२ ॥

॥ विदुर उवाच ॥ शकुनीनामिहार्थाय पाशं भूमावयोजयत्। कश्चिच्छाकुनिकस्तात पूर्व्वमामिति शुश्रुम। २५१५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

तस्मिन्द्वौ शकुनौ बद्धौ युगपत् सहचारिणौ। तावुपादाय तं पाशं जग्मतुः खचरावुभौ।
तौ विहायसमाक्रान्तौ दृष्ट्वा शाकुनिकस्तदा। अन्वधावदनिर्व्विण्णो येन येन स्म गच्छतः।
तथा तमनुधावन्तं मृगयुं शकुनार्थिनं। आश्रमस्थो मुनिः कश्चिद्ददर्शाथ कृताह्निकः।
तावन्तरीक्षगौ शीघ्रमनुयान्तं महीचरं। श्लोकेनानेन कौरव्य पप्रच्छ स मुनिस्तदा।
विचित्रमिदमाश्चर्य्यं मृगहन् प्रतिभाति मे। प्लवमानौ हि खचरौ पदातिरनुधावसि।
॥ शाकुनिक उवाच ॥ पाशमेकमुभावेतौ सहितौ हरतो मम। यत्र वै विवदिष्येते तत्र मे वशमेष्यतः।
॥ विदुर उवाच ॥ तौ विवादमनुप्राप्तौ शकुनौ मृत्युसम्मितौ। विगृह्य च सुदुर्ब्बुद्धी पृथिव्यां संनिपेततुः।
तौ युध्यमानौ संरब्धौ मृत्युपाशवशानुगौ। उपसृत्यापरिज्ञातो जग्राह मृगहा तदा।
एवं ये ज्ञातयोऽर्थेषु मिथो गच्छन्ति विग्रहं। तेऽमित्रवशमायान्ति शकुनाविव विग्रहात्।
सम्भोजनं सङ्कथनं सम्प्रश्नोऽथ समागमः। एतानि ज्ञातिकार्य्याणि न विरोधः कदाचन।
ये स्म काले सुमनसः सर्व्वे वृद्धानुपासते। सिंहगुप्तमिवारण्यमप्रधृष्या भवन्ति ते।
येऽर्थं सततमासाद्य दीना इव समासते। श्रियं ते सम्प्रयच्छन्ति द्विषद्भ्यो भरतर्षभ।
धूमायन्ते व्यपेतानि ज्वलन्ति सहितानि च। धृतराष्ट्रोल्मुकानीव ज्ञातयो भरतर्षभ।
इदमन्यत् प्रवक्ष्यामि यथादृष्टं गिरौ मया। श्रुत्वा तदपि कौरव्य यथा श्रेयस्तथा कुरु।
वयं किरातैः सहिता गच्छामो गिरिमुत्तरं। ब्राह्मणैर्द्देवकल्पैश्च विद्याजम्भकवार्त्तिकैः।
कुञ्जभूतं गिरिं सर्व्वमभितो गन्धमादनं। दीप्यमानौषधिगणं सिद्धगन्धर्व्वसेवितं।
तत्रापश्याम वै सर्व्वे मधुपीतकमाक्षिकं। मरुप्रपाते विषमे निविष्टं कुम्भसम्मितं।
आशीविषै रक्ष्यमाणं कुवेरदयितं भृशं। यत् प्राप्य पुरुषो मर्त्त्योऽप्यमरत्वं नियच्छति।
अचक्षुर्लभते चक्षुर्वृद्धो भवति वै युवा। इति ते कथयन्ति स्म ब्राह्मणा जम्भसाधकाः।
ततः किरातास्तद्दृष्ट्वा प्रार्थयन्तो महीपते। विनेशुर्व्विषमे तस्मिन् ससर्पे गिरिगह्वरे।
तथैव तव पुत्त्रोऽयं पृथिवीमेक इच्छति। मधु पश्यति सम्मोहात् प्रपातं नानुपश्यति।
दुर्य्योधनो योद्धुमनाः समरे सव्यसाचिना। नच पश्यामि तेजोऽस्य विक्रमं वा तथाविधं।
एकेन रथमास्थाय पृथिवी येन निर्ज्जिता। भीष्मद्रोणप्रभृतयः सन्त्रस्ताः साधुयायिनः।
विराटनगरे भग्नाः किन्नु तत् विस्मृतं तव। प्रतीक्षमाणो यो वीरः क्षमते वीक्षितं तव।
द्रुपदो मत्स्यराजश्च संक्रुद्धश्च धनञ्जयः। न शेषयेयुः समरे वातयुक्ता इवाग्नयः।
अङ्के कुरुष्व राजानं धृतराष्ट्र युधिष्ठिरं। युध्यतोर्हि द्वयोर्युद्धे नैकान्तेन भवेज्जयः।
इति श्रीमहाभारते उद्योगपर्व्वणि यानसन्धिपर्व्वणि विदुरवाक्ये त्रिषष्टोऽध्यायः॥ ६३ ॥
॥ धृतराष्ट्र उवाच ॥ दुर्य्योधन विजानीहि यत् त्वां वक्ष्यामि पुत्त्रक। उत्पथं मन्यसे मार्गमनभिज्ञ इवाध्वग.।
पञ्चानां पाण्डुपुत्त्राणां यत्तेजः प्रजिहीर्षसि। पञ्चानामिव भूतानां महतां लोकधारिणां।
युधिष्ठिरं हि कौन्तेयं परं धर्म्ममिहास्थितं। परां गतिमसंप्रेत्य न त्वं जेतुमिहार्हसि।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

भीमसेनन्तु कौन्तेयं यस्य नास्ति समो बले। रणान्तकं तर्ज्जयसे महावातमिव द्रुमः। २४८५
सर्व्वशस्त्रभृतां श्रेष्ठं मेरुं शिखरिणामिव। युधि गाण्डीवधन्वानं को नु युध्येत बुद्धिमान्।
धृष्टद्युम्नश्च पाञ्चाल्यः कमिहाद्य न शातयेत्। शत्रुमध्ये शरान् मुञ्चन् देवराडशनीमिव।
सात्यकिश्चापि दुर्द्धर्षः सम्मतोऽन्धकवृष्णिषु। ध्वंसयिष्यति ते सेनां पाण्डवेयहिते रतः।
यः पुनः प्रतिमानेन त्रीँल्लोकानतिरिच्यते। तं कृष्णं पुण्डरीकाक्षं को नु युध्येत बुद्धिमान्।
एकतो ह्यस्य दाराश्च ज्ञातयश्च सबान्धवाः। आत्मा च पृथिवी चेयमेकतश्च धनञ्जयः। २४९०
वासुदेवोऽपि दुर्द्धर्षो यतात्मा यस्य पाण्डवः। अविषह्यं पृथिव्याऽपि तद्बलं यत्र केशवः।
तिष्ठ तात सतां वाक्ये सुहृदामर्थवादिनां। वृद्धं शान्तनवं भीष्मं तितिक्षस्व पितामहं।
माञ्च ब्रुवाणं शुश्रूष कुरूणामर्थदर्शिनं। द्रोणं कृपं विकर्णञ्च महाराजञ्च वाह्लिकं।
एते ह्यपि यथैवाहं मन्तुमर्हसि तांस्तथा। सर्व्वे धर्म्मविदो ह्येते तुल्यस्नेहाश्च भारत।
यत्तद्विराटनगरे सह भ्रातृभिरग्रतः। उत्सृज्य गाः सुसन्त्रस्तं बलं ते समशीर्य्यत। २४९५
यच्चैव नगरे तस्मिन् श्रूयते महदद्भुतं। एकस्य च बहूनाञ्च पर्य्याप्तं तन्निदर्शनं।
अर्ज्जुनस्तु तथाऽकार्षीत् किं पुनः सर्व्व एव ते। सभ्रातॄनभिजानीहि वृत्त्यांश्च परिपालय।
इति श्रीमहाभारते उद्योगपर्व्वणि यानसन्धिपर्व्वणि धृतराष्ट्रवाक्ये चतुःषष्टोऽध्यायः॥ ६४ ॥
॥ वैशम्पायन उवाच ॥ एवमुक्त्वा महाप्राज्ञो धृतराष्ट्रः सुयोधनं। पुनरेव महाभागः सञ्जयं पर्य्यपृच्छत।
ब्रूहि सञ्जय यच्छेषं वासुदेवादनन्तरं। यदर्ज्जुन उवाच त्वां परं कौतूहलं हि मे।
॥ सञ्जय उवाच ॥ वासुदेववचः श्रुत्वा कुन्तीपुत्त्रो धनञ्जयः। उवाच काले दुर्द्धर्षो वासुदेवस्य शृण्वतः। २५००
पितामहं शान्तनवं धृतराष्ट्रञ्च सञ्जय। द्रोणं कृपञ्च कर्णञ्च महाराजञ्च वाह्लिकं।
द्रौणिञ्च सोमदत्तञ्च शकुनिं चापि सौबलं। दुःशासनं शलञ्चैव पुरुमित्रं विविंशतिं।
विकर्णं चित्रसेनञ्च जयत्सेनञ्च पार्थिवं। विन्दानुविन्दावावन्त्यौ दुर्म्मुखञ्चापि कौरवं।
सैन्धवं दुःसहञ्चैव भूरिश्रवसमेव च। भगदत्तञ्च राजानं जलसन्धञ्च पार्थिवं।
ये चाप्यन्ये पार्थिवास्तत्र योद्धुं समागताः कौरवाणां प्रियार्थं। मुमूर्षवः पाण्डवाग्नौ प्रदीप्ते समानीता धार्त्तराष्ट्रेण होतुं। २५०५
यथान्यायं कौशलं वन्दनञ्च समागता मद्वचनेन वाच्याः। इदं ब्रूयाः सञ्जय राजमध्ये सुयोधनं पापकृतां निधानं।
अमर्षणं दुर्म्मतिं राजपुत्त्रं पापात्मानं धार्त्तराष्ट्रं सुलुब्धं। सर्व्वं ममैतत् वचनं समग्रं सहामात्यं सञ्जय श्रावयेथाः।
एवं प्रतिष्ठाप्य धनञ्जयो मां ततोऽर्थवद्धर्म्मवच्चापि वाक्यं। प्रोवाचेदं वासुदेवं समीक्ष्य पार्थो धीमान् लोहितान्तायताक्षः।
यथाश्रुतं ते वदतो महात्मनो मधुप्रवीरस्य वचः समाहितं। तथैव वाच्यं भवता हि मद्वचः समागतेषु क्षितिपेषु सर्व्वशः।
महाशराग्नौ रथवायुनोद्धते धनुःस्रुवेणास्त्रबलापहारिणा। यथा न होमः क्रियते महामृधे समेत्य सर्व्वे प्रयतध्वमादृताः। २५१०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

न चेत् प्रयच्छध्वममित्रघातिनो युधिष्ठिरस्यांशमभीप्सितं स्वकं । नयामि वः साश्वपदातिकुञ्जरान् दिशं पितॄणामशिवां शितैः शरैः ।

ततोऽहमामन्त्र्य तदा धनञ्जयं चतुर्भुजं चैव नमस्य सत्वरः । जवेन सम्प्राप्त इहामरद्युते तवान्तिकं प्रापयितुं वचो महत् ।

इति श्रीमहाभारते उद्योगपर्व्वणि यानसन्धिपर्व्वणि सञ्जयवाक्ये पञ्चषष्टोऽध्यायः ॥ ६५ ॥

॥ वैशम्पायन उवाच ॥ दुर्य्योधने धार्त्तराष्ट्रे तद्वचो नाभिनन्दति । तूष्णीं भूतेषु सर्व्वेषु समुत्तस्थुर्नरर्षभाः ।
उत्थितेषु महाराज पृथिव्यां सर्व्वराजसु । रहिते सञ्जयं राजा परिप्रष्टुं प्रचक्रमे ।
आशंसमानो विजयं तेषां पुत्त्रवशानुगः । आत्मनश्च परेषाञ्च पाण्डवानाञ्च निश्चयं । २५१५

॥ धृतराष्ट्र उवाच ॥ गावल्गणे ब्रूहि नः सारफल्गु स्वसेनायां यावदिहास्ति किञ्चित् । त्वं पाण्डवानां निपुणं वेत्थ सर्व्वं किमेषां ज्यायः किमु तेषां कनीयः ।

त्वमेतयोः सारवित् सर्व्वदर्शी धर्म्मार्थयोर्निपुणो निश्चयज्ञः । स मे पृष्टः सञ्जय ब्रूहि सर्व्वं युध्यमानाः कतरेऽस्मिन् न सन्ति ।

॥ सञ्जय उवाच ॥ न त्वां ब्रूयां रहिते जातु किञ्चिदसूया हि त्वां प्रविशेत राजन् । आनयस्व पितरं महाव्रतं गान्धारीञ्च महिषीमाजमीढ ।

तौ तेऽसूयां विनयेतां नरेन्द्र धर्म्मज्ञौ तौ निपुणौ निश्चयज्ञौ । तयोस्तु त्वां सन्निधौ तद्वदेयं कृत्स्नं मतं केशवपार्थयोर्यत् ।
॥ वैशम्पायन उवाच ॥ इत्युक्तेन च गान्धारी व्यासश्चात्राजगामह । आनीतौ विदुरेणेह सभां शीघ्रं प्रवेशितौ । २५२०
ततस्तन्मतमाज्ञाय सञ्जयस्यात्मजस्य च । अभ्युपेत्य महाप्राज्ञः कृष्णद्वैपायनोऽब्रवीत् ।

॥ व्यास उवाच ॥ संपृच्छते धृतराष्ट्राय सञ्जय आचक्ष्व सर्व्वं यावदेषोऽनुयुङ्क्ते । सर्व्वं तावद्वेत्थ तस्मिन् यथावद्याथातथ्यं वासुदेवेऽर्ज्जुने च ।

इति श्रीमहाभारते उद्योगपर्व्वणि यानसन्धिपर्व्वणि सञ्जयवाक्ये षडधिकषष्टोऽध्यायः ॥ ६६ ॥

॥ सञ्जय उवाच ॥ अर्ज्जुनो वासुदेवश्च धन्विनौ परमार्च्चितौ । कामादन्यत्र सम्भूतौ सर्व्वभावाय सम्मतौ ।
व्यामान्तरं समास्थाय यथायुक्तं मनस्विनः । चक्रं तद्वासुदेवस्य मायया वर्त्तते विभोः ।
सापह्नवं कौरवेषु पाण्डवानां सुसम्मतं । सारासारबलं ज्ञातुं तेजःपुञ्जावभासितं । २५२५
नरकं शम्बरञ्चैव कंसं चैद्यञ्च माधवः । जितवान् घोरसङ्काशान् क्रीडन्निव महाबलः ।
पृथिवीञ्चान्तरीक्षञ्च द्याञ्चैव पुरुषोत्तमः । मनसैव विशिष्टात्मा नयत्यात्मवशं वशी ।
भूयो भूयश्च यद्राजन् पृच्छसे पाण्डवान् प्रति । सारासारं बलं ज्ञातुं तत्समासेन मे शृणु ।
एकतो वा जगत्कृत्स्नमेकतो वा जनार्द्दनः । सारतो जगतः कृत्स्नादतिरिक्तो जनार्द्दनः ।
भस्म कुर्य्याज्जगदिदं मनसैव जनार्द्दनः । न च कृत्स्नं जगच्छक्तं भस्मीकर्त्तुं जनार्द्दनं । २५३०
यतः सत्यं यतो धर्म्मो यतो ह्रीरार्ज्जवं यतः । ततो भवति गोविन्दो यतः कृष्णस्ततो जयः ।
पृथिवीं चान्तरीक्षञ्च दिवञ्च पुरुषोत्तमः । विचेष्टयति भूतात्मा क्रीडन्निव जनार्द्दनः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

स कृत्वा पाण्डवान् सत्रं लोकं सम्मोहयन्निव । अधर्म्मनिरतान्मूढान् दग्धुमिच्छति ते सुतान् ।
कालचक्रं जगच्चक्रं युगचक्रञ्च केशवः । आत्मयोगेन भगवान् परिवर्त्तयतेऽनिशं ।
कालस्य च हि मृत्योश्च जङ्गमस्थावरस्य च । ईशते भगवानेकः सत्यमेतत् ब्रवीमि ते । २५३५
ईशन्नपि महायोगी सर्व्वस्य जगतो हरिः । कर्म्माण्यारभते कर्त्तुं कीनाश इव वर्द्धनः ।
तेन वञ्चयते लोकान्मायायोगेन केशवः । ये तमेव प्रपद्यन्ते तेन मुह्यन्ति मानवाः ।
इति श्रीमहाभारते उद्योगपर्व्वणि यानसन्धिपर्व्वणि सञ्जयवाक्ये सप्तषष्टोऽध्यायः ॥ ६७ ॥
॥ धृतराष्ट्र उवाच ॥ कथं त्वं माधवं वेत्थ सर्व्वलोकमहेश्वरं । कथमेनं न वेदाहं तन्ममाचक्ष्व सञ्जय।
॥ सञ्जय उवाच ॥ शृणु राजन्न ते विद्या मम विद्या नहीयते । विद्याहीनो तमोध्वस्तो नाभिजानासि केशवं ।
विद्यया तात जानामि त्रियुगं मधुसूदनं । कर्त्तारमकृतं देवं भूतानां प्रभवाप्ययं । २५४०
॥ धृतराष्ट्र उवाच ॥ गावल्गणेऽत्र का भक्तिर्या ते नित्यं जनार्द्दने । यथात्वमभिजानासि त्रियुगं मधुसूदनं ।
॥ सञ्जय उवाच ॥ मायां न सेवे भद्रं ते न वृथा धर्म्ममाचरे । शुद्धभावंगतो भक्त्या शास्त्राद्वेद्मि जनार्द्दनं ।
॥ धृतराष्ट्र उवाच ॥ दुर्य्योधन हृषीकेशं प्रपद्यस्व जनार्द्दनं । आप्तो नः सञ्जयस्तात शरणं गच्छ केशवं ।
॥ दुर्य्योधन उवाच ॥ भगवान्देवकीपुत्रो लोकांश्चेन्निहनिष्यति । प्रवदन्नर्ज्जुने सख्यं नाहं गच्छेऽद्य केशवं ।
॥ धृतराष्ट्र उवाच ॥ अर्व्वाक् गान्धारि पुत्रस्ते गच्छत्येष सुदुर्म्मतिः । ईर्षुर्दुरात्मा मानी च श्रेयसां वचनातिगः । २५४५
॥ गान्धार्य्युवाच ॥ ऐश्वर्य्यकामदुष्टात्मन् वृद्धानां शासनातिग । ऐश्वर्य्यजीविते हित्वा पितरं माञ्च बालिश ।
वर्द्धयन् दुर्हृदां प्रीतिं माञ्च शोकेन वर्द्धयन् । निहतो भीमसेनेन स्मर्त्तासि वचनं पितुः ।
॥ व्यास उवाच ॥ प्रियोऽसि राजन् कृष्णस्य धृतराष्ट्र निबोध मे । यस्य ते सञ्जयो दूतो यस्त्वां श्रेयसि योक्ष्यते ।
जानात्येष हृषीकेशं पुराणं यच्च वै परं । शुश्रूषमाणमेकाग्रं मोक्षते महतो भयात् ।
वैचित्रवीर्य्य पुरुषाः क्रोधहर्षसमावृताः । सिता बहुविधैः पाशैर्य्ये न तुष्टाः स्वकैर्धनैः । २५५०
यमस्य वशमायान्ति काममूढाः पुनः पुनः । अन्धनेत्रा यथैवान्धा नीयमानाः स्वकर्म्मभिः ।
एष एकायनः पन्था येन यान्ति मनीषिणः । तं दृष्ट्वा मृत्युमत्येति महांस्तत्र न सज्जति ।
॥ धृतराष्ट्र उवाच ॥ अङ्ग सञ्जय मे शंस पन्थानमकुतोभयं । येन गत्वा हृषीकेशं प्राप्नुयां सिद्धिमुत्तमां ।
॥ सञ्जय उवाच ॥ नाकृतात्मा कृतात्मानं जातु विद्याज्जनार्द्दनं । आत्मनस्तु क्रियोपायो नान्यत्रेन्द्रियनिग्रहात् ।
इन्द्रियाणामुदीर्णानां कामत्यागोऽप्रमादतः । अप्रमादो विहिंसा च ज्ञानयोनिरसंशयं । २५५५
इन्द्रियाणां यमे यत्तो भव राजन्नतन्द्रितः । बुद्धिश्च ते माच्यवतु नियच्छैनां यतस्ततः ।
एतज्ज्ञानं विदुर्व्विप्रा ध्रुवमिन्द्रियधारणं । एतज्ज्ञानञ्च पन्थाश्च येन यान्ति मनीषिणः ।
अप्राप्यः केशवो राजन्निन्द्रियैरजितैर्नृभिः । आगमाधिगतात् योगात् वशी तत्त्वे प्रसीदति ।
इति श्रीमहाभारते उद्योगपर्व्वणि यानसन्धिपर्व्वणि सञ्जयवाक्ये ऽष्टषष्टोऽध्यायः ॥ ६८ ॥
॥ धृतराष्ट्र उवाच ॥ भूयो मे पुण्डरीकाक्षं सञ्जयाचक्ष्व पृच्छतः । नामकर्म्मार्थवित्तात प्राप्नुयां पुरुषोत्तमं ।
॥ सञ्जय उवाच ॥ श्रुतं मे वासुदेवस्य नामनिर्व्वचनं शुभं । यावत्तत्राभिजानेऽहमप्रमेयो हि केशवः । २५६०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वसनात् सर्व्वभूतानां वसुत्वाद्देवयोनितः। वासुदेवस्ततो वेद्यो बृहत्वात् विष्णुरुच्यते।
मौनाद्ध्यानाच्च योगाच्च विद्धि भारत माधवं। सर्व्वतत्त्वमयत्वाच्च मधुहा मधुसूदनः।
कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः। विष्णुस्तद्भावयोगाच्च कृष्णो भवति सात्वतः।
पुण्डरीकं परं धाम नित्यमक्षयमव्ययं। तद्भावात् पुण्डरीकाक्षो दस्युत्रासाज्जनार्द्दनः।
यतः सत्त्वान्न च्यवते यच्च सत्त्वान्न हीयते। सत्त्वतः सात्त्वतस्तस्मादार्षभाद्वृषभेक्षणः।
न जायते जनित्राऽयमजस्तस्मादनीकजित्। देवानां स्वप्रकाशत्वात् दमाद्दामोदरो विभुः। २५६६
हर्षात् सुखात् सुखैश्वर्य्यात् हृषीकेशत्वमश्नुते। बाहुभ्यां रोदसी बिभ्रन्महाबाहुरिति स्मृतः।
अधो न क्षीयते जातु यस्मात्तस्मादधोक्षजः। नराणामयनाच्चापि ततो नारायणः स्मृतः।
पूरणात् सदनाच्चापि ततोऽसौ पुरुषोत्तमः। असतश्च सतश्चैव सर्व्वस्य प्रभवाप्ययात्।
सर्व्वस्य च सदा ज्ञानात् सर्व्वमेतं प्रचक्षते। सत्ये प्रतिष्ठितः कृष्णः सत्यमत्र प्रतिष्ठितं। २५७०
सत्यात् सत्यञ्च गोविन्दस्तस्मात् सत्योऽपि नामतः। विष्णुर्विक्रमणाद्देवो जयनाज्जिष्णुरुच्यते।
शाश्वतत्वादनन्तश्च गोविन्दो वेदनात् गवां। अतत्त्वं कुरुते तत्त्वं तेन मोहयते प्रजाः।
एवंविधो धर्म्मनित्यो भगवान्मधुसूदनः। आगन्ता हि महाबाहुरानृशंस्यार्थमच्युतः।
इति श्रीमहाभारते उद्योगपर्व्वणि यानसन्धिपर्व्वणि सञ्जयवाक्ये एकोनसप्ततोऽध्यायः॥ ६९ ॥

॥ धृतराष्ट्र उवाच ॥ चक्षुष्मतां वै स्पृहयामि सञ्जय द्रक्ष्यन्ति ये वासुदेवं समीपे। विभ्राजमानं वपुषा परेण प्रकाशयन्तं प्रदिशो दिशश्च।
ईरयन्तं भारतीं भारतानामभ्यर्चनीयां शङ्करीं सृञ्जयानां। बुभूषद्भिर्ग्रहणीयामनिन्द्यां परासूनामग्रहणीयरूपां। २५७५
समुद्यन्तं सात्वतमेकवीरं प्रणेतारमृषभं यादवानां। निहन्तारं क्षोभणं शात्रवाणां मुष्णन्तञ्च द्विषतां वै यशांसि।
द्रष्टारो हि कुरवस्तं समेता महात्मानं शत्रुहणं वरेण्यं। ब्रुवन्तं वाचमनृशंसरूपां वृष्णिश्रेष्ठं मोहयन्तं मदीयान्।
ऋषिं सनातनतमं विपश्चितं वाचःसमुद्रं कलशं यतीनां। अरिष्टनेमिं गरुडं सुपर्णं हरिं प्रजानां भुवनस्य धाम।
सहस्रशीर्षं पुरुषं पुराणमनादिमध्यान्तमनन्तकीर्त्तिं। शुक्रस्य धातारमजञ्च नित्यं परं परेषां शरणं प्रपद्ये।
त्रैलोक्यनिर्म्माणकरं जनित्रं देवासुराणामथ नागरक्षसां। नराधिपानां विदुषां प्रधानमिन्द्रानुजं तं शरणं प्रपद्ये। २५८०
इति श्रीमहाभारते उद्योगपर्व्वणि यानसन्धिपर्व्वणि धृतराष्ट्रवाक्ये सप्ततितमोऽध्यायः॥ ७० ॥ समाप्तञ्च यानसन्धिपर्व्व ॥

॥ अथ भगवद्यानपर्व्व ॥ ९ ॥

॥ वैशम्पायन उवाच ॥ सञ्जये प्रतियाते तु धर्म्मराजो युधिष्ठिरः। अभ्यभाषत दाशार्हमृषभं सर्व्वसात्त्वतां।
अयं स कालः सम्प्राप्तो मित्राणां मित्रवत्सल। नच त्वदन्यं पश्यामि यो न आपत्सु तारयेत्।
त्वां हि माधवमाश्रित्य निर्भया मोघदर्प्पितं। धार्त्तराष्ट्रं सहामात्यं स्वमंशमनुयुङ्क्ष्महे।
यथा हि सर्व्वास्वापत्सु पासि वृष्णीनरिन्दम। तथा ते पाण्डवा रक्ष्याः पाह्यस्मान्महतो भयात्।
॥ श्रीभगवानुवाच ॥ अयमस्मि महाबाहो ब्रूहि यत्ते विवक्षितं। करिष्यामि हि तत् सर्व्वं यत् त्वं वक्ष्यसि भारत। २५८५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ युधिष्ठिर उवाच ॥ श्रुतं ते धृतराष्ट्रस्य सपुत्त्रस्य चिकीर्षितं। एतद्धि सकलं कृष्ण सञ्जयो मां यदब्रवीत्।
तन्मतं धृतराष्ट्रस्य सोऽस्यात्मा विवृतान्तरः। यथोक्तं दूत आचष्टे वध्यः स्यादन्यथा ब्रुवन्।
अप्रदानेन राज्यस्य शान्तिमस्मासु मार्गति। लुब्धः पापेन मनसा चरन्नसममात्मनः।
यत्तत् द्वादशवर्षाणि वनेष्वध्युषिता वयं। छद्मना शरदञ्चैकां धृतराष्ट्रस्य शासनात्।
स्थाता नः समये तस्मिन् धृतराष्ट्र इति प्रभो। नाहास्म समयं कृष्ण तद्धिनो ब्राह्मणा विदुः।
वृद्धो राजा धृतराष्ट्रः स्वधर्म्मं नानुपश्यति। वश्यत्वात् पुत्त्रगृद्धित्वान्मन्दस्यान्वेति शासनं।
सुयोधनमते तिष्ठन्राजाऽस्मासु जनार्द्दन। मिथ्या चरति लुब्धः सन् चरन् हि प्रियमात्मनः।
इतो दुःखतरं किन्नु यदहं मातुरन्ततः। संविधातुं न शक्नोमि मित्राणांवा जनार्द्दन।
काशिभिश्चेदिपाञ्चालैर्मत्स्यैश्च मधुसूदन। भवता चैव नाथेन पञ्च ग्रामा वृता मया।
अविस्थलं वृकस्थलं माकन्दी वारणावतं। अवसानञ्च गोविन्द कञ्चिदेवात्र पञ्चमं।
पञ्च नस्तात दीयन्तां ग्रामा वा नगराणि वा। वसेम सहिता येषु माच नो भरता नशन्।
नच तानपि दुष्टात्मा धार्त्तराष्ट्रो ऽनुमन्यते। स्वाम्यमात्मनि मत्वाऽसावतो दुःखतरन्नु किं।
कुले जातस्य वृद्धस्य परवित्तेषु गृध्यतः। लोभः प्रज्ञानमाहन्ति प्रज्ञा हन्ति हता ह्रियं।
ह्रीर्हता बाधते धर्म्मं धर्म्मो हन्ति हतः श्रियं। श्रीर्हता पुरुषं हन्ति पुरुषस्याधनं वधः।
अधनाद्धि निवर्त्तन्ते ज्ञातयः सुहृदो द्विजाः। अपुष्पादफलात् वृक्षात् यथा कृष्ण पतत्रिणः।
एतच्च मरणं तात यन्मत्तः पतितादिव। ज्ञातयो विनिवर्त्तन्ते प्रेतसत्त्वादिवासवः।
नातः पापीयसीं काञ्चिदवस्थां शम्बरोऽब्रवीत्। यत्र नैवाद्य न प्रातर्भोजनं प्रतिदृश्यते।
धनमाहुः परं धर्म्मं धने सर्व्वं प्रतिष्ठितं। जीवन्ति धनिनो लोके हता ये त्वधना नराः।
ये धनादपकर्षन्ति नरं स्वबलमास्थिताः। ते धर्म्ममर्थं कामञ्च प्रमथ्नन्ति नरञ्च तं।
एतामवस्थां प्राप्यैके मरणं वव्रिरे जनाः। ग्रामायैके वनायैके नाशायैके प्रवव्रजुः।
उन्मादमेके पुष्यन्ति यान्त्यन्ये द्विषतां वशं। दास्यमेके च गच्छन्ति परेषामर्थहेतुना।
आपदेवाऽस्य मरणात् पुरुषस्य गरीयसी। श्रियो विनाशस्तद्ध्यस्य निमित्तं धर्म्मकामयोः।
यदस्य धर्म्यं मरणं शाश्वतं लोकवर्त्म तत्। समन्तात् सर्व्वभूतानां न तदत्येति कश्चन।
न तथा बाध्यते कृष्ण प्रकृत्या निर्धनो जनः। यथा भद्रां श्रियं प्राप्य तया हीनः सुखैधितः।
स तदात्मापराधेन सम्प्राप्तो व्यसनं महत्। सेन्द्रान् गर्हयते देवानात्मानञ्च कथञ्चन।
नचास्य सर्व्वशास्त्राणि प्रभवन्ति निवर्हणे। सोऽभिक्रुध्यति भृत्यानां सुहृदश्चाभ्यसूयति।
तत्तदा मन्युरेवैति स भूयः सम्प्रमुह्यति। स मोहवशमापन्नः क्रूरं कर्म्म निषेवते।
पापकर्म्मतया चैव सङ्करं तेन पुष्यति। सङ्करो नरकायैव सा काष्ठा पापकर्म्मणां।
न चेत् प्रबुध्यते कृष्ण नरकायैव गच्छति। तस्य प्रबोधः प्रज्ञैव प्रज्ञाचक्षुस्तरिष्यति।
प्रज्ञालाभे हि पुरुषः शास्त्राण्येवान्ववेक्षते। शास्त्रनिष्ठः पुनर्धर्म्मं तस्य ह्रीरङ्गमुत्तमं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ह्रीमान् हि पापं प्रद्वेष्टि तस्य श्रीरभिवर्द्धते। श्रीमान् स यावद्भवति तावद्भवति पूरुषः ।
धर्म्मनित्यः प्रशान्तात्मा कार्य्ययोगवहः सदा। नाधर्म्मे कुरुते बुद्धिं नच पापे प्रवर्त्तते।
अह्रीको वा विमूढो वा नैव स्त्री न पुनः पुमान्। नास्याधिकारो धर्म्मेऽस्ति यथा शूद्रस्तथैव सः ।
ह्रीमान् नमति देवांश्च पितॄनात्मानमेव च। तेनाऽमृतत्वं व्रजति सा काष्ठा पुण्यकर्म्मणां।
तदिदं मयि ते दृष्टं प्रत्यक्षं मधुसूदन। यथा राज्यात् परिभ्रष्टो वसामि वसतीरिमाः।
ते वयं न श्रियं हातुमलं न्यायेन केनचित्। अत्र नो यतमानानां वधश्चेदपि साधु तत्।
तत्र नः प्रथमः कल्पो यद्वयं ते च माधव। प्रशान्ताः समभूताश्च श्रियं तामश्नुवीमहि ।
तत्रैषा परमा काष्ठा रौद्रकर्म्मक्षयोदया। यद्वयं कौरवान् हत्वा तानि राष्ट्राण्यवाप्नुमः।
ये पुनः स्युरसम्बद्धा अनार्य्याः कृष्ण शत्रवः। तेषामप्यवधः कार्य्यः किं पुनर्ये स्युरीदृशाः।
ज्ञातयश्चैव भूयिष्ठाः सहायो गुरवश्च नः। तेषां वधोऽतिपापीयान् किं नु युद्धेऽस्ति शोभनं।
पापः क्षत्रियधर्म्मोऽयं वयञ्च क्षत्त्रबन्धवः। स नोऽस्वधर्म्मो धर्म्मो वा वृत्तिरन्या विगर्हिता।
शूद्रः करोति शुश्रूषां वैश्यो विपणिजीविकां। वयं वधेन जीवामः कपालं ब्राह्मणैर्वृतं।
क्षत्त्रियान् क्षत्त्रियो हन्ति मत्स्यो मत्स्येन जीवति। श्वा श्वानं हन्ति दाशार्ह यस्य धर्म्मो यथा गतः।
युद्धे कृष्ण कलिर्नित्यं प्राणाः सीदन्ति संयुगे। बलन्तु नीतिमाधाय युद्धे जयपराजयौ।
नात्मच्छन्देन भूतानां जीवितं मरणं तथा। नाप्यऽकाले सुखं प्राप्यं दुःखं वाऽपि यदूत्तम।
एको ह्यपि बहून् हन्ति घ्नन्त्येकं बहवोऽप्युत। शूरं कापुरुषो हन्ति अयशस्वी यशस्विनं।
जयो नैवोभयोर्दृष्टो नोभयोश्च पराजयः। तथैवापचयो दृष्टो व्यपयाने क्षयव्ययौ।
सर्व्वथा वृजिनं युद्धं को घ्नन् न प्रतिहन्यते। हतस्य च हृषीकेश सभौ जयपराजयौ।
पराजयश्च मरणान् मन्ये नैव विशिष्यते। यस्य स्याद्विजयः कृष्ण तस्याऽप्यपचयो ध्रुवं।
अन्ततो दयितं घ्नन्ति केचिदप्यपरे जनाः। तस्याङ्ग बलहीनस्य पुत्त्रान् भ्रातॄनपश्यतः।
निर्व्वेदो जीविते कृष्ण सर्व्वतश्चोपजायते। ये ह्येव धीरा ह्रीमन्त आर्य्याः करुणवेदिनः।
त एव युद्धे हन्यन्ते यवीयान्मुच्यते जनः। हत्वाऽप्यनुशयो नित्यं परानपि जनार्द्दन।
अनुबन्धश्च पापोऽत्र शेषश्चाप्यवशिष्यते। शेषो हि बलमासाद्य न शेषमवशेषयेत्।
सर्व्वोच्छेदे च यतते वैरस्यान्तविधित्सया। जयो वैरं प्रसृजति दुःखमास्ते पराजितः ।
सुखं प्रशान्तः स्वपिति हित्वा जयपराजयौ। जातवैरश्च पुरुषो दुःखं स्वपिति नित्यदा।
अनिर्वृत्तेन मनसा ससर्प इव वेश्मनि। उत्सादयति यः सर्व्वं यशसा स विमुच्यते।
अकीर्त्तिं सर्व्वभूतेषु शाश्वतीं स नियच्छति। नहि वैराणि शाम्यन्ति दीर्घकालं धृतान्यपि ।
आख्यातारश्च विद्यन्ते पुमांश्चेद्विद्यते कुले। नचापि वैरं वैरेण केशव व्युपशाम्यति।
हविषाऽग्निर्यथा कृष्ण भूय एवाभिवर्द्धते। अतोऽन्यथा नास्ति शान्तिर्नित्यमन्तरमन्ततः ।
अन्तरं लिप्समानानामयं दोषो निरन्तरः। पौरुषेयो हि बलवानाधिर्हृदयबाधनः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

तस्य त्यागेन वा शान्ति र्मरणेनापि वा भवेत्। अथ वा मूलघातेन द्विषतां मधुसूदन।
फलनिर्वृत्तिरिद्धा स्यात्तन्नृशंसतरं भवेत्। या तु त्यागेन शान्तिः स्यात्तदृते वध एव सः।
संशयाच्च समुच्छेदात् द्विषतामात्मनस्तथा। नच त्यक्तुं तदिच्छामो नचेच्छामः कुलक्षयं।
अत्र या प्रणिपातेन शान्तिः सैव गरीयसी। सर्व्वथा यतमानानामयुद्धमभिकाङ्क्षतां।
सान्त्वे प्रतिहते युद्धं प्रसिद्धं नापराक्रमः। प्रतिघातेन सान्त्वस्य दारुणं सम्प्रवर्त्तते। २५५०
तच्छूनामिव सम्पाते पण्डितैरुपलक्षितं। लाङ्गूलचालनं क्ष्वेडा प्रतिवाचो विवर्त्तनं।
दन्तदर्शनमारावस्ततो युद्धं प्रवर्त्तते। तत्र यो बलवान् कृष्ण जित्वा सोऽत्ति तदामिषं।
एवमेव मनुष्येषु विशेषो नास्ति कश्चन। सर्व्वथा त्वेतदुचितं दुर्ब्बलेषु बलीयसां।
अनादरो विरोधश्च प्रणिपाती हि दुर्ब्बलः। पिता राजा च वृद्धश्च सर्व्वथा मानमर्हति।
तस्मान्मान्यश्च पूज्यश्च धृतराष्ट्रो जनार्द्दन। पुत्त्रस्नेहश्च बलवान् धृतराष्ट्रस्य माधव। २५५५
स पुत्त्रवशमापन्नः प्रणिपातं प्रहास्यति। तत्र किं मन्यसे कृष्ण प्राप्तकालमनन्तरं।
कथमर्थाच्च धर्म्माच्च न हीयेमहि माधव। ईदृशे ह्यर्थकृच्छ्रेऽस्मिन् कमन्यं मधुसूदन।
उपसम्प्रष्टुमिच्छामि त्वामृते पुरुषोत्तम। प्रियश्च प्रियकामश्च गतिज्ञः सर्व्वकर्म्मणां।
को हि कृष्णाऽस्ति नस्त्वादृक् सर्व्वनिश्चयतत्त्ववित्।
॥ वैशम्पायन उवाच ॥ एवमुक्तः प्रत्युवाच धर्म्मराजं जनार्द्दनः। उभयोरेव वामर्थे यास्यामि कुरुसंसदं। २५६०
शमं तत्र लभेयञ्चेत् युष्मदर्थमहापयन्। पुण्यं मे सुमहद्राजंश्चरितं स्यान्महाफलं।
मोचयेयं मृत्युपाशात् संरब्धान् कुरुसृञ्जयान्। पाण्डवान् धार्त्तराष्ट्रांश्च सर्व्वाञ्च पृथिवीमिमां।
॥ युधिष्ठिर उवाच ॥ न ममैतन्मतं कृष्ण यत्त्वं यायाः कुरून् प्रति। सुयोधनः सूक्तमपि न करिष्यति ते वचः।
समेतं पार्थिवं क्षत्त्रं दुर्य्योधनवशानुगं। तेषां मध्यावतरणं तव कृष्ण नरोचये।
न हि नः प्रीणयत् द्रव्यं न देवत्वं कुतः सुखं। न च सर्व्वामरैश्वर्य्यं तव द्रोहेण माधव। २५६५
॥ श्रीभगवानुवाच ॥ जानाम्येतां महाराज धार्त्तराष्ट्रस्य पापतां। अवाच्यास्तु भविष्यामः सर्व्वलोके महीक्षितां।
नचापि मम पर्य्याप्ताः सहिताः सर्व्वपार्थिवाः। क्रुद्धस्य संयुगे स्थातुं सिंहस्येवेतरे मृगाः।
अथचेत्ते प्रवर्त्तेरन् मयि किञ्चिदसाम्प्रतं। निर्द्दहेयं कुरून् सर्व्वानिति मे धीयते मतिः।
न जातु गमनं तत्र भवेत् पार्थ निरर्थकं। अर्थप्राप्तिः कदाचित्स्यादन्ततो वाऽप्यवाच्यता।
॥ युधिष्ठिर उवाच ॥ यत्तुभ्यं रोचते कृष्ण स्वस्ति प्राप्नुहि कौरवान्। कृतार्थं स्वस्तिमन्तं त्वां द्रक्ष्यामि पुनरागतं। २५७०
विश्वक्सेन कुरून् गत्वा भारतान् शमयेः प्रभो। यथा सर्व्वे सुमनसः सह स्यामः सुचेतसः।
भ्राता चासि सखा चासि वीभत्सोर्मम च प्रियः। सौहृदेनाविशङ्क्योऽसि स्वस्ति प्राप्नुहि भूतये।
अस्मान् वेत्थ परान् वेत्थ वेत्थार्थान् वेत्थ भाषितुं। यद्यदस्मद्धितं कृष्ण तत्तद्वाच्यः सुयोधनः।
यद्यद्धर्म्मेण संयुक्तमुपपद्येद्धितं वचः। तत्तत् केशव भाषेथाः सान्त्वं वा यदि वेतरत्।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि युधिष्ठिरवाक्ये एकसप्ततोऽध्यायः॥ ७१ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ श्रीभगवानुवाच ॥ सञ्जयस्य श्रुतं वाक्यं भवतश्च श्रुतं मया। सर्व्वं जानाम्यभिप्रायं यस्तेषां भवतश्च यः। २९७५
तव धर्म्माश्रिता बुद्धिस्तेषां वैराश्रया मतिः। यदयुद्धेन लभ्येत तत्ते वहुमतं भवेत्।
न चैवं नैष्ठिकं कर्म्म क्षत्त्रियस्य विशाम्पते। आहुराश्रमिणः सर्व्वे न भैक्ष्यं क्षत्त्रियश्चरेत्।
जयो वधो वा सङ्ग्रामे धात्रा दिष्टः सनातनः। स्वधर्म्मः क्षत्त्रियस्यैष कार्पण्यं न प्रशस्यते।
न हि कार्पण्यमास्थाय शक्या वृत्तिर्युधिष्ठिर। विक्रमस्व महावाहो जहि शत्रून् परन्तप।
अतिगृद्धाः कृतस्नेहा दीर्घकालं सहोषिताः। कृतमित्राः कृतवला धार्त्तराष्ट्राः परन्तप। २९८०
न पर्य्यायोऽस्ति यत्साम्यं त्वयि कुर्य्युर्व्विशाम्पते। वलवत्तां हि मन्यन्ते भीष्मद्रोणकृपादिभिः।
यावच्च मार्द्दवेनैतान्राजन्नुपचरिष्यसि। तावदेते हरिष्यन्ति तव राज्यमरिन्दम।
नानुक्रोशान्न कार्पण्यान्न च धर्म्मार्थकारणात्। अलं कर्त्तुं धार्त्तराष्ट्रास्तव काममरिन्दम।
एतदेव निमित्तं ते पाण्डवास्तु यथा त्वयि। नानुतप्यन्त कौपीनं तावत् कृत्वाऽपि दुष्करं।
पितामहस्य द्रोणस्य विदुरस्य च धीमतः। ब्राह्मणानाञ्च साधूनां राज्ञश्च नगरस्य च। २९८५
पश्यतां कुरुमुख्यानां सर्व्वेषामेव तत्त्वतः। दानशीलं मृदुं दान्तं धर्म्मशीलमनुव्रतं।
यत्त्वामुपधिना राजन् द्यूते वञ्चितवांस्तदा। न चाऽपत्रपते तेन नृशंसः स्वेन कर्म्मणा।
तथा शीलसमाचारे राजन् मा प्रणयं कृथाः। वध्यास्ते सर्व्वलोकस्य किं पुनस्तव भारत।
वाग्भिस्त्वप्रतिरूपाभिरतुदत्त्वां सहानुजं। श्लाघमानः प्रहृष्टः सन् भ्रातृभिः सह भारत।
एतावत् पाण्डवानां हि नास्ति किञ्चिदिह स्वकं। नामधेयञ्च गोत्रञ्च तदप्येषां नशिष्यते। २९९०
कालेन महता चैषां भविष्यति पराभवः। प्रकृतिं ते भजिष्यन्ति नष्टप्रकृतयो मयि।
दुःशासनेन पापेन तदा द्यूते प्रवर्त्तिते। अनाथवत्तदा देवी द्रौपदी सुदुरात्मना।
आकृष्य केशे रुदती सभायां राजसंसदि। भीष्मद्रोणप्रमुखतो गौरिति व्याहृता मुहुः।
भवता वारिताः सर्व्वे भ्रातरो भीमविक्रमाः। धर्म्मपाशनिवद्धाश्च न किञ्चित् प्रतिपेदिरे।
एताश्चान्याश्च परुषा वाचः स समुदीरयन्। श्लाघते ज्ञातिमध्ये स्म त्वयि प्रव्रजिते वनं। २९९५
ये तत्रासन् समानीतास्ते दृष्ट्वा त्वामनागसं। अश्रुकण्ठा रुदन्तश्च सभायामासते तदा।
न चैनमभ्यनन्दंस्ते राजानो ब्राह्मणैः सह। सर्व्वे दुर्य्योधनं तत्र निन्दन्ति स्म सभासदः।
कुलीनस्य च या निन्दा वधो वाऽमित्रकर्षण। महागुणो वधो राजन्नतु निन्दा कुजीविका।
तदैव निहतो राजन् यदैव निरपत्रपः। निन्दितश्च महाराज पृथिव्यां सर्व्वराजभिः।
ईषत्कार्य्यो वधस्तस्य यस्य चारित्रमीदृशं। प्रस्कन्देन प्रतिस्तब्धश्छिन्नमूल इव द्रुमः। ३०००
वध्यः सर्प इवानार्य्यः सर्व्वलोकस्य दुर्म्मतिः। जह्येनं त्वममित्रघ्न मा राजन् विचिकित्सिथाः।
सर्वथा त्वत्क्षमञ्चैतत् रोचते च ममानघ। यत्त्वं पितरि भीष्मे च प्रणिपातं समाचरेः।
अहन्तु सर्वलोकस्य गत्वा छेत्स्यामि संशयं। येषामस्ति द्विधाभावो राजन् दुर्य्योधनं प्रति।
मध्ये राज्ञामहं तत्र प्रातिपौरुषिकान् गुणान्। तव सङ्कीर्त्तयिष्यामि ये च तस्य व्यतिक्रमाः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, dalgaon

ब्रुवतस्तत्र मे वाक्यं धर्म्मार्थसहितं हितं । निशम्य पार्थिवाः सर्व्वेनाना जनपदेश्वराः। २००५
त्वयि सम्प्रतिपत्स्यन्ते धर्म्मात्मा सत्यवागिति। तस्मिंश्चाधिगमिष्यन्ति यथा लोभादवर्त्तत ।
गर्हयिष्यामि चैवैनं पौरजानपदेष्वपि । वृद्धबालानुपादाय चातुर्व्वर्ण्ये समागते ।
शमं वै याचमानस्त्वं नाधर्म्मं तत्र लप्स्यसे। कुरून् विगर्हयिष्यन्ति धृतराष्ट्रञ्च पार्थिवाः ।
तस्मिंल्लोकपरित्यक्ते किं कार्य्यमवशिष्यते। हते दुर्य्योधने राजन् यदन्यत् क्रियतामिति ।
यात्वा चाहं कुरून् सर्व्वान् युष्मदर्थमहापयन् । यतिष्ये प्रशमं कर्त्तुं लक्षयिष्ये च चेष्टितं । २०१०
कौरवाणां प्रवृत्तिञ्च गत्वा युद्धादिकारिकां । निशम्य विनिवर्त्तिष्ये जयाय तव भारत ।
सर्व्वथा युद्धमेवाहमाशंसामि परैः सह । निमित्तानि हि सर्व्वाणि यथा प्रादुर्भवन्ति वै ।
मृगाः शकुन्ताश्च नदन्ति घोरं हस्त्यश्वमुख्येषु निशामुखेषु । घोराणि रूपाणि तथैव चाग्निर्वर्णान् बहून् पुष्यति घोररूपान ।
मनुष्यलोकक्षयकृत्सुघोरो नोचेदनुप्राप्त इवान्तकः स्यात् । शस्त्राणि यन्त्रं कवचान्रथांश्च नागान् हयांश्च प्रतिपादयित्वा ।
योधाश्च सर्व्वे कृतनिश्चयास्ते भवन्तु हस्त्यश्वरथेषु युक्ताः । साङ्ग्रामिकं ते यदुपार्ज्जनीयं सर्व्वं समग्रं कुरु तन्नरेन्द्र । २०१५
दुर्य्योधनो न ह्यलमद्य दातुं जीवंस्तवैतन्नृपतेः कथञ्चित् । यत्ते पुरस्तादभवत् समृद्धं द्यूते जितं पाण्डवमुख्यराज्यं ।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि कृष्णवाक्ये दिसप्ततोऽध्यायः ॥ ७२ ॥
॥ भीमसेन उवाच ॥ यथा यथैव शान्तिः स्यात् कुरूणां मधुसूदन । तथा तथैव भाषेथा मास्म युद्धेन भीषयेः ।
अमर्षी जातसंरम्भः श्रेयोद्वेषी महामनाः । नोग्रं दुर्य्योधनो वाच्यः साम्नैवैनं समाचरेः ।
प्रकृत्या पापसत्त्वश्च तुल्यचेतास्तु दस्युभिः। ऐश्वर्य्यमदमत्तश्च कृतवैरश्च पाण्डवैः।
अदीर्घदर्शी निष्ठुरी चेप्ता क्रूरपराक्रमः । दीर्घमन्युरनेयश्च पापात्मा निकृतिप्रियः । २०२०
म्रियेतापि न भज्येत नैव जह्यात् स्वकम्मतं । तादृशेन शमः कृष्ण मन्ये परमदुष्करः ।
सुहृदामप्यवाचीनस्त्यक्तधर्म्मा प्रियानृतः । प्रतिहन्त्येव सुहृदां वाचश्चैव मनांसि च ।
स मन्युवशमापन्नः स्वभावं दुष्टमास्थितः । स्वभावात् पापमभ्येति तृणैश्छन्न इवोरगः ।
दुर्य्योधनो हि यत्सेनः सर्व्वदा विदितस्तव । यच्छीलो यत्स्वभावश्च यद्बलो यत्पराक्रमः ।
पुरा प्रसन्नाः कुरवः सहपुत्त्रास्तथा वयं । इन्द्रज्येष्ठा इवाभूम मोदमानाः सबान्धवाः । २०२५
दुर्य्योधनस्य क्रोधेन भारता मधुसूदन । धक्ष्यन्ते शिशिरापाये वनानीव हुताशनैः ।
अष्टादशेमे राजानः प्रख्याता मधुसूदन । ये समुच्चिच्छिदुर्ज्ञातीन् सुहृदश्च सबान्धवान् ।
असुराणां समृद्धानां ज्वलतामिव तेजसा । पर्य्यायकाले धर्म्मस्य प्राप्ते कलिरजायत ।
हैहयानामुदावर्त्तो नीपानां जनमेजयः । बहुलस्तालजङ्घानां कृमीणामुद्धतो वसुः ।
अजबिन्दुः सुवीराणां सुराष्ट्राणां रुषर्द्धिकः । अर्कजश्च बलीहानां चीनानां धौतमूलकः । २०३०
हयग्रीवो विदेहानां वरयुश्च महौजसां । बाहुः सुन्दरवंशानां दीप्ताक्षाणां पुरूरवाः ।
सहजश्चेदिमत्स्यानां प्रवीराणां वृषध्वजः । धारणश्चन्द्रवत्सानां मुकुटानां विगाहनः ।
शमश्च नन्दिवेगानामित्येते कुलपांसनाः । युगान्ते कृष्ण सम्भूताः कुलेषु पुरुषाधमाः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अप्ययं नः कुरूणां स्याद्युगान्ते कालसंभृतः। दुर्य्योधनः कुलाङ्गारो जघन्यः पापपूरुषः।
तस्मान्मृदु शनैर्ब्रूया धर्म्मार्थसहितं हितं। कामानुबन्धबहुलं नोग्रमुग्रपराक्रम। २०३५
अपि दुर्य्योधनं कृष्ण सर्व्वे वयमधश्चराः। नीचैर्भूत्वानुयास्यामो मास्म नो भरता नशन्।
अप्युदासीनवृत्तिः स्याद्यथा नः कुरुभिः सह। वासुदेव तथा कार्य्यं न कुरूननयः स्पृशेत्।
वाच्यः पितामहो वृद्धो ये च तस्य सभासदः। भ्रातॄणामस्तु सौभ्रात्रं धार्त्तराष्ट्रः प्रशाम्यतां।
अहमेतद्ब्रवीम्येवं राजा चैव प्रशंसति। अर्ज्जुनो नैव युद्धार्थी भूयसी हि दयाऽर्ज्जुने।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि भीमवाक्ये त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥
॥ वैशम्पायन उवाच ॥ एतत् श्रुत्वा महाबाहुः केशवः प्रहसन्निव। अभूतपूर्व्वं भीमस्य मार्द्दवोपहितं वचः। २०४०
गिरेरिव लघुत्वं तत् शीतत्वमिव पावके। मत्वा रामानुजः शौरिः शार्ङ्गधन्वा वृकोदरं।
सन्तेजयंस्तदा वाग्भिर्मातरिश्वेव पावकं। उवाच भीममासीनं कृपयाऽभिपरिप्लुतं।
॥ श्रीभगवानुवाच ॥ त्वमन्यदा भीमसेन युद्धमेव प्रशंससि। वधाभिनन्दिनः क्रूरान् धार्त्तराष्ट्रान्मिमर्द्दिषुः।
न च स्वपिषि जागर्षि न्युब्जः शेषे परन्तप। घोरामशान्तां रुषतीं सदा वाचं प्रभाषसे।
निःश्वसन्नग्निवर्णेन सन्तप्तः स्वेन मन्युना। अप्रशान्तमना भीम सधूम इव पावकः। २०४५
एकान्ते निःश्वसन् शेषे भारार्त्त इव दुर्ब्बलः। अपि त्वां केचिदुन्मत्तं मन्यन्तेऽतद्विदो जनाः।
आरुज्य वृक्षान्निर्म्मूलान् गजः परिरुदन्निव। निघ्नन् पद्भिः क्षितिं भीम निःश्वसन् परिधावसि।
नास्मिन् जनेन रमसे रहः क्षिपसि पाण्डव। नान्यन्निशि दिवा चापि कदाचिदभिनन्दसि।
अकस्मात् स्मयमानश्च रहस्यास्से रुदन्निव। जान्वोर्म्मूर्द्धानमाधाय चिरमास्से प्रमीलितः।
भ्रूकुटिञ्च पुनः कुर्व्वन्नोष्ठौ च विदशन्निव। अभीक्ष्णं दृश्यसे भीम सर्व्वं तन्मन्युकारितं। २०५०
यथा पुरस्तात् सविता दृश्यते शुक्रमुच्चरन्। यथा च पश्चान्निर्म्मुक्तो ध्रुवं पर्य्येति रश्मिमान्।
तथा सत्यं ब्रवीम्येतत् नास्ति तस्य व्यतिक्रमः। हन्ताऽहं गदयाऽभ्येत्य दुर्य्योधनममर्षणं।
इति स्म मध्ये भ्रातॄणां सत्येनालभसे गदां। तस्य ते प्रशमे बुद्धिर्धीयतेऽद्य परन्तप।
अहो युद्धाभिकाङ्क्षाणां युद्धकाल उपस्थिते। चेतांसि विप्रतीपानि यत्त्वां भीर्भीम विन्दति।
अहो पार्थ निमित्तानि विपरीतानि पश्यसि। स्वप्नान्ते जागरान्ते च तस्मात् प्रशममिच्छसि। २०५५
अहो नाशंससे किञ्चित् पुंस्त्वं क्लीव इवात्मनि। कश्मलेनाभिपन्नोऽसि तेन ते विकृतं मनः।
उद्वेपते ते हृदयं मनस्ते प्रतिषीदति। ऊरुस्तम्भगृहीतोऽसि तस्मात् प्रशममिच्छसि।
अनित्यं किल मर्त्यस्य पार्थ चित्तं चलाचलं। वातवेगप्रचलिता अष्ठीला शाल्मलेरिव।
तवैषा विकृता बुद्धिर्गवां वागिव मानुषी। मनांसि पाण्डुपुत्त्राणां मज्जयत्यप्लवानिव।
इदं मे महदाश्चर्य्यं पर्व्वतस्येव सर्पणं। यदीदृशं प्रभाषेथा भीमसेनासमं वचः। २०६०
स दृष्ट्वा स्वानि कर्म्माणि कुले जन्म च भारत। उत्तिष्ठस्व विषादं मा कृथा वीर स्थिरो भव।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment-Heritage Foundation; Jalgaon

न चैतदनुरूपं ते यत्ते ग्लानिररिन्दम । यदोजसा न लभते चत्त्रियो न तदश्नुते।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि श्रीकृष्णवाक्ये चतुःसप्ततोऽध्यायः ॥ ७४ ॥
॥ वैशम्पायन उवाच ॥ तथोक्तो वासुदेवेन नित्यमन्युरमर्षणः । सदश्ववत् समाधावत् बभाषे तदनन्तरं।
॥ भीमसेन उवाच ॥ अन्यथा मां चिकीर्षन्तमन्यथा मन्यसे ऽच्युत । प्रणीतभावमत्यर्थं युधि सत्यपराक्रम ।
वेत्सि दाशार्ह स त्वं मे दीर्घकालं सहोषितः । उत वा नानुजानासि स्रवन् ह्रद इवाप्लवं । २७६५
तस्मादनभिरूपाभिर्व्वाग्भिर्मां त्वं समर्च्छसि । कथं हि भीमसेनं मां जानन् कश्चन माधव ।
ब्रूयादप्रतिरूपाणि यथा मां वक्तुमर्हसि । तस्मादिदं प्रवच्य्यामि वचनं वृष्णिनन्दन ।
आत्मनः पौरुषञ्चैव बलञ्च न समं परैः । सर्व्वथाऽनार्य्यकर्म्मैतत् प्रशंसा स्वयमात्मनः ।
अतिवादापविद्धस्तु वच्य्यामि बलमात्मनः । पश्येमे रोदसी कृष्ण ययोरासन्निमाः प्रजाः ।
अचले चाप्रतिष्ठे वा ऽप्यनन्ते सर्व्वमातरौ । यदीमे सहसा क्रुद्धे समेयातां शिले इव । २७७०
अहमेते निगृह्णीयां बाहुभ्यां सचराचरे । पश्यैतदन्तरं बाह्वोर्महापरिघयोरिव ।
य एतत् प्राप्य मुच्येत न तं पश्यामि पूरुषं । हिमवांश्च समुद्रश्च वज्री वा बलभित् स्वयं ।
मयाऽभिपन्नं त्रायेरन् बलमास्थाय न त्रयः । युद्धार्हान् चत्त्रियान् सर्व्वान् पाण्डवेष्वाततायिनः ।
अधःपादतले चैनानऽधितिष्ठामि भूतले । न हि त्वं नाभिजानासि मम विक्रममच्युत।
यथा मया विनिर्ज्जित्य राजानो वशगाः कृताः । अथ चेन्मां न जानासि सूर्य्यस्येवोद्यतः प्रभां । २७७५
विगाढे युधि सम्बाधे वेत्स्यसे मां जनार्द्दन । परुषैराचिपस्येवं व्रणं पूतिमिवोन्नयन् ।
यथामति ब्रवीम्येतत् विद्धि मामधिकं ततः । द्रष्टासि युधि सम्बाधे प्रवृत्ते वैशसेऽहनि ।
मया प्रणुन्नान्मातङ्गान्रथिनः सादिनस्तथा । तथा वरान्नभिक्रुद्धं निघ्नन्तं चत्त्रियर्षभान्।
द्रष्टा मां त्वञ्च लोकश्च विकर्षन्तं चराचरान् । न मे सीदन्ति मज्जानो न ममोद्वेपते मनः ।
सर्व्वलोकादभिक्रुद्धान्न भयं विद्यते मम । किन्तु सौहृदमेवैतत् कृपया मधूसूदन । २७८०
सर्व्वांस्तितिचे संक्लेशान्मास्म नो भरता नशन् ।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि भीमवाक्ये पञ्चसप्ततोऽध्यायः ॥ ७५ ॥
॥ श्रीभगवानुवाच ॥ भावं जिज्ञासमानोऽहं प्रणयादिदमब्रुवं । न चाचेपान्न पाण्डित्यान्न क्रोधान्न विवचया।
वेदाहं तव माहात्म्यमुत ते वेद यद्बलं । उत ते वेद कर्म्माणि न त्वां परिभवाम्यहं ।
यथा चात्मनि कल्याणं सम्भावयसि पाण्डव । सहस्रगुणमप्येतत् त्वयि सम्भावयाम्यहं ।
यादृशे च कुले जन्म सर्व्वराजाभिपूजिते । बन्धुभिश्च सुहृद्भिश्च भीम त्वमसि तादृशः । २७८५
जिज्ञासन्तो हि धर्म्मस्य सन्दिग्धस्य वृकोदर । पर्य्यायं नाध्यवस्यन्ति देवमानुषयोर्जनाः ।
स एव हेतुर्भूत्वा हि पुरुषस्यार्थसिद्धिषु । विनाशेऽपि स एवास्य सन्दिग्धं कर्म्म पौरुषं।
अन्यथा परिदृष्टानि कविभिर्दोषदर्शिभिः । अन्यथा परिवर्त्तन्ते वेगा इव नभस्वतः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सुमन्त्रितं सुनीतञ्च न्यायतश्चोपपादितं। कृतं मानुष्यकं कर्म्म दैवेनापि विरुध्यते।
दैवमप्यकृतं कर्म्म पौरुषेण विहन्यते। शीतमुष्णं तथा वर्षं क्षुत्पिपासे च भारत।
यदन्यद्दिष्टभावस्य पुरुषस्य स्वयं कृतं। तस्मादनुपरोधश्च विद्यते तत्र लक्षणं। २७९०
लोकस्य नान्यतो वृत्तिः पाण्डवान्यत्र कर्म्मणः। एवंबुद्धिः प्रवर्त्तेत फलं स्यादुभयान्वये।
य एवं कृतबुद्धिः सन् कर्म्मस्वेव प्रवर्त्तते। नासिद्धौ व्यथते तस्य न सिद्धौ हर्षमश्नुते।
तत्रेयमनुमात्रा मे भीमसेन विवक्षिता। नैकान्तसिद्धिर्व्वक्तव्या शत्रुभिः सह संयुगे।
नातिप्रहीणरश्मिः स्यात्तथा भावविपर्य्यये। विषादमर्च्छेद्ग्लानिं वा ऽप्येतदर्थं ब्रवीमि ते।
श्वो भूते धृतराष्ट्रस्य समीपं प्राप्य पाण्डव। यतिष्ये प्रशमं कर्त्तुं युष्मदर्थमहापयन्। २७९५
शमं चेत्ते करिष्यन्ति ततोऽनन्तं यशो मम। भवताञ्च कृतः कामस्तेषाञ्च श्रेय उत्तमं।
ते चेदभिनिवेक्ष्यन्ति नाभ्युपैष्यन्ति मे वचः। कुरवो युद्धमेवात्र घोरं कर्म्म भविष्यति।
अस्मिन् युद्धे भीमसेन त्वयि भारः समाहितः। धूरर्ज्जुनेन धार्य्या स्यात् वोढव्य इतरो जनः।
अहं हि यन्ता बीभत्सोर्भविता संयुगे सति। धनञ्जयस्यैष कामो न हि युद्धं न कामये।
तस्मादाशङ्कमानोऽहं वृकोदर मतिं तव। गदतः क्लीवया वाचा तेजस्ते समदीदिपं। २८००
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि श्रीकृष्णवाक्ये षट्सप्ततोऽध्यायः ॥ ७६ ॥
॥ अर्ज्जुन उवाच ॥ उक्तं युधिष्ठिरेणैव यथा वाच्यं जनार्द्दन। तव वाक्यन्तु मे श्रुत्वा प्रतिभाति परन्तप।
नैव प्रशममत्र त्वं मन्यसे सुकरं प्रभो। लोभाद्वा धृतराष्ट्रस्य दैन्याद्वा समुपस्थितात्।
अफलं मन्यसे वाऽपि पुरुषस्यापराक्रमं। नचान्तरेण कर्म्माणि पौरुषेण फलोदयः।
तदिदं भाषितं वाक्यं तथा च न तथैव तत्। न चैतदेवं द्रष्टव्यमसाध्यमपि किञ्चन।
किञ्चैतन्मन्यसे कृच्छ्रमस्माकमवसादकं। कुर्व्वन्ति तेषां कर्म्माणि येषां नास्ति फलोदयः। २८०५
सम्पाद्यमानं सम्यक् च स्यात् कर्म्म सफलं प्रभो। स तथा कृष्ण वर्त्तस्व यथा शर्म्म भवेत् परैः।
पाण्डवानां कुरूणाञ्च भवान्नः प्रथमः सुहृत्। सुराणामसुराणाञ्च यथा वीरः प्रजापतिः।
कुरूणां पाण्डवानाञ्च प्रतिपत्स्व निरामयं। अस्मद्धितमनुष्ठानं मन्ये तव न दुष्करं।
एवञ्च कार्य्यतामेति कार्य्यं तव जनार्द्दन। गमनादेवमेव त्वं करिष्यसि जनार्द्दन। २८१०
चिकीर्षितमथान्यत्ते तस्मिन् वीर दुरात्मनि। भविष्यति च तत्सर्व्वं यथा तव चिकीर्षितं।
शर्म्म तैः सह वा नोऽस्तु तव वा यच्चिकीर्षितं। विचार्य्यमाणो यः कामस्तव कृष्ण स नो गुरुः।
न स नार्हति दुष्टात्मा वधं ससुतबान्धवः। येन धर्म्मसुते दृष्ट्वा न सा श्रीरुपमर्षिता।
यच्चाप्यपश्यतोपायं धर्म्मिष्ठं मधुसूदन। उपायेन नृशंसेन हृता दुर्द्यूतदेविना।
कथं हि पुरुषो जातः क्षत्रियेषु धनुर्धरः। समाहूतो निवर्त्तेत प्राणत्यागेऽप्युपस्थिते। २८१५
अधर्म्मेण जितान् दृष्ट्वा वने प्रव्रजितांस्तथा। वध्यतां मम वार्ष्णेय निर्गतोऽसौ सुयोधनः।
न चैतदद्भुतं कृष्ण मित्रार्थे यच्चिकीर्षसि। क्रिया कथञ्च मुख्या स्यात् मृदुना वेतरेण वा।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अथ वा मन्यसे ज्यायान् वधस्तेषामनन्तरं । तदेव क्रियतामाशु न विचार्य्यमतस्त्वया ।
जानासि हि यथा तेन द्रौपदी पापबुद्धिना । परिक्लिष्टा सभामध्ये तच्च तस्यापमर्षितं ।
स नाम सम्यग्वर्त्तेत पाण्डवेष्विति माधव । न मे सञ्जायते बुद्धिर्बीजमुप्तमिवोषरे । १८२०
तस्माद्यन्मन्यसे युक्तं पाण्डवानां हितञ्च यत् । तदाशु कुरु वार्ष्णेय यन्नः कार्य्यमनन्तरं ।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि अर्ज्जुनवाक्ये सप्तसप्ततोऽध्यायः ॥ ७७ ॥
॥ श्रीभगवानुवाच ॥ एवमेतन्महाबाहो यथा वदसि पाण्डव । पाण्डवानां कुरूणाञ्च प्रतिपत्स्ये निरामयं ।
सर्व्वं त्विदं ममापन्नं बीभत्सो कर्म्मणोर्द्वयोः । क्षेत्रं हि रसवच्छुद्धं कर्म्मणैवोपपादितं ।
ऋते वर्षान्न कौन्तेय जातु निर्व्वर्त्तयेत् फलं । तत्र वै पौरुषं ब्रूयुरासेकं यत्र कारितं ।
तत्र चापि ध्रुवं पश्येच्छोषणं दैवकारितं । तदिदं निश्चितं बुद्ध्या पूर्व्वैरपि महात्मभिः । १८२५
दैवे च मानुषे चैव संयुक्तं लोककारणं । अहं हि तत् करिष्यामि परं पुरुषकारतः ।
दैवन्तु न मया शक्यं कर्म्म कर्त्तुं कथञ्चन । स हि धर्म्मञ्च लोकञ्च त्यक्त्वा चरति दुर्म्मतिः ।
न हि सन्तप्यते तेन तथारूपेण कर्म्मणा । तथापि बुद्धिं पापिष्ठां वर्द्धयन्त्यस्य मन्त्रिणः ।
शकुनिः सूतपुत्रश्च भ्राता दुःशासनस्तथा । स हि त्यागेन राज्यस्य न शमं समुपैष्यति ।
अन्तरेण वधं पार्थ सानुबन्धः सुयोधनः । न चापि प्रणिपातेन त्यक्तुमिच्छति धर्म्मराट् । १८३०
याच्यमानश्च राज्यं स न प्रदास्यति दुर्म्मतिः । न तु मन्ये स तद्वाच्यो यद्युधिष्ठिरशासनं ।
उक्तं प्रयोजनं यत्तु धर्म्मराजेन भारत । तथापापस्तु तत्सर्व्वं न करिष्यति कौरवः ।
तस्मिंश्चाक्रियमाणेऽसौ लोकवध्यो भविष्यति । मम चापि स वध्यो हि जगतश्चापि भारत ।
येन कौमारके यूयं सर्व्वे विप्रकृताः सदा । विप्रलुप्तञ्च वो राज्यं नृशंसेन दुरात्मना ।
न चोपशाम्यते पापः श्रियं दृष्ट्वा युधिष्ठिरे । असकृच्चाप्यहं तेन त्वत्कृते पार्थ भेदितः । १८३५
न मया तद्गृहीतञ्च पापं तस्य चिकीर्षितं । जानासि हि महाबाहो त्वमप्यस्य परं मतं ।
प्रियं चिकीर्षमाणञ्च धर्म्मराजस्य मामपि । सञ्जानंस्तस्य चात्मानं मम चैव परं मतं ।
अजानन्निव मां कस्मादर्ज्जुनाद्याभिशङ्कसे । यच्चापि परमं दिव्यं तच्चाप्यनुगतं त्वया ।
विधानविहितं पार्थ कथं शर्म्म भवेत् परैः । यत्तु वाचा मया शक्यं कर्म्मणा वाऽपि पाण्डव ।
करिष्ये तदहं पार्थ नत्वाशंसे शमं परैः । कथं गोहरणे ह्युक्तो नैतच्छर्म्म तथा हितं । १८४०
याच्यमानोऽपि भीष्मेण सम्वत्सरगतेऽध्वनि । तदैव ते पराभूता यदा सङ्कल्पितास्त्वया ।
लवशः क्षणशश्चापि न च तुष्टः सुयोधनः । सर्व्वथा तु मया कार्य्यं धर्म्मराजस्य शासनं ।
विभाव्यं तस्य भूयश्च कर्म्म पापं दुरात्मनः ।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि कृष्णवाक्ये ऽष्टसप्ततोऽध्यायः ॥ ७८ ॥
॥ नकुल उवाच ॥ उक्तं बहुविधं वाक्यं धर्म्मराजेन माधव । धर्म्मज्ञेन वदान्येन श्रुतञ्चैवेह तत्त्वया ।
मतमाज्ञाय राज्ञश्च भीमसेनेन माधव । संशमो बाहुवीर्य्यञ्च ख्यापितं माधवात्मनः । १८४५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तथैव फाल्गुनेनापि यदुक्तं तत्त्वया श्रुतं । आत्मनश्च मतं वीर कथितं भवताऽसकृत् ।
सर्व्वमेतदतिक्रम्य श्रुत्वा परमतं भवान् । यत्प्राप्तकालं मन्येथास्तत्कुर्य्याः पुरुषोत्तम ।
तस्मिंस्तस्मिन्निमित्ते हि मतं भवति केशव । प्राप्तकालं मनुष्येण स्वमं कार्य्यमरिन्दम ।
अन्यथा चिन्तितो ह्यर्थः पुनर्भवति सोऽन्यथा । अनित्यमतयो लोके नराः पुरुषसत्तम ।
अन्यथा बुद्धयो ह्यासन्नस्मासु वनवासिषु । अदृश्येष्वन्यथा कृष्ण दृश्येषु पुनरन्यथा । २८८०
अस्माकमपि वार्ष्णेय वने विचरतां तदा । न तथा प्रणयो राज्ये यथा सम्प्रति वर्त्तते ।
निवृत्तवनवासान्नः श्रुत्वा वीर समागताः । अक्षौहिण्यो हि सप्तेमास्त्वत्प्रसादाज्जनार्द्दन ।
इमान् हि पुरुषव्याघ्रानचिन्त्यबलपौरुषान् । आत्तशस्त्रान्रणे दृष्ट्वा न व्यथेदिह कः पुमान् ।
स भवान् कुरुमध्ये च सान्त्वपूर्व्वं भयोत्तरं । ब्रूयाद्वाक्यं यथा मन्दो न व्यथेत सुयोधनः ।
युधिष्ठिरं भीमसेनं बीभत्सुञ्चापराजितं । सहदेवञ्च माञ्चैव त्वाञ्च रामञ्च केशव । २८८५
सात्यकिञ्च महावीर्य्यं विराटञ्च सहात्मजं । द्रुपदञ्च सहामात्यं धृष्टद्युम्नञ्च माधव ।
काशिराजञ्च विक्रान्तं धृष्टकेतुञ्च चेदिपं । मांसशोणितभृन्मर्त्यः प्रतियुध्येत को युधि ।
स भवान् गमनादेव साधयिष्यत्यसंशयं । इष्टमर्थं महाबाहो धर्म्मराजस्य केवलं ।
विदुरश्चैव भीष्मश्च द्रोणश्च सहबाह्लिकः । श्रेयः समर्था विज्ञातुमुच्यमानास्त्वयाऽनघ ।
ते चैनमनुनेष्यन्ति धृतराष्ट्रं जनाधिपं । तञ्च पापसमाचारं सहामात्यं सुयोधनं । २८९०
श्रोता चार्थस्य विदुरस्त्वञ्च वक्ता जनार्द्दन । कमिवार्थं विवर्त्तन्तं स्थापयेतां न वर्त्मनि ।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि नकुलवाक्ये एकोनाशीतोऽध्यायः ॥ ७९ ॥
॥ सहदेव उवाच ॥ यदि तत् कथितं राज्ञा धर्म्म एष सनातनः । यथा च युद्धमेव स्यात्तथा कार्य्यमरिन्दम ।
यदि प्रशममिच्छेयुः कुरवः पाण्डवैः सह । तथाऽपि युद्धं दाशार्ह योजयेथाः सहैव तैः ।
कथन्तु दृष्ट्वा पाञ्चालीं तथा कृष्ण सभागतां । अयुद्धेन प्रशाम्येत मम मन्युः सुयोधने ।
यदि भीमार्ज्जुनौ कृष्ण धर्म्मराजश्च धार्म्मिकाः । धर्म्ममुत्सृज्य तेनाहं योद्धुमिच्छामि संयुगे । २८९५
॥ सात्यकिरुवाच ॥ सत्यमाह महाबाहो सहदेवो महामतिः । दुर्य्योधनवधे शान्तिस्तस्य कोपस्य मे भवेत् ।
न जानासि यथा दृष्ट्वा चीराजिनधरान् वने । तवापि मन्युरुद्भूतो दुःखितान् प्रेक्ष्य पाण्डवान् ।
तस्मान्माद्रीसुतः शूरो यदाह रणकर्क्कशः । वचनं सर्व्वयोधानां तन्मतं पुरुषोत्तम ।
॥ वैशम्पायन उवाच ॥ एवं वदति वाक्यन्तु युयुधाने महामतौ । सुभीमः सिंहनादोऽभूत् योधानां तत्र सर्व्वशः ।
सर्व्वे हि सर्व्वशो वीरास्तद्वचः प्रत्यपूजयन् । साधुसाध्विति शैनेयं हर्षयन्तो युयुत्सवः । २९००
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि सहदेववाक्ये अशीतितमोऽध्यायः ॥ ८० ॥
॥ वैशम्पायन उवाच ॥ राज्ञस्तद्वचनं श्रुत्वा धर्म्मार्थसहितं हितं । कृष्णा दाशार्हमासीनमब्रवीच्छोककर्षिता ।
सुता द्रुपदराजस्य असितायतमूर्द्धजा । सम्पूज्य सहदेवञ्च सात्यकिञ्च महारथं ।
भीमसेनञ्च संशान्तं दृष्ट्वा परमदुर्म्मनाः । अश्रुपूर्णेक्षणा वाक्यमुवाचेदं मनस्विनी ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विदितं ते महाबाहो धर्म्मज्ञ मधुसूदन। यथा निकृतिमास्थाय भ्रंशिताः पाण्डवाः सुखात्।
धृतराष्ट्रस्य पुत्त्रेण सामात्येन जनार्द्दन। यथा च सञ्जयो राज्ञा मन्त्रं रहसि श्रावितः।
युधिष्ठिरेण दाशार्ह तच्चापि विदितं तव। यथोक्तः सञ्जयश्चैव तच्च सर्व्वं श्रुतं त्वया।
पञ्च नस्तात दीयन्तां ग्रामा इति महाद्युते। अविस्थलं वृकस्थलं माकन्दीं वारणावतं।
अवसानं महाबाहो कञ्चिदेकञ्च पञ्चमं। इति दुर्य्योधनो वाच्यः सुहृदश्चास्य केशव।
न चापि ह्यकरोद्वाक्यं श्रुत्वा कृष्ण सुयोधनः। युधिष्ठिरस्य दाशार्ह श्रीमतः सन्धिमिच्छतः।
अप्रदानेन राज्यस्य यदि कृष्ण सुयोधनः। सन्धिमिच्छेन्न कर्त्तव्यस्तत्र गत्वा कथञ्चन।
शक्ष्यन्ति हि महाबाहो पाण्डवाः सृञ्जयैः सह। धार्त्तराष्ट्रबलं घोरं क्रुद्धं प्रतिसमासितुं।
न हि साम्ना न दानेन शक्योऽर्थस्तेषु कश्चन। तस्मात्तेषु न कर्त्तव्या कृपा ते मधुसूदन।
साम्ना दानेन वा कृष्ण ये न शाम्यन्ति शत्रवः। योक्तव्यस्तेषु दण्डः स्यात् जीवितं परिरक्षता।
तस्मात्तेषु महादण्डः क्षेप्तव्यः क्षिप्रमच्युत। त्वया चैव महाबाहो पाण्डवैः सह सृञ्जयैः।
एतत् समर्थं पार्थानां तव चैव यशस्करं। क्रियमाणं भवेत् कृष्ण क्षत्त्रस्य च सुखावहं।
क्षत्त्रियेण हि हन्तव्यः क्षत्त्रियो लोभमास्थितः। अक्षत्त्रियो वा दाशार्ह स्वधर्म्ममनुतिष्ठता।
अन्यत्र ब्राह्मणात्तात सर्व्वपापेष्ववस्थितात्। गुरुर्हि सर्व्ववर्णानां ब्राह्मणः प्रसृताग्रभुक्।
यथाऽवध्ये भवेद्दोषो वध्यमाने जनार्द्दन। स वध्यस्यावधे दृष्ट इति धर्म्मविदो विदुः।
यथा त्वां न स्पृशेदेष दोषः कृष्ण तथा कुरु। पाण्डवैः सह दाशार्ह सृञ्जयैः सह सैनिकैः।
पुनरुक्तञ्च वक्ष्यामि विस्रम्भेण जनार्द्दन। का नु सीमन्तिनी मादृक् पृथिव्यामस्ति केशव।
सुता द्रुपदराजस्य वेदीमध्यात् समुत्थिता। धृष्टद्युम्नस्य भगिनी तव कृष्ण प्रिया सखी।
आजमीढकुलं प्राप्ता स्नुषा पाण्डोर्महात्मनः। महिषी पाण्डुपुत्त्राणां पञ्चेन्द्रसमवर्च्चसां।
सुता मे पञ्चभि र्व्वीरैः पञ्च जाता महारथाः। अभिमन्युर्यथा कृष्ण तथा ते तव धर्म्मतः।
साऽहं केशग्रहं प्राप्ता परिक्लिष्टा सभाङ्गता। पश्यतां पाण्डुपुत्त्राणां त्वयि जीवति केशव।
जीवत्सु पाण्डुपुत्त्रेषु पाञ्चालेष्वथ वृष्णिषु। दासीभूताऽस्मि पापानां सभामध्ये व्यवस्थिता।
निरमर्षेष्वचेष्टेषु प्रेक्षमाणेषु पाण्डुषु। पाहिमामिति गोविन्द मनसा चिन्तितोऽसि मे।
यत्र मां भगवान्राजा श्वशुरो वाक्यमब्रवीत्। वरं वृणीष्व पाञ्चालि वरार्हाऽसि मताऽसि मे।
अदासाः पाण्डवाः सन्तु सरथाः सायुधा इति। मयोक्ते यत्र निर्म्मुक्ता वनवासाय केशव।
एवंविधानां दुःखानामभिज्ञोऽसि जनार्द्दन। त्रायस्व पुण्डरीकाक्ष सभर्तृज्ञातिबान्धवां।
नन्वहं कृष्ण भीष्मस्य धृतराष्ट्रस्य चोभयोः। स्नुषा भवामि धर्म्मेण साऽहं दासीकृता बलात्।
धिक् पार्थस्य धनुष्मत्तां भीमसेनस्य धिग्बलं। यत्र दुर्य्योधनः कृष्ण मुहूर्त्तमपि जीवति।
यदि तेऽहमनुग्राह्या यदि तेऽस्ति कृपा मयि। धार्त्तराष्ट्रेषु वै कोपः सर्व्वः कृष्ण विधीयतां।
॥ वैशम्पायन उवाच ॥ इत्युक्त्वा मृदुसंहारं वृजिनाग्रं सुदर्शनं। सुनीलमसितापाङ्गी सर्व्वगन्धाधिवासितं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

सर्व्वलक्षणसम्पन्नं महाभुजगवर्च्चसं। केशपक्षं वरारोहा गृह्य वामेन पाणिना।
पद्माक्षी पुण्डरीकाक्षमुपेत्य गजगामिनी। अश्रुपूर्णेक्षणा दीना कृष्णं वचनमब्रवीत्।
अयन्ते पुण्डरीकाक्ष दुःशासनकरोद्धृतः। स्मर्त्तव्यः सर्व्वकार्य्येषु परेषां सन्धिमिच्छता। २९०५
यदि भीमार्ज्जुनौ कृष्ण कृपणौ सन्धिकामुकौ। पिता मे योत्स्यते वृद्धः सह पुत्त्रैर्म्महारथैः।
पञ्च चैव महावीर्य्याः पुत्त्रा मे मधुसूदन। अभिमन्युं पुरस्कृत्य योत्स्यन्ते कुरुभिः सह।
दुःशासनभुजं श्यामं संछिन्नं पांशुगुण्ठितं। यद्यहन्तु न पश्यामि का शान्तिर्हृदयस्य मे।
त्रयोदश हि वर्षाणि प्रतीक्षन्त्या गतानि मे। निधाय हृदये मन्युं प्रदीप्तमिव पावकं। २९१०
विदीर्य्यते मे हृदयं भीमवाक्शल्यपीडितं। योऽयमद्य महावाहुर्धर्म्ममेवानुपश्यति।
इत्युक्त्वा वाष्परुद्धेन कण्ठेनायतलोचना। रुरोद कृष्णा सोत्कम्पं सस्वनं वाष्पगद्गदं।
स्तनौ पीनायतश्रोणी सहितावभिवर्षती। द्रवीभूतमिवात्युष्णं मुञ्चती वारि नेत्रजं।
तामुवाच महावाहुः केशवः परिसान्त्वयन्। अचिरात् द्रक्ष्यसे कृष्णे रुदतीर्भरतस्त्रियः।
एवं ता भीरु रोत्स्यन्ति निहतज्ञातिबान्धवाः। हतमित्रा हतवला येषां क्रुद्धाऽसि भामिनि। २९१५
अहञ्च तत् करिष्यामि भीमार्ज्जुनयमैः सह। युधिष्ठिरनियोगेन दैवाच्च विधिनिर्म्मितात्।
धार्त्तराष्ट्राः कालपक्वा न चेत् शृण्वन्ति मे वचः। शेष्यन्ते निहता भूमौ श्वशृगालादनीकृताः।
चलेद्धि हिमवान् शैलो मेदिनी शतधा चलेत्। द्यौः पतेच्च सनक्षत्रा न मे मोघं वचो भवेत्।
सत्यं ते प्रतिजानामि कृष्णे वाष्पो निगृह्यतां। हतामित्रान् श्रियायुक्तानचिराद्द्रक्ष्यसे पतीन्।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि श्रीकृष्णवाक्ये एकाशीतोऽध्यायः॥ ८१ ॥
॥ अर्ज्जुन उवाच ॥ कुरूणामद्य सर्व्वेषां भवान् सुहृदनुत्तमः। सम्बन्धी दयितो नित्यमुभयोः पक्षयोरपि। २९२०
पाण्डवैर्धार्त्तराष्ट्राणां प्रतिपाद्यमनामयं। समर्थः प्रशमञ्चैव कर्त्तुमर्हसि केशव।
त्वमितः पुण्डरीकाक्ष सुयोधनममर्षणं। शान्त्यर्थं भारतं ब्रूया यत्तत् वाच्यममित्रहन्।
त्वया धर्म्मार्थयुक्तञ्चेदुक्तं शिवमनामयं। हितं नादास्यते वालो दिष्टस्य वशमेष्यति।
॥ श्रीभगवानुवाच ॥ धर्म्म्यमस्मद्धितञ्चैव कुरूणां यदनामयं। एष यास्यामि राजानं धृतराष्ट्रमभीप्सया।
॥ वैशम्पायन उवाच ॥ ततो व्यपेते तमसि सूर्य्ये विमल उद्गते। मैत्रे मुहूर्त्ते सम्प्राप्ते मृद्वर्च्चिषि दिवाकरे। २९२५
कौमुदे मासि रेवत्यां शरदन्ते हिमागमे। स्फीतसस्यसुखे काले कल्यः सत्त्ववतां वरः।
मङ्गल्याः पुण्यनिर्घोषा वाचः शृण्वंश्च सूनृताः। ब्राह्मणानां प्रतीतानामृषीणामिव वासवः।
कृत्वा पौर्व्वाह्णिकं कृत्यं स्नातः शुचिरलङ्कृतः। उपतस्थे विवस्वन्तं पावकञ्च जनार्द्दनः।
ऋषभं पृष्ठ आलभ्य ब्राह्मणानभिवाद्य च। अग्निं प्रदक्षिणं कृत्वा पश्यन् कल्याणमग्रतः।
तत्प्रतिज्ञाय वचनं पाण्डवस्य जनार्द्दनः। शिनेर्नप्तारमासीनमभ्यभाषत सात्यकिं। २९३०
रथ आरोप्यतां शङ्खश्चक्रञ्च गदया सह। उपासङ्गाश्च शक्त्यश्च सर्व्वप्रहरणानि च।
दुर्य्योधनो हि दुष्टात्मा कर्णश्च सहसौवलः। न च शत्रुरवज्ञेयो दुर्ब्बलोऽपि वली यथा।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ततस्तन्मतमाज्ञाय केशवस्य पुरःसराः। प्रसस्रुर्योजयिष्यन्तो रथं चक्रगदाभृतः।
तं दीप्तमिव कालाग्निमाकाशगमिवाध्वगं। चन्द्रसूर्य्यप्रकाशाभ्यां चक्राभ्यां समलङ्कृतं।
अर्द्धचन्द्रैश्च चन्द्रैश्च मत्स्यैः सम्टगपक्षिभिः। पुष्पैश्च विविधैश्चित्रं मणिरत्नैश्च सर्व्वशः। २८३५
तरुणादित्यसङ्काशं वृहन्तं चारुदर्शनं। मणिहेमविचित्राङ्गं सुध्वजं सुपताकिनं।
सूपस्करमनाधृष्यं वैयाघ्रपरिवारणं। यशोघ्नं प्रत्यमित्राणां यदूनां नन्दिवर्द्धनं।
वाजिभिः शैव्यसुग्रीवमेघपुष्पबलाहकैः। स्नातैः सम्पादयामासुः सम्पन्नैः सर्व्वसम्पदा।
महिमानन्तु कृष्णस्य भूय एवाभिवर्द्धयन्। सुघोषः पतगेन्द्रेण ध्वजेन युयुजे रथः।
तं मेरुशिखरप्रख्यं मेघदुन्दुभिनिस्वनं। आरुरोह रथं शौरिर्व्विमानमिव कामगं। २९४०
ततः सात्यकिमारोप्य प्रययौ पुरुषोत्तमः। पृथिवीञ्चान्तरीक्षञ्च रथघोषेण नादयन्।
व्यपोढाभ्रस्ततः कालः क्षणेन समपद्यत। शिवश्चानुववौ वायुः प्रशान्तमभवद्रजः।
प्रदक्षिणानुलोमाश्च मङ्गल्या म्टगपक्षिणः। प्रयाणे वासुदेवस्य बभूवुरनुयायिनः।
मङ्गलार्थपदैः शब्दैरन्ववर्त्तन्त सर्व्वशः। सारसाः शतपत्राश्च हंसाश्च मधुसूदनं।
मन्त्राहुतिमहाहोमैर्हूयमानश्च पावकः। प्रदक्षिणशिखो भूत्वा विधूमः समपद्यत। २९४५
वशिष्ठो वामदेवश्च भूरिद्युम्नो गयः क्रथः। शुक्रनारदवाल्मीका मरुतः कुशिको भृगुः।
देवा ब्रह्मर्षयश्चैव कृष्णं यदुसुखावहं। प्रदक्षिणमवर्त्तन्त सहिता वासवानुजं।
एवमेतैर्महाभागैर्महर्षिगणसाधुभिः। पूजितः प्रययौ कृष्णः कुरूणां सदनं प्रति।
तं प्रयान्तमनुप्रायात् कुन्तीपुत्रो युधिष्ठिरः। भीमसेनार्ज्जुनौ चोभौ माद्रीपुत्रौ च पाण्डवौ।
चेकितानश्च विक्रान्तो धृष्टकेतुश्च चेदिपः। द्रुपदः काशिराजश्च शिखण्डी च महारथः। २९५०
धृष्टद्युम्नः सपुत्रश्च विराटः कैकयैः सह। संसाधनार्थं प्रययुः क्षत्त्रियाः क्षत्त्रियर्षभं।
ततोऽनुव्रज्य गोविन्दं धर्म्मराजो युधिष्ठिरः। राज्ञां सकाशे द्युतिमानुवाचेदं वचस्तदा।
यो वै न कामान्न क्रोधान्न भयान्नार्थकारणात्। अन्यायमनुवर्त्तेत स्थिरबुद्धिरलोलुपः।
धर्म्मज्ञो धृतिमान् प्राज्ञः सर्व्वभूतेषु केशवः। ईश्वरः सर्व्वभूतानां देवदेवः सनातनः।
तं सर्व्वगुणसम्पन्नं श्रीवत्सकृतलक्षणं। सम्परिष्वज्य कौन्तेयः सन्देष्टुमुपचक्रमे। २९५५
॥ युधिष्ठिर उवाच ॥ या सा बाल्यात् प्रभृत्यस्मान् पर्य्यवर्द्धयताबला। उपवासतपःशीला सदा स्वस्त्ययने रता।
देवताऽतिथिपूजासु गुरुशुश्रूषणे रता। वत्सला प्रियपुत्त्रा च प्रियाऽस्माकं जनार्द्दन।
सुयोधनभयात् या नोऽत्रायतामित्रकर्षण। महतो म्टत्युसम्बाधादुत्तरेन्नौरिवार्णवात्।
अस्मत्कृते च सततं यया दुःखानि माधव। अनुभूतान्यदुःखार्हा तां स्म पृच्छेरनामयं।
भृशमाश्वासयेश्चैनां पुत्त्रशोकपरिप्लुतां। अभिवाद्य स्वजेथास्त्वं पाण्डवान् परिकीर्त्तयन्। २९६०
ऊढात्प्रभृति दुःखानि श्वशुराणामरिन्दम। निकारान् न तदर्हा च पश्यन्ती दुःखमश्नुते।
अपि जातु स कालः स्यात् कृष्ण दुःखविपर्य्ययः। यदाऽहं मातरं क्लिष्टां सुखं दद्यामरिन्दम।

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रव्रजन्तोऽभिधावन्तीं कृपणां पुत्त्रगृद्धिनीं। रुदतीमपहायैनामगच्छाम वयं वनं।
न नूनं म्रियते दुःखैः सा चेज्जीवति केशव। तथा पुत्त्राधिभिर्गाढमार्त्ता ह्यानर्त्तसत्कृता।
अभिवाद्याथ सा कृष्ण त्वया मद्वचनाद्विभो। धृतराष्ट्रश्च कौरव्यो राजानश्च वयोऽधिकाः। २९६५
भीष्मं द्रोणं कृपञ्चैव महाराजञ्च वाह्लिकं। द्रौणिञ्च सोमदत्तञ्च सर्व्वांश्च भरतान् प्रति।
विदुरञ्च महाप्राज्ञं कुरूणां मन्त्रधारिणं। अगाधबुद्धिं धर्म्मज्ञं स्वजेथा मधुसूदन।
इत्युक्त्वा केशवं तत्र राजमध्ये युधिष्ठिरः। अनुज्ञातो निववृते कृष्णं कृत्वा प्रदक्षिणं।
प्रव्रजन्नेव वीभत्सुः सखायं पुरुषर्षभं। अब्रवीत् परवीरघ्नं दाशार्हमपराजितं।
यदस्माकं विभो वृत्तं पुरा वै मन्त्रनिश्चये। अर्द्धराज्यस्य गोविन्द विदितं सर्व्वराजसु। २९७०
तच्चेद्दद्युरसङ्गेन सत्कृत्यानवमन्य च। प्रियं मे स्यान्महाबाहो मुच्येरन् महतो भयात्।
अतश्चेदन्यथा कर्त्ता धार्त्तराष्ट्रोऽनुपायवित्। अन्तं नूनं करिष्यामि क्षत्त्रियाणां जनार्द्दन।
एवमुक्ते पाण्डवेन समाहृष्यद्वृकोदरः। मुहुर्मुहुः क्रोधवशात् प्रावेपत च पाण्डवः।
वेपमानश्च कौन्तेयः प्राक्रोशन्महतो रवान्। धनञ्जयवचः श्रुत्वा हर्षोत्सिक्तमना भृशं।
तस्य तं निनदं श्रुत्वा सम्प्रावेपन्त धन्विनः। वाहनानि च सर्व्वाणि शकृन्मूत्रे प्रसुस्रुवुः। २९७५
इत्युक्त्वा केशवं तत्र तथा चोक्त्वा विनिश्चयं। अनुज्ञातो निववृते परिष्वज्य जनार्द्दनं।
तेषु राजसु सर्व्वेषु निवृत्तेषु जनार्द्दनः। तूर्णमभ्यागमद्धृष्टः शैव्यसुग्रीववाहनः।
ते हया वासुदेवस्य दारुकेण प्रचोदिताः। पन्थानमाचेमुरिव ग्रसमाना इवाम्बरं।
अथापश्यन्महाबाहुर्ऋषीनध्वनि केशवः। ब्राह्म्या श्रिया दीप्यमानान् स्थितानुभयतः पथि।
सोऽवतीर्य्य रथात् तूर्णमभिवाद्य जनार्द्दनः। यथावत्तानृषीन् सर्व्वानभ्यभाषत पूजयन्। २९८०
कच्चिल्लोकेषु कुशलं कच्चिद्धर्म्मः स्वनुष्ठितः। ब्राह्मणानां त्रयो वर्णाः कच्चित्तिष्ठन्ति शासने।
तेभ्यः प्रयुज्य तां पूजां प्रोवाच मधुसूदनः। भगवन्तः क्व संसिद्धाः का वीथी भवतामिह।
किं वा कार्य्यं भगवतामहं किं करवाणि वः। केनार्थेनेह सम्प्राप्ता भगवन्तो महीतलं।
तमब्रवीज्जामदग्न्य उपेत्य मधुसूदनं। परिष्वज्य च गोविन्दं सुरासुरपतेः सखा।
देवर्षयः पुण्यकृतो ब्राह्मणाश्च बहुश्रुताः। राजर्षयश्च दाशार्ह मानयन्तस्तपस्विनः। २९८५
देवासुरस्य द्रष्टारः पुराणस्य महीपते। समेतं पार्थिवं क्षत्त्रं दिदृक्षन्तश्च सर्व्वतः।
सभासदश्च राजानस्त्वाञ्च सत्यं जनार्द्दनं। एतन्महाप्रेक्षणीयं द्रष्टुं गच्छाम केशव।
धर्म्मार्थसहिता वाचः श्रोतुमिच्छाम माधव। त्वयोच्यमानाः कुरुषु राजमध्ये परन्तप।
भीष्मद्रोणादयश्चैव विदुरश्च महामतिः। त्वञ्च यादवशार्दूल सभायां वै समेष्यथ।
तव वाक्यानि दिव्यानि तथा तेषाञ्च माधव। श्रोतुमिच्छाम गोविन्द सत्यानि च हितानि च। २९९०
आपृष्टोऽसि महाबाहो पुनर्व्वक्ष्यामहे वयं। याह्यभीतेन वै वीर द्रक्ष्यामस्त्वां सभागतं।
आसीनमासने दिव्ये बलतेजःसमागतं।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि भगवद्याने द्व्यशीतोऽध्यायः॥ ८२ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ वैशम्पायन उवाच ॥ प्रयातं देवकीपुत्त्रं परवीररुजो दश । महारथा महाबाहुमन्वयुः शस्त्रपाणयः ।
पदातीनां सहस्रञ्च सादिनाञ्च परन्तप । भोज्यञ्च विपुलं राजन् प्रेष्याश्च शतशोऽपरे ।
॥ जनमेजय उवाच ॥ कथं प्रयातो दाशार्हो महात्मा मधुसूदनः । कानि वा व्रजतस्तस्य निमित्तानि महौजसः ।
॥ वैशम्पायन उवाच ॥ तस्य प्रयाणे यान्यासन्निमित्तानि महात्मनः । तानि मे शृणु सर्व्वाणि दैवान्यौत्पातिकानि च ।
अनभ्रेऽशनिनिर्घोषः सविद्युत्समजायत । अन्वगेव च पर्ज्जन्यः प्रावर्षद्विघने भृशं ।
प्रत्यगूहुर्म्महानद्यः प्राङ्मुखाः सिन्धुसत्तमाः । विपरीता दिशः सर्व्वा न प्राज्ञायत किञ्चन ।
प्राज्वलन्नग्नयो राजन् पृथिवी समकम्पत । उदपानाश्च कुम्भाश्च प्रासिञ्चञ्छतशो जलं ।
तमः संवृतमप्यासीत् सर्व्वं जगदिदं तथा । न दिशो नादिशो राजन् प्राज्ञायन्त स्म रेणुना ।
प्रादुरासीन्महाञ्छब्दः खे शरीरं न दृश्यते । सर्व्वेषु राजन् देशेषु तदद्भुतमिवाभवत् ।
प्रामथ्नाद्धास्तिनपुरं वातो दक्षिणपश्चिमः । आरुजन् गणशो वृक्षान् परुषोऽशनिनिस्वनः ।
यत्र यत्र च वार्ष्णेयो वर्त्तते पथि भारत । तत्र तत्र सुखो वायुः सर्व्वञ्चासीत् प्रदक्षिणं ।
ववर्ष पुष्पवर्षञ्च कमलानि च भूरिशः । समश्च पन्था निर्दुःखो व्यपेतकुशकण्टकः ।
संस्तुतो ब्राह्मणैर्गीर्भिस्तत्र तत्र सहस्रशः । अर्च्यते मधुपर्क्कैश्च वसुभिश्च वसुप्रदः ।
तं किरन्ति महात्मानं वन्यैः पुष्पैः सुगन्धिभिः । स्त्रियः पथि समागम्य सर्व्वभूतहिते रतं ।
स शालिभवनं रम्यं सर्व्वसस्यसमाचितं । सुखं परमधर्म्मिष्ठमभ्यगाद्भरतर्षभ ।
पश्यन् बहुपशून् ग्राम्यान् रम्यान् हृदयतोषणान् । पुराणि च व्यतिक्रामन्राष्ट्राणि विविधानि च ।
नित्यं हृष्टाः सुमनसो भारतैरभिरक्षिताः । नोद्विग्नाः परचक्राणां व्यसनानामकोविदाः ।
उपप्लव्यादथागम्य जनाः पुरनिवासिनः । पथ्यतिष्ठन्त सहिता विष्वक्सेनदिदृक्षया ।
ते तु सर्व्वे समायान्तमग्निमिद्धमिव प्रभुं । अर्च्चयामासुरर्च्चार्हं देशातिथिमुपस्थितं ।
वृकस्थलं समासाद्य केशवः परवीरहा । प्रकीर्णरश्मावादित्ये व्योम्नि वै लोहितायति ।
अवतीर्य्य रथात्तूर्णं कृत्वा शौचं यथाविधि । रथमोचनमादिश्य सन्ध्यामुपविवेश ह ।
दारुकोऽपि हयान्मुक्त्वा परिचर्य्य च शास्त्रतः । मुमोच सर्व्वयोक्त्रादि मुक्त्वा चैतानवासृजत् ।
अभ्यतीत्य तु तत्सर्व्वमुवाच मधुसूदनः । युधिष्ठिरस्य कार्य्यार्थमिह वत्स्यामहे क्षपां ।
तस्य तन्मतमाज्ञाय चक्रुरावसथं नराः । क्षणेन चान्नपानानि गुणवन्ति समार्ज्जयन् ।
तस्मिन् ग्रामे प्रधानास्तु य आसन् ब्राह्मणा नृप । आर्य्याः कुलीना ह्रीमन्तो ब्राह्मीं वृत्तिमनुष्ठिताः ।
तेऽभिगम्य महात्मानं हृषीकेशमरिन्दमं । पूजाञ्चक्रुर्य्यथान्यायमाशीर्म्मङ्गलसंयुतां ।
ते पूजयित्वा दाशार्हं सर्व्वलोकेषु पूजितं । न्यवेदयन्त वेश्मानि रत्नवन्ति महात्मने ।
तान प्रभुः कृतमित्युक्त्वा सत्कृत्य च यथाऽर्हतः । अभ्येत्य चैषां वेश्मानि पुनरायात् सहैव तैः ।
सुमृष्टं भोजयित्वा तु ब्राह्मणांस्तत्र केशवः । भुक्त्वा च सह तैः सर्व्वैरवसत्तां क्षपां सुखं ।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि भगवद्याने त्र्यशीतोऽध्यायः ॥ ८३ ॥
॥ वैशम्पायन उवाच ॥ तथा दूतैः समाज्ञाय प्रयान्तं मधुसूदनं । धृतराष्ट्रोऽब्रवीत् भीष्ममर्च्चयित्वा महाभुजं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्रोणञ्च सञ्जयञ्चैव विदुरञ्च महामतिं। दुर्य्योधनं सहामात्यं हृष्टरोमा ऽब्रवीदिदं।
अद्भुतं महदाश्चर्य्यं श्रूयते कुरुनन्दन। स्त्रियो बालाश्च वृद्धाश्च कथयन्ति गृहे गृहे।
सत्कृत्याचक्षते चान्ये तथैवान्ये समागताः। पृथग्वादाश्च वर्त्तन्ते चत्वरेषु सभासु च। ३०२५
उपयास्यति दाशार्हः पाण्डवार्थे पराक्रमी। स नो मान्यश्च पूज्यश्च सर्व्वथा मधुसूदनः।
तस्मिन् हि यात्रा लोकस्य भूतानामीश्वरो हि सः। तस्मिन् धृतिश्च वीर्य्यञ्च प्रज्ञा चौजश्च माधवे।
स तो मान्यो नरश्रेष्ठः स हि धर्म्मः सनातनः। पूजितो हि सुखाय स्यादसुखः स्यादपूजितः।
स चेत्तुष्यति दाशार्ह उपचारैररिन्दम। कृष्णात् सर्व्वानभिप्रायान् प्राप्स्यामः सर्व्वराजसु।
तस्य पूजार्थमद्यैव संविधत्स्व परन्तप। सभाः पथि विधीयन्तां सर्व्वकामसमन्विताः। ३०३०
यथा प्रीतिर्महाबाहो त्वयि जायेत तस्य वै। तथा कुरुष्व गान्धारे कथं वा भीष्म मन्यसे।
ततो भीष्मादयः सर्व्वे धृतराष्ट्रं जनाधिपं। ऊचुः परममित्येवं पूजयन्तोऽस्य तद्वचः।
तेषामनुमतं ज्ञात्वा राजा दुर्य्योधनस्तदा। सभावास्तूनि रम्याणि प्रदेष्टुमुपचक्रमे।
ततो देशेषु सर्व्वेषु रमणीयेषु भागशः। सर्व्वरत्नसमाकीर्णाः सभाश्चक्रुरनेकशः।
आसनानि विचित्राणि युक्तानि विविधैर्गुणैः। स्त्रियो गन्धानलङ्कारान् सूक्ष्माणि वसनानि च। ३०३५
गुणवन्त्यन्नपानानि भोज्यानि विविधानि च। माल्यानि च सुगन्धीनि तानि राजा ददौ ततः।
विशेषतश्च वासार्थं सभां ग्रामे वृकस्थले। विदधे कौरवो राजा बहुरत्नां मनोरमां।
एतद्विधाय वै सर्व्वं देवार्हमतिमानुषं। आचख्यौ धृतराष्ट्राय राजा दुर्य्योधनस्तदा।
ताः सभाः केशवः सर्व्वा रत्नानि विविधानि च। असमीक्ष्यैव दाशार्ह उपायात् कुरुसद्म तत्।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि भगवद्याने चतुरशीतोऽध्यायः॥ ८४॥
॥ धृतराष्ट्र उवाच॥ उपप्लव्यादिह क्षत्त रुपायातो जनार्द्दनः। वृकस्थले निवसति स च प्रातरिहैष्यति। ३०४०
आहुकानामधिपतिः पुरोगः सर्व्वसात्वतां। महामना महावीर्य्यो महासत्त्वो जनार्द्दनः।
स्फीतस्य वृष्णिराष्ट्रस्य भर्त्ता गोप्ता च माधवः। त्रयाणामपि लोकानां भगवान् प्रपितामहः।
वृष्ण्यन्धकाः सुमनसो यस्य प्रज्ञामुपासते। आदित्या वसवो रुद्रा यथा बुद्धिं वृहस्पतेः।
तस्मै पूजां प्रयोक्ष्यामि दाशार्हाय महात्मने। प्रत्यक्षं तव धर्म्मज्ञ तां मे कथयतः शृणु।
एकवर्णैः सुकृष्णाङ्गैर्व्वाह्लिजातैर्हयोत्तमैः। चतुर्युक्तान् रथांस्तस्मै रौक्मान् दास्यामि षोडश। ३०४५
नित्यप्रभिन्नान्मातङ्गानीषादन्तान् प्रहारिणः। अष्टानुचरमेकैकमष्टौ दास्यामि कौरव।
दासीनामप्रजातानां शुभानां रुक्मवर्चसां। शतमस्मै प्रदास्यामि दासानामपि तावतः।
आविकञ्च सुखस्पर्शं पार्व्वतीयैरुपाहृतं। तदप्यस्मै प्रदास्यामि सहस्राणि दशाष्ट च।
अजिनानां सहस्राणि चीनदेशोद्भवानि च। तान्यप्यस्मै प्रदास्यामि यावदर्हति केशवः।
दिवा रात्रौ च भात्येष सुतेजा विमलो मणिः। तमप्यस्मै प्रदास्यामि तमर्हति हि केशवः। ३०५०
एकेनाभिपतत्यह्ना योजनानि चतुर्द्दश। यानमश्वतरीयुक्तं दास्ये तस्मै तदप्यहं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यावन्ति वाहनान्यस्य यावन्तः पुरुषाश्च ते। ततोऽष्टगुणमप्यस्मै भोज्यं दास्याम्यहं सदा।
मम पुत्त्राश्च पौत्त्राश्च सर्व्वे दुर्य्योधनादृते। प्रत्युद्यास्यन्ति दाशार्हं रथैर्मृष्टैः स्वलङ्कृताः।
स्वलङ्कृताश्च कल्याण्यः पादैरेव सहस्रशः। वारमुख्या महाभागं प्रत्युद्यास्यन्ति केशवं।
नगरादपि याः काश्चित् गमिष्यन्ति जनार्द्दनं। द्रष्टुं कन्याश्च कल्याण्यस्ताश्च यास्यन्त्यनावृताः। २०५५
सस्त्रीपुरुषबालश्च नगरं मधुसूदनं। उदीक्षतां महात्मानं भानुमन्तमिव प्रजाः।
महाध्वजपताकाश्च क्रियन्तां सर्व्वतो दिशः। जलावसिक्तो विरजाः पन्थास्तस्येति चान्वशात्।
दुःशासनस्य च गृहं दुर्य्योधनगृहाद्वरं। तदस्य क्रियतां क्षिप्रं सुसंमृष्टमलङ्कृतं।
एतद्धि रुचिराकारैः प्रासादैरुपशोभितं। शिवञ्च रमणीयञ्च सर्व्वर्त्तुषु महाधनं।
सर्व्वमस्मिन् गृहे रत्नं मम दुर्य्योधनस्य च यद्यदर्हति वार्ष्णेयस्तत्तद्देयमसंशयं। २०६०
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि धृतराष्ट्रवाक्ये पञ्चाशीतोऽध्यायः ॥ ८५ ॥
॥ विदुर उवाच ॥ राजन् बहुमतश्चासि त्रैलोक्यस्यापि सत्तमः। सम्भावितश्च लोकस्य सम्मतश्चासि भारत।
यत्त्वमेवं गते ब्रूयाः पश्चिमे वयसि स्थितः। शास्त्राद्वा सुप्रतर्क्काद्वा सुस्थिरः स्थविरो ह्यसि।
लेखाऽश्मनीव भाः सूर्य्ये महोर्म्मिरिव सागरे। धर्म्मस्त्वयि तथा राजन्निति व्यवसिताः प्रजाः।
सदैव भावितो लोको गुणौघैस्तव पार्थिव। गुणानां रक्षणे नित्यं प्रयतस्व सबान्धवः।
आर्ज्जवं प्रतिपद्यस्व मा बाल्याद्बहु नीनशः। राजन् पुत्त्रांश्च पौत्त्रांश्च सुहृदश्चैव सुप्रियान्। २०६५
यत्त्वमिच्छसि कृष्णाय राजन्नतिथये बहु। एतदन्यच्च दाशार्हः पृथिवीमपि चार्हति।
न तु त्वं धर्म्ममुद्दिश्य तस्य वा प्रियकारणात्। एतदिच्छसि कृष्णाय सत्येनात्मानमालभे।
मायैषा सत्यमेवैतच्छद्मैतद्भूरिदक्षिण। जानामि त्वन्मतं राजन् गूढं बाह्येन कर्म्मणा।
पञ्च पञ्चैव लिप्सन्ति ग्रामकान् पाण्डवा नृप। न च दित्ससि तेभ्यस्तां तच्छमं न करिष्यसि।
अर्थेन तु महाबाहुं वार्ष्णेयं त्वं जिहीर्षसि। अनेन चाप्युपायेन पाण्डवेभ्यो विभेत्स्यसि। २०७०
न च वित्तेन शक्योऽसौ नोद्यमेन न गर्हया। अन्यो धनञ्जयात् कर्त्तुमेतत्तत्त्वं ब्रवीमि ते।
वेद कृष्णस्य माहात्म्यं वेदास्य दृढभक्तितां। अत्याज्यमस्य जानामि प्राणैस्तुल्यं धनञ्जयं।
अन्यत् कुम्भादपां पूर्णादन्यत् पादावसेचनात्। अन्यत् कुशलसम्प्रश्नान्नैषिष्यति जनार्द्दनः।
यत्त्वस्य प्रियमातिथ्यं मानार्हस्य महात्मनः। तदस्मै क्रियतां राजन् मानार्होऽसौ जनार्द्दनः।
आशंसमानः कल्याणं कुरूनभ्येति केशवः। येनैव राजन्नर्थेन तदेवास्मा उपाकुरु। २०७५
शममिच्छति दाशार्हस्तव दुर्य्योधनस्य च। पाण्डवानाञ्च राजेन्द्र तदस्य वचनं कुरु।
पिताऽसि राजन् पुत्त्रास्ते वृद्धस्त्वं शिशवः परे। वर्त्तस्व पितृवत्तेषु वर्त्तन्ते ते हि पुत्त्रवत्।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि विदुरवाक्ये षडशीतोऽध्यायः॥ ८६ ॥
॥ दुर्य्योधन उवाच ॥ यदाह विदुरः कृष्णे सर्व्वं तत्सत्यमच्युते। अनुरक्तो ह्यसंहार्य्यः पार्थान् प्रति जनार्द्दनः।
यत्तत्सत्कारसंयुक्तं देयं वसु जनार्द्दने अनेकरूपं राजेन्द्र न तद्देयं कदाचन।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

देशः कालस्तथाऽयुक्तो न हि नार्हति केशवः। मंस्यत्यधोक्षजो राजन् भयादर्चति मामिति। ३०८०
अवमानश्च यत्र स्यात् क्षत्रियस्य विशाम्पते। न तत्कुर्य्यात् बुधः कार्य्यमिति मे निश्चिता मतिः।
स हि पूज्यतमो लोके कृष्णः पृथुललोचनः। त्रयाणामपि लोकानां विदितं मम सर्व्वथा।
न तु तस्मै प्रदेयं स्यात् तथा कार्य्यगतिः प्रभो। विग्रहः समुपारब्धो न हि शाम्यत्यविग्रहात्।
॥ वैशम्पायन उवाच॥ तस्य तद्वचनं श्रुत्वा भीष्मः कुरुपितामहः। वैचित्रवीर्य्यं राजानमिदं वचनमब्रवीत्।
सत्कृतोऽसत्कृतो वाऽपि न क्रुध्येत जनार्द्दनः। नालमेनमवज्ञातुं नावज्ञेयो हि केशवः। ३०८५
यत्तु कार्य्यं महाबाहो मनसा कार्य्यतां गतं। सर्व्वोपायैर्न तच्छक्यं केनचित् कर्त्तुमन्यथा।
स यत्ब्रूयात् महाबाहुस्तत्कार्य्यमविशङ्कया। वासुदेवेन तीर्थेन क्षिप्रं संशाम्य पाण्डवैः।
धर्म्म्यमर्थ्यञ्च धर्म्मात्मा ध्रुवं वक्ता जनार्द्दनः। तस्मिन् वाच्याः प्रिया वाचो भवता बान्धवैः सह।
॥ दुर्य्योधन उवाच॥ न पर्य्यायोऽस्ति यद्राजन् श्रियं निष्केवलामहं। तैः सहेमामुपाश्नीयां यावज्जीवं पितामह।
इदन्तु सुमहत् कार्य्यं शृणु मे यत् समर्थितं। परायणं पाण्डवानां नियत्स्यामि जनार्द्दनं। ३०९०
तस्मिन् बद्धे भविष्यन्ति वृष्णयः पृथिवी तथा। पाण्डवाश्च विधेया मे स च प्रातरिहैष्यति।
अत्रोपायान् यथा सम्यङ् न बुध्येत जनार्द्दनः। न चापायो भवेत् कश्चित्तद्भवान् प्रब्रवीतु मे।
॥ वैशम्पायन उवाच॥ तस्य तद्वचनं श्रुत्वा घोरं कृष्णाभिसंहितं। धृतराष्ट्रः सहामात्यो व्यथितो विमनाऽभवत्।
ततो दुर्य्योधनमिदं धृतराष्ट्रोऽब्रवीद्वचः। मैवं वोचः प्रजापाल नैष धर्म्मः सनातनः।
दूतश्च हि हृषीकेशः सम्बन्धी च प्रियश्च नः। अपापः कौरवेयेषु स कथं बन्धमर्हति। ३०९५
॥ भीष्म उवाच॥ परीतस्तव पुत्त्रोऽयं धृतराष्ट्र सुमन्दधीः। वृणोत्यनर्थं नैवार्थं याच्यमानः सुहृज्जनैः।
इममुत्पथि वर्त्तन्तं पापं पापानुबन्धिनं। वाक्यानि सुहृदां हित्वा त्वमप्यस्यानुवर्त्तसे।
कृष्णमक्लिष्टकर्म्माणमासाद्यायं सुदुर्म्मतिः। तव पुत्त्रः सहामात्यः क्षणेन न भविष्यति।
पापस्यास्य नृशंसस्य त्यक्तधर्म्मस्य दुर्म्मतेः। नोत्सहेऽनर्थसंयुक्ताः श्रोतुं वाचः कथञ्चन।
इत्युक्त्वा भरतश्रेष्ठो वृद्धः परममन्युमान्। उत्थाय तस्मात् प्रातिष्ठद्भीष्मः सत्यपराक्रमः। ३१००
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि दुर्य्योधनवाक्ये सप्ताशीतोऽध्यायः॥ ८७॥
॥ वैशम्पायन उवाच॥ प्रातरुत्थाय कृष्णस्तु कृतवान् सर्व्वमाह्निकं। ब्राह्मणैरभ्यनुज्ञातः प्रययौ नगरं प्रति।
तं प्रयान्तं महाबाहुमनुज्ञाप्य महाबलं। पर्य्यवर्त्तन्त ते सर्व्वे वृकस्थलनिवासिनः।
धार्त्तराष्ट्राः समायान्तं प्रत्युज्जग्मुः स्वलङ्कृताः। दुर्य्योधनादृते सर्व्वे भीष्मद्रोणकृपादयः।
पौराश्च बहुला राजन् हृषीकेशं दिदृक्षवः। यानैर्बहुविधैरन्ये पद्भिरेव तथाऽपरे।
स वै पथि समागम्य भीष्मेणाक्लिष्टकर्म्मणा। द्रोणेन धार्त्तराष्ट्रैश्च तैर्वृतो नगरं ययौ। ३१०५
कृष्णसम्माननार्थञ्च नगरं समलङ्कृतं। बभूव राजमार्गश्च बहुरत्नसमाचितः।
न च कश्चिद्गृहे राजंस्तदासीत् भरतर्षभ। न स्त्री न वृद्धो न शिशुर्वासुदेवदिदृक्षया।
राजमार्गे नरास्तस्मिन् संस्तुवन्त्यवनिं गताः। तस्मिन् काले महाराज हृषीकेशप्रवेशने।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

आवृतानि वरस्त्रीभिर्गृहाणि सुमहान्त्यपि । प्रचलन्तीव भारेण दृश्यन्ते स्म महीतले ।
यथा च गतिमन्तस्ते वासुदेवस्य वाजिनः । प्रनष्टगतयोऽभूवन्राजमार्गे नरैर्वृते । ३११०
स गृहं धृतराष्ट्रस्य प्राविशच्छत्रुकर्षणः । पाण्डुरं पुण्डरीकाक्षः प्रासादैरुपशोभितं ।
तिस्रः कक्षा व्यतिक्रम्य केशवो राजवेश्मनः । वैचित्रवीर्य्यं राजानमभ्यगच्छदरिन्दमः ।
अभ्यागच्छति दाशार्हे प्रज्ञाचक्षुर्नराधिपः सहैव द्रोणभीष्माभ्यामुदतिष्ठन्महायशाः ।
कृपश्च सोमदत्तश्च महाराजश्च वाह्लिकः । आसनेभ्योऽचलन् सर्व्वे पूजयन्तो जनार्द्दनं ।
ततो राजानमासाद्य धृतराष्ट्रं यशस्विनं । स भीष्मं पूजयामास वार्ष्णेयो वाग्भिरञ्जसा । ३११५
तेषु धर्म्मानुपूर्व्वीन्तां प्रयुज्य मधुसूदनः । यथावयः समीयाय राजभिः सह माधवः ।
अथ द्रोणं सवाह्लीकं सपुत्त्रञ्च यशस्विनं । कृपञ्च सोमदत्तञ्च समीयाय जनार्द्दनः ।
तत्रासीदूर्ज्जितं मृष्टं काञ्चनं महदासनं । शासनाद्धृतराष्ट्रस्य तत्रोपाविशदच्युतः ।
अथ गां मधुपर्कञ्चाप्युदकञ्च जनार्द्दनं । उपजह्रुर्यथान्यायं धृतराष्ट्रपुरोहिताः ।
कृतातिथ्यस्तु गोविन्दः सर्व्वान् परिहसन् कुरून् । आस्ते साम्बन्धिकं कुर्व्वन् कुरुभिः परिवारितः । ३१२०
सोऽर्च्चितो धृतराष्ट्रेण पूजितश्च महायशाः । राजानं समनुज्ञाप्य निरक्रामदरिन्दमः ।
तैः समेत्य यथान्यायं कुरुभिः कुरुसंसदि । विदुरावसथं रम्यमुपातिष्ठत माधवः ।
विदुरः सर्व्वकल्याणैरभिगम्य जनार्द्दनं । अर्च्चयामास दाशार्हं सर्व्वकामैरुपस्थितं ।
या मे प्रीतिः पुष्कराक्ष त्वद्दर्शनसमुद्भवा । सा किमाख्यायते तुभ्यमन्तरात्माऽसि देहिनां ।
कृतातिथ्यन्तु गोविन्दं विदुरः सर्व्वधर्म्मवित् । कुशलं पाण्डुपुत्त्राणामपृच्छन्मधुसूदनं । ३१२५
प्रीयमाणस्य सुहृदो विदुषो वृष्णिसत्तमः । धर्म्मार्थनित्यस्य सतो गतरोषस्य धीमतः ।
तस्य सर्व्वं सविस्तारं पाण्डवानां विचेष्टितं । क्षत्तुराचष्ट दाशार्हः सर्व्वप्रत्यक्षदर्शिवान् ।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि विदुरभगवत्संवादे अष्टाशीतोऽध्यायः ॥ ८८ ॥
॥ वैशम्पायन उवाच ॥ अथोपगम्य विदुरमपराह्णे जनार्द्दनः । पितृष्वसारं स पृथामभ्यगच्छदरिन्दमः ।
सा दृष्ट्वा कृष्णमायान्तं प्रसन्नादित्यवर्च्चसं । कण्ठे गृहीत्वा प्राक्रोशत् स्मरन्ती तनयान् पृथक् ।
तेषां सत्त्ववतां मध्ये गोविन्दं सहचारिणं । चिरस्य दृष्ट्वा वार्ष्णेयं वाष्पमाहारयत् पृथा । ३१३०
साऽब्रवीत् कृष्णमासीनं कृतातिथ्यं युधाम्पतिं । वाष्पगद्गदपूर्णेन मुखेन परिशुष्यता ।
ये ते वाल्यात् प्रभृत्येव गुरुशुश्रूषणे रताः । परस्परस्य सुहृदः सम्मताः समचेतसः ।
निकृत्या भ्रंशिता राज्यात् जनार्हा निर्जनं गताः । विनीतक्रोधहर्षाश्च ब्रह्मण्याः सत्यवादिनः ।
त्यक्त्वा प्रियसुखे पार्था रुदन्तीमपहाय मां । अहार्षुश्च वनं यान्तः समूलं हृदयं मम ।
अतदर्हा महात्मानः कथं केशव पाण्डवाः । ऊषुर्महावने तात सिंहव्याघ्रगजाकुले । ३१३५
वाला विहीनाः पित्रा ते मया सततलालिताः । अपश्यन्तश्च पितरौ कथमूषुर्महावने ।
शङ्खदुन्दुभिनिर्घोषैर्मृदङ्गैर्व्वेणुनिःस्वनैः । पाण्डवाः समवोध्यन्त वाल्यात् प्रभृति केशव ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

ये स्म वारणशब्देन हयानां ह्रेषितेनच। रथनेमिनिनादैश्च व्यबोधन्त तदा गृहे।
शङ्खभेरीनिनादेन वेणुवीणानिनादिना। पुण्याहघोषमिश्रेण पूज्यमाना द्विजातिभिः।
वस्त्रैरत्नैरलङ्कारैः पूजयन्तो द्विजन्मनः। गीर्भिर्मङ्गलयुक्ताभिर्ब्राह्मणानां महात्मनां।
अर्च्चितैरर्च्चनार्हैश्च स्तुवद्भिरभिनन्दिताः। प्रासादाग्रेष्ववोधन्त राङ्कवाजिनशायिनः। ११४०
क्रूरञ्च निनदं श्रुत्वा श्वापदानां महावने। न स्मोपयान्ति निद्रान्ते न तदर्हा जनार्द्दन।
भेरीमृदङ्गनिनदैः शङ्खवैणवनिस्वनैः। स्त्रीणां गीतनिनादैश्च मधुरैर्मधुसूदन।
वन्दिमागधसूतैश्च स्तुवद्भिर्बोधिताः कथं। महावनेष्वबुध्यन्त श्वापदानां रुतेन च।
ह्रीमान् सत्यधृतिर्द्दान्तो भूतानामनुकम्पिता। कामद्वेषौ वशे कृत्वा सतां वर्त्मानुवर्त्तते।
अम्बरीषस्य मान्धातुर्ययातेर्नहुषस्य च। भरतस्य दिलीपस्य शिवेरौशीनरस्य च। ११४५
राजर्षीणां पुराणानां धुरन्धत्ते दुरुद्वहां। शीलवृत्तोपसम्पन्नो धर्म्मज्ञः सत्यसङ्गरः।
राजा सर्व्वगुणोपेतस्त्रैलोक्यस्यापि यो भवेत्। अजातशत्रुर्धर्म्मात्मा शुद्धजाम्बूनदप्रभः।
श्रेष्ठः कुरुषु सर्व्वेषु धर्म्मतः श्रुतवृत्ततः। प्रियदर्शी दीर्घभुजः कथं कृष्ण युधिष्ठिरः।
यः स नागायुतप्राणो वातरंहा महाबलः। सामर्षः पाण्डवो नित्यं प्रियो भ्रातुः प्रियङ्करः। ११५०
कीचकस्य तु सज्ञातेर्यो हन्ता मधुसूदन। शूरः क्रोधवशानाञ्च हिडिम्बस्य बकस्य च।
पराक्रमे शक्रसमो मातरिश्वसमो बले। महेश्वरसमः क्रोधे भीमः प्रहरतांवरः।
क्रोधं बलममर्षञ्च यो निधाय परन्तपः। जितात्मा पाण्डवोऽमर्षी भ्रातुस्तिष्ठति शासने।
तेजोराशिं महात्मानं वरिष्ठममितौजसं। भीमं प्रदर्शनेनापि भीमसेनं जनार्द्दन।
तन्ममाचक्ष्व वार्ष्णेय कथमद्य वृकोदरः। आस्ते परिघबाहुः स मध्यमः पाण्डवो बली। ११५५
अर्ज्जुनेनार्ज्जुनो यः स कृष्ण बाहुसहस्रिणा। द्विबाहुः स्पर्द्धते नित्यमतीतेनापि केशव।
क्षिपत्येकेन वेगेन पञ्चवाणशतानि यः। इष्वस्त्रे सदृशो राज्ञः कार्त्तवीर्य्यस्य पाण्डवः।
तेजसादित्यसदृशो महर्षिसदृशो दमे। क्षमया पृथिवीतुल्यो महेन्द्रसमविक्रमः।
आधिराज्यं महद्दीप्तं प्रथितं मधुसूदन। आहृतं येन वीर्य्येण कुरूणां सर्व्वराजसु।
यस्य बाहुबलं सर्व्वे पाण्डवाः पर्य्युपासते। स सर्व्वरथिनां श्रेष्ठः पाण्डवः सत्यविक्रमः। ११६०
यं गत्वाऽभिमुखः सङ्ख्ये न जीवन् कश्चिदाव्रजेत्। यो जेता सर्व्वभूतानामजेयो जिष्णुरच्युत।
योऽपाश्रयः पाण्डवानां देवानामिव वासवः। स ते भ्राता सखा चैव कथमद्य धनञ्जयः।
दयावान् सर्व्वभूतेषु ह्रीनिषेवो महास्त्रवित्। मृदुश्च सुकुमारश्च धार्म्मिकश्च प्रियश्च मे।
सहदेवो महेष्वासः शूरः समितिशोभनः। भ्रातॄणां कृष्ण शुश्रूषुर्धर्म्मार्थकुशलो युवा।
सदैव सहदेवस्य भ्रातरो मधुसूदन। वृत्तं कल्याणवृत्तस्य पूजयन्ति महात्मनः। ११६५
ज्येष्ठापचायिनं वीरं सहदेवं युधाम्पतिं। शुश्रूषुं मम वार्ष्णेय माद्रीपुत्त्रं प्रचक्ष्व मे।
सुकुमारो युवा शूरो दर्शनीयश्च पाण्डवः। भ्रातॄणाञ्चैव सर्व्वेषां प्रियः प्राणो बहिश्चरः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

चित्रयोधी च नकुलो महेष्वासो महाबलः । कच्चित् स कुशली कृष्ण वत्सो मम सुखैधितः ।
सुखोचितमदुःखार्हं सुकुमारं महारथं । अपि जातु महाबाहो पश्येयं नकुलं पुनः ।
पक्ष्मसम्पातजे काले नकुलेन विनाकृता । न लभामि धृतिं वीर साऽद्य जीवामि पश्य मां । २१७०
सर्व्वैः पुत्त्रैः प्रियतरा द्रौपदी मे जनार्द्दन । कुलीना रूपसम्पन्ना सर्व्वैः समुदिता गुणैः ।
पुत्त्रलोकात् पतिलोकं वृण्वाना सत्यवादिनी । प्रियान् पुत्त्रान् परित्यज्य पाण्डवाननुरुध्यते ।
महाभिजनसम्पन्ना सर्व्वकामैः सुपूजिता । ईश्वरी सर्व्वकल्याणी द्रौपदी कथमच्युत ।
पतिभिः पञ्चभिः शूरैरग्निकल्पैः प्रहारिभिः । उपपन्ना महेष्वासैर्द्रौपदी दुःखभागिनी ।
चतुर्द्दशमिदं वर्षं यान्नापश्यमरिन्दम । पुत्त्राधिभिः परिद्यूनां द्रौपदीं सत्यवादिनीं । २१७५
न नूनं कर्म्मभिः पुण्यैरश्नुते पुरुषः सुखं । द्रौपदी चेत्तथा वृत्ता नाश्नुते सुखमव्ययं ।
न प्रियो मम कृष्णाऽर्थे बीभत्सुर्न युधिष्ठिरः । भीमसेनो यमौ चापि यदपश्यं सभागतां ।
न मे दुःखतरं किञ्चित् भूतपूर्व्वं ततोऽधिकं । स्त्रीधर्म्मिणीं द्रौपदीं यत् श्वशुराणां समीपगां ।
आनायितामनार्य्येण क्रोधलोभानुवर्त्तिना । सर्व्वे प्रैक्षन्त कुरव एकवस्त्रां सभागतां ।
तत्रैव धृतराष्ट्रस्य महाराजस्य वाह्लिकः । कृपश्च सोमदत्तश्च निर्व्विन्नाः कुरवस्तथा । २१८०
तस्यां संसदि सर्व्वेषां क्षत्तारं पूजयाम्यहं । वृत्तेन हि भवत्यार्य्यो न धनेन न विद्यया ।
तस्य कृष्ण महाबुद्धेर्गम्भीरस्य महात्मनः । क्षत्तुः शीलमलङ्कारो लोकान् विष्टभ्य तिष्ठति ।
॥ वैशम्पायन उवाच ॥ सा शोकार्त्ता च हृष्टा च दृष्ट्वा गोविन्दमागतं । नानाविधानि दुःखानि सर्व्वाण्येवान्वकीर्त्तयत् ।
पूर्व्वैराचरितं यत्तत् कुराजभिररिन्दम । अक्षद्यूतं मृगवधः कच्चिदेषां सुखावहं ।
तन्मां दहति यत्कृष्णा सभायां कुरुसन्निधौ । धार्त्तराष्ट्रैः परिक्लिष्टा यथा न कुशलं तथा । २१८५
निर्व्वासनञ्च नगरात् प्रव्रज्या च परन्तप । नाना विधानां दुःखानामभिज्ञाऽस्मि जनार्द्दन ।
अज्ञातचर्य्या बालानामवरोधश्च माधव । न मे क्लेशतमं तस्मात् पुत्त्रैः सह परन्तप ।
दुर्य्योधनेन निकृता वर्षमद्य चतुर्द्दशं । दुःखादपि सुखं नः स्यात् यदि पुण्यफलक्षयः ।
न मे विशेषो जात्वासीद्धार्त्तराष्ट्रेषु पाण्डवैः । तेन सत्येन कृष्ण त्वां हतामित्रं श्रियावृतं ।
अस्माद्विमुक्तं सङ्ग्रामात् पश्येयं पाण्डवैः सह । नैव शक्याः पराजेतुं सत्त्वं ह्येषां तथाविधं । २१९०
पितरन्त्वेव गर्हेयं नात्मानं न सुयोधनं । येनाहं कुन्तिभोजाय धनं वृत्तैरिवार्पिता ।
बालां मामार्य्यकस्तुभ्यं क्रीडन्तीं कन्दुहस्तिकां । अदात्तु कुन्तिभोजाय सखा सख्ये महात्मने ।
साऽहं पित्रा च निकृता श्वशुरैश्च परन्तप । अत्यन्तदुःखिता कृष्ण किं जीवितफलं मम ।
यन्मां वागब्रवीन्नक्तं सूतके सव्यसाचिनः । पुत्त्रस्ते पृथिवीं जेता यशश्चास्य दिवं स्पृशेत् ।
हत्वा कुरून् महाजन्ये राज्यं प्राप्य धनञ्जयः । भ्रातृभिः सह कौन्तेयस्त्रीन् मेधानाहरिष्यति । २१९५
नाहन्तामभ्यसूयामि नमो धर्म्माय वेधसे । कृष्णाय महते नित्यं धर्म्मो धारयति प्रजाः ।
धर्म्मश्चेदस्ति वार्ष्णेय तथा वागभ्यभाषत । त्वञ्चापि तत्तथा कृष्ण सर्व्वं सम्पादयिष्यसि ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

न मां माधव वैधव्यं नार्थनाशो न वैरता। तथा शोकाय दहति यथा पुत्त्रैर्व्विना भवः
याऽहं गाण्डीवधन्वानं सर्व्वशस्त्रभृतां वरं। धनञ्जयं न पश्यामि का शान्तिर्हृदयस्य मे।
दृतश्चतुर्द्दशं वर्षं यन्नापश्यं युधिष्ठिरं। धनञ्जयञ्च गोविन्द यमौ तञ्च वृकोदरं।
जीवनाशं प्रनष्टानां श्राद्धं कुर्व्वन्ति मानवाः। अर्थतस्ते मम मृतास्तेषाञ्चाहं जनार्द्दन। २२००
ब्रूया माधव राजानं धर्म्मात्मानं युधिष्ठिरं। भूयांस्ते हीयते धर्म्मो मा पुत्त्रक वृथा कृथाः।
पराश्रया वासुदेव या जीवति धिगस्तु तां। वृत्तेः कार्पण्यलब्धाया अप्रतिष्ठैव ज्यायसी।
अथो धनञ्जयं ब्रूया नित्योद्युक्तं वृकोदरं। यदर्थं क्षत्त्रिया सूते तस्य कालोऽयमागतः।
अस्मिंश्चेदागते काले मिथ्या चातिक्रमिष्यति। लोकसम्भाविताः सन्तः सुनृशंसं करिष्यथ। २२०५
नृशंसेन च वो युक्तांस्त्यजेयं शाश्वतीः समाः। काले हि समनुप्राप्ते त्यक्तव्यमपि जीवनं।
माद्रीपुत्त्रौ च वक्तव्यौ क्षत्त्रधर्म्मरतौ सदा। विक्रमेणार्ज्जितान् भोगान् वृणीतं जीवितादपि।
विक्रमाधिगता ह्यर्थाः क्षत्त्रधर्म्मेण जीवतः। मनो मनुष्यस्य सदा प्रीणन्ति पुरुषोत्तम।
गत्वा ब्रूहि महाबाहो सर्व्वशस्त्रभृताम्वरं। अर्ज्जुनं पाण्डवं वीरं द्रौपद्याः पदवीञ्चर।
विदितौ हि तवात्यन्तं संक्रुद्धौ तौ यथाऽन्तकौ। भीमार्ज्जुनौ नयेतां हि देवानपि परां गतिं। २२१०
तयोश्चैतदवज्ञानं यत् सा कृष्णा सभां गता। दुःशासनश्च कर्णश्च परुषाण्यभ्यभाषतां।
दुर्य्योधनो भीमसेनमभ्यगच्छन्मनस्विनं। पश्यतां कुरुमुख्यानां तस्य द्रक्ष्यति तत् फलं।
न हि वैरं समासाद्य प्रशाम्यति वृकोदरः। अचिरादपि भीमस्य न हि वैरं प्रशाम्यति।
यावदन्तं न नयति शात्रवाञ्छत्रुकर्षणः। न दुःखं राज्यहरणं न च द्यूते पराजयः।
प्रव्राजनन्तु पुत्त्राणां न मे तद्दुःखकारणं। यत्तु सा बृहती श्यामा एकवस्त्रा सभां गता। २२१५
अशृणोत् परुषा वाचः किन्नु दुःखतरं ततः। स्त्रीधर्म्मिणी वरारोहा क्षत्त्रधर्म्मरता सदा।
नाभ्यगच्छत्तदा नाथं कृष्णा नाथवती सती। यस्या मम सपुत्त्रायास्त्वं नाथो मधुसूदन।
रामस्य बलिनां श्रेष्ठः प्रद्युम्नस्य महारथः। साऽहमेवं विधं दुःखं सहेयं पुरुषोत्तम।
भीमे जीवति दुर्द्धर्षे विजये चापलायिनि।
॥ वैशम्पायन उवाच ॥ तत आश्वासयामास पुत्त्राधिभिरभिप्लुतां। पितृष्वसारं शोचन्तीं शौरिः पार्थसखः पृथां। २२२०
॥ वासुदेव उवाच ॥ का तु सीमन्तिनी त्वादृक् लोकेष्वस्ति पितृष्वसः। शूरस्य राज्ञो दुहिता आजमीढकुलं गता।
महाकुलीना भवती ह्रदाद्ध्रदमिवागता। ईश्वरी सर्व्वकल्याणी भर्त्रा परमपूजिता।
वीरसूर्व्वीरपत्नी त्वं सर्व्वैः समुदिता गुणैः। सुखदुःखे महाप्राज्ञे त्वादृशी सोढुमर्हति।
निद्रा तन्द्री क्रोधहर्षौ क्षुत्पिपासे हिमातपौ। एतानि पार्था निर्ज्जित्य नित्यं वीरसुखे रताः।
त्यक्तग्रामसुखाः पार्था नित्यं वीरसुखप्रियाः। न ते स्वल्पेन तुष्येयुर्महोत्साहा महाबलाः। २२२५
अन्तं धीरा निषेवन्ते मध्यं ग्राम्यसुखप्रियाः। उत्तमांश्च परिक्लेशान् भोगांश्चातीव मानुषान्।
अन्तेषु रेमिरे धीरा न ते मध्येषु रेमिरे। अन्तःप्राप्तिं सुखामाहुर्द्दुःखमन्तरमेतयोः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

अभिवादयन्ति भवतीं पाण्डवाः सह कृष्णया । आत्मानञ्च कुशलिनं निवेद्याऽऽरनामयं ।
अरोगान् सर्व्वसिद्धार्थान् क्षिप्रन्द्रक्ष्यसि पाण्डवान् । ईश्वरान् सर्व्वलोकस्य हतामित्रान् श्रियाऽऽवृतान् ।
एवमाश्वासिता कुन्ती प्रत्युवाच जनार्द्दनं । पुत्राधिभिरभिध्वस्ता निगृह्याबुद्धिजं तमः । ३२३०
॥ कुन्त्युवाच ॥ यत्यत्तेषां महाबाहो पथ्यं स्यान्मधुसूदन । यथा यथा त्वं मन्येथाः कुर्य्याः कृष्ण तथा तथा ।
अविलोपेन धर्म्मस्य अनिकृत्या परन्तप । प्रभावज्ञाऽस्मि ते कृष्ण सत्यस्याभिजनस्य च ।
व्यवस्थायाञ्च मित्रेषु बुद्धिविक्रमयोस्तथा । त्वमेव नः कुले धर्म्मस्त्वं सत्यं त्वं तपो महत् ।
त्वं त्राता त्वं महद्ब्रह्म त्वयि सर्व्वं प्रतिष्ठितं । यथैवात्थ तथैवैतत् त्वयि सत्यं भविष्यति ।
॥ वैशम्पायन उवाच ॥ तामामन्त्र्य च गोविन्दः कृत्वा चाभिप्रदक्षिणं । प्रातिष्ठत महाबाहुर्दुर्य्योधनगृहान् प्रति । ३२३५
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि कुन्तीकृष्णसंवादे एकोननवतोऽध्यायः ॥ ८९ ॥
॥ वैशम्पायन उवाच ॥ पृथामामन्त्र्य गोविन्दः कृत्वा चाभिप्रदक्षिणं । दुर्य्योधनगृहं शौरिरभ्यगच्छदरिन्दमः ।
लक्ष्म्या परमया युक्तं पुरन्दरगृहोपमं । विचित्रैरासनैर्युक्तं प्रविवेश जनार्द्दनः ।
तस्य कक्ष्या व्यतिक्रम्य तिस्रो द्वाःस्थैरवारितः । ततोऽभ्रघनसङ्काशं गिरिकूटमिवोच्छ्रितं ।
श्रिया ज्वलन्तं प्रासादमारुरोह महायशाः । तत्र राजसहस्रैश्च कुरुभिश्चाभिसंवृतं ।
धार्त्तराष्ट्रं महाबाहुं ददर्शासीनमासने । दुःशासनञ्च कर्णञ्च शकुनिञ्चापि सौबलं । ३२४०
दुर्य्योधनसमीपे तानासनस्थान् ददर्श सः । अभ्यागच्छति दाशार्हे धार्त्तराष्ट्रो महायशाः ।
उदतिष्ठत् सहामात्यः पूजयन्मधुसूदनं । समेत्य धार्त्तराष्ट्रेण सहामात्येन केशवः ।
राजभिस्तत्र वार्ष्णेयः समागच्छत् यथावयः । तत्र जाम्बूनदमयं पर्य्यङ्कं सुपरिष्कृतं ।
विविधास्तरणास्तीर्णमभ्युपाविशदच्युतः । तस्मिन् गां मधुपर्कञ्चाप्युदकञ्च जनार्द्दने ।
निवेदयामास तदा गृहान्राज्यञ्च कौरवः । तत्र गोविन्दमासीनं प्रसन्नादित्यवर्च्चसं । ३२४५
उपासाञ्चक्रिरे सर्व्वे कुरवो राजभिः सह । ततो दुर्य्योधनो राजा वार्ष्णेयं जयतां वरं ।
न्यमन्त्रयत् भोजनेन नाभ्यनन्दच्च केशवः । ततो दुर्य्योधनः कृष्णमब्रवीत् कुरुसंसदि ।
मृदुपूर्व्वं शठोदर्कं कर्णमाभाष्य कौरवः । कस्मादन्नानि पानानि वासांसि शयनानि च ।
त्वदर्थमुपनीतानि नाग्रहीस्त्वं जनार्द्दन । उभयोश्चाददः साह्यमुभयोश्च हिते रतः । ३२५०
सम्बन्धी दयितश्चासि धृतराष्ट्रस्य माधव । त्वं हि गोविन्द धर्म्मार्थौ वेत्थ तत्त्वेन सर्व्वशः ।
तत्र कारणमिच्छामि श्रोतुञ्चक्रगदाधर ।
॥ वैशम्पायन उवाच ॥ स एवमुक्तो गोविन्दः प्रत्युवाच महामनाः । उद्यन्मेघस्वनः काले प्रगृह्य विपुलं भुजं ।
अलम्बूकृतमग्रस्तमनिरस्तमसङ्कुलं । राजीवनेत्रो राजानं हेतुमद्वाक्यमुत्तमं ।
कृतार्था भुञ्जते दूताः पूजां गृह्णन्ति चैव ह । कृतार्थं मां सहामात्यं समर्च्चिष्यसि भारत । ३२५५
एवमुक्तः प्रत्युवाच धार्त्तराष्ट्रो जनार्द्दनं । न युक्तं भवताऽस्मासु प्रतिपत्तुमसाम्प्रतं ।
कृतार्थं वा कृतार्थञ्च त्वां वयं मधुसूदन । यतामहे पूजयितुं दाशार्ह न च शक्नुमः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

न च तत्कारणं विद्मो यस्मिन्नो मधुसूदन। पूजां कृतां प्रीयमाणैर्नामंस्थाः पुरुषोत्तम।
वैरं नो नास्ति भवता गोविन्द न च विग्रहः। स भवान् प्रसमीक्ष्यैतत् नेदृशं वक्तुमर्हति।
एवमुक्तः प्रत्युवाच धार्त्तराष्ट्रं जनार्द्दनः। अभिवीक्ष्य सहामात्यं दाशार्हः प्रहसन्निव।
नाहं कामान्न संरम्भान्न द्वेषान्नार्थकारणात्। न हेतुवादाल्लोभाद्वा धर्म्मं जह्यां कथञ्चन। ३२६०
सम्प्रीतिभोज्यान्यन्नानि आपद्भोज्यानि वा पुनः। न च सम्प्रीयसे राजन्न चैवापद्गता वयं।
अकस्मात् द्वेष्टि वै राजन् जन्मप्रभृति पाण्डवान्। प्रियानुवर्त्तिनो भ्रातॄन् सर्व्वैः समुदितान् गुणैः।
अकस्माच्चैव पार्थानां द्वेषणं नोपपद्यते। धर्म्मे स्थिताः पाण्डवेयाः कस्तान् किं वक्तुमर्हति।
यस्तान् द्वेष्टि स मां द्वेष्टि यस्ताननु स मामनु। ऐकात्म्यं मां गतं विद्धि पाण्डवैर्धर्म्मचारिभिः।
कामक्रोधानुवर्त्ती हि यो मोहाद्विरुरुत्सति। गुणवन्तञ्च यो द्वेष्टि तमाहुः पुरुषाधमं। ३२६५
यः कल्याणगुणान् ज्ञातीन् मोहाल्लोभाद्दिदृक्षते। सोऽजितात्माऽजितक्रोधो न चिरं तिष्ठति श्रियं।
अथ यो गुणसम्पन्नान् हृदयस्याप्रियानपि। प्रियेण कुरुते वश्यांश्चिरं यशसि तिष्ठति।
सर्व्वमेतन्न भोक्तव्यमन्नं दुष्टाभिसंहितं। क्षत्तुरेकस्य भोक्तव्यमिति मे धीयते मतिः।
एवमुक्त्वा महाबाहुर्दुर्य्योधनममर्षणं। निश्चक्राम ततः शुभ्राद्धार्त्तराष्ट्रनिवेशनात्।
निर्य्याय च महाबाहुर्वासुदेवो महामनाः। निवेशाय ययौ वेश्म विदुरस्य महात्मनः। ३२७०
तमभ्यगच्छद्द्रोणश्च कृपो भीष्मोऽथ वाह्लिकः। कुरवश्च महाबाहुं विदुरस्य गृहे स्थितं।
त ऊचुर्म्माधवं वीरं कुरवो मधुसूदनं। निवेदयाम वार्ष्णेय सरत्नांस्ते गृहान् वयं।
तानुवाच महातेजाः कौरवान् मधुसूदनः। सर्व्वे भवन्तो गच्छन्तु सर्व्वा मेऽपचितिः कृता।
यातेषु कुरुषु क्षत्ता दाशार्हमपराजितं। अभ्यर्चयामास तदा सर्व्वकामैः प्रयत्नवान्।
ततः क्षत्ताऽन्नपानानि शुचीनि गुणवन्ति च। उपाहरदनेकानि केशवाय महात्मने। ३२७५
तैस्तर्प्पयित्वा प्रथमं ब्राह्मणान्मधुसूदनः। वेदविद्भ्यो ददौ कृष्णः परमद्रविणान्यपि।
ततोऽनुयायिभिः सार्द्धं मरुद्भिरिव वासवः। विदुरान्नानि बुभुजे शुचीनि गुणवन्ति च।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि श्रीकृष्णदुर्य्योधनसंवादे नवतितमोऽध्यायः॥ ९० ॥
॥ वैशम्पायन उवाच ॥ तं भुक्तवन्तमाश्वस्तं निशायां विदुरोऽब्रवीत्। नेदं सम्यग्व्यवसितं केशवागमनं तव।
अर्थधर्म्मातिगो मन्दः संरम्भी च जनार्द्दन। मानघ्नो मानकामश्च वृद्धानां शासनातिगः।
धर्म्मशास्त्रातिगो मूढो दुरात्मा प्रग्रहङ्गतः। अनेयः श्रेयसां मन्दो धार्त्तराष्ट्रो जनार्द्दन। ३२८०
कामात्मा प्राज्ञमानी च मित्रध्रुक् सर्व्वशङ्कितः। अकर्त्ता चाकृतज्ञश्च त्यक्तधर्म्मा प्रियानृतः।
मूढश्चाकृतबुद्धिश्च इन्द्रियाणामनीश्वरः। कामानुसारी कृत्येषु सर्व्वेष्वकृतनिश्चयः।
एतैश्चान्यैश्च बहुभिर्द्दोषैरेष समन्वितः। त्वयोच्यमानः श्रेयोऽपि संरम्भान्न ग्रहीष्यति।
भीष्मे द्रोणे कृपे कर्णे द्रोणपुत्त्रे जयद्रथे। भूयसीं वर्त्तते वृत्तिं न शमे कुरुते मनः।
निश्चितं धार्त्तराष्ट्राणां सकर्णानां जनार्द्दन। भीष्मद्रोणमुखान् पार्था न शक्ताः प्रतिवीक्षितुं। ३२८५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Belgaon

सेनासमुदयं कृत्वा पार्थिवं मधुसूदन । कृतार्थं मन्यते बाल आत्मानमविचक्षणः ।
एकः कर्णः परान् जेतुं समर्थ इति निश्चितं । धार्त्तराष्ट्रस्य दुर्ब्बुद्धेः स शमं नोपयास्यति ।
संविच धार्त्तराष्ट्राणां सर्व्वेषामेव केशव । शमे प्रयतमानस्य तव सौभ्रात्रकाङ्क्षिणः ।
न पाण्डवानामस्माभिः प्रतिदेयं यथोचितं । इति व्यवसितास्तेषु वचनं स्यान्निरर्थकं ।
यत्र सूक्तं दुरुक्तञ्च समं स्यान्मधुसूदन । न तत्र प्रलपेत् प्राज्ञो बधिरेष्विव गायनः । ३२९०
अविजानत्सु मूढेषु निर्म्मर्य्यादेषु माधव । न त्वं वाक्यं ब्रुवन् युक्तश्चाण्डालेषु द्विजो यथा ।
सोऽयं बलस्थो मूढश्च न करिष्यति ते वचः । तस्मिन्निरर्थकं वाक्यमुक्तं सम्पत्स्यते तव ।
तेषां समुपविष्टानां सर्व्वेषां पापचेतसां । तव मध्यावतरणं मम कृष्ण न रोचते ।
दुर्ब्बुद्धीनामशिष्टानां बहूनां दुष्टचेतसां । प्रतीपं वचनं मध्ये तव कृष्ण न रोचते ।
अनुपासितवृद्धत्वात् श्रियो दर्पाच्च मोहितः । वयोदर्पादमर्षाच्च न ते श्रेयो ग्रहीष्यति । ३२९५
बलं बलवदप्यस्य यदि वक्ष्यसि माधव । त्वय्यस्य महती शङ्का न करिष्यति ते वचः ।
नेदमद्य युधा शक्यमिन्द्रेणापि सहामरैः । इति व्यवसिताः सर्व्वे धार्त्तराष्ट्रा जनार्द्दन ।
तेष्वेवमुपपन्नेषु कामक्रोधानुवर्त्तिषु । समर्थमपि ते वाक्यमसमर्थं भविष्यति ।
मध्ये तिष्ठन् हस्त्यनीकस्य मन्दो रथाश्वयुक्तस्य बलस्य मूढः । दुर्य्योधनो मन्यते वीतभीतिः कृत्स्ना मयेयं पृथिवी जितेति ।
आशंसते वै धृतराष्ट्रस्य पुत्रो महाराज्यमसपत्नं पृथिव्यां । तस्मिन् शमः केवलो नोपलभ्यो बद्धं सन्तं मन्यते लब्धमर्थं । ३३००
पर्य्यस्तेयं पृथिवी कालपक्वा दुर्य्योधनार्थे पाण्डवान् योद्धुकामाः । समागताः सर्व्वयोधाः पृथिव्यां राजानश्च क्षितिपालैः समेताः ।
सर्व्वे चैते कृतवैराः पुरस्तात् त्वया राजानो हृतसाराश्च कृष्ण । तवोद्वेगात् संश्रिता धार्त्तराष्ट्रान् सुसंहताः सह कर्णेन वीराः ।
त्यक्तात्मानः सह दुर्य्योधनेन हृष्टा योद्धुं पाण्डवान् सर्व्वयोधाः । तेषां मध्ये प्रविशेथा यदि त्वं न तन्मतं मम दाशार्हवीर ।
तेषां समुपविष्टानां बहूनां दुष्टचेतसां । कथं मध्ये प्रपद्येथाः शत्रूणां शत्रुकर्षण ।
सर्व्वथा त्वं महाबाहो देवैरपि दुरुत्सहः । प्रभावं पौरुषं बुद्धिं जानामि तव शत्रुहन् । ३३०५
या मे प्रीतिः पाण्डवेषु भूयः सा त्वयि माधव । प्रेम्णा च बहुमानाच्च सौहृदाच्च ब्रवीम्यहं ।
या मे प्रीतिः पुष्कराक्ष त्वद्दर्शनसमुद्भवा । सा किमाख्यायते तुभ्यमन्तरात्माऽसि देहिनां ।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि श्रीकृष्णविदुरसंवादे एकनवतोऽध्यायः ॥ ९१ ॥
॥ श्रीभगवानुवाच ॥ यथा ब्रूयान्महाप्राज्ञो यथा ब्रूयाद्विचक्षणः । यथा वाच्यस्त्वद्विधेन भवता मद्विधः सुहृत् ।
धर्म्मार्थयुक्तं तथ्यञ्च यथा त्वय्युपपद्यते । तथा वचनमुक्तोऽस्मि त्वयैतत् पितृमातृवत् ।
सत्यं प्राप्तञ्च युक्तञ्चाप्येवमेव यथात्थ मां । शृणुष्वागमने हेतुं विदुरावहितो भव । ३३१०
दौरात्म्यं धार्त्तराष्ट्रस्य क्षत्रियाणाञ्च वैरतां । सर्व्वमेतदहं जानन् क्षत्तः प्राप्तोऽद्य कौरवान् ।
पर्य्यस्तां पृथिवीं सर्व्वां साश्वां सरथकुञ्जरां । यो मोचयेत् मृत्युपाशात् प्राप्नुयाद्धर्म्ममुत्तमं ।
धर्म्मकार्य्यं यतन् शक्त्या नो चेत् प्राप्नोति मानवः । प्राप्तो भवति तत् पुण्यमत्र मे नास्ति संशयः ।
मनसा चिन्तयन् पापं कर्म्मणा नाभिरोचयेत् । न प्राप्नोति फलं तस्येत्येवं धर्म्मविदो विदुः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सोऽहं यतिष्ये प्रशमं चत्तः कर्त्तुममायया। कुरूणां सृञ्जयानाञ्च सङ्ग्रामे विनशिष्यतां।
सेयमापन्महाघोरा कुरुष्वेव समुत्थिता। कर्णदुर्य्योधनकृता सर्व्वे ह्येते तदन्वयाः। ३३१५
व्यसने क्लिश्यमानं हि यो मित्रं नाभिपद्यते। अनुनीय यथाशक्ति तं नृशंसं विदुर्ब्बुधाः।
आकेशग्रहणात् मित्रमकार्य्यात् सन्निवर्त्तयन्। अवाच्यः कस्यचिद्भवति कृतयत्नो यथाबलं।
तत् समर्थं शुभं वाक्यं धर्म्मार्थसहितं हितं। धार्त्तराष्ट्रः सहामात्यो ग्रहीतुं विदुरार्हति।
हितं हि धार्त्तराष्ट्राणां पाण्डवानान्तथैव च। पृथिव्यां क्षत्रियाणाञ्च यतिष्येऽहममायया। ३३२०
हिते प्रयतमानं मां शङ्केद्दुर्य्योधनो यदि। हृदयस्य च मे प्रीतिरानृण्यञ्च भविष्यति।
ज्ञातीनां हि मिथो भेदे यन्मित्रं नाभिपद्यते। सर्व्वयत्नेन माध्यस्थं न तन्मित्रं विदुर्ब्बुधाः।
न मां ब्रूयुरधर्म्मिष्ठा मूढा ह्यसुहृदस्तथा। शक्तो नावारयत् कृष्णः संरब्धान् कुरुपाण्डवान्।
उभयोः साधयन्नर्थमहमागत इत्युत। तत्र यत्नमहं कृत्वा गच्छेयं नृष्ववाच्यतां।
मम धर्म्मार्थयुक्तं हि श्रुत्वा वाक्यमनामयं। नचेदादास्यते बालो दिष्टस्य वशमेष्यति। ३३२५
अहापयन्पाण्डवार्थं यथावच्छमं कुरूणां यदि वाचरेयं। पुण्यञ्च मे स्याच्चरितं महात्मन् मुच्येरंश्च कुरवो मृत्युपाशात्।
अपि वाचं भाषमाणस्य काव्यां धर्म्मारामामर्थवतीमहिंस्रां। अवेक्षेरन् धार्त्तराष्ट्राः शमार्थं माञ्च प्राप्तं कुरवः पूजयेयुः।
न चापि मम पर्य्याप्ताः सहिताः कुरुपार्थिवाः। क्रुद्धस्य प्रमुखे स्थातुं सिंहस्येवेतरे मृगाः।
॥ वैशम्पायन उवाच॥ इत्येवमुक्त्वा वचनं वृष्णीनामृषभस्तदा। शयने सुखसंस्पर्शे शिश्ये यदुसुखावहः।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि श्रीकृष्णविदुरसंवादे द्विनवतोऽध्यायः॥ ९२॥
॥ वैशम्पायन उवाच॥ तथा कथयतोरेवं तयोर्ब्बुद्धिमतोस्तदा। शिवा नक्षत्रसम्पन्ना सा व्यतीयाय शर्व्वरी। ३३३०
धर्म्मार्थकामयुक्ताश्च विचित्रार्थपदाक्षराः। शृण्वतो विविधा वाचो विदुरस्य महात्मनः।
कथाभिरनुरूपाभिः कृष्णस्यामिततेजसः। अकामस्येव कृष्णस्य सा व्यतीयाय शर्व्वरी।
ततस्तु स्वरसम्पन्ना बहवः सूतमागधाः। शङ्खदुन्दुभिनिर्घोषैः केशवं प्रत्यबोधयन्।
तत उत्थाय दाशार्हं ऋषभः सर्व्वसात्वतां। सर्व्वमावश्यकञ्चक्रे प्रातः कार्य्यं जनार्द्दनः।
कृतोदकानुजप्यः स हुताग्निः समलङ्कृतः। ततश्चादित्यमुद्यन्तमुपातिष्ठत माधवः। ३३३५
अथ दुर्य्योधनः कृष्णं शकुनिश्चापि सौबलः। सन्ध्यां तिष्ठन्तमभ्येत्य दाशार्हमपराजितं।
आचचक्षतान्तु कृष्णस्य धृतराष्ट्रं सभागतं। कुरूंश्च भीष्मप्रमुखान् राज्ञः सर्व्वांश्च पार्थिवान्।
त्वामर्थयन्ते गोविन्द दिवि शक्रमिवामराः। तावभ्यनन्दद्गोविन्दः साम्ना परमवल्गुना।
ततो विमल आदित्ये ब्राह्मणेभ्यो जनार्द्दनः। ददौ हिरण्यं वासांसि गाश्चाश्वांश्च परन्तपः।
विसृज्य बहुरत्नानि दाशार्हमपराजितं। तिष्ठन्तमुपसंगम्य ववन्दे सारथिस्तदा। ३३४०
ततो रथेन शुभ्रेण महता किङ्किणीकिना। हयोत्तमयुजा शीघ्रमुपातिष्ठत दारुकः।
तमुपास्थितमाज्ञाय रथं दिव्यं महामनाः। महाभ्रघननिर्घोषं सर्व्वरत्नविभूषितं।
अग्निं प्रदक्षिणं कृत्वा ब्राह्मणांश्च जनार्द्दनः। कौस्तुभं मणिमामुच्य श्रिया परमया ज्वलन्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कुरुभिः संवृतः कृष्णो वृष्णिभिश्चाभिरक्षितः। आतिष्ठत रथं शौरिः सर्व्वयादवनन्दनः।
अन्वारुरोह दाशार्हं विदुरः सर्व्वधर्म्मवित्। सर्व्वप्राणभृतां श्रेष्ठं सर्व्वबुद्धिमतां वरं।
ततो दुर्य्योधनः कृष्णं शकुनिश्चापि सौबलः। द्वितीयेन रथेनैनमन्वयातां परन्तपं।
सात्यकिः कृतवर्म्मा च वृष्णीनाञ्चापरे रथाः। पृष्ठतोऽनुययुः कृष्णं गजैरश्वैरथैरपि।
तेषां हेमपरिष्कारैर्युक्ताः परमवाजिभिः। गच्छतां घोषिणश्चित्रा रथा राजन् विरेजिरे।
संमृष्टसंसिक्तरजः प्रतिपेदे महापथं। राजर्षिचरितं काले कृष्णो धीमान् श्रिया ज्वलन्।
ततः प्रयाते दाशार्हे प्रावाद्यन्तैकपुष्कलाः। शङ्खाश्च दध्मिरे तत्र वाद्यान्यन्यानि यानि च।
प्रवीराः सर्व्वलोकस्य युवानः सिंहविक्रमाः। परिवार्य्य रथं शौरेरगच्छन्त परन्तपाः।
ततोऽन्ये बहुसाहस्रा विचित्राद्भुतवाससः। असिप्रासायुधधराः कृष्णस्यासन्पुरःसराः।
गजाः पञ्चशतास्तत्र रथाश्चासन् सहस्रशः। प्रयान्तमन्वयुर्वीरं दाशार्हमपराजितं।
पुरं कुरूणां संवृत्तं द्रष्टुकामं जनार्द्दनं। सबालवृद्धं सस्त्रीकं रथ्यागतमरिन्दम।
वेदिकामाश्रिताभिश्च समाक्रान्तान्यनेकशः। प्रचलन्तीव भारेण योषिद्भिर्भवनान्युत।
स पूज्यमानः कुरुभिः संशृण्वन् मधुराः कथाः। यथार्हं प्रतिसत्कुर्व्वन् प्रेक्षमाणः शनैर्य्ययौ।
ततः सभां समासाद्य केशवस्यानुयायिनः। सशङ्खैर्वेणुनिर्घोषैर्द्दिशः सर्व्वा व्यनादयन्।
ततः सा समितिः सर्व्वा राज्ञाममिततेजसां। सम्प्राकम्पत हर्षेण कृष्णागमनकाङ्क्षया।
ततोऽभ्यासगते कृष्णे समहृष्यन्नराधिपाः। श्रुत्वा तं रथनिर्घोषं पर्ज्जन्यनिनदोपमं।
आसाद्य तु सभाद्वारमृषभः सर्व्वसात्वतां। अवतीर्य्य रथाच्छौरिः कैलासशिखरोपमात्।
नवमेघप्रतीकाशां ज्वलन्तीमिव तेजसा। महेन्द्रसदनप्रख्यां प्रविवेश सभां ततः।
पाणौ गृहीत्वा विदुरं सात्यकिञ्च महायशाः। ज्योतींष्यादित्यवद्राजन् कुरून् प्राच्छादयन् श्रिया।
अग्रतो वासुदेवस्य कर्णदुर्य्योधनावुभौ। वृष्णयः कृतवर्म्मा चाप्यासन् कृष्णस्य पृष्ठतः।
धृतराष्ट्रं पुरस्कृत्य भीष्मद्रोणादयस्ततः। आसनेभ्योऽचलन् सर्व्वे पूजयन्तो जनार्द्दनं।
अभ्यागच्छति दाशार्हे प्रज्ञाचक्षुर्नरेश्वरः। सहैव द्रोणभीष्माभ्यामुदतिष्ठन्महायशाः।
उत्तिष्ठति महाराजे धृतराष्ट्रे जनेश्वरे। तानि राजसहस्राणि समुत्तस्थुः समन्ततः।
आसनं सर्व्वतोभद्रं जाम्बूनदपरिष्कृतं। कृष्णार्थे कल्पितं तत्र धृतराष्ट्रस्य शासनात्।
स्मयमानस्तु राजानं भीष्मद्रोणौ च माधवः। अभ्यभाषत धर्म्मात्मा राज्ञश्चान्यान् यथावयः।
तत्र केशवमानर्च्चुः सम्यगभ्यागतं सभां। राजानः पार्थिवाः सर्व्वे कुरवश्च जनार्द्दनं।
तत्र तिष्ठन् स दाशार्हो राजमध्ये परन्तपः। अपश्यदन्तरीक्षस्थान् ऋषीन् परपुरञ्जयः।
ततस्तानभिसम्प्रेक्ष्य नारदप्रमुखानृषीन्। अभ्यभाषत दाशार्हो भीष्मं शान्तनवं शनैः।
पार्थिवीं समितिं द्रष्टुमृषयोऽभ्यागता नृप। निमन्त्र्यतामासनैश्च सत्कारेण च भूयसा।
नैतेष्वनुपविष्टेषु शक्यं केनचिदासितुं। पूजा प्रयुज्यतामाशु मुनीनां भावितात्मनां।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ऋषीन्क्रान्तनवो दृष्ट्वा सभाद्वारमुपस्थितान्। त्वरमाणस्ततो भृत्यानासनानीत्यचोदयत्।
आसनान्यथ मृष्टानि महान्ति विपुलानि च। मणिकाञ्चनचित्राणि समाजह्रुस्ततस्ततः।
तेषु तत्रोपविष्टेषु गृहीतार्घ्येषु भारत। निषसादासने कृष्णो राजानश्च यथासनं। ३१७५
दुःशासनः सात्यकये ददावासनमुत्तमं। विविंशतिर्ददौ पीठं काञ्चनं कृतवर्म्मणे।
अविदूरन्तु कृष्णस्य कर्णदुर्य्योधनावुभौ। एकासने महात्मानौ निषेदतुरमर्षणौ।
गान्धारराजः शकुनिर्गान्धारैरभिरक्षितः। निषसादासने राजा सहपुत्रो विशाम्पते।
विदुरो मणिपीठे तु शुक्लस्पर्द्ध्याजिनोत्तरे। संस्पृशन्नासनं शौरेर्म्महामतिरुपाविशत्।
चिरस्य दृष्ट्वा दाशार्हं राजानः सर्व्व एव ते। अमृतस्येव नातृप्यन् प्रेक्षमाणा जनार्द्दनं। ३१८०
अतसीपुष्पसङ्काशः पीतवासा जनार्द्दनः। व्यभ्राजत सभामध्ये हेम्नीवोपहितो मणिः।
ततस्तूष्णीं सर्व्वमासीत् गोविन्दगतमानसं। न तत्र कश्चित् किञ्चिद्वा व्याजहार पुमान् क्वचित्।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि भगवदुपवेशे त्रिनवतोऽध्यायः॥ ९३ ॥
॥ वैशम्पायन उवाच ॥ तेष्वासीनेषु सर्व्वेषु तूष्णीम्भूतेषु राजसु। वाक्यमभ्याददे कृष्णः सुदंष्ट्रो दुन्दुभिस्वनः।
जीमूत इव घर्म्मान्ते सर्व्वां संश्रावयन् सभां। धृतराष्ट्रमभिप्रेक्ष्य समभाषत माधवः। ३१८५
॥ श्रीभगवानुवाच ॥ कुरूणां पाण्डवानाञ्च शमः स्यादिति भारत। अप्रणाशेन वीराणामेतद्याचितुमागतः।
राजन्नान्यत्प्रवक्तव्यं तव नैश्रेयसं वचः। विदितं ह्येव ते सर्व्वं वेदितव्यमरिन्दम।
इदं ह्यद्य कुलं श्रेष्ठं सर्व्वराजसु पार्थिव। श्रुतवृत्तोपसम्पन्नं सर्व्वैः समुदितैर्गुणैः।
कृपाऽनुकम्पा कारुण्यमानृशंस्यञ्च भारत। तथार्ज्जवं क्षमा सत्यं कुरुष्वेतद्विशिष्यते।
तस्मिन्नेवंविधे राजन् कुले महति तिष्ठति। त्वन्निमित्तं विशेषेण नेह युक्तमसाम्प्रतं। ३१९०
त्वं हि धारयिता श्रेष्ठः कुरूणां कुरुसत्तम। मिथ्याप्रचरतां तात वाह्येष्वभ्यन्तरेषु च।
ते पुत्रास्तव कौरव्य दुर्य्योधनपुरोगमाः। धर्म्मार्थौ पृष्ठतः कृत्वा प्रचरन्ति नृशंसवत्।
अशिष्टा गतमर्य्यादा लोभेन हृतचेतसः। स्वेषु बन्धुषु मुख्येषु तद्वेत्थ पुरुषर्षभ।
सेयमापन्महाघोरा कुरुष्वेव समुत्थिता। उपेक्ष्यमाणा कौरव्य पृथिवीं घातयिष्यति।
शक्या चेयं शमयितुं त्वञ्चेदिच्छसि भारत। न दुष्करो ह्यत्र शमो मतो मे भरतर्षभ। ३१९५
त्वय्यधीनः शमो राजन् मयि चैव विशाम्पते। पुत्रान् स्थापय कौरव्य स्थापयिष्याम्यहं परान्।
आज्ञा तव हि राजेन्द्र कार्य्या पुत्रैः सहान्वयैः। हितम्बलवदप्येषां तिष्ठतां तव शासने।
तव चैव हितं राजन् पाण्डवानामथो हितं। शमे प्रयतमानस्य तव शासनकाङ्क्षिणः।
स्वयं निष्फलमालक्ष्य संविधत्स्व विशाम्पते। सहायभूता भरतास्तवैव स्युर्जनेश्वर।
धर्म्मार्थयोस्तिष्ठ राजन् पाण्डवैरभिरक्षितः। न हि शक्यास्तथाभूता यत्नादपि नराधिप। ३२००
न हि त्वां पाण्डवैर्जेतुं रक्ष्यमाणं महात्मभिः। इन्द्रोऽपि देवैः सहितः प्रसहेत कुतो नृपाः।
यत्र भीष्मश्च द्रोणश्च कृपः कर्णो विविंशतिः। अश्वत्थामा विकर्णश्च सोमदत्तोऽथ वाह्लिकः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

सैन्धवस्य कलिङ्गस्य काम्बोजस्य सुदक्षिणः । युधिष्ठिरो भीमसेनः सव्यसाची यमौ तथा ।
सात्यकिश्च महातेजा युयुत्सुश्च महारथः । को नु तान् विपरीतात्मा युध्येत भरतर्षभ ।
लोकस्येश्वरतां भूयः शत्रुभिश्चाप्यधृष्यतां । प्राप्स्यसि त्वममित्रघ्न सहितः कुरुपाण्डवैः ।
तस्य ते पृथिवीपालास्त्वत्समाः पृथिवीपते । श्रेयांसश्चैव राजानः सन्धास्यन्ते परन्तप ।
स त्वं पुत्रैश्च पौत्रैश्च पितृभिर्भ्रातृभिस्तथा । सुहृद्भिः सर्व्वतो गुप्तः सुखं शक्ष्यसि जीवितुं ।
एतानेव पुरोधाय सत्कृत्य च यथा पुरा । अखिलां भोक्ष्यसे सर्व्वां पृथिवीं पृथिवीपते ।
एतैर्हि सहितैः सर्व्वैः पाण्डवैः स्वैश्च भारत । अन्यान् विजेष्यसे शत्रूनेष स्वार्थस्तवार्थिनः ।
तैरेवोपार्ज्जितां भूमिं भोक्ष्यसे च परन्तप । यदि सम्पत्स्यते पुत्रैः सहामात्यैर्न्नराधिप ।
संयुगे वै महाराज दृश्यते सुमहान् क्षयः । क्षये चोभयतो राजन् कं धर्म्ममनुपश्यसि ।
पाण्डवैर्निहतैः सङ्ख्ये पुत्रैर्व्वाऽपि महाबलैः । यद्विन्देथाः सुखं राजंस्तद्ब्रूहि भरतर्षभ ।
शूराश्च हि कृतास्त्राश्च सर्व्वे युद्धाभिकाङ्क्षिणः । पाण्डवास्तावकाश्चैव तान् रक्ष महतो भयात् ।
न पश्येम कुरून् सर्व्वान् पाण्डवांश्चैव संयुगे । क्षीणानुभयतः शूरान् रथिनो रथिभिर्हतान् ।
समवेताः पृथिव्यां हि राजानो राजसत्तम । अमर्षवशमापन्ना नाशयेयुरिमाः प्रजाः ।
त्राहि राजन्निमं लोकं न नश्येयुरिमाः प्रजाः । त्वयि प्रकृतिमापन्ने शेषः स्यात् कुरुनन्दन ।
शुक्ला वदान्या ह्रीमन्त आर्य्याः पुण्याभिजातयः । अन्योन्यसचिवा राजंस्तान् पाहि महतो भयात् ।
शिवेनेमे भूमिपालाः समागम्य परस्परं । सह भुक्त्वा च पीत्वा च प्रतियान्तु यथागृहं ।
सुवाससः स्रग्विणश्च सत्कृता भरतर्षभ । अमर्षञ्च निराकृत्य वैराणि च परन्तप ।
हार्द्दं यत्पाण्डवेष्वासीत् प्राप्तेऽस्मिन्नायुषः क्षये । तदेव ते भवत्वद्य सन्धत्स्व भरतर्षभ ।
बाला विहीनाः पित्रा ते त्वयैव परिवर्द्धिताः । तान् पालय यथान्यायं पुत्रांश्च भरतर्षभ ।
भवतैव हि रक्ष्यास्ते व्यसनेषु विशेषतः । मा ते धर्म्मस्तथैवार्थो नश्येत भरतर्षभ ।
आहुस्त्वां पाण्डवा राजन्नभिवाद्य प्रसाद्य च । भवतः शासनाद्दुःखमनुभूतं सहानुगैः ।
द्वादशेमानि वर्षाणि वने निर्व्युषितानि नः । त्रयोदशं तथाऽज्ञातैः सजने परिवत्सरं ।
स्थाता नः समये तस्मिन् पितेति कृतनिश्चयाः । नाहास्म समयं तात तच्च नो ब्राह्मणा विदुः ।
तस्मिन्नः समये तिष्ठ स्थितानां भरतर्षभ । नित्यं संक्लेशिता राजन् स्वराज्यांशं लभेमहि ।
त्वं धर्म्ममर्थं सञ्जानन् सम्यङ्नस्त्रातुमर्हसि । गुरुत्वं भवति प्रेक्ष्य बहून् क्लेशान् तितिक्ष्महे ।
स भवान् मातृपितृवदस्मासु प्रतिपद्यतां । गुरोर्गरीयसी वृत्तिर्य्या च शिष्यस्य भारत ।
वर्त्तामहे त्वयि च तां त्वञ्च वर्त्तस्व नस्तथा । पित्रा स्थापयितव्या हि वयमुत्पथमास्थिताः ।
संस्थापय पथिष्वस्मांस्तिष्ठ धर्म्मे स्ववर्त्मनि । आहुस्तेमां परिषदं पुत्रास्ते भरतर्षभ ।
धर्म्मज्ञेषु सभासत्सु नेह युक्तमसाम्प्रतं । यत्र धर्म्मो ह्यधर्म्मेण सत्यं यत्रानृतेन च ।
हन्यते प्रेक्षमाणानां हतास्तत्र सभासदः । विद्धो धर्म्मो ह्यधर्म्मेण सभां यत्र प्रपद्यते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

न चास्य शल्यं कृन्तन्ति विद्धास्तत्र सभासदः। धर्म्म एतानारुजति यथा नद्यनुकूलजान्।
ये धर्म्ममनुपश्यन्तस्तूष्णीं ध्यायन्त आसते। ते सत्यमाहुर्धर्म्म्यञ्च न्याय्यञ्च भरतर्षभ।
शक्यं किमन्यदुक्तं ते दानादन्यत् जनेश्वर। ब्रुवन्तु वा महीपालाः सभायां ये समासते। २४३५
धर्म्मार्थौ सम्प्रधार्य्यैव यदि सत्यं ब्रवीम्यहं। प्रमुञ्चेमान्मृत्युपाशात् क्षत्रियान् पुरुषर्षभ।
प्रशाम्य भरतश्रेष्ठ मामन्युवशमन्वगाः। पित्र्यन्तेभ्यः प्रदायांशं पाण्डवेभ्यो यथोचितं।
ततः सपुत्त्रः सिद्धार्थो भुङ्क्ष्व भोगान् परन्तप। अजातशत्रुं जानीषे स्थितं धर्म्मे सतां सदा।
सपुत्त्रे त्वयि वृत्तिञ्च वर्त्तते यां नराधिप। दाहितश्च निरस्तश्च त्वामेवोपाश्रितः पुनः।
इन्द्रप्रस्थं त्वयैवासौ सपुत्त्रेण विवासितः। स तत्र निवसन् सर्व्वान् वशमानीय पार्थिवान्। २४४०
त्वन्मुखानकरोद्राजन्न च त्वामत्यवर्त्तत। तस्यैवं वर्त्तमानस्य सौवलेन जिहीर्षता।
राष्ट्राणि धनधान्यञ्च प्रयुक्तः परमोपधिः। स तामवस्थां सम्प्राप्य कृष्णां प्रेक्ष्य सभां गतां।
क्षत्त्रधर्म्मादमेयात्मा नाकम्पत युधिष्ठिरः। अहन्तु तव तेषाञ्च श्रेय इच्छामि भारत।
धर्म्मादर्थात् सुखाच्चैव माराजन्नीनशः प्रजाः। अनर्थमर्थं मन्वानोऽप्यर्थञ्चानर्थमात्मनः।
लोभेऽतिप्रसृतान् पुत्त्रान्निगृह्णीष्व विशाम्पते। स्थिताः शुश्रूषितुं पार्थाः स्थिता योद्धुमरिन्दमाः। २४४५
यत्ते पथ्यतमं राजंस्तस्मिंस्तिष्ठ परन्तप।
॥ वैशम्पायन उवाच ॥ तद्वाक्यं पार्थिवाः सर्व्वे हृदयैः समपूजयन्। न तत्र कश्चिदन्तुं हि वाचं प्राक्रामदग्रतः।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि भगवद्वाक्ये चतुर्नवतोऽध्यायः॥ ९४ ॥
॥ वैशम्पायन उवाच ॥ तस्मिन्नभिहिते वाक्ये केशवेन महात्मना। स्तिमिता हृष्टरोमाण आसन् सर्व्वे सभासदः।
कश्चिदुत्तरमेतेषां वक्तुं नोत्सहते पुमान्। इति सर्व्वे मनोभिस्ते चिन्तयन्ति स्म पार्थिवाः।
तथा तेषु च सर्व्वेषु तूष्णीम्भूतेषु राजसु। जामदग्न्य इदं वाक्यमब्रवीत् कुरुसंसदि। २४५०
इमां मे सोपमां वाचं शृणु सत्यमशङ्कितः। तां श्रुत्वा श्रेय आधत्स्व यदि साध्विति मन्यसे।
राजा दम्भोद्भवो नाम सार्व्वभौमः पुराऽभवत्। अखिलां बुभुजे सर्व्वां पृथिवीमिति नः श्रुतं।
स स्म नित्यं निशापाये प्रातरुत्थाय वीर्य्यवान्। ब्राह्मणान् क्षत्त्रियांश्चैव पृच्छन्नास्ते महारथः।
अस्ति कश्चिद्विशिष्टो वा मद्विधो वा भवेत् युधि। शूद्रो वैश्यः क्षत्त्रियो वा ब्राह्मणो वाऽपि शस्त्रभृत्।
इति ब्रुवन्नन्वचरत् स राजा पृथिवीमिमां। दर्प्पेण महता मत्तः कञ्चिदन्यमचिन्तयन्। २४५५
तञ्च वैद्या अकृपणा ब्राह्मणाः सर्व्वतोऽभयाः। प्रत्यषेधन्त राजानं श्लाघमानं पुनः पुनः।
निषिध्यमानोऽप्यसकृत् पृच्छत्येवं स वै द्विजान्। अतिमानं श्रिया मत्त तमूचुर्ब्राह्मणास्तदा।
तपस्विनौ महात्मानौ वेदव्रतसमन्वितौ। उदीर्य्यमाणं राजानं क्रोधदीप्ता द्विजातयः।
अनेकजयिनौ सङ्ख्ये यौ वै पुरुषसत्तमौ। तयोस्त्वं न समो राजन् भवितासि कदाचन।
एवमुक्तः स राजा तु पुनः पप्रच्छ तान् द्विजान्। क्व तौ वीरौ क्वजन्मानौ किंकर्म्माणौ च कौ च तौ। २४६०
॥ ब्राह्मणा ऊचुः॥ नरो नारायणश्चैव तापसाविति नः श्रुतं। आयातौ मानुषे लोके ताभ्यां युध्यस्व पार्थिव।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

श्रूयेते तौ महात्मानौ नरनारायणावुभौ। तपो घोरमनिर्द्देश्यं तप्येते गन्धमादने।
स राजा महतीं सेनां योजयित्वा षडङ्गिनीं। अमृष्यमाणः सम्प्रायात् यत्र तावपराजितौ।
स गत्वा विषमं घोरं पर्व्वतं गन्धमादनं। मृगयाणोऽन्वगच्छत्तौ तापसौ वनमाश्रितौ।
तौ दृष्ट्वा क्षुत्पिपासाभ्यां कृशौ धमनिसन्ततौ। शीतवातातपैश्चैव कर्षितौ पुरुषोत्तमौ। २४६५
अभिगम्योपसंगृह्य पर्य्यपृच्छदनामयं। तमर्च्चित्वा फलैर्मूलैरासनेनोदकेन च।
न्यमन्त्रयेतां राजानं किङ्कार्य्यं क्रियतामिति। ततस्तामानुपूर्व्वीं स पुनरेवान्वकीर्त्तयत्।
बाहुभ्यां मे जिता भूमिर्निहताः सर्व्वशत्रवः। भवद्भ्यां युद्धमाकाङ्क्षन्नुपयातोऽस्मि पर्व्वतं।
आतिथ्यं दीयतामेतत् काङ्क्षितं मे चिरं प्रति॥ नरनारायणावूचतुः॥
अपेतक्रोधलोभोऽयमाश्रमो राजसत्तम। न ह्यस्मिन्नाश्रमे युद्धं कुतः शस्त्रं कुतोऽनृजुः। २४७०
अन्यत्र युद्धमाकाङ्क्ष बहवः क्षत्त्रियाः क्षितौ।
॥ राम उवाच॥ उच्यमानस्तथापि स्म भूय एवाभ्यभाषत। पुनः पुनः क्षाम्यमाणः सान्त्वयमानश्च भारत।
दम्भोद्भवो युद्धमिच्छन्नाह्वयत्येव तापसौ। ततो नरस्त्विषीकाणां मुष्टिमादाय भारत।
अब्रवीदेहि युध्यस्व युद्धकामुक क्षत्त्रिय। सर्व्वशस्त्राणि चादत्स्व योजयस्व च वाहिनीं।
अहं हि ते विनेष्यामि युद्धश्रद्धामितः परं। २४७५
॥ दम्भोद्भव उवाच॥ यद्येतदस्त्रमस्मासु युक्तं तापस मन्यसे। एतेनापि त्वया योत्स्ये युद्धार्थी त्वहमागतः।
॥ राम उवाच॥ इत्युक्त्वा शरवर्षेण सर्व्वतः समवाकिरत्। दम्भोद्भवस्तापसन्तं जिघांसुः सहसैनिकः।
तस्य तानस्यतो घोरानिषून् परतनुच्छिदः। कदर्थीकृत्य स मुनिरिषीकाभिः समर्पयत्।
ततोऽस्मै प्रासृजत् घोरमैषीकमपराजितः। अस्त्रमप्रतिसन्धेयं तदद्भुतमिवाभवत्।
तेषामक्षीणि कर्णांश्च नासिकाश्चैव मायया। निमित्तवेधी स मुनिरिषीकाभिः समार्पयत्। २४८०
स दृष्ट्वा श्वेतमाकाशमिषीकाभिः समाचितं। पादयोर्न्यपतत् राजा स्वस्ति मेऽस्त्विति चाब्रवीत्।
तमब्रवीन्नरो राजञ्छरण्यः शरणैषिणं। ब्रह्मण्यो भव धर्म्मात्मा मा च स्मैवं पुनः कृथाः।
नैतादृक् पुरुषो राजन् क्षत्त्रधर्म्ममनुस्मरन्। मनसा नृपशार्द्दूल भवेत् परपुरञ्जयः।
मा च दर्पसमाविष्टः क्षेप्सीः कांश्चित् कथञ्चन। अल्पीयांसं विशिष्टं वा तत्ते राजन् समाहितं।
कृतप्रज्ञो वीतलोभो निरहङ्कार आत्मवान्। दान्तः क्षान्तो मृदुः सौम्यः प्रजाः पालय पार्थिव। २४८५
मा स्म भूयः क्षिपेः कञ्चिदविदित्वा बलाबलं। अनुज्ञातः स्वस्ति गच्छ मैवं भूयः समाचरेः।
कुशलं ब्राह्मणान् पृच्छेरावयोर्वचनाद्भृशं। ततो राजा तयोः पादावभिवाद्य महात्मनोः।
प्रत्याजगाम स्वपुरं धर्म्मञ्चैवाचरद्भृशं। सुमहच्चापि तत्कर्म्म यन्नरेण कृतं पुरा।
ततो गुणैः सुबहुभिः श्रेष्ठो नारायणोऽभवत्। तस्माद्यावद्धनुःश्रेष्ठे गाण्डीवेऽस्त्रं न युज्यते।
तावत्त्वं मानमुत्सृज्य गच्छ राजन् धनञ्जयं। काकुदीकं शुकं नाकमक्षिसन्तर्जनं तथा। २४९०
सन्तानं नर्त्तकं घोरमास्यमोदकमष्टमं। एतैर्व्विद्धाः सर्व्व एव मरणं यान्ति मानवाः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कामक्रोधौ लोभमोहौ मदमानौ तथैव च। मात्सर्य्याहंकृती चैव क्रमादेतदुदाहृताः।
उन्मत्ताश्च विचेष्टन्ते नष्टसंज्ञा विचेतसः। स्वपन्ति च प्लवन्ते च छर्द्दयन्ति च मानवाः।
मूत्रयन्ते च सततं रुदन्ति च हसन्ति च। निर्म्माता सर्व्वलोकानामीश्वरः सर्व्वकर्म्मवित्।
यस्य नारायणो बन्धुरर्ज्जुनो दुःसहो युधि। कस्तमुत्सहते जेतुं त्रिषु लोकेषु भारत।
वीरं कपिध्वजं जिष्णुं यस्य नास्ति समो युधि। असङ्ख्येया गुणाः पार्थे तद्विशिष्टो जनार्द्दनः। ३४९५
त्वमेव भूयो जानासि कुन्तीपुत्त्रं धनञ्जयं। नरनारायणौ यौ तौ तावेवार्ज्जुनकेशवौ।
विजानीहि महाराज प्रवरौ पुरुषोत्तमौ। यद्येतदेवं जानासि न च मामभिशङ्कसे।
आर्य्यां मतिं समास्थाय शाम्य भारत पाण्डवैः। अथ चेन्मन्यसे श्रेयो न मे भेदो भवेदिति।
प्रशाम्य भरतश्रेष्ठ मा च युद्धे मनः कृथाः। भवताञ्च कुरुश्रेष्ठ कुलं बहुमतं भुवि।
तत्तथैवास्तु भद्रं ते स्वार्थमेवोपचिन्तय। ३५००
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि जामदग्न्यवाक्ये पञ्चनवतोऽध्यायः॥ ९५॥
॥ वैशम्पायन उवाच॥ जामदग्न्यवचः श्रुत्वा कण्वोऽपि भगवानृषिः। दुर्य्योधनमिदं वाक्यमब्रवीत् कुरुसंसदि।
॥ कण्व उवाच॥ अक्षयश्चाव्ययश्चैव ब्रह्मा लोकपितामहः। तथैव भगवन्तौ तौ नरनारायणावृषी।
आदित्यानां हि सर्व्वेषां विष्णुरेकः सनातनः। अजय्यश्चाव्ययश्चैव शाश्वतः प्रभुरीश्वरः।
निमित्तमरणास्त्वन्ये चन्द्रसूर्य्यमहीजलं। वायुरग्निस्तथाकाशं ग्रहास्तारागणास्तथा।
ते च क्षयान्ते जगतो हित्वा लोकत्रयं सदा। क्षयं गच्छन्ति वै सर्व्वे सृज्यन्ते च पुनः पुनः। ३५०५
मुहूर्त्तमरणास्त्वन्ये मानुषा मृगपक्षिणः। तैर्य्यग्योन्याश्च ये चान्ये जीवलोकचरास्तथा।
भूयिष्ठेन च राजानः श्रियं भुक्त्वायुषःक्षये। तरुणाः प्रतिपद्यन्ते भोक्तुं सुकृतदुष्कृते।
स भवान् धर्म्मपुत्त्रेण शमं कर्त्तुमिहार्हति। पाण्डवाः कुरवश्चैव पालयन्तु वसुन्धरां।
बलवानहमित्येवं न मन्तव्यं सुयोधन। बलवन्तो बलिभ्यो हि दृश्यन्ते पुरुषर्षभ।
न बलं बलिनां मध्ये बलं भवति कौरव। बलवन्तो हि ते सर्व्वे पाण्डवा देवविक्रमाः। ३५१०
अत्राप्युदाहरन्तीममितिहासं पुरातनं। मातलेर्द्दातुकामस्य कन्यां मृगयतो वरं।
मतस्त्रिलोकराजस्य मातलिर्नाम सारथिः। तस्यैकैव कुले कन्या रूपतो लोकविश्रुता।
गुणकेशीति विख्याता नाम्ना सा देवरूपिणी। श्रिया च वपुषा चैव स्त्रियोऽन्याः साऽतिरिच्यते।
तस्याः प्रदानसमयं मातलिः सह भार्य्यया। ज्ञात्वा विमम्शे राजंस्तत्परः परिचिन्तयन्।
धिक् खलु लघुशीलानामुच्छ्रितानां यशस्विनां। नराणां मृदुसत्त्वानां कुले कन्या प्ररोहणं। ३५१५
मातुः कुलं पितृकुलं यत्र चैव प्रदीयते। कुलत्रयं संशयितं कुरुते कन्यका सतां।
देवमानुषलोकौ द्वौ मानुषेणैव चक्षुषा। अवगाह्यैव विचितौ न च मे रोचते वरः।
॥ कण्व उवाच॥ न देवांश्चैव दितिजान् गन्धर्व्वान् मानुषान्। अरोचयद्वरकृते तथैव बहुलानृषीन्।
भार्य्ययानु स सम्मन्त्र्य सह रात्रौ सुधर्म्मया। मातलिर्नागलोकाय चकार गमने मतिं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

न मे देवमनुष्येषु गुणकेश्याः समो वरः । रूपतो दृश्यते कश्चिन्नागेषु भविता ध्रुवं । ३५१०
इत्यामन्त्र्य सुधर्म्मां स कृत्वा चाभिप्रदक्षिणं । कन्यां शिरस्युपाघ्राय प्रविवेश महीतलं ।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि मातलीयोपाख्याने षण्णवतोऽध्यायः ॥ ९६ ॥
॥ कण्व उवाच ॥ मातलिस्तु व्रजन्मार्गे नारदेन महर्षिणा । वरुणं गच्छता दृष्टुं समागच्छद्यदृच्छया ।
नारदोऽथाऽब्रवीदेनं क्व भवान् गन्तुमुद्यतः । स्वेन वा सूत कार्य्येण शासनाद्वा शतक्रतोः ।
मातलिर्नारदेनैवं सम्पृष्टः पथि गच्छता । यथावत् सर्व्वमाचष्ट स्वकार्य्यं वरुणं प्रति ।
तमुवाचाथ स मुनिर्गच्छाव सहिताविति । सलिलेशदिदृक्षार्थमहमप्युद्यतो दिवः । ३५१५
अहन्ते सर्व्वमाख्यास्ये दर्शयन् वसुधातलं । दृष्ट्वा तत्र वरं कञ्चिद्रोचयिष्याव मातले ।
अवगाह्य ततो भूमिमुभौ मातलिनारदौ । ददृशाते महात्मानौ लोकपालमपाम्पतिं ।
तत्र देवर्षिसदृशीं पूजां स प्राप नारदः । महेन्द्रसदृशीञ्चैव मातलिः प्रत्यपद्यत ।
तावुभौ प्रीतमनसौ कार्य्यवन्तौ निवेद्य ह । वरुणेनाभ्यनुज्ञातौ नागलोकं विचेरतुः ।
नारदः सर्व्वभूतानामन्तर्भूमिनिवासिनां । जानंश्चकार व्याख्यानं यन्तुः सर्व्वमशेषतः । ३५२०
॥ नारद उवाच ॥ दृष्टस्ते वरुणः सूत पुत्रपौत्रसमावृतः । पश्योदकपतेः स्थानं सर्व्वतो भद्रमृद्धिमत् ।
एष पुत्रो महाप्राज्ञो वरुणस्येह गोपतेः । एष वै शीलवृत्तेन शौचेन च विशिष्यते ।
एषोऽस्य पुत्रोऽभिमतः पुष्करः पुष्करेक्षणः । रूपवान् दर्शनीयश्च सोमपुत्र्या वृतः पतिः ।
ज्योत्स्नाकालीति यामाहुर्द्वितीयां रूपतः श्रियं । अदित्याश्चैव यः पुत्रो ज्येष्ठः श्रेष्ठः कृतः स्मृतः ।
भवनं पश्य वारुणं यदेतत् सर्व्वकाञ्चनं । यत्प्राप्य सुरतां प्राप्ताः सुराः सुरपतेः सखे । ३५२५
एतानि हृतराज्यानां दैतेयानां स्म मातले । दीप्यमानानि दृश्यन्ते सर्व्वप्रहरणान्युत ।
अक्षयानि किलैतानि विवर्त्तन्ते स्म मातले । अनुभावप्रयुक्तानि सुरैरवजितानि ह ।
अत्र राक्षसजात्यश्च दैत्यजात्यश्च मातले । दिव्यप्रहरणाश्चासन् सर्व्वदैवतनिर्म्मिताः ।
अग्निरेष महार्च्चिष्मान् जागर्त्ति वारुणे ह्रदे । वैष्णवश्चक्रमाविद्धं विधूमेन हविष्मता ।
एष गाण्डीमयश्चापो लोकसंहारसंभृतः । रक्षते दैवतैर्नित्यं यतस्तद्गाण्डिवं धनुः । ३५३०
एष कृत्ये समुत्पन्ने तत्तद्धारयते बलं । सहस्रशतसङ्ख्येन प्राणेन सततं ध्रुवः ।
अशास्यानपि शास्त्येष रक्षोबन्धुषु राजसु । सृष्टः प्रथमतश्चण्डो ब्रह्मणा ब्रह्मवादिना ।
एतच्छस्त्रं नरेन्द्राणां महच्छक्रेण भाषितं । पुत्राः सलिलराजस्य धारयन्ति महोदयं ।
एतत्सलिलराजस्य च्छत्रं छत्रगृहे स्थितं । सर्व्वतः सलिलं शीतं जीमूत इव वर्षति ।
एतच्छत्रात्परिभ्रष्टं सलिलं सोमनिर्म्मलं । तमसा मूर्च्छितं भाति येन नार्च्छति दर्शनं । ३५३५
बह्वन्यद्भुतरूपाणि द्रष्टव्यानीह मातले । तव कार्य्योपरोधस्तु तस्माद्गच्छाव मा चिरं ।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि मातलीयोपाख्याने सप्तनवतोऽध्यायः ॥ ९७ ॥
॥ नारद उवाच ॥ एतत्तु नागलोकस्य नाभिस्थाने स्थितं पुरं । पातालमिति विख्यातं दैत्यदानवसेवितं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

इदमद्भिः समं प्राप्ता ये केचित् भुवजङ्गमाः। प्रविशन्तो महानादं नदन्ति भयपीडिताः।
अत्रासुरोऽग्निः सततं दीप्यते वारिभोजनः। व्यापारेण धृतात्मानं निबद्धं समवुध्यत।
अत्रामृतं सुरैः पीत्वा निहितं निहतारिभिः। अतः सोमस्य हानिश्च वृद्धिश्चैव प्रदृश्यते। ३५५०
अत्रादित्यो हयशिराः काले पर्व्वणि पर्व्वणि। उत्तिष्ठति सुवर्णाख्यं वाग्भिरापूरयञ्जगत्।
तस्मादलं समस्तास्ताः पतन्ति जलमूर्त्तयः। तस्मात् पातालमित्येव ख्यायते पुरमुत्तमं।
ऐरावतोऽस्मात् सलिलं गृहीत्वा जगतो हितः। मेघेष्वामुञ्चते शीतं यन्महेन्द्रः प्रवर्षति।
अत्र नानाविधाकारास्तिमयो नैकरूपिणः। अप्सु सोमप्रभां पीत्वा वसन्ति जलचारिणः।
अत्र सूर्य्यांशुभिर्भिन्नाः पातालतलमाश्रिताः। मृता दिवसतः सूत पुनर्जीवन्ति वै निशि। ३५५५
उदयन्नित्यशश्चात्र चन्द्रमा रश्मिवाञ्जभिः। अमृतं स्पृश्य संस्पर्शात् सञ्जीवयति देहिनः।
अत्र ते धर्म्मनिरता बद्धाः कालेन पीडिताः। दैतेया निवसन्ति स्म वासवेन हृतश्रियः।
अत्र भूतपतिर्नाम सर्व्वभूतमहेश्वरः। भूतये सर्व्वलोकानामाचरत्तप उत्तमं।
अत्र गोव्रतिनो विप्राः स्वाध्यायाम्नायकर्षिताः। त्यक्तप्राणा जितस्वर्गा निवसन्ति महर्षयः।
यत्र तत्र शयो नित्यं येन केनचिदाशितः। येन केनचिदाच्छन्नः स गोव्रत इहोच्यते। ३५६०
ऐरावणो नागराजो वामनः कुमुदोऽञ्जनः। प्रसूताः सुप्रतीकस्य वंशे वारणसत्तमाः।
पश्य यद्यत्र ते कश्चिद्रोचते गुणतो वरः। वरयिष्यामि तं गत्वा यत्नमास्थाय मातले।
अण्डमेतज्जले न्यस्तं दीप्यमानमिव श्रिया। आप्रजानां निसर्गादि नोद्भिद्यति न सर्पति।
नास्य जातिं निसर्गं वा कथ्यमानं शृणोमि वै। पितरं मातरञ्चापि नास्य जानाति कश्चन।
अतः किल महानग्निरन्तकाले समुत्थितः। धक्ष्यते मातले सर्व्वं त्रैलोक्यं सचराचरं। ३५६५
मातलिस्त्वब्रवीत् श्रुत्वा नारदस्याथ भाषितं। न मेऽत्र रोचते कश्चिदन्यतो व्रज माचिरं।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि मातलीयोपाख्याने अष्टनवतोऽध्यायः॥ ९८ ॥
॥ नारद उवाच ॥ हिरण्यपुरमित्येव ख्यातं पुरवरं महत्। दैत्यानां दानवानाञ्च मायाशतविचारिणां।
अनल्पेन प्रयत्नेन निर्म्मितं विश्वकर्म्मणा। मयेन मनसा सृष्टं पातालतलमाश्रितं।
अत्र मायासहस्राणि विकुर्व्वाणा महौजसः। दानवा निवसन्ति स्म शूरा दत्तवराः पुरा।
नैते शक्रेण नान्येन यमेन वरुणेन वा। शक्यन्ते वशमानेतुं तथैव धनदेन च। ३५७०
असुराः कालकञ्जाश्च तथा विष्णुपदोद्भवाः। नैर्ऋता यातुधानाश्च ब्रह्मपादोद्भवाश्च ये।
दंष्ट्रिणो भीमवेगाश्च वातवेगपराक्रमाः। मायावीर्य्योपसम्पन्ना निवसन्त्यत्र मातले।
निवातकवचा नाम दानवा युद्धदुर्म्मदाः। जानासि च यथा शक्रो नैतान् शक्नोति बाधितुं।
बहुशो मातले त्वञ्च तव पुत्त्रश्च गोमुखः। निर्भग्नो देवराजश्च सहपुत्त्रः शचीपतिः।
पश्य वेश्मानि रौक्माणि मातले राजतानि च। कर्म्मणा विधियुक्तेन युक्तान्युपगतानि च। ३५७५
वैदूर्य्यमणिचित्राणि प्रवालरुचिराणि च। अर्कस्फटिकशुभ्राणि वज्रसारोज्ज्वलानि च।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पार्थिवानीव चाभान्ति पद्मरागमयानि च। शैलानीव च दृश्यन्ते दारवाणीव चाप्युत।
सूर्य्यरूपाणि चाभान्ति दीप्ताग्निसदृशानि च। मणिजालविचित्राणि प्रांशूनि निविडानि च।
नैतानि शक्यं निर्द्देष्टुं रूपतो द्रव्यतस्तथा। गुणतश्चैव सिद्धानि प्रमाणगुणवन्ति च।
आक्रीडान् पश्य दैत्यानां तथैव शयनान्युत। रत्नवन्ति महार्हाणि भवनान्यासनानि च। ३५८०
जलदाभांस्तथा शैलांस्तोयप्रस्रवणानि च। कामपुष्पफलांश्चापि पादपान् कामचारिणः।
मातले कश्चिदत्रापि रुचिरस्ते वरो भवेत्। अथ वाऽन्यां दिशं भूमेर्गच्छाव यदि मन्यसे।
मातलिस्त्वब्रवीदेनं भाषमाणं तथाविधं। देवर्षे नैव मे कार्य्यं विप्रियं त्रिदिवौकसां।
नित्यानुषक्तवैरा हि भ्रातरो देवदानवाः। परपक्षेण सम्बन्धं रोचयिष्याम्यहं कथं।
अन्यत्र साधु गच्छाव द्रष्टुं नार्हामि दानवान्। जानामि तव चात्मानं हिंसात्मकमनन्तथा। ३५८५
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि मातलीयोपाख्याने एकोनशततमोऽध्यायः ॥ ९९ ॥
॥ नारद उवाच ॥ अयं लोकः सुपर्णानां पक्षिणां पन्नगाशिनां। विक्रमे गगने भारे नैषामस्ति परिश्रमः।
वैनतेयसुतैः सूत षड्भिस्ततमिदं कुलं। सुमुखेन सुनाम्ना च सुनेत्रेण सुवर्च्चसा।
सुरुचा पक्षिराजेन सुबलेन च मातले। वर्द्धितानि प्रसूत्या वै विनताकुलकर्तृभिः।
पक्षिराजाभिजात्यानां सहस्राणि शतानि च। कश्यपस्य ततो वंशे जातैर्भूतिविवर्द्धनैः।
सर्व्वे ह्येते श्रिया युक्ताः सर्व्वे श्रीवत्सलक्षणाः। सर्व्वे श्रियमभीप्सन्तो धारयन्ति बलान्युत। ३५९०
कर्म्मणा क्षत्रियास्चैते निर्घृणा भोगिभोजिनः। ज्ञातिसङ्क्षयकर्तृत्वात् ब्राह्मण्यं न लभन्ति वै।
नामानि चैषां वक्ष्यामि यथा प्राधान्यतः शृणु। मातले श्लाघ्यमेतद्धि कुलं विष्णुपरिग्रहं।
दैवतं विष्णुरेतेषां विष्णुरेव परायणं। हृदि चैषां सदा विष्णुर्व्विष्णुरेव सदा गतिः।
सुवर्णचूडो नागाशी दारुणश्चण्डतुण्डकः। अनिलश्चानलश्चैव विशालाक्षोऽथ कुण्डली।
पङ्कजिद्वज्रविष्कम्भो वैनतेयोऽथ वामनः। वातवेगो दिशाचक्षुर्निमिषोऽनिमिषस्तथा। ३५९५
त्रिवारः सप्तवारश्च वाल्मीकिर्द्दीपकस्तथा। दैत्यद्वीपः परिद्वीपः सारसः पद्मकेतनः।
सुमुखश्चित्रकेतुश्च चित्रवर्हस्तथाऽनघः। मेघहृत्कुमुदो दक्षः सर्पान्तः सोमभोजनः।
गुरुभारः कपोतश्च सूर्य्यनेत्रश्चिरान्तकः। विष्णुधर्म्मा कुमारश्च परिबर्हो हरिस्तथा।
सुस्वरो मधुपर्कश्च हेमवर्णस्तथैव च। मलयो मातरिश्वा च निशाकरदिवाकरौ।
एते प्रदेशमात्रेण मयोक्ता गरुडात्मजाः। प्राधान्यतस्ते यशसा कीर्त्तिताः प्राणतश्च ये। ३६००
यद्यत्र न रुचिः काचिदेहि गच्छाव मातले। तं नयिष्यामि देशं त्वां वरं यत्रोपलप्स्यसे।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि मातलीयोपाख्याने शततमोऽध्यायः ॥ १००॥
॥ नारद उवाच ॥ इदं रसातलं नाम सप्तमं पृथिवीतलं। यत्रास्ते सुरभिर्म्माता गवाममृतसम्भवा।
क्षरन्ती सततं क्षीरं पृथिवीसारसम्भवं। षण्णां रसानां सारेण रसमेकमनुत्तमं।
अमृतेनाऽभितृप्तस्य सारमुद्गिरतः पुरा। पितामहस्य वदनादुदतिष्ठदनिन्दिता।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यस्याः क्षीरस्य धाराया निपतन्त्या महीतले। ह्रदः कृतः क्षीरनिधिः पवित्रं परमुच्यते।
पुष्पितस्येव फेनेन पर्य्यन्तमनुवेष्टितं। पिबन्तो निवसन्त्यत्र फेनपा मुनिसत्तमाः। ३६०५
फेनपा नाम ते ख्याताः फेनाहाराश्च मातले। उग्रे तपसि वर्त्तन्ते येषां बिभ्यति देवताः।
अस्यास्तनो धेन्वोऽन्या दिक्षु सर्व्वासु मातले। निवसन्ति दिशां पाल्यो धारयन्त्यो दिशः स्मृताः।
पूर्व्वां दिशं धारयते सुरूपा नाम सौरभी। दक्षिणां हंसिका नाम धारयत्यपरां दिशं।
पश्चिमा वारुणी दिक्च धार्य्यते वै सुभद्रया। महानुभावया नित्यं मातले विश्वरूपया। ३६१०
सर्व्वकामदुघा नाम धेनुर्धारयते दिशं। उत्तरां मातले धर्म्म्यां तथैलविलसंज्ञितां।
आसान्तु पयसा मिश्रं पयो निर्म्मथ्य सागरे। मन्थानं मन्दरं कृत्वा देवैरसुरसंहितैः।
उद्धृता वारुणी लक्ष्मीरमृतञ्चापि मातले। उच्चैःश्रवाश्चाश्वराजो मणिरत्नञ्च कौस्तुभं।
सुधाहारेषु च सुधा स्वधाभोजिषु च स्वधां। अमृतञ्चामृताशेषु सुरभी क्षरते पयः।
अत्र गाथा पुरा गीता रसातलनिवासिभिः। पौराणी श्रूयते लोके गीयते या मनीषिभिः। ३६१५
न नागलोके न स्वर्गे न विमाने त्रिपिष्टपे। परिवासः सुखस्तादृग्रसातलतले यथा।

इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि मातलीयोपाख्याने एकाधिकशततमोऽध्यायः॥ १०१ ॥

॥ नारद उवाच ॥ इयं भोगवती नाम पुरी वासुकिपालिता। यादृशी देवराजस्य पुरी वर्य्याऽमरावती।
एष शेषः स्थितो नागो येनेयं धार्य्यते सदा। तपसा लोकमुख्येन प्रभावमहिता मही।
श्वेताचलनिभाकारो दिव्याभरणभूषितः। सहस्रं धारयन्मूर्द्ध्नां ज्वालाजिह्वो महाबलः।
इह नानाविधाकारा नानाविषविभूषणाः। सुरसायाः सुता नागा निवसन्ति गतव्यथाः। ३६२०
मणिस्वस्तिकचक्राङ्काः कमण्डलुकलक्षणाः। सहस्रसङ्ख्या बलिनः सर्व्वे रौद्राः स्वभावतः।
सहस्रशिरसः केचित् केचित् पञ्चशताननाः। शतशीर्षास्तथा केचित् केचित् त्रिशिरसोऽपि च।
द्विपञ्चशिरसः केचित् केचित् सप्तमुखास्तथा। महाभोगा महाकायाः पर्व्वताभोगभोगिनः।
बहूनीह सहस्राणि प्रयुतान्यर्ब्बुदानि च। नागानामेकवंशानां यथाश्रेष्ठन्तु मे शृणु।
वासुकिस्तक्षकश्चैव कर्क्कोटकधनञ्जयौ। कालियो नहुषश्चैव कम्बलाश्वतरावुभौ। ३६२५
वाह्यकुण्डो मणिर्न्नागस्तथैवापूरणः खगः। वामनश्चैलपत्रश्च कुकुरः कुकुनस्तथा।
आर्य्यको नन्दकश्चैव तथा कलशपोतकौ। कैलासकः पिञ्जरको नागश्चैरावतस्तथा।
सुमनोमुखो दधिमुखः शङ्खो नन्दोपनन्दकौ। आप्तः कोटरकश्चैव शिखी निष्ठुरिकस्तथा।
तित्तिरिर्हस्तिभद्रश्च कुमुदो माल्यपिण्डकः। द्वौ पद्मौ पुण्डरीकश्च पुष्पो मुद्गरपर्णकः।
करवीरः पिठरकः संवृत्तोवृत्त एव च। पिण्डारो बिल्वपत्रश्च मूषिकादः शिरीषकः। ३६३०
दिलीपः शङ्खशीर्षश्च ज्योतिष्कोऽथापराजितः। कौरव्यो धृतराष्ट्रश्च कुहरः कृशकस्तथा।
विरजा धारणश्चैव सुबाहुर्म्मुखरो जयः। बधिरान्धौ विशुण्डिश्च विरसः सुरसस्तथा।
एते चान्ये च बहवः कश्यपस्यात्मजाः स्मृताः। मातले पश्य यद्यत्र कश्चित्ते रोचते वरः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ कण्व उवाच ॥ मातलिस्त्वेवमव्यग्रः सततं सन्निरीक्ष्य वै । पप्रच्छ नारदं तत्र प्रीतिमानिव चाभवत् ।
स्थितो य एष पुरतः कौरव्यस्यार्य्यकस्य तु । द्युतिमान् दर्शनीयश्च कस्यैष कुलनन्दनः । ३९३५
कः पिता जननी वाऽस्य कतमस्यैष भोगिनः । वंशस्य कस्यैष महान् केतुभूत इव स्थितः
प्रणिधानेन धैर्य्येण रूपेण वयसा च मे । मनः प्रविष्टो देवर्षे गुणकेश्याः पतिर्व्वरः ।
॥ कण्व उवाच ॥ मातलिं प्रीतमनसं दृष्ट्वा सुमुखदर्शनात् । निवेदयामास तदा माहात्म्यं जन्म कर्म्म च ।
॥ नारद उवाच ॥ ऐरावतकुले जातः सुमुखो नाम नागराट् । आर्य्यकस्य मतः पौत्त्रो दौहित्रो वामनस्य च ।
एतस्य हि पिता नागश्चिकुरो नाम मातले । न चिराद्वैनतेयेन पञ्चत्वमुपपादितः । ३९४०
ततोऽब्रवीत् प्रीतमना मातलिर्नारदं वचः । एष मे रुचितस्तात जामाता भुजगोत्तमः ।
क्रियतामत्र यत्नो हि प्रीतिमानस्म्यनेन वै । अस्मै नागाय वै दातुं प्रियां दुहितरं मुने ।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि मातलीयोपाख्याने द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥
॥ नारद उवाच ॥ सूतोऽयं मातलिर्नाम शक्रस्य दयितः सुहृत् । शुचिः शीलगुणोपेतस्तेजस्वी वीर्य्यवान् बली ।
शक्रस्याऽयं सखा चैव मन्त्री सारथिरेव च । अल्पान्तरप्रभावश्च वासवेन रणे रणे ।
अयं हरिसहस्रेण युक्तं जैत्रं रथोत्तमं । देवासुरेषु युद्धेषु मनसैव प्रयच्छति । ३९४५
अनेन विजितानश्वैर्दोर्भ्यां जयति वासवः । अनेन बलभित् पूर्व्वं प्रहृते प्रहरत्युत ।
अस्य कन्या वरारोहा रूपेणासदृशी भुवि । सत्यशीलगुणोपेता गुणकेशीति विश्रुता ।
तस्यास्य यत्नाच्चरतस्त्रैलोक्यममरद्युते । सुमुखो भवतः पौत्त्रो रोचते दुहितुः पतिः ।
यदि ते रोचते सम्यग्भुजगोत्तम मा चिरं । क्रियतामार्य्यक क्षिप्रं बुद्धिः कन्यापरिग्रहे ।
यथा विष्णुकुले लक्ष्मीर्यथा स्वाहा विभावसोः । कुले तव तथैवास्तु गुणकेशी सुमध्यमा । ३९५०
पौत्त्रस्यार्थे भवांस्तस्मात् गुणकेशीं प्रतीच्छतु । सदृशीं प्रतिरूपस्य वासवस्य शचीमिव ।
पितृहीनमपि ह्येनं गुणतो वरयामहे । बहुमानाच्च भवतस्तथैवैरावतस्य च ।
सुमुखस्य गुणैश्चैव शीलशौचदमादिभिः । अभिगम्य स्वयं कन्यामयं दातुं समुद्यतः ।
मातलिस्तस्य सम्मान कर्त्तुमर्हो भवानपि ।
॥ कण्व उवाच ॥ स तु दीनः प्रहृष्टश्च प्राह नारदमार्य्यकः । व्रियमाणे तथा पौत्त्रे पुत्त्रे च निधनं गते । ३९५५
॥ आर्य्यक उवाच ॥ न मे चैतत् बहु मतं महर्षे वचनं तव । सखा शक्रस्य संयुक्तः कस्यायं नेप्सितो भवेत् ।
कारणस्य तु दौर्ब्बल्यात् चिन्तयामि महामुने । अस्य देहकरस्तात मम पुत्त्रो महाद्युते ।
भक्षितो वैनतेयेन दुःखार्त्तास्तेन वै वयं । पुनरेव च तेनोक्तं वैनतेयेन गच्छता ।
मासेनाऽन्येन सुमुखं भक्षयिष्य इति प्रभो । ध्रुवं तथा तद्भविता जानीमस्तस्य निश्चयं ।
तेन हर्षः प्रनष्टो मे सुपर्णवचनेन वै । ३९६०
॥ कण्व उवाच ॥ मातलिस्त्वब्रवीदेनं बुद्धिरत्र कृता मया । जामातृभावेन वृतः सुमुखस्तव पुत्त्रजः ।
सोऽयं मया च सहितो नारदेन च पन्नगः । त्रिलोकेशं सुरपतिं गत्वा पश्यतु वासवं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शेषेणैवास्य कार्य्येण प्रज्ञास्याम्यहमायुषः। सुपर्णस्य विघाते च प्रयतिष्यामि सत्तम।
सुमुखश्च मया सार्द्धं देवेशमभिगच्छतु। कार्य्यसंसाधनार्थाय स्वस्ति तेऽस्तु भुजङ्गम।
ततस्ते सुमुखं गृह्य सर्व्व एव महौजसः। ददृशुः शक्रमासीनं देवराजं महाद्युतिं।
सङ्गत्या तत्र भगवान् विष्णुरासीच्चतुर्भुजः। ततस्तत्सर्व्वमाचख्यौ नारदो मातलिं प्रति। ३६६५
॥ वैशम्पायन उवाच॥ ततः पुरन्दरं विष्णुरुवाच भुवनेश्वरं। अमृतं दीयतामस्मै क्रियताममरैः समः।
मातलिर्नारदश्चैव सुमुखश्चैव वासव। लभंतां भवतः कामात् काममेतं यथेप्सितं।
पुरन्दरोऽथ सञ्चिन्त्य वैनतेयपराक्रमं। विष्णुमेवाब्रवीदेनं भवानेव ददात्विति।
॥ विष्णुरुवाच॥ ईशस्त्वं सर्व्वलोकानां चराणामचराश्च ये। त्वया दत्तमदत्तं कः कर्त्तुमुत्सहते विभो। ३६७०
प्रादाच्छक्रस्ततस्तस्मै पन्नगायायुरुत्तमं। नत्वेनममृतप्राशं चकार बलवृत्रहा।
लब्ध्वा वरन्तु सुमुखः सुमुखः सम्बभूव ह। कृतदारो यथा कामं जगाम च गृहान् प्रति।
नारदस्त्वार्य्यकश्चैव कृतकार्य्यौ मुदायुतौ। अभिजग्मतुरभ्यर्च्य देवराजं महाद्युतिं।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि मातलीयोपाख्याने त्र्यधिकशततमोऽध्यायः॥ १०३॥
॥ कण्व उवाच॥ गरुडस्तत्र शुश्राव यथा वृत्तं महाबलः। आयुःप्रदानं शक्रेण कृतं नागस्य भारत।
पक्षवातेन महता रुद्ध्वा त्रिभुवनं खगः। सुपर्णः परमः क्रुद्धो वासवं समुपाद्रवत्। ३६७५
॥ गरुड उवाच॥ भगवन् किमवज्ञानाद्वृत्तिः प्रतिहता मम। कामकारं वरं दत्त्वा पुनश्चलितवानसि।
निसर्गात् सर्व्वभूतानां सर्व्वभूतेश्वरेण मे। आहारो विहितो धात्रा किमर्थं वार्य्यते त्वया।
वृतश्चैव महानागः स्थापितः समयश्च मे। अनेन च मया देव भर्त्तव्यः प्रसवो महान्।
एतस्मिंस्तु तथाभूते नान्यं हिंसितुमुत्सहे। क्रीडसे कामकारेण देवराज यथेच्छकं।
सोऽहं प्राणान् विमोक्ष्यामि तथा परिजनो मम। ये च भृत्या मम गृहे प्रीतिमान् भव वासव। ३६८०
एतच्चैवाहमर्हामि भूयश्च बलवृत्रहन्। त्रैलोक्यस्येश्वरो योऽहं परभृत्यत्वमागतः।
त्वयि तिष्ठति देवेश न विष्णुः कारणं मम। त्रैलोक्यराज राज्यं हि त्वयि वासव शाश्वतं।
ममापि दक्षस्य सुता जननी कश्यपः पिता। अहमप्युत्सहे लोकान् समन्ताद्वोढुमञ्जसा।
असह्यं सर्व्वभूतानां ममापि विपुलं बलं। मयाऽपि सुमहत्कर्म्म कृतं दैतेयविग्रहे।
श्रुतश्रीः श्रुतसेनश्च विवस्वान् रोचनामुखः। प्रसुतः कालकाक्षश्च मयाऽपि दितिजा हताः। ३६८५
यत्तु ध्वजस्थानगतो यत्नात्परिचराम्यहं। वहामि चैवानुजन्ते तेन मामवमन्यसे।
कोऽन्यो भारसहो ह्यस्ति कोन्योऽस्ति बलवत्तरः। मया योऽहं विशिष्टः सन् वहामीमं स बान्धवं।
अवज्ञाय तु यत्तेऽहं भोजनाद्व्यवरोपितः। तेन मे गौरवं नष्टं त्वत्तश्चास्माच्च वासव।
अदित्यां य इमे जाता बलविक्रमशालिनः। त्वमेषां किल सर्व्वेषां बलेन बलवत्तरः।
सोऽहं पक्षैकदेशेन वहामि त्वां गतक्लमः। विमृश त्वं शनैस्तात को न्वत्र बलवानिति। ३६९०
॥ कण्व उवाच॥ स तस्य वचनं श्रुत्वा खगस्योदर्कदारुणं। अक्षोभ्यं क्षोभयंस्तार्क्ष्यमुवाच रथचक्रभृत्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

गरुत्मन्मन्यसे त्मानं बलवन्तं सुदुर्ब्बल। अलमस्मत्समचन्ते स्तोतुमात्मानमण्डज।
त्रैलोक्यमपि मे कृत्स्नमशक्तं देहधारणे। अहमेवात्मनात्मानं वहामि त्वाञ्च धारये।
इमं तावन्ममैकं त्वं बाहुं सव्येतरं वह। यद्येकं धारयस्येनं सफलं ते विकत्थितं।
ततः स भगवांस्तस्य स्कन्धे बाहुं समासजत्। निपपात सभारार्त्तो विकलो नष्टचेतनः। ३६९५
यावान् हि भारः कृत्स्नायाः पृथिव्याः पर्व्वतैः सह। एकस्या देहशाखायास्तावद्भारममन्यत।
न त्वेनं पीडयामास बलेन बलवत्तरः। ततो हि जीवितं तस्य न व्यनीनशदच्युतः।
वान्तास्यः स्रस्तकायश्च विचेता विह्वलः खगः। मुमोच पत्राणि तदा गुरुभारप्रपीडितः।
स विष्णुं शिरसा पक्षी प्रणम्य विनतासुतः। विचेता विह्वलो दीनः किञ्चिद्वचनमब्रवीत्।
भगवन् लोकसारस्य सदृशेन वपुष्मता। भुजेन स्वैरमुक्तेन निष्पिष्टोऽस्मि महाबल। ३७००
क्षन्तुमर्हसि मे देव विह्वलस्याल्पचेतसः। बलदर्पविदग्धस्य पक्षिणो ध्वजवासिनः।
न हि ज्ञातं बलं देव मया ते परमं विभो। तेन मन्याम्यहं वीर्य्यमात्मनो न समं परैः।
ततश्चक्रे स भगवान् प्रसादं वै गरुत्मतः। मैवं भूय इति स्नेहात् तदा चैनमुवाच ह।
पदाङ्गुष्ठेन चिक्षेप सुमुखं गरुडोरसि। ततः प्रभृति राजेन्द्र सह सर्पेण वर्त्तते।
एवं विष्णुबलाक्रान्तो गर्व्वनाशमुपागतः। गरुडो बलवान् राजन् वैनतेयो महायशाः। ३७०५
॥ कण्व उवाच ॥ तथा त्वमपि गान्धारे यावत्पाण्डुसुतान्रणे। नासादयसि तान् वीरांस्तावज्जीवसि पुत्रक।
भीमः प्रहरतां श्रेष्ठो वायुपुत्त्रो महाबलः। धनञ्जयश्चेन्द्रसुतो न हन्यातान्तु कं रणे।
विष्णुर्व्वायुश्च शक्रश्च धर्म्मस्तौ चाश्विनावुभौ। एते देवास्त्वया केन हेतुना वीक्षितुं क्षमाः।
तदलन्ते विरोधेन शमं गच्छ नृपात्मज। वासुदेवेन तीर्थेन कुलं रक्षितुमर्हसि।
प्रत्यक्षदर्शी सर्व्वस्य नारदोऽयं महातपाः। माहात्म्यस्य तदा विष्णोः सोऽयञ्चक्रगदाधरः। ३७१०
॥ वैशम्पायन उवाच ॥ दुर्य्योधनस्तु तत् श्रुत्वा निश्वसन् भ्रुकुटीमुखः। राधेयमभिसम्प्रेक्ष्य जहास स्वनवत्तदा।
कदर्थीकृत्य तद्वाक्यमृषेः कण्वस्य दुर्मतिः। ऊरुं गजकराकारं ताडयन्निदमब्रवीत्।
यथैवेश्वरसृष्टोऽस्मि यद्भावी या च मे गतिः। तथा महर्षे वर्त्तामि किं प्रलापः करिष्यति।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि मातलीयोपाख्याने चतुरधिकशततमोऽध्यायः ॥ १०४ ॥
॥ जनमेजय उवाच ॥ अनर्थे जातनिर्ब्बन्धं परार्थे लोभमोहितं। अनार्य्यकेष्वभिरतं मरणे कृतनिश्चयं।
ज्ञातीनां दुःखकर्त्तारं बन्धूनां शोकवर्द्धनं। सुहृदां क्लेशदातारं द्विषतां हर्षवर्द्धनं। ३७१५
कथं नैनं विमार्गस्थं वारयन्तीह बान्धवाः। सौहृदाद्वा सुहृत् स्निग्धो भगवान् वा पितामहः।
॥ वैशम्पायन उवाच ॥ उक्तं भगवता वाक्यमुक्तं भीष्मेण यत्क्षमं। उक्तं बहुविधञ्चैव नारदेनापि तत् शृणु।
॥ नारद उवाच ॥ दुर्लभो वै सुहृच्छ्रोता दुर्लभश्च हितः सुहृत्। तिष्ठते हि सुहृत् यत्र न बन्धुस्तत्र तिष्ठति।
श्रोतव्यमपि पश्यामि सुहृदां कुरुनन्दन। न कर्त्तव्यश्च निर्ब्बन्धो निर्ब्बन्धो हि सुदारुणः।
अत्राप्युदाहरन्तीममितिहासं पुरातनं। यथा निर्ब्बन्धतः प्राप्तो गालवेन पराजयः। ३७२०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding: KS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विश्वामित्रं तपस्यन्तं धर्म्मो जिज्ञासया पुरा। अभ्यागच्छत् स्वयं भूत्वा वशिष्ठो भगवानृषिः।
सप्तर्षीणामन्यतमं वेशमास्थाय भारत। बुभुक्षुः क्षुधितो राजन्नाश्रमं कौशिकस्य तु।
विश्वामित्रोऽथ सम्भ्रान्तः श्रपयामास वै चरुं। परमान्नस्य यत्नेन न च तं प्रत्यपालयत्।
अन्नं तेन यदा भुक्तमन्यैर्दत्तं तपस्विभिः। अथ गृह्यान्नमत्युष्णं विश्वामित्रोऽप्युपागमत्।
भुक्तं मे तिष्ठ तावत्त्वमित्युक्त्वा भगवान् ययौ। विश्वामित्रस्ततो राजन् स्थित एव महाद्युतिः।
भक्तं प्रगृह्य मूर्द्ध्ना वै बाहुभ्यां संशितव्रतः। स्थितः स्थाणुरिवाऽभ्यासे निश्चेष्टो मारुताशनः। ३७२५
तस्य शुश्रूषणे यत्नमकरोत् गालवो मुनिः। गौरवाद्बहुमानाच्च हार्द्देन प्रियकाम्यया।
अथ वर्षशते पूर्णे धर्म्मः पुनरुपागमत्। वाशिष्ठं वेशमास्थाय कौशिकं भोजनेप्सया।
स दृष्ट्वा शिरसा भक्तं ध्रियमाणं महर्षिणा। तिष्ठता वायुभक्षेण विश्वामित्रेण धीमता।
प्रतिगृह्य ततो धर्म्मस्तथैवोष्णं तथा नवं। भुक्त्वा प्रीतोऽस्मि विप्रर्षे तमुक्त्वा स मुनिर्गतः। ३७३०
क्षत्त्रभावादपगतो ब्राह्मणत्वमुपागतः। धर्म्मस्य वचनात् प्रीतो विश्वामित्रस्तथाऽभवत्।
विश्वामित्रस्तु शिष्यस्य गालवस्य तपस्विनः। शुश्रूषया च भक्त्या च प्रीतिमानित्युवाच ह।
अनुज्ञातो मया वत्स यथेष्टं गच्छ गालव। इत्युक्तः प्रत्युवाचेदं गालवो मुनिसत्तमं।
प्रीतो मधुरया वाचा विश्वामित्रं महाद्युतिं। दक्षिणाः काः प्रयच्छामि भवते गुरुकर्म्मणि।
दक्षिणाभिरुपेतं हि कर्म्म सिध्यति मानवं। दक्षिणानां हि दाता वै अपवर्गेण युज्यते। ३७३५
स्वर्गे क्रतुफलं तद्धि दक्षिणा शान्तिरुच्यते। किमाहरामि गुर्व्वर्थं ब्रवीतु भगवानिति।
स जानंस्तेन भगवान् जितः शुश्रूषणेन वै। विश्वामित्रस्तमसकृद्गच्छगच्छेत्यचोदयत्।
असकृद्गच्छगच्छेति विश्वामित्रेण भाषितः। किं ददामीति बहुशो गालवः प्रत्यभाषत।
निर्ब्बन्धतस्तु बहुशो गालवस्य तपस्विनः। किञ्चिदागतसंरम्भो विश्वामित्रोऽब्रवीदिदं।
एकतः श्यामकर्णानां हयानाञ्चन्द्रवर्च्चसां। अष्टौ शतानि मे देहि गच्छ गालव मा चिरं। ३७४०
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि गालवचरिते पञ्चाधिकशततमोऽध्यायः॥ १०५॥
॥ नारद उवाच॥ एवमुक्तस्तदा तेन विश्वामित्रेण धीमता। नास्ते न शेते नाहारं कुरुते गालवस्तदा।
त्वगस्थिभूतो हरिणश्चिन्ताशोकपरायणः। शोचमानोऽतिमात्रं स दह्यमानश्च मन्युना।
गालवो दुःखितो दुःखाद्विललाप सुयोधन। कुतः पुष्टानि मित्राणि कुतोऽर्थाः सञ्चयः कुतः।
हयानाञ्चन्द्रशुभ्राणां शतान्यष्टौ कुतो मम। कुतो मे भोजने श्रद्धा सुखश्रद्धा कुतश्च मे।
श्रद्धा मे जीवितस्यापि छिन्ना किं जीवितेन मे। अहं पारे समुद्रस्य पृथिव्या वा परम्परात्। ३७४५
गत्वात्मानं विमुञ्चामि किं फलं जीवितेन मे। अधनस्याकृतार्थस्य त्यक्तस्य विविधैः फलैः।
ऋणं धारयमाणस्य कुतः सुखमनीहया। सुहृदां हि धनं भुक्त्वा कृत्वा प्रणयमीप्सितं।
प्रतिकर्त्तुमशक्तस्य जीवितान्मरणं वरं। प्रतिश्रुत्य करिष्येति कर्त्तव्यं तदकुर्व्वतः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

मिथ्या वचनदग्धस्य दृष्टापूर्त्तं प्रणश्यति। न रूपमनृतस्यास्ति नानृतस्याऽस्ति सन्ततिः ।
नानृतस्याधिपत्यञ्च कुत एव गतिः शुभा। कुतः कृतघ्नस्य यशः कुतः स्थानं कुतः सुखं। ३७५०
अश्रद्धेयः कृतघ्नो हि कृतघ्ने नास्ति निष्कृतिः। न जीवत्यधनः पापः कुतः पापस्य तन्त्रणं ।
पापो ध्रुवमवाप्नोति विनाशं नाशयन् कृतं। सोऽहं पापः कृतघ्नश्च कृपणश्चानृतोऽपि च ।
गुरोर्यः कृतकार्य्यः संस्तत्करोमि न भाषितं। सोऽहं प्राणान् विमोक्ष्यामि कृत्वा यत्नमनुत्तमं ।
अर्थना न मया काचित् कृतपूर्व्वा दिवौकसां । मानयन्ति च मां सर्व्वे त्रिदशा यज्ञसंस्तरे ।
अहन्तु विबुधश्रेष्ठं देवं त्रिभुवनेश्वरं। विष्णुं गच्छाम्यहं कृष्णं गतिं गतिमतां वरं। ३७५५
भोगा यस्मात् प्रतिष्ठन्ते व्याप्य सर्व्वान् सुरासुरान् । प्रणतो द्रष्टुमिच्छामि कृष्णं योगिनमव्ययं ।
एवमुक्ते सखा तस्य गरुडो विनतात्मजः । दर्शयामास तं प्राह संहृष्टः प्रियकाम्यया ।
सुहृद्भवान् मम मतः सुहृदाञ्च मतः सुहृत्। ईप्सितेनाऽभिलाषेण योक्तव्यो विभवे सति ।
विभवश्चास्ति मे विप्र वासवाऽवरजो द्विज । पूर्व्वमुक्तस्त्वदर्थञ्च कृतः कामश्च तेन मे ।
स भवानेतु गच्छाव नयिष्ये त्वां यथासुखं। देशं पारं पृथिव्या वा गच्छ गालव मा चिरं। ३७६०
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि गालवचरिते षडधिकशततमोऽध्यायः॥ १०६ ॥
॥ सुपर्ण उवाच ॥ अनुशिष्टोऽस्मि देवेन गालव ज्ञानयोनिना। ब्रूहि कामन्तु कां यामि द्रष्टुं प्रथमतो दिशं ।
पूर्व्वां वा दक्षिणां वाऽहमथ वा पश्चिमां दिशं। उत्तरां वा द्विजश्रेष्ठ कुतो गच्छामि गालव।
यस्यामुदयते पूर्व्वं सर्व्वलोकप्रभावनः। सविता यत्र सन्ध्यायां साध्यानां वर्त्तते तपः।
यस्यां पूर्व्वं मतिर्याता यया व्याप्तमिदं जगत्। चक्षुषी यत्र धर्म्मस्य यत्र वै सुप्रतिष्ठिते ।
हुतं यतो मुखैर्हव्यं सर्पते सर्व्वतो दिशं। एतद्द्वारं द्विजश्रेष्ठ दिवसस्य तथाऽध्वनः। ३७६५
अत्र पूर्व्वं प्रसूता वै दाक्षायण्यः प्रजाः स्त्रियः। अस्यां दिशि प्रवृद्धाश्च कश्यपस्यात्मसम्भवाः।
अतो मूलं सुराणां श्रीर्यत्र शक्रोऽभ्यषिच्यत। सुरराज्येन विप्रर्षे देवैश्चात्र तपश्चितं।
एतस्मात् कारणात् ब्रह्मन् पूर्व्वेत्येषा दिगुच्यते। तस्मात् पूर्व्वतरे काले पूर्व्वमेवावृता सुरैः।
अतएव च पूर्व्वेषां पूर्व्वामाशां प्रचक्षते। पूर्व्वं सर्व्वाणि कार्य्याणि देवानां सुखमीप्सतां।
अत्र वेदान् जगौ पूर्व्वं भगवान् लोकभावनः। अत्रैवोक्ता सवित्राऽऽसीत् सावित्री ब्रह्मवादिषु। ३७७०
अत्र दत्तानि सूर्य्येण यजूंषि द्विजसत्तम। अत्र लब्धवरः सोमः सुरैः क्रतुषु पीयते।
अत्र तृप्ता हुतवहाः स्वां योनिमुपयुञ्जते। अत्र पातालमाश्रित्य वरुणः श्रियमाप च।
अत्र पूर्व्वं वशिष्ठस्य पौराणस्य द्विजर्षभ। सूतिश्चैव प्रतिष्ठा च निधनञ्च प्रकाशते।
ओंकारस्यात्र जायन्ते सूतयो दशतीर्द्दश। पिबन्ति मुनयो यत्र हविर्धूमं स्म धूमपाः।
प्रोक्षिता यत्र बहवो वराहाद्या मृगा वने। शक्रेण यज्ञभागार्थे दैवतेषु प्रकल्पिताः। ३७७५
अत्राहिताः कृतघ्नाश्च मानुषाश्चासुराश्च ये। उदयंस्तान् हि सर्व्वान् वै क्रोधाद्धन्ति विभावसुः।
एतद्द्वारं त्रिलोकस्य स्वर्गस्य च सुखस्य च। एष पूर्व्वो दिशां भागो विशावोऽत्र यदीच्छसि।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding: IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रियं कार्य्यं हि मे तस्य यस्यास्मि वचने स्थितः। ब्रूहि गालव यास्यामि शृणु चाप्यपरां दिशं।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि गालवचरिते सप्ताधिकशततमोऽध्यायः॥ १०७॥
॥ सुपर्ण उवाच॥ इयं विवस्वता पूर्व्वं श्रौतेण विधिना किल। गुरवे दक्षिणा दत्ता दक्षिणेत्युच्यते च दिक्।
अत्र लोकत्रयस्यास्य पितृपक्षः प्रतिष्ठितः। अत्रोष्मपानां देवानां निवासः श्रूयते द्विज।
अत्र विश्वे सदा देवाः पितृभिः सार्द्धमासते। इज्यमानाः स्म लोकेषु सम्प्राप्तास्तुल्यभागतां। ३७८०
एतत् द्वितीयं धर्म्मस्य द्वारमाचक्षते द्विज। त्रुटिशो लवशश्चापि गण्यते कालनिश्चयः।
अत्र देवर्षयो नित्यं पितृलोकर्षयस्तथा। तथा राजर्षयः सर्व्वे निवसन्ति गतव्यथाः।
अत्र धर्म्मश्च सत्यञ्च कर्म्म चात्र निगद्यते। गतिरेषा द्विजश्रेष्ठ कर्म्म चात्मावसायिनां।
एषा दिक् सा द्विजश्रेष्ठ यां सर्व्वः प्रतिपद्यते। वृतत्त्वनवरोधेन सुखन्तेन न गम्यते।
नैर्ऋतानां सहस्राणि बहून्यत्र द्विजर्षभ। सृष्टानि प्रतिकूलानि द्रष्टव्यान्यकृतात्मभिः। ३७८५
अत्र मन्दरकुञ्जेषु विप्रर्षिसदनेषु च। गायन्ति गाथा गन्धर्व्वाश्चित्तबुद्धिहरा द्विज।
अत्र सामानि गाथाभिः श्रुत्वा गीतानि रैवतः। गतदारो गतामात्यो गतराज्यो वनं गतः।
अत्र सावर्णिना चैव यवक्रीतात्मजेन च। मर्य्यादा स्थापिता ब्रह्मन् यां सूर्य्यो नाऽतिवर्त्तते।
अत्र राक्षसराजेन पौलस्त्येन महात्मना। रावणेन तपश्चर्य्या सुरेभ्योऽमरता वृता। ३७९०
अत्र वृत्तेन वृत्रोऽपि शक्रशत्रुत्वमीयिवान्। अत्र सर्व्वासवः प्राप्ताः पुनर्गच्छन्ति पञ्चधा।
अत्र दुष्कृतकर्म्माणो नराः पच्यन्ति गालव। अत्र वैतरणी नाम नदी वैतरणैर्वृता।
अत्र गत्वा सुखस्यान्तं दुःखस्यान्तं प्रपद्यते। अत्रावृत्तो दिनकरः सुरसं च्यवते पयः।
काष्ठाञ्चासाद्य वासिष्ठीं हिममुत्सृजते पुनः। अत्राऽहं गालव पुरा क्षुधार्त्तः परिचिन्तयन्।
लब्धवान् युद्धमानौ द्वौ बृहन्तौ गजकच्छपौ। अत्र चक्रधनुर्न्नाम सूर्य्याज्जातो महानृषिः। ३७९५
विदुर्य्यं कपिलं देवं येनार्त्ताः सगरात्मजाः। अत्रसिद्धा शिवा नाम ब्राह्मणी वेदपारगा।
अधीत्य सकलान् वेदान् लेभे सन्देहमक्षयं। अत्र भोगवती नाम पुरी वासुकिपालिता।
तक्षकेण च नागेन तथैवैरावतेन च। अत्र निर्य्याणकालेऽपि तमः सम्प्राप्यते महत्।
अभेद्यं भास्करेणापि स्वयं वा कृष्णवर्त्मना। एवं तस्यापि ते मार्गः परिवर्य्यस्य गालव।
ब्रूहि मे यदि गन्तव्यं प्रतीचीं शृणु चापरं। ३८००
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि गालवचरिते ऽष्टाधिकशततमोऽध्यायः॥ १०८॥
॥ सुपर्ण उवाच॥ इयं दिग्दयिता राज्ञो वरुणस्य तु गोपतेः। सदा सलिलराजस्य प्रतिष्ठा चादिरेव च।
अत्र पश्चादहः सूर्य्यो विसर्ज्जयति गाः स्वयं। पश्चिमेत्यभिविख्याता दिगियं द्विजसत्तम।
यादसामत्र राज्येन सलिलस्य च गुप्तये। कश्यपो भगवान् देवो वरुणस्याभ्यषेचयत्।
अत्र पीत्वा समस्तान् वै वरुणस्य रसांस्तु षट्। जायते तरुणः सोमः शुक्लस्यादौ तमिस्रहा।
अत्र पश्चात् कृता दैत्या वायुना संयतास्तदा। निश्वसन्तो महावाते रर्दिताः सुषुपुर्द्विज। ३८०५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment-Heritage Foundation, Jalgaon

अत्र सूर्य्यं प्रणयिनं प्रतिगृह्णाति सर्व्वतः । अस्तो नाम यतः सन्ध्या पश्चिमा प्रतिसर्पति ।
अतो रात्रिश्च निद्रा च निर्गता दिवसक्षये । जायते जीवलोकस्य हर्त्तुमर्द्धमिवायुषः ।
अत्र देवीं दितिं सुप्तामात्मप्रसवधारिणीं । विगर्भामकरोच्छक्रो यत्र जातो मरुद्गणः ।
अत्र मूलं हिमवतो मन्दरं याति शाश्वतं । अपि वर्षसहस्रेण न चान्तोऽस्याधिगम्यते ।
अत्र काञ्चनशैलस्य काञ्चनाम्बुरुहस्य च । उदधेस्तीरमासाद्य सुरभिः क्षरते पयः । ३८१०
अत्र मध्ये समुद्रस्य कबन्धः प्रतिदृश्यते । स्वर्भानोः सूर्य्यकल्पस्य सोमसूर्य्यौ जिघांसतः ।
सुवर्णशिरसोऽप्यत्र हरिरोम्णः प्रगायतः । अदृश्यस्याप्रमेयस्य श्रूयते विपुलो ध्वनिः ।
अत्र ध्वजवती नाम कुमारी हरिमेधसः । आकाशे तिष्ठतिष्ठेति तस्थौ सूर्य्यस्य शासनात् ।
अत्र वायुस्तथा वह्निरापः खञ्चापि गालव । आह्निकञ्चैव नैशञ्च दुःखस्पर्शं विमुञ्चति ।
अतः प्रभृति सूर्य्यस्य तिर्य्यगावर्त्तते गतिः । अत्र ज्योतींषि सर्व्वाणि विशन्त्यादित्यमण्डलं । ३८१५
अष्टाविंशतिरात्रञ्च संक्रम्य सह भानुना । निष्पतन्ति पुनः सूर्य्यात् सोमसंयोगयोगतः ।
अत्र नित्यं स्रवन्तीनां प्रभवः सागरोदयः । अत्र लोकत्रयस्यापस्तिष्ठन्ति वरुणालये ।
अत्र पन्नगराजस्याप्यनन्तस्य निवेशनं । अनादिनिधनस्यात्र विष्णोः स्थानमनुत्तमं ।
अत्रानलसखस्यापि पवनस्य निवेशनं । महर्षेः कश्यपस्यात्र मारीचस्य निवेशनं ।
एष ते पश्चिमो मार्गो दिग्द्वारेण प्रकीर्त्तितः । ब्रूहि गालव गच्छावो कां दिशं द्विजसत्तम । ३८२०

इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि गालवचरिते नवाधिकशततमोऽध्यायः ॥ १०९ ॥

॥ सुपर्ण उवाच ॥ यस्मादुत्तार्य्यते पापात् यस्मान्निःश्रेयसोऽश्नुते । अस्मादुत्तारणबलादुत्तरेत्युच्यते द्विज ।
उत्तरस्य हिरण्यस्य परिवापस्य गालव । मार्गः पश्चिमपूर्व्वाभ्यां दिग्भ्यां वै मध्यमः स्मृतः ।
अस्यां दिशि वरिष्ठायामुत्तरायां द्विजर्षभ । नासौम्यो नाविधेयात्मा नाधर्म्मो वसते जनः ।
यत्र नारायणः कृष्णो जिष्णुश्चैव नरोत्तमः । बदर्य्यामाश्रमपदे तथा ब्रह्मा च शाश्वतः ।
अत्र वै हिमवत्पृष्ठे नित्यमास्ते महेश्वरः । प्रकृत्या पुरुषः सार्द्धं युगान्ताग्निसमप्रभः । ३८२५
न स दृश्यो मुनिगणैस्तथा देवैः सवासवैः । गन्धर्व्वयक्षसिद्धैर्व्वा नरनारायणादृते ।
अत्र विष्णुः सहस्राक्षः सहस्रचरणोऽव्ययः । सहस्रशिरसः श्रीमानेकः पश्यति मायया ।
अत्र राज्येन विप्राणां चन्द्रमाश्चाभ्यषिच्यत । अत्र गङ्गां महादेवः पतन्तीं गगनाच्च्युतां ।
प्रतिगृह्य ददौ लोके मानुषे ब्रह्मवित्तम । अत्र देव्या तपस्तप्तं महेश्वरपरीप्सया ।
अत्र कामश्च रोषश्च शैलश्चोमा च सम्बभुः । अत्र राक्षसयक्षाणां गन्धर्व्वाणाञ्च गालव । ३८३०
आधिपत्येन कैलासे धनदोऽप्यभिषेचितः । अत्र चैत्ररथं रम्यमत्र वैखानसाश्रमः ।
अत्र मन्दाकिनी चैव मन्दरश्च द्विजर्षभ । अत्र सौगन्धिकवनं नैर्ऋतैरपि रक्ष्यते ।
शाद्वलं कदलीस्कन्धमत्र सन्तानका नगाः । अत्र संयमनित्यानां सिद्धानां स्वैरचारिणां ।
विमानान्यनुरूपाणि कामभोग्यानि गालव । अत्र ते ऋषयः सप्त देवी चारुन्धती तथा ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अत्र तिष्ठति वै स्वातिरत्रास्या उदयः स्मृतः। अत्र यज्ञं समासाद्य ध्रुवं स्थाता पितामहः।
ज्योतींषि चन्द्रसूर्य्यौ च परिवर्त्तन्ति नित्यशः। अत्र गायन्तिकाद्वारं रक्षन्ति द्विजसत्तम। ३८३५
धामनाना महात्मानो मुनयः सत्यवादिनः। न तेषां ज्ञायते सूतिर्नाकृतिर्न तपश्चितं।
परिवर्त्तसहस्राणि कामभोज्यानि गालव। यथा यथा प्रविशति तस्मात् परतरं नरः।
तथा तथा द्विजश्रेष्ठ प्रविलीयति गालव। नैतत् केनचिदन्येन गतपूर्व्वं द्विजर्षभ।
ऋते नारायणं देवं नरं वा जिष्णुमव्ययं। अत्र कैलासमित्युक्तं स्थानमैलविलस्य तत्।
अत्र विद्युत्प्रभा नाम जज्ञिरे ऽप्सरसो दश। अत्र विष्णुपदं नाम क्रमता विष्णुना कृतं। ३८४०
त्रिलोकविक्रमे ब्रह्मन्नुत्तरां दिशमाश्रितं। अत्र राज्ञा मरुत्तेन यज्ञेनेष्टं द्विजोत्तम।
उशीरवीजे विप्रर्षे यत्र जाम्बूनदं सरः। जीमूतस्यात्र विप्रर्षेरुपतस्थे महात्मनः।
साक्षाद्धैमवतः पुण्यो विमलः कनकाकरः। ब्राह्मणेषु च यत्कृत्स्नं स्वयं कृत्वा धनं महत्।
वव्रे धनं महर्षिः स जैमूतं तद्धनं ततः। अत्र नित्यं दिशां पालाः सायं प्रातर्द्विजर्षभाः। ३८४५
कस्य कार्य्यं किमिति वै परिक्रोशन्ति गालव। एवमेषा द्विजश्रेष्ठ गुणैरन्यैर्द्दिगुत्तरा।
उत्तरेति परिख्याता सर्व्वकर्म्मसु चोत्तरा। एता विस्तरशस्तात तव सङ्कीर्त्तिता दिशः।
चतस्रः क्रमयोगेन कामाशाङ्गन्तुमिच्छसि। उद्यतोऽहं द्विजश्रेष्ठ तव दर्शयितुं दिशः।
पृथिवीञ्चाखिलां ब्रह्मंस्तस्मादारोह मां द्विज।

इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि गालवचरिते दशाधिकशततमोऽध्यायः ॥ ११० ॥

॥ गालव उवाच ॥ गरुत्मन् भुजगेन्द्रारे सुपर्ण विनतात्मज। नय मां तार्क्ष्य पूर्व्वेण यत्र धर्म्मस्य चक्षुषी। ३८५०
पूर्व्वमेतां दिशं गच्छ या पूर्व्वं परिकीर्त्तिता। दैवतानां हि सान्निध्यं यत्र कीर्त्तितवानसि।
अत्र सत्यञ्च धर्म्मश्च त्वया सम्यक् प्रकीर्त्तितः। इच्छेयन्तु समागन्तुं समस्तैर्द्दैवतैरहं।
भूयश्च तान् सुरान् द्रष्टुमिच्छेयमरुणानुज।
॥ नारद उवाच ॥ तमाह विनतासूनुरारोहस्वेति वै द्विजं। आरुरोहाथ स मुनिर्गरुडं गालवस्तदा।
॥ गालव उवाच ॥ क्रममाणस्य ते रूपं दृश्यते पन्नगाशन। भास्करस्येव पूर्व्वाह्णे सहस्रांशोर्विवस्वतः। ३८५५
पक्षवातप्रणुन्नानां वृक्षाणामनुगामिनां। प्रस्थितानामिव समं पश्यामीह गतिं खग।
ससागरवनामुर्व्वीं सशैलवनकाननां। आकर्षन्निव चाभासि पक्षवातेन खेचर।
समीननागनक्रञ्च खमिवारोप्यते जलं। वायुना चैव महता पक्षवातेन चानिशं।
तुल्यरूपाननान् मत्स्यांस्तथा तिमितिमिङ्गिलान्। नागांश्च नरवक्त्रांश्च पश्याम्युन्मथितानिव।
महार्णवस्य च रवैः श्रोत्रे मे बधिरे कृते। न शृणोमि न पश्यामि नात्मनो वेद्मि कारणं। ३८६०
शनैः स तु भवान् यातु ब्रह्मवध्यामनुस्मरन्। न दृश्यते रविस्तात न दिशो न च खं खग।
तम एव तु पश्यामि शरीरं ते न लक्षये। मणी वा जात्यौ पश्यामि चक्षुषी तेऽहमण्डज।
शरीरन्तु न पश्यामि तव चैवात्मनश्च ह। पदे पदे तु पश्यामि शरीरादग्निमुत्थितं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust-Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स मे निर्व्वाप्य सहसा चक्षुषी शाम्य ते पुनः । तन्नियच्छ महावेगं गमने विनतात्मज ।
न मे प्रयोजनं किञ्चिद्गमने पन्नगाशन । सन्निवर्त्त महाभाग न वेगं विषहामि ते । ३८६५
गुरवे संश्रुतानीह शतान्यष्टौ हि वाजिनां । एकतः श्यामकर्णानां शुभ्राणाञ्चन्द्रवर्चसां ।
तेषाञ्चैवापवर्गाय मार्गं पश्यामि नाण्डज । ततोऽयं जीवितत्यागे दृष्टो मार्गो मयात्मनः ।
नैव मेऽस्ति धनं किञ्चिन्न धनेनान्वितः सुहृत् । न चार्थेनापि महता शक्यमेतद्व्यपोहितुं ।
॥ नारद उवाच ॥ एवं बहु च दीनञ्च ब्रुवाणं गालवं तदा । प्रत्युवाच व्रजन्नेव प्रहसन् विनतात्मजः ।
नातिप्रज्ञोऽसि विप्रर्षे यो त्मानं त्यक्तुमिच्छसि । न चापि कृत्रिमः कालः कालो हि परमेश्वरः । ३८७०
किमहं पूर्व्वमेवेह भवता नाभिचोदितः । उपायोऽत्र महानस्ति येनैतदुपपद्यते ।
तदेष ऋषभो नाम पर्व्वतः सागरान्तिके । अत्र विश्रम्य भुक्त्वा च निवर्त्तिष्याव गालव ।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि गालवचरिते एकादशाधिकशततमोऽध्यायः ॥ १११ ॥
॥ नारद उवाच ॥ ऋषभस्य ततः शृङ्गं निपत्य द्विजपक्षिणौ । शाण्डिलीं ब्राह्मणीं तत्र ददृशाते तपोऽन्वितां ।
अभिवाद्य सुपर्णस्तु गालवश्चाभिपूज्य तां । तया च स्वागतेनोक्तौ विष्टरे सन्निषीदतुः ।
सिद्धमन्नं तया दत्तं बलिमन्त्रोपबृंहितं । भुक्त्वा तृप्तावुभौ भूमौ सुप्तौ तावन्नु मोहितौ । ३८७५
मुहूर्त्तात् प्रतिबुद्धस्तु सुपर्णो गमनेप्सया । अथ भ्रष्टतनूजाङ्गमात्मानं ददृशे खगः ।
मांसपिण्डोपमो भूत्वा मुखपादान्वितः खगः । गालवस्तं तथा दृष्ट्वा विषण्णः पर्य्यपृच्छत ।
किमिदं भवता प्राप्तमिहागमनजं फलं । वासोऽयमिह कालन्तु कियन्तं नौ भविष्यति ।
किन्नु ते मनसा ध्यातमशुभं धर्म्मदूषणं । न ह्ययं भवतः स्वल्पो व्यभिचारो भविष्यति ।
सुपर्णोऽथाब्रवीत् विप्रं प्रतिध्यातं मया द्विज । इमां सिद्धामितो नेतुं तत्र यत्र प्रजापतिः । ३८८०
यत्र देवो महादेवो यत्र विष्णुः सनातनः । यत्र धर्म्मश्च यज्ञश्च तत्रेयं निवसेदिति ।
सोऽहं भगवतीं याचे प्रणतः प्रियकाम्यया । मयैतन्नाम प्रध्यातं मनसा शोचता किल ।
तदेवं बहुमानात्ते मयेहानीप्सितं कृतं । सुकृतं दुष्कृतं वा त्वं माहात्म्यात् क्षन्तुमर्हसि ।
सा तौ तदाऽब्रवीत्तुष्टा पतगेन्द्रद्विजर्षभौ । न भेतव्यं सुपर्णोऽसि सुपर्ण त्यज सम्भ्रमं ।
निन्दिताऽस्मि त्वया वत्स न च निन्दां क्षमाम्यहं । लोकेभ्यः स परिभ्रश्येत् यो मां निन्देत पापकृत् । ३८८५
हीनयाऽलक्षणैः सर्वैस्तथानिन्दितया मया । आचारं प्रतिगृह्णन्त्या सिद्धिः प्राप्तेयमुत्तमा ।
आचारः फलते धर्म्ममाचारः फलते धनं । आचारात् श्रियमाप्नोति आचारो हन्त्यलक्षणं ।
तदायुष्मन् खगपते यथेष्टं गम्यतामितः । न च ते गर्हणीया हि गर्हितव्याः स्त्रियः क्वचित् ।
भविताऽसि यथा पूर्व्वं बलवीर्य्यसमन्वितः । बभूवतुस्ततस्तस्य पक्षौ द्रविणवत्तरौ ।
अनुज्ञातस्तु शाण्डिल्या यथागतमुपागमत् । नैव चासादयामास तथा रूपांस्तुरङ्गमान् । ३८९०
विश्वामित्रोऽथ तं दृष्ट्वा गालवञ्चाध्वनि स्थितः । उवाच वदतां श्रेष्ठो वैनतेयस्य सन्निधौ ।
यस्त्वया स्वयमेवार्थः प्रतिज्ञातो मयि द्विज । तस्य कालोऽपवर्गस्य यथा वा मन्यते भवान् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

प्रतीक्षिष्याम्यहं कालमेतावन्तं तथाऽपरं। यथा संसिध्यते विप्र स मार्गस्तु निशम्यतां।
सुपर्णोऽथाब्रवीद्दीनं गालवं भृशदुःखितं। प्रत्यक्षं खल्विदानीं मे विश्वामित्रो यदुक्तवान्।
तदागच्छ द्विजश्रेष्ठ मन्त्रयिष्याव गालव। नादत्वा गुरवे शक्यं कृत्स्नमर्थं त्वयासितुं। ३८९५
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि गालवचरिते द्वादशाधिकशततमोऽध्यायः॥ ११२ ॥
॥ नारद उवाच ॥ अथाह गालवन्दीनं सुपर्णः पततां वरः। निर्म्मितं वह्निना भूमौ वायुना वर्द्धितं तथा।
यस्माद्धिरण्मयं सर्व्वं हिरण्यन्तेन चोच्यते। धत्ते धारयते चेदमेतस्मात्कारणाद्धनं।
तदेषु त्रिषु लोकेषु धनं तिष्ठति शाश्वतं। नित्यं प्रोष्ठपदाभ्याञ्च शुक्रे धनपतौ तथा।
मनुष्येभ्यः समादत्ते शुक्रश्चिन्तार्ज्जितं धनं। अजैकपादहिर्ब्रध्नै रक्ष्यते धनदेन च।
एवं न शक्यते लब्धुमलब्धव्यं द्विजर्षभ। ऋते च धनमश्वानां नावाप्तिर्विद्यते तव। ३९००
स त्वं याचात्र राजानं कञ्चिद्राजर्षिवंशजं। अपीड्य राजा पौरान् हि यो नौ कुर्य्यात् कृतार्थिनौ।
अस्ति सोमान्ववाये मे जातः कश्चिन्नृपः सखा। अभिगच्छावहे तं वै तस्यास्ति विभवो भुवि।
ययातिर्नाम राजर्षिर्नाहुषः सत्यविक्रमः। स दास्यति मया चोक्तो भवता चार्थितः स्वयं।
विभवश्चास्य सुमहानासीद्धनपतेरिव। एवं गुरुधनं विद्वन् दानेनैव विशोधय।
तथा तौ कथयन्तौ च चिन्तयन्तौ च यत्क्षमं। प्रतिष्ठाने नरपतिं ययातिं प्रत्युपस्थितौ। ३९०५
प्रतिगृह्य च सत्कारैरर्घ्यं पाद्यादिकं वरं। पृष्टश्चागमने हेतुमुवाच विनतासुतः।
अयं मे नाहुष सखा गालवस्तपसो निधिः। विश्वामित्रस्य शिष्योऽभूद्वर्षाण्ययुतशो नृप।
सोऽयं तेनाभ्यनुज्ञात उपकारेप्सया द्विज। तमाह भगवान् काले ददानि गुरुदक्षिणां।
असकृत्तेन चोक्तेन किञ्चिदागतमन्युना। अयमुक्तः प्रयच्छेति जानता विभवं लघु।
एकतः श्यामकर्णानां शुभ्राणां शुद्धजन्मनां। अष्टौ शतानि मे देहि हयानाञ्चन्द्रवर्च्चसां। ३९१०
गुर्व्वर्थो दीयतामेष यदि गालव मन्यसे। इत्येवमाह सक्रोधो विश्वामित्रस्तपोधनः।
सोऽयं शोकेन महता तप्यमानो द्विजर्षभः। अशक्तः प्रतिकर्त्तुं तत् भवन्तं शरणं गतः।
प्रतिगृह्य नरव्याघ्र त्वत्तो भिक्षां गतव्यथः। कृत्वाऽपवर्गं गुरवे चरिष्यति महत्तपः।
तपसः संविभागेन भवन्तमपि योक्ष्यते। स्वेन राजर्षितपसा पूर्णं त्वां पूरयिष्यति।
यावन्ति रोमाणि हये भवन्तीह नरेश्वर। तावतो वाजिनो लोकान् प्राप्नुवन्ति महीपते। ३९१५
पात्रं प्रतिग्रहस्यायं दातुं मित्रं तथा भवान्। शङ्खे क्षीरमिवासक्तं भवत्वेतत्तथोपमं।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि गालवचरिते त्रयोदशाधिकशततमोऽध्यायः॥ ११३ ॥
॥ नारद उवाच ॥ एवमुक्तः सुपर्णेन तथ्यं वचनमुत्तमं। विमृश्यावहितो राजा निश्चित्य च पुनः पुनः।
यष्टा क्रतुसहस्राणां दाता दानपतिः प्रभुः। ययातिः सर्व्वकाशीश इदं वचनमब्रवीत्।
दृष्ट्वा प्रियसखं तार्क्ष्यं गालवञ्च द्विजर्षभं। निदर्शनञ्च तपसां भिक्षां श्लाघ्याञ्च कीर्त्तितां।
अतीत्य च नृपानन्यानादित्यकुलसम्भवान्। मत्सकाशमनुप्राप्तावेतौ बुद्धिमवेक्ष्य च। ३९२०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अद्य मे सफलं जन्म तारितञ्चाद्य मे कुलं । अद्यायं तारितो देशो मम तार्क्ष्य त्वयाऽनघ ।
वक्तुमिच्छामि तु सखे यथा जानासि मां पुरा । न तथा वित्तवानस्मि क्षीणं वित्तञ्च मे सखे ।
न च शक्तोऽस्मि ते कर्त्तुं मोघमागमनं खग । न चाशामस्य विप्रर्षेर्वितथीकर्त्तुमुत्सहे ।
तत्तु दास्यामि यत् कार्य्यमिदं सम्पादयिष्यति । अभिगम्य हताशो हि निवृत्तो दहते कुलं ।
नातः परं वैनतेय किञ्चित्पापिष्ठमुच्यते । यथाशानाशनाल्लोके देहिनास्तीति यद्वचः । ३९२५
हताशो ह्यकृतार्थः सन् हतसम्भावितो नरः । हिनस्ति तस्य पुत्त्रांश्च पौत्त्रांश्चाकुर्व्वतो हितं ।
तस्माच्चतुर्णां वंशानां स्थापयित्री सुता मम । इयं सुरसुतप्रख्या सर्व्वधर्म्मोपचायिनी ।
सदा देवमनुष्याणामसुराणाञ्च गालव । काङ्क्षिता रूपतो बाला सुता मे प्रतिगृह्यतां ।
अस्यां शुल्कं प्रदास्यन्ति नृपा राज्यमपि ध्रुवं । किं पुनः श्यामकर्णानां हयानां द्वे चतुःशते ।
स भवान् प्रतिगृह्णातु ममैतां माधवीं सुतां । अहं दौहित्रवान् स्यां वै वर एष मम प्रभो । ३९३०
प्रतिगृह्य च तां कन्यां गालवः सह पक्षिणा । पुनर्द्रक्ष्याव इत्युक्त्वा प्रतस्थे सह कन्यया ।
उपलब्धमिदं द्वारमश्वानामिति चाण्डजः । उक्त्वा गालवमापृच्छ्य जगाम भवनं स्वकं ।
गते पतङ्गराजे तु गालवः सह कन्यया । चिन्तयानः क्षमं दाने राज्ञां वै शुल्कतोऽगमत् ।
सोऽगच्छन्मनसेक्ष्वाकुं हर्य्यश्वं राजसत्तमं । अयोध्यायां महावीर्य्यं चतुरङ्गबलान्वितं ।
कोषधान्यबलोपेतं प्रियपौरं द्विजप्रियं । प्रजाभिकामं शाम्यन्तं कुर्व्वाणन्तप उत्तमं । ३९३५
तमुपागम्य विप्रः स हर्य्यश्वं गालवोऽब्रवीत् । कन्येयं मम राजेन्द्र प्रसवैः कुलवर्द्धिनी ।
इयं शुल्केन भार्य्यार्थं हर्य्यश्व प्रतिगृह्यतां । शुल्कं ते कीर्त्तयिष्यामि तत् श्रुत्वा सम्प्रधार्य्यतां ।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि गालवचरिते चतुर्दशाधिकशततमोऽध्यायः ॥ ११४ ॥
॥ नारद उवाच ॥ हर्य्यश्वस्त्वब्रवीद्राजा विचिन्त्य बहुधा ततः । दीर्घमुष्णञ्च निःश्वस्य प्रजाहेतोर्नृपोत्तमः ।
उन्नतेषून्नता षट्सु सूक्ष्मा सूक्ष्मेषु सप्तसु । त्रिगम्भीरा त्रिगम्भीरे ष्वियं रक्ता सुपञ्चसु ।
बहुदेवासुरालोका बहुगन्धर्व्वदर्शना । बहुलक्षणसम्पन्ना बहुप्रसवधारिणी । ३९४०
समर्थेयं जनयितुञ्चक्रवर्त्तिनमात्मजं । ब्रूहि शुल्कं द्विजश्रेष्ठ समीक्ष्य विभवं मम ।
॥ गालव उवाच ॥ एकतः श्यामकर्णानां शतान्यष्टौ प्रयच्छ मे । हयानाञ्चन्द्रशुभ्राणां देशजानां वपुष्मतां ।
ततस्तव भवित्रीयं पुत्त्राणां जननी शुभा । अरणीव हुताशानां योनिरायतलोचना ।
॥ नारद उवाच ॥ स तत् श्रुत्वा वचो राजा हर्य्यश्वः काममोहितः । उवाच गालवं दीनो राजर्षिरृषिसत्तमं ।
द्वे मे शते संनिहिते हयानां यद्विधास्तव । एष्टव्याः शतशस्त्वन्ये चरन्ति मम वाजिनः । ३९४५
सोऽहमेकमपत्यं वै जनयिष्यामि गालव । अस्यामेतं भवान् कामं सम्पादयतु मे वरं ।
एतत् श्रुत्वा तु सा कन्या गालवं वाक्यमब्रवीत् । मम दत्तो वरः कश्चित् केनचित् ब्रह्मवादिना ।
प्रसूत्यन्ते प्रसूत्यन्ते कन्यैव त्वं भविष्यसि । स त्वं ददस्व मां राज्ञे प्रतिगृह्य हयोत्तमान् ।
नृपेभ्यो हि चतुर्भ्यस्ते पूर्णान्यष्टौ शतानि मे । भविष्यन्ति तथा पुत्त्रा मम चत्वार एव च ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

क्रियतामुपसंहारो गुर्व्वर्थो द्विजसत्तम। एषा तावत् मम प्रज्ञा यथा वा मन्यसे द्विज।
३९५० एवमुक्तस्तु स मुनिः कन्यया गालवस्तदा। हर्य्यश्वं पृथिवीपालमिदं वचनमब्रवीत्।
इयं कन्या नरश्रेष्ठ हर्य्यश्व प्रतिगृह्यतां। चतुर्भागेन शुल्कस्य जनयस्वैकमात्मजं।
प्रतिगृह्य स तां कन्यां गालवं प्रतिनन्द्य च। समये देशकाले च लब्धवान् सुतमीप्सितं।
ततो वसुमना नाम वसुभ्यो वसुमत्तरः। वसुप्रभो नरपतिः स बभूव वसुप्रदः।
३९५५ अथ काले पुनर्धीमान् गालवः प्रत्युपस्थितः। उपसङ्गम्य चोवाच हर्य्यश्वं प्रीतमानसं।
जातो नृप सुतस्तेऽयं बालो भास्करसन्निभः। कालो गन्तुं नरश्रेष्ठ भिक्षार्थमपरं नृपं।
हर्य्यश्वः सत्यवचने स्थितः स्थित्वा च पौरुषे। दुर्लभत्वाद्धयानाञ्च प्रददौ माधवीं पुनः।
माधवी च पुनर्दीप्तां परित्यज्य नृपश्रियं। कुमारी कामतो भूत्वा गालवं पृष्ठतोऽन्वगात्।
त्वय्येव तावत्तिष्ठन्तु हया इत्युक्तवान् द्विजः। प्रययौ कन्यया सार्द्धं दिवोदासं प्रजेश्वरं।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि गालवचरिते पञ्चदशाधिकशततमोऽध्यायः ॥ ११५ ॥
३९६० ॥ गालव उवाच ॥ महावीर्य्यो महीपालः काशीनामीश्वरः प्रभुः। दिवोदास इति ख्यातो भैमसेनिर्नराधिपः।
तत्र गच्छावहे भद्रे शनैरागच्छ माशुचः। धार्म्मिकः संयमे युक्तः सत्ये चैव जनेश्वरः।
॥ नारद उवाच ॥ तमुपागम्य स मुनिर्न्यायतस्तेन सत्कृतः। गालवः प्रसवस्यार्थे तं नृपं प्रत्यचोदयत्।
॥ दिवोदास उवाच ॥ श्रुतमेतन्मया पूर्व्वं किमुक्त्वा विस्तरं द्विज। काङ्क्षितो हि ममैषोऽर्थः श्रुत्वैव द्विजसत्तम।
एतच्च मे बहु मतं यदुत्सृज्य नराधिपान्। मामेवमुपयातोऽसि भावि चैतदसंशयं।
३९६५ स एव विभवोऽस्माकमश्वानामपि गालव। अहमप्येकमेवास्यां जनयिष्यामि पार्थिवं।
तथेत्युक्त्वा द्विजश्रेष्ठः प्रादात् कन्यां महीपतेः। विधिपूर्व्वञ्च तां राजा कन्यां प्रतिगृहीतवान्।
रेमे स तस्यां राजर्षिः प्रभावत्यां यथा रविः। स्वाहायाञ्च यथा वह्निर्यथा शच्याञ्च वासवः।
यथा चन्द्रस्य रोहिण्यामूर्म्मिलायां यथा यमः। वरुणस्य यथा गौर्य्यां यथा चर्ध्यां धनेश्वरः।
यथा नारायणो लक्ष्म्यां जाह्नव्याञ्च यथोदधिः। यथा रुद्रस्य रुद्राण्यां यथा देव्यां पितामहः।
३९७० अदृश्यन्त्याञ्च वाशिष्ठो वशिष्ठस्याक्षमालया। च्यवनस्य सुकन्यायां पुलस्त्यः सन्ध्यया यथा।
अगस्त्यस्यापि वैदर्भ्यां सावित्र्यां सत्यवान् यथा। यथा भृगुः पुलोमायामदित्यां कश्यपो यथा।
रेणुकायां यथार्चीको हैमवत्याञ्च कौशिकः। बृहस्पतिश्च तारायां शुक्रश्च शतपर्व्वया।
यथा भूम्यां भूमिपतिरुर्व्वश्याञ्च पुरूरवाः। ऋचीकः सत्यवत्याञ्च सरस्वत्यां यथा मनुः।
शकुन्तलायां दुःष्मन्तो धृत्यां धर्म्मस्य शाश्वतः। दमयन्त्यां नलश्चैव सत्यवत्याञ्च नारदः।
३९७५ जरत्कारुर्ज्जरत्कार्व्वां पुलस्त्यस्य प्रतीच्यया। मेनकायां यथोर्णायुस्तुम्बुरुश्चैव रम्भया।
वासुकिः शतशीर्षायां कुमार्य्याञ्च धनञ्जयः। वैदेह्याञ्च यथा रामो रुक्मिण्याञ्च जनार्द्दनः।
तथा तु रममाणस्य दिवोदासस्य भूपतेः। माधवी जनयामास पुत्त्रमेकं प्रतर्द्दनं।
अथाजगाम भगवान् दिवोदासं स गालवः। समये समनुप्राप्ते वचनञ्चेदमब्रवीत्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

निर्यातयतु मे कन्यां भवांस्तिष्ठन्तु वाजिनः । यावदन्यत्र गच्छामि शुल्कार्थं पृथिवीपते ।
दिवोदासोऽथ धर्म्मात्मा समये गालवस्य तां । कन्यां निर्यातयामास स्थितः सत्ये महीपतिः । ३९८०

इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि गालवचरिते षोडशाधिकशततमोऽध्यायः ॥ ११६ ॥

॥ नारद उवाच ॥ तथैव तां श्रियं त्यक्त्वा कन्या भूत्वा यशस्विनी । माधवी गालवं विप्रमन्वयात् सत्यसङ्गरात् ।
गालवो विमृशन्नेव स्वकार्य्यगतमानसः । जगाम भोजनगरं द्रष्टुमौशीनरं नृपं ।
तमुवाचाथ गत्वा स नृपतिं सत्यविक्रमं । इयं कन्या सुतौ द्वौ ते जनयिष्यति पार्थिवौ ।
अस्यां भवानवाप्तार्थो भविता प्रेत्य चेह च । सोमार्कप्रतिसङ्काशौ जनयित्वा सुतौ नृप ।
शुल्कन्तु सर्व्वधर्म्मज्ञ हयानाञ्चन्द्रवर्चसां । एकतः श्यामकर्णानां देयं मह्यं चतुःशतं । ३९८५
गुर्व्वर्थोऽयं समारम्भो न हयैः कृत्यमस्ति मे । यदि शक्यं महाराज क्रियतामविचारितं ।
अनपत्योऽसि राजर्षे पुत्त्रौ जनय पार्थिव । पितॄन् पुत्त्रप्लवेन त्वमात्मानञ्चैव तारय ।
न पुत्त्रफलभोक्ता हि राजर्षे पात्यते दिवः । न याति नरकं घोरं यथा गच्छन्त्यनात्मजाः ।
एतच्चान्यच्च विविधं श्रुत्वा गालवभाषितं । उशीनरः प्रतिवचो ददौ तस्य नराधिपः ।
श्रुतवानस्मि ते वाक्यं यथा वदसि गालव । विधिस्तु बलवान् ब्रह्मन् प्रवणं हि मनो मम । ३९९०
शते द्वे तु ममाश्वानामीदृशानां द्विजोत्तम । इतरेषां सहस्राणि सुबहूनि चरन्ति मे ।
अहमप्येकमेवास्यां जनयिष्यामि गालव । पुत्त्रं द्विज गतं मार्गं गमिष्यामि परैरहं ।
मूल्येनापि समं कुर्य्यां तवाहं द्विजसत्तम । पौरजानपदार्थन्तु ममार्थो नात्मभोगतः ।
कामतो हि धनं राजा पारक्यं यः प्रयच्छति । न स धर्म्मेण धर्म्मात्मन् युज्यते यशसा न च ।
सोऽहं प्रतिग्रहीष्यामि ददात्वेतां भवान्मम । कुमारीं देवगर्भाभामेकपुत्त्रभवाय मे । ३९९५
तथा तु बहुधा कन्यामुक्तवन्तं नराधिपं । उशीनरं द्विजश्रेष्ठो गालवः प्रत्यपूजयत् ।
उशीनरं प्रतिग्राह्य गालवः प्रययौ वनं । रेमे स तां समासाद्य कृतपुण्य इव श्रियं ।
कन्दरेषु च शैलानां नदीनां निर्झरेषु च । वातायनविमानेषु तथा गर्भगृहेषु च ।
उद्यानेषु विचित्रेषु वनेषूपवनेषु च । हर्म्म्येषु रमणीयेषु प्रासादशिखरेषु च ।
ततोऽस्य समये जज्ञे पुत्त्रो बालरविप्रभः । शिविर्नाम्नाऽभिविख्यातो यः स पार्थिवसत्तमः । ४०००
उपस्थाय च तं विप्रो गालवः प्रतिगृह्य च । कन्यां प्रयातस्तां राजन् दृष्टवान् विनतात्मजं ।

इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि गालवचरिते सप्तदशाधिकशततमोऽध्यायः ॥ ११७ ॥

॥ नारद उवाच ॥ गालवं वैनतेयोऽथ प्रहसन्निदमब्रवीत् । दिष्ट्या कृतार्थं पश्यामि भवन्तमिह वै द्विज ।
गालवस्तु वचः श्रुत्वा वैनतेयेन भाषितं । चतुर्भागावशिष्टन्तदाचख्यौ कार्य्यमस्य हि ।
सुपर्णस्त्वब्रवीदेनं गालवं वदतां वरः । प्रयत्नस्ते न कर्त्तव्यो नैष सम्पत्स्यते तव ।
पुरा हि कान्यकुब्जे वै गाधेः सत्यवतीं सुतां । भार्य्यार्थं वरयत् कन्यामृचीकस्तेन भाषितः । ४००५
एकतः श्यामकर्णानां हयानाञ्चन्द्रवर्चसां । भगवन्दीयतां मह्यं सहस्रमिति गालव ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ऋचीकस्तु तथेत्युक्त्वा वरुणस्यालयं गतः । अश्वतीर्थे हयान् लब्ध्वा दत्तवान् पार्थिवाय वै ।
दृष्ट्वा ते पुण्डरीकेण दत्ता राज्ञा द्विजातिषु । तेभ्यो द्वे द्वे शते क्रीत्वा प्राप्ते तैः पार्थिवैस्तदा ।
अपराण्यपि चत्वारि शतानि द्विजसत्तम । नीयमानानि सन्तारे हृतान्यासन्वितस्तथा ।
एवं न शक्यमप्राप्यं प्राप्तुं गालव कर्हिचित् । इमामश्वशताभ्यां वै द्वाभ्यां तस्मै निवेद्य । ४०१०
विश्वामित्राय धर्म्मात्मन् षड्भिरश्वशतैः सह । ततोऽसि गतसम्मोहः कृतकृत्यो द्विजोत्तम ।
गालवस्तं तथेत्युक्त्वा सुपर्णसहितस्ततः । आदायाश्वांश्च कन्याञ्च विश्वामित्रमुपागमत् ।
अश्वानां काङ्क्षितार्थानां षडिमानि शतानि वै । शतद्वयेन कन्येयं भवता प्रतिगृह्यतां ।
अस्यां राजर्षिभिः पुत्त्रा जाता वै धार्म्मिकास्त्रयः । चतुर्थं जनयत्वेकं भवानपि नरोत्तमं ।
पूर्णान्येवं शतान्यष्टौ तुरगानां भवन्तु ते । भवतो ह्यनृणो भूत्वा तपः कुर्य्यां यथासुखं । ४०१५
विश्वामित्रस्तु तं दृष्ट्वा गालवं सह पक्षिणा । कन्याञ्च तां वरारोहामिदमित्यब्रवीद्वचः ।
किमियं पूर्व्वमेवेह न दत्ता मम गालव । पुत्त्रा ममैव चत्वारो भवेयुः कुलभावनाः ।
प्रतिगृह्णामि ते कन्यामेकपुत्त्रफलाय वै । अश्वाश्चाश्रममासाद्य चरन्तु मम सर्व्वशः ।
स तया रममाणोऽथ विश्वामित्रो महाद्युतिः । आत्मजं जनयामास माधवीपुत्त्रमष्टकं ।
जातमात्रं सुतं तञ्च विश्वामित्रो महामुनिः । संयोज्यार्थैस्तथा धर्म्मैरश्वैस्तैः समयोजयत् । ४०२०
अथाष्टकः पुरं प्रायात् तदा सोमपुरप्रभं । निर्यात्य कन्यां शिष्याय कौशिकोऽपि वनं ययौ ।
गालवोऽपि सुपर्णेन सह निर्यात्य दक्षिणां । मनसाऽभिप्रतीतेन कन्यामिदमुवाच ह ।
जातो दानपतिः पुत्त्रस्त्वया शूरस्तथाऽपरः । सत्यधर्म्मरतश्चान्यो यज्वा चापि तथा परः ।
तदा गच्छ वरारोहे तारितस्ते पिता सुतैः । चत्वारश्चैव राजानस्तथा चाहं सुमध्यमे ।
गालवस्त्वभ्यनुज्ञाय सुपर्णं पन्नगाशनं । पितुर्निर्यात्य तां कन्यां प्रययौ वनमेव ह । ४०२५
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि गालवचरिते अष्टादशाधिकशततमोऽध्यायः ॥ ११८ ॥
॥ नारद उवाच ॥ स तु राजा पुनस्तस्याः कर्त्तुकामः स्वयम्वरं । उपगम्याश्रमपदं गङ्गायमुनसङ्गमे ।
गृहीतमाल्यदामान्तां रथमारोप्य माधवीं । पुरुर्यदुश्च भगिनीमाश्रमे पर्य्यधावतां ।
नागयक्षमनुष्याणां गन्धर्व्वमृगपक्षिणां । शैलद्रुमवनौकानामासीत्तत्र समागमः ।
नानापुरुषदेश्यानामीश्वरैश्च समाकुलं । ऋषिभिर्ब्रह्मकल्पैश्च समन्तादावृतं वनं ।
निर्दिश्यमानेषु तु सा वरेषु वरवर्णिनी । वरानुत्क्रम्य सर्व्वांस्तान् वरं वृतवती वनं । ४०३०
अवतीर्य्य रथात् कन्या नमस्कृत्य च बन्धुषु । उपगम्य वनं पुण्यं तपस्तेपे ययातिजा ।
उपवासैश्च विविधैर्दीक्षाभिर्नियमैस्तथा । आत्मनो लघुतां कृत्वा बभूव मृगचारिणी ।
वैदूर्य्याङ्कुरकल्पानि मृदूनि हरितानि च । चरन्ती शष्पमुख्यानि तिक्तानि मधुराणि च ।
स्रवन्तीनाञ्च पुण्यानां सुरसानि शुचीनि च । पिबन्ती वारिमुख्यानि शीतानि विमलानि च ।
वनेषु मृगराजेषु व्याघ्रविप्रोषितेषु च । दावाग्निविप्रयुक्तेषु शून्येषु गहनेषु च । ४०३५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

चरन्ती हरिणैः सार्द्धं मृगीव वनचारिणी । चचार विपुलं धर्म्मं ब्रह्मचर्य्येण संवृतं ।
ययातिरपि पूर्व्वेषां राज्ञां वृत्तमनुष्ठितः । बहुवर्षसहस्रायुर्युयुजे कालधर्म्मणा ।
पुरुर्यदुश्च द्वौ वंशौ वर्द्धमानौ नरोत्तमौ । ताभ्यां प्रतिष्ठितो लोकः परलोके च नाहुषः ।
महीपते नरपतिर्ययातिः स्वर्गमास्थितः । महर्षिकल्पो नृपतिः स्वर्गाग्र्यफलभुग्विभुः ।
बहुवर्षसहस्राख्ये काले बहुगुणे गते । राजर्षिषु निषस्सेषु महीयःसु महर्षिषु । ४०४०
अवमेने नरान् सर्व्वान् देवानृषिगणांस्तथा । ययातिर्मूढविज्ञानो विस्मयाविष्टचेतनः ।
ततस्तं बुबुधे देवः शक्रो बलनिसूदनः । ते च राजर्षयः सर्व्वे धिग्धिगित्येवमब्रुवन् ।
विचारश्च समुत्पन्नो निरीक्ष्य नहुषात्मजं । को न्वयं कस्य वा राज्ञः कथं वा स्वर्गमागतः ।
कर्म्मणा केन सिद्धोऽयं क्व वाऽनेन तपश्चितं । कथं वा ज्ञायते स्वर्गे केन वा ज्ञायतेऽप्युत ।
एवं विचारयन्तस्ते राजानं स्वर्गवासिनः । दृष्ट्वा पप्रच्छुरन्योऽन्यं ययातिं नृपतिं प्रति । ४०४५
विमानपालाः शतशः स्वर्गद्वाराभिरक्षिणः । पृष्टा आसनपालाश्च न जानीमेत्यथाब्रुवन् ।
सर्व्वे ते ह्यावृतज्ञाना नाभ्यजानन्त तं नृपं । स मुहूर्त्तादथ नृपो हतौजाश्चाभवत्तदा ।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि ययातिमोहे एकोनविंशत्यधिकशततमोऽध्यायः ॥ ११९ ॥
॥ नारद उवाच ॥ अथ प्रचलितः स्थानादासनाच्च परिच्युतः । कम्पितेनैव मनसा धर्षितः शोकवह्निना ।
म्लानस्रग्भ्रष्टविज्ञानः प्रभ्रष्टमुकुटाङ्गदः । विघूर्णन् स्रस्तसर्व्वाङ्गः प्रभ्रष्टाभरणाम्बरः ।
अदृश्यमानस्तान् पश्यन्नपश्यंश्च पुनः पुनः । शून्यः शून्येन मनसा प्रतिपश्यन्महीतलं । ४०५०
किं मया मनसा ध्यातमशुभं धर्म्मदूषणं । येनाहं चलितः स्थानादिति राजा व्यचिन्तयत् ।
ते तु तत्रैव राजानः सिद्धाश्चाप्सरसस्तथा । अपश्यन्त निरालम्बं तं ययातिं परिच्युतं ।
अथैत्य पुरुषः कश्चित् क्षीणपुण्यनिपातकः । ययातिमब्रवीद्राजन् देवराजस्य शासनात् ।
अतीव मदमत्तस्त्वं न कञ्चिन्नावमन्यसे । मानेन भ्रष्टः स्वर्गस्ते नार्हस्त्वं पार्थिवात्मज ।
न च प्रज्ञायसे गच्छ पतस्वेति तमब्रवीत् । पतेयं सत्स्विति वचस्त्रिरुक्त्वा नहुषात्मजः । ४०५५
पतिष्यंश्चिन्तयामास गतिं गतिमतां वरः । एतस्मिन्नेव काले तु नैमिषे पार्थिवर्षभान् ।
चतुरोऽपश्यत नृपांस्तेषां मध्ये पपात ह । प्रतर्द्दनो वसुमनाः शिविरौशीनरोऽष्टकः ।
वाजपेयेन यज्ञेन तर्पयन्ति सुरेश्वरं । तेषामध्वरजं धूमं स्वर्गद्वारमुपस्थितं ।
ययातिरुपजिघ्रन् वै निपपात महीं प्रति । भूमौ स्वर्गेण सम्बद्धां नदीं धूममयीमिव ।
गङ्गां गामिव गच्छन्तीमालम्ब्य जगतीपतिः । श्रीमत्स्ववभृताग्र्येषु चतुर्षु प्रतिबन्धुषु । ४०६०
मध्ये निपतितो राजा लोकपालोपमेषु सः । चतुर्षु हुतकल्पेषु राजसिंहमहाग्निषु ।
पपात मध्ये राजर्षिर्ययातिः पुण्यसङ्क्षये । तमाहुः पार्थिवाः सर्व्वे दीप्यमानमिवश्रिया ।
को भवान् कस्य वा बन्धुर्देशस्य नगरस्य वा । यक्षो वाऽप्यथ वा देवो गन्धर्व्वो राक्षसोऽपि वा ।
न हि मानुषरूपोऽसि को वाऽर्थः काङ्क्षते त्वया ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ ययातिरुवाच ॥ ययातिरस्मि राजर्षिः क्षीणपुण्यश्च्युतो दिवः। पतेयं सत्स्विति ध्यायन् भवत्सु विनिपातितः।
॥ राजान ऊचुः ॥ सत्यमेतद्भवतु ते काङ्क्षितं पुरुषर्षभ। सर्व्वेषां नः क्रतुफलं धर्म्मश्च प्रतिगृह्यतां। ४०६५
॥ ययातिरुवाच ॥ नाऽहं प्रतिग्रहधनो ब्राह्मणः क्षत्त्रियो ह्यहं। न च मे प्रवणा बुद्धिः परपुण्यविनाशने।
॥ नारद उवाच ॥ एतस्मिन्नेव काले तु मृगचर्य्याक्रमागतां। माधवीं प्रेक्ष्य राजानस्तेऽभिवाद्येदमब्रुवन्।
किमागमनकृत्यन्ते किं कुर्म्मः शासनं तव। आज्ञाप्या हि वयं सर्व्वे तव पुत्त्रास्तपोधने।
तेषां तद्भाषितं श्रुत्वा माधवी परया मुदा। पितरं समुपागच्छत् ययातिं सा ववन्द च। ४०७०
स्पृष्ट्वा मूर्द्धनि तान् पुत्त्रांस्तापसी वाक्यमब्रवीत्। दौहित्रास्तव राजेन्द्र मम पुत्त्रा न ते पराः।
इमे त्वां तारयिष्यन्ति दृष्टमेतत् पुरातनैः। अहं ते दुहिता राजन् माधवी मृगचारिणी।
मयाऽप्युपचितो धर्म्मस्ततोऽर्द्धं प्रतिगृह्यतां। यस्माद्राजन् नराः सर्व्वे अपत्यफलभागिनः।
तस्मादिच्छन्ति दौहित्रान् यथा त्वं वसुधाधिप। ततस्ते पार्थिवाः सर्व्वे शिरसा जननीं तदा।
अभिवाद्य नमस्कृत्य मातामहमथाब्रुवन्। उच्चैरनुपमैः स्निग्धैः स्वरैरापूर्य्य मेदिनीं। ४०७५
मातामहं नृपतयस्तारयन्तो दिवश्च्युतं। अथ तस्मादुपगतो गालवोऽप्याह पार्थिवं।
तपसो मेऽष्टभागेन स्वर्गमारोहतां भवान्।

इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि ययातिवंशे विंशत्यधिकशततमोऽध्यायः॥ १२० ॥

॥ नारद उवाच ॥ प्रत्यभिज्ञातमात्रोऽथ सद्भिस्तैर्नरपुङ्गवः। समारुरोह नृपतिरस्पृशन् वसुधातलं।
ययातिर्दिव्यसंस्थानो बभूव विगतज्वरः। दिव्यमाल्याम्बरधरो दिव्याभरणभूषितः।
दिव्यगन्धगुणोपेतो न पृथ्वीमस्पृशत् पदा। ततो वसुमनाः पूर्व्वमुच्चैरुच्चारयन् वचः। ४०८०
ख्यातो दानपतिर्लोके व्याजहार नृपं तदा। प्राप्तवानस्मि यल्लोके सर्व्ववर्णेष्वगर्हया।
तदप्यथ च दास्यामि तेन संयुज्यतां भवान्। यत् फलं दानशीलस्य क्षमाशीलस्य यत् फलं।
यच्च मे फलमाधाने तेन संयुज्यतां भवान्। ततः प्रतर्द्दनोऽप्याह वाक्यं क्षत्त्रियपुङ्गवः।
यथा धर्म्मरतिर्नित्यं नित्यं युद्धपरायणः। प्राप्तवानस्मि यल्लोके क्षात्त्रवंशोद्भवं यशः।
वीरशब्दफलञ्चैव तेन संयुज्यतां भवान्। शिविरौशीनरो धीमानुवाच मधुरां गिरं। ४०८५
यथा बालेषु नारीषु वैहार्य्येषु तथैव च। सङ्गरेषु निपातेषु तथापद्व्यसनेषु च।
अनृतं नोक्तपूर्व्वं मे तेन सत्येन खं व्रज। यथा प्राणांश्च राज्यञ्च राजन् कर्म्म सुखानि च।
त्यजेयं न पुनः सत्यं तेन सत्येन खं व्रज। यथा सत्येन मे धर्म्मो यथा सत्येन पावकः।
प्रीतः शतक्रतुश्चैव तेन सत्येन खं व्रज। अष्टकस्त्वथ राजर्षिः कौशिको माधवीसुतः।
अनेकशतयज्वानं नाहुषं प्राप्य धर्म्मवित्। शतशः पुण्डरीका मे गोसवाश्चरिताः प्रभो। ४०९०
क्रतवो वाजपेयाश्च तेषां फलमवाप्नुहि। न मे रत्नानि न धनं न तथाऽन्ये परिच्छदाः।
क्रतुष्वनुपयुक्तानि तेन सत्येन खं व्रज। यथा यथा हि जल्पन्ति दौहित्रास्तं नराधिपं।
तथा तथा वसुमतीं त्यक्त्वा राजा दिवं ययौ। एवं सर्व्वे समस्तास्ते राजानः सुकृतैस्तदा।
ययातिं स्वर्गतो भ्रष्टं तारयामासुरञ्जसा। दौहित्राः स्वेन धर्म्मेण यज्ञदानकृतेन वै।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

चतुर्षु राजवंशेषु सम्भूताः कुलवर्द्धनाः । मातामहं महाप्राज्ञं दिवमारोपयन्ति ते । ४०९९
॥राजान ऊचुः॥ राजधर्म्मगुणोपेताः सर्व्वधर्म्मगुणान्विताः। दौहित्रास्ते वयं राजन् दिवमारोह पार्थिव।

इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानर्व्वणि ययातिस्वर्गारोहणे एकविंशत्यधिकशततमोऽध्यायः ॥ १२१ ॥

॥ नारद उवाच॥ सद्भिरारोपितः स्वर्गं पार्थिवैर्भूरिदक्षिणैः। अभ्यनुज्ञाय दौहित्रान् ययातिर्दिवमास्थितः।
अभिवृष्टश्च वर्षेण नानापुष्पसुगन्धिना। परिष्वक्तश्च पुण्येन वायुना पुण्यगन्धिना।
अचलं स्थानमासाद्य दौहित्रफलनिर्ज्जितं। कर्म्मभिः स्वैरुपचितो जज्वाल परया श्रिया।
उपगीतोपनृत्तश्च गन्धर्व्वाप्सरसां गणैः। प्रीत्या प्रतिगृहीतश्च स्वर्गे दुन्दुभिनिस्वनैः। ४१००
अभिष्टुतश्च विविधैर्देवराजर्षिचारणैः। अर्च्चितश्चोत्तमार्घ्येण दैवतैरभिनन्दितः।
प्राप्तः स्वर्गफलञ्चैव तमुवाच पितामहः। निर्वृतं शान्तमनसं वचोभिस्तर्पयन्निव।
चतुष्पादस्त्वया धर्म्मश्चितो लोक्येन कर्म्मणा। अक्षयस्तव लोकोऽयं कीर्त्तिश्चैवाक्षया दिवि।
पुनस्त्वयैव राजर्षे सुकृतेन विघातितं। आवृतं तमसा चेतः सर्व्वेषां स्वर्गवासिनां।
येन त्वां नाभिजानन्ति ततोऽज्ञातोऽसि पातितः। प्रीत्यैव चासि दौहित्रैस्तारितस्त्वमिहागतः। ४१०५
स्थानञ्च प्रतिपन्नोऽसि कर्म्मणा स्वेन निर्ज्जितं। अचलं शाश्वतं पुण्यमुत्तमं ध्रुवमव्ययं।
॥ययातिरुवाच॥ भगवन् संशयो मेऽस्ति कश्चित्तं छेत्तुमर्हसि। न त्वन्यमहमर्हामि प्रष्टुं लोकपितामह।
बहुवर्षसहस्रान्तं प्रजापालनवर्द्धितं। अनेकक्रतुदानौघैरर्ज्जितं मे महत्फलं।
कथं तदल्पकालेन क्षीणं येनास्मि पातितः। भगवन् वेत्थ लोकांश्च शाश्वतान् मम निर्म्मितान्।
कथं नु मम तत् सर्व्वं विप्रनष्टं महाद्युते। ४११०
॥ पितामह उवाच॥ बहुवर्षसहस्रान्तं प्रजापालनवर्द्धितं। अनेकक्रतुदानौघैर्यत्त्वयोपार्ज्जितं फलं।
तदनेनैव दोषेण क्षीणं येनासि पातितः। अभिमानेन राजेन्द्र धिक्कृतः स्वर्गवासिभिः।
नायं मानेन राजर्षे न बलेन न हिंसया। न शाठ्येन न मायाभिर्लोको भवति शाश्वतः।
नावमान्यास्त्वया राजन्नधमोत्कृष्टमध्यमाः। न हि मानप्रदग्धानां कश्चिदस्ति समः क्वचित्।
पतनारोहणमिदं कथयिष्यन्ति ये नराः। विषमाण्यपि ते प्राप्तास्तरिष्यन्ति न संशयः। ४११५
॥ नारद उवाच॥ एष दोषोऽभिमानेन पुरा प्राप्तो ययातिना। निर्ब्बन्धताऽतिमात्रञ्च गालवेन महीपते।
श्रोतव्यं हितकामानां सुहृदां हितमिच्छता। न कर्त्तव्यो हि निर्ब्बन्धो निर्ब्बन्धो हि क्षयोदयः।
तस्मात्त्वमपि गान्धारे मानं क्रोधञ्च वर्ज्जय। सन्धत्स्व पाण्डवैर्वीर संरम्भं त्यज पार्थिव।
ददाति यत् पार्थिव यत् करोति यद्वा तपस्तप्यति यज्जुहोति। न तस्य नाशोऽस्ति न चापकर्षो नान्यस्तदश्नाति स एव कर्त्ता।
इदं महाख्यानमनुत्तमं हितं बहुश्रुतानां गतरोषरागिणां। समीक्ष्य लोके बहुधा प्रधारितं त्रिवर्गदृष्टिः पृथिवीमुपाश्नुते। ४१२०

इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि ययातिस्वर्गारोहणे द्वाविंशत्यधिकशततमोऽध्यायः ॥ १२२ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ धृतराष्ट्र उवाच ॥ भगवन्नेवमेवैतत् यथा वदसि नारद। इच्छामि चाहमप्येवं न त्वीशो भगवन्नहं।
॥ वैशम्पायन उवाच ॥ एवमुक्त्वा ततः कृष्णमभ्यभाषत कौरवः। स्वर्ग्यं लोकञ्च मामात्थ धर्म्म्यं न्याय्यञ्च केशव।
न त्वहं स्ववशस्तात क्रियमाणं न मे प्रियं। अङ्ग दुर्य्योधनं कृष्ण मन्दं शास्त्रातिगं मम।
अनुनेतुं महाबाहो यतस्व पुरुषोत्तम। न शृणोति महाबाहो वचनं साधु भाषितं।
गान्धार्य्याश्च हृषीकेश विदुरस्य च धीमतः। अन्येषाञ्चैव सुहृदां भीष्मादीनां हितैषिणां। ४१२५
स त्वं पापमतिं क्रूरं पापचित्तमचेतनं। अनुशाधि दुरात्मानं स्वयं दुर्य्योधनं नृपं।
सुहृत्कार्य्यन्तु सुमहत् कृतन्ते स्याज्जनार्द्दन।
॥ वैशम्पायन उवाच ॥ ततोऽभ्यावृत्य वार्ष्णेयो दुर्य्योधनममर्षणं। अब्रवीन्मधुरां वाचं सर्व्वधर्म्मार्थतत्त्ववित्।
दुर्य्योधन निबोधेदं मद्वाक्यं कुरुसत्तम। शमार्थं ते विशेषेण सानुबन्धस्य भारत।
महाप्राज्ञकुले जातः साध्वेतत् कर्त्तुमर्हसि। श्रुतवृत्तोपसम्पन्नः सर्व्वैः समुदितो गुणैः। ४१३०
दौष्कुलेया दुरात्मानो नृशंसा निरपत्रपाः। त एतदीदृशं कुर्य्युर्यथा त्वं तात मन्यसे।
धर्म्मार्थयुक्ता लोकेऽस्मिन् प्रवृत्तिर्लक्ष्यते सतां। असतां विपरीता तु लक्ष्यते भरतर्षभ।
विपरीता त्वियं वृत्तिरसकृल्लक्ष्यते त्वयि। अधर्म्मश्चानुबन्धोऽत्र घोरः प्राणहरो महान्।
अनिष्टश्चानिमित्तश्च न च शक्यश्च भारत। तमनर्थं परिहरन्नात्मश्रेयः करिष्यसि।
भ्रातृणामथ भृत्यानां मित्राणाञ्च परन्तप। अधर्म्म्यादयशस्याच्च कर्म्मणस्त्वं प्रमोक्ष्यसे। ४१३५
प्राज्ञैः शूरैर्महोत्साहैरात्मवद्भिर्बहुश्रुतैः। सन्धत्स्व पुरुषव्याघ्र पाण्डवैर्भरतर्षभ।
तद्धितञ्च प्रियञ्चैव धृतराष्ट्रस्य धीमतः। पितामहस्य द्रोणस्य विदुरस्य महामतेः।
कृपस्य सोमदत्तस्य वाह्लीकस्य च धीमतः। अश्वत्थाम्नो विकर्णस्य सञ्जयस्य विविंशतेः।
ज्ञातीनाञ्चैव भूयिष्ठं मित्राणाञ्च परन्तप। शमे शर्म्म भवेत्तात सर्व्वस्य जगतस्तथा।
ह्रीमानसि कुले जातः श्रुतवाननृशंसवान्। तिष्ठ तात पितुः शास्त्रे मातुश्च भरतर्षभ। ४१४०
एतत् श्रेयो हि मन्यन्ते पिता यच्छास्ति भारत। उत्तमापद्गतः सर्व्वः पितुः स्मरति शासनं।
रोचते ते पितुस्तात पाण्डवैः सह सङ्गमः। सामात्यस्य कुरुश्रेष्ठ तत्तुभ्यं तात रोचतां।
श्रुत्वा यः सुहृदां शास्त्रं मर्त्यो न प्रतिपद्यते। विपाकान्ते दहत्येनं किम्पाकमिव भक्षितं।
यस्तु निःश्रेयसं वाक्यं मोहान्न प्रतिपद्यते। स दीर्घसूत्रो हीनार्थः पश्चात्तापेन युज्यते।
यस्तु निःश्रेयसं श्रुत्वा प्राक् तदेवाभिपद्यते। आत्मनो मतमुत्सृज्य स लोके सुखमेधते। ४१४५
योऽर्थकामस्य वचनं प्रातिकूल्यं न मृष्यते। शृणोति प्रतिकूलानि द्विषतां वशमेति सः।
सतां मतमतिक्रम्य योऽसतां वर्त्तते मते। शोचन्ते व्यसने तस्य सुहृदो न चिरादिव।
मुख्यानमात्यानुत्सृज्य यो निहीनान्निषेवते। स घोरामापदं प्राप्य नोत्तारमधिगच्छति।
योऽसत्सेवी वृथाचारो न श्रोता सुहृदां सतां। परान् वृणीते स्वान् द्वेष्टि तं गौस्त्यजति भारत।
स त्वं विरुध्य तैर्वीरैरन्येभ्यस्त्राणमिच्छसि। अशिष्टेभ्योऽसमर्थेभ्यो मूढेभ्यो भरतर्षभ। ४१५०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

को हि शक्रसमान् ज्ञातीनतिक्रम्य महारथान् । अन्येभ्यस्त्राणमाशंसेत्त्वदन्यो भुवि मानवः ।
जन्मप्रभृति कौन्तेया नित्यं विनिकृतास्त्वया । न च ते जातु कुप्यन्ति धर्म्मात्मानो हि पाण्डवाः ।
मिथ्योपचरितास्तात जन्मप्रभृति बान्धवाः । त्वयि सम्यङ्महाबाहो प्रतिपन्ना यशस्विनः ।
त्वयाऽपि प्रतिपत्तव्यं तथैव भरतर्षभ । स्वेषु बन्धुषु मुख्येषु मामन्युवशमन्वगाः ।
त्रिवर्गयुक्तः प्राज्ञानामारम्भो भरतर्षभ । धर्म्मार्थावनुरुध्यन्ते त्रिवर्गासम्भवे नराः । ४१५५
पृथक् च विनिविष्टानां धर्म्मं धीरोऽनुरुध्यते । मध्यमोऽर्थं कलिं बालः काममेवानुरुध्यते ।
इन्द्रियैः प्राकृतो लोभाद्धर्म्मं विप्रजहाति यः । कामार्थावनुपायेन लिप्समानो विनश्यति ।
कामार्थौ लिप्समानस्तु धर्म्ममेवादितश्चरेत् । न हि धर्म्मादपैत्यर्थः कामो वाऽपि कदाचन ।
उपायं धर्म्ममेवाहुस्त्रिवर्गस्य विशाम्पते । लिप्समानो हि तेनाशु कक्षेऽग्निरिव वर्द्धते ।
स त्वं तातानुपायेन लिप्ससे भरतर्षभ । आधिराज्यं महद्दीप्तं प्रथितं सर्व्वराजसु । ४१६०
आत्मानं तक्षति ह्येष वनं परशुना यथा । यः सम्यग्वर्त्तमानेषु मिथ्या राजन् प्रवर्त्तते ।
न तस्य हि मतिं छिन्द्यात् यस्य नेच्छेत् पराभवं । अविच्छिन्नमतेरस्य कल्याणे धीयते मतिः ।
आत्मवान्नावमन्येत त्रिषु लोकेषु भारत । अप्यन्यं प्राकृतं किञ्चित् किमु तान् पाण्डवर्षभान् ।
अमर्षवशमापन्नो न किञ्चिद्बुध्यते जनः । छिद्यते ह्याततं सर्व्वं प्रमाणं पश्य भारत ।
श्रेयस्ते दुर्ज्जनात्तात पाण्डवैः सह सङ्गतं । तैर्हि सम्प्रीयमाणस्त्वं सर्व्वान् कामानवाप्स्यसि । ४१६५
पाण्डवैर्निर्ज्जितां भूमिं भुञ्जानो राजसत्तम । पाण्डवान् पृष्ठतः कृत्वा त्राणमाशंससेऽन्यतः ।
दुःशासने दुर्व्विषहे कर्णे चापि ससौबले । एतेष्वैश्वर्य्यमाधाय भूतिमिच्छसि भारत ।
न चैते तव पर्य्याप्ता ज्ञाने धर्म्मार्थयोस्तथा । विक्रमे चाप्यपर्य्याप्ताः पाण्डवान् प्रति भारत ।
न हीमे सर्व्वराजानः पर्य्याप्ताः सहितास्तथा । क्रुद्धस्य भीमसेनस्य प्रेक्षितुं मुखमाहवे ।
इदं सन्निहितं तात समग्रं पार्थिवं बलं । अयं भीष्मस्तथा द्रोणः कर्णश्चायं तथा कृपः । ४१७०
भूरिश्रवाः सौमदत्तिरश्वत्थामा जयद्रथः । अशक्ताः सर्व्व एवैते प्रतियोद्धुं धनञ्जयं ।
अजेयो ह्यर्ज्जुनः संख्ये सर्व्वैरपि सुरासुरैः । मानुषैरपि गन्धर्व्वैर्म्मा युद्धे चेत आधिथाः ।
दृश्यतां वा पुमान् कश्चित् समग्रे पार्थिवे बले । योऽर्ज्जुनं समरे प्राप्य स्वस्तिमानाव्रजेत् गृहान् ।
किन्ते जनक्षयेणेह कृतेन भरतर्षभ । यस्मिन् जिते जितं ते स्यात् पुमानेकः स दृश्यतां ।
यः स देवान् सगन्धर्व्वान् सयक्षासुरपन्नगान् । अजयत् खाण्डवप्रस्थे कस्तं युद्ध्येत पाण्डवं । ४१७५
तथा विराटनगरे श्रूयते महदद्भुतं । एकस्य च बहूनाञ्च पर्य्याप्तं तन्निदर्शनं ।
युद्धे येन महादेवः साक्षात् सन्तोषितः शिवः । तमजेयमनाधृष्यं विजेतुं जिष्णुमच्युतं ।
आशंससीह समरे वीरमर्ज्जुनमूर्ज्जितं । मद्द्वितीयं पुनः पार्थं कः प्रार्थयितुमर्हति ।
युद्धे प्रतीपमायान्तमपि साक्षात् पुरन्दरः । बाहुभ्यामुद्धरेत् भूमिं दहेत् क्रुद्ध इमाः प्रजाः ।
पातयेत् त्रिदिवाद्देवान् योऽर्ज्जुनं समरे जयेत् । पश्य पुत्रांस्तथा भ्रातॄन् ज्ञातीन् सम्बन्धिनस्तथा । ४१८०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

त्वत्कृते न विनश्येयुरिमे भरतसत्तमाः । अस्तुशेषं कौरवाणां मा पराभूदिदं कुलं ।
कुलघ्न इति नोच्येथा नष्टकीर्त्तिर्नराधिप । त्वामेव स्थापयिष्यन्ति यौवराज्ये महारथाः ।
महाराज्येऽपि पितरं धृतराष्ट्रं जनेश्वरं । मा तात श्रियमायान्तीमवमंस्थाः समुद्यतां ।
अर्द्धं प्रदाय पार्थेभ्यो महतीं श्रियमाप्नुहि । पाण्डवैः सङ्गमं कृत्वा कृत्वा च सुहृदां वचः ।
संप्रीयमाणो मित्रैश्च चिरं भद्राण्यवाप्स्यसि ।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि भगवद्वाक्ये त्रयोविंशत्यधिकशततमोऽध्यायः ॥ १२३ ॥ ४१८९
॥ वैशम्पायन उवाच ॥ ततः शान्तनवो भीष्मो दुर्य्योधनममर्षणं । केशवस्य वचः श्रुत्वा प्रोवाच भरतर्षभ ।
कृष्णेन वाक्यमुक्तोऽसि सुहृदां शममिच्छता । अन्वपद्यस्व तत्तात मा मन्युवशमन्वगाः ।
अकृत्वा वचनं तात केशवस्य महात्मनः । श्रेयो न जातु न सुखं न कल्याणमवाप्स्यसि ।
धर्म्यमर्थ्यं महाबाहुराह त्वां तात केशवः । तदर्थमभिपद्यस्व मा राजन्नीनशः प्रजाः ।
ज्वलितां त्वमिमां लक्ष्मीं भारतीं सर्व्वराजसु । जीवतो धृतराष्ट्रस्य दौरात्म्यात् भ्रंशयिष्यसि । ४१९०
आत्मानञ्च सहामात्यं सपुत्त्रभ्रातृबान्धवं । अहमित्यनया बुद्ध्या जीवितात् भ्रंशयिष्यसि ।
अतिक्रामन् केशवस्य तथ्यं वचनमर्थवत् । पितुश्च भरतश्रेष्ठ विदुरस्य च धीमतः ।
मा कुलघ्नः कुपुरुषो दुर्म्मतिः कापथङ्गमः । मातरं पितरञ्चैव मा मज्जीः शोकसागरे ।
अथ द्रोणोऽब्रवीत्तत्र दुर्य्योधनमिदं वचः । अमर्षवशमापन्नं निःश्वसन्तं पुनः पुनः ।
धर्म्मार्थयुक्तं वचनमाह त्वां तात केशवः । तथा भीष्मः शान्तनवस्तज्जुषस्व नराधिप । ४१९५
प्राज्ञौ मेधाविनौ दान्तावर्थकामौ बहुश्रुतौ । आहतुस्त्वां हितं वाक्यं तज्जुषस्व नराधिप ।
अनुतिष्ठ महाप्राज्ञ कृष्णभीष्मौ यदूचतुः । माधवं बुद्धिमोहेन माऽवमंस्थाः परन्तप ।
ये त्वां प्रोत्साहयन्त्येते नैते कृत्याय कर्हिचित् । वैरं परेषां ग्रीवायां प्रतिमोक्ष्यन्ति संयुगे ।
माजीघनः प्रजाः सर्व्वाः पुत्त्रान् भ्रातॄंस्तथैव च । वासुदेवार्ज्जुनौ यत्र विद्ध्यजेयं बलं हि तत् ।
एतच्चैव मतं सत्यं सुहृदोः कृष्णभीष्मयोः । यदि नादास्यसे तात पश्चात्तप्स्यसि भारत । ४२००
यथोक्तं जामदग्न्येन भूयानेष ततोऽर्ज्जुनः । कृष्णो हि देवकीपुत्त्रो देवैरपि सुदुःसहः ।
किन्ते सुखप्रियेणेह प्रोक्तेन भरतर्षभ । एतत्ते सर्व्वमाख्यातं यथेच्छसि तथा कुरु ।
न हि त्वामुत्सहे वक्तुं भूयो भरतसत्तम ।
॥ वैशम्पायन उवाच ॥ तस्मिन् वाक्यान्तरे वाक्यं क्षत्ताऽपि विदुरोऽब्रवीत् । दुर्य्योधनमभिप्रेक्ष्य धार्त्तराष्ट्रममर्षणं ।
दुर्य्योधन न शोचामि त्वामहं भरतर्षभ । इमौ तु वृद्धौ शोचामि गान्धारीं पितरञ्च ते । ४२०५
यावनाथौ चरिष्येते त्वया नाथेन दुर्हृदा । हतमित्रौ हतामात्यौ लूनपक्षाविवाण्डजौ ।
भिक्षुकौ विचरिष्येते शोचन्तौ पृथिवीमिमां । कुलघ्नमीदृशं पापं जनयित्वा कुपूरुषं ।
अथ दुर्य्योधनं राजा धृतराष्ट्रोऽभ्यभाषत । आसीनं भ्रातृभिः सार्द्धं राजभिः परिवारितं ।
दुर्य्योधन निबोधेदं शौरिणोक्तं महात्मना । आददस्व शिवमत्यन्तं योगक्षेममवव्ययं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust-Funding IKS-MoE-Grant-2 Equipment-Heritage Foundation, Jalgaon

अनेन हि सहायेन कृष्णेनाक्लिष्टकर्म्मणा। इष्टान् सर्व्वानभिप्रायान् प्राप्स्यामः सर्व्वराजसु। ४२१०
सुसंहितः केशवेन तात गच्छ युधिष्ठिरं। चर स्वस्त्ययनं कृत्स्नं भरतानामनामयं।
वासुदेवेन तीर्थेन तात गच्छस्व संशमं। कालप्राप्तमिदं मन्ये मा त्वं दुर्य्योधनातिगाः।
शमञ्चेत् याचमानं त्वं प्रत्याख्यास्यसि केशवं। त्वदर्थमभिजल्पन्तं न तवास्त्यपराभवः।

इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि धृतराष्ट्रवाक्ये चतुर्विंशत्यधिकशततमोऽध्यायः॥ १२४ ॥

॥ वैशम्पायन उवाच ॥ धृतराष्ट्रवचः श्रुत्वा भीष्मद्रोणौ समव्यथौ। दुर्य्योधनमिदं वाक्यमूचतुः शासनातिगं।
यावत् कृष्णावसंनद्धौ यावत्तिष्ठति गाण्डिवं। यावद्धौम्यो न सेधाग्नौ जुहोतीह द्विषद्बलं। ४२१५
यावन्न प्रेक्षते क्रुद्धः सेनां तव युधिष्ठिरः। ह्रीनिषेवो महेष्वासस्तावच्छाम्यतु वैशसं।
यावन्न दृश्यते पार्थः स्वेष्वनीकेष्ववस्थितः। भीमसेनो महेष्वासस्तावच्छाम्यतु वैशसं।
यावन्नो चरते मार्गान् पृतनामभिधर्षयन्। भीमसेनो गदापाणिस्तावच्छाम्यतु पाण्डवैः।
यावन्न शातयत्याजौ शिरांसि गजयोधिनां। गदया वीरघातिन्या फलानीव वनस्पतेः।
कालेन परिपक्वानि तावच्छाम्यतु वैशसं। नकुलः सहदेवश्च धृष्टद्युम्नश्च पार्षतः। ४२२०
विराटश्च शिखण्डी च शैशुपालिश्च दंशितः। यावन्न प्रविशन्त्येते नक्रा इव महार्णवं।
कृतास्त्राः क्षिप्रमस्यन्तस्तावच्छाम्यतु वैशसं। यावन्न सुकुमारेषु शरीरेषु महीक्षितां।
गार्द्ध्रपत्राः पतन्त्युग्रास्तावच्छाम्यतु वैशसं। चन्दनागुरुदिग्धेषु हारनिष्कधरेषु च।
नोरःसु यावत् योधानां महेष्वासैर्म्महेषवः। कृतास्त्रैः क्षिप्रमस्यद्भिर्दूरपातिभिरायसाः।
अभिलक्ष्यैर्निपात्यन्ते तावच्छाम्यतु वैशसं। अभिवादयमानं त्वां शिरसा राजकुञ्जरः। ४२२५
पाणिभ्यां प्रतिगृह्णातु धर्म्मराजो युधिष्ठिरः। ध्वजाङ्कुशपताकाङ्कं दक्षिणं ते सुदक्षिणः।
स्कन्धे निक्षिपतां बाहुं शान्तये भरतर्षभ। रत्नौषधिसमेतेन रत्नाङ्गुलितलेन च।
उपविष्टस्य पृष्ठन्ते पाणिना परिमार्ज्जतु। शालस्कन्धो महाबाहुस्त्वां स्वजानो वृकोदरः।
साम्नाऽभिवदताञ्चापि शान्तये भरतर्षभ। अर्ज्जुनेन यमाभ्याञ्च त्रिभिस्तैरभिवादितः।
मूर्द्ध्नि तान् समुपाघ्राय प्रेम्णाऽभिवद पार्थिव। दृष्ट्वा त्वां पाण्डवैर्वीरैर्भ्रातृभिः सह सङ्गतं। ४२३०
यावदानन्दजाश्रूणि प्रमुञ्चन्तु नराधिपाः। घुष्यतां राजधानीषु सर्व्वसम्पन्महीक्षितां।
पृथिवी भ्रातृभावेन भुज्यतां विज्वरो भव।

इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि भीष्मद्रोणवाक्ये पञ्चविंशत्यधिकशततमोऽध्यायः ॥ १२५ ॥

॥ वैशम्पायन उवाच ॥ श्रुत्वा दुर्य्योधनो वाक्यमप्रियं कुरुसंसदि। प्रत्युवाच महाबाहुं वासुदेवं यशस्विनं।
प्रसमीक्ष्य भवानेतद्वक्तुमर्हति केशव। मामेव हि विशेषेण विभाष्य परिगर्हसे।
भक्तिवादेन पार्थानामकस्मान्मधुसूदन। भवान् गर्हयते नित्यं किं समीक्ष्य बलाबलं। ४२३५
भवान् क्षत्ता च राजा वाऽप्याचार्य्यो वा पितामहः। मामेव परिगर्हन्ते नान्यं कञ्चन पार्थिवं।
नचाहं लक्षये कञ्चिद्व्यभिचारमिहात्मनः। अथ सर्व्वे भवन्तो मां विद्विषन्ति सराजकाः।

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

न चाहं कञ्चिदत्यर्थमपराधमरिन्दम । विचिन्तयन् प्रपश्यामि सुसूक्ष्ममपि केशव ।
प्रियाभ्युपगते द्यूते पाण्डवा मधुसूदन । जिताः शकुनिना राज्यं तत्र किं मम दुष्कृतं ।
यत् पुनर्द्रविणं किञ्चित्तत्राजीयन्त पाण्डवाः । तेभ्य एवाभ्यनुज्ञातं तत्तदा मधुसूदन ।
अपराधो न चास्माकं यत्ते ह्यक्षैः पराजिताः । अजेया जयतां श्रेष्ठ पार्थाः प्रव्रजिता वनं ।
केन वाऽप्यपवादेन विरुध्यन्त्यरिभिः सह । अशक्ताः पाण्डवाः कृष्ण प्रहृष्टाः प्रत्यमित्रवत् ।
किमस्माभिः कृतं तेषां कस्मिन् वा पुनरागसि । धार्त्तराष्ट्रान् जिघांसन्ति पाण्डवाः सृञ्जयैः सह ।
न चापि वयमुग्रेण कर्म्मणा वचनेन वा । प्रभ्रष्टाः प्रणमामेह भयादपि शतक्रतुं ।
न च तं कृष्ण पश्यामि क्षत्त्रधर्म्ममनुष्ठितं । उत्सहेत युधा जेतुं यो नः शत्रुनिवर्हणः ।
न हि भीष्मकृपद्रोणाः सकर्णा मधुसूदन । देवैरपि युधा जेतुं शक्याः किमुत पाण्डवैः ।
स्वधर्म्ममनुपश्यन्तो यदि माधव संयुगे । अस्त्रेण निधनङ्काले प्राप्स्यामः स्वर्गमेव तत् ।
मुख्यश्चैवैष नो धर्म्मः क्षत्त्रियाणां जनार्द्दन । यच्छयीमहि सङ्ग्रामे शरतल्पगता वयं ।
ते वयं वीरशयनम्प्राप्स्यामो यदि संयुगे । अप्रणम्यैव शत्रूणां न नस्तप्स्यति माधव ।
कश्च जातु कुले जातः क्षत्त्रधर्म्मेण वर्त्तयन् । भयाद्वृत्तिं समीक्ष्यैव प्रणमेदिह कर्हिचित् ।
उद्यच्छेदेव न नमेदुद्यमो ह्येव पौरुषं । अप्यपर्व्वणि भज्येत न नमेदिह कर्हिचित् ।
इति मातङ्गवचनं परीप्सन्ति हितेप्सवः । धर्म्माय चैव प्रणमेद्ब्राह्मणेभ्यश्च मद्विधः ।
अचिन्तयन् किञ्चिदन्यं यावज्जीवन्तथाचरेत् । एष धर्म्मः क्षत्त्रियाणां मतमेतच्च मे सदा ।
राज्यांशश्चाभ्यनुज्ञातो यो मे पित्रा पुराऽभवत् । न स लभ्यः पुनर्जातु मयि जीवति केशव ।
यावच्च राजा ध्रियते धृतराष्ट्रो जनार्द्दन । न्यस्तशस्त्रा वयं ते वाऽप्युपजीवाम माधव ।
अप्रदेयं पुरा दत्तं राज्यं परवतो मम । अज्ञानाद्वा भयाद्वापि मयि बाले जनार्द्दन ।
न तदद्य पुनर्लभ्यं पाण्डवैर्वृष्णिनन्दन । ध्रियमाणे महाबाहो मयि सम्प्रति केशव ।
यावद्धि तीक्ष्णया सूच्या विध्येदग्रेण केशव । तावदप्यपरित्याज्यं भूमेर्नः पाण्डवान् प्रति ।
इतिश्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि दुर्य्योधनवाक्ये षड्विंशत्यधिकशततमोऽध्यायः ॥ १२६ ॥
॥ वैशम्पायन उवाच ॥ ततः प्रहस्य दाशार्हः क्रोधपर्य्याकुलेक्षणः । दुर्य्योधनमिदं वाक्यमब्रवीत् कुरुसंसदि ।
लप्स्यसे वीरशयनं काममेतदवाप्स्यसि । स्थिरो भव सहामात्यो विमर्द्दो भविता महान् ।
यच्चैवं मन्यसे मूढ न मे कश्चित् व्यतिक्रमः । पाण्डवेष्विति तत् सर्व्वं निबोधत नराधिपाः ।
श्रिया सन्तप्यमानेन पाण्डवानां महात्मनां । त्वया दुर्म्मन्त्रितं द्यूतं सौबलेन च भारत ।
कथञ्च ज्ञातयस्तात श्रेयांसः साधु सम्मताः । अथान्याय्यमुपस्थातुं जिह्मेनाजिह्मचारिणः ।
अक्षद्यूतं महाप्राज्ञ सतां मतिविनाशनं । असतां तत्र जायन्ते भेदाश्च व्यसनानि च ।
तदिदं व्यसनं घोरं त्वया द्यूतमुखं कृतं । असमीक्ष्य सदाचारैः सार्द्धं पापानुबन्धनैः ।
कश्चान्यो भ्रातृभार्य्यां वै विप्रकर्त्तुं तथाऽर्हति । आनीय च सभां व्यक्तां यथोक्ता द्रौपदी त्वया ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कुलीना शीलसम्पन्ना प्राणेभ्योऽपि गरीयसी । महिषी पाण्डुपुत्त्राणां तथा विनिकृता त्वया ।
जानन्ति कुरवः सर्व्वे यथोक्ताः कुरुसंसदि । दुःशासनेन कौन्तेयाः प्रव्रजन्तः परन्तपाः ।
सम्यग्वृत्तेष्वलुब्धेषु सततं धर्म्मचारिषु । स्वेषु बन्धुषु कः साधुश्चरेदेवमसाम्प्रतं ।
नृशंसानामनार्य्याणां पुरुषाणाञ्च भाषणं । कर्णदुःशासनाभ्याञ्च त्वया च बहुशः कृतं । ४२७०
सह मात्रा प्रदग्धुन्तान् बालकान् वारणावते । आस्थितः परमं यत्नं न समृद्धञ्च तत्तव ।
ऊषुश्च सुचिरं कालं प्रच्छन्नाः पाण्डवास्तदा । मात्रा सहैकचक्रायां ब्राह्मणस्य निवेशने ।
विषेण सर्पबन्धैश्च यतिताः पाण्डवास्त्वया । सर्व्वोपायैर्विनाशाय न समृद्धञ्च तत्तव ।
एवंबुद्धिः पाण्डवेषु मिथ्यावृत्तिः सदा भवान् । कथन्ते नापराधोऽस्ति पाण्डवेषु महात्मसु ।
यच्चैभ्यो याचमानेभ्यः पित्र्यमंशं न दित्ससि । तच्च पाप प्रदातासि भ्रष्टैश्वर्य्यो निपातितः । ४२७५
कृत्वा बह्वन्यकर्म्माणि पाण्डवेषु नृशंसवत् । मिथ्यावृत्तिरनार्य्यः सन्नद्य विप्रतिपद्यसे ।
मातापितृभ्यां भीष्मेण द्रोणेन विदुरेण च । शाम्येति मुहुरुक्तोऽसि न च शाम्यसि पार्थिव ।
शमे हि सुमहाल्लाभस्तव पार्थस्य चोभयोः । न च रोचयसे राजन् किमन्यत् बुद्धिलाघवात् ।
न शर्म्म प्राप्स्यसे राजन्नुत्क्रम्य सुहृदां वचः । अधर्म्यमयशस्यञ्च क्रियते पार्थिव त्वया ।
॥ वैशम्पायन उवाच ॥ एवं ब्रुवति दाशार्हे दुर्य्योधनममर्षणं । दुःशासन इदं वाक्यमब्रवीत् कुरुसंसदि । ४२८०
न चेत् सन्धास्यते राजन् स्वेन कामेन पाण्डवैः । बद्ध्वा किल त्वां दास्यन्ति कुन्तीपुत्त्राय कौरवाः ।
वैकर्त्तनं त्वाञ्च माञ्च त्रीनेतान्मनुजर्षभ । पाण्डवेभ्यः प्रदास्यन्ति भीष्मो द्रोणः पिता च ते ।
॥ वैशम्पायन उवाच ॥ भ्रातुरेतद्वचः श्रुत्वा धार्त्तराष्ट्रः सुयोधनः । क्रुद्धः प्रातिष्ठितोत्थाय महानाग इव श्वसन् ।
विदुरं धृतराष्ट्रञ्च महाराजञ्च वाह्लिकं । कृपञ्च सोमदत्तञ्च भीष्मं द्रोणं जनार्द्दनं ।
सर्व्वानेतानानादृत्य दुर्म्मतिर्निरपत्रपः । अशिष्टवदमर्य्यादो मानी मान्यावमानिता । ४२८५
तं प्रस्थितमभिप्रेक्ष्य भ्रातरो मनुजर्षभं । अनुजग्मुः सहामात्या राजानश्चापि सर्व्वशः ।
सभायामुत्थितं क्रुद्धं प्रस्थितं भ्रातृभिः सह । दुर्य्योधनमभिप्रेक्ष्य भीष्मः शान्तनवोऽब्रवीत् ।
धर्म्मार्थावभिसंत्यज्य संरम्भं योऽनुमन्यते । हसन्ति व्यसने तस्य दुर्हृदो न चिरादिव ।
दुरात्मा राजपुत्त्रोऽयं धार्त्तराष्ट्रोऽनुपायवित् । मिथ्याभिमानी राज्यस्य क्रोधलोभवशानुगः ।
कालपक्वमिदं मन्ये सर्व्वक्षत्त्रं जनार्द्दन । सर्व्वे ह्यनुसृता मोहात् पार्थिवाः सह मन्त्रिभिः । ४२९०
भीष्मस्याथ वचः श्रुत्वा दाशार्हः पुष्करेक्षणः । भीष्मद्रोणमुखान् सर्व्वानभ्यभाषत वीर्य्यवान् ।
सर्व्वेषां कुरुवृद्धानां महानयमतिक्रमः । प्रसह्य मन्दमैश्वर्य्ये न नियच्छत यन्नृपं ।
तत्र कार्य्यमहं मन्ये कालप्राप्तमरिन्दमाः । क्रियमाणे भवेत् श्रेयस्तत्सर्व्वं शृणुतानघाः ।
प्रत्यक्षमेतत् भवतां यद्वक्ष्यामि हितं वचः । भवतामानुकूल्येन यदि रोचेत भारताः ।
भोजराजस्य वृद्धस्य दुराचारो ह्यनात्मवान् । जीवतः पितुरैश्वर्य्यं हृत्वा मृत्युवशङ्गतः । ४२९५
उग्रसेनसुतः कंसः परित्यक्तः स्वबान्धवैः । ज्ञातीनां हितकामेन मया शस्तो महामृधे ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

आहुकः पुनरस्माभिर्ज्ञातिभिश्चापि सत्कृतः। उग्रसेनः कृतो राजा भोजराज्यस्य वर्द्धनः।
कंसमेकं परित्यज्य कुलार्थे सर्व्वयादवाः। सम्भूय सुखमेधन्ते भारतान्धकवृष्णयः।
अपि चाप्यवदद्राजन् परमेष्ठी प्रजापतिः। व्यूढे देवासुरे युद्धेऽभ्युद्यतेष्वायुधेषु च।
द्वैधीभूतेषु लोकेषु विनश्यत्सु च भारत। अब्रवीत् सृष्टिमान् देवो भगवान् लोकभावनः। ४२००
पराभविष्यन्त्यसुरा दैतेया दानवैः सह। आदित्या वसवो रुद्रा भविष्यन्ति दिवौकसः।
देवासुरमनुष्याश्च गन्धर्व्वोरगराक्षसाः। अस्मिन् युद्धे सुसंक्रुद्धा हनिष्यन्ति परस्परं।
इति मत्वाऽब्रवीद्धर्म्मं परमेष्ठी प्रजापतिः। वरुणाय प्रयच्छैतान् बद्ध्वा दैतेयदानवान्।
एवमुक्तस्ततो धर्म्मो नियोगात् परमेष्ठिनः। वरुणाय ददौ सर्व्वान् बद्ध्वा दैतेयदानवान्।
तान् बद्ध्वा धर्म्मपाशैश्च स्वैश्च पाशैर्जलेश्वरः। वरुणः सागरे यत्तो नित्यं रक्षति दानवान्। ४२०५
तथा दुर्य्योधनं कर्णं शकुनिञ्चापि सौवलं। बद्ध्वा दुःशासनं चापि पाण्डवेभ्यः प्रयच्छत।
त्यजेत् कुलार्थे पुरुषं ग्रामस्यार्थे कुलं त्यजेत्। ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्।
राजन् दुर्य्योधनं बद्ध्वा ततः संशाम्य पाण्डवैः। त्वत्कृते न विनश्येयुः क्षत्रियाः क्षत्रियर्षभ।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि श्रीकृष्णवाक्ये सप्तविंशत्यधिकशततमोऽध्यायः ॥ १२७ ॥
॥ वैशम्पायन उवाच ॥ कृष्णस्य तु वचः श्रुत्वा धृतराष्ट्रो जनेश्वरः। विदुरं सर्व्वधर्म्मज्ञं त्वरमाणोऽभ्यभाषत।
गच्छ तात महाप्राज्ञां गान्धारीं दीर्घदर्शिनीं। आनयेह तया सार्द्धमनुनेष्यामि दुर्म्मतिं। ४२१०
यदि साऽपि दुरात्मानं शमयेत् दुष्टचेतसं। अपि कृष्णस्य सुहृदस्तिष्ठेम वचने वयं।
अपि लोभाभिभूतस्य पन्थानमनुदर्शयेत्। दुर्ब्बुद्धेर्दुःसहायस्य समार्थं ब्रुवती वचः।
अपि नो व्यसनं घोरं दुर्य्योधनकृतं महत्। शमयेच्चिररात्राय योगक्षेमवदव्ययं।
राज्ञस्तु वचनं श्रुत्वा विदुरो दीर्घदर्शिनीं। आनयामास गान्धारीं धृतराष्ट्रस्य शासनात्।
॥ धृतराष्ट्र उवाच ॥ एष गान्धारि पुत्रस्ते दुरात्मा शासनातिगः। ऐश्वर्य्यलोभादैश्वर्य्यं जीवितञ्च प्रहास्यति। ४२१५
अशिष्टवदमर्य्यादः पापैः सह दुरात्मवान्। सभाया निर्गतो मूढो व्यतिक्रम्य सुहृद्वचः।
॥ वैशम्पायन उवाच ॥ सा भर्त्तुर्वचनं श्रुत्वा राजपुत्री यशस्विनी। अन्विच्छन्ती महत् श्रेयो गान्धारी वाक्यमब्रवीत्।
॥ गान्धार्य्युवाच ॥ आज्ञापय सुतं क्षिप्रं राज्यकामुकमातुरं। न हि राज्यमशिष्टेन शक्यं धर्म्मार्थलोपिना।
आप्नुमाप्तं तथाऽपीदमविनीतेन सर्व्वथा। त्वं ह्येवात्र भृशं गर्ह्यो धृतराष्ट्रः सुतप्रियः।
यो जानन् पापतामस्य तत्प्रज्ञामनुवर्त्तसे। स एष काममन्युभ्यां प्रलब्धो लोभमास्थितः। ४२२०
अशक्योऽद्य त्वया राजन् विनिवर्त्तयितुं बलात्। राष्ट्रप्रदाने मूढस्य बालिशस्य दुरात्मनः।
दुःसहायस्य लुब्धस्य धृतराष्ट्रोऽश्नुते फलं। कथं हि स्वजने भेदमुपेक्षेत महीपतिः।
भिन्नं हि स्वजनेन त्वां प्रहसिष्यन्ति शत्रवः। या हि शक्या महाराज साम्ना दानेन वा पुनः।
निस्तर्त्तुमापदः स्वेषु दण्डं कस्तत्र पातयेत्।
॥ वैशम्पायन उवाच ॥ शासनाद्धृतराष्ट्रस्य दुर्य्योधनममर्षणं। मातुश्च वचनात् क्षत्ता सभां प्रावेशयत् पुनः। ४२२५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स मातुर्वचनाकाङ्क्षी प्रविवेश पुनः सभां । अतिताम्रेक्षणः क्रोधान्निश्वसन्निव पन्नगः ।
तं प्रविष्टमभिप्रेक्ष्य पुत्त्रमुत्पथमास्थितं । विगर्हमाणा गान्धारी शमार्थं वाक्यमब्रवीत् ।
दुर्य्योधन निबोधेदं वचनं मम पुत्त्रक । हितं ते सानुबन्धस्य तथायत्यां सुखोदयं ।
दुर्य्योधन यदाह त्वां पिता भरतसत्तमः । भीष्मो द्रोणः कृपः चत्ता सुहृदां कुरु तद्वचः ।
भीष्मस्य तु पितुश्चैव मम चापचितिः कृता । भवेद्द्रोणमुखानाञ्च सुहृदां शाम्यता त्वया । ४२२०
न हि राज्यं महाप्राज्ञ स्वेन कामेन शक्यते । अवाप्तुं रक्षितुञ्चापि भोक्तुं भरतसत्तम ।
न ह्यवश्येन्द्रियो राज्यमश्नीयाद्दीर्घमन्तरं । विजितात्मा च मेधावी स राज्यमभिपालयेत् ।
कामक्रोधौ हि पुरुषमर्थेभ्यो व्यपकर्षतः । तौ तु शत्रू विनिर्ज्जित्य राजा विजयते महीं ।
लोकेश्वरप्रभुत्वं हि महदेतत् दुरात्मभिः । राज्यं नामेप्सितं स्थानं न शक्यमभिरक्षितुं ।
इन्द्रियाणि महत्प्रेप्सुर्नियच्छेदर्थधर्म्मयोः । इन्द्रियैर्नियतैर्बुद्धिर्वर्द्धते ऽग्निरिवेन्धनैः । ४२२५
अविधेयानि हीमानि व्यापादयितुमप्यलं । अविधेया इवादान्ता हयाः पथि कुसारथिं ।
अविजित्य य आत्मानममात्यान् विजिगीषते । अमित्रान् वाऽजितामात्यः सोऽवशः परिहीयते ।
आत्मानमेव प्रथमं द्वेषरूपेण योजयेत् । ततोऽमात्यानमित्रांश्च न मोघं विजिगीषते ।
वश्येन्द्रियं जितामात्यं धृतदण्डं विकारिषु । परीक्ष्य कारिणं धीरमत्यर्थं श्रीर्निषेवते ।
क्षुद्राक्षेणेव जालेन झषावपिहितावुभौ । कामक्रोधौ शरीरस्थौ प्रज्ञानं तौ विलुम्पतः । ४२४०
याभ्यां हि देवाः स्वर्यातुः स्वर्गस्य पिदधुर्म्मुखं । बिभ्यतोऽनुपरागस्य कामक्रोधौ स्म वर्द्धितौ ।
कामं क्रोधञ्च लोभञ्च दम्भं दर्पञ्च भूमिपः । सम्यग्विजेतुं यो वेद स महीमभिजायते ।
सततं विग्रहे युक्त इन्द्रियाणां भवेन्नृपः । ईप्सन्नर्थञ्च धर्म्मञ्च द्विषताञ्च पराभवं ।
कामाभिभूतः क्रोधाद्वा यो मिथ्या प्रतिपद्यते । स्वेषु चान्येषु वा तस्य न सहाया भवन्त्युत ।
एकीभूतैर्महाप्राज्ञैः शूरैररिनिबर्हणैः । पाण्डवैः पृथिवीं तात भोक्ष्यसे सहितः सुखी । ४२३५
यथा भीष्मः शान्तनवो द्रोणश्चापि महारथः । आहतुस्तात तत्सत्यमजेयौ कृष्णपाण्डवौ ।
प्रपद्यस्व महाबाहुं कृष्णमक्लिष्टकारिणं । प्रसन्नो हि सुखाय स्यादुभयोरेव केशवः ।
सुहृदामर्थकामानां यो न तिष्ठति शासने । प्राज्ञानां कृतविद्यानां स नरः शत्रुनन्दनः ।
न युद्धे तात कल्याणं न धर्म्मार्थौ कुतः सुखं । न चापि विजयो नित्यं मा युद्धे चेत आधिथाः ।
भीष्मेण हि महाप्राज्ञ पित्रा ते वाह्लिकेन च । दत्तोंऽशः पाण्डुपुत्त्राणां भेदात् भीतैररिन्दम । ४२५०
तस्य चैतत् प्रदानस्य फलमद्यानुपश्यसि, यद्भुङ्क्षे पृथिवीं कृत्स्नां शूरैर्निहितकण्टकां ।
प्रयच्छ पाण्डुपुत्त्राणां यथोचितमरिन्दम । यदीच्छसि सहामात्यो भोक्तुमर्द्धं महीमिमां ।
अलमर्द्धं पृथिव्यास्ते सहामात्यस्य जीवनं । सुहृदां वचने तिष्ठन् यशः प्राप्स्यसि भारत ।
श्रीमद्भिरात्मवद्भिस्तै र्बुद्धिमद्भिर्ज्जितेन्द्रियैः । पाण्डवैर्व्विग्रहस्तात भ्रंशयेन्महतः सुखात् ।
निगृह्य सुहृदां मन्युं शाधि राज्यं यथोचितं । स्वमंशं पाण्डुपुत्त्रेभ्यः प्रदाय भरतर्षभ । ४२५५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अलमङ्ग विकारोऽयं त्रयोदशसमाः कृतः । शमयैनं महाप्राज्ञ कामक्रोधसमेधितं ।
न चैव शक्तः पार्थानां यस्त्वमर्थमभीप्ससि । सूतपुत्रो दृढक्रोधो भ्राता दुःशासनश्च ते ।
भीष्मे द्रोणे कृपे कर्णे भीमसेने धनञ्जये । धृष्टद्युम्ने च संक्रुद्धे न स्युः सर्व्वाः प्रजाः ध्रुवं ।
अमर्षवशमापन्नो मा कुरूंस्तात जीघनः । एषा हि पृथिवी कृत्स्ना मागमत्त्वत् कृते वधं ।
यच्च त्वं मन्यसे मूढ भीष्मद्रोणकृपादयः । योत्स्यन्ते सर्व्वशक्त्येति नैतदद्योपपद्यते ।
समं हि राज्यं प्रीतिश्च स्थानं हि विदितात्मनां । पाण्डवेष्वथ युष्मासु धर्म्मस्त्वभ्यधिकस्ततः ।
राजपिण्डभयादेते यदि हास्यन्ति जीवितं । न हि शक्ष्यन्ति राजानं युधिष्ठिरमुदीक्षितुं ।
न लोभादर्थसम्पत्तिर्नराणामिह दृश्यते । तदलं तात लोभेन प्रशाम्य भरतर्षभ ।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि गान्धारीवाक्येऽष्टाविंशत्यधिकशततमोऽध्यायः ॥ १२८ ॥
॥ वैशम्पायन उवाच ॥ तत्तु वाक्यमनादृत्य सोऽर्थवन्मातृभाषितं । पुनः प्रतस्थे संरम्भात् सकाशमकृतात्मनां ।
ततः सभाया निर्गम्य मन्त्रयामास कौरवः । सौवलेन मताक्षेण राज्ञा शकुनिना सह ।
दुर्य्योधनस्य कर्णस्य शकुनेः सौवलस्य च । दुःशासनचतुर्थानामिदमासीद्विचेष्टितं ।
पुराऽयमस्मान् गृह्लाति क्षिप्रकारी जनार्द्दनः । सहितो धृतराष्ट्रेण राज्ञा शान्तनवेन च ।
वयमेव हृषीकेशं निगृह्लीम बलादिव । प्रसह्य पुरुषव्याघ्रमिन्द्रो वैरोचनिं यथा ।
श्रुत्वा गृहीतं वार्ष्णेयं पाण्डवा हतचेतसः । निरुत्साहा भविष्यन्ति भग्नदंष्ट्रा इवोरगाः ।
अयं ह्येषां महाबाहुः सर्व्वेषां शर्म्म वर्म्म च । अस्मिन् गृहीते वरदे ऋषभे सर्व्वसात्वतां ।
निरुद्यमा भविष्यन्ति पाण्डवाः सोमकैः सह । तस्माद्वयमिहैवैनं केशवं क्षिप्रकारिणं ।
क्रोशतो धृतराष्ट्रस्य बद्ध्वा योत्स्यामहे रिपून् । तेषां पापमभिप्रायं पापानां दुष्टचेतसां ।
इङ्गितज्ञः कविः क्षिप्रमन्वबुध्यत सात्यकिः । तदर्थमभिनिष्क्रम्य हार्द्दिक्येन सहास्थितः ।
अब्रवीत् कृतवर्म्माणं क्षिप्रं योजय वाहिनीं । व्यूढानीकः सभाद्वारमुपतिष्ठस्व दंशितः ।
यावदाख्याम्यहञ्चैतत् कृष्णायाक्लिष्टकारिणे । स प्रविश्य सभां वीरः सिंहो गिरिगुहामिव ।
आचष्ट तमभिप्रायं केशवाय महात्मने । धृतराष्ट्रन्ततश्चैव विदुरञ्चान्वभाषत ।
तेषामेतमभिप्रायमाचचक्षे स्मयन्निव । धर्म्मादर्थाच्च कामाच्च कर्म्म साधुविगर्हितं ।
मन्दाः कर्त्तुमिहेच्छन्ति न चावाप्यं कथञ्चन । पुरा विकुर्व्वते मूढाः पापात्मानः समागताः ।
धर्षिताः काममन्युभ्यां क्रोधलोभवशानुगाः । इमं हि पुण्डरीकाक्षं जिघृक्षन्त्यल्पचेतसः ।
पटेनाग्निं प्रज्वलितं यथा बाला यथा जडाः । सात्यकेस्तद्वचः श्रुत्वा विदुरो दीर्घदर्शिवान् ।
धृतराष्ट्रं महाबाहुमब्रवीत् कुरुसंसदि । राजन् परीतकालास्ते पुत्राः सर्व्वे परन्तप ।
अशक्यमयशस्यञ्च कर्त्तुं कर्म्म समुद्यताः । इमं हि पुण्डरीकाक्षमभिभूय प्रसह्य च ।
निग्रहीतुं किलेच्छन्ति सहिता वासवानुजं । इमं पुरुषशार्द्दूलमप्रधृष्यं दुरासदं ।
आसाद्य न भविष्यन्ति पतङ्गा इव पावकं । अयमिच्छन् हि तान् सर्व्वान् युध्यमानान् जनार्द्दनः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सिंहो नागानिव क्रुद्धो गमयेत् यमसादनं। न त्वयं निन्दितं कर्म्म कुर्य्यात् पापं कथञ्चन। ४३८५
न च धर्म्मादपक्रामेदच्युतः पुरुषोत्तमः। विदुरेणैवमुक्ते तु केशवो वाक्यमब्रवीत्।
धृतराष्ट्रमभिप्रेक्ष्य सुहृदां शृण्वतां मिथः। राजन्नेते यदि क्रुद्धा मां निगृह्णीयुरोजसा।
एते वा मामहं वैनाननुजानीहि पार्थिव। एतान् हि सर्व्वान् संरब्धान्नियन्तुमहमुत्सहे।
न चाहं निन्दितं कर्म्म कुर्य्यां पापं कथञ्चन। पाण्डवार्थे हि लुभ्यन्तः स्वार्थान् हास्यन्ति ते सुताः।
एते चेदेवमिच्छन्ति कृतकार्य्यो युधिष्ठिरः। अद्यैव ह्यहमेनांश्च ये चैनाननुभारत। ४३९०
निगृह्य राजन् पार्थेभ्यो दद्यां किं दुष्कृतं भवेत्। इदन्तु न प्रवर्त्तेयं निन्दितं कर्म्म भारत।
सन्निधौ ते महाराज क्रोधजं पापबुद्धिजं। एष दुर्य्योधनो राजन् यथेच्छति तथाऽस्तु तत्।
अहन्तु सर्व्वाननयाननुजानामि ते नृप। एतत् श्रुत्वा तु विदुरं धृतराष्ट्रोऽभ्यभाषत।
क्षिप्रमानय तं पापं राज्यलुब्धं सुयोधनं। सहमित्रं सहामात्यं ससोदर्य्यं सहानुगं।
शक्नुयां यदि पन्थानमवतारयितुं पुनः। ततो दुर्य्योधनं क्षत्ता पुनः प्रावेशयत् सभां। ४३९५
अकामं भ्रातृभिः सार्द्धं राजभिः परिवारितं। अथ दुर्य्योधनं राजा धृतराष्ट्रोऽभ्यभाषत।
कर्णदुःशासनाभ्याञ्च राजभिश्चाभिसंवृतं। नृशंस पापभूयिष्ठ क्षुद्रकर्म्मसहायवान्।
पापैः सहायैः संहत्य पापं कर्म्म चिकीर्षसि। अशक्यमयशस्यञ्च सद्भिश्चापि विगर्हितं।
यथा त्वादृशको मूढो व्यवस्येत् कुलपांसनः। त्वमिमं पुण्डरीकाक्षमप्रधृष्यं दुरासदं।
पापैः सहायैः संहत्य निग्रहीतुं चिकीर्षसि। यो न शक्यो बलाद्धर्त्तुं देवैरपि सवासवैः। ४४००
तं त्वं प्रार्थयसे मन्द बालश्चन्द्रमसं यथा। देवैर्म्मनुष्यैर्गन्धर्व्वैरसुरैरुरगैश्च यः।
न सोढुं समरे शक्यस्तं न बुध्यसि केशवं। दुर्ग्राह्यः पाणिना वायुर्दुःस्पर्शः पाणिना शिखी।
दुर्द्धरा पृथिवी मूर्द्ध्ना दुर्ग्राह्यः केशवो बलात्। इत्युक्ते धृतराष्ट्रेण क्षत्ताऽपि विदुरोऽब्रवीत्।
दुर्य्योधनमभिप्रेक्ष्य धार्त्तराष्ट्रममर्षणं।
विदुर उवाच। दुर्य्योधन निबोधेदं वचनं मम साम्प्रतं। सौभद्वारे वानरेन्द्रो द्विविदो नाम नामतः। ४४०५
शिलावर्षेण महता छादयामास केशवं। ग्रहीतुकामो विक्रम्य सर्व्वयत्नेन माधवं।
ग्रहीतुं नाशकत्तत्र तं त्वं प्रार्थयसे बलात्। निर्म्मोचने षट्सहस्राः पाशैर्बद्ध्वा महासुराः।
ग्रहीतुं नाशकंश्चैनं तं त्वं प्रार्थयसे बलात्। प्राग्ज्योतिषगतं शौरिं नरकः सह दानवैः।
ग्रहीतुं नाशकत्तत्र तं त्वं प्रार्थयसे बलात्। अनेन हि हता बाल्ये पूतना शकुनी तथा।
गोवर्द्धनो धारितश्च गवार्थे भरतर्षभ। अरिष्टो धेनुकश्चैव चाणूरश्च महाबलः। ४४१०
अश्वराजश्च निहतः कंसश्चारिष्टमाचरन्। जरासन्धश्च वक्रश्च शिशुपालश्च वीर्य्यवान्।
बाणश्च निहतः सङ्ख्ये राजानश्च निषूदिताः। वरुणो निर्ज्जितो राजा पावकश्चामितौजसा।
पारिजातञ्च हरता जितः साक्षाच्छचीपतिः। अयं कर्त्ता न क्रियते कारणञ्चापि पौरुषे।
यद्यदिच्छेदयं शौरिस्तत्तत्कुर्य्यादयत्नतः। एकार्णवे च स्वपता निहतौ मधुकैटभौ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

जन्मान्तरमुपागम्य हयग्रीवस्तथा हतः। तं न बुध्यसि गोविन्दं घोरविक्रममच्युतं।
आशीविषमिव क्रुद्धं तेजोराशिमनिन्दितं। प्रधर्षयन्महाबाहुं कृष्णमक्लिष्टकारिणं। ४४१५
पतङ्गोऽग्निमिवासाद्य सामात्यो न भविष्यसि।

इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि विदुरवाक्ये एकोनत्रिंशदधिकशततमोऽध्यायः॥ १२९

॥ वैशम्पायन उवाच॥ विदुरेणैवमुक्तस्तु केशवः शत्रुपूगहा। दुर्य्योधनं धार्त्तराष्ट्रमभ्यभाषत वीर्य्यवान्।
एकोऽहमिति यन्मोहान्मन्यसे मां सुयोधन। परिभूय सुदुर्बुद्धे ग्रहीतुं मां चिकीर्षसि।
इहैव पाण्डवाः सर्व्वे तथैवान्धकवृष्णयः। इहादित्याश्च रुद्राश्च वसवश्च सहर्षिभिः। ४४२०
एवमुक्त्वा जहासोच्चैः केशवः परवीरहा। तस्य संस्मयतः शौरेर्व्विद्युद्रूपा महात्मनः।
अङ्गुष्ठमात्रास्त्रिदशा मुमुचुः पावकार्च्चिषः। अस्य ब्रह्मा ललाटस्थो रुद्रो वक्षसि चाभवत्।
लोकपाला भुजेष्वासन्नग्निरास्यादजायत। आदित्याश्चैव साध्याश्च वसवोऽथाश्विनावपि।
मरुतश्च सहेन्द्रेण विश्वे देवास्तथैव च। बभूवुश्चैकरूपाणि यक्षगन्धर्व्वरक्षसां।
प्रादुरास्तां तथा दोर्भ्यां सङ्कर्षणधनञ्जयौ। दक्षिणेऽथार्ज्जुनो धन्वी हली रामश्च सव्यतः। ४४२५
भीमो युधिष्ठिरश्चैव माद्रीपुत्रौ च पृष्ठतः। अन्धका वृष्णयश्चैव प्रद्युम्नप्रमुखास्ततः।
अग्रे बभूवुः कृष्णस्य समुद्यतमहायुधाः। शङ्खचक्रगदाशक्तिशार्ङ्गलाङ्गलनन्दकाः।
अदृश्यन्तोद्यतान्येव सर्व्वप्रहरणानि च। नानाबाहुषु कृष्णस्य दीप्यमानानि सर्व्वशः।
नेत्राभ्यां नस्तस्तश्चैव श्रोत्राभ्याञ्च समन्ततः। प्रादुरासन्महारौद्राः सधूमाः पावकार्च्चिषः।
रोमकूपेषु च तथा सूर्य्यस्येव मरीचयः। तं दृष्ट्वा घोरमात्मानं केशवस्य महात्मनः। ४४३०
न्यमीलयन्त नेत्राणि राजानस्त्रस्तचेतसः। ऋते द्रोणञ्च भीष्मञ्च विदुरञ्च महामतिं।
सञ्जयञ्च महाभागमृषींश्चैव तपोधनान्। प्रादात्तेषां स भगवान् दिव्यञ्चक्षुर्जनार्द्दनः।
तद्दृष्ट्वा महदाश्चर्य्यं माधवस्य सभातले। देवदुन्दुभयो नेदुः पुष्पवर्षं पपात च।
॥ धृतराष्ट्र उवाच॥ त्वमेव पुण्डरीकाक्ष सर्व्वस्य जगतो हितः। तस्मात् त्वं यादवश्रेष्ठ प्रसादं कर्त्तुमर्हसि।
भगवन्मम नेत्राणामन्तर्धानं वृणे पुनः। भवन्तं द्रष्टुमिच्छामि नान्यं द्रष्टुमिहोत्सहे। ४४३५
ततोऽब्रवीन्महाबाहुर्धृतराष्ट्रं जनार्द्दनः। अदृश्यमाने नेत्रे द्वे भवेतां कुरुनन्दन।
तत्राद्भुतं महाराज धृतराष्ट्रस्य चक्षुषी। लब्धवान् वासुदेवाच्च विश्वरूपदिदृक्षया।
लब्धचक्षुषमासीनं धृतराष्ट्रं नराधिपाः। विस्मिता ऋषिभिः सार्द्धं तुष्टुवुर्मधुसूदनं।
चचाल च मही कृत्स्ना सागरश्चापि चुक्षुभे। विस्मयं परमं जग्मुः पार्थिवा भरतर्षभ।
ततः स पुरुषव्याघ्रः सञ्जहार वपुः स्वकं। तां दिव्यामद्भुतां चित्रामृद्धिमत्तामरिन्दमः। ४४४०
ततः सात्यकिमादाय पाणौ हार्द्दिक्यमेव च। ऋषिभिस्तैरनुज्ञातो निर्य्ययौ मधुसूदनः।
ऋषयोऽन्तर्हिता जग्मुस्ततस्ते नारदादयः। तस्मिन् कोलाहले वृत्ते तदद्भुतमिवाभवत्।
तं प्रस्थितमभिप्रेक्ष्य कौरवाः सह राजभिः। अनुजग्मुर्नरव्याघ्रं देवा इव शतक्रतुं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

अचिन्तयन्नमेयात्मा सर्व्वं तद्राजमण्डलं। निश्चक्राम ततः शौरिः सधूम इव पावकः।
ततो रथेन शुभ्रेण महता किङ्किणीकिना। हेमजालविचित्रेण लघुना मेघनादिना। ४४४५
सूपस्करेण शुभ्रेण वैयाघ्रेण वरूथिना। शैव्यसुग्रीवयुक्तेन प्रत्यदृश्यत दारुकः।
तथैव रथमास्थाय कृतवर्म्मा महारथः। वृष्णीनां सम्मतो वीरो हार्द्दिक्यः समदृश्यत।
उपस्थितरथं शौरिं प्रयास्यन्तमरिन्दमं। धृतराष्ट्रो महाराजः पुनरेवाभ्यभाषत।
यावत् बलं मे पुत्त्रेषु पश्यतस्ते जनार्द्दन। प्रत्यक्षन्ते न ते किञ्चित् परोक्षं शत्रुकर्षण।
कुरूणां शममिच्छन्तं यतमानञ्च केशव। विदित्वैतामवस्थां मे नाभिशङ्कितुमर्हसि। ४४५०
न मे पापोऽस्त्यभिप्रायः पाण्डवान् प्रति केशव। ज्ञातमेव हि तद्वाक्यं यन्मयोक्तः सुयोधनः।
जानन्ति कुरवः सर्व्वे राजानश्चैव पार्थिवाः। शमे प्रयतमानं मां सर्व्वयत्नेन माधव।
॥ वैशम्पायन उवाच॥ ततोऽब्रवीन्महाबाहुर्धृतराष्ट्रं जनेश्वरं। द्रोणं पितामहं भीष्मं क्षत्तारं वाह्लिकं कृपं।
प्रत्यक्षमेतद्भवतां यद्वृत्तं कुरुसंसदि। यथा चाशिष्टवन्मन्दो रोषादद्य समुत्थितः।
वदत्यनीशमात्मानं धृतराष्ट्रो महीपतिः। आपृच्छे भवतः सर्व्वान् गमिष्यामि युधिष्ठिरं। ४४५५
आमन्त्र्य प्रस्थितं शौरिं रथस्थं पुरुषर्षभं। अनुजग्मुर्महेष्वासाः प्रवीरा भरतर्षभाः।
भीष्मो द्रोणः कृपः क्षत्ता धृतराष्ट्रोऽथ वाह्लिकः। अश्वत्थामा विकर्णश्च युयुत्सुश्च महारथः।
ततो रथेन शुभ्रेण महता किङ्किणीकिना। कुरूणां पश्यतां द्रष्टुं स्वसारं स्वपितुर्ययौ।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि विश्वरूपदर्शने त्रिंशदधिकशततमोऽध्यायः॥ १३०॥
॥ वैशम्पायन उवाच॥ प्रविश्याथ गृहं तस्याश्चरणावभिवाद्य च। आचख्यौ तत् समासेन यद्वृत्तं कुरुसंसदि।
॥ वासुदेव उवाच॥ उक्तं बहुविधं वाक्यं ग्रहणीयं सहेतुकं। ऋषिभिश्चैव च मया न चाऽसौ तद्गृहीतवान्। ४४६०
कालपक्वमिदं सर्व्वं सुयोधनवशानुगं। आपृच्छे भवतीं शीघ्रं प्रयास्ये पाण्डवान् प्रति।
किं वाच्याः पाण्डवेयास्ते भवत्या वचनान्मया। तद्ब्रूहि त्वं महाप्राज्ञे शुश्रूषे वचनं तव।
॥ कुन्त्युवाच॥ ब्रूयाः केशव राजानं धर्म्मात्मानं युधिष्ठिरं। भूयांस्ते हीयते धर्म्मो मा पुत्त्रक वृथा कृथाः।
श्रोत्रियस्येव ते राजन् मन्दकस्याविपश्चितः। अनुवाकहता बुद्धिर्द्धर्म्ममेवैकमीक्षते।
अङ्गावेक्षस्व धर्म्मं त्वं यथासृष्टः स्वयम्भुवा। बाहुतः क्षत्त्रियः सृष्टो बाहुवीर्य्योपजीविता। ४४६५
क्रूराय कर्म्मणे नित्यं प्रजानां परिपालने। शृणु चात्रोपमामेकां या वृद्धेभ्यः श्रुता मया।
मुचुकुन्दस्य राजर्षेरददत् पृथिवीमिमां। पुरा वैश्रवणः प्रीतो न चासौ तद्गृहीतवान्।
बाहुवीर्य्यार्ज्जितं राज्यमश्नीयामिति कामये। ततो वैश्रवणः प्रीतो विस्मितः समपद्यत।
मुचुकुन्दस्ततो राजा सोऽन्वशासद्वसुन्धरां। बाहुवीर्य्यार्ज्जितां सम्यक् क्षत्त्रधर्म्ममनुव्रतः।
यं हि धर्म्मञ्चरन्तीह प्रजा राज्ञा सुरक्षिताः। चतुर्थं तस्य धर्म्मस्य राजा विन्दति भारत। ४४७०
राजा चरति चेद्धर्म्मं देवत्वायैव कल्पते। स चेदधर्म्मञ्चरति नरकायैव गच्छति।
दण्डनीतिः स्वधर्म्मेण चातुर्व्वर्ण्यं नियच्छति। प्रयुक्ता स्वामिना सम्यगधर्म्मेभ्यश्च प्रयच्छति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

दण्डनीत्या यदा राजा सम्यक्कार्त्स्न्येन वर्त्तते। तदा कृतयुगं नाम कालः श्रेष्ठः प्रवर्त्तते।
कालो वा कारणं राज्ञो राजा वा कालकारणं। इति ते संशयो माभूद्राजा कालस्य कारणं।
राजा कृतयुगस्रष्टा त्रेताया द्वापरस्य च। युगस्य च चतुर्थस्य राजा भवति कारणं।
कृतस्य करणाद्राजा स्वर्गमत्यन्तमश्नुते। त्रेतायाः करणाद्राजा स्वर्गं नात्यन्तमश्नुते। ४४७५
प्रवर्त्तनात् द्वापरस्य यथा भागमुपाश्नुते। कलेः प्रवर्त्तनाद्राजा पापमत्यन्तमश्नुते।
ततो वसति दुष्कर्म्मा नरके शाश्वतीः समाः। राजदोषेण हि जगत् स्पृश्यते जगतः स च।
राजधर्म्मानवेक्षस्व पितृपैतामहोचितान्। नैतद्राजर्षिवृत्तं हि यत्र त्वं स्थातुमिच्छसि।
न हि वैक्लव्यसंसृष्ट आनृशंस्यव्यवस्थितः। प्रजापालनसम्भूतं फलं किञ्चिन्न लभ्यते।
न ह्येतामाशिषं पाण्डुर्न्न चाहं न पितामहः। प्रयुक्तवन्तः पूर्व्वन्ते यथा चरसि मेधया। ४४८०
यज्ञो दानं तपः शौर्य्यं प्रज्ञा सन्तानमेव च। माहात्म्यं बलमोजश्च नित्यमाशंसितं मया।
नित्यं स्वाहा स्वधा नित्यं ददुर्म्मानुषदेवताः। दीर्घमायुर्धनं पुत्त्रान् सम्यगाराधिताः शुभाः।
पुत्त्रेष्वाशासते नित्यं पितरो दैवतानि च। दानमध्ययनं यज्ञः प्रजानां परिपालनं।
एतद्धर्म्ममधर्म्मं वा जन्मनैवाभ्यजायथाः। ते तु वैद्याः कुले जाता अवृत्त्या तात पीडिताः। ४४८५
यत्र दानपतिं शूरं क्षुधिताः पृथिवीचराः। प्राप्य तुष्टाः प्रतिष्ठन्ते धर्म्मः कोऽभ्यधिकस्ततः।
दानेनान्यं बलेनान्यं तथा सूनृतया परं। सर्व्वतः प्रतिगृह्णीयाद्राज्यं प्राप्येह धार्म्मिकः।
ब्राह्मणः प्रचरेत् भैक्ष्यं क्षत्त्रियः परिपालयेत्। वैश्यो धनार्ज्जनं कुर्य्यात् शूद्रः परिचरेच्च तान्।
भैक्ष्यं विप्रतिषिद्धन्ते कृषिर्नैवोपपद्यते। क्षत्त्रियोऽसि क्षतात् त्राता बाहुवीर्य्योपजीविता।
उद्यम्य धुरमुत्कर्षेद्राजानेयकृतं स्मरन्। कुरु सत्त्वञ्च मानञ्च विद्धि पौरुषमात्मनः। ४४९०
पित्र्यमंशं महाबाहो निमग्नं पुनरुद्धर। साम्ना भेदेन दानेन दण्डेनाऽथ नयेन वा।
ततो दुःखतरं किन्नु यदहं हीनबान्धवा। परपिण्डमुदीक्षे वै त्वां सूत्वा मित्रनन्दनं।
युध्यस्व राजधर्म्मेण मा निमज्जीः पितामहान्। मागमः क्षीणपुण्यस्त्वं सानुजः पापिकां गतिं।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि कुन्तीवाक्ये एकत्रिंशदधिकशततमोऽध्यायः॥ १३१॥
॥ कुन्त्युवाच॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं। विदुलायाश्च संवादं पुत्त्रस्य च परन्तप।
ततः श्रेयश्च भूयश्च यथावद्वक्तुमर्हति। यशस्विनी मन्युमती कुले जाता विभावरी। ४४९५
क्षत्त्रधर्म्मरता दान्ता विदुला दीर्घदर्शिनी। विश्रुता राजसंसत्सु श्रुतवाक्या बहुश्रुता।
विदुला नाम राजन्या जगर्हे पुत्त्रमौरसं। निर्ज्जितं सिन्धुराजेन शयानं दीनचेतसं।
॥ विदुलोवाच॥ अनन्दन ममाजात द्विषतां हर्षवर्द्धन। न मया त्वं न पित्रा च जातः क्वाभ्यागतो ह्यसि।
निर्म्मन्युश्चाप्यसङ्ख्येयः पुरुषः क्लीवसाधनः। यावज्जीवं निराशोऽसि कल्याणाय धुरं वह।
मात्मानमवमन्यस्व मैनमल्पेन बीभरः। मनः कृत्वा सुकल्याणं माभैस्त्वं प्रतिसंहर। ४५००
उत्तिष्ठ हे कापुरुष मा शेष्वैवं पराजितः। अमित्रान्नन्दयन् सर्व्वान्निर्म्मानो बन्धुशोकदः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon.

सुपूरा वै कुनदिका सुपूरो मूषिकाञ्जलिः। सुसन्तोषः कापुरुषः स्वल्पकेनैव तुष्यति।
अप्यहेरारुजन् दंष्ट्रां मास्वेव निधनं व्रज। अपि वा संशयं प्राप्य जीवितेऽपि पराक्रमेः।
अप्यरेः श्येनवच्छिद्रं पश्येस्त्वं विपरिक्रमन्। विवदन् वाऽथ वा तूष्णीं व्योम्नि वाऽपरिशङ्कितः।
त्वमेवं प्रेतवच्छेषे कस्माद्वज्रहतो यथा। उत्तिष्ठ हे कापुरुष माखाप्सीः शत्रुनिर्ज्जितः। ४५०५
माऽस्तं गतस्त्वं कृपणो विश्रूयस्व स्वकर्म्मणा। मा मध्ये मा जघन्ये त्वं मा धोभूस्तिष्ठ चोर्ज्जितः।
अलातं तिन्दुकस्येव मुहूर्त्तमपि हि ज्वल। मा तुषाग्निरिवानर्च्चिर्धूमायस्व जिजीविषुः।
मुहूर्त्तं ज्वलितं श्रेयो न च धूमायितञ्चिरं। मा ह स्म कस्यचिद्गेहे जनीराज्ञः खरो मृदुः।
कृत्वा मानुष्यकं कर्म्म सृत्वाजिं यावदुत्तमं। धर्म्मस्यानृण्यमाप्नोति न चात्मानं विगर्हते।
अलब्ध्वा यदि वा लब्ध्वा नानुशोचति पण्डितः। आनन्तर्य्यञ्चारभते न प्राणानां धनायते। ४५१०
उद्भावयस्व वीर्य्यं वा तां वा गच्छ ध्रुवां गतिं। धर्म्मं पुत्राग्रतः कृत्वा किं निमित्तं हि जीवसि।
इष्टापूर्त्तं हि ते क्लीव कीर्त्तिश्च सकला हता। विच्छिन्नं भोगमूलं ते किं निमित्तं हि जीवसि।
शत्रुर्निमज्जता ग्राह्यो जङ्घायां प्रपतिष्यता। विपरिच्छिन्नमूलोऽपि न विषीदेत् कथञ्चन।
उद्यम्य धुरमुत्कर्षेदाजानेयकृतं स्मरन्। कुरु सत्त्वञ्च मानञ्च विद्धि पौरुषमात्मनः।
उद्भावय कुलं मग्नं त्वत्कृते स्वयमेव हि। यस्य वृत्तं न जल्पन्ति मानवा महदद्भुतं। ४५१५
राशिवर्द्धनमात्रं स नैव स्त्री न पुनः पुमान्। दाने तपसि सत्ये च यस्य नोच्चारितं यशः।
विद्यायामर्थलाभे वा मातुरुच्चार एव सः। श्रुतेन तपसा वाऽपि श्रिया वा विक्रमेण वा।
जनान् योऽभिभवत्यन्यान् कर्म्मणा हि स वै पुमान्। न त्वेव जाल्मीं कापालीं वृत्तिमेषितुमर्हसि।
नृशंस्यामयशस्याञ्च दुःखां कापुरुषोचितां। यमेनमभिनन्देयुरमित्राः पुरुषं कृशं।
लोकस्य समवज्ञातं निहीनासनवाससं। अहो लाभकरं हीनमल्पजीवनमल्पकं। ४५२०
नेदृशं बन्धुमासाद्य बान्धवः सुखमेधते। अवृत्त्यैव विपत्स्यामो वयं राष्ट्रात् प्रवासिताः।
सर्व्वकामरसैर्हीनाः स्थानभ्रष्टा नकिञ्चनाः। अवल्गुकारिणं सत्सु कुलवंशस्य नाशनं।
कलिं पुत्त्रप्रवादेन सञ्जय त्वामजीजनं। निरामर्षं निरुत्साहं निर्व्वीर्य्यमरिनन्दनं।
मास्म सीमन्तिनी काचित् जनयेत् पुत्त्रमीदृशं। माधूमाय ज्वलात्यन्तमाक्रम्य जहि शात्रवान्।
ज्वल मूर्द्धन्यमित्राणां मुहूर्त्तमपि वा क्षणं। एतावानेव पुरुषो यदमर्षी यदक्षमी। ४५२५
क्षमावान्निरमर्षश्च नैव स्त्री न पुनः पुमात्। सन्तोषो वै श्रियं हन्ति तथाऽनुक्रोश एव च।
अनुत्थानभये चोभे निरीहो नाश्नुते महत्। एभ्यो निकृतिपापेभ्यः प्रमुञ्चात्मानमात्मना।
आयसं हृदयं कृत्वा मृगयस्व पुनः स्वकं। पुरं विषहते यस्मात् तस्मात् पुरुष उच्यते।
तमाऽर्य्यर्थनामानं स्त्रीवत् य इह जीवति। शूरस्योर्ज्जितचित्तस्य सिंहविक्रान्तचारिणः।
दिष्टभावं गतस्यापि विषये मोदते प्रजाः। य आत्मनः प्रियसुखे हित्वा मृगयते श्रियं। ४५३०
अमात्यानामथो हर्षमादधात्यचिरेण सः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ पुत्त्र उवाच ॥ किं नु ते मामपश्यन्त्याः पृथिव्या अपि सर्व्वया । किमाभरणकृत्यन्ते किं भोगैर्जीवितेन वा ।
॥ मातोवाच ॥ अनादृतानां ये लोका द्विषन्तस्तानवाप्नुयुः । ये त्वादृतात्मनां लोकाः सुहृदस्तान् व्रजन्तु नः ।
भृत्यैर्व्विहीयमानानां परपिण्डोपजीविनां । कृपणानामसत्त्वानां माद्वृत्तिमनुवर्त्तिथाः ।
अनु त्वां तात जीवन्तु ब्राह्मणाः सुहृदस्तथा । पर्ज्जन्यमिव भूतानि देवा इव शतक्रतुं ।
यमाजीवन्ति पुरुषं सर्व्वभूतानि सञ्जय । पक्वद्रुममिवासाद्य तस्य जीवितमर्थवत् । ४५३५
यस्य शूरस्य विक्रान्तैरेधन्ते बान्धवाः सुखं । त्रिदशा इव शक्रस्य साधु तस्येह जीवितं ।
स्वबाहुबलमाश्रित्य योऽभ्युज्जीवति मानवः । स लोके लभते कीर्त्तिं परत्र च शुभां गतिं ।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि विदुलापुत्त्रानुशासने द्वात्रिंशदधिकशततमोऽध्यायः ॥ १२२ ॥
॥ विदुलोवाच ॥ अथैतस्यामवस्थायां पौरुषं हातुमिच्छसि । निहीनसेवितं मार्गं गमिष्यस्यचिरादिव ।
यो हि तेजो यथाशक्ति न दर्शयति विक्रमात् । क्षत्त्रियो जीविताकाङ्क्षी स्तेन इत्येव तं विदुः । ४५४०
अर्थवन्त्युपपन्नानि वाक्यानि गुणवन्ति च । नैव सम्प्राप्नुवन्ति त्वां मुमूर्षुमिव भेषजं ।
सन्ति वै सिन्धुराजस्य सन्तुष्टा न तथा जनाः । दौर्ब्बल्यादासते मूढा व्यसनौघप्रतीक्षिणः ।
सहायोपचितिं कृत्वा व्यवसायं ततस्ततः । अनुदुष्येयुरपरे पश्यन्तस्तव पौरुषं ।
तैः कृत्वा सह सङ्घातं गिरिदुर्गालयश्चर । कालव्यसनमाकाङ्क्षन्नैवायमजरामरः ।
सञ्जयो नामतश्च त्वं न च पश्यामि तत् त्वयि । अन्वर्थनामा भव मे पुत्त्र मा व्यर्थनामकः । ४५४५
सम्यग्दृष्टिर्महाप्राज्ञो बालं त्वां ब्राह्मणोऽब्रवीत् । अयं प्राप्य महत्कृच्छ्रं पुनर्वृद्धिं गमिष्यति ।
तस्य स्मरन्ती वचनमाशंसे विजयं तव । तस्मात्तात ब्रवीमि त्वां वक्ष्यामि च पुनः पुनः ।
यस्य ह्यर्थाभिनिर्वृत्तौ भवन्त्याप्यायिताः परे । तस्यार्थसिद्धिर्नियता नयेष्वर्थाऽनुसारिणः ।
समृद्धिरसमृद्धिर्वा पूर्व्वेषां मम सञ्जय । एवं विद्वान् युद्धमना भव मा प्रत्युपाहरः ।
नातः पापीयसीं काञ्चिदवस्थां शम्बरोऽब्रवीत् । यत्र नैवाद्य न प्रातर्भोजनं प्रतिदृश्यते । ४५५०
पतिपुत्त्रवधादेतत् परमं दुःखमब्रवीत् । दारिद्र्यमिति यत्प्रोक्तं पर्य्यायमरणं हि तत् ।
अहं महाकुले जाता ह्रदात् ह्रदमिवागता । ईश्वरी सर्व्वकल्याणी भर्त्रा परमपूजिता ।
महार्हमाल्याभरणां सुमृष्टां वरवाससं । पुरा दृष्ट्वा सुहृद्वर्गो मामपश्यः सुदुर्गतां ।
यदा माञ्चैव भार्य्याञ्च द्रष्टासि भृशदुर्ब्बलां । न तदा जीवितेनार्थो भविता तव सञ्जय ।
दासकर्म्मकरान् भृत्यानाचार्य्यर्त्विक्पुरोहितान् । अवृत्त्याऽस्मान् प्रजहतो दृष्ट्वा किं जीवितेन ते । ४५५५
यदि कृत्यं न पश्यामि तवाद्याहं यथा पुरा । श्लाघनीयं यशस्यञ्च का शान्तिर्हृदयस्य मे ।
नेति चेद्ब्राह्मणं ब्रूयां दीर्य्येत हृदयं मम । न ह्यहं न च मे भर्त्ता नेति ब्राह्मणमुक्तवान् ।
वयमाश्रयणीयाः स्म न श्रोतारः परस्य च । नान्यमासाद्य जीवन्ती परित्यक्ष्यामि जीवितं ।
अपारे भव नः पारमप्लवे भव नः प्लवः । कुरुष्व स्थानमस्थाने मृतान् सञ्जीवयस्व नः ।
सर्व्वे ते शत्रवः सह्या न चेज्जीवितुमर्हसि । अथ चेदीदृशीं वृत्तिं क्लीवामभ्युपपद्यसे । ४५६०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation Jalgaon

निर्व्विसात्मा हतमना मुञ्चैतां पापजीविकां । एकशत्रुवधेनैव शूरो गच्छति विश्रुतिं ।
इन्द्रो वृत्रवधेनैव महेन्द्रः समपद्यत । माहेन्द्रं प्रग्रहं लेभे लोकानाञ्चेश्वरोऽभवत् ।
नाम विश्राव्य वै सङ्ख्ये शत्रूनाहूय दंशितान् । सेनाग्रञ्चापि विद्राव्य हत्वा वा पुरुषं वरं ।
यदैव लभते वीरः सुयुद्धेन महत्यशः । तदैव प्रव्यथन्तेऽस्य शत्रवो विनमन्ति च ।
त्यक्त्वात्मानं रणे दक्षं शूरं कापुरुषा जनाः । अवशाः पूरयन्ति स्म सर्व्वकामसमृद्धिभिः । ४५६५
राज्यञ्चाप्युग्रविभ्रंशं संशयो जीवितस्य वा । न लब्धस्य हि शत्रोर्व्वै शेषं कुर्व्वन्ति साधवः ।
स्वर्गद्वारोपमं राज्यमथवाऽप्यमृतोपमं । रुद्धमेकायने मत्वा पतोल्मुक इवारिषु ।
जहि शत्रून् रणे राजन् स्वधर्म्ममनुपालय । मा त्वा दृशं सुकृपणं शत्रूणां भयवर्द्धनं ।
अस्मदीयैश्च शोचद्भिर्नदद्भिश्च परैर्वृतं । अपि त्वां नानुपश्येयं दीना दीनमिव स्थितं ।
हृष्य सौवीरकन्याभिः श्लाघ्य स्वार्थैर्यथा पुरा । मा च सैन्धवकन्यानामवसन्नो वशङ्गमः । ४५७०
युवा रूपेण सम्पन्नो विद्ययाऽभिजनेन च । यस्त्वादृशो विकुर्व्वीत यशस्वी लोकविश्रुतः ।
अनड्वानिव वोढव्यो मन्ये मरणमेव तत् । यदि त्वामनुपश्यामि परस्य प्रियवादिनं ।
पृष्ठतोऽनुव्रजन्तं वा का शान्तिर्हृदयस्य मे । नास्मिन् जातु कुले जातो गच्छेत् योऽन्यस्य पृष्ठतः ।
न त्वं परस्यानुचरस्तात जीवितुमर्हसि । अहं हि क्षत्रहृदयं वेद यत् परिशाश्वतं ।
पूर्व्वैः पूर्व्वतरैः प्रोक्तं परैः परतरैरपि । शाश्वतञ्चाव्ययञ्चैव प्रजापतिविनिर्म्मितं । ४५७५
यो वै कश्चिदिहाजातः क्षत्रियः क्षत्रकर्म्मवित् । भयात् वृत्तिं समीक्ष्यैव न नमेदिह कस्य चित् ।
उद्यच्छेदेव न नमेदुद्यमो ह्येव पौरुषं । अप्यपर्व्वणि भज्येत न नमेतेह कस्य चित् ।
मातङ्गो मत्त इव च परीयात् स महामनाः । ब्राह्मणेभ्यो नमेन्नित्यं धर्म्मायैव च सञ्जय ।
नियच्छन्नितरान् वर्णान् विनिघ्नन् सर्व्वदुष्कृतः । ससहायोऽसहायो वा यावज्जीवं तथा भवेत् ।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि विदुलापुत्रानुशासने त्रयस्त्रिंशदधिकशततमोऽध्यायः ॥ १३३ ॥
॥ पुत्र उवाच ॥ कृष्णायसस्येव च ते संहत्य हृदयं कृतं । मम मातस्त्वकरुणे वीरप्रज्ञे ह्यमर्षणे । ४५८०
अहो क्षत्रसमाचारो यत्र मामितरं यथा । नियोजयसि युद्धाय परमातेव मान्तथा ।
ईदृशं वचनं ब्रूयात् भवती पुत्रमेकजं । किन्नु ते मामपश्यन्त्याः पृथिव्या अपि सर्व्वया ।
किमाभरणकृत्येन किम्भोगैर्जीवितेन वा । मयि वा सङ्गरहिते प्रियपुत्रे विशेषतः ।
॥ मातोवाच ॥ सर्व्वावस्था हि विदुषां तात धर्म्मार्थकारणात् । तावेवाभिसमीक्ष्याहं सञ्जय त्वामचूचुदं ।
स समीक्ष्य क्रमोपेतो मुख्यः कालोऽयमागतः । अस्मिंश्चेदागते काले कार्य्यं न प्रतिपद्यसे । ४५८५
असम्भावितरूपस्त्वमानृशंसं करिष्यसि । तं त्वामयशसा स्पृष्टं न ब्रूयां यदि सञ्जय ।
खरीवात्सल्यमाहुस्तन्निःसामर्थ्यमहेतुकं । सद्भिर्व्विगर्हितं मार्गं त्यज मूर्खनिषेवितं ।
अविद्या वै महत्यस्ति यामिमां संश्रिताः प्रजाः । तव स्यात् यदि सद्वृत्तं तेन मे त्वं प्रियो भवेः ।
धर्म्मार्थगुणयुक्तेन नेतरेण कथञ्चन । दैवमानुषयुक्तेन सद्भिराचरितेन च ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यो ह्येवमवनीतेन रमते पुत्त्रनप्तृणा। अनुत्थानवता चाऽपि दुर्व्विनीतेन दुर्धिया।
रमते यस्तु पुत्त्रेण मोघं तस्य प्रजाफलं। अकुर्व्वन्तो हि कर्म्माणि कुर्व्वन्तो निन्दितानि च। ४५९०
सुखं नैवेह नाऽमुत्र लभन्ते पुरुषाधमाः। युद्धाय क्षत्त्रियः सृष्टः सञ्जयेह जयाय च।
जयन् वा वध्यमानो वा प्राप्नोतीन्द्रसलोकतां। न शक्रभवने पुण्ये दिवि तत् विद्यते सुखं।
यदि मित्रान् वशे कृत्वा क्षत्त्रियः सुखमेधते। मन्युना दह्यमानेन पुरुषेण मनस्विना।
निकृतेनेह बहुशः शत्रून् प्रति जिगीषया। आत्मानं वा परित्यज्य शत्रुं वा विनिपात्य च। ४५९५
अतोऽन्येन प्रकारेण शान्तिरस्य कुतो भवेत्। इह प्राज्ञो हि पुरुषः स्वल्पमप्रियमिच्छति।
यस्य स्वल्पं प्रियं लोके ध्रुवं तस्याल्पमप्रियं। प्रियाभावाच्च पुरुषो नैव प्राप्नोति शोभनं।
ध्रुवञ्चाभावमभ्येति गत्वा गङ्गेव सागरं।
॥ पुत्त्र उवाच ॥ नेयं मतिस्त्वया वाच्या मातः पुत्त्रे विशेषतः। कारुण्यमेवानुपश्य भूत्वेह जडमूकवत्।
॥ मातोवाच ॥ अतो मे भूयसी नन्दिर्यदेवमनुपश्यसि। चोद्यं माञ्चोदयस्येतत् भृशं वै चोदयामि ते। ४६००
अथ त्वां पूजयिष्यामि हत्वा वै सर्व्वसैन्धवान्। अहं पश्यामि विजयं कृत्स्नं भाविनमेव ते।
॥ पुत्त्र उवाच ॥ अकोशस्यासहायस्य कुतः सिद्धिर्ज्जयो मम। इत्यवस्थां विदित्वैतामात्मनात्मनि दारुणां।
राज्याद्भावो निवृत्तो मे त्रिदिवादिव दुष्कृतः। ईदृशं भवती किञ्चिदुपायमनुपश्यति।
तन्मे परिणतप्रज्ञे सम्यक् प्रब्रूहि पृच्छते। करिष्यामि हि तत् सर्व्वं यथावदनुशासनं।
॥ मातोवाच ॥ पुत्त्र नात्माऽवमन्तव्यः पूर्व्वाभिरसमृद्धिभिः। अभूत्वाऽभिभवन्त्यर्था भूत्वा नश्यन्ति चापरे। ४६०५
अमर्षेणैव चाप्यर्था नारब्धव्याः सुबालिशैः। सर्व्वेषां कर्म्मणां तात फले नित्यमनित्यता।
अनित्यमिति जानन्तो न भवन्ति भवन्ति च। अथ ये नैव कुर्व्वन्ति नैव जातु भवन्ति ते।
ऐकगुण्यमनीहायामभावः कर्म्मणां फलं। अथ द्वैगुण्यमीहायां फलं भवति वा नवा।
यस्य प्रागेव विदिता सर्व्वार्थानामनित्यता। नुदेद्वृद्धिसमृद्धी स प्रतिकूले नृपात्मज।
उत्थातव्यं जागृतव्यं योक्तव्यं भूतिकर्म्मसु। भविष्यतीत्येव मनः कृत्वा सततमव्यथैः। ४६१०
मङ्गलानि पुरस्कृत्य ब्राह्मणांश्चेश्वरैः सह। प्राज्ञस्य नृपतेराशु वृद्धिर्भवति पुत्त्रक।
अभिवर्त्तति लक्ष्मीस्तं प्राचीमिव दिवाकरः। निदर्शनान्युपायांश्च बहून्युद्धर्षणानि च।
अनुदर्शितरूपोऽसि पश्यामि कुरु पौरुषं। पुरुषार्थमभिप्रेतं समाहर्त्तुमिहार्हसि।
क्रुद्धान् लुब्धान् परिक्षीणानवलिप्तान् विमानितान्। स्पर्द्धिनश्चैव ये केचित्तान् युक्त उपधारय।
एतेन त्वं प्रकारेण महतो भेत्स्यसे गणान्। महावेग इवोद्धूतो मातरिश्वा वलाहकान्। ४६१५
तेषामग्रप्रदायी स्याः कल्योत्थायी प्रियंवदः। ते त्वां प्रियं करिष्यन्ति पुरोधास्यन्ति च ध्रुवं।
यदैव शत्रुं जानीयात् सपत्नं त्यक्तजीवितं। तदैवास्मादुद्विजते सर्पाद्वेश्मगतादिव।
तं विदित्वा पराक्रान्तं वशे न कुरुते यदि। निर्व्वादैर्निर्व्वदेदेनमन्ततस्तद्भविष्यति।
निर्व्वादादास्पदं लब्ध्वा धनवृद्धिर्भविष्यति। धनवन्तं हि मित्राणि भजन्ते चाश्रयन्ति च।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स्खलितार्थं पुनस्तानि सन्त्यजन्ति च बान्धवाः । अप्यस्मिन्नाश्रयन्ते च जुगुप्सन्ते च तादृशं । ४६२०
शत्रुं कृत्वा यः सहायं विश्वासमुपगच्छति । ततः सम्भाव्यमेवैतत् यद्राज्यं प्राप्नुयादिति ।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि विदुलापुत्त्रानुशासने चतुस्त्रिंशदधिकशततमोऽध्यायः ॥ १३४ ॥
॥ मातोवाच ॥ नैव राज्ञा दरः कार्य्यो जातु कस्याञ्चिदापदि । अथ चेदपि दीर्णः स्यान्नैव वर्त्तेत दीर्णवत् ।
दीर्णं हि दृष्ट्वा राजानं सर्व्वमेवानुदीर्य्यते । राष्ट्रं बलममात्याश्च पृथक् कुर्व्वन्ति ते मतीं ।
शत्रूनेके प्रपद्यन्ते प्रजहत्यपरे पुनः । अन्ये तु प्रजिहीर्षन्ति ये पुरस्ताद्विमानिताः ।
य एवात्यन्तसुहृदस्त एवं पर्य्युपासते । अशक्तयः स्वस्तिकामा बद्धवत्सा इला इव । ४६२५
शोचन्तमनुशोचन्ति पतितानिव बान्धवान् । अपि ते पूजिताः पूर्व्वमपि ते सुहृदो मताः ।
ये राष्ट्रमभिमन्यन्ते राज्ञो व्यसनमीयुषः । मा दीदरस्त्वं सुहृदो मा त्वां दीर्णं प्रहासिषुः ।
प्रभावं पौरुषं बुद्धिं जिज्ञासन्त्या मया तव । विदधत्या समाश्वासमुक्तं तेजो विवृद्धये ।
यद्येतत् संविजानासि यदि सम्यगब्रवीम्यहं । कृत्वा सौम्यमिवात्मानं जयायोत्तिष्ठ सञ्जय ।
अस्ति नः कोषनिचयो महानविदितस्तव । तमहं वेद नान्यस्तमुपसम्पादयामि ते । ४६३०
सन्ति नैकशता भूयः सुहृदस्तव सञ्जय । सुखदुःखसहा वीर शतार्हा ह्यनुवर्त्तिनः ।
तादृशा हि सहाया वै पुरुषस्य बुभूषतः । इष्टं जिहीर्षतः किञ्चित् सचिवाः शत्रुकर्षण ।
तस्यास्त्वीदृशकं वाक्यं श्रुत्वाऽपि स्वल्पचेतसः । तमस्त्वपागमत्तस्य सुचित्रार्थपदाक्षरं ।
॥ पुत्त्र उवाच ॥ उदके भूरियं धार्य्या मर्त्तव्यं प्रवणे मया । यस्य मे भवती नेत्री भविष्यत् भूतिदर्शिनी ।
अहं हि वचनं त्वत्तः शुश्रूषुरपरापरं । किञ्चित्किञ्चित् प्रतिवदंस्तूष्णीमासं मुहुर्मुहुः । ४६३५
अतृप्यन्नमृतस्येव कृच्छ्राल्लब्धस्य बान्धवान् । उद्यच्छाम्येष शत्रूणां नियमार्थं जयाय च ।
॥ कुन्त्युवाच ॥ सदश्व इव स क्षिप्तः प्रणुन्नो वाक्यसायकैः । तच्चकार तथा सर्व्वं यथावदनुशासनं ।
इदमुद्धर्षणं भीमं तेजोवर्द्धनमुत्तमं । राजानं श्रावयेन्मन्त्री सीदन्तं शत्रुपीडितं ।
जयो नामेतिहासोऽयं श्रोतव्यो विजिगीषुणा । महीं विजयते क्षिप्रं श्रुत्वा शत्रूंश्च मर्द्दति ।
इदं पुंसवनञ्चैव वीराजननमेव च । अभीक्ष्णं गर्भिणी श्रुत्वा ध्रुवं वीरं प्रजायते । ४६४०
विद्याशूरं तपःशूरं दानशूरं तपस्विनं । ब्राह्म्याश्रिया दीप्यमानं साधुवादे च सम्मतं ।
अर्च्चिष्मन्तं बलोपेतं महाभागं महारथं । धृतिमन्तमनाधृष्यं जेतारमपराजितं ।
नियन्तारमसाधूनां गोप्तारं धर्म्मचारिणां । ईदृशं क्षत्त्रिया सूते वीरं सत्यपराक्रमं ।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि कुन्तीवाक्ये पञ्चत्रिंशदधिकशततमोऽध्यायः ॥ १३५ ॥
॥ कुन्त्युवाच ॥ अर्ज्जुनं केशव ब्रूयास्त्वयि जाते स्म सूतके । उपोपविष्टा नारीभिराश्रमे परिवारिता ।
अथान्तरीक्षे वागासीद्दिव्यरूपमनोरमा । सहस्राक्षसमः कुन्ति भविष्यत्येष ते सुतः ।
एष जेष्यति सङ्ग्रामे कुरून् सर्व्वान् समागतान् । भीमसेनद्वितीयश्च लोकमुद्वर्त्तयिष्यति । ४६४५
पुत्त्रस्ते पृथिवीजेता यशश्चास्य दिवं स्पृशेत् । हत्वा कुरूंश्च सङ्ग्रामे वासुदेवसहायवान् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पित्र्यमंशं प्रनष्टञ्च पुनरप्युद्धरिष्यति। भ्रातृभिः सहितः श्रीमांस्त्रीन्मेधानाहरिष्यति।
स सत्यसन्धो बीभत्सुः सव्यसाची यथाऽच्युतः। तथा त्वमेव जानासि बलवन्तं दुरासदं।
तथा तदस्तु दाशार्ह यथा वागभ्यभाषत। धर्म्मश्चेदस्ति वार्ष्णेय तथा सत्यं भविष्यति।
त्वञ्चापि तत्तथा कृष्ण सर्व्वं सम्पादयिष्यसि। नाहं तदभ्यसूयामि यथा वागभ्यभाषत। ४५५०
नमो धर्म्माय महते धर्म्मो धारयते प्रजाः। एतद्धनञ्जयो वाच्यो नित्योद्युक्तो वृकोदरः।
यदर्थं क्षत्त्रिया सूते तस्य कालोऽयमागतः। न हि वैरं समासाद्य सीदन्ति पुरुषर्षभाः।
विदिता ते सदा बुद्धिर्भीमस्य न स शाम्यति। यावदन्तं न कुरुते शत्रूणां शत्रुकर्षणः।
सर्व्वधर्म्मविशेषज्ञां स्नुषां पाण्डोर्महात्मनः। ब्रूया माधव कल्याणीं कृष्ण कृष्णां यशस्विनीं। ४५५५
युक्तमेतन्महाभागे कुले जाते यशस्विनि। यन्मे पुत्त्रेषु सर्व्वेषु यथावत्त्वमवर्त्तिथाः।
माद्रीपुत्त्रौ च वक्तव्यौ क्षत्त्रधर्म्मरतावुभौ। विक्रमेणार्ज्जितान् भोगान् वृणीतं जीवितादपि।
विक्रमाधिगता ह्यर्थाः क्षत्त्रधर्म्मेण जीवतः। मनो मनुष्यस्य सदा प्रीणन्ति पुरुषोत्तम।
यच्च वः प्रेक्षमाणानां सर्व्वधर्म्मोपचायिनां। पाञ्चाली परुषाण्युक्ता को नु तत् क्षन्तुमर्हति।
न राज्यहरणं दुःखं द्यूते चापि पराजयः। प्रव्राजनं सुतानां वा न मे तत् दुःखकारणं। ४५६०
यच्च सा बृहती श्यामा सभायां रुदती तदा। अश्रौषीत् परुषा वाचस्तन्मे दुःखतरं महत्।
स्त्रीधर्म्मिणी वरारोहा क्षत्त्रधर्म्मरता सदा। नाध्यगच्छत्तदा नाथं कृष्णा नाथवती सती।
तं वै ब्रूहि महाबाहो सर्व्वशस्त्रभृतां वरं। अर्ज्जुनं पुरुषव्याघ्रं द्रौपद्याः पदवीं चर।
विदितौ हि तवात्यन्तं क्रुद्धाविव यमान्तकौ। भीमार्ज्जुनौ नयेतां हि देवानपि परां गतिं।
तयोश्चैतदवज्ञानं यत् सा कृष्णा सभागता। दुःशासनस्य यद्भीमं कटुकान्यभ्यभाषत। ४५६५
पश्यतां कुरुवीराणां तच्च संस्मारयेः पुनः। पाण्डवान् कुशलं पृच्छेः सपुत्त्रान् कृष्णया सह।
माञ्च कुशलिनीं ब्रूयास्तेषु भूयो जनार्द्दन। अरिष्टं गच्छ पन्थानं पुत्त्रान्मे परिपालय।
॥ वैशम्पायन उवाच ॥ अभिवाद्याथ तां कृष्णः कृत्वा चाभिप्रदक्षिणं। निश्चक्राम महाबाहुः सिंहखेलगतिस्ततः।
ततो विसर्ज्जयामास भीष्मादीन् कुरुपुङ्गवान्। आरोप्याथ रथे कर्णं प्रायात् सात्यकिना सह।
ततः प्रयाते दाशार्हे कुरवः सङ्गता मिथः। जजल्पुर्महदाश्चर्य्यं केशवे परमाद्भुतं। ४५७०
प्रमूढा पृथिवी सर्व्वा मृत्युपाशवशीकृता। दुर्य्योधनस्य बालिश्यान्नैतदस्तीति चाब्रुवन्।
ततो निर्य्याय नगरात् प्रययौ पुरुषोत्तमः। मन्त्रयामास च तदा कर्णेन सुचिरं सह।
विसर्ज्जयित्वा राधेयं सर्व्वयादवनन्दनः। ततो जवेन महता तूर्णमश्वानचोदयत्।
ते पिबन्त इवाकाशं दारुकेण प्रचोदिताः। हया जग्मुर्महावेगा मनोमारुतरंहसः।
ते व्यतीत्य महाध्वानं क्षिप्रं श्येना इवाशुगाः। उच्चैर्जग्मुरुपप्लव्यं शार्ङ्गधन्वानमावहन्। ४५७५
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि कुन्तीवाक्ये षट्त्रिंशदधिकशततमोऽध्यायः॥ १३६ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ वैशम्पायन उवाच ॥ कुन्त्यास्तु वचनं श्रुत्वा भीष्मद्रोणौ महारथौ । दुर्य्योधनमिदं वाक्यमूचतुः शासनातिगं ।
श्रुतं ते पुरुषव्याघ्र कुन्त्या कृष्णस्य सन्निधौ । वाक्यमर्थवदव्यग्रमुक्तं धर्म्यमनुत्तमं ।
तत् करिष्यन्ति कौन्तेया वासुदेवस्य सम्मतं । न हि ते जातु शाम्येरन्नृते राज्येन कौरव ।
क्लेशिता हि त्वया पार्था धर्म्मपाशसितास्तदा । सभायां द्रौपदी चैव तैश्च तन्मर्षितं तव ।
कृतास्त्रं ह्यर्ज्जुनं प्राप्य भीमञ्च कृतनिश्चयं । गाण्डीवञ्चेषुधी चैव रथञ्च ध्वजमेव च । ४९८०
नकुलं सहदेवञ्च बलवीर्य्यसमन्वितौ । सहायं वासुदेवञ्च न चंस्यति युधिष्ठिरः ।
प्रत्यचन्ते महाबाहो यथा पार्थेन धीमता । विराटनगरे पूर्व्वं सर्व्वे स्म युधि निर्ज्जिताः ।
दानवा घोरकर्म्माणो निवातकवचा युधि । रौद्रमस्त्रं समादाय दग्धा वानरकेतुना ।
कर्णप्रभृतयश्चेमे त्वञ्चापि कवची रथी । मोचितो घोषयात्रायां पर्य्याप्तं तन्निदर्शनं ।
प्रशाम्य भरतश्रेष्ठ भ्रातृभिः सह पाण्डवैः । रचेमां पृथिवीं सर्व्वां मृत्योर्दंष्ट्रान्तरं गतां । ४९८५
ज्येष्ठो भ्राता धर्म्मशीलो वत्सलः श्लक्ष्णवाक् कविः । तं गच्छ पुरुषव्याघ्रं व्यपनीयेह किल्विषं ।
दृष्टश्च त्वं पाण्डवेन व्यपनीतशरासनः । प्रशान्तभ्रुकुटिः श्रीमान् कृता शान्तिः कुलस्य नः ।
तमभ्येत्य सहामात्यः परिष्वज्य नृपात्मजं । अभिवादय राजानं यथापूर्व्वमरिन्दम ।
अभिवादयमानं त्वां पाणिभ्यां भीष्मपूर्व्वजः । प्रतिगृह्णातु सौहार्द्दात् कुन्तीपुत्त्रो युधिष्ठिरः ।
सिंहस्कन्धोरुबाहुस्त्वां वृत्तायतमहाभुजः । परिष्वजतु बाहुभ्यां भीमः प्रहरतां वरः । ४९९०
कम्बुग्रीवो गुडाकेशस्ततस्त्वां पुष्करेचणः । अभिवादयतां पार्थः कुन्तीपुत्त्रो धनञ्जयः ।
आश्विनेयौ नरव्याघ्रौ रूपेणाप्रतिमौ भुवि । तौ च त्वां गुरुवत् प्रेम्णा पूजया प्रत्युदीयतां ।
मुञ्चन्त्वानन्दजाश्रुणि दाशार्हप्रमुखा नृपाः । सङ्गच्छ भ्रातृभिः सार्द्धं मानं सन्त्यज्य पार्थिव ।
प्रशाधि पृथिवीं कृत्स्नां ततस्तं भ्रातृभिः सह । समालिङ्ग्य च हर्षेण नृपा यान्तु परस्परं ।
अलं युद्धेन राजेन्द्र सुहृदां शृणु वारणं । ध्रुवं विनाशो युद्धे हि चत्रियाणां प्रदृश्यते । ४९९५
ज्योतींषि प्रतिकूलानि दारुणा मृगपचिणः । उत्पाता विविधा वीर दृश्यन्ते चत्रनाशनाः ।
विशेषत इहास्माकं निमित्तानि निवेशने । उल्काभिर्हि प्रदीप्ताभिर्बाध्यते पृतना तव ।
वाहनान्यप्रहृष्टानि रुदन्तीव विशाम्पते । गृध्रास्ते पर्य्युपासन्ते सैन्यानि च समन्ततः ।
नगरं न यथा पूर्व्वं तथा राजनिवेशनं । शिवाश्चाशिवनिर्घोषा दीप्तां सेवन्ति वै दिशं ।
कुरु वाक्यं पितुर्भ्रातुरस्माकञ्च हितैषिणां । त्वय्यायत्तो महाबाहो शमो व्यायाम एव च । ५०००
न चेत् करिष्यसि वचः सुहृदामरिकर्षण । तप्यसे वाहिनीं दृष्ट्वा पार्थबाणप्रपीडितां ।
भीमस्य च महानादं नदतः शुष्मिणो रणे । श्रुत्वा स्मर्त्तासि मे वाक्यं गाण्डीवस्य च निस्वनं ।
यद्येतदपसव्यन्ते वचो मम भविष्यति ।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि भीष्मद्रोणवाक्ये सप्तविंशदधिकशततमोऽध्यायः ॥ १२७ ॥
॥ वैशम्पायन उवाच ॥ एवमुक्तस्तु विमनास्तिर्य्यग्दृष्टिरधोमुखः । संहत्य च भ्रुवोर्मध्यं न किञ्चित् व्याजहार ह ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तं वै विमनसं दृष्ट्वा सम्प्रेक्ष्यान्योन्यमन्तिकात्। पुनरेवोत्तरं वाक्यमुक्तवन्तौ नरर्षभौ।
॥ भीष्म उवाच ॥ शुश्रूषुमनसूयञ्च ब्रह्मण्यं सत्यवादिनं। प्रतियोत्स्यामहे पार्थमतो दुःखतरं नु किं। ४३०५
॥ द्रोण उवाच ॥ अश्वत्थाम्नि यथा पुत्रे भूयो मम धनञ्जये। बहुमानः परो राजन् सन्नतिश्च कपिध्वजे।
तञ्च पुत्रात् प्रियतमं प्रतियोत्स्ये धनञ्जयं। क्षात्त्रं धर्म्ममनुष्ठाय धिगस्तु क्षत्त्रजीविकां।
यस्य लोके समो नास्ति कश्चिदन्यो धनुर्द्धरः। मत्प्रसादात् स वीभत्सुः श्रेयानन्यैर्धनुर्द्धरैः।
मित्रध्रुक् दुष्टभावश्च नास्तिकोऽथानृजुः शठः। न सत्सु लभते पूजां यज्ञे मूर्ख इवागतः।
वार्य्यमाणोऽपि पापेभ्यः पापात्मा पापमिच्छति। चोद्यमानोऽपि पापेन शुभात्मा शुभमिच्छति। ४३१०
मिथ्योपचरिता ह्येते वर्त्तमाना ह्यनुप्रिये। अहितत्वाय कल्पन्ते दोषा भरतसत्तम।
त्वमुक्तः कुरुवृद्धेन मया च विदुरेण च। वासुदेवेन च तथा श्रेयो नैवाभिपद्यसे।
अस्ति मे बलमित्येव सहसा त्वं तितीर्षसि। सग्राहनक्रमकरं गङ्गावेग इवार्णवं।
वास एव यथा त्यक्तं प्रावृण्वानोऽद्य मन्यसे। स्रजं त्यक्तामिव प्राप्य लोभात् यौधिष्ठिरीं श्रियं।
द्रौपदीसहितं पार्थं सायुधैर्भ्रातृभिर्वृतं। वनस्थमपि राज्यस्थः पाण्डवं को विजेष्यति। ४३१५
निदेशे यस्य राजानः सर्व्वे तिष्ठन्ति किङ्कराः। तमैलविलमासाद्य धर्मराजो व्यराजत।
कुबेरसदनं प्राप्य ततो रत्नान्यवाप्य च। स्फीतमाक्रम्य ते राष्ट्रं राज्यमिच्छन्ति पाण्डवाः।
दत्तं हुतमधीतञ्च ब्राह्मणास्तर्पिता धनैः। आवयोर्गतमायुश्च कृतकृत्यौ हि विद्धि नौ।
त्वन्तु हित्वा सुखं राज्यं मित्राणि च धनानि च। विग्रहं पाण्डवैः कृत्वा महद्व्यसनमाप्स्यसि। ४३२०
द्रौपदी यस्य चाशास्ते विजयं सत्यवादिनी। तपोघोरव्रता देवी कथं जेष्यसि पाण्डवं।
मन्त्री जनार्द्दनो यस्य भ्राता यस्य धनञ्जयः। सर्व्वशस्त्रभृतां श्रेष्ठः कथं जेष्यसि पाण्डवं।
सहाया ब्राह्मणा यस्य धृतिमन्तो जितेन्द्रियाः। तमुग्रतपसं वीरं कथं जेष्यसि पाण्डवं।
पुनरुक्तञ्च वक्ष्यामि यत् कार्य्यं भूतिमिच्छता। सुहृदा मज्जमानेषु सुहृत्सु व्यसनार्णवे।
अलं युद्धेन तैर्व्वीरैः शाम्य त्वं कुरुवृद्धये। मागमः ससुतामात्यः सबलश्च पराभवं। ४३२५
॥ इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि भीष्मद्रोणवाक्येऽष्टात्रिंशदधिकशततमोऽध्यायः॥ १३८ ॥
॥ धृतराष्ट्र उवाच ॥ राजपुत्त्रैः परिवृतस्तथाऽमात्यैश्च सञ्जय। उपारोप्य रथे कर्णं निर्यातो मधुसूदनः।
किमब्रवीदमेयात्मा राधेयं परवीरहा। कानि सान्त्वानि गोविन्दः सूतपुत्त्रे प्रयुक्तवान्।
उद्यन् मेघस्वनः काले कृष्णः कर्णमथाब्रवीत्। मृदु वा यदि वा तीक्ष्णं तन्ममाचक्ष्व सञ्जय।
॥ सञ्जय उवाच ॥ आनुपूर्व्व्येण वाक्यानि तीक्ष्णानि च मृदूनि च। प्रियाणि धर्म्मयुक्तानि सत्यानि च हितानि च।
हृदयग्रहणीयानि राधेयं मधुसूदनः। यान्यब्रवीदमेयात्मा तानि मे शृणु भारत। ४३३०
॥ वासुदेव उवाच ॥ उपासितास्ते राधेय ब्राह्मणा वेदपारगाः। तत्त्वार्थं परिपृष्टाश्च नियतेनानुसूयया।
त्वमेव कर्ण जानासि वेदवादान् सनातनान्। त्वमेव धर्म्मशास्त्रेषु सूक्ष्मेषु परिनिष्ठितः।
कानीनश्च सहोढश्च कन्यायां यस्तु जायते। वोढारं पितरं तस्य प्राहुः शास्त्रविदो जनाः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सोऽसि कर्ण तथा जातः पाण्डोः पुत्त्रोऽसि धर्म्मतः । निग्रहाद्धर्म्मशास्त्राणामेहि राजा भविष्यसि ।
पितृपक्षे च ते पार्था मातृपक्षे च वृष्णयः । द्वौ पक्षावभिजानीहि त्वमेतौ पुरुषर्षभ । ४०२५
मया सार्द्धमितो यातमद्य त्वां तात पाण्डवाः । अभिजानन्तु कौन्तेयं पूर्व्वजातं युधिष्ठिरात् ।
पादौ तव ग्रहीष्यन्ति भ्रातरः पञ्च पाण्डवाः । द्रौपदेयास्तथा पञ्च सौभद्रश्चापराजितः ।
राजानो राजपुत्त्राश्च पाण्डवार्थे समागताः । पादौ तव ग्रहीष्यन्ति सर्व्वे चान्धकवृष्णयः ।
हिरण्मयांश्च ते कुम्भान्राजतान् पार्थिवांस्तथा । ओषध्यः सर्व्वबीजानि सर्व्वरत्नानि वीरुधः ।
राजन्या राजकन्याश्चाप्यानयन्त्वाभिषेचनं । षष्ठे त्वाञ्च तथा काले द्रौपद्युपगमिष्यति । ४०३०
अग्निं जुहोतु वै धौम्यः संशितात्मा द्विजोत्तमः । अद्य त्वामभिषिञ्चन्तु चातुर्वैद्या द्विजातयः ।
पुरोहितः पाण्डवानां ब्रह्मकर्म्मण्यवस्थितः । तथैव भ्रातरः पञ्च पाण्डवाः पुरुषर्षभाः ।
द्रौपदेयास्तथा पञ्च पाञ्चालाश्चेदयस्तथा । अहञ्च त्वाऽभिषेक्ष्यामि राजानं पृथिवीपतिं ।
युवराजस्तु ते राजा धर्म्मपुत्त्रो युधिष्ठिरः । गृहीत्वा व्यजनं श्वेतं धर्म्मात्मा संशितव्रतः ।
उपान्वारोहतु रथं कुन्तीपुत्त्रो युधिष्ठिरः । छत्रञ्च ते महाश्वेतं भीमसेनो महाबलः । ४०३५
अभिषिक्तस्य कौन्तेयो धारयिष्यति मूर्द्धनि । किङ्किणीशतनिर्घोषं वैयाघ्रपरिवारणं ।
रथं श्वेतहयैर्युक्तमर्ज्जुनो वाहयिष्यति । अभिमन्युश्च ते नित्यं प्रत्यासन्नो भविष्यति ।
नकुलः सहदेवश्च द्रौपदेयाश्च पञ्च ये । पाञ्चालाश्चानुयास्यन्ति शिखण्डी च महारथः ।
अहञ्च त्वाऽनुयास्यामि सर्व्वे चान्धकवृष्णयः । दाशार्हाः परिवारास्ते दशार्णाश्च विशाम्पते ।
भुङ्क्ष्व राज्यं महाबाहो भ्रातृभिः सह पाण्डवैः । जपैर्होमैश्च संयुक्तो मङ्गलैश्च पृथग्विधैः । ४०४०
पुरोगमाश्च ते सन्तु द्रविडाः सह कुन्तलैः । अन्ध्रास्तालचराश्चैव चुचुपा वेणुपास्तथा ।
स्तुवन्तु त्वाञ्च बहुभिः स्तुतिभिः सूतमागधाः । विजयं वसुषेणस्य घोषयन्तु च पाण्डवाः ।
स त्वं परिवृतः पार्थैर्नक्षत्रैरिव चन्द्रमाः । प्रशाधि राज्यं कौन्तेय कुन्तीञ्च प्रतिनन्दय ।
मित्राणि ते प्रहृष्यन्तु व्यथन्तु रिपवस्तथा । सौभ्रात्रञ्चैव तेऽद्यास्तु भ्रातृभिः सह पाण्डवैः ।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि भगवद्वाक्ये एकोनचत्वारिंशदधिकशततमोऽध्यायः ॥ १३९ ॥
॥ कर्ण उवाच ॥ असंशयं सौहृदान्मे प्रणयाच्चाथ केशव । सख्येन चैव वार्ष्णेय श्रेयस्कामतयैव च । ४०४५
सर्व्वञ्चैवाभिजानामि पाण्डोः पुत्त्रोऽस्मि धर्म्मतः । निग्रहाद्धर्म्मशास्त्राणां यथा त्वं कृष्ण मन्यसे ।
कन्या गर्भं समाधत्त भास्करान्मां जनार्द्दन । आदित्यवचनाच्चैव जातं मां सा व्यसर्ज्जयत् ।
सोऽस्मि कृष्ण तथा जातः पाण्डोः पुत्त्रोऽस्मि धर्म्मतः । कुन्त्या त्वहमपाकीर्णो यथा न कुशलं तथा ।
सूतो हि मामधिरथो दृष्ट्वैवाभ्यनयत् गृहान् । राधायाश्चैव मां प्रादात् सौहार्द्दान्मधुसूदन ।
मत्स्नेहाच्चैव राधायाः सद्यः क्षीरमवातरत् । सा मे मूत्रं पुरीषञ्च प्रतिजग्राह माधव । ४०५०
तस्याः पिण्डव्यपनयं कुर्य्यादस्मद्विधः कथं । धर्मविद्धर्मशास्त्राणां श्रवणे सततं रतः ।
तथा मामभिजानाति सूतश्चाधिरथः सुतं । पितरञ्चाभिजानामि तमहं सौहृदात् सदा ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स हि मे जातकर्म्मादि कारयामास माधव। शास्त्रदृष्टेन विधिना पुत्त्रप्रीत्या जनार्द्दन।
नाम वै वसुषेणेति कारयामास वै द्विजैः। भार्य्याश्चोढा मम प्राप्ते यौवने तत्परिग्रहात्।
तासु पुत्त्राश्च पौत्त्राश्च मम जाता जनार्द्दन। तासु मे हृदयं कृष्ण सञ्जातं कामबन्धनं।
न पृथिव्या सकलया न सुवर्णस्य राशिभिः। हर्षात् भयाद्वा गोविन्द मिथ्या कर्त्तुं तदुत्सहे। ४७६५
धृतराष्ट्रकुले कृष्ण दुर्य्योधनसमाश्रयात्। मया त्रयोदश समा भुक्तं राज्यमकण्टकं।
इष्टञ्च बहुभिर्यज्ञैः सह सूतैर्म्मयाऽसकृत्। आवाहाश्च विवाहाश्च सह सूतैर्म्मया कृताः।
माञ्च कृष्ण समासाद्य कृतः शस्त्रसमुद्यमः। दुर्य्योधनेन वार्ष्णेय विग्रहश्चापि पाण्डवैः।
तस्माद्रणे द्वैरथे मां प्रत्युद्यातारमच्युत। कृतवान् परमं कृष्ण प्रतीपं सव्यसाचिनः।
वधाद्बन्धाद्भयाद्वाऽपि लोभाद्वाऽपि जनार्द्दन। अनृतं नोत्सहे कर्त्तुं धार्त्तराष्ट्रस्य धीमतः। ४७७०
यदि ह्यद्य न गच्छेयं द्वैरथं सव्यसाचिना। अकीर्त्तिः स्याद्धृषीकेश मम पार्थस्य चोभयोः।
असंशयं हितार्थाय ब्रूयास्त्वं मधुसूदन। सर्व्वञ्च पाण्डवाः कुर्य्युस्त्वद्वशित्वान्न संशयः।
मन्त्रस्य नियमं कुर्य्यास्त्वमत्र मधुसूदन। एतदत्र हितं मन्ये सर्व्वं यादवनन्दन।
यदि जानाति मां राजा धर्म्मात्मा संयतेन्द्रियः। कुन्त्याः प्रथमजं पुत्त्रं न स राज्यं ग्रहीष्यति।
प्राप्य चापि महद्राज्यं तदहं मधुसूदन। स्फीतं दुर्य्योधनायैव सम्प्रदद्यामरिन्दम। ४७७५
स एव राजा धर्म्मात्मा शाश्वतोऽस्तु युधिष्ठिरः। नेता यस्य हृषीकेशो योद्धा यस्य धनञ्जयः।
पृथिवी तस्य राष्ट्रञ्च यस्य भीमो महारथः। नकुलः सहदेवश्च द्रौपदेयाश्च माधव।
धृष्टद्युम्नश्च पाञ्चाल्यः सात्यकिश्च महारथः। उत्तमौजा युधामन्युः सत्यधर्म्मा च सौमकिः।
चैद्यश्च चेकितानश्च शिखण्डी चापराजितः। इन्द्रगोपकवर्णाश्च केकया भ्रातरस्तथा।
इन्द्रायुधसवर्णाश्च कुन्तिभोजो महामनाः। मातुलो भीमसेनस्य श्येनजिच्च महारथः। ४७८०
शङ्खः पुत्त्रो विराटस्य निधिस्त्वञ्च जनार्द्दन। महानयं कृष्ण कृतः क्षत्त्रस्य समुदानयः।
राज्यं प्राप्तमिदं दीप्तं प्रथितं सर्व्वराजसु। धार्त्तराष्ट्रस्य वार्ष्णेय शस्त्रयज्ञो भविष्यति।
अस्य यज्ञस्य वेत्ता त्वं भविष्यसि जनार्द्दन। आध्वर्य्यवञ्च ते कृष्ण क्रतावस्मिन् भविष्यति।
होता चैवात्र बीभत्सुः सन्नद्धः स कपिध्वजः। गाण्डीवं स्रुक् तथा चाज्यं वीर्य्यं पुंसां भविष्यति।
ऐन्द्रं पाशुपतं ब्राह्मं स्थूणाकर्णञ्च माधव। मन्त्रास्तत्र भविष्यन्ति प्रयुक्ताः सव्यसाचिना। ४७८५
अनुयातश्च पितरमधिको वा पराक्रमे। गीतं स्तोत्रं स सौभद्रः सम्यक् तत्र भविष्यति।
उद्गाताऽत्र पुनर्भीमः प्रस्तोता सुमहाबलः। विनदन् स नरव्याघ्रो नागानीकान्तकृद्रणे।
स चैव तत्र धर्मात्मा शश्वद्राजा युधिष्ठिरः। जपहोमैः संयुक्तो ब्रह्मत्वं कारयिष्यति।
शङ्खशब्दाः समुरजा भेर्य्यश्च मधुसूदन। उत्कृष्टः सिंहनादश्च सुब्रह्मण्यो भविष्यति।
नकुलः सहदेवश्च माद्रीपुत्त्रौ यशस्विनौ। शामित्रं तौ महावीर्य्यौ सम्यक् तत्र करिष्यतः। ४७९०
कल्माषदण्डा गोविन्द विमला रथपङ्क्तयः। यूपाः समुपकल्पन्तामस्मिन् यज्ञे जनार्द्दन।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कर्णिनालीकनाराचा वत्सदन्तोपबृंहणाः। तोमराः सोमकलशाः पवित्राणि धनूंषि च।
असयोऽत्र कपालानि पुरोडाशाः शिरांसि च। हविस्तु रुधिरं कृष्ण तस्मिन् यज्ञे भविष्यति।
इध्माः परिधयश्चैव शक्तयो विमला गदाः। सदस्या द्रोणशिष्याश्च कृपस्य च शरद्वतः। ४७९५
इषवोऽत्र परिस्तोमा मुक्ता गाण्डीवधन्वना। महारथप्रयुक्ताश्च द्रोणद्रौणिप्रचोदिताः।
प्रतिप्रास्थानिकं कर्म सात्यकिस्तु करिष्यति। दीक्षितो धार्त्तराष्ट्रोऽत्र पत्नी चास्य महाचमूः।
घटोत्कचोऽत्र शामित्रं करिष्यति महाबलः। अतिरात्रे महाबाहो वितते यज्ञकर्म्मणि।
दक्षिणा त्वस्य यज्ञस्य धृष्टद्युम्नः प्रतापवान्। वैतानिके कर्म्ममुखे जातो यः कृष्ण पावकात्।
यदब्रुवमहं कृष्ण कटुकानि स्म पाण्डवान्। प्रियार्थं धार्त्तराष्ट्रस्य तेन तप्ये ह्यकर्मणा। ४८००
यदा द्रक्ष्यसि मां कृष्ण निहतं सव्यसाचिना। पुनश्चितिस्तदा चास्य यज्ञस्याथ भविष्यति।
दुःशासनस्य रुधिरं यदा पास्यति पाण्डवः। आनर्द्दं नर्द्दतः सम्यक् तदा सुत्यं भविष्यति।
यदा द्रोणञ्च भीष्मञ्च पाञ्चाल्यौ पातयिष्यतः। तदा यज्ञावसानन्तत् भविष्यति जनार्द्दन।
दुर्य्योधनं यदा हन्ता भीमसेनो महाबलः। तदा समाप्स्यते यज्ञो धार्त्तराष्ट्रस्य माधव।
स्नुषाश्च प्रस्नुषाश्चैव धृतराष्ट्रस्य सङ्गताः। हतेश्वरा नष्टपुत्त्रा हतनाथाश्च केशव। ४८०५
रुदन्त्यः सह गान्धार्य्या श्वगृध्रकुररराकुले। स यज्ञेऽस्मिन्नवभृथो भविष्यति जनार्द्दन।
विद्यावृद्धा वयोवृद्धाः क्षत्त्रियाः क्षत्त्रियर्षभ। वृथा मृत्युं न कुर्व्वीरंस्त्वत्कृते मधुसूदन।
शस्त्रेण निधनं गच्छेत् समृद्धं क्षत्त्रमण्डलं। कुरुक्षेत्रे पुण्यतमे त्रैलोक्यस्यापि केशव।
यदत्र पुण्डरीकाक्ष विधत्स्व यदभीप्सितं। यथा कार्त्स्न्येन वार्ष्णेय क्षत्त्रं स्वर्गमवाप्नुयात्।
यावत् स्थास्यन्ति गिरयः सरितश्च जनार्द्दन। तावत् कीर्त्तिभवः शब्दः शाश्वतोऽयं भविष्यति। ४८१०
ब्राह्मणाः कथयिष्यन्ति महाभारतमाहवं। समागमेषु वार्ष्णेय क्षत्त्रियाणां यशोधनं।
समुपानय कौन्तेयं युद्धाय मम केशव। मन्त्रसंवरणं कुर्व्वन्नित्यमेव परन्तप।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि कर्णवाक्ये चत्वारिंशदधिकशततमोऽध्यायः॥ १४०॥
॥ सञ्जय उवाच॥ कर्णस्य वचनं श्रुत्वा केशवः परवीरहा। उवाच प्रहसन् वाक्यं स्मितपूर्व्वमिदं यथा।
॥ भगवानुवाच॥ अपि त्वां न लभेत् कर्ण राज्यलम्भोपपादनं। मया दत्तां हि पृथिवीं न प्रशासितुमिच्छसि।
ध्रुवो जयः पाण्डवानामितीदं न संशयः कश्चन विद्यतेऽत्र। जयध्वजो दृश्यते पाण्डवस्य समुच्छ्रितो वानरकेतुरुग्रः। ४८१५
दिव्या माया विहिता भौमनेन समुच्छ्रिता इन्द्रकेतुप्रकाशाः। दिव्यानि भूतानि जयावहानि दृश्यन्ति चैवात्र भयानकानि।
न सज्जते शैलवनस्पतिभ्य ऊर्द्ध्वं तिर्य्यग्योजनमात्ररूपः। श्रीमान् ध्वजः कर्ण धनञ्जयस्य समुच्छ्रितः पावकतुल्यरूपः।
यदा द्रक्ष्यसि सङ्ग्रामे श्वेताश्वं कृष्णसारथिं। ऐन्द्रमस्त्रं विकुर्व्वाणमुभे चाप्यग्निमारुते।
गाण्डीवस्य च निर्घोषं विस्फूर्जितमिवाशनेः। न तदा भविता त्रेता न कृतं द्वापरं न च।
यदा द्रक्ष्यसि सङ्ग्रामे कुन्तीपुत्त्रं युधिष्ठिरं। जपहोमसमायुक्तं स्वां रक्षन्तं महाचमूं। ४८२०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

आदित्यमिव दुर्द्धर्षं तपन्तं शत्रुवाहिनीं। न तदा भविता त्रेता न कृतं द्वापरं न च।
यदा द्रक्ष्यसि सङ्ग्रामे भीमसेनं महाबलं। दुःशासनस्य रुधिरं पीत्वा नृत्यन्तमाहवे।
प्रभिन्नमिव मातङ्गं प्रतिद्विरदघातिनं। न तदा भवति त्रेता न कृतं द्वापरं न च।
यदा द्रक्ष्यसि सङ्ग्रामे द्रोणं शान्तनवं कृपं। सुयोधनञ्च राजानं सैन्धवञ्च जयद्रथं।
युद्धायापततस्तूर्णं वारितान् सव्यसाचिना। न तदा भवति त्रेता न कृतं द्वापरं न च। ४८२५
यदा द्रक्ष्यसि सङ्ग्रामे माद्रीपुत्त्रौ महाबलौ। वाहिनीं धार्त्तराष्ट्राणां क्षोभयन्तौ गजाविव।
विगाढे शस्त्रसम्पाते परवीररथारुजौ। न तदा भविता त्रेता न कृतं द्वापरं न च।
ब्रूयाः कर्ण इतो गत्वा द्रोणं शान्तनवं कृपं। सौम्योऽयं वर्त्तते मासः सुप्रापयवसेन्धनः।
सर्व्वौषधिवनस्फीतः फलवानल्पमक्षिकः। निष्पङ्को रसवत्तोयो नात्युष्णः शिशिरः सुखः।
सप्तमाच्चापि दिवसादमावास्या भविष्यति। सङ्ग्रामो युज्यतां तस्यां तामाहुः शक्रदेवतां। ४८३०
तथा राज्ञो वदेः सर्व्वान् ये युद्धायाभ्युपागताः। यद्वो मनीषितं तद्वै सर्व्वं सम्पादयाम्यहं।
राजानो राजपुत्त्राश्च दुर्य्योधनवशानुगाः। प्राप्य शस्त्रेण निधनं प्राप्स्यन्ति गतिमुत्तमां।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि भगवद्वाक्ये एकचत्वारिंशदधिकशततमोऽध्यायः॥ १४१ ॥
॥ सञ्जय उवाच ॥ केशवस्य तु तद्वाक्यं कर्णः श्रुत्वा हितं शुभं। अब्रवीदभिसंपूज्य कृष्णं तं मधुसूदनं।
जानन्मां किं महाबाहो संमोहयितुमिच्छसि। योऽयं पृथिव्याः कार्त्स्न्येन विनाशः समुपस्थितः।
निमित्तं तत्र शकुनिरहं दुःशासनस्तथा। दुर्य्योधनश्च नृपतिर्धृतराष्ट्रसुतोऽभवत्। ४८३५
असंशयमिदं कृष्ण महद्युद्धमुपस्थितं। पाण्डवानां कुरूणाञ्च घोरं रुधिरकर्द्दमं।
राजानो राजपुत्त्राश्च दुर्य्योधनवशानुगाः। रणे शस्त्राग्निना दग्धाः प्राप्स्यन्ति यमसादनं।
स्वप्ना हि बहवो घोरा दृश्यन्ते मधुसूदन। निमित्तानि च घोराणि तथोत्पाताः सुदारुणाः।
पराजयं धार्त्तराष्ट्रे विजयञ्च युधिष्ठिरे। शंसन्त इति वार्ष्णेय विविधा रोमहर्षणाः।
प्राजापत्यं हि नक्षत्रं ग्रहस्तीक्ष्णो महाद्युतिः। शनैश्चरः पीडयति पीडयन् प्राणिनोऽधिकं। ४८४०
कृत्वा चाङ्गारको वक्रं ज्येष्ठायां मधुसूदन। अनुराधां प्रार्थयते मैत्रं सङ्गमयन्निव।
नूनं महद्भयं कृष्ण कुरूणां समुपस्थितं। विशेषेण हि वार्ष्णेय चित्रां पीडयते ग्रहः।
सोमस्य लक्ष्म व्यावृत्तं राहुरर्कमुपैति च। दिवश्चोल्काः पतन्त्येताः सनिर्घाताः सकम्पनाः।
निष्टनन्ति च मातङ्गा मुञ्चन्त्यश्रूणि वाजिनः। पानीयं यवसञ्चापि नाभिनन्दन्ति माधव।
प्रादुर्भूतेषु चैतेषु भयमाहुरुपस्थितं। निमित्तेषु महाबाहो दारुणं प्राणिनाशनं। ४८४५
अल्पे भुक्ते पुरीषञ्च प्रभूतमिह दृश्यते। वाजिनां वारणानाञ्च मनुष्याणाञ्च केशव।
धार्त्तराष्ट्रेषु सैन्येषु सर्व्वेषु मधुसूदन। पराभवस्य तल्लिङ्गमिति प्राहुर्मनीषिणः।
प्रहृष्टं वाहनं कृष्ण पाण्डवानां प्रचक्षते। प्रदक्षिणा मृगाश्चैव तत्तेषां जयलक्षणं।
अपसव्या मृगाः सर्व्वे धार्त्तराष्ट्रस्य केशव। वाचश्चाप्यशरीरिण्यस्तत्पराभवलक्षणं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

मयूराः पुण्यशकुना हंससारसचातकाः । जीवञ्जीविकसङ्घाश्चाप्यनुगच्छन्ति पाण्डवान् । ४८५०
गृध्राः कङ्का बका श्येना यातुधानास्तथा वृकाः । मक्षिकाणाञ्च सङ्घाता अनुधावन्ति कौरवान् ।
धार्त्तराष्ट्रस्य सैन्येषु भेरीणां नास्ति निस्वनः । अनाहताः पाण्डवानां नदन्ति पटहाः किल ।
उदपानाश्च नर्दन्ति यथा गोवृषभास्तथा । धार्त्तराष्ट्रस्य सैन्येषु तत् पराभवलक्षणं ।
मांसशोणितवर्षञ्च वृष्टं देवेन माधव । तथा गन्धर्व्वनगरं भानुमत्समुपस्थितं ।
सप्राकारं सपरिखं सवप्रञ्चारुतोरणं । कृष्णश्च परिघस्तत्र भानुमावृत्य तिष्ठति । ४८५५
उदयास्तमने सन्ध्ये वेदयन्ती महद्भयं । एकपक्षाक्षिचरणा नर्दन्तो घोरदर्शनं ।
पक्षिणो व्यसृजन् घोरं तत्पराभवलक्षणं । शिवा च वाशते घोरं तत् पराभवलक्षणं ।
कृष्णग्रीवाश्च शकुना रक्तपादा भयानकाः । सन्ध्यामभिमुखा यान्ति तत् पराभवलक्षणं ।
ब्राह्मणान् प्रथमं द्वेष्टि गुरूंश्च मधुसूदन । भृत्यान् भक्तिमतश्चापि तत् पराभवलक्षणं ।
पूर्व्वा दिग्लोहिताकारा शस्त्रवर्णा च दक्षिणा । आमपात्रप्रतीकाशा पश्चिमा मधुसूदन । ४८६०
प्रदीप्ताश्च दिशः सर्व्वा धार्त्तराष्ट्रस्य माधव । महद्भयं वेदयन्ति तस्मिन्नुत्पातदर्शने ।
सहस्रपादं प्रासादं स्वप्नान्ते स्म युधिष्ठिरः । अधिरोहन्मया दृष्टः सह भ्रातृभिरच्युत ।
श्वेतोष्णीषाश्च दृश्यन्ते सर्व्वे ते वै सुवाससः । आसनानि च शुभ्राणि सर्व्वेषामुपलक्षये ।
तव चापि मया कृष्ण स्वप्नान्ते रुधिराविला । अन्त्रेण पृथिवी दृष्टा परिक्षिप्ता जनार्द्दन ।
अस्थिसञ्चयमारूढश्चामितौजा युधिष्ठिरः । सुवर्णपात्र्यां संहृष्टो भुक्तवान् घृतपायसं । ४८६५
युधिष्ठिरो मया दृष्टो ग्रसमानो वसुन्धरां । त्वया दत्तामिमां व्यक्तं भोक्ष्यते स वसुन्धरां ।
उच्चपर्व्वतमारूढो भीमकर्म्मा वृकोदरः । गदापाणिर्नरव्याघ्रो ग्रसन्निव महीमिमां ।
क्षपयिष्यति नः सर्व्वान् स सुव्यक्तं महारणे । विदितं मे हृषीकेश यतो धर्म्मस्ततो जयः ।
पाण्डुरं गजमारूढो गाण्डीवी स धनञ्जयः । त्वया सार्द्धं हृषीकेश श्रिया परमया ज्वलन् ।
यूयं सर्व्वान् वधिष्यध्वं तत्र मे नास्ति संशयः । पार्थिवान् समरे कृष्ण दुर्य्योधनपुरोगमान् । ४८७०
नकुलः सहदेवश्च सात्यकिश्च महारथः । शुक्लकेयूरकण्ठत्राः शुक्लमाल्याम्बरावृताः ।
अधिरूढा नरव्याघ्रा नरवाहनमुत्तमं । त्रय एते मया दृष्टाः पाण्डुरच्छत्रवाससः ।
श्वेतोष्णीषाश्च दृश्यन्ते त्रय एते जनार्द्दन । धार्त्तराष्ट्रेषु सैन्येषु तान् विजानीहि केशव ।
अश्वत्थामा कृपश्चैव कृतवर्म्मा च सात्वतः । रक्तोष्णीषाश्च दृश्यन्ते सर्व्वे माधव पार्थिवाः ।
उष्ट्रप्रयुक्तमारूढौ भीष्मद्रोणौ महारथौ । मया सार्द्धं महाबाहो धार्त्तराष्ट्रेण वा विभो । ४८७५
अगस्त्यशास्ताञ्च दिशं प्रयाताः स्म जनार्द्दन । अचिरेणैव कालेन प्राप्स्यामो यमसादनं ।
अहञ्चान्ये च राजानो यच्च तत्क्षत्रमण्डलं । गाण्डीवाग्निं प्रवेक्ष्याम इति मे नास्ति संशयः ।
॥ कृष्ण उवाच ॥ उपस्थितविनाशेयं नूनमद्य वसुन्धरा । यथा हि मे वचः कर्ण नोपैति हृदयं तव ।
सर्व्वेषां तात भूतानां विनाशे प्रत्युपस्थिते । अनयो नयसङ्काशो हृदयान्नापसर्पति ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

॥ कर्ण उवाच ॥ अपि त्वां कृष्ण पश्याम जीवन्तो ऽस्मान्महारणात् । समुत्तीर्णा महाबाहो वीरक्षत्त्रविनाशनात् ।
अथ वा सङ्गमः कृष्ण स्वर्गे नो भविता ध्रुवं । तत्रेदानीं समेष्यामः पुनः सार्द्धं त्वयाऽनघ । ४८८०
॥ सञ्जय उवाच ॥ इत्युक्त्वा माधवं कर्णः परिष्वज्य च पीडितं । विसर्ज्जितः केशवेन रथोपस्थादवातरत् ।
ततः स्वरथमास्थाय जाम्बूनदविभूषितं । सहास्माभिर्न्निववृते राधेयो दीनमानसः ।
ततः शीघ्रतरं प्रायात् केशवः सहसात्यकिः । पुनरुच्चारयन्वाणीं याहि याहीति सारथिं ।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि कृष्णकर्णसंवादे द्विचत्वारिंशदधिकशततमोऽध्यायः ॥ १४२ ॥
॥ वैशम्पायन उवाच ॥ असिद्धानुनये कृष्णे कुरुभ्यः पाण्डवान् गते । अभिगम्य पृथां क्षत्ता शनैः शोचन्निवाब्रवीत् ।
जानासि मे जीवपुत्त्रि भावं नित्यमविग्रहे । क्रोशतो न च गृह्णीते वचनं मे सुयोधनः । ४८८५
उपपन्नो ह्यसौ राजा चेदिपाञ्चालकेकयैः । भीमार्ज्जुनाभ्यां कृष्णेन युयुधानयमैरपि ।
उपप्लव्ये निविष्टोऽपि धर्म्ममेव युधिष्ठिरः । काङ्क्षते ज्ञातिसौहार्द्दाद्बलवान् दुर्व्वलो यथा ।
राजा तु धृतराष्ट्रोऽयं वयोवृद्धो न शाम्यति । मत्तः पुत्त्रमदेनैव विधर्म्मे पथि वर्त्तते ।
जयद्रथस्य कर्णस्य तथा दुःशासनस्य च । सौबलस्य च दुर्ब्बुद्ध्या मिथो भेदः प्रपत्स्यते ।
अधर्म्मेण हि धर्म्मिष्ठे कृतं वैकार्य्यमीदृशं । येषां तेषामयं धर्म्मः सानुबन्धो भविष्यति । ४८९०
क्रियमाणे बलाद्धर्म्मे कुरुभिः को न संज्वरेत् । असाम्ना केशवे याते समुद्योक्ष्यन्ति पाण्डवाः ।
ततः कुरूणामनयो भविता वीरनाशनः । चिन्तयन्न लभे निद्रामहःसु च निशासु च ।
श्रुत्वा तु कुन्ती तद्वाक्यमर्थकामेन भाषितं । सा निःश्वसन्ती दुःखार्त्ता मनसा विममर्ष ह ।
धिगस्त्वर्थं यत्कृतेऽयं महान् ज्ञातिवधः कृतः । वर्त्स्यते सुहृदाञ्चैव युद्धेऽस्मिन् वै पराभवः । ४८९५
पाण्डवाश्चेदिपाञ्चाला यादवाश्च समागताः । भारतैः सह योत्स्यन्ति किन्नु दुःखमतः परं ।
पश्ये दोषं ध्रुवं युद्धे तथाऽयुद्धे पराभवं । अधनस्य मृतं श्रेयो न हि ज्ञातिक्षयो जयः ।
इति मे चिन्तयन्त्या वै हृदि दुःखं प्रवर्त्तते । पितामहः शान्तनव आचार्य्यश्च युधांपतिः ।
कर्णश्च धार्त्तराष्ट्रार्थं वर्द्धयन्ति भयं मम । नाचार्य्यः कामवान् शिष्यैर्द्रोणो युध्येत जातुचित् ।
पाण्डवेषु कथं हार्द्दं कुर्य्यान्न च पितामहः । अयन्त्वेको वृथादृष्टिर्धार्त्तराष्ट्रस्य दुर्म्मतेः । ४९००
मोहानुवर्त्ती सततं पापो द्वेष्टि च पाण्डवान् । महत्यनर्थे निर्ब्बन्धी बलवांश्च विशेषतः ।
कर्णः सदा पाण्डवानां तन्मे दहति सम्प्रति । आशंसे त्वद्य कर्णस्य मनोऽहं पाण्डवान् प्रति ।
प्रसादयितुमासाद्य दर्शयन्ती यथातथं । तोषितो भगवान् यत्र दुर्व्वासा मे वरं ददौ ।
आह्वानं मन्त्रसंयुक्तं वसन्त्याः पितृवेश्मनि । साऽहमन्तःपुरे राज्ञः कुन्तिभोजपुरस्कृता ।
चिन्तयन्ती बहुविधं हृदयेन विदूयता । बलाबलञ्च मन्त्राणां ब्राह्मणस्य च वाग्बलं । ४९०५
स्त्रीभावाद्बालभावाच्च चिन्तयन्ती पुनःपुनः । धात्र्या विश्रब्धया गुप्ता सखीजनवृता तदा ।
दोषं परिहरन्ती च पितुश्चारित्र्यरक्षिणी । कथन्नु सुकृतं मे स्यान्नापराधवती कथं ।
भवेयमिति सञ्चिन्त्य ब्राह्मणं तं नमस्य च । कौतूहलात्तु तं लब्ध्वा बालिश्यादचरन्तदा ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

कन्या सती देवमर्कमासादयमहन्ततः । योऽसौ कानीनगर्भो मे पुत्त्रवत्परिरचितः ।
कस्मान्न कुर्य्याद्वचनं पथ्यं भ्रातृहितं तथा । इति कुन्ती विनिश्चित्य कार्य्यनिश्चयमुत्तमं । ४९१०
कार्य्यार्थमभिनिश्चित्य ययौ भागीरथीं प्रति । आत्मजस्य ततस्तस्य घृणिनः सत्यसङ्गिनः ।
गङ्गातीरे पृथाऽश्रौषीद्वेदाध्ययननिस्वनं । प्राङ्मुखस्योर्द्ध्वबाहोः सा पर्य्यतिष्ठत पृष्ठतः ।
जप्यावसानं कार्य्यार्थं प्रतीचन्ती तपस्विनी । अतिष्ठत् सूर्य्यतापार्त्ता कर्णस्योत्तरवाससि ।
कौरव्यपत्नी वार्ष्णेयी पद्ममालेव शुष्यती । आपृष्ठतापाज्जप्त्वा स परिवृत्य यतव्रतः ।
दृष्ट्वा कुन्तीमुपातिष्ठदभिवाद्य कृताञ्जलिः । यथान्यायं महातेजा मानी धर्म्मभृतां वरः । ४९१५
उत्स्मयन् प्रणतः प्राह कुन्तीं वैकर्त्तनो वृषः ।

इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि कुन्तीकर्णसमागमे त्रिचत्वारिंशदधिकशततमोऽध्यायः ॥ १४३ ॥

॥ कर्ण उवाच ॥ राधेयोऽहमाधिरथिः कर्णस्त्वामभिवादये । प्राप्ता किमर्थं भवती ब्रूहि किं करवाणि ते ।
॥ कुन्त्युवाच ॥ कौन्तेयस्त्वं न राधेयो न तवाधिरथः पिता । नासि सूतकुले जातः कर्णैतद्विद्धि मे वचः ।
कानीनस्त्वं मया जातः पूर्व्वजः कुक्षिणा धृतः । कुन्तिराजस्य भवने जातस्त्वमसि पुत्त्रक ।
प्रकाशकर्म्मा तपनो योऽयं देवो विरोचनः । अजीजनत् त्वां मय्येष कर्ण शस्त्रभृतां वरं । ४९२०
कुण्डली बद्धकवचो देवगर्भः श्रियावृतः । जातस्त्वमसि दुर्द्धर्षो मया पुत्त्र पितुर्गृहे ।
स त्वं भ्रातॄनसम्बुध्य मोहाद्यदुपसेवसे । धार्त्तराष्ट्रं न तद्युक्तं त्वयि पुत्त्र विशेषतः ।
एतद्धर्म्मफलं पुत्त्र नराणां धर्म्मनिश्चये । यत्तुष्यन्त्यस्य पितरो माता चाप्येकदर्शिनी ।
अर्ज्जुनेनार्ज्जितां पूर्व्वं हृतां लोभादसाधुभिः । आच्छिद्य धार्त्तराष्ट्रेभ्यो भुङ्क्ष्व यौधिष्ठिरीं श्रियं ।
अद्य पश्यन्तु कुरवः कर्णार्ज्जुनसमागमं । सौभ्रात्रेण समालक्ष्य संनमन्तामसाधवः । ४९२५
कर्णार्ज्जुनौ वै भवेतां यथा रामजनार्द्दनौ । असाध्यं किन्नु लोके स्यात् युवयोः सहितात्मनोः ।
कर्ण शोभिष्यसे नूनं पञ्चभिर्भ्रातृभिर्वृतः । देवैः परिवृतो ब्रह्मा वेद्यामिव महाध्वरे ।
उपपन्नो गुणैः सर्व्वैः ज्येष्ठः श्रेष्ठेषु बन्धुषु । सूतपुत्त्रेति मा शब्दः पार्थस्त्वमसि वीर्य्यवान् ।

इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि कुन्तीकर्णसमागमे चतुश्चत्वारिंशदधिशततमोऽध्यायः ॥ १४४ ॥

॥ वैशम्पायन उवाच ॥ ततः सूर्य्यान्निश्चरितां कर्णः शुश्राव भारतीं । दुरत्ययां प्रणयिनीं पितृवत् भास्करेरितां ।
सत्यमाह पृथा वाक्यं कर्ण मातृवचः कुरु । श्रेयस्ते स्यान्नरव्याघ्र सर्व्वमाचरतस्तथा । ४९३०
॥ वैशम्पायन उवाच ॥ एवमुक्तस्य मात्रा च स्वयं पित्रा च भानुना । चचाल नैव कर्णस्य मतिः सत्यधृतेस्तदा ।
॥ कर्ण उवाच ॥ न चैतत् श्रद्दधे वाक्यं क्षत्त्रिये भाषितं त्वया । धर्म्मद्वारं ममैतत् स्यान्नियोगकरणं तव ।
अकरोन्मयि यत् पापं भवती सुमहात्ययं । अपाकीर्णोऽस्मि यन्मातस्तद्यशःकीर्त्तिनाशनं ।
अहञ्चेत् क्षत्त्रियो जातो न प्राप्तः क्षत्त्रसत्क्रियां । त्वत् कृते किन्नु पापीयः शत्रुः कुर्य्यान्ममाहितं ।
क्रियाकाले त्वनुक्रोशमकृत्वा त्वमिमं मम । हीनसंस्कारसमयमद्य मां समचूचुदः । ४९३५
न वै मम हितं पूर्व्वं मातृवच्चेष्टितं त्वया । सा मां सम्बोधयस्यद्य केवलात्महितैषिणी ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कृष्णेन सहितात् को वै न व्यथेत धनञ्जयात्। कोऽद्य भीतं न मां विद्यात् पार्थानां समितिं गतं।
अभ्राता विदितः पूर्व्वं युद्धकाले प्रकाशितः। पाण्डवान् यदि गच्छामि किं मां चत्रं वदिष्यति।
सर्व्वकामैः संविभक्तः पूजितश्च यथासुखं। अहं वै धार्त्तराष्ट्राणां कुर्य्यां तदफलं कथं।
उपनह्य परैर्वैरं ये मां नित्यमुपासते। नमस्कुर्व्वन्ति च सदा वसवो वासवं यथा।
मम प्राणेन ये शत्रून् शक्ताः प्रतिसमासितुं। मन्यन्ते ते कथं तेषामहं छिन्द्यां मनोरथं। ४९४०
मया प्लवेन सङ्ग्रामं तितीर्षन्ति दुरत्ययं। अपारे पारकामा ये त्यजेयं तानहं कथं।
अयं हि कालः सम्प्राप्तो धार्त्तराष्ट्रोपजीविनां। निर्व्वेष्टव्यं मया तत्र प्राणानपरिरचता।
कृतार्थाः सुभृता ये हि कृत्यकाले ह्युपस्थिते। अनवेच्य कृतं पापा विकुर्व्वन्त्यनवस्थिताः।
राजकिल्बिषिणां तेषां भर्तृपिण्डापहारिणां। नैवायं न परो लोको विद्यते पापकर्म्मणां। ४९४५
धृतराष्ट्रस्य पुत्त्राणामर्थे योत्स्यामि ते सुतैः। बलञ्च शक्तिञ्चास्थाय न वै त्वय्यनृतं वदे।
आनृशंस्यमथो वृत्तं रचन् सत्पुरुषोचितं। अतोऽर्थकरमप्येतन्न करोम्यद्य ते वचः।
न च तेषां समारम्भो मयि मोघो भविष्यति। वध्यान् विषह्यान् सङ्ग्रामे न हनिष्यामि ते सुतान्।
युधिष्ठिरञ्च भीमञ्च यमौ चैवार्ज्जुनादृते। अर्ज्जुनेन समं युद्धं मम यौधिष्ठिरे बले।
अर्ज्जुनं हि निहत्याजौ सम्प्राप्तं स्यात् फलं मया। यशसा वाऽपि युज्येयं निहतः सव्यसाचिना। ४९५०
न ते जातु विनङ्क्ष्यन्ति पुत्त्राः पञ्च यशस्विनि। निरर्ज्जुनाः सकर्णा वा सार्ज्जुना वा हते मयि।
इति कर्णवचः श्रुत्वा कुन्ती दुःखात् प्रवेपती। उवाच पुत्त्रमाश्लिष्य कर्णं धैर्य्यादकम्पनं।
एवं वै भाव्यमेतेन चयं यास्यन्ति कौरवाः। यथा त्वं भाषसे कर्ण दैवन्तु बलवत्तरं।
त्वया चतुर्णां भ्रातॄणामभयं शत्रुकर्षण। दत्तं तत् प्रतिजानीहि सङ्गरप्रतिमोचनं।
अनामयं स्वस्ति चेति पृथाऽथो कर्णमब्रवीत्। तां कर्णोऽय तथेत्युक्त्वा ततस्तौ जग्मतुः पृथक्। ४९५५

इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि कुन्तीकर्णसमागमे पञ्चचत्वारिंशदधिकशततमोऽध्यायः॥ १४५॥

॥ वैशम्पायन उवाच॥ आगम्य हास्तिनपुरादुपप्लव्यमरिन्दमः। पाण्डवानां यथावृत्तं केशवः सर्व्वमुक्तवान्।
सम्भाष्य सुचिरं कालं मन्त्रयित्वा पुनः पुनः। स्वमेव भवनं शौरिर्व्विश्रामार्थं जगाम ह।
विसृज्य सर्व्वान्नृपतीन् विराटप्रमुखांस्तदा। पाण्डवा भ्रातरः पञ्च भानावस्तं गते सति।
सन्ध्यामुपास्य ध्यायन्तस्तमेव गतमानसाः। आनाय्य कृष्णं दाशार्हं पुनर्म्मन्त्रममन्त्रयन्।
॥ युधिष्ठिर उवाच॥ त्वया नागपुरं गत्वा सभायां धृतराष्ट्रजः। किमुक्तः पुण्डरीकाच तन्नः शंसितुमर्हसि। ४९६०
॥ वासुदेव उवाच॥ मया नागपुरं गत्वा सभायां धृतराष्ट्रजः। तथ्यं पथ्यं हितञ्चोक्तो न च गृह्णाति दुर्म्मतिः।
॥ युधिष्ठिर उवाच॥ तस्मिन्नुत्पथमापन्ने कुरुवृद्धः पितामहः। किमुक्तवान् हृषीकेश दुर्य्योधनममर्षणं।
आचार्य्यो वा महाभाग भारद्वाजः किमब्रवीत्। पिता वा धृतराष्ट्रस्त्वां गान्धारी वा किमब्रवीत्।
पिता यवीयानस्माकं चत्ता धर्म्मविदां वरः। पुत्त्रशोकाभिसन्तप्तः किमाह धृतराष्ट्रजं।
किञ्च सर्व्वे नृपतयः सभायां ये समासते। उक्तवन्तो यथातत्त्वं तद्ब्रूहि त्वं जनार्द्दन। ४९६५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

उक्तवान् भगवान् सर्व्वं वचनं कुरुमुख्ययोः । धार्त्तराष्ट्रस्य तेषां हि वचनं कुरुसंसदि ।
कामलोभाभिभूतस्य मन्दस्य प्राज्ञमानिनः । अप्रियं हृदये मह्यं तन्न तिष्ठति केशव ।
तेषां वाक्यानि गोविन्द श्रोतुमिच्छाम्यहं विभो । यथा च नाभिपद्येत कालस्तात तथा कुरु ।
भवान् हि नो गतिः कृष्ण भवान्नाथो भवान् गुरुः ।
॥ वासुदेव उवाच ॥ शृणु राजन् यथा वाक्यमुक्तो राजा सुयोधन । मध्ये कुरूणां राजेन्द्र सभायां तन्निबोध मे । ४९००
मया विश्राविते वाक्ये जहास धृतराष्ट्रजः । अथ भीष्मः सुसंक्रुद्ध इदं वचनमब्रवीत् ।
दुर्य्योधन निबोधेदं कुलार्थे यद्ब्रवीमि ते । तच्छ्रुत्वा राजशार्दूल स्वकुलस्य हितं कुरु ।
मम तात पिता राजन् शान्तनुर्लोकविश्रुतः । तस्याहमेक एवासं पुत्त्रः पुत्त्रवतां वर ।
तस्य बुद्धिः समुत्पन्ना द्वितीयः स्यात् कथं सुतः । एकं पुत्त्रमपुत्त्रं वै प्रवदन्ति मनीषिणः ।
न चोच्छेदं कुलं यायात् विस्तीर्य्येत कथं यशः । तस्याहमीप्सितं बुद्ध्वा कालीं मातरमाहरं । ४९०५
प्रतिज्ञां दुष्करां कृत्वा पितुरर्थे कुलस्य च । अराजा चोर्द्ध्वरेताश्च यथा सुविदितं तव ।
प्रतीतो निवसाम्येष प्रतिज्ञामनुपालयन् । तस्यां जज्ञे महाबाहुः श्रीमान् कुरुकुलोद्वहः ।
विचित्रवीर्य्यो धर्म्मात्मा कनीयान्मम पार्थिव । स्वर्य्यातेऽहं पितरि तं स्वराज्ये संन्यवेशयं ।
विचित्रवीर्य्यं राजानं भृत्यो भूत्वा ह्यधश्चरः । तस्याहं सदृशान् दारान्राजेन्द्र समुपाहरं ।
जित्वा पार्थिवसङ्घातमपि ते बहुशः श्रुतं । ततो रामेण समरे द्वन्द्वयुद्धमुपागमं । ४९१०
स हि रामभयादेभिर्नागरैर्विप्रवासितः । दारेष्वतिप्रसक्तश्च यक्ष्माणं समपद्यत ।
यदा त्वराजके राज्ये न ववर्ष सुरेश्वरः । तदाऽभ्यधावन्मामेव प्रजाः क्षुद्भयपीडिताः ।
॥ प्रजा ऊचुः ॥ उपक्षीणाः प्रजाः सर्व्वा राजा भव भवाय नः । ईतीः प्रणुद भद्रन्ते शान्तनोः कुलवर्द्धन ।
पीड्यन्ते ते प्रजाः सर्व्वा व्याधिभिर्भृशदारुणैः । अल्पावशिष्टा गाङ्गेय ताः परित्रातुमर्हसि ।
व्याधीन् प्रणुद वीर त्वं प्रजा धर्म्मेण पालय । त्वयि जीवति माराष्ट्रं विनाशमुपगच्छतु । ४९१५
॥ भीष्म उवाच ॥ प्रजानां क्रोशतीनां वै नैवाक्षुभ्यत मे मनः । प्रतिज्ञां रक्षमाणस्य सद्वृत्तं स्मरतस्तथा ।
ततः पौरा महाराज माता काली च मे शुभा । भृत्याः पुरोहिताचार्य्या ब्राह्मणाश्च बहुश्रुताः ।
मामूचुर्भृशसन्तप्ता भव राजेति सन्ततं । प्रतीपरक्षितं राष्ट्रं त्वां प्राप्य विनशिष्यति ।
स त्वमस्मद्धितार्थं वै राजा भव महामते । इत्युक्तः प्राञ्जलिर्भूत्वा दुःखितो भृशमातुरः ।
तेभ्यो न्यवेदयन्तत्र प्रतिज्ञां पितृगौरवात् । ऊर्द्ध्वरेता ह्यराजा च कुलस्यार्थे पुनः पुनः । ४९२०
विशेषतस्त्वदर्थञ्च धुरि मा मां नियोजय । ततोऽहं प्राञ्जलिर्भूत्वा मातरं सम्प्रसादयं ।
नाम्ब शान्तनुना जातः कौरवं वंशमुद्वहन् । प्रतिज्ञां वितथां कुर्य्यामिति राजन् पुनः पुनः ।
विशेषतस्त्वदर्थञ्च प्रतिज्ञां कृतवानहं । अहं प्रेष्यश्च दासश्च तवाम्ब सुतवत्सले ।
एवं तामनुनीयाहं मातरं जनमेव च । अयाचं भ्रातृदारेषु तदा व्यासं महामुनिं ।
सह मात्रा महाराज प्रसाद्य तमृषिं तदा । अपत्यार्थं महाराज प्रसादं कृतवांश्च सः । ४९२५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

त्रीन् स पुत्रानजनयत् तदा भरतसत्तम। अन्धः करणहीनत्वान्नैव राजा पिता तव।
राजा तु पाण्डुरभवन्महात्मा लोकविश्रुतः। स राजा तस्य ते पुत्राः पितुर्दायाद्यहारिणः।
मा तात कलहं कार्षी राज्यस्यार्द्धं प्रदीयतां ।मयि जीवति राज्यं कः संप्रशासेत् पुमानिह।
माऽवमंस्था वचो मह्यं शममिच्छामि वः सदा। न विशेषोऽस्ति मे पुत्र त्वयि तेषु च पार्थिव।
मतमेतत् पितुस्तुभ्यं गान्धार्य्या विदुरस्य च। श्रोतव्यं खलु वृद्धानां माऽभिशङ्कीर्वचो मम। ५०००
नाशयिष्यसि मा सर्व्वमात्मानं पृथिवीं तथा।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि भगवद्वाक्ये षट्चत्वारिंशदधिकशततमोऽध्यायः॥ १४६ ॥
॥ वासुदेव उवाच ॥ भीष्मेणोक्ते ततो द्रोणो दुर्य्योधनमभाषत। मध्ये नृपाणां भद्रन्ते वचनं वचनक्षमः।
॥ द्रोण उवाच ॥ प्रातीपः शान्तनुस्तात कुलस्यार्थे यथा स्थितः। यथा देवव्रतो भीष्मः कुलस्यार्थे स्थितोऽभवत्।
तथा पाण्डुर्नरपतिः सत्यसन्धो जितेन्द्रियः। राजा कुरूणां धर्म्मात्मा सुव्रतः सुसमाहितः।
ज्येष्ठाय राज्यमददद्धृतराष्ट्राय धीमते। यवीयसे तथा क्षत्त्रे कुरूणां वंशवर्द्धनः। ५००५
ततः सिंहासने राजन् स्थापयित्वैनमच्युतं। वनं जगाम कौरव्यो भार्य्याभ्यां सहितो नृपः।
नीचैः स्थित्वा तु विदुर उपास्ते स्म विनीतवत्। प्रेष्यवत् पुरुषव्याघ्रो वालव्यजनमुत्क्षिपन्।
ततः सर्व्वाः प्रजास्तात धृतराष्ट्रं जनेश्वरं। अन्वपद्यन्त विधिवत् यथा पाण्डुं जनाधिपं।
विसृज्य धृतराष्ट्राय राज्यं स विदुराय च। चचार पृथिवीं पाण्डुः सर्व्वां परपुरञ्जयः।
कोषसम्वलने दाने भृत्यानाञ्चान्ववेक्षणे। भरणे चैव सर्व्वस्य विदुरः सत्यसङ्गरः। ५०१०
सन्धिविग्रहसंयुक्तो राज्ञः संवाहनक्रियाः। अवैक्षत महातेजा भीष्मः परपुरञ्जयः।
सिंहासनस्थो नृपतिर्धृतराष्ट्रो महाबलः। अन्वास्यमानः सततं विदुरेण महात्मना।
कथं तस्य कुले जातः कुलभेदं व्यवस्यसि। सम्भूय भ्रातृभिः सार्द्धं भुङ्क्ष्व भोगान् जनाधिप।
ब्रवीम्यहन्न कार्पण्यात् नार्थहेतोः कथञ्चन। भीष्मेण दत्तमिच्छामि न त्वया राजसत्तम।
नाहं त्वत्तोऽभिकाङ्क्षिष्ये वृत्त्युपायं जनाधिप। यतो भीष्मस्ततो द्रोणो यद्भीष्मस्त्वाह तत्कुरु। ५०१५
दीयतां पाण्डुपुत्रेभ्यो राज्यार्द्धमरिकर्षण। सममाचार्य्यकं तात तव तेषाञ्च मे सदा।
अश्वत्थामा यथा मह्यं तथा श्वेतहयो मम। बहुना किं प्रलापेन यतो धर्म्मस्ततो जयः।
॥ वासुदेव उवाच॥ एवमुक्ते महाराज द्रोणेनामिततेजसा। व्याजहार ततो वाक्यं विदुरः सत्यसङ्गरः।
पितुर्व्वदनमन्वीक्ष्य परिवृत्य च धर्म्मवित्।
॥ विदुर उवाच ॥ देवव्रत निबोधेदं वचनं मम भाषतः। प्रनष्टः कौरवो वंशस्त्वया यत् पुनरुद्धृतः। ५०२०
तन्मे विलपमानस्य वचनं समुपेक्षसे। कोऽयं दुर्य्योधनो नाम कुलेऽस्मिन् कुलपांसनः।
तस्य लोभाभिभूतस्य मतिं समनुवर्त्तसे। अनार्य्यस्याकृतज्ञस्य लोभेन हतचेतसः।
अतिक्रामति यः शास्त्रं पितुर्द्धर्म्मार्थदर्शिनः। एते नश्यन्ति कुरवो दुर्य्योधनकृतेन वै।
यथा ते न प्रणश्येयुर्महाराज तथा कुरु। माञ्चैव धृतराष्ट्रञ्च सर्व्वमेव महीपते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

चित्रकार इवालेख्यं कृत्वा स्थापितवानसि । प्रजापतिः प्रजाः सृष्ट्वा यथा संहरते तथा । ५०२५
नोपेक्षस्व महाबाहो पश्यमानः कुलक्षयं । अथ तेऽद्य मतिर्नष्टा विनाशे प्रत्युपस्थिते ।
वनं गच्छ मया सार्द्धं धृतराष्ट्रेण चैव ह । बद्ध्वा वा निकृतिप्रज्ञं धार्त्तराष्ट्रं सुदुर्म्मतिं ।
शाधीदं राज्यमद्याशु पाण्डवैरभिरक्षितं । प्रसीद राजशार्दूल विनाशो दृश्यते महान् ।
पाण्डवानां कुरूणाञ्च राज्ञाममिततेजसां । विररामैवमुक्त्वा तु विदुरो दीनमानसः ।
प्रध्यायमानः स तदा निःश्वसंश्च पुनः पुनः । ५०३०
ततोऽथ राज्ञः सुबलस्य पुत्री धर्म्मार्थयुक्तं कुलनाशभीता । दुर्य्योधनं पापमतिं नृशंसं राज्ञां समक्षं सुतमाह कोपात् ।
ये पार्थिवा राजसभां प्रविष्टा ब्रह्मर्षयो ये च सभासदोऽन्ये । शृण्वन्तु वक्ष्यामि तवापराधं पापस्य सामात्यपरिच्छदस्य ।
राज्यं कुरूणामनुपूर्व्वभोज्यं क्रमागतो नः कुलधर्म्म एषः । त्वं पाप बुद्धेऽतिनृशंसकर्म्मन् राज्यं कुरूणामनयाद्विहंसि ।
राज्ये स्थितो धृतराष्ट्रो मनीषी तस्यानुजो विदुरो दीर्घदर्शी । एतावतिक्रम्य कथं नृपत्वं दुर्य्योधन प्रार्थयसेऽद्य मोहात् ।
राजा च क्षत्ता च महानुभावौ भीष्मे स्थिते परवन्तौ भवेतां । अयन्तु धर्म्मज्ञतया महात्मा न राज्यकामो नृवरो नदीजः । ५०३०
राज्यन्तु पाण्डोरिदमप्रधृष्यं तस्याद्य पुत्राः प्रभवन्ति नान्ये । राज्यं तदेतन्निखिलं पाण्डवानां पैतामहं पुत्त्रपौत्त्रानुगामि ।
यद्वै ब्रूते कुरुमुख्यो महात्मा देवव्रतः सत्यसन्धो मनीषी । सर्व्वं तदस्माभिरहत्य कार्यं राज्यं स्वधर्म्मं परिपालयद्भिः ।
अनुज्ञया चाथ महाव्रतस्य ब्रूयान्नृपोऽयं विदुरस्तथैव । कार्य्यं भवेत्तत् सुहृद्भिर्नियुज्य धर्म्मं पुरस्कृत्य सुदीर्घकालं ।
न्यायागतं राज्यमिदं कुरूणां युधिष्ठिरः शास्तु वै धर्म्मपुत्त्रः । प्रचोदितो धृतराष्ट्रेण राज्ञा पुरस्कृतः शान्तनवेन चैव ।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि कृष्णवाक्ये सप्तचत्वारिंशदधिकशततमोऽध्यायः ॥ १४७ ॥
॥ वासुदेव उवाच ॥ एवमुक्ते तु गान्धार्य्या धृतराष्ट्रो जनेश्वरः । दुर्य्योधनमुवाचेदं राज्ञां मध्ये जनाधिप । ५०४०
दुर्य्योधन निबोधेदं यत् त्वां वक्ष्यामि पुत्त्रक । तथा तत् कुरु भद्रन्ते यद्यस्ति पितृगौरवं ।
सोमः प्रजापतिः पूर्व्वं कुरूणां वंशवर्द्धनः । सोमाद्बभूव षष्ठोऽयं ययातिर्नहुषात्मजः ।
तस्य पुत्त्रा बभूवुर्हि पञ्च राजर्षिसत्तमाः । तेषां यदुर्म्महातेजा ज्येष्ठः समभवत् प्रभुः ।
पूरुर्यवीयांश्च ततो योऽस्माकं वंशवर्द्धनः । शर्म्मिष्ठया संप्रसूतो दुहित्रा वृषपर्व्वणः ।
यदुश्च भरतश्रेष्ठ देवयान्याः सुतोऽभवत् । दौहित्रस्तात शुक्रस्य काव्यस्यामिततेजसः । ५०४५
यादवानां कुलकरो बलवान् वीर्य्यसम्मतः । अवमेने स तु क्षत्त्रं दर्पपूर्णः सुमन्दधीः ।
न चातिष्ठत् पितुः शास्त्रे बलदर्पविमोहितः । अवमेने च पितरं भ्रातृंश्चाप्यपराजितः ।
पृथिव्याञ्चतुरन्तायां यदुरेवाभवद्बली । वशे कृत्वा स नृपतीन् न्यवसन्नागसाह्वये ।
तं पिता परमक्रुद्धो ययातिर्नहुषात्मजः । शशाप पुत्त्रं गान्धारे राज्याच्चापि व्यरोपयत ।
ये चैनमन्ववर्त्तन्त भ्रातरो बलदर्पितं । शशाप तानपि क्रुद्धो ययातिस्तनयानथ । ५०५०
यवीयांसं ततः पूरुं पुत्त्रं स्ववशवर्त्तिनं । राज्ये निवेशयामास विधेयं नृपसत्तमः ।
एवं ज्येष्ठोऽप्यथोत्सिक्तो न राज्यमभिजायते । यवीयांसोऽपि जायन्ते राज्यं वृद्धोपसेवया ।
तथैव सर्व्वधर्मज्ञः पितुर्म्मम पितामहः । प्रतीपः पृथिवीपालस्त्रिषु लोकेषु विश्रुतः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तस्य पार्थिवसिंहस्य राज्यं धर्म्मेण शासतः। त्रयः प्रजज्ञिरे पुत्त्रा देवकल्पा यशस्विनः।
देवापिरभवज्ज्येष्ठो वाह्लीकस्तदनन्तरं। तृतीयः शान्तनुस्तात धृतिमान् मे पितामहः।
देवापिस्तु महातेजास्त्वग्दोषी राजसत्तमः। धार्म्मिकः सत्यवादी च पितुः शुश्रूषणे रतः। ५०५५
पौरजानपदानाञ्च सम्मतः साधुसत्कृतः। सर्व्वेषां बालवृद्धानां देवापिर्हृदयङ्गमः।
वदान्यः सत्यसन्धश्च सर्व्वभूतहिते रतः। वर्त्तमानः पितुः शास्त्रे ब्राह्मणानां तथैव च।
वाह्लीकस्य प्रियो भ्राता शान्तनोश्च महात्मनः। सौभ्रात्रञ्च परं तेषां सहितानां महात्मनां।
अथ कालस्य पर्य्याये वृद्धो नृपतिसत्तमः। सम्भारानभिषेकार्थं कारयामास शास्त्रतः। ५०६०
कारयामास सर्व्वाणि मङ्गलार्थानि वै विभुः। तं ब्राह्मणाश्च वृद्धाश्च पौरजानपदैः सह।
सर्व्वे निवारयामासुर्देवापेरभिषेचनं। स तच्छ्रुत्वा तु नृपतिरभिषेकनिवारणं।
अश्रुकण्ठोऽभवद्राजा पर्य्यशोचत चात्मजं। एवं वदान्यो धर्म्मज्ञः सत्यसन्धश्च सोऽभवत्।
प्रियः प्रजानामपि स त्वग्दोषेण प्रदूषितः। हीनाङ्गं पृथिवीपालं नाभिनन्दन्ति देवताः।
इति कृत्वा नृपश्रेष्ठं प्रत्यषेधन् द्विजर्षभाः। ततः प्रव्यथिताङ्गोऽसौ पुत्त्रशोकसमन्वितः। ५०६५
निवारितं नृपं दृष्ट्वा देवापिः संश्रितो वनं। वाह्लीको मातुलकुलं त्यक्त्वा राज्यं समाश्रितः।
पितृभ्रातॄन् परित्यज्य प्राप्तवान् पुरमृद्धिमत्। वाह्लीकेन त्वनुज्ञातः शान्तनुर्लोकविश्रुतः।
पितर्य्युपरते राजन् राज्यकांममकारयत्। तथैवाहं मतिमता परिचिन्त्येह पाण्डुना।
ज्येष्ठः प्रभ्रंशितो राज्यात् हीनाङ्ग इति भारत। पाण्डुस्तु राज्यं सम्प्राप्तः कनीयानपि सन्नृपः।
विनाशे तस्य पुत्त्राणामिदं राज्यमरिन्दम। मय्यभागिनि राज्याय कथं त्वं राज्यमिच्छसि। ५०७०
अराजपुत्त्रो ह्यस्वामी परस्वं हर्त्तुमिच्छसि।

युधिष्ठिरो राजपुत्त्रो महात्मा न्यायागतं राज्यमिदञ्च तस्य। स कौरवस्यास्य कुलस्य भर्त्ता प्रशासिता चैव महानुभावः।
स सत्यसन्धः स तथा ऽप्रमत्तः शास्त्रे स्थितो बन्धुजनस्य साधुः। प्रियः प्रजानां सुहृदानुकम्पी जितेन्द्रियः साधुजनस्य भर्त्ता।
क्षमा तितिक्षा दम आर्जवञ्च सत्यव्रतत्वं श्रुतमप्रमादः। भूतानुकम्पा ह्यनुशासनञ्च युधिष्ठिरे राजगुणाः समस्ताः।
अराजपुत्त्रस्त्वमनार्य्यवृत्तो लुब्धः सदा बन्धुषु पापबुद्धिः। क्रमागतं राज्यमिदं परेषां हर्त्तुं कथं शक्ष्यसि दुर्व्विनीत। ५०७५
प्रयच्छ राज्यार्द्धमपेतमोहः सवाहनं त्वं सपरिच्छदञ्च। ततोऽवशेषं तव जीवितस्य सहानुजस्यैव भवेन्नरेन्द्र।

इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि कृष्णवाक्ये ऽष्टचत्वारिंशदधिकशततमोऽध्यायः॥ १४८॥

वासुदेव उवाच॥ एवमुक्ते तु भीष्मेण द्रोणेन विदुरेण च। गान्धार्य्या धृतराष्ट्रेण न वै मन्दो ऽन्वबुध्यत।
अवधूयोत्थितो मन्दः क्रोधसंरक्तलोचनः। अन्वद्रवन्त तं पश्चात् राजानस्त्यक्तजीविताः।
आज्ञापयच्च राज्ञस्तान् पार्थिवान् नष्टचेतसः। प्रयाध्वं वै कुरुक्षेत्रं पुष्योऽद्येति पुनः पुनः।
ततस्ते पृथिवीपालाः प्रययुः सहसैनिकाः। भीष्मं सेनापतिं कृत्वा संहृष्टाः कालचोदिताः। ५०८०
अक्षौहिण्यो दशैका च कौरवाणां समागताः। तासां प्रमुखतो भीष्मस्तालकेतुर्व्यरोचत।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

यदत्रयुक्तं प्राप्तञ्च तद्विधत्स्व विशाम्पते । उक्तं भीष्मेण तद्वाक्यं द्रोणेन विदुरेणच ।
गान्धार्य्या धृतराष्ट्रेण समक्षं मम भारतं । एतत्ते कथितं राजन् यद्वृत्तं कुरुसंसदि ।
साम्यमादौ प्रयुक्तं मे राजन् सौभ्रात्रमिच्छता । अभेदायास्य वंशस्य प्रजानाञ्च विवृद्धये ।
पुनर्भेदश्च मे युक्तो यदा साम्ना न गृह्यते । कर्म्मानुकीर्त्तनञ्चैव देवमानुषसंहितं । ५०८५
यदा नाद्रियते वाक्यं सामपूर्व्वं सुयोधनः । तदा मया समानीय भेदिताः सर्व्वपार्थिवाः ।
अद्भुतानिच घोराणि दारुणानि च भारत । अमानुषाणि कर्म्माणि दर्शितानि मया विभो ।
निभर्त्सयित्वा राज्ञस्तांस्तृणीकृत्य सुयोधनं । राधेयं भीषयित्वा च सौबलञ्च पुनः पुनः ।
द्यूततो धार्त्तराष्ट्राणां निन्दां कृत्वा तथा पुनः । भेदयित्वा नृपान् सर्व्वान् वाग्भिर्मन्त्रेण चासकृत् ।
पुनः सामाभिसंयुक्तं सम्प्रदानमथाब्रुवं । अभेदात् कुरुवंशस्य कार्य्ययोगात्तथैव च । ५०९०
ते शूरा धृतराष्ट्रस्य भीष्मस्य विदुरस्य च । तिष्ठेयुः पाण्डवाः सर्व्वे हित्वा मानमधश्चराः ।
प्रयच्छन्तु च ते राज्यमनीशास्ते भवन्तु च । यथाह राजा गाङ्गेयो विदुरश्च हितं तव ।
सर्व्वं भवतु ते राज्यं पञ्च ग्रामान् विसर्ज्जय । अन्यथा भरणीया हि पितुस्ते राजसत्तम ।
एवमुक्तोऽपि दुष्टात्मा नैव भागं व्यमुञ्चत । दण्डञ्चतुर्थं पश्यामि तेषु पापेषु नान्यथा ।
निर्य्यातास्च विनाशाय कुरुक्षेत्रं नराधिपाः । एतत्ते कथितं राजन् यद्वृत्तं कुरुसंसदि । ५०९५
न ते राज्यं प्रयच्छन्ति विना युद्धेन पाण्डव । विनाशहेतवः सर्व्वे प्रत्युपस्थितमृत्यवः ।
इति श्रीमहाभारते उद्योगपर्व्वणि भगवद्यानपर्व्वणि भगवद्वाक्ये एकोनपञ्चाशदधिकशततमोऽध्यायः ॥ १४९ ॥ समाप्तञ्च भगवद्यानपर्व्व ॥

॥ अथ सैन्यनिर्याणपर्व्व ॥ १० ॥

॥ वैशम्पायन उवाच ॥ जनार्द्दनवचः श्रुत्वा धर्म्मराजो युधिष्ठिरः । भ्रातॄनुवाच धर्म्मात्मा समक्षे केशवस्य ह ।
श्रुतं भवद्भिर्यद्वृत्तं सभायां कुरुसंसदि । केशवस्यापि यद्वाक्यं तत् सर्व्वमवधारितं ।
तस्मात् सेनाविभागं मे कुरुध्वं नरसत्तमाः । अक्षौहिण्यश्च सप्तैताः समेता विजयाय वै ।
तासां ये पतयः सप्त विख्यातास्तान्निबोधत । द्रुपदश्च विराटश्च धृष्टद्युम्नशिखण्डिनौ । ५१००
सात्यकिश्चेकितानश्च भीमसेनश्च वीर्य्यवान् । एते सेनाप्रणेतारो वीराः सर्व्वे तनुत्यजः ।
सर्व्वे वेदविदः शूराः सर्व्वे सुचरितव्रताः । ह्रीमन्तो नीतिमन्तश्च सर्व्वे युद्धविशारदाः ।
इष्वस्त्रकुशलाः सर्व्वे तथा सर्व्वास्त्रयोधिनः । सप्तानामपि यो नेता सेनानां प्रविभागवित् ।
यः सहेत रणे भीष्मं शरार्च्चिः पावकोपमं । तन्तावत् सहदेवात्र प्रब्रूहि कुरुनन्दन ।
स्वमतं पुरुषव्याघ्र को नः सेनापतिः क्षमः । ५१०५
॥ सहदेव उवाच ॥ संयुक्त एकदुःखश्च वीर्य्यवांश्च महीपतिः । यं समाश्रित्य धर्म्मज्ञं स्वमंशमनुयुङ्क्ष्महे ।
मत्स्यो विराटो बलवान् कृतास्त्रो युद्धदुर्मदः । प्रसहिष्यति सङ्ग्रामे भीष्मं तांश्च महारथान् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ वैशम्पायन उवाच ॥ तथोक्ते सहदेवेन वाक्ये वाक्यविशारदः । नकुलोऽनन्तरं तस्मादिदं वचनमब्रवीत् ।
वयसा शास्त्रतो धैर्य्यात् कुलेनाभिजनेन च । ह्रीमान् बलान्वितः श्रीमान् सर्व्वशास्त्रविशारदः ।
वेद शास्त्रं भरद्वाजाद्दुर्द्धर्षः सत्यसङ्गरः । यो नित्यं स्पर्द्धते द्रोणं भीष्मञ्चैव महाबलं ।
श्लाघ्यः पार्थिववंशस्य प्रमुखे वाहिनीपतिः । पुत्त्रपौत्त्रैः परिवृतः शतशाख इव द्रुमः । ५११०
यस्तताप तपो घोरं सदारः पृथिवीपतिः । रोषात् द्रोणविनाशाय वीरः समितिशोभनः ।
पितेवास्मान् समाधत्ते यः सदा पार्थिवर्षभः । श्वशुरो द्रुपदोऽस्माकं सेनाऽग्रं सम्प्रकर्षतु ।
स द्रोणभीष्मावायान्तौ सहेदिति मतिर्म्मम । स हि दिव्यास्त्रविद्राजा सखा चाङ्गिरसो नृपः ।
माद्रीसुताभ्यामुक्ते तु स्वमते कुरुनन्दनः । वासविर्वासवसमः सव्यसाच्यब्रवीद्वचः । ५११५
योऽयं तपःप्रभावेन ऋषिसन्तोषणेन च । दिव्यः पुरुष उत्पन्नो ज्वालावर्णो महाभुजः ।
धनुष्मान् कवची खड्गी रथमारुह्य दंशितः । दिव्यैर्हयवरैर्युक्तैरग्निकुण्डात् समुत्थितः ।
गर्ज्जन्निव महामेघो रथघोषेण वीर्य्यवान् । सिंहसंहननो वीरः सिंहतुल्यपराक्रमः ।
सिंहोरस्कः सिंहभुजः सिंहवक्षा महाबलः । सिंहप्रगर्ज्जनो वीरः सिंहस्कन्धो महाद्युतिः ।
सुभ्रूः सुदंष्ट्रः सुहनुः सुबाहुः सुमुखोऽकृशः । सुजत्रुः सुविशालाक्षः सुपादः सुप्रतिष्ठितः । ५१२०
अभेद्यः सर्व्वशस्त्राणां प्रभिन्न इव वारणः । जज्ञे द्रोणविनाशाय सत्यवादी जितेन्द्रियः ।
धृष्टद्युम्नमहं मन्ये सहेद्भीष्मस्य सायकान् । वज्राशनिसमस्पर्शान् दीप्तास्यानुरगानिव ।
यमदूतसमान् वेगे निपाते पावकोपमान् । रामेणाजौ विषहितान् वज्रनिष्पेषदारुणान् ।
पुरुषं तं न पश्यामि यः सहेत महाव्रतं । धृष्टद्युम्नमृते राजन्निति मे धीयते मतिः ।
क्षिप्रहस्तश्चित्रयोधी मतः सेनापतिर्म्मम । अभेद्यकवचः श्रीमान् मातङ्ग इव यूथपः । ५१२५
॥ भीमसेन उवाच॥ वधार्थं यः समुत्पन्नः शिखण्डी द्रुपदात्मजः । वदन्ति सिद्धा राजेन्द्र ऋषयश्च समागताः ।
यस्य सङ्ग्राममध्ये तु दिव्यमस्त्रं प्रकुर्व्वतः । रूपं द्रक्ष्यन्ति पुरुषा रामस्येव महात्मनः ।
न तं युद्धे प्रपश्यामि यो भिन्द्यात्तं शिखण्डिनं । शस्त्रेण समरे राजन् सन्नद्धं स्यन्दने स्थितं ।
द्वैरथे समरे नान्यो भीष्मं हन्यान्महाव्रतं । शिखण्डिनमृते वीरं स मे सेनापतिर्मतः ।
॥ युधिष्ठिर उवाच ॥ सर्व्वस्य जगतस्तात सारासारं बलाबलं । सर्व्वं जानाति धर्म्मात्मा मतमेषाञ्च केशवः । ५१३०
यमाह कृष्णो दाशार्हः सोऽस्तु सेनापतिर्म्मम । कृतास्त्रोऽप्यकृतास्त्रो वा वृद्धो वा यदि वा युवा ।
एष नो विजये मूलमेष तात विपर्य्यये । अत्र प्राणाश्च राज्यञ्च भावाभावौ सुखासुखे ।
एष धाता विधाता च सिद्धिरत्र प्रतिष्ठिता । यमाह कृष्णो दाशार्हः सोऽस्तु नो वाहिनीपतिः ।
ब्रवीतु वदतां श्रेष्ठो निशा समभिवर्त्तते । ततः सेनापतिं कृत्वा कृष्णस्य वशवर्त्तिनः ।
रात्रेः शेषे व्यतिक्रान्ते प्रयास्यामो रणाजिरं । अधिवासितशस्त्राश्च कृतकौतुकमङ्गलाः । ५१३५
॥ वैशम्पायन उवाच ॥ तस्य तद्वचनं श्रुत्वा धर्म्मराजस्य धीमतः । अब्रवीत् पुण्डरीकाक्षो धनञ्जयमवेक्ष्य ह ।
ममाप्येते महाराज भवद्भिर्य्ये उदाहृताः । नेतारस्तव सेनाया मता विक्रान्तयोधिनः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सर्व्वे एव समर्था हि तव शत्रुं प्रबाधितुं । इन्द्रस्यापि भयं ह्येते जनयेयुर्महाहवे ।
किं पुनर्धार्त्तराष्ट्राणां लुब्धानां पापचेतसां । मयाऽपि हि महाबाहो त्वत्प्रियार्थं महाहवे ।
कृतो यत्नो महांस्तत्र शमः स्यादिति भारत । धर्म्मस्य गतमानृण्यं न स्म वाच्या विवक्षतां ।
कृतास्त्रं मन्यते बाल आत्मानमविचक्षणः । धार्तराष्ट्रो बलस्थञ्च पश्यत्यात्मानमातुरः ।
युज्यतां वाहिनी साधु वधसाध्या हि मे मताः । न धार्त्तराष्ट्राः शक्ष्यन्ति स्थातुं दृष्ट्वा धनञ्जयं ।
भीमसेनञ्च संक्रुद्धं यमौ चापि यमोपमौ । युयुधानद्वितीयञ्च धृष्टद्युम्नममर्षणं ।
अभिमन्युं द्रौपदेयान् विराटद्रुपदावपि । अक्षौहिणीपतींश्चान्यान्नरेन्द्रान् भीमविक्रमान् ।
सारवद्बलमस्माकं दुष्प्रधर्षं दुरासदं । धार्त्तराष्ट्रबलं सङ्ख्ये हनिष्यति न संशयः ।
धृष्टद्युम्नमहं मन्ये सेनापतिमरिन्दम ।
॥ वैशम्पायन उवाच ॥ एवमुक्ते तु कृष्णेन सम्प्राहृष्यन्नरोत्तमाः । तेषां प्रहृष्टमनसां नादः समभवन्महान् ।
योग इत्यथ सैन्यानां त्वरतां सम्प्रधावतां । हयवारणशब्दाश्च नेमिघोषाश्च सर्व्वतः ।
शङ्खदुन्दुभिघोषाश्च तुमुलाः सर्व्वतोऽभवन् । तदुग्रं सागरनिभं क्षुब्धं बलसमागमं ।
रथपत्तिगजोदग्रं महोर्म्मिभिरिवाकुलं । धावतामाह्वयानानां तनुत्राणञ्च बध्नतां ।
प्रयास्यतां पाण्डवानां ससैन्यानां समन्ततः । गङ्गेव पूर्णा दुर्द्धर्षा समदृश्यत वाहिनी ।
अग्रानीके भीमसेनो माद्रीपुत्त्रौ च दंशितौ । सौभद्रो द्रौपदेयाश्च धृष्टद्युम्नश्च पार्षतः ।
प्रभद्रकाश्च पाञ्चाला भीमसेनमुखा ययुः । ततः शब्दः समभवत् समुद्रस्येव पर्व्वणि ।
हृष्टानां सम्प्रयातानां घोषो दिवमिवास्पृशत् । प्रहृष्टा दंशिता योधाः परानीकविदारणाः ।
तेषां मध्ये ययौ राजा कुन्तीपुत्त्रो युधिष्ठिरः । शकटापणवेशाश्च यानयुग्यञ्च सर्व्वशः ।
कोषयन्त्रायुधञ्चैव ये च वैद्याश्चिकित्सकाः । फल्गुवच्च बलं किञ्चित् यच्चापि कृशदुर्ब्बलं ।
तत्सङ्गृह्य ययौ राजा ये चापि परिचारकाः । उपप्लव्ये तु पाञ्चाली द्रौपदी सत्यवादिनी ।
सहस्त्रीभिर्निवृत्ते दासीदाससमावृता । कृत्वा मूलप्रतीकारं गुल्मैः स्थावरजङ्गमैः ।
स्कन्धावारेण महता प्रययुः पाण्डुनन्दनाः । ददतो गां हिरण्यञ्च ब्राह्मणैरभिसंवृताः ।
स्तूयमाना ययू राजन् रथैर्मणिविभूषितैः । कैकेया धृष्टकेतुश्च पुत्त्रः काश्यस्य वा विभुः ।
श्रेणिमान् वसुदानश्च शिखण्डी चापराजितः । हृष्टास्तुष्टाः कवचिनः सशस्त्राः समलङ्कृताः ।
राजानमन्वयुः सर्व्वे परिवार्य्य युधिष्ठिरं । जघनार्द्धे विराटश्च याज्ञसेनिश्च सौमकिः ।
सुशर्म्मा कुन्तिभोजश्च धृष्टद्युम्नस्य चात्मजाः । रथायुतानि चत्वारि हयाः पञ्चगुणास्तथा ।
पत्तिसैन्यं दशगुणं गजानामयुतानि षट् । अनाधृष्टिश्चेकितानो धृष्टकेतुश्च सात्यकिः ।
परिवार्य्य ययुः सर्व्वे वासुदेवधनञ्जयौ । आसाद्य तु कुरुक्षेत्रं व्यूढानीकाः प्रहारिणः ।
पाण्डवाः समदृश्यन्त नर्द्दन्तो वृषभा इव । तेऽवगाह्य कुरुक्षेत्रं शङ्खान् दध्मुररिन्दमाः ।
तथैव दध्मतुः शङ्खं वासुदेवधनञ्जयौ । पाञ्चजन्यस्य निर्घोषं विस्फूर्ज्जितमिवाशनेः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

निशम्य सर्व्वसैन्यानि समहृष्यन्त सर्व्वशः। शङ्खदुन्दुभिसंसृष्टः सिंहनादस्तरस्विनां।
पृथिवीञ्चान्तरीक्षञ्च सागरांश्चानुनादयन्।
इति श्रीमहाभारते उद्योगपर्व्वणि सैन्यनिर्याणपर्व्वणि कुरुक्षेत्रप्रवेशे पञ्चाशदधिकशततमोऽध्यायः॥ १५० ॥
॥ वैशम्पायन उवाच ॥ ततो देशे समे स्निग्धे प्रभूतयवसेन्धने। निवेशयामास तदा सेनां राजा युधिष्ठिरः। ५१७०
परिहृत्य श्मशानानि देवतायतनानि च। आश्रमांश्च महर्षीणां तीर्थान्यायतनानि च।
मधुरानूषरे देशे शुचौ पुण्ये महामतिः। निवेशं कारयामास कुन्तीपुत्त्रो युधिष्ठिरः।
ततश्च पुनरुत्थाय सुखं विश्रान्तवाहनः। प्रययौ पृथिवीपालैर्वृतः शतसहस्रशः।
विद्राव्य शतशो गुल्मान् धार्त्तराष्ट्रस्य सैनिकान्। पर्य्यक्रामत् समन्ताच्च पार्थेन सह केशवः।
शिविरं मापयामास धृष्टद्युम्नश्च पार्षतः। सात्यकिश्च रथोदारो युयुधानश्च वीर्य्यवान्। ५१७५
आसाद्य सरितं पुण्यां कुरुक्षेत्रे हिरण्वतीं। सूपतीर्थां शुचिजलां शर्करापङ्कवर्ज्जितां।
खानयामास परिखां केशवस्तत्र भारत। गुप्त्यर्थमपि चादिश्य बलं तत्र न्यवेशयत्।
विधिर्य्यः शिविरस्यासीत् पाण्डवानां महात्मनां। तद्विधानि नरेन्द्राणां कारयामास केशवः।
प्रभूततरकाष्ठानि दुराधर्षतराणि च। भक्ष्यभोज्यान्नपानानि शतशोऽथ सहस्रशः।
शिविराणि महार्हाणि राज्ञां तत्र पृथक् पृथक्। विमानानीव राजेन्द्र निविष्टानि महीतले। ५१८०
तत्रासन् शिल्पिनः प्राज्ञाः शतशो दत्तवेतनाः। सर्व्वोपकरणैर्युक्ता वैद्याः शास्त्रविशारदाः।
ज्याधनुर्व्वर्म्मशस्त्राणां तथैव मधुसर्पिषोः। ससर्ज्जरसपांशूनां राशयः पर्व्वतोपमाः।
बहूदकं सुयवसं तुषाङ्गारसमन्वितं। शिविरे शिविरे राजा सञ्चकार युधिष्ठिरः।
महायन्त्राणि नाराचास्तोमराणि परश्वधाः। धनूंषि कवचादीनि यष्ट्यस्तूणसंयुताः।
गजाः कण्टकसन्नाहा लोहवर्म्मोत्तरच्छदाः। दृश्यन्ते तत्र गिर्य्याभाः सहस्रशतयोधिनः। ५१८५
निर्व्विष्टान् पाण्डवांस्तत्र ज्ञात्वा मित्राणि भारत। अभिससुर्य्यथादेशं सबलाः सहवाहनाः।
चरितब्रह्मचर्य्यास्ते सोमपा भूरिदक्षिणाः। जयाय पाण्डुपुत्त्राणां समाजग्मुर्म्महीक्षितः।
इति श्रीमहाभारते उद्योगपर्व्वणि सैन्यनिर्याणपर्व्वणि शिविरादिनिर्म्माणे एकपञ्चाशदधिकशततमोऽध्यायः॥ १५१ ॥
॥ जनमेजय उवाच ॥ युधिष्ठिरं सहानीकमुपायान्तं युयुत्सया। सन्निविष्टं कुरुक्षेत्रे वासुदेवेन पालितं।
विराटद्रुपदाभ्याञ्च सपुत्त्राभ्यां समन्वितं। कैकेयैर्वृष्णिभिश्चैव पार्थिवैः शतशो वृतं।
महेन्द्रमिव चादित्यैरभिगुप्तं महारथैः। श्रुत्वा दुर्य्योधनो राजा किं कार्य्यं प्रत्यपद्यत। ५१९०
एतदिच्छाम्यहं श्रोतुं विस्तरेण महामते। सम्भ्रमे तुमुले तस्मिन् यदासीत् कुरुजाङ्गले।
व्यथयेयुरिमे देवान् सेन्द्रानपि समागमे। पाण्डवा वासुदेवश्च विराटद्रुपदौ तथा।
धृष्टद्युम्नश्च पाञ्चाल्यः शिखण्डी च महारथः। युधामन्युश्च विक्रान्तो देवैरपि दुरासदः।
एतदिच्छाम्यहं श्रोतुं विस्तरेण तपोधन। कुरूणां पाण्डवानाञ्च यद्यदासीद्विचेष्टितं।
॥ वैशम्पायन उवाच॥ प्रतियाते तु दाशार्हे राजा दुर्य्योधनस्तदा। कर्णं दुःशासनञ्चैव शकुनिञ्चाब्रवीदिदं। ५१९५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अकृतेनैव कार्य्येण गतः पार्थानधोक्षजः । स एनान्मन्युना विष्टो ध्रुवं धक्ष्यत्यसंशयं ।
दृष्टो हि वासुदेवस्य पाण्डवैर्मम विग्रहः । भीमसेनार्ज्जुनौ चैव दाशार्हस्य मते स्थितौ ।
अजातशत्रुरत्यर्थं भीमसेनवशानुगः । निकृतश्च मया पूर्व्वं सह सर्व्वैः सहोदरैः ।
विराटद्रुपदौ चैव कृतवैरौ मया सह । तौ च सेनाप्रणेतारौ वासुदेववशानुगौ ।
भविता विग्रहः सोऽयं तुमुलो लोमहर्षणः । तस्मात् सांग्रामिकं सर्व्वं कारयध्वमतन्द्रिताः । ५२००
शिविराणि कुरुक्षेत्रे क्रियन्तां वसुधाधिपाः । सुपर्य्याप्तावकाशानि दुरादेयानि शत्रुभिः ।
आसन्नजलकाष्ठानि शतशोऽथ सहस्रशः । अच्छेद्याहारमार्गाणि बन्धोच्छ्रयचितानि च ।
विविधायुधपूर्णानि पताकाध्वजवन्ति च । समाश्च तेषां पन्थानः क्रियन्तां नगराद्वहिः ।
प्रयाणं घुष्यतामद्य श्वोभूत इति माचिरं । ते तथेति प्रतिज्ञाय श्वो भूते चक्रिरे तथा ।
हृष्टरूपा महात्मानो निवासाय महीक्षितां । ततस्ते पार्थिवाः सर्व्वे तच्छ्रुत्वा राजशासनं । ५२०५
आसनेभ्यो महार्हेभ्य उदतिष्ठन्नमर्षिताः । बाहून् परिघसङ्काशान् संस्पृशन्तः शनैः शनैः ।
काञ्चनाङ्गददीप्तांश्च चन्दनागुरुभूषितान् । उष्णीषाणि नियच्छन्तः पुण्डरीकनिभैः करैः ।
अन्तरीयोत्तरीयाणि भूषणानि च सर्व्वशः । ते रथान्रथिनः श्रेष्ठा हयांश्च हयकोविदाः ।
सज्जयन्ति स्म नागांश्च नागशिक्षास्वनुष्ठिताः । अथ वर्म्माणि चित्राणि काञ्चनानि बहूनि च ।
विविधानि च शस्त्राणि चक्रुः सर्व्वाणि सर्व्वशः । पदातयश्च पुरुषाः शस्त्राणि विविधानि च । ५२१०
उपाजह्रुः शरीरेषु हेमचित्राण्यनेकशः । तदुत्सव इवोदग्रं सम्प्रहृष्टनरावृतं ।
नगरं धार्त्तराष्ट्रस्य भारतासीत् समाकुलं । जनौघसलिलावर्त्तो रथनागाश्वमीनवान् ।
शङ्खदुन्दुभिनिर्घोषः कोषसञ्चयरत्नवान् । चित्राभरणवर्म्मोर्म्मिशस्त्रनिर्म्मलफेनवान् ।
प्रासादमालाद्रिवृतो रथ्यापणमहाह्रदः । योधचन्द्रोदयोद्भूतः कुरुराजमहार्णवः ।
व्यदृश्यत तदा राजंश्चन्द्रोदय इवार्णवः । ५२१५

इति श्रीमहाभारते उद्योगपर्व्वणि सैन्यनिर्याणपर्व्वणि दुर्य्योधनसैन्यसज्जायां द्विपञ्चाशदधिकशततमोऽध्यायः ॥ १५२ ॥

॥ वैशम्पायन उवाच ॥ वासुदेवस्य तद्वाक्यमनुस्मृत्य युधिष्ठिरः । पुनः पप्रच्छ वार्ष्णेयं कथं मन्दोऽब्रवीदिदं ।
अस्मिन्नभ्यागते काले किञ्च नः क्षममच्युत । कथञ्च वर्त्तमाना वै स्वधर्म्मान्न च्यवेमहि ।
दुर्य्योधनस्य कर्णस्य शकुनेः सौबलस्य च । वासुदेव मतज्ञोऽसि मम सभ्रातृकस्य च ।
विदुरस्यापि तद्वाक्यं श्रुतं भीष्मस्य चोभयोः । कुन्त्याश्च विपुलप्रज्ञ प्रज्ञा कार्त्स्न्येन ते श्रुता ।
सर्व्वमेतदतिक्रम्य विचार्य्य च पुनः पुनः । क्षेमं यन्नो महाबाहो तत् ब्रवीह्यविचारयन् । ५२२०
श्रुत्वैतत् धर्म्मराजस्य धर्म्मार्थसहितं वचः । मेघदुन्दुभिनिर्घोषः कृष्णो वाक्यमथाऽब्रवीत् ।
॥ श्रीकृष्ण उवाच ॥ उक्तवानसि यद्वाक्यं धर्म्मार्थसहितं हितं । न तु तन्निकृतिप्रज्ञे कौरव्ये प्रतितिष्ठति ।
न च भीष्मस्य दुर्म्मेधाः शृणोति विदुरस्य वा । मम वा भाषितं किञ्चित् सर्व्वमेवातिवर्त्तते ।
नैष कामयते धर्म्मं नैष कामयते यशः । जितं स मन्यते सर्व्वं दुरात्मा कर्णमाश्रितः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

बन्धमाज्ञापयामास मम चापि सुयोधनः। न च तं लब्धवान् कामं दुरात्मा पापनिश्चयः। ५२२५
न च भीष्मो न च द्रोणो युक्तं तत्राहतुर्व्वचः। सर्व्वे तमनुवर्त्तन्ते ऋते विदुरमच्युत।
शकुनिः सौबलश्चैव कर्णदुःशासनावपि। त्वय्ययुक्तान्यभाषन्त मूढा मूढममर्षणं।
किञ्च तेन मयोक्तेन यान्यभाषत कौरवः। संक्षेपेण दुरात्माऽसौ न युक्तं त्वयि वर्त्तते।
पार्थिवेषु न सर्व्वेषु य इमे तव सैनिकाः। यत् पापं यन्न कल्याणं सर्व्वं तस्मिन् प्रतिष्ठितं।
न चापि वयमप्यर्थे परित्यागेन कर्हिचित्। कौरवैः शममिच्छामस्तत्र युद्धमनन्तरं। ५२३०
॥ वैशम्पायन उवाच॥ तच्छ्रुत्वा पार्थिवाः सर्व्वे वासुदेवस्य भाषितं। अब्रुवन्तो मुखं राज्ञः समुदैक्षन्त भारत।
युधिष्ठिरस्त्वभिप्रायमभिलक्ष्य महीक्षितां। योगमाज्ञापयामास भीमार्ज्जुनयमैः सह।
ततः किलकिलाभूतमनीकं पाण्डवस्य ह। आज्ञापिते तदा योगे समहृष्यन्त सैनिकाः।
अवध्यानां वधं पश्यन् धर्म्मराजो युधिष्ठिरः। निःश्वसन् भीमसेनञ्च विजयञ्चेदमब्रवीत्।
यदर्थं वनवासश्च प्राप्तं दुःखञ्च यन्मया। सोऽयमस्मानुपैत्येव परोऽनर्थः प्रयत्नतः। ५२३५
तस्मिन् यत्नः कृतोऽस्माभिः स नो हीनः प्रयत्नतः। अकृते तु प्रयत्नेऽस्मानुपावृत्तः कलिर्महान्।
कथं ह्यवध्यैः सङ्ग्रामस्त्वर्थ्यैः सह भविष्यति। कथं हत्वा गुरून् वृद्धान् विजयो नो भविष्यति।
तच्छ्रुत्वा धर्म्मराजस्य सव्यसाची परन्तपः। यदुक्तं वासुदेवेन श्रावयामास तद्वचः।
उक्तवान् देवकीपुत्त्रः कुन्त्याश्च विदुरस्य च। वचनं तत्त्वया राजन्निखिलेनावधारितं।
न च तौ वक्ष्यतोऽधर्म्ममिति मे नैष्ठिकी मतिः। नापि युक्तञ्च कौन्तेय निवर्त्तितुमयुध्यतः। ५२४०
तच्छ्रुत्वा वासुदेवोऽपि सव्यसाचिवचस्तदा। स्मयमानोऽब्रवीद्वाक्यं पार्थमेवमिति ब्रुवन्।
ततस्ते धृतसङ्कल्पा युद्धाय सहसैनिकाः। पाण्डवेया महाराज तां रात्रिं सुखमावसन्।

इति श्रीमहाभारते उद्योगपर्व्वणि सैन्यनिर्याणपर्व्वणि युधिष्ठिरार्जुनसंवादे त्रिपञ्चाशदधिकशततमोऽध्यायः॥ १५३ ॥

॥ वैशम्पायन उवाच॥ व्युष्टायां वै रजन्यां हि राजा दुर्य्योधनस्ततः। व्यभजत्तान्यनीकानि दश चैकञ्च भारत।
नरहस्तिरथाश्वानां सारं मध्यञ्च फल्गु च। सर्व्वेष्वेतेष्वनीकेषु सन्दिदेश नराधिपः।
सानुकर्षाः सतूणीराः सवरूथाः सतोमराः। सोपासङ्गाः सशक्तीकाः सनिषङ्गाः सहर्ष्टयः। ५२४५
सध्वजाः सपताकाश्च सशरासनतोमराः। रज्जुभिश्च विचित्राभिः सपाशाः सपरिस्तराः।
सकचग्रहविक्षेपाः सतैलगुडबालुकाः। साशीविषघटाः सर्व्वे ससर्ज्जरसपांशवः।
सघण्टफलकाः सर्व्वे सायोगुडजलोपलाः। सशूलभिन्दिपालाश्च समधूच्छिष्टमुद्गराः।
सकाण्डदण्डकाः सर्व्वे ससीरविषतोमराः। सशूर्पपिटकाः सर्व्वे सदात्राङ्कुशतोमराः।
सकीलकवचाः सर्व्वे वाशीवृक्षादनान्विताः। व्याघ्रचर्म्मपरीवारा द्वीपिचर्म्मावृताश्च ते ५२५०
सहर्ष्टयः सशृङ्गाश्च सप्रासविविधायुधाः। सकुठाराः सकुद्दालाः सतैलक्षौमसर्पिषः।
रुक्मजालप्रतिच्छन्ना नानामणिविभूषिताः। चित्रानीकाः सुवपुषो ज्वलिता इव पावकाः।
तथा कवचिनः शूराः शस्त्रेषु कृतनिश्चयाः। कुलीना हययोनिज्ञाः सारथ्ये विनिवेशिताः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

बद्धारिष्टा बद्धकचा बद्धध्वजपताकिनः। बद्धाभरणनिर्यूहा बद्धचर्म्मासिपट्टिशाः।
चतुर्युजो रथाः सर्व्वे सर्व्वे चोत्तमवाजिनः। सप्रासकष्टिकाः सर्व्वे सर्व्वे धृतशरासनाः। ५२५५
धुर्य्ययोर्हययोरेकस्तथान्यौ पार्ष्णिसारथी। तौ चापि रथिनां श्रेष्ठौ रथी च हयवित्तथा।
नगराणीव गुप्तानि दुराधर्षाणि शत्रुभिः। आसन्रथसहस्राणि हेममालीनि सर्व्वशः।
यथा रथास्तथा नागा बद्धकचाः स्वलङ्कृताः। बभूवुः सप्तपुरुषा रत्नवन्त इवाद्रयः।
द्वावङ्कुशधरौ तत्र द्वावुत्तमधनुर्द्धरौ। द्वौ वरासिधरौ राजन्नेकः शक्तिपिनाकधृक्।
गजैर्म्मत्तैः समाकीर्णं सर्व्वमायुधकोषकैः। तद्बभूव बलं राजन् कौरव्यस्य महात्मनः। ५२६०
आमुक्तकवचैर्युक्तैः सपताकैः स्वलङ्कृतैः। सादिभिश्चोपपन्नास्तु तथा चायुतशो हयाः।
असङ्ग्राहाः सुसम्पन्ना हेमभाण्डपरिच्छदाः। अनेकशतसाहस्राः सर्व्वे सादिवशे स्थिताः।
नानारूपविकाराश्च नानाकवचशस्त्रिणः। पदातिनो नरास्तत्र बभूवुर्हेममालिनः।
रथस्यासन् दश गजा गजस्य दश वाजिनः। नरा दश हयस्यासन् पादरक्षाः समन्ततः।
रथस्य नागाः पञ्चाशन्नागस्यासन् शतं हयाः। हयस्य पुरुषाः सप्त भिन्नसन्धानकारिणः। ५२६५
सेनापञ्चशतं नागा रथास्तावन्त एव च। दशसेना च पृतना पृतना दशवाहिनी।
सेना च वाहिनी चैव पृतना ध्वजिनी चमूः। अक्षौहिणी तु पर्य्यायैर्न्निरुक्ता च वरूथिनी।
एवं व्यूढान्यनीकानि कौरवेयेण धीमता। अक्षौहिण्यो दशैका च सङ्ख्याताः सप्त चैव ह।
अक्षौहिण्यस्तु सप्तैव पाण्डवानामभूद्बलं। अक्षौहिण्यो दशैका च कौरवाणामभूद्बलं।
नराणां पञ्चपञ्चाशदेषा पत्तिर्विधीयते। सेनामुखञ्च तिस्रस्ता गुल्म इत्यभिशब्दितं। ५२७०
त्रयो गुल्मा गणस्त्वासीत् गणस्त्वयुतशो भवेत्। दुर्य्योधनस्य सेनासु योत्स्यमानाः प्रहारिणः।
तत्र दुर्य्योधनो राजा शूरान् बुद्धिमतो नरान्। प्रसमीक्ष्य महाबाहुश्चक्रे सेनापतींस्तदा।
पृथगक्षौहिणीनाञ्च प्रणेतॄन्नरसत्तमान्। विधिवत् पूर्व्वमानीय पार्थिवानभ्यभाषत।
कृपं द्रोणञ्च शल्यञ्च सैन्धवञ्च जयद्रथं। सुदक्षिणञ्च काम्बोजं कृतवर्म्माणमेव च।
द्रोणपुत्रञ्च कर्णञ्च भूरिश्रवसमेव च। शकुनिं सौबलञ्चैव वाह्लीकञ्च महाबलं। ५२७५
दिवसे दिवसे तेषां प्रतिवेलञ्च भारत। चक्रे स विविधाः पूजाः प्रत्यक्षञ्च पुनः पुनः।
तथा विनियताः सर्व्वे ये च तेषां पदानुगाः। बभूवुः सैनिका राजन् प्रियं राज्ञश्चिकीर्षवः।
इति श्रीमहाभारते उद्योगपर्व्वणि सैन्यनिर्याणपर्व्वणि दुर्य्योधनसैन्यविभागे चतुःपञ्चाशदधिकशततमोऽध्यायः ॥१५४॥
॥ वैशम्पायन उवाच ॥ ततः शान्तनवं भीष्मं प्राञ्जलिर्धृतराष्ट्रजः। सह सर्व्वैर्महीपालैरिदं वचनमब्रवीत्।
ऋते सेनाप्रणेतारं पृतना सुमहत्यपि। दीर्य्यते युद्धमासाद्य पिपीलिकपुटं यथा।
न हि जातु द्वयोर्ब्बुद्धिः समा भवति कर्हिचित्। शौर्य्यञ्च बलनेतॄणां स्पर्द्धते च परस्परं। ५२८०
श्रूयते च महाप्राज्ञ हैहयानमितौजसः। अभ्ययुर्ब्राह्मणाः सर्व्वे समुच्छ्रितकुशध्वजाः।
तानभ्ययुस्तदा वैश्याः शूद्राश्चैव पितामह। एकतस्तु त्रयो वर्णा एकतः क्षत्रियर्षभाः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ततो युद्धेष्वभज्यन्त त्रयो वर्णाः पुनः पुनः। चत्रियास्तु जयन्त्येव बहुलञ्चैकतो बलं।
ततस्ते चत्रियानेव पप्रच्छुर्द्विजसत्तमाः। तेभ्यः शशंसुर्धर्म्मज्ञा याथातथ्यं पितामह।
वयमेकस्य शृखाना महाबुद्धिमतो रणे। भवन्तस्तु पृथक्सर्व्वे स्वबुद्धिवशवर्त्तिनः।
ततस्ते ब्राह्मणाश्चक्रुरेकं सेनापतिं द्विजं। नयेषु कुशलं शूरमजयन् चत्रियांस्ततः।
एवं ये कुशलं शूरं हितेप्सिनमकल्मषं। सेनापतिं प्रकुर्व्वन्ति ते जयन्ति रणे रिपून्।
भवानुशनसा तुल्यो हितैषी च सदा मम। असंहार्य्यः स्थितो धर्म्मे स नः सेनापतिर्भव।
रश्मिवतामिवादित्यो वीरुधामिव चन्द्रमाः। कुवेर इव यचाणां देवानामिव वासवः।
पर्व्वतानां यथा मेरुः सुपर्णः पचिणां यथा। कुमार इव भूतानां वसूनामिव हव्यवाट्।
भवता हि वयं गुप्ताः शक्रेणेव दिवौकसः। अनाधृष्या भविष्यामस्त्रिदशानामपि ध्रुवं।
प्रयातु नो भवानग्रे देवानामिव पावकिः। वयं त्वामनुयास्यामः सौरभेया इवर्षभं।
॥ भीष्म उवाच ॥ एवमेतन्महाबाहो यथा वदसि भारत। यथैव हि भवन्तो मे तथैव मम पाण्डवाः।
अपि चैव मया श्रेयो वाच्यं तेषां नराधिप। संयोद्धव्यं तवार्थाय यथा मे समयः कृतः।
न च पश्यामि योद्धारमात्मनः सदृशं भुवि। ऋते तस्मान्नरव्याघ्रात् कुन्तीपुत्राद्धनञ्जयात्।
स हि वेद महाबुद्धिर्दिव्यान्यस्त्राण्यनेकशः। न तु मां विवृतो युद्धे जातु युध्येत पाण्डवः।
अहञ्चैव चणेनैव निर्म्मनुष्यमिदं जगत्। कुर्य्यां शस्त्रबलेनैव ससुरासुरराचसं।
न त्वेवोत्सादनीया मे पाण्डोः पुत्रा जनाधिप। तस्मात् योधान् हनिष्यामि प्रयोगेणायुतं सदा।
एवमेषां करिष्यामि निधनं कुरुनन्दन। न चेत्ते मां हनिष्यन्ति पूर्व्वमेव समागमे।
सेनापतिस्त्वहं राजन् समयेनापरेण ते। भविष्यामि यथाकामं तन्मे श्रोतुमिहार्हसि।
कर्णो वा युध्यतां पूर्व्वमहं वा पृथिवीपते। स्पर्द्धते हि सदाऽत्यर्थं सूतपुत्रो मया रणे।
॥ कर्ण उवाच ॥ नाहं जीवति गाङ्गेये राजन् योत्स्ये कथञ्चन। हते भीष्मे तु योत्स्यामि सह गाण्डीवधन्वना।
॥ वैशम्पायन उवाच ॥ ततः सेनापतिञ्चक्रे विधिवत् भूरिदचिणं। धृतराष्ट्रात्मजो भीष्मं सोऽभिषिक्तो व्यरोचत।
ततो भेरीश्च शङ्खांश्च शतशोऽथ सहस्रशः। वादयामासुरव्यग्रा वादका राजशासनात्।
सिंहनादाश्च विविधा वाहनानाञ्च निस्वनाः। प्रादुरासीदनभ्रे च वर्षं रुधिरकर्द्दमं।
निर्घाताः पृथिवीकम्पा गजबृंहितनिस्वनाः। आसंश्च सर्व्वयोधानां पीडयन्तो मनांस्युत।
वाचश्चाप्यशरीरिण्यो दिवश्चोल्काः प्रपेदिरे। शिवाश्च भयवेदिन्यो नेदुर्दीप्ततरा भृशं।
सैनापत्ये यदा राजा गाङ्गेयमभिषिक्तवान्। तदैतान्युग्ररूपाणि बभूवुः शतशो नृप।
ततः सेनापतिं कृत्वा भीष्मं परबलार्द्दनं। वाचयित्वा द्विजश्रेष्ठान् गोभिर्निष्कैश्च भूरिशः।
वर्द्धमानो जयाशीर्भिर्निर्ययौ सैनिकैर्वृतः। आपगेयं पुरस्कृत्य भ्रातृभिः सहितस्तदा।
स्कन्धावारेण महता कुरुचेत्रं जगाम ह। परिक्रम्य कुरुचेत्रं कर्णेन सह कौरवः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शिविरं मापयामास समे देशे जनाधिप । मधुरानूषरे देशे प्रभूतयवसेन्धने ।
यथैव हास्तिनपुरं तद्वच्छिविरमाबभौ ।
इतिश्रीमहाभारते उद्योगपर्व्वणि सैन्यनिर्याणपर्व्वणि भीष्मसैनापत्ये पञ्चपञ्चाशदधिकशततमोऽध्यायः ॥ १५५ ॥
॥ जनमेजय उवाच ॥ आपगेयं महात्मानं भीष्मं शस्त्रभृतां वरं । पितामहं भारतानां ध्वजं सर्व्वमहीक्षितां ।
बृहस्पतिसमं बुद्ध्या क्षमया पृथिवीसमं । समुद्रमिव गाम्भीर्य्ये हिमवन्तमिव स्थिरं । ५११५
प्रजापतिमिवौदार्य्ये तेजसा भास्करोपमं । महेन्द्रमिव शत्रूणां ध्वंसनं शरवृष्टिभिः ।
रणयज्ञे प्रवितते सुभीमे लोमहर्षणे । दीक्षितञ्चिररात्राय श्रुत्वा तत्र युधिष्ठिरः ।
किमब्रवीन्महाबाहुः सर्व्वशस्त्रभृतां वरः । भीमसेनार्ज्जुनौ वाऽपि कृष्णो वा प्रत्यभाषत ।
॥ वैशम्पायन उवाच ॥ आपद्धर्म्मार्थकुशलो महाबुद्धिर्युधिष्ठिरः । सर्व्वान् भ्रातॄन् समानीय वासुदेवञ्च शाश्वतं ।
उवाच वदतां श्रेष्ठः सान्त्वपूर्व्वमिदं वचः । पर्य्यक्रामत सैन्यानि यत्तास्तिष्ठत दंशिताः । ५१२०
पितामहेन वो युद्धं पूर्व्वमेव भविष्यति । तस्मात् सप्तसु सेनासु प्रणेतॄन्मम पश्यत ।
॥ श्रीकृष्ण उवाच ॥ यथाऽर्हति भवान् वक्तुमस्मिन् काले ह्युपस्थिते । तथेदमर्थवद्वाक्यमुक्तं ते भरतर्षभ ।
रोचते मे महाबाहो क्रियतां यदनन्तरं । नायकास्तव सेनायां क्रियन्तामिह सप्त वै ।
॥ वैशम्पायन उवाच ॥ ततो द्रुपदमानाय्य विराटं शिनिपुङ्गवं । धृष्टद्युम्नञ्च पाञ्चाल्यं धृष्टकेतुञ्च पार्थिवं ।
शिखण्डिनञ्च पाञ्चाल्यं सहदेवञ्च मागधं । एतान् सप्त महाभागान् वीरान् युद्धाभिकाङ्क्षिणः । ५१२५
सेनाप्रणेतॄन् विधिवदभ्यषिञ्चत् युधिष्ठिरः । सर्व्वसेनापतिञ्चात्र धृष्टद्युम्नञ्चकार ह ।
द्रोणान्तहेतोरुत्पन्नो य इद्धाज्जातवेदसः । सर्व्वेषामेव तेषान्तु समस्तानां महात्मनां ।
सेनापतिपतिञ्चक्रे गुडाकेशं धनञ्जयं । अर्ज्जुनस्यापि नेता च संयन्ता चैव वाजिनां ।
सङ्कर्षणानुजः श्रीमान्महाबुद्धिर्ज्जनार्द्दनः । तद्दृष्ट्वोपस्थितं युद्धं समासन्नं महात्ययं ।
प्राविशत् भवनं राजन् पाण्डवस्य हलायुधः । सहाक्रूरप्रभृतिभिर्गदसाम्बोद्धवादिभिः । ५१३०
रौक्मिणेयाहुकसुतैश्चारुदेष्णपुरोगमैः । वृष्णिमुख्यैरधिगतैर्व्याघ्रैरिव बलोत्कटैः ।
अभिगुप्तो महाबाहुर्म्मरुद्भिरिव वासवः । नीलकौशेयवसनः कैलासशिखरोपमः ।
सिंहखेलगतिः श्रीमान् मदरक्तान्तलोचनः । तं दृष्ट्वा धर्म्मराजश्च केशवश्च महाद्युतिः ।
उदतिष्ठत्ततः पार्थो भीमकर्म्मा वृकोदरः । गाण्डीवधन्वा ये चान्ये राजानस्तत्र केचन ।
पूजयाञ्चक्रिरे ते वै समायान्तं हलायुधं । ततस्तं पाण्डवो राजा करे पस्पर्श पाणिना । ५१३५
वासुदेवपुरोगास्तं सर्व्व एवाभ्यवादयन् । विराटद्रुपदौ वृद्धावभिवाद्य हलायुधः ।
युधिष्ठिरेण सहित उपाविशदरिन्दमः । ततस्तेषूपविष्टेषु पार्थिवेषु समन्ततः ।
वासुदेवमभिप्रेक्ष्य रौहिणेयोऽभ्यभाषत । भवितायं महारौद्रो दारुणः पुरुषक्षयः ।
दिष्टमेतत् ध्रुवं मन्ये न शक्यमतिवर्त्तितुं । अस्मात् युद्धात् समुत्तीर्णानपि वः ससुहृज्जनान् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अरोगानक्षतैर्देहैर्द्रष्टास्मीति मतिर्मम। समेतं पार्थिवं क्षत्त्रं कालपक्कमसंशयं। ५२४०
विमर्द्दस्तु महान् भावी मांसशोणितकर्द्दमः। उक्तो मया वासुदेवः पुनःपुनरुपह्वरे।
सम्बन्धिषु समां वृत्तिं वर्त्तस्व मधुसूदन। पाण्डवा हि यथाऽस्माकं तथा दुर्य्योधनो नृपः।
तस्यापि क्रियतां साह्यं स पर्य्येति पुनःपुनः। तच्च मे नाकरोद्वाक्यं त्वदर्थं मधुसूदनः।
निर्व्विष्टः सर्व्वभावेन धनञ्जयमवेक्ष्य ह। ध्रुवो जयः पाण्डवानामिति मे निश्चिता मतिः।
तथा ह्यभिनिवेशोऽयं वासुदेवस्य भारत। न चाहमुत्सहे कृष्णमृते लोकमुदीक्षितुं। ५२४५
ततोऽहमनुवर्त्तामि केशवस्य चिकीर्षितं। उभौ शिष्यौ हि मे वीरौ गदायुद्धविशारदौ।
तुल्यस्नेहोऽस्म्यतो भीमे तथा दुर्य्योधने नृपे। तस्मात् यास्यामि तीर्थानि सरस्वत्या निषेवितुं।
न हि शक्ष्यामि कौरव्यान्नश्यमानानुपेक्षितुं। एवमुक्त्वा महाबाहुरनुज्ञातश्च पाण्डवैः।
तीर्थयात्रां ययौ रामो निवर्त्त्य मधुसूदनं।

इति श्रीमहाभारते उद्योगपर्व्वणि सैन्यनिर्याणपर्व्वणि रामगमने षट्पञ्चाशदधिकशततमोऽध्यायः ॥ १५६ ॥

॥ वैशम्पायन उवाच ॥ एतस्मिन्नेव काले तु भीष्मकस्य महात्मनः। हिरण्यरोम्णो नृपतेः साक्षादिन्द्रसखस्य वै। ५२५०
आकृतीनामधिपतेर्भोजस्यातियशस्विनः। दाक्षिणात्यपतेः पुत्त्रो दिक्षु रुक्मीति विश्रुतः।
यः किम्पुरुषसिंहस्य गन्धमादनवासिनः। कृत्स्नं शिष्यो धनुर्व्वेदं चतुष्पादमवाप्तवान्।
यो माहेन्द्रं धनुर्लेभे तुल्यं गाण्डीवतेजसा। शार्ङ्गेण च महाबाहुः सम्मितं दिव्यलक्षणं।
त्रीण्येवैतानि दिव्यानि धनूंषि दिविचारिणां। वारुणं गाण्डिवं तत्र माहेन्द्रं विजयं धनुः।
शार्ङ्गन्तु वैष्णवं प्राहुर्दिव्यं तेजोमयं धनुः। धारयामास तत् कृष्णः परसेनाभयावहं। ५२५५
गाण्डीवं पावकाल्लेभे खाण्डवे पाकशासनिः। द्रुमाद्रुक्मी महातेजा विजयं प्रत्यपद्यत।
सञ्छिद्य मौरवान् पाशान्निहत्य मुरमोजसा। निर्जित्य नरकं भौममाहृत्य मणिकुण्डले।
षोडशस्त्रीसहस्राणि रत्नानि विविधानि च। प्रतिपेदे हृषीकेशः शार्ङ्गञ्च धनुरुत्तमं।
रुक्मी तु विजयं लब्ध्वा धनुर्मेघनिभस्वनं। विभीषयन्निव जगत पाण्डवानभ्यवर्त्तत।
नामृष्यत पुरा योऽसौ स्वबाहुबलगर्व्वितः। रुक्मिण्या हरणं वीरो वासुदेवेन धीमता। ५२६०
कृत्वा प्रतिज्ञां नाहत्वा निवर्त्तिष्ये जनार्द्दनं। ततोऽन्वधावत् वार्ष्णेयं सर्व्वशस्त्रभृतां वरं।
सेनया चतुरङ्गिण्या महत्या दूरपातया। विचित्रायुधवर्म्मिण्या गङ्गयेव प्रवृद्धया।
स समासाद्य वार्ष्णेयं योगिनामीश्वरं प्रभुं। व्यंसितो व्रीडितो राजन्नाजगाम स कुण्डिनं।
यत्रैव कृष्णेन रणे निर्जितः परवीरहा। तत्र भोजकटं नाम कृतं नगरमुत्तमं।
सैन्येन महता तेन प्रभूतगजवाजिना। पुरं तद्भुवि विख्यातं नाम्ना भोजकटं नृप। ५२६५
स भोजराजः सैन्येन महता परिवारितः। अक्षौहिण्या महावीर्य्यः पाण्डवान् क्षिप्रमागमत्।
ततः स कवची धन्वी तली खड्गी शरासनी। ध्वजेनादित्यवर्णेन प्रविवेश महाचमूं।
विदितः पाण्डवेयानां वासुदेवप्रियेप्सया। युधिष्ठिरस्तु तं राजा प्रत्युद्गम्याभ्यपूजयत्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स पूजितः पाण्डुपुत्त्रैर्यथान्यायं सुसंस्तुतः । प्रतिमृह्य तु तान् सर्व्वान् विश्रान्तः सहसैनिकः ।
उवाच मध्ये वीराणां कुन्तीपुत्त्रं धनञ्जयं । सहायोऽस्मिन् स्थितो युद्धे यदि भीतोऽसि पाण्डव । ५१७०
करिष्यामि रणे साह्यमसह्यं तव शत्रुभिः । न हि मे विक्रमे तुल्यः पुमानस्तीह कश्चन ।
हनिष्यामि रणे भागं यन्मे दास्यसि पाण्डव । अपि द्रोणकृपौ वीरौ भीष्मकर्णावथो पुनः ।
अथ वा सर्व्व एवैते तिष्ठन्तु वसुधाधिपाः । निहत्य समरे शत्रूंस्तव दास्यामि मेदिनीं ।
इत्युक्तो धर्म्मराजस्य केशवस्य च सन्निधौ । शृण्वतां पार्थिवेन्द्राणामन्येषाञ्चैव सर्व्वशः ।
वासुदेवमभिप्रेक्ष्य धर्म्मराजञ्च पाण्डवं । उवाच धीमान् कौन्तेयः प्रहस्य सखिपूर्व्वकं । ५१७५
कौरवाणां कुले जातः पाण्डोः पुत्त्रो विशेषतः । द्रोणं व्यपदिशन् शिष्यो वासुदेवसहायवान् ।
भीतोऽस्मीति कथं ब्रूयां दधानो गाण्डिवं धनुः । युध्यमानस्य मे वीर गन्धर्व्वैः सुमहाबलैः ।
सहायो घोषयात्रायां कस्तदासीत् सखा मम । तथा प्रतिभये तस्मिन् देवदानवसङ्कुले ।
खाण्डवे युध्यमानस्य कः सहायस्तदाऽभवत् । निवातकवचैर्युद्धे कालकेयैश्च दानवैः ।
तत्र मे युध्यमानस्य कः सहायस्तदाऽभवत् । तथा विराटनगरे कुरुभिः सह सङ्गरे । ५१८०
युध्यतो बहुभिस्तत्र कः सहायोऽभवन्मम । उपजीव्य रणे रुद्रं शक्रं वैश्रवणं यमं ।
वरुणं पावकञ्चैव कृपं द्रोणञ्च माधवं । धारयन् गाण्डिवं दिव्यं धनुस्तेजोमयं दृढं ।
अक्षय्यशरसंयुक्तो दिव्यास्त्रपरिबृंहितः । कथमस्मद्विधो ब्रूयात् भीतोऽस्मीति यशोहरं ।
वचनं नरशार्दूल वज्रायुधमपि स्वयं । नास्मिभीतो महाबाहो सहायार्थश्च नास्ति मे ।
यथाकामं यथायोगं गच्छ वाऽन्यत्र तिष्ठ वा । विनिवर्त्य ततो रुक्मी सेनां सागरसन्निभां । ५१८५
दुर्य्योधनमुपागच्छत्तथैव भरतर्षभ । तथैव चाभिगम्यैनमुवाच वसुधाधिपः ।
प्रत्याख्यातश्च तेनापि स तदा शूरमानिना । द्वावेव तु महाराज तस्मात् युद्धादपेयतुः ।
रौहिणेयश्च वार्ष्णेयो रुक्मी च वसुधाधिपः । गते रामे तीर्थयात्रां भीष्मकस्य सुते तथा ।
उपाविशन् पाण्डवेया मन्त्राय पुनरेव च । समितिर्धर्म्मराजस्य सा पार्थिवसमाकुला ।
शुशुभे तारकैश्चित्रा द्यौश्चन्द्रेणेव भारत । ५१९०

इति श्रीमहाभारते उद्योगपर्व्वणि सैन्यनिर्याणपर्व्वणि रुक्मिप्रत्याख्याने सप्तपञ्चाशदधिकशततमोऽध्यायः ॥ १५७ ॥

॥ जनमेजय उवाच ॥ तथा व्यूढेष्वनीकेषु कुरुक्षेत्रे द्विजर्षभ । किमकुर्व्वंश्च कुरवः कालेनाभिप्रचोदिताः ।
॥ वैशम्पायन उवाच ॥ तथा व्यूढेष्वनीकेषु यत्तेषु भरतर्षभ । धृतराष्ट्रो महाराज सञ्जयं वाक्यमब्रवीत ।
एहि सञ्जय सर्व्वं मे आचक्ष्वानवशेषतः । सेनानिवेशे यद्वृत्तं कुरुपाण्डवसेनयोः ।
दिष्टमेव परं मन्ये पौरुषञ्चाप्यनर्थकं । यदहं बुध्यमानोऽपि युद्धदोषान् क्षयोदयान् ।
तथाऽपि निकृतिप्रज्ञं पुत्त्रं दुर्य्यूतदेविनं । न शक्नोमि नियन्तुं वा कर्त्तुं वा हितमात्मनः । ५१९५
भवत्येव हि मे सूत बुद्धिर्दोषानुदर्शिनी । दुर्य्योधनं समासाद्य पुनः सा परिवर्त्तते ।
एवं गते वै यद्भावि तद्भविष्यति सञ्जय । क्षत्त्रधर्म्मः किल रणे तनुत्यागो हि पूजितः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding: IKS-MoE-Grant2 Equipment Heritage Foundation, Jalgaon

॥ सञ्जय उवाच॥ त्वद्युक्तोऽयमनुप्रश्नो महाराज यथेच्छसि । त्वन्तु दुर्य्योधने दोषमिममाधातुमर्हसि ।
शृणुष्वानवशेषेण वदतो मम पार्थिव । य आत्मनो दुश्चरितादशुभं प्राप्नुयान्नरः ।
न स कालं न वा दैवं वक्तुमेतदिहार्हति । महाराज मनुष्येषु निन्द्यं यः सर्व्वमाचरेत् । ५४००
स वध्यः सर्व्वलोकस्य निन्दितानि समाचरन् । निकारा मनुजश्रेष्ठ पाण्डवैस्त्वत्प्रतीक्षया ।
अनुभूताः सहामात्यैर्निकृतैरधिदेवने । हयानाञ्च गजानाञ्च राज्ञाञ्चामिततेजसां ।
वैशसं समरे वृत्तं यत्तन्मे शृणु सर्व्वशः । स्थिरो भूत्वा महाप्राज्ञ सर्व्वलोकक्षयोदयं ।
यथाभूतं महायुद्धे श्रुत्वा चैकमना भव । न ह्येव कर्त्ता पुरुषः कर्म्मणोः शुभपापयोः ।
अस्वतन्त्रो हि पुरुषः कार्य्यते दारुयन्त्रवत् । केचिदीश्वरनिर्दिष्टाः केचिदेव यदृच्छया । ५४०५
पूर्व्वकर्म्मभिरप्यन्ये त्रैधमेतत् प्रदृश्यते । तस्मादनर्थमापन्नः स्थिरो भूत्वा निशामय ।

इति श्रीमहाभारते उद्योगपर्व्वणि सैन्यनिर्याणपर्व्वणि सञ्जयवाक्ये अष्टपञ्चाशदधिकशततमोऽध्यायः समाप्तञ्च सैन्यनिर्याण पर्व्व ॥ १५८ ॥

॥ अथ उलूकदूतागमनपर्व्व ॥ ११ ॥

॥ सञ्जय उवाच ॥ हिरण्वत्यां निविष्टेषु पाण्डवेषु महात्मसु । न्यविशन्त महाराज कौरवेया यथाविधि ।
तत्र दुर्य्योधनो राजा निवेश्य बलमोजसा । सम्मानयित्वा नृपतीन् न्यस्य गुल्मांस्तथैव च ।
आरक्षस्य विधिं कृत्वा योधानां तत्र भारत । कर्णं दुःशासनञ्चैव शकुनिञ्चापि सौबलं ।
आनाय्य नृपतींस्तत्र मन्त्रयामास भारत । तत्र दुर्य्योधनो राजा कर्णेन सह भारत । ५४१०
सम्भाषयित्वा कर्णेन भ्रात्रा दुःशासनेन च । सौबलेन च राजेन्द्र मन्त्रयित्वा नरर्षभ ।
आहूयोपह्वरे राजन्नुलूकमिदमब्रवीत् । उलूक गच्छ कैतव्य पाण्डवान् सहसोमकान् ।
गत्वा मम वचो ब्रूहि वासुदेवस्य शृण्वतः । इदन्तत् समनुप्राप्तं वर्षपूगाभिचिन्तितं ।
पाण्डवानां कुरूणाञ्च युद्धं लोकभयङ्करं । यदेतत् कत्थनावाक्यं सञ्जयो महदब्रवीत् ।
वासुदेवसहायस्य गर्ज्जतः सानुजस्य ते । मध्ये कुरूणां कौन्तेय तस्य कालोऽयमागतः । ५४१५
यथा वः सम्प्रतिज्ञातं तत् सर्व्वं क्रियतामिति । ज्येष्ठं तथैव कौन्तेयं ब्रूयास्त्वं वचनान्मम ।
भ्रातृभिः सहितं सर्व्वैः सोमकैश्च सकेकयैः । कथं वा धार्म्मिको भूत्वा त्वमधर्म्मे मनः कृथाः ।
य इच्छसि जगत्सर्व्वं नश्यमानं नृशंसवत् । अभयं सर्व्वभूतेभ्यो दाता त्वमिति मे मतिः ।
श्रूयते हि पुरा गीतः श्लोकोऽयं भरतर्षभ । प्रह्लादेनाथ भद्रन्ते हृते राज्ये तु दैवतैः ।
यस्य धर्म्मध्वजो नित्यं सुरा ध्वज इवोच्छ्रितः । प्रच्छन्नानि च पापानि वैडालं नाम तत् व्रतं । ५४२०
अत्र ते वर्त्तयिष्यामि आख्यानमिदमुत्तमं । कथितं नारदेनेह पितुर्म्मम नराधिप ।
मार्ज्जारः किल दुष्टात्मा निश्चेष्टः सर्व्वकर्म्मसु । ऊर्द्ध्वबाहुः स्थितो राजन् गङ्गातीरे कदाचन ।
स वै कृत्वा मनः शुद्धिं प्रत्ययार्थं शरीरिणां । करोमि धर्म्ममित्याह सर्व्वानेव शरीरिणः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तस्य कालेन महता विस्रम्भं जग्मुरण्डजाः । समेत्य च प्रशंसन्ति मार्ज्जारं तं विशाम्पते ।
पूज्यमानस्तु तैः सर्व्वैः पक्षिभिः पक्षिभोजनः । आत्मकार्य्यं कृतं मेने चर्य्यायाश्च कृतं फलं । ५४२५
अथ दीर्घस्य कालस्य तन्देशं मूषिका ययुः । ददृशुस्तञ्च ते तत्र धार्म्मिकं व्रतचारिणं ।
कार्य्येण महता युक्तं दम्भयुक्तेन भारत । तेषां मतिरियं राजन्नासीत्तत्र विनिश्चये ।
बहुमित्रा वयं सर्व्वे तेषां नो मातुलो ह्ययं । रक्षां करोतु सततं वृद्धबालस्य सर्व्वशः ।
उपगम्य तु ते सर्व्वे विडालमिदमब्रुवन् । भवत्प्रसादादिच्छामश्चर्त्तुञ्चैव यथासुखं ।
भवान्नो गतिरव्यग्रा भवान्नः परमः सुहृत् । ते वयं सहिताः सर्व्वे भवन्तं शरणङ्गताः । ५४३०
भवान् धर्म्मपरो नित्यं भवान् धर्म्मे व्यवस्थितः । स नो रक्ष महाप्राज्ञ त्रिदशानिव वज्रभृत् ।
एवमुक्तस्तु तैः सर्व्वैर्मूषिकैः स विशाम्पते । प्रत्युवाच ततः सर्व्वान्मूषिकान्मूषिकान्तकृत् ।
द्वयोर्योगं न पश्यामि तपसो रक्षणस्य च । अवश्यन्तु मया कार्य्यं वचनं भवतां हितं ।
युष्माभिरपि कर्त्तव्यं वचनं मम नित्यशः । तपसाऽस्मि परिश्रान्तो दृढं नियममास्थितः ।
न चापि गमने शक्तिं काञ्चित् पश्यामि चिन्तयन् । सोऽस्मि नेयः सदा तात नदीकूलमितः परं । ५४३५
तथेति ते प्रतिज्ञाय मूषिका भरतर्षभ । वृद्धबालमथो सर्व्वं मार्ज्जाराय न्यवेदयन् ।
ततः स पापो दुष्टात्मा मूषिकानथ भक्षयन् । पीवरश्च सुवर्णश्च दृढबन्धश्च जायते ।
मूषिकाणां गणश्चात्र भृशं सङ्क्षीयतेऽथ सः । मार्ज्जारो बर्द्धते चापि तेजोबलसमन्वितः ।
ततस्ते मूषिकाः सर्व्वे समेत्यान्योऽन्यमब्रुवन् । मातुलो वर्द्धते नित्यं वयं क्षीयामहे भृशं ।
ततः प्राज्ञतमः कश्चित् डिण्डिको नाम मूषिकः । अब्रवीत् वचनं राजन् मूषिकाणां महागणं । ५४४०
गच्छतां वो नदीतीरं सहितानां विशेषतः । पृष्ठतोऽहं गमिष्यामि सहैव मातुलेन तु ।
साधुसाध्विति ते सर्व्वे पूजयाञ्चक्रिरे तदा । चक्रुश्चैव यथान्यायं डिण्डिकस्य वचोऽर्थवत् ।
अविज्ञानात्ततः सोऽथ डिण्डिकं ह्युपभुक्तवान् । ततस्ते सहिताः सर्व्वे मन्त्रयामासुरञ्जसा ।
तत्र वृद्धतमः कश्चित् कोकिलो नाम मूषिकः । अब्रवीद्वचनं राजन् ज्ञातिमध्ये यथातथं ।
न मातुलो धर्म्मकामश्छद्ममात्रं कृता शिखा । न मूलफलभक्षस्य विष्ठा भवति लोमशा । ५४४५
अस्य गात्राणि वर्द्धन्ते गणश्च परिहीयते । अद्य सप्ताष्टदिवसात् डिण्डिकोऽपि न दृश्यते ।
एतच्छ्रुत्वा वचः सर्व्वे मूषिका विप्रदुद्रुवुः । विडालोऽपि सुदुष्टात्मा जगामैव यथागतं ।
तथा त्वमपि दुष्टात्मन् वैडालं व्रतमास्थितः । चरसि ज्ञातिषु सदा विडालो मूषिकेष्विव ।
अन्यथा किल ते वाक्यमन्यथा कर्म्म दृश्यते । दर्शनार्थाय लोकस्य वेदाश्चोपशमश्च ते ।
त्यक्त्वा छद्म त्विदं राजन् क्षत्त्रधर्म्मं समाश्रितः । कुरु कार्य्याणि सर्व्वाणि धर्म्मिष्ठोऽसि नरर्षभ । ५४५०
बाहुवीर्य्येण पृथिवीं लब्ध्वा भरतसत्तम । देहि दानं द्विजातिभ्यः पितृभ्यश्च यथोचितं ।
क्लिष्टाया वर्षपूगांश्च मातुर्मातृहिते स्थितः । प्रमार्ज्जाश्रु रणे जित्वा संमानं परमावह ।
पञ्चग्रामा वृता यत्नान्नास्माभिरपवर्ज्जिताः । युध्यामहे कथं सङ्ख्ये कोपयेम च पाण्डवान् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

त्वत्कृते दुष्टभावस्य सन्त्यागो विदुरस्य च। जातुषे च गृहे दाहं स्मरंस्त्वं पुरुषो भव।
यच्च कृष्णमवोचस्त्वमायान्तं कुरुसंसदि। अयमस्मि स्थितो राजन् शमाय समराय च।
तस्यायमागतः कालः समरस्य नराधिप। एतदर्थं मया सर्व्वं कृतमेतत् युधिष्ठिर।
किन्नु युद्धात् परं लाभं क्षत्रियो बहु मन्यते। किञ्च त्वं क्षत्रियकुले जातः सम्प्रथितो भुवि।
द्रोणादस्त्राणि सम्प्राप्य कृपाच्च भरतर्षभ। तुल्ययोनौ समबले वासुदेवं समाश्रितः।
ब्रूयास्त्वं वासुदेवञ्च पाण्डवानां समीपतः। आत्मार्थं पाण्डवार्थञ्च यत्तो मां प्रतियोधय।
सभामध्ये च यद्रूपं मायया कृतवानसि। तत्तथैव पुनः कृत्वा सार्ज्जुनो मामभिद्रव।
इन्द्रजालञ्च माया वै कुहका वाऽपि भीषणा। आत्तशस्त्रस्य सङ्ग्रामे वहन्ति प्रतिगर्ज्जनाः।
वयमप्युत्सहेम द्यां खञ्च गच्छेम मायया। रसातलं विशामोऽपि ऐन्द्रं वा पुरमेव तु।
दर्शयन्नेव रूपाणि स्वशरीरे बहून्यपि। न तु पर्य्यायतः सिद्धिर्बुद्धिमाप्नोति मानुषीं।
मनसैव हि भूतानि धातैव कुरुते वशे। यत् ब्रवीषि च वार्ष्णेय धार्त्तराष्ट्रानहं रणे।
घातयित्वा प्रदास्यामि पार्थेभ्यो राज्यमुत्तमं। आचचक्षे च मे सर्व्वं सञ्जयस्तव भाषितं।
मद्द्वितीयेन पार्थेन वैरं वः सव्यसाचिना। स सत्यसङ्गरो भूत्वा पाण्डवार्थे पराक्रमी।
युध्यस्वाद्य रणे यत्तः पश्यामः पुरुषो भव। यस्तु शत्रुमभिज्ञाय शुद्धं पौरुषमास्थितः।
करोति द्विषतां शोकं स जीवति सुजीवितं। अकस्माच्चैव ते कृष्ण ख्यातं लोके महद्यशः।
अद्येदानीं विजानीमः सन्ति षण्ढाः सशृङ्गकाः। मद्विधो नापि नृपतिस्त्वयि युक्तः कथञ्चन।
सन्नाहं संयुगं कर्त्तुं कंसभृत्ये विशेषतः। तञ्च तूवरकं बालं बह्वाशिनमविद्यकं।
उलूक मद्वचो ब्रूहि असकृत् भीमसेनकं। विराटनगरे पार्थ यस्त्वं सूदो ह्यभूः पुरा।
बल्लवो नाम विख्यातस्तन्ममैव हि पौरुषं। प्रतिज्ञातं सभामध्ये न तन्मिथ्या त्वया पुरा।
दुःशासनस्य रुधिरं पीयतां यदि शक्यते। यत्ब्रवीषि च कौन्तेय धार्त्तराष्ट्रानहं रणे।
निहनिष्यामि तरसा तस्य कालोऽयमागतः। त्वं हि भोज्ये पुरस्कार्य्यो भक्ष्ये पेये च भारत।
क्व युद्धं क्व च भोक्तव्यं युध्यस्व पुरुषो भव। शयिष्यसि हतो भूमौ गदामालिङ्ग्य भारत।
तद्वृथा च सभामध्ये वल्गितं ते वृकोदर। उलूक नकुलं ब्रूहि वचनान्मम भारत।
युध्यस्वाद्य स्थिरो भूत्वा पश्यामस्तव पौरुषं। युधिष्ठिरानुरागञ्च द्वेषञ्च मयि भारत।
कृष्णायाश्च परिक्लेशं स्मरेदानीं यथातथं। ब्रूयास्त्वं सहदेवञ्च राजमध्ये वचो मम।
युध्येदानीं रणे यत्तः क्लेशान् स्मर च पाण्डव। विराटद्रुपदौ चोभौ ब्रूयास्त्वं वचनान्मम।
न दृष्टपूर्व्वा भर्त्तारो भृत्यैरपि महागुणैः। तथाऽर्थपतिभिर्भृत्या यतः सृष्टाः प्रजास्ततः।
अश्लाघ्योऽयं नरपतिर्युवयोरिति चागतं। ते यूयं संहता भूत्वा तद्वधार्थं ममापि च।
आत्मार्थं पाण्डवार्थञ्च प्रयुध्यध्वं मया सह। धृष्टद्युम्नञ्च पाञ्चाल्यं ब्रूयास्त्वं वचनान्मम।
एष ते समयः प्राप्तो लब्धव्यस्य त्वयाऽपि सः। द्रोणमासाद्य समरे ज्ञास्यसे हितमुत्तमं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

युध्यस्व ससुहृत्त्वार्थं कुरु कर्म्म सुदुष्करं । शिखण्डिनमथो ब्रूहि उलूक वचनान्मम ।
स्त्रीति मत्वा महाबाहुर्न्न हनिष्यति कौरवः । गाङ्गेयो धन्विनां श्रेष्ठो युध्येदानीं सुनिर्भयः । ५४८५
कुरु कर्म्म रणे यत्तः पश्यामः पौरुषं तव । एवमुक्त्वा ततो राजा प्रहस्योलूकमब्रवीत् ।
धनञ्जयं पुनर्ब्रूहि वासुदेवस्य शृण्वतः । अस्मान् वा त्वं पराजित्य प्रशाधि पृथिवीमिमां ।
अथवा निर्जितोऽस्माभीरणे वीर शयिष्यसि । राष्ट्रान्निर्व्वासनक्लेशं वनवासञ्च पाण्डव ।
कृष्णायाश्च परिक्लेशं संस्मरन् पुरुषो भव । यदर्थं क्षत्रिया सूते सर्व्वं तदिदमागतं ।
बलं वीर्य्यञ्च शौर्य्यञ्च परञ्चाप्यस्त्रलाघवं । पौरुषं दर्शयन् युद्धे कोपस्य कुरु निष्कृतिं । ५४९०
परिक्लिष्टस्य दीनस्य दीर्घकालोषितस्य च । हृदयं न स्फुटेत् कस्य ऐश्वर्य्यात् भ्रंशितस्य च ।
कुले जातस्य शूरस्य परवित्तेष्वगृध्यतः । आच्छिन्नं राज्यमाक्रम्य कोपं कस्य न दीपयेत् ।
यत्तदुक्तं महद्वाक्यं कर्म्मणा तद्विभाव्यतां । अकर्म्मणा कत्थितेन सन्तः कुपुरुषं विदुः ।
अमित्राणां वशे स्थानं राज्यञ्च पुनरुद्धर । द्वावर्थौ युद्धकामस्य तस्मात् कुरुत पौरुषं ।
पराजितोऽसि द्यूतेन कृष्णा चानायिता सभां । शक्योऽमर्षी मनुष्येण कर्त्तुं पुरुषमानिना । ५४९५
द्वादशैव तु वर्षाणि वने धिष्ण्याद्विवासितः । सम्वत्सरं विराटस्य दास्यमास्थाय चोषितः ।
राष्ट्रान्निर्व्वासनक्लेशं वनवासञ्च पाण्डव । कृष्णायाश्च परिक्लेशं संस्मरन् पुरुषो भव ।
अप्रियाणाञ्च वचनं प्रब्रुवत्सु पुनः पुनः । अमर्षं दर्शयस्व त्वममर्षी ह्येव पौरुषं ।
क्रोधो बलं तथा वीर्य्यं ज्ञानयोगोऽस्त्रलाघवं । इह ते दृश्यतां पार्थ युध्यस्व पुरुषो भव ।
लोहाभिहारो निर्वृत्तः कुरुक्षेत्रमकर्द्दमं । पुष्टास्तेऽश्वा भृता योधाः श्वो युध्यस्व सकेशवः । ५५००
असमागम्य भीष्मेण संयुगे किं विकत्थसे । आरुरुक्षुर्य्यथा मन्दः पर्व्वतं गन्धमादनं ।
एवं कत्थसि कौन्तेय अकत्थन् पुरुषो भव । सूतपुत्त्रं सुदुर्द्धर्षं शल्यञ्च बलिनां वरं ।
द्रोणञ्च बलिनां श्रेष्ठं शचीपतिसमं युधि । अजित्वा संयुगे पार्थ राज्यं कथमिहेच्छसि ।
ब्राह्मे धनुषि चाचार्य्यं वेदयोरन्तगं द्वयोः । युधि धुर्य्यमविक्षोभ्यमनीकचरमच्युतं ।
द्रोणं महाद्युतिं पार्थ जेतुमिच्छसि यन्मृषा । न हि शुश्रुम वातेन मेरुमुन्मथितं गिरिं । ५५०५
अनिलो वा वहेन्मेरुं द्यौर्व्वाऽपि निपतेन्महीं । युगं वा परिवर्त्तेत यद्येवं स्यात् यथात्थ मां ।
को ह्याभ्यां जीविताकाङ्क्षी प्राप्यास्त्रमरिमर्द्दनं । पार्थो वा इतरो वाऽपि कोऽन्यः स्वस्ति गृहान् व्रजेत् ।
कथमाभ्यामभिध्यातः संस्पृष्टो दारुणेन वा । रणे जीवन् प्रमुच्येत पदा भूमिमुपस्पृशन् ।
किं दर्दुरः कूपशयो यथेमां न बुध्यसे राजचमूं समेतां । दुराधर्षां देवचमूप्रकाशां गुप्तां नरेन्द्रैस्त्रिदशैरिव द्यां ।
प्राच्यैः प्रतीच्यैरथ दाक्षिणात्यैरुदीच्यकाम्बोजशकैः खशैश्च । शाल्वैः समत्स्यैः कुरुमध्यदेश्यैर्म्लेच्छैः पुलिन्दैर्द्रविडान्ध्रकाञ्च्यैः ॥५५१०
नानाजनौघं युधि सम्प्रवृद्धं गाङ्गं यथा वेगमपारणीयं । माञ्च स्थितं नागबलस्य मध्ये युयुत्ससे मन्द किमल्पबुद्धे ।
अक्षय्याविषुधी चैव अग्निदत्तञ्च ते रथं । जानीमो हि रणे पार्थ केतुं दिव्यञ्च भारत ।
अकत्थमानो युध्यस्व कत्थसे ऽर्ज्जुन किं बहु । पर्य्यायात् सिद्धिरेतस्य नैतत् सिध्यति कत्थनात् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यदीह कत्थनाल्लोके सिध्येत् कर्म्म धनञ्जय। सर्व्वे भवेयुः सिद्धार्थाः कत्थने को हि दुर्गतः।
जानामि ते वासुदेवं सहायं जानामि ते गाण्डिवं तालमात्रं। जानाम्यहं त्वादृशो नास्ति योद्धा जानानस्ते राज्यमेतद्धरामि। ५५१५

न तु पर्य्यायधर्म्मेण सिद्धिं प्राप्नोति मानवः। मनसैवानुकूलानि विधाता कुरुते वशे।
त्रयोदश समा भुक्तं राज्यं विलपतस्तव। भूयश्चैव प्रशासिष्ये त्वां निहत्य सबान्धवं।
क्व तदा गाण्डिवं तेऽभूत् यदा दासपणैर्ज्जितः। क्व तदा भीमसेनस्य बलमासीच्च फाल्गुन।
सगदात् भीमसेनाद्वा फाल्गुनाद्वा सगाण्डिवात्। न वै मोचस्तदा वोऽभूद्विना कृष्णामनिन्दितां।
सा वो दास्ये समापन्नान् मोचयामास पार्षती। अमानुष्यं समापन्नान् दासकर्म्मण्यवस्थितान्। ५५२०
अवोचं यत् षण्ढतिलानहं वस्तथ्यमेव तत्। धृता हि वेणी पार्थेन विराटनगरे तदा।
सूदकर्म्मणि च श्रान्तं विराटस्य महानसे। भीमसेनेन कौन्तेय यत्तु तन्मम पौरुषं।
वेणीं कृत्वा षण्ढवेशः कन्यां नर्त्तितवानसि। आर्षं वेणाच्च कल्याच्च संयुगे यः पलायते।
एवमेव सदा दण्डं क्षत्त्रियाः क्षत्त्रिये दधुः। न भयाद्वासुदेवस्य न चापि तव फाल्गुन।
राज्यं प्रतिप्रदास्यामि युध्यस्व सहकेशवः। न माया ह्यैन्द्रजालं वा कुहका वाऽपिभीषणाः। ५५२५
आत्तशस्त्रस्य सङ्ग्रामे वहन्ति प्रतिगर्ज्जनाः। वासुदेवसहस्रं वा फाल्गुनानां शतानि वा।
आसाद्य माममोघेषु द्रविष्यन्ति दिशो दश। संयुगं गच्छ भीष्मेण भिन्धि वा शिरसा गिरिं।
तर वा त्वं महागाधं बाहुभ्यां पुरुषोदधिं। शारद्वतमहामीनं विविंशतिमहोरगं।
भीष्मवेगमपर्य्यन्तं द्रोणग्राहदुरासदं। कर्णशल्यझषावर्त्तं काम्बोजवडवामुखं।
दुःशलमहोच्छ्वालं सोमदत्तितिमिङ्गिलं। ५५३०
युयुत्सुतोयं भगदत्तमारुतं श्रुतायुहार्द्दिक्यमहासमुद्रं। दुःशासनौघ शलशल्यमत्स्यं सुषेणचित्रायुधनागनक्रं।
जयद्रथाद्रिं पुरुमित्रगाधं दुर्म्मर्षणोदं शकुनिप्रपातं। शस्त्रौघमक्षय्यमभिप्रवृद्धं यदावगाह्य श्रमनष्टचेताः।
भविष्यसि त्वं हतसर्व्वबान्धवस्तदा मनस्ते परितापमेष्यति। तदा मनस्ते त्रिदिवादिवाशुचेर्न्निवर्त्तिता पार्थ महीप्रशासनात्।
प्रशास्य राज्यं हि सुदुर्लभं त्वया बुभूषितः स्वर्ग्गं इवापतस्विना।
इति श्रीमहाभारते उद्योगपर्व्वणि उलूकदूतागमनपर्व्वणि दुर्योधनवाक्ये एकोनषष्ट्यधिकशततमोऽध्यायः॥ १५९॥

॥ सञ्जय उवाच॥ सेनानिवेशं सम्प्राप्तः कैतव्यः पाण्डवस्य ह। समागतः पाण्डवैर्युधिष्ठिरमभाषत। ५५३५
अभिज्ञो दूतवाक्यानां यथोक्तं ब्रुवतो मम। दुर्य्योधनसमादेशं श्रुत्वा न क्रोद्धुमर्हसि।
॥ युधिष्ठिर उवाच॥ उलूक न भयन्तोऽस्ति ब्रूहि त्वं विगतज्वरः। यन्मतं धार्त्तराष्ट्रस्य लुब्धस्यादीर्घदर्शिनः।
ततो द्युतिमतां मध्ये पाण्डवानां महात्मनां। सृञ्जयानाञ्च मत्स्यानां कृष्णस्य च यशस्विनः।
द्रुपदस्य सपुत्त्रस्य विराटस्य च सन्निधौ। भूमिपानाञ्च सर्व्वेषां मध्ये वाक्यं जगाद ह।
॥ उलूक उवाच॥ इदं त्वामब्रवीद्राजा धार्त्तराष्ट्रो महामनाः। शृण्वतां कुरुवीराणां तन्निबोध युधिष्ठिर। ५५४०
पराजितोऽसि द्यूतेन कृष्णा चानायिता सभां। शक्योऽमर्षो मनष्येण कर्त्तुं पुरुषमानिना।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्वादशैव तु वर्षाणि वने धिष्ण्यादिवासिताः । सम्वत्सरं विराटस्य दास्यमास्थाय चोषिताः ।
अमर्षं राज्यहरणं वनवासञ्च पाण्डव । द्रौपद्याश्च परिक्लेशं संस्मरन् पुरुषो भव ।
अप्रियेण च यच्छप्तं भीमसेनेन पाण्डव । दुःशासनस्य रुधिरं पीयतां यदि शक्यते ।
लोहाभिहारो निर्वृत्तः कुरुक्षेत्रमकर्द्दमं । समः पन्था हतास्तेऽश्वाः श्वो युध्यस्व सकेशवः । ५५४५
असमागम्य भीष्मेण संयुगे किं विकत्थसे । आरुरुक्षुर्य्यथा मन्दः पर्व्वतं गन्धमादनं ।
एवं कत्थसि कौन्तेय अकत्थन् पुरुषो भव । सूतपुत्त्रं सुदुर्द्धर्षं शल्यञ्च बलिनां वरं ।
द्रोणञ्च बलिनां श्रेष्ठं शचीपतिसमं युधि । अजित्वा संयुगे पार्थ राज्यं कथमिहेच्छसि ।
ब्राह्मे धनुषि चाचार्य्यं वेदयोरन्तगं द्वयोः । युधि धुर्य्यमविक्षोभ्यमनीकचरमच्युतं ।
द्रोणं महाद्युतिं पार्थ जेतुमिच्छसि तन्मृषा । न हि शुश्रुम वातेन मेरुमुन्मथितं गिरिं । ५५५०
अनिलो वा वहेन्मेरुं द्यौर्व्वाऽपि निपतेन्महीं । युगं वा परिवर्त्तेत यद्येवं स्यात् यथात्थ मां ।
को ह्यस्ति जीविताकाङ्क्षी प्राप्येममरिमर्द्दनं । गजो वाजी रथो वाऽपि पुनः स्वस्ति गृहान् व्रजेत् ।
कथमाभ्यामभिध्यातः संसृष्टो दारुणेन वा । रणे जीवन् विमुच्येत पदा भूमिमुपस्पृशन् ।
किं दर्द्दुरः कूपशयो यथेमां न बुध्यसे राजचमूं समेतां । दुराधर्षां देवचमूप्रकाशां गुप्तां नरेन्द्रैस्त्रिदशैरिव द्यां ।
प्राच्यैः प्रतीच्यैरथ दाक्षिणात्यैरुदीच्यकाम्बोजशकैः खशैश्च । शाल्वैः समत्स्यैः कुरुमध्यदेश्यैर्म्लेच्छैः पुलिन्दैर्द्रविडान्ध्रकाञ्च्यैः ॥५५५५
नानाजनौघं युधि सम्प्रवृद्धं गाङ्गं यथा वेगमपारणीयं । माञ्च स्थितं नागबलस्य मध्ये युयुत्ससे मन्द किमल्पबुद्धे ।
इत्येवमुक्त्वा राजानं धर्म्मपुत्त्रं युधिष्ठिरं । अभ्यावृत्य पुनर्ज्जिष्णुमुलूकः प्रत्यभाषत ।
अकत्थमानो युध्यस्व कत्थसेऽर्ज्जुन किं बहु । पर्य्यायात् सिद्धिरेतस्य नैतत् सिध्यति कत्थनात् ।
यदीदं कत्थनाल्लोके सिध्येत् कर्म्म धनञ्जय । सर्व्वे भवेयुः सिद्धार्थाः कत्थने को हि दुर्गतः ।
जानामि ते वासुदेवं सहायं जानामि ते गाण्डिवं तालमात्रं । जानाम्येतत् त्वादृशो नास्ति योद्धा जानानस्ते राज्यमेतद्धरामि । ५५६०
नतु पर्य्यायधर्म्मेण राज्यं प्राप्नोति मानुषः । मनसैवानुकूलानि विधाता कुरुते वशे ।
त्रयोदशसमा भुक्तं राज्यं विलपतस्तव । भूयश्चैव प्रशासिष्ये निहत्य त्वां सबान्धवं ।
क्व तदा गाण्डिवं तेऽभूत् यदा दासपणैर्ज्जितः । क्व तदा भीमसेनस्य बलमासीच्च फाल्गुन ।
सगदाद्भीमसेनाद्वा पार्थाद्वापि सगाण्डिवात् । न वै मोक्षस्तदा वोऽभूद्विना कृष्णामनिन्दितां ।
सा वो दास्यं समापन्नान् मोचयामास पार्षती । अमानुष्यं समायुक्तान् दासकर्म्मण्यवस्थितान् । ५५६५
अवोचं यत् षण्ढतिलानहं वस्तथ्यमेव तत् । धृता हि वेणी पार्थेन विराटनगरे तदा ।
सूदकर्म्मणि च श्रान्तं विराटस्य महानसे । भीमसेनेन कौन्तेय यच्च तत् मम पौरुषं ।
एवमेतत् सदा दण्डं क्षत्त्रियाः क्षत्त्रिये दधुः । वेणीं कृत्वा षण्ढवेशः कन्यां नर्त्तितवानसि ।
न भयाद्वासुदेवस्य न चापि तव फाल्गुन । राज्यं प्रतिप्रदास्यामि युध्यस्व सहकेशवः ।
न माया हीन्द्रजालं वा कुहका वा विभीषिका । आत्तशस्त्रस्य मे युद्धे वहन्ति प्रतिगर्ज्जनाः । ५५७०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वासुदेवसहस्रं वा फाल्गुनानां शतानि वा। आसाद्य मामभोघेषुं द्रविष्यन्ति दिशो दश ।
संयुगं गच्छ भीमेण भिन्धि वा शिरसा गिरिं। प्रतरस्व महागाधं बाहुभ्यां पुरुषोदधिं।
शारद्वतमहामीनं विविंशतिझषाकुलं। बृहद्बलमहोच्छालं सौमदत्तितिमिङ्गिलं।
भीष्मवेगमपर्य्यन्तं द्रोणग्राहदुरासदं। कर्णशल्यझषावर्त्तं काम्बोजवडवामुखं।
जयद्रथाद्रिं पुरुमित्रगाढं दुर्म्मर्षणोदं शकुनिप्रपातं। शस्त्रौघमत्तय्यमतिप्रवृद्धं यदावगाह्य श्रमनष्टचेताः। ५५७८
भविष्यसि त्वं हतसर्व्वबान्धवस्तदा मनस्ते परितापमेष्यति। तदा मनस्ते त्रिदिवादिवाशुचे निवर्त्तितां पार्थ महीप्रशासनात्।
प्रशास्य राज्यं हि सुदुर्लभं त्वया बुभूषितः स्वर्ग इवातपस्विना।
इति श्रीमहाभारते उद्योगपर्व्वणि उलूकदूतागमनपर्व्वणि उलूकवाक्ये षष्ठ्यधिकशततमोऽध्यायः॥ १६०॥
॥सञ्जय उवाच॥ उलूकस्त्वर्ज्जुनं भूयो यथोक्तं वाक्यमब्रवीत्। आशीविषमिव क्रुद्धं तुदन् वाक्यशलाकया।
तस्य तद्वचनं श्रुत्वा रुषिताः पाण्डवा भृशं। प्रागेव भृशसंक्रुद्धाः कैतव्येनापि धर्षिताः।
आसनेषूदतिष्ठन्त बाहूंश्चैव प्रचिक्षिपुः। आशीविषा इव क्रुद्धा वीक्षाञ्चक्रुः परस्परं। ५५८०
अवाक्शिरा भीमसेनः समुदैक्षत केशवं। नेत्राभ्यां लोहितान्ताभ्यामाशीविष इव श्वसन्।
आर्त्तं वातात्मजं दृष्ट्वा क्रोधेनाभिहतं भृशं। उत्स्मयन्निव दाशार्हः कैतव्यं प्रत्यभाषत।
प्रयाहि शीघ्रं कैतव्य ब्रूयाश्चैव सुयोधनं। श्रुतं वाक्यं गृहीतोऽर्थो मतं यत्ते तथाऽस्तु तत्।
एवमुक्त्वा महाबाहुः केशवो राजसत्तम। पुनरेव महाप्राज्ञं युधिष्ठिरमुदैक्षत।
सृञ्जयानाञ्च सर्व्वेषां कृष्णस्य च यशस्विनः। द्रुपदस्य सपुत्त्रस्य विराटस्य च सन्निधौ। ५५८५
भूमिपानाञ्च सर्व्वेषां मध्ये वाक्यं जगाद ह। उलूकोऽप्यर्ज्जुनं भूयो यथोक्तं वाक्यमब्रवीत्।
आशीविषमिव क्रुद्धं तुदन् वाक्यशलाकया। कृष्णादींश्चैव तान् सर्व्वान् यथोक्तं वाक्यमब्रवीत्।
उलूकस्य तु तद्वाक्यं पापं दारुणमीरितं। श्रुत्वा विचुक्षुभे पार्थो ललाटञ्चाप्यमार्ज्जयत्।
तदवस्थं तदा दृष्ट्वा पार्थं सा समितिर्नृप। नामृष्यन्त महाराज पाण्डवानां महारथाः।
अधिक्षेपेण कृष्णस्य पार्थस्य च महात्मनः। श्रुत्वा ते पुरुषव्याघ्राः क्रोधाज्ज्वलुरच्युताः। ५५९०
धृष्टद्युम्नः शिखण्डी च सात्यकिश्च महारथः। कैकेया भ्रातरः पञ्च राक्षसश्च घटोत्कचः।
द्रौपदेयाभिमन्युश्च धृष्टकेतुश्च पार्थिवः। भीमसेनश्च विक्रान्तो यमजौ च महारथौ।
उत्पेतुरासनात् सर्व्वे क्रोधसंरक्तलोचनाः। बाहून् प्रगृह्य रुचिरान् रक्तचन्दनभूषितान्।
अङ्गदैः पारिहार्य्यैश्च केयूरैश्च विभूषितान्। दन्तान् दन्तेषु निष्पिष्य सृक्कणी परिलेलिहन्।
तेषामाकारभावज्ञः कुन्तीपुत्त्रो वृकोदरः। उदतिष्ठत् स वेगेन क्रोधेन प्रज्वलन्निव। ५५९५
उद्वृत्य सहसा नेत्रे दन्तान् कटकटाय्य च। हस्तं हस्तेन निष्पिष्य उलूकं वाक्यमब्रवीत्।
अशक्तानामिवास्माकं प्रोत्साहननिमित्तकं। श्रुतं ते वचनं मूर्ख यत्त्वां दुर्य्योधनोऽब्रवीत्।
तन्मे कथयतो मन्द शृणु वाक्यं दुरासदं। सर्व्वक्षत्त्रस्य मध्ये त्वं यद्वक्ष्यसि सुयोधनं।
शृण्वतः सूतपुत्त्रस्य शकुनेश्च दुरात्मनः। अस्माभिः प्रीतिकामैस्तु भ्रातुर्ज्येष्ठस्य नित्यशः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मर्षितं ते दुराचार तत्त्वं न बहु मन्यसे । प्रेषितस्य हृषीकेशः शमाकाङ्क्षी कुरून् प्रति ।
कुलस्य हितकामेन धर्मराजेन धीमता । त्वं कालचोदितो नूनं गन्तुकामो यमक्षयं ।
गच्छस्वाहवमस्माभिस्तच्च श्वो भविता ध्रुवं । मयाऽपि च प्रतिज्ञातो वधः सभ्रातृकस्य ते ।
स तथा भविता पाप नात्र कार्य्या विचारणा । वेलामतिक्रमेत् सद्यः सागरो वरुणालयः ।
पर्व्वताश्च विशीर्य्येयुर्मयोक्तं न मृषा भवेत् । सहायस्ते यदि यमः कुवेरो रुद्र एव वा ।
यथाप्रतिज्ञं दुर्ब्बुद्धे प्रकरिष्यन्ति पाण्डवाः । दुःशासनस्य रुधिरं पाता चास्मि यथेप्सितं ।
यश्चेह प्रतिसंरब्धः क्षत्रियो माऽभियास्यति । अपि भीष्मं पुरस्कृत्य तं नेष्यामि यमक्षयं ।
यच्चैतदुक्तं वचनं मया क्षत्रस्य संसदि । यथैतद्भविता सत्यं तथैवात्मानमालभे ।
भीमसेनवचः श्रुत्वा सहदेवोऽप्यमर्षणः । क्रोधसंरक्तनयनस्ततो वाक्यमुवाच ह ।
शौण्डीरशूरसदृशमनीकजनसंसदि । शृणु पाप वचो मह्यं यद्वाच्यो हि पिता त्वया ।
नास्माकं भविता भेदः कदाचित् कुरुभिः सह । धृतराष्ट्रस्य सम्बन्धो यदि न स्यात् त्वया सह ।
त्वन्तु लोकविनाशाय धृतराष्ट्रकुलस्य च । उत्पन्नो वैरपुरुषः स्वकुलघ्नश्च पापकृत् ।
जन्मप्रभृति चास्माकं पिता ते पापपूरुषः । अहितानि नृशंसानि नित्यशः कर्त्तुमिच्छति ।
तस्य वैरानुषङ्गस्य गन्ताऽस्म्यन्तं सुदुर्गमं । अहमादौ निहत्य त्वां शकुनेः सम्प्रपश्यतः ।
ततोऽस्मि शकुनिं हन्ता मिषतां सर्व्वधन्विनां । भीमस्य वचनं श्रुत्वा सहदेवस्य चोभयोः ।
उवाच फाल्गुनो वाक्यं भीमसेनं स्मयन्निव । भीमसेन न ते सन्ति येषां वैरं त्वया सह ।
मन्दा गृहेषु सुखिनो मृत्युपाशवशङ्गताः । उलूकस्य न ते वाच्यः परुषं पुरुषोत्तम ।
दूताः किमपराध्यन्ते यथोक्तस्यानुभाषिणः । एवमुक्त्वा महाबाहुर्भीमं भीमपराक्रमं ।
धृष्टद्युम्नमुखान् वीरान् सुहृदः समभाषत । श्रुतं वस्तस्य पापस्य धार्त्तराष्ट्रस्य भाषितं ।
कुत्सनं वासुदेवस्य मम चैव विशेषतः । श्रुत्वा भवन्तः संरब्धा अस्माकं हितकाम्यया ।
प्रभावाद्वासुदेवस्य भवताञ्च प्रयत्नतः । समग्रं पार्थिवं क्षत्रं सर्व्वं न गणयाम्यहं ।
भवद्भिः समनुज्ञातो वाक्यमस्य यदुत्तरं । उलूके प्रापयिष्यामि यद्वक्ष्यति सुयोधनं ।
श्वोभूते कथितस्यास्य प्रतिवाक्यं चमूमुखे । गाण्डीवेनाभिधास्यामि क्लीवा हि वचनोत्तराः ।
ततस्ते पार्थिवाः सर्व्वे शशंसुर्धनञ्जयं । तेन वाक्योपचारेण विस्मिता राजसत्तमाः ।
अनुनीय च तान् सर्व्वान् यथान्यायं यथावयः । धर्म्मराजं तदा वाक्यं तत्प्राप्यं प्रत्यभाषत ।
आत्मानमवमन्वानो न हि स्यात् पार्थिवोत्तमः । तवोत्तरं प्रवक्ष्यामि तव शुश्रूषणे रतः ।
उलूकं भरतश्रेष्ठ सामपूर्व्वमथोर्ज्जितं । दुर्य्योधनस्य तद्वाक्यं निशम्य भरतर्षभ ।
अतिलोहितनेत्राभ्यामाशीविष इव श्वसन् । स्मयमान इव क्रोधात् सृक्कणी परिसंलिहन् ।
जनार्द्दनमभिप्रेक्ष्य भ्रातॄंश्चैवेदमब्रवीत् । अभ्यभाषत कैतव्यं प्रगृह्य विपुलं भुजं ।
उलूक गच्छ कैतव्य ब्रूहि तात सुयोधनं । कृतघ्नं वैरपुरुषं दुर्म्मतिं कुलपांसनं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पाण्डवेषु सदा पाप नित्यं जिह्मं प्रवर्त्तसे। स्ववीर्य्याद्यः पराक्रम्य पाप आक्रयते परान्। ५६३०
अभीतः पूरयन् वाक्यमेष वै क्षत्त्रियः पुमान्। स पापः क्षत्त्रियो भूत्वा अस्मानाह्वय संयुगे।
मान्यामान्यान् पुरस्कृत्य युद्धं मागाः कुलाधम। आत्मवीर्य्यं समाश्रित्य भृत्यवीर्य्यञ्च कौरव।
आक्रयस्व रणे पार्थान् सर्व्वथा क्षत्त्रियो भव। परवीर्य्यं समाश्रित्य यः समाक्रयते परान्।
अशक्तः स्वयमादातुमेतदेव नपुंसकं। यस्त्वं परेषां वीर्य्येण आत्मानं बहु मन्यसे।
कथमेवमशक्तस्त्वमस्मान् समभिगर्ज्जसि। ५६३५
॥ श्रीकृष्ण उवाच॥ मद्वचश्चापि भूयस्ते वक्तव्यो हि सुयोधनः। श्व इदानीं प्रपद्येथाः पुरुषो भव दुर्म्मते।
मन्यसे यच्च मूढ त्वं न योत्स्यति जनार्द्दनः। सारथ्येन वृतः पार्थैरिति त्वं न बिभेषि च।
जघन्यकालमप्येतन्न भवेत् सर्व्वपार्थिवान्। निर्द्दहेयमहं क्रोधात् तृणानीव हुताशनः।
युधिष्ठिरनियोगात्तु फाल्गुनस्य महात्मनः। करिष्ये युध्यमानस्य सारथ्यं विजितात्मनः।
यद्युत्पतसि लोकांस्त्रीन् यद्याविशसि भूतलं। तत्र तत्रार्ज्जुनरथं प्रभाते द्रक्ष्यसे पुनः। ५६४०
यच्चापि भीमसेनस्य मन्यसे मोघभाषितं। दुःशासनस्य रुधिरं पीतमद्यावधारय।
न त्वां समीक्षते पार्थो नापि राजा युधिष्ठिरः। न भीमसेनो न यमौ प्रतिकूलप्रभाषिणं।
इति श्रीमहाभारते उद्योगपर्व्वणि उलूकदूतागमनपर्व्वणि भगवद्वाक्ये एकषष्ट्यधिकशततमोऽध्यायः॥ १६१॥
॥ सञ्जय उवाच॥ दुर्य्योधनस्य तद्वाक्यं निशम्य भरतर्षभ। नेत्राभ्यामतिताम्राभ्यां कैतव्यं समुदैक्षत।
केशवं समभिप्रेक्ष्य गुडाकेशो महायशाः। अभ्यभाषत कैतव्यं प्रगृह्य विपुलं भुजं।
स्ववीर्य्यं यः समाश्रित्य समाक्रयति वै परान्। अभीतो युध्यते शत्रून् स वै पुरुष उच्यते। ५६४५
परवीर्य्यं समाश्रित्य यः समाक्रयते परान्। क्षत्त्रबन्धुरशक्तत्वात् लोके स पुरुषाधमः।
स त्वं परेषां वीर्य्येण मन्यसे वीर्य्यमात्मनः। स्वयं कापुरुषो मूढ परांश्च क्षेप्तुमिच्छसि।
यस्त्वं वृद्धं सर्व्वराज्ञां हितबुद्धिं जितेन्द्रियं। मरणाय महाप्राज्ञं दीक्षयित्वा विकत्थसे।
भावस्ते विदितोऽस्माभिर्दुर्ब्बुद्धे कुलपांसन। न हनिष्यति गाङ्गेयं पाण्डवो घृणयेति ह।
यस्य वीर्य्यं समाश्रित्य धार्त्तराष्ट्र विकत्थसे। हन्ताऽस्मि प्रथमं भीष्मं मिषतां सर्व्वधन्विनां। ५६५०
कैतव्य गत्वा भरतान् समेत्य सुयोधनं धार्त्तराष्ट्रं वदस्व। तथेत्युवाचार्ज्जुनः सव्यसाची निशाव्यपाये भविता विमर्द्दः।
यद्वोऽब्रवीत्वाक्यमदीनसत्त्वो मध्ये कुरून् हर्षयन् सत्यसन्धः। अहं हन्ता सृञ्जयानामनीकं शाल्वेयकांश्चेति ममैष भारः।
हन्यामहं द्रोणमृतेऽपि लोकं न ते भयं विद्यते पाण्डवेभ्यः। ततो हि ते लब्धमिदं स्वराज्यमापन्नताः पाण्डवाश्चेति भावः।
स दर्पपूर्णो न समीक्षसे त्वमनर्थमात्मन्यपि वर्त्तमानं। तस्मादहं ते प्रथमं समूहे हन्ता समक्षं कुरुवृद्धमेव।
सूर्य्योदये युक्तसेनः प्रतीक्ष्य ध्वजी रथी रक्षत सत्यसन्धं। अहं हि वः पश्यतां द्वीपमेनं भीष्मं रथात् पातयिष्यामि
बाणैः। ५६५५
श्वोभूते कत्थनावाक्यं विज्ञास्यति सुयोधनः। अर्चितं शरजालेन मया दृष्ट्वा पितामहं।
यदुक्तश्च सभामध्ये पुरुषो ह्रस्वदर्शनः। क्रुद्धेन भीमसेनेन भ्राता दुःशासनस्तव।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अधर्म्मज्ञो नित्यवैरी पापबुद्धिर्नृशंसवत् । सत्यप्रतिज्ञामचिरात् द्रच्यसे तां सुयोधन ।
अभिमानस्य दर्पस्य क्रोधपारुष्ययोस्तथा । नैष्ठुर्य्यस्यावलेपस्य आत्मसम्भावनस्य च ।
नृशंसतायास्तैच्ण्यस्य धर्म्मविद्वेषणस्य च । अधर्म्मस्यापवादस्य वृद्धातिक्रमणस्य च । ५५९०
दर्शनस्य च वक्रस्य कृत्स्नस्यापनयस्य च । द्रच्यसि त्वं फलं तीव्रमचिरेण सुयोधन ।
वासुदेवद्वितीये हि मयि क्रुद्धे नराधम । आशा ते जीविते मूढ राज्ये वा केन हेतुना ।
शान्ते भीष्मे तथा द्रोणे सूतपुत्त्रे च पातिते । निराशो जीविते राज्ये पुत्त्रेषु च भविष्यसि ।
भ्रातॄणां निधनं श्रुत्वा पुत्त्राणाञ्च सुयोधन । भीमसेनेन निहतो दुष्कृतानि स्मरिष्यसि ।
न द्वितीयां प्रतिज्ञां हि प्रतिजानामि कैतव । सत्यं ब्रवीम्यहं ह्येतत् सर्व्वं सत्यं भविष्यति । ५५९५
युधिष्ठिरोऽपि कैतव्यमुलूकमिदमब्रवीत् । उलूक मद्वचो ब्रूहि गत्वा तात सुयोधनं ।
स्वेन वृत्तेन मे वृत्तं नाधिगन्तुं त्वमर्हसि । उभयोरन्तरं वेद सूनृतानृतयोरपि ।
न चाहं कामये पापमपि कीटपिपीलयोः । किं पुनर्ज्ञातिषु वधं कामयेयं कथञ्चन ।
एतदर्थं मया तात पञ्च ग्रामा वृताः पुरा । कथं तव सुदुर्ब्बुद्धे न प्रेच्चे व्यसनं महत् ।
स त्वं कामपरीतात्मा मूढभावाच्च कत्थसे । तथैव वासुदेवस्य न गृह्णासि हितं वचः । ५६००
किञ्चेदानीं बहुनोक्तेन युध्यस्व सह बान्धवैः । मम विप्रियकर्त्तारं कैतव्य ब्रूहि कौरवं ।
श्रुतं वाक्यं गृहीतोऽर्थो मतं यत्ते तथाऽस्तु तत् । भीमसेनस्ततो वाक्यं भूय आह नृपात्मजः ।
उलूक मद्वचो ब्रूहि दुर्म्मतिं पापपूरुषं । शठं नैकृतिकं पापं दुराचारं सुयोधनं ।
गृभोदरे वा वस्तव्यं पुरे वा नागसाह्वये । प्रतिज्ञातं मया यच्च सभामध्ये नराधम ।
कर्त्ताऽहं तद्वचः सत्यं सत्येनैव शपामि ते । दुःशासनस्य रुधिरं हत्वा पास्याम्यहं मृधे । ५६०५
सक्थिनी तव भङ्क्त्वैव हत्वा हि तव सोदरान् । सर्व्वेषां धार्त्तराष्ट्राणामहं मृत्युः सुयोधन ।
सर्व्वेषां राजपुत्त्राणामभिमन्युरसंशयं । कर्म्मणा तोषयिष्यामि भूयश्चैव वचः शृणु ।
हत्वा सुयोधन त्वां वै सहितं सर्व्वसोदरैः । आक्रमिष्ये पदा मूर्द्ध्नि धर्म्मराजस्य पश्यतः ।
नकुलस्तु ततो वाक्यमिदमाह महीपते । उलूक ब्रूहि कौरव्यं धार्त्तराष्ट्रं सुयोधनं ।
श्रुतं ते गदतो वाक्यं सर्व्वमेव यथातथं । तथा कर्त्ताऽस्मि कौरव्य यथा त्वमनुशाससि मां । ५६१०
सहदेवोऽपि नृपते इदमाह वचोऽर्थवत् । सुयोधन मतिर्या ते तथैषा ते भविष्यति ।
शोचिष्यसे महाराज सपुत्त्रज्ञातिबान्धवः । इमञ्च क्लेशमस्माकं हृष्टो यत् त्वं विकत्थसे ।
विराटद्रुपदौ वृद्धावुलूकमिदमूचतुः । दासभावं नियच्छेव साधोरिति मतिः सदा ।
तौ च दासावदासौ वा पौरुषं यस्य यादृशं । शिखण्डी तु ततो वाक्यमुलूकमिदमब्रवीत् ।
वक्तव्यो भवता राजा पापेष्वभिरतः सदा । पश्य त्वं मां रणे राजन् कुर्व्वाणं कर्म्म दारुणं । ५६१५
यस्य वीर्य्यं समासाद्य मन्यसे विजयं युधि । तमहं पातयिष्यामि रथात् तव पितामहं ।
अहं भीष्मवधात् सृष्टो नूनं धात्रा महात्मना । सोऽहं भीष्मं हनिष्यामि मिषतां सर्व्वधन्विनां ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

धृष्टद्युम्नोऽपि कैतव्यमुलूकमिदमब्रवीत्। सुयोधनो मम वचो वक्तव्यो नृपतेः सुतः।
अहं द्रोणं हनिष्यामि सगणं सहबान्धवं। कर्त्ता चाऽहं तथा कर्म्म यथा नाऽन्यः करिष्यति।
तमब्रवीद्धर्म्मराजः कारुण्यार्थं वचो महत्। नाहं ज्ञातिवधं राजन् कामयेयं कथञ्चन। ५९९०
तवैव दोषाद्दुर्ब्बुद्धे सर्व्वमेतत्त्वनाहृतं। अवश्यञ्च मया कार्य्यं सर्व्वेषाञ्चरितं महत्।
स गच्छ माचिरं तात उलूक यदि मन्यसे। इह वा तिष्ठ भद्रं ते वयं हि तव बान्धवाः।
उलूकस्तु ततो राजन् धर्म्मपुत्त्रं युधिष्ठिरं। आमन्त्र्य प्रययौ तत्र यत्र राजा सुयोधनः।
इत्युक्तः कितवो वाक्यमुपधार्य्य च यत्नतः। अनुज्ञातो निववृते पुनरेव यथागतं।
उलूकस्तत्र आगम्य दुर्य्योधनममर्षणं। अर्ज्जुनस्य समादेशं यथोक्तं सर्व्वमब्रवीत्। ५९९५
वासुदेवस्य भीमस्य धर्म्मराजस्य पौरुषं। नकुलस्य विराटस्य द्रुपदस्य च भारत।
सहदेवस्य च वचो धृष्टद्युम्नशिखण्डिनोः। केशवार्ज्जुनयोर्वाक्यं यथोक्तं सर्व्वमब्रवीत्।
कैतव्यस्य तु तद्वाक्यं निशम्य भरतर्षभः। दुःशासनञ्च कर्णञ्च शकुनिञ्चापि भारत।
आज्ञापयत राज्ञस्च बलं मित्रबलं तथा। यथा प्रागुदयात् सर्व्वे युक्तास्तिष्ठन्त्यनीकिनः।
ततः कर्णसमादिष्टा दूताः संत्वरिता रथैः। उष्ट्रवामीभिरप्यन्ये सदश्वैश्च महाजवैः। ५०००
तूर्णं परिययुः सेनां कृत्स्नां कर्णस्य शासनात्। आज्ञापयन्तो राज्ञस्च योगः प्रागुदयादिति।
इति श्रीमहाभारते उद्योगपर्व्वणि उलूकदूतागमनपर्व्वणि उलूकापयाने द्विषष्ट्यधिकशततमोऽध्यायः॥ १६२ ॥
॥ सञ्जय उवाच॥ उलूकस्य वचः श्रुत्वा कुन्तीपुत्त्रो युधिष्ठिरः। सेनां निर्यापयामास धृष्टद्युम्नपुरोगमां।
पदातिनीं नागवतीं रथिनीमश्ववृन्दिनीं। चतुर्व्विधबलां भीमामकम्प्यां पृथिवीमिव।
भीमसेनादिभिर्गुप्तां सार्ज्जुनैश्च महारथैः। धृष्टद्युम्नवशां दुर्गां सागरस्तिमितोपमां।
तस्यास्त्वग्रे महेष्वासः पाञ्चाल्यो युद्धदुर्म्मदः। द्रोणप्रेप्सुरनीकानि धृष्टद्युम्नो व्यकर्षत। ५००५
यथाबलं यथोत्साहं रथिनः समुपादिशत्। अर्ज्जुनं सूतपुत्त्राय भीमं दुर्य्योधनाय च।
धृष्टकेतुञ्च शल्याय गौतमायोत्तमौजसं। अश्वत्थाम्ने च नकुलं शैव्यञ्च कृतवर्म्मणे।
सैन्धवाय च वार्ष्णेयं युयुधानं समादिशत्। शिखण्डिनञ्च भीष्माय प्रमुखे समकल्पयत्।
सहदेवं शकुनये चेकितानं शलाय च। द्रौपदेयांस्तथा पञ्च त्रिगर्त्तेभ्यः समादिशत्।
वृषसेनाय सौभद्रं शेषाणाञ्च महीक्षितां। स समर्थं हि तं मेने पार्थादभ्यधिकं रणे। ५०१०
एवं विभज्य योधांस्तान् पृथक् च सह चैव ह। ज्वालावर्णो महेष्वासो द्रोणमंशमकल्पयत्।
धृष्टद्युम्नो महेष्वासः सेनापतिपतिस्ततः। विधिवत् व्यूह्य मेधावी युद्धाय धृतमानसः।
यथोद्दिष्टानि सैन्यानि पाण्डवानामयोजयत्। जयाय पाण्डुपुत्त्राणां यत्तस्तस्थौ रणाजिरे।
इति श्रीमहाभारते उद्योगपर्व्वणि उलुकदूतागमनपर्व्वणि सेनापतिनियोगे त्रिषष्ट्यधिकशततमोऽध्यायः समाप्तञ्च उलूकदूतागमनपर्व्व॥ १६३ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ अथ रथातिरथसङ्ख्यानपर्व्व ॥ १२ ॥

॥ धृतराष्ट्र उवाच ॥ प्रतिज्ञाते फाल्गुनेन वधे भीष्मस्य संयुगे । किमकुर्व्वत मे मन्दाः पुत्रा दुर्य्योधनादयः ।
हतमेव हि पश्यामि गाङ्गेयं पितरं रणे । वासुदेवसहायेन पार्थेन दृढधन्वना ।
स चापरिमितप्रज्ञस्तच्छ्रुत्वा पार्थभाषितं । किमुक्तवान् महेष्वासो भीष्मः प्रहरतां वरः ।
सैनापत्यञ्च सम्प्राप्य कौरवाणां धुरन्धरः । किमचेष्टत गाङ्गेयो महाबुद्धिपराक्रमः ।
॥ वैशम्पायन उवाच ॥ ततस्तत् सञ्जयस्तस्मै सर्व्वमेव न्यवेदयत् । यथोक्तं कुरुवृद्धेन भीष्मेणामिततेजसा ।
॥ सञ्जय उवाच ॥ सैनापत्यमनुप्राप्य भीष्मः शान्तनवो नृप । दुर्य्योधनमुवाचेदं वचनं हर्षयन्निव ।
नमस्कृत्य कुमाराय सेनान्ये शक्तिपाणये । अहं सेनापतिस्तेऽद्य भविष्यामि न संशयः ।
सेनाकर्म्मण्यभिज्ञोऽस्मि व्यूढेषु विविधेषु च । कर्म्म कारयितुञ्चैव भृतानप्यभृतांस्तथा ।
यात्रायाने च युद्धे च तथा प्रशमनेषु च । भृशं वेद महाराज यथा वेद बृहस्पतिः ।
व्यूहानाञ्च समारम्भान् दैवगन्धर्व्वमानुषान् । तैरहं मोहयिष्यामि पाण्डवान् व्येतु ते ज्वरः ।
सोऽहं योत्स्यामि तत्त्वेन पालयंस्तव वाहिनीं । यथावत् शास्त्रतो राजन् व्येतु ते मानसो ज्वरः ।
॥ दुर्य्योधन उवाच ॥ विद्यते मे न गाङ्गेय भयं देवासुरेष्वपि । समस्तेषु महाबाहो सत्यमेतत् ब्रवीमि ते ।
किं पुनस्त्वयि दुर्द्धर्षे सैनापत्ये व्यवस्थिते । द्रोणे च पुरुषव्याघ्रे स्थिते युद्धाभिनन्दिनि ।
भवद्भ्यां पुरुषाग्र्याभ्यां स्थिताभ्यां विजयो मम । न दुर्लभं कुरुश्रेष्ठ देवराज्यमपि ध्रुवं ।
रथसङ्ख्यान्तु कार्त्स्न्येन परेषामात्मनस्तथा । तथैवातिरथानाञ्च वेत्तुमिच्छामि कौरव ।
पितामहो हि कुशलः परेषामात्मनस्तथा । श्रोतुमिच्छाम्यहं सर्व्वैः सहेभिर्वसुधाधिपैः ।
॥ भीष्म उवाच ॥ गान्धारे शृणु राजेन्द्र रथसङ्ख्यां स्वके बले । ये रथाः पृथिवीपाल तथैवातिरथाश्च ये ।
बहूनीह सहस्राणि प्रयुतान्यर्व्वुदानि च । रथानां तत्र सेनायां यथा मुख्यन्तु मे शृणु ।
भवानग्रे रथोदारः सह सर्व्वैः सहोदरैः । दुःशासनप्रभृतिभिर्भ्रातृभिः शतसम्मितैः ।
सर्व्वे कृतप्रहरणाश्छेद्यभेद्यविशारदाः । रथोपस्थे गजस्कन्धे गदाप्रासासिचर्म्मणि ।
संयन्तारः प्रहन्तारः कृतास्त्रा भारसाधनाः । इष्वस्त्रे द्रोणशिष्याश्च कृपस्य च शरद्वतः ।
एते हनिष्यन्ति रणे पञ्चालान् युद्धदुर्म्मदान् । कृतकिल्बिषाः पाण्डवेयैर्धार्त्तराष्ट्रा मनस्विनः ।
ततोऽहं भरतश्रेष्ठ सर्व्वसेनापतिस्तव । शत्रून्विध्वंसयिष्यामि कदर्थीकृत्य पाण्डवं ।
न त्वात्मनो गुणान् वक्तुमर्हामि विदितोऽस्मि ते । कृतवर्म्मा त्वतिरथो भोजः शस्त्रभृतां वरः ।
अर्थसिद्धिं तव रणे करिष्यति न संशयः । शस्त्रविद्भिरनाधृष्यो दूरपाती दृढायुधः ।
हनिष्यति चमूं तेषां महेन्द्रो दानवानिव । मद्रराजो महेष्वासः शल्यो मेऽतिरथो मतः ।
स्पर्द्धते वासुदेवेन नित्यं यो वै रणे रणे । भागिनेयान्निजांस्त्यक्त्वा शल्यस्ते राजसत्तमः ।
एष योत्स्यति सङ्ग्रामे पाण्डवांश्च महारथान् । सागरोर्म्मिसमैर्व्वाणैः प्लावयन्निव शात्रवान् ।
भूरिश्रवाः कृतास्त्रश्च तव चापि हितः सुहृत् । सौमदत्तिर्म्महेष्वासो रथयूथपयूथपः ।
बलक्षयममित्राणां सुमहान्तं करिष्यति । सिन्धुराजो महाराज मतो मे द्विगुणो रथः ।

CC-0. In Public Domain Sri Aurobindo Library, Pendicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

योत्स्यते समरे राजन् विक्रान्तो रथसत्तमः। द्रौपदीहरणे राजन् परिक्लिष्टस्तु पाण्डवैः।
संस्मरंस्तं परिक्लेशं योत्स्यते परवीरहा। एतेन हि तदा राजंस्तप आस्थाय दारुणं। ५०४५
सुदुर्लभो वरो लब्धः पाण्डवान् योद्धुमाहवे। स एष रथशार्दूलस्तद्वैरं संस्मरन् रणे।
योत्स्यते पाण्डवैस्तात प्राणांस्त्यक्त्वा सुदुस्त्यजान्।

इति श्रीमहाभारते उद्योगपर्व्वणि रथातिरथसङ्ख्यानपर्व्वणि कौरवरथातिरथसङ्ख्यायां चतुःषष्ट्यधिकशततमोऽध्यायः ॥ १६४ ॥

॥ भीष्म उवाच ॥ सुदक्षिणस्तु काम्बोजो रथ एकगुणो मतः। तवार्थसिद्धिमाकाङ्क्षन् योत्स्यते समरे परैः।
एतस्य रथसिंहस्य तवार्थं राजसत्तम। पराक्रमं यथेन्द्रस्य द्रक्ष्यन्ति कुरवो युधि।
एतस्य रथवंशे हि तिग्मवेगप्रहारिणः। काम्बोजानां महाराज शलभानामिवायतीः। ५०५०
नीलो माहिष्मतीवासी नीलवर्म्मा रथस्तव। रथवंशेन कदनं शत्रूणां वै करिष्यति।
कृतवैरः पुरा चैव सहदेवेन मारिष। योत्स्यते सततं राजंस्तवार्थं कुरुनन्दन।
विन्दानुविन्दावावन्त्यौ सम्मितौ रथसत्तमौ। कृतिनौ समरे तात दृढवीर्य्यपराक्रमौ।
एतौ तौ पुरुषव्याघ्रौ रिपुसैन्यं प्रधक्ष्यतः। गदाप्रासासिनाराचैस्तोमरैश्च करच्युतैः।
युद्धाभिकामौ समरे क्रीडन्ताविव यूथपौ। यूथमध्ये महाराज विचरन्तौ कृतान्तवत्। ५०५५
त्रिगर्त्ता भ्रातरः पञ्च रथोदारा मता मम। कृतवैराश्च पार्थैस्ते विराटनगरे तदा।
मकरा इव राजेन्द्र समुद्धततरङ्गिणीं। गङ्गां विक्षोभयिष्यन्ति पार्थानां युधि वाहिनीं।
ते रथाः पञ्च राजेन्द्र येषां सत्यरथो मुखं। एते योत्स्यन्ति सङ्ग्रामे संस्मरन्तः पुरा कृतं।
व्यलीकं पाण्डवेयेन भीमसेनानुजेन ह। दिशो विजयता राजन् श्वेतवाहेन भारत।
ते हनिष्यन्ति पार्थानां तानासाद्य महारथान्। वरान् वरान् महेष्वासान् क्षत्त्रियाणां धुरन्धरान्। ५०६०
लक्ष्मणस्तव पुत्त्रस्तु तथा दुःशासनस्य च। उभौ तौ पुरुषव्याघ्रौ सङ्ग्रामेष्वपलायिनौ।
तरुणौ सुकुमारौ च राजपुत्त्रौ तरस्विनौ। युद्धानाञ्च विशेषज्ञौ प्रणेतारौ च सर्व्वशः।
रथौ तौ कुरुशार्दूलौ मतौ मे रथसत्तमौ। क्षत्त्रधर्म्मे रतौ वीरौ महत्कर्म्म करिष्यतः।
दण्डधारो महाराज रथ एको नरर्षभ। योत्स्यते तव सङ्ग्रामे स्वेन सैन्येन पालितः।
बृहद्बलस्तथा राजा कौशल्यो रथसत्तमः। रथो मम मतस्तात महावेगपराक्रमः। ५०६५
एष योत्स्यति सङ्ग्रामे स्वान् बन्धून् सम्प्रहर्षयन्। उग्रायुधो महेष्वासो धार्त्तराष्ट्रहिते रतः।
कृपः शारद्वतो राजन् रथयूथपयूथपः। प्रियान् प्राणान् परित्यज्य प्रधक्ष्यति रिपूंस्तव।
गौतमस्य महर्षेर्य्य आचार्य्यस्य शरद्वतः। कार्त्तिकेय इवाजेयः शरस्तम्बात् सुतोऽभवत्।
एष सेनाः सुबहुला विविधायुधकार्म्मुकाः। अग्निवत् समरे तात चरिष्यति विनिर्द्दहन्।

इति श्रीमहाभारते उद्योगपर्व्वणि रथातिरथसङ्ख्यानपर्व्वणि कौरवरथातिरथसङ्ख्यायां पञ्चषष्ट्यधिकशततमोऽध्यायः ॥ १६५ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ भीष्म उवाच ॥ शकुनिर्मातुलस्तेऽसौ रथ एको नराधिप। प्रयुज्य पाण्डवैर्वैरं योत्स्यते नात्र संशयः। ५७००
एतस्य सेना दुर्द्धर्षा समरे प्रतियायिनः। विविधायुधभूयिष्ठा वायुवेगसमा जवे।
द्रोणपुत्त्रो महेष्वासः सर्व्वानेवातिधन्विनः। समरे चित्रयोधी च दृढास्त्रश्च महारथः।
एतस्य हि महाराज यथा गाण्डीवधन्वनः। शरासनविनिर्मुक्ताः संसक्ता यान्ति सायकाः।
नैष शक्यो मया वीर संख्यातुं रथसत्तमः। निर्द्दहेदपि लोकांस्त्रीनिच्छन्नेष महारथः।
क्रोधस्तेजश्च तपसा संभृतोऽश्रमवासिना। द्रोणेनानुगृहीतश्च दिव्यैरस्त्रैरुदारधीः। ५७०५
दोषस्त्वस्य महानेको येनैष भरतर्षभ। न मे रथो नातिरथो मतः पार्थिवसत्तम।
जीवितं प्रियमत्यर्थमायुष्कामः सदा द्विजः। न ह्यस्य सदृशः कश्चिदुभयोः सेनयोरपि।
हन्यादेकरथेनैष देवानामपि वाहिनीं। वपुष्मांस्तलघोषेण स्फोटयेदपि पर्व्वतान्।
असङ्ख्येयगुणो वीरः प्रहन्ता दारुणद्युतिः। दण्डपाणिरिवासह्यः कालवत् प्रचरिष्यति।
युगान्ताग्निसमः क्रोधात् सिंहग्रीवो महाद्युतिः। एष भारतयुद्धस्य पृष्ठं संशमयिष्यति। ५७१०
पिता त्वस्य महातेजा वृद्धोऽपि युवभिर्वरः। रणे कर्म्म महत्कर्त्ता अत्र मे नास्ति संशयः।
अस्त्रवेगानिलोद्धूतः सेनाकक्षेन्धनोत्थितः। पाण्डुपुत्त्रस्य सैन्यानि प्रधक्ष्यति रणे धृतः।
रथयूथपयूथानां यूथपोऽयं नरर्षभ। भरद्वाजात्मजः कर्त्ता कर्म्म तीव्रं हितं तव।
सर्व्वमूर्द्धाभिषिक्तानामाचार्य्यः स्थविरो गुरुः। गच्छेदन्तं सृञ्जयानां प्रियस्त्वस्य धनञ्जयः।
नैष जातु महेष्वासः पार्थमक्लिष्टकारिणं। हन्यादाचार्य्यकं दीप्तं संस्मृत्य गुणनिर्म्मितं। ५७१५
श्लाघतेऽयं सदा वीर पार्थस्य गुणविस्तरैः। पुत्त्रादभ्यधिकञ्चैनं भारद्वाजोऽनुपश्यति
हन्यादेकरथेनैव देवगन्धर्व्वमानुषान्। एकीभूतानपि रणे दिव्यैरस्त्रैः प्रतापवान्।
पौरवो राजशार्द्दूलस्तव राजन् महारथः। मतो मम रथोदारः परवीररथारुजः।
स्वेन सैन्येन महता प्रतपन् शत्रुवाहिनीं। प्रधक्ष्यति स पाञ्चालान् कक्षमग्निगतिर्यथा।
सत्यश्रवा रथस्त्वेको राजपुत्त्रो बृहद्बलः। तव राजन्रिपुबले कालवत् प्रचरिष्यति। ५७२०
एतस्य योधा राजेन्द्र विचित्रकवचायुधाः। विचरिष्यन्ति सङ्ग्रामे निघ्नन्तः शात्रवांस्तव।
वृषसेनो रथस्तेऽग्र्यः कर्णपुत्त्रो महारथः। प्रधक्ष्यति रिपूणान्ते बलन्तु बलिनां वरः।
जलसन्धो महातेजा राजन्रथवरस्तव। त्यक्ष्यते समरे प्राणान्माधवः परवीरहा।
एष योत्स्यति सङ्ग्रामे गजस्कन्धविशारदः। रथेन वा महाबाहुः क्षपयन् शत्रुवाहिनीं।
रथ एष महाराज मतो मे राजसत्तम। त्वदर्थे त्यक्ष्यते प्राणान् सहसैन्यो महारणे। ५७२५
एष विक्रान्तयोधी च चित्रयोधी च सङ्गरे। वीतभीश्चापि ते राजञ्छत्रुभिः सह योत्स्यते।
बाह्लीकोऽतिरथश्चैव समरे चानिवर्त्तिनः। मम राजन्मतो युद्धे शूरो वैवस्वतोपमः।
न ह्येष समरं प्राप्य निवर्त्तेत कथञ्चन। यथा सततगो राजन् स हि हन्यात् परान्रणे।
सेनापतिर्महाराज सत्यवांस्ते महारथः। रणेष्वद्भुतकर्म्मा च रथी पररथारुजः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

एतस्य समरं दृष्ट्वा न व्यथाऽस्ति कथञ्चन । उत्स्मयन्नुत्पतत्येष परान्रथपथे स्थितान् । ५८००
एष वाऽरिषु विक्रान्तः कर्म्म सत्पुरुषोचितं । कर्त्ता विमर्द्दे सुमहत् त्वदर्थे पुरुषोत्तमः ।
अलम्बुषो राक्षसेन्द्रः क्रूरकर्म्मा महारथः । हनिष्यति परान् राजन् पूर्व्ववैरमनुस्मरन् ।
एष राक्षससैन्यानां सर्व्वेषां रथसत्तमः । मायावी दृढवैरश्च समरे विचरिष्यति ।
प्राग्ज्योतिषाधिपो वीरो भगदत्तः प्रतापवान् । गजाङ्कुशधरश्रेष्ठो रथे चैव विशारदः ।
एतेन युद्धमभवत् पुरा गाण्डीवधन्वनः । दिवसान् सुबहून् राजन्नुभयोर्जयगृद्धिनोः । ५८०५
ततः सखायं गान्धारे मानयन् पाकशासनं । अकरोत् संविदं तेन पाण्डवेन महात्मना ।
एष योत्स्यति सङ्ग्रामे गजस्कन्धविशारदः । ऐरावतगतो राजा देवानामिव वासवः ।

इति श्रीमहाभारते उद्योगपर्व्वणि रथातिरथसङ्ख्यानपर्व्वणि कौरवरथातिरथसङ्ख्यायां षट्षष्ट्यधिकशततमोऽध्यायः ॥ १६६ ॥

॥ भीष्म उवाच ॥ अचलो वृषकश्चैव सहितौ भ्रातरावुभौ । रथौ तव दुराधर्षौ शत्रून् विध्वंसयिष्यतः ।
बलवन्तौ नरव्याघ्रौ दृढक्रोधपरायणौ । गान्धारमुख्यौ तरुणौ दर्शनीयौ महाबलौ ।
सखा ते दयितो नित्यं य एष रणकर्कशः । उत्साहयति राजंस्त्वां विग्रहे पाण्डवैः सह । ५८१०
पुरुषः कत्थनो नीचः कर्णो वैकर्त्तनस्तव । मन्त्री नेता च बन्धुश्च मानी चात्यन्तमुच्छ्रितः ।
एष नैव रथः कर्णो न चाप्यतिरथो रणे । वियुक्तः कवचेनैष सहजेन विचेतनः ।
कुण्डलाभ्याञ्च दिव्याभ्यां वियुक्तः सततं घृणी । अभिशापाच्च रामस्य ब्राह्मणस्य च भाषणात् ।
करणानां वियोगाच्च तेन मेऽर्द्धरथो मतः । नैष फाल्गुनमासाद्य पुनर्ज्जीवन् विमोक्ष्यते ।
ततोऽब्रवीत् पुनर्द्रोणः सर्व्वशस्त्रभृतां वरः । एवमेतत् यथात्थ त्वं न मिथ्याऽस्ति कदाचन । ५८१५
रणे रणेऽभिमानी च विमुखश्चापि दृश्यते । घृणी कर्णः प्रमादी च तेन मेऽर्द्धरथो मतः ।
एतच्छ्रुत्वा तु राधेयः क्रोधादुत्फाल्य लोचने । उवाच भीष्मं राधेयस्तुदन् वाग्भिः प्रतोदवत् ।
पितामह यथेष्टं मां वाक्शरैरुपकृन्तसि । अनागसं सदा द्वेषादेवमेव पदे पदे ।
मर्षयामि च तत्सर्व्वं दुर्य्योधनकृतेन वै । त्वन्तु मां मन्यसे मन्दं यथा कापुरुषं तथा ।
भवानर्द्धरथो मह्यं मतो वै नात्र संशयः । सर्व्वस्य जगतश्चैव गाङ्गेयो न मृषा वदेत् । ५८२०
कुरूणामहितो नित्यं न च राजाऽवबुध्यते । को हि नाम समानेषु राजसूदारकर्म्मसु ।
तेजोवधमिदं कुर्य्यात् विभेदयिषुराहवे । यथा त्वं गुणविद्वेषादपरागं चिकीर्षसि ।
न हायनैर्न्न पलितैर्न्न वित्तैर्न्न च बन्धुभिः । महारथत्वं सङ्ख्यातुं शक्यं क्षत्रस्य कौरव ।
बलज्येष्ठं स्मृतं क्षत्रं मन्त्रज्येष्ठा द्विजातयः । धनज्येष्ठाः स्मृता वैश्याः शूद्रास्तु वयसाऽधिकाः ।
यथेच्छकं स्वयं ब्रूयाद्रथानतिरथांस्तथा । कामद्वेषसमायुक्तो मोहात् प्रकुरुते भवान् । ५८२५
दुर्य्योधन महाबाहो साधु सम्यगवेक्ष्यतां । त्यज्यतां दुष्टभावोऽयं भीष्मः किल्बिषकृत्तव ।
भिन्ना हि सेना नृपते दुःसन्धेया भवत्युत । मौला हि पुरुषव्याघ्र किमु नाना समुत्थिताः ।
एषां द्वैधे समुत्पन्ने योधानां युधि भारत । तेजोवधो नः क्रियते प्रत्यक्षेण विशेषतः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

रथानां क्व च विज्ञानं क्व च भीष्मोऽल्पचेतनः। अहमावारयिष्यामि पाण्डवानामनीकिनीं।
आसाद्य माममोघेषुं गमिष्यन्ति दिशो दश। पाण्डवाः सहपाञ्चालाः शार्दूलं वृषभा इव। ५८३०
क्व च युद्धं विमर्द्दो वा मन्त्रं सुव्याहृतानि च। क्व च भीष्मो गतवया मन्दात्मा कालचोदितः।
एकाकी स्पर्द्धते नित्यं सर्व्वेण जगता सह। न चान्यं पुरुषं किञ्चित् मन्यते मोघदर्शनः।
श्रोतव्यं खलु वृद्धानामिति शास्त्रनिदर्शनं। न त्वेव ह्यतिवृद्धानां पुनर्बाला हि ते मताः।
अहमेको हनिष्यामि पाण्डवानामनीकिनीं। सुयुद्धे राजशार्दूल यशो भीष्मं गमिष्यति।
कृतः सेनापतिस्त्वेष त्वया भीष्मो नराधिप। सेनापतौ यशो गन्ता न तु योधान् कथञ्चन। ५८३५
नाहं जीवति गाङ्गेये योत्स्ये राजन् कथञ्चन। हते भीष्मे तु योद्धाऽस्मि सर्व्वैरेव महारथैः।
॥ भीष्म उवाच ॥ समुद्यतोऽयं भारो मे सुमहान् सागरोपमः। धार्त्तराष्ट्रस्य सङ्ग्रामे वर्षपूगाभिचिन्तितः।
तस्मिन्नभ्यागते काले सङ्ग्रामे लोमहर्षणे। मिथो भेदो न मे कार्य्यस्तेन जीवसि सूतज।
न ह्यहं त्वद्य विक्रम्य स्थविरोऽपि शिशोस्तव। युद्धश्रद्धामहं छिन्द्यां जीविताशां च सूतज।
जामदग्न्येन रामेण महास्त्राणि विमुञ्चता। न मे व्यथा कृता काचित् त्वन्तु मे किं करिष्यसि। ५८४०
कामं नैतत् प्रशंसन्ति सन्तः स्वबलसंस्तवं। वक्ष्यामि तत्त्वं सन्तप्तो निहीनकुलपांसन।
समेतं पार्थिवं क्षत्त्रं काशिराजस्वयम्बरे। निर्जित्यैकरथेनैव याः कन्यास्तरसा हृताः।
ईदृशानां सहस्राणि विशिष्टानामथो पुनः। मयैकेन निरस्तानि ससैन्यानि रणाजिरे।
त्वां प्राप्य वैरपुरुषं कुरूणामनयो महान्। उपस्थितो विनाशाय यतस्व पुरुषो भव।
युध्यस्व समरे पार्थं येन विस्पर्द्धसे सह। द्रक्ष्यामि त्वां विनिर्मुक्तमस्मात् युद्धात् सुदुर्म्मते। ५८४५
तमुवाच ततो राजा धार्त्तराष्ट्रः प्रतापवान। मां समीक्षस्व गाङ्गेय कार्य्यं हि महदुद्यतं।
चिन्त्यतामिदमेकाग्रं मम निःश्रेयसं परं। उभावपि भवन्तौ मे महत्कर्म्म करिष्यतः।
भूयश्च श्रोतुमिच्छामि परेषां रथसत्तमान्। ये चैवातिरथास्तत्र ये चैव रथयूथपाः।
बलाबलममित्राणां श्रोतुमिच्छामि कौरव। प्रभातायां रजन्यां वै इदं युद्धं भविष्यति।
इति श्रीमहाभारते उद्योगपर्व्वणि रथातिरथसङ्ख्यानपर्व्वणि भीष्मकर्णकलहे सप्तषष्ट्यधिकशततमोऽध्यायः॥ १६७॥
॥ भीष्म उवाच ॥ एते रथास्तवाख्याता स्तथैवातिरथा नृप। ये चाप्यर्द्धरथा राजन् पाण्डवानामतः शृणु। ५८५०
यदि कौतूहलं तेऽद्य पाण्डवानां बले नृप। रथसङ्ख्यां शृणुष्व त्वं सहैभिर्व्वसुधाधिपैः।
स्वयं राजा रथोदारः पाण्डवः कुन्तिनन्दनः। अग्निवत् समरे तात चरिष्यति न संशयः।
भीमसेनस्तु राजेन्द्र रथोऽष्टगुणसम्मितः। न तस्यास्ति समो युद्धे गदया सायकैरपि।
नागायुतबलो मानी तेजसा न स मानुषः। माद्रीपुत्रौ च रथिनौ द्वावेव पुरुषर्षभौ।
अश्विनाविव रूपेण तेजसा च समन्वितौ। एते चमूमुखगताः स्मरन्तः क्लेशमुत्तमं। ५८५५
रुद्रवत् प्रचरिष्यन्ति तत्र मे नास्ति संशयः। सर्व्व एव महात्मानः शालस्तम्भा इवोद्गताः।
प्रादेशेनाधिकाः पुंभिरन्यैस्ते च प्रमाणतः। सिंहसंहननाः सर्व्वे पाण्डुपुत्रा महाबलाः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

चरितब्रह्मचर्य्याश्च सर्व्वे तात तपस्विनः । ह्रीमन्तः पुरुषव्याघ्रा व्याघ्रा इव बलोत्कटाः ।
जवे प्रहारे सम्मर्दे सर्व्वे एवातिमानुषाः । सर्व्वैर्ज्जिता महीपाला दिग्जये भरतर्षभ ।
न चैषां पुरुषाः केचिदायुधानि गदाः शरान् । विषहन्ति सदा कर्त्तुमधिज्यान्यपि कौरव । ५८६०
उद्यन्तुं वा गदा गुर्व्वीः शरान् विक्षेप्तुमाहवे । जवे लक्ष्यस्य हरणे भोज्ये पांशुविकर्षणे ।
बालैरपि भवन्तस्तैः सर्व्वे एव विशेषिताः । एतत् सैन्यं समासाद्य सर्व्वे एव बलोत्कटाः ।
विध्वंसयिष्यन्ति रणे मास्म तैः सह सङ्गमः । एकैकशस्ते सम्मर्दे हन्युः सर्व्वान् महीक्षितः ।
प्रत्यक्षं तव राजेन्द्र राजसूये यथाऽभवत् । द्रौपद्याश्च परिक्लेशं द्यूते च परुषा गिरः ।
ते स्मरन्तश्च सङ्ग्रामे चरिष्यन्ति च रुद्रवत् । लोहिताक्षो गुडाकेशो नारायणसहायवान् । ५८६५
उभयोः सेनयोर्व्वीरो रथो नास्तीति तादृशः । न हि देवेषु वा पूर्व्वं मनुष्येषूरगेषु च ।
राक्षसेष्वथ यक्षेषु नरेषु कुत एव तु । भूतोऽथ वा भविष्यो वा रथः कश्चिन्मया श्रुतः ।
समायुक्तो महाराज रथः पार्थस्य धीमतः । वासुदेवश्च संयन्ता योद्धा चैव धनञ्जयः ।
गाण्डीवञ्च धनुर्द्दिव्यं ते चाश्वा वातरंहसः । अभेद्यं कवचं दिव्यमक्षय्यौ च महेषुधी ।
अस्त्रग्रामश्च माहेन्द्रो रौद्रः कौवेर एव च । याम्यश्च वारुणश्चैव गदाश्चोग्रप्रदर्शनाः । ५८७०
वज्रादीनि च मुख्यानि नानाप्रहरणानि च । दानवानां सहस्राणि हिरण्यपुरवासिनां ।
हतान्येकरथेनाजौ कस्तस्य सदृशो रथः । एष हन्याद्धि संरम्भी बलवान् सत्यविक्रमः ।
तव सेनां महाबाहुः स्वाञ्चैव परिपालयन् । अहञ्चैनं प्रत्युदीयामाचार्य्यो वा धनञ्जयं ।
न तृतीयोऽस्ति राजेन्द्र सेनयोरुभयोरपि । य एनं शरवर्षाणि वर्षन्तमुदियाद्रथी ।
जीमूत इव घर्म्मान्ते महावातसमीरितः । समायुक्तस्तु कौन्तेयो वासुदेवसहायवान् । ५८७५
तरुणश्च कृती चैव जीर्णावावामुभावपि ।
॥ वैशम्पायन उवाच ॥ एतत् श्रुत्वा तु भीष्मस्य राज्ञां विध्वंसिरे तदा । काञ्चनाङ्गदिनः पीना भुजाश्चन्दनरूषिताः ।
मनोभिः सह संवेगैः संस्मृत्य च पुरातनं । सामर्थ्यं पाण्डवेयानां यथाप्रत्यक्षदर्शनं ।

इति श्रीमहाभारते उद्योगपर्व्वणि रथातिरथसङ्ख्यानपर्व्वणि पाण्डवरथातिरथसङ्ख्यायां अष्टषष्ट्यधिकशततमोऽध्यायः ।
॥ १६८ ॥

॥ भीष्म उवाच ॥ द्रौपदेया महाराज सर्व्वे पञ्च महारथाः । वैराटिरुत्तरश्चैव रथोदारो मतो मम ।
अभिमन्युर्म्महाबाहू रथयूथपयूथपः । समः पार्थेन समरे वासुदेवेन चारिहा । ५८८०
लब्धास्त्रश्चित्रयोधी च मनस्वी च दृढव्रतः । संस्मरन् वै परिक्लेशं स्वपितुर्व्विक्रमिष्यति ।
सात्यकिर्म्माधवः शूरो रथयूथपयूथपः । एष वृष्णिप्रवीराणाममर्षी जितसाध्वसः ।
उत्तमौजास्तथा राजन् रथोदारो मतो मम । युधामन्युश्च विक्रान्तो रथोदारो मतो मम ।
एतेषां बहुसाहस्रा रथा नागा हयास्तथा । योत्स्यन्ते ते तनूं त्यक्ता कुन्तीपुत्त्रप्रियेप्सया ।
पाण्डवैः सह राजेन्द्र तव सेनासु भारत । अग्निमारुतवद्राजन्नाह्वयन्तः परस्परं । ५८८५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अजेयौ समरे वृद्धौ विराटद्रुपदौ तथा। महारथौ महावीर्य्यौ मतौ मे पुरुषर्षभौ।
वयोवृद्धावपि हि तौ क्षत्त्रधर्म्मपरायणौ। यतिष्येते परं शक्त्या स्थितौ वीरगते पथि।
सम्बन्धकेन राजेन्द्र तौ तु वीर्य्यबलान्वयात्। आर्य्यव्रतौ महेष्वासौ स्नेहवीर्य्यसितावुभौ।
कारणं प्राप्य तु नराः सर्व्व एव महाभुजाः। शूरा वा कातरा वापि भवन्ति कुरुपुङ्गव।
एकायनगतावेतौ पार्थिवौ दृढधन्विनौ। प्राणांस्त्यक्त्वा परं शक्त्या घट्टितारौ परन्तप।
पृथगक्षौहिणीभ्यान्तावुभौ संयति दारुणौ। सम्बन्धिभावं रक्षन्तौ महत्कर्म्म करिष्यतः।
लोकवीरौ महेष्वासौ त्यक्तात्मानौ च भारत। प्रत्ययं परिरक्षन्तौ महत्कर्म्म करिष्यतः।
इति श्रीमहाभारते उद्योगपर्व्वणि रथातिरथसङ्ख्यानपर्व्वणि पाण्डवरथातिरथसङ्ख्यायां एकोनसप्तत्यधिकशततमोऽध्यायः ॥ १६९ ॥

॥ भीष्म उवाच ॥ पञ्चालराजस्य सुतो राजन् परपुरञ्जयः। शिखण्डी रथमुख्यो मे मतः पार्थस्य भारत।
एष योत्स्यति सङ्ग्रामे नाशयन् पूर्व्वसंस्थितिं। परं यशो विप्रथयंस्तव सेनासु भारत।
एतस्य बहुलाः सेनाः पञ्चालाश्च प्रभद्रकाः। तेनासौ रथवंशेन महत्कर्म्म करिष्यति।
धृष्टद्युम्नश्च सेनानीः सर्व्वसेनासु भारत। मतो मेऽतिरथो राजन् द्रोणशिष्यो महारथः।
एष योत्स्यति सङ्ग्रामे सूदयन् वै परान्रणे। भगवानिव संक्रुद्धः पिनाकी युगसङ्क्षये।
एतस्य तद्रथानीकं कथयन्ति रणप्रियाः। बहुलात् सागरप्रख्यं देवानामिव संयुगे।
क्षत्त्रधर्म्मा तु राजेन्द्र मतो मेऽर्द्धरथो नृप। धृष्टद्युम्नस्य तनयो बाल्यान्नातिकृतश्रमः।
शिशुपालसुतो वीरश्चेदिराजो महारथः। धृष्टकेतुर्म्महेष्वासः सम्बन्धी पाण्डवस्य ह।
एष चेदिपतिः शूरः सह पुत्त्रेण भारत। महारथानां सुकरं महत् कर्म्म करिष्यति।
क्षत्त्रधर्म्मरतो मह्यं मतः परपुरञ्जयः। क्षत्त्रदेवस्तु राजेन्द्र पाण्डवेषु रथोत्तमः।
जयन्तश्चामितौजाश्च सत्यजिच्च महारथः। महारथा महात्मनः सर्व्वे पाञ्चालसत्तमाः।
योत्स्यन्ते समरे तात संरब्धा इव कुञ्जराः। अजो भोजश्च विक्रान्तौ पाण्डवार्थे महारथौ।
योत्स्येते बलिनौ शूरौ परं शक्त्या क्षयिष्यतः। शीघ्रास्त्रौ चित्रयोद्धारौ कृतिनौ दृढविक्रमौ।
कैकेयाः पञ्च राजेन्द्र भ्रातरो युद्धदुर्म्मदाः। सर्व्वे चैव रथोदाराः सर्व्वे लोहितकध्वजाः।
काशिकः सुकुमारश्च नीलो यश्चापरो नृप। सूर्य्यदत्तश्च शङ्खश्च मदिराश्वश्च नामतः।
सर्व्व एते रथोदाराः सर्व्वे चाहवलक्षणाः। सर्व्वास्त्रविदुषः सर्व्वे महात्मानो मता मम।
वार्द्धक्षेमिर्महाराज मतो मम महारथः। चित्रायुधश्च नृपतिर्म्मतो मे रथसत्तमः।
स हि सङ्ग्रामशोभी च भक्तश्चापि किरीटिनः। चेकितानः सत्यधृतिः पाण्डवानां महारथौ।
द्वाविमौ पुरुषव्याघ्रौ रथोदारौ मतौ मम। व्याघ्रदत्तश्च राजेन्द्र चन्द्रसेनश्च भारत।
मतौ मम रथोदारौ पाण्डवानां न संशयः। सेनाबिन्दुश्च राजेन्द्र क्रोधहन्ता च नामतः।
यः समो वासुदेवेन भीमसेनेन वा विभो। स योत्स्यति हि विक्रम्य समरे तव सैनिकैः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

आश्च द्रौणं कृपञ्चैव यथा संमन्यते भवान्। तथा स समरश्लाघी मन्तव्यो रथसत्तमः।

काश्यः परमशीघ्रास्त्रः श्लाघनीयो नरोत्तमः। रथ एकगुणो मह्यं ज्ञेयः परपुरञ्जयः। ५९१५

अयञ्च युधि विक्रान्तो मन्तव्योऽष्टगुणो रथः। सत्यजित् समरश्लाघी द्रुपदस्यात्मजो युवा।

गतः सोऽतिरथ त्वं हि धृष्टद्युम्नेन सम्मितः। पाण्डवानां यशस्कामः परं कर्म्म करिष्यति।

अनुरक्तश्च शूरश्च रथोऽयमपरो महान्। पाण्ड्यराजो महावीर्य्यः पाण्डवानां धनुर्द्धरः।

दृढधन्वा महेष्वासः पाण्डवानां महारथः। श्रेणिमान् कौरवश्रेष्ठो वसुदानश्च पार्थिवः।

उभावेतावतिरथौ मतौ परपुरञ्जय। ५९२०

इति श्रीमहाभारते उद्योगपर्व्वणि रथातिरथसङ्ख्यानपर्व्वणि पाण्डवरथातिरथसङ्ख्यायां सप्तत्यधिकशततमोऽध्यायः ॥१७०॥

॥ भीष्म उवाच ॥ रोचमानो महाराज पाण्डवानां महारथः। योत्स्यते ऽमरवत्सङ्ख्ये परसैन्येषु भारत।

रिपुजित् कुन्तिभोजश्च महेष्वासो महाबलः। मातुलो भीमसेनस्य स च मेऽतिरथो मतः।

एष वीरो महेष्वासः कृती च निपुणश्च ह। चित्रयोधी च शक्तश्च मतो मे रथपुङ्गवः।

स योत्स्यति हि विक्रम्य मघवानिव दानवैः। योधा ये चास्य विख्याताः सर्व्वे युद्धविशारदाः।

भागिनेयकृते वीरः स करिष्यति सङ्गरे। सुमहत् कर्म्म पाण्डूनां स्थितः प्रियहिते रतः। ५९२५

भैमसेनिर्म्महाराज हैडिम्बो राक्षसेश्वरः। मतो मे बहुमायावी रथयूथपयूथपः।

योत्स्यते समरे तात मायावी समरप्रियः। ये चास्य राक्षसा वीराः सचिवा वशवर्त्तिनः।

एते चान्ये च बहवो नानाजनपदेश्वराः। समेताः पाण्डवस्यार्थे वासुदेवपुरोगमाः।

एते प्राधान्यतो राजन् पाण्डवस्य महात्मनः। रथाश्चातिरथाश्चैव ये चान्येऽर्द्धरथा नृप।

नेष्यन्ति समरे सेनां भीमां यौधिष्ठिरीं नृप। महेन्द्रेणेव वीरेण पाल्यमानां किरीटिना। ५९३०

तैरहं समरे वीर मायाविद्भिर्जयैषिभिः। योत्स्यामि जयमाकाङ्क्षन्नथ वा निधनं रणे।

वासुदेवञ्च पार्थञ्च चक्रगाण्डीवधारिणौ। सन्ध्यागताविवार्केन्दू समेष्येते रथोत्तमौ।

ये चैव ते रथोदाराः पाण्डुपुत्रस्य सैनिकाः। सहसैन्यानहन्तांश्च प्रतीयां रणमूर्द्धनि।

एते रथाश्चातिरथाश्च तुभ्यं यथाप्रधानं नृप कीर्त्तिता मया। तथा परे येऽर्द्धरथाश्च केचित्तथैव तेषामपि कौरवेन्द्र।

अर्ज्जुनं वासुदेवञ्च ये चान्ये तत्र पार्थिवाः। सर्व्वांस्तान् वारयिष्यामि यावद्द्रक्ष्यामि भारत। ५९३५

पाञ्चाल्यन्तु महाबाहो नाहं हन्यां शिखण्डिनं। उद्यतेषुमथो दृष्ट्वा प्रतियुध्यन्तमाहवे।

लोकस्तं वेद यदहं पितुः प्रियचिकीर्षया। प्राप्तं राज्यं परित्यज्य ब्रह्मचर्य्यव्रते स्थितः।

चित्राङ्गदं कौरवाणामाधिपत्येऽभ्यषेचयं। विचित्रवीर्य्यञ्च शिशुं यौवराज्येऽभ्यषेचयं।

देवव्रतत्वं विज्ञाप्य पृथिव्यां सर्व्वराजसु। नैव हन्यां स्त्रियं जातु न स्त्रीपूर्व्वं कदाचन।

स हि स्त्रीपूर्व्वको राजन् शिखण्डी यदि ते श्रुतः। कन्या भूत्वा पुमान् जातो न योत्स्ये तेन भारत। ५९४०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सर्व्वांस्त्वन्यान् हनिष्यामि पार्थिवान् भरतर्षभ। थान् समेष्यामि समरे नतु कुन्तीसुतान्नृप।

इति श्रीमहाभारते उद्योगपर्व्वणि रथातिरथसङ्ख्यानपर्व्वणि पाण्डव रथातिरथसङ्ख्यायां एकसप्तत्यधिकशततमोऽध्यायः ॥ १७१ ॥ समाप्तञ्च रथातिरथसङ्ख्यानपर्व्व ॥

॥ अथाम्बोपाख्यानपर्व्व ॥ १२ ॥

॥ दुर्य्योधन उवाच ॥ किमर्थं भरतश्रेष्ठ नैव हन्याः शिखण्डिनं। उद्यतेषुमथो दृष्ट्वा समरेष्वाततायिनं।

पूर्व्वमुक्त्वा महाबाहो पाञ्चालान् सहसोमकैः। हनिष्यामीति गाङ्गेय तन्मे ब्रूहि पितामह।

॥ भीष्म उवाच ॥ शृणु दुर्य्योधन कथां सहैभिर्व्वसुधाधिपैः। यदर्थं युधि सम्प्रेक्ष्य नाहं हन्यां शिखण्डिनं।

महाराजो मम पिता शान्तनुर्लोकविश्रुतः। दिष्टान्तमाप धर्म्मात्मा समये भरतर्षभ। ५९७५

ततोऽहं भरतश्रेष्ठ प्रतिज्ञां परिपालयन्। चित्राङ्गदं भ्रातरं वै महाराज्येऽभ्यषेचयं।

तस्मिंश्च निधनं प्राप्ते सत्यवत्या मते स्थितः। विचित्रवीर्य्यं राजानमभ्यषिञ्चं यथाविधि।

मयाऽभिषिक्तो राजेन्द्र यवीयानपि धर्म्मतः। विचित्रवीर्य्यो धर्म्मात्मा मामेव समुदैक्षत।

तस्य दारक्रियान्तात चिकीर्षुरहमप्युत। अनुरूपादिव कुलादित्येव च मनो दधे।

तथाऽश्रौषं महाबाहो तिस्रः कन्याः स्वयम्वराः। रूपेणाप्रतिमाः सर्व्वाः काशिराजसुतास्तदा। ५९८०

अम्बाञ्चैवाम्बिकाञ्चैव तथैवाम्बालिकामपि। राजानश्च समाहूताः पृथिव्यां भरतर्षभ।

अम्बा ज्येष्ठा ऽभवत्तासामम्बिका त्वथ मध्यमा। अम्बालिका च राजेन्द्र राजकन्या यवीयसी।

सोऽहमेकरथेनैव गतः काशिपतेः पुरीं। अपश्यन्तो महाबाहो तिस्रः कन्याः स्वलङ्कृताः।

राज्ञश्चैव समाहूतान् पार्थिवान् पृथिवीपते। ततोऽहन्तान्नृपान् सर्व्वानाहूय समरे स्थितान्।

रथमारोपयाञ्चक्रे कन्यास्ता भरतर्षभ। वीर्य्यशुल्काश्च ता ज्ञात्वा समारोप्य रथं तदा। ५९८५

अवोचं पार्थिवान् सर्व्वानहं तत्र समागतान्। भीष्मः शान्तनवः कन्या हरतीति पुनः पुनः।

ते यतध्वं परं शक्त्या सर्व्वे मोक्षाय पार्थिवाः। प्रसह्य हि हराम्येष मिषतां वो नरर्षभाः।

ततस्ते पृथिवीपालाः समुत्पेतुरुदायुधाः। योगो योग इति क्रुद्धाः सारथीनभ्यचोदयन्।

ते रथैर्गजसङ्काशैर्गजैश्च गजयोधिनः। पृष्ठैश्चाश्वैर्महीपालाः समुत्पेतुरुदायुधाः।

ततस्ते मां महीपालाः सर्व्व एव विशाम्पते। रथव्रातेन महता सर्व्वतः पर्य्यवारयन्। ५९९०

तानहं शरवर्षेण समन्तात् पर्य्यवारयं। सर्व्वान्नृपांश्चाप्यजयं देवराडिव दानवान्।

अपातयं शरैर्द्दीप्तैः प्रहसन् भरतर्षभ। तेषामापततां चित्रान् ध्वजान् हेमपरिष्कृतान्।

एकैकेन हि बाणेन भूमौ पातितवानहं। हयांस्तेषां गजांश्चैव सारथींश्चाप्यहं रणे।

ते निवृत्ताश्च भग्नाश्च दृष्ट्वा तल्लाघवं मम। अथाहं हास्तिनपुरमायां जित्वा महीक्षितः।

ततोऽहं ताश्च कन्या वै भ्रातुरर्थाय भारत। तच्च कर्म्म महाबाहो सत्यवत्यै न्यवेदयं। ५९९५

इति श्रीमहाभारते उद्योगपर्व्वण्यम्बोपाख्यानपर्व्वणि भीष्मकन्याहरणे द्विसप्तत्यधिकशततमोऽध्यायः ॥ १७२ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ भीष्म उवाच ॥ ततोऽहं भरतश्रेष्ठ मातरं वीरमातरं। अभिगम्योपसंगृह्य दाशेयीमिदमब्रुवं।
इमाः काशिपतेः कन्या मया निर्ज्जित्य पार्थिवान्। विचित्रवीर्य्यस्य कृते वीर्य्यशुल्का हृता इति।
ततो मूर्द्धन्युपाघ्राय पर्य्यश्रुनयना नृप। आह सत्यवती हृष्टा दिष्ट्या पुत्त्र जितं त्वया।
सत्यवत्यास्त्वनुमते विवाहे समुपस्थिते। उवाच वाक्यं सव्रीडा ज्येष्ठा काशिपतेः सुता।
भीष्म त्वमसि धर्म्मज्ञः सर्व्वशास्त्रविशारदः। श्रुत्वा च वचनं धर्म्म्यं मह्यं कर्त्तुमिहार्हसि। ५९७०
मया शाल्वपतिः पूर्व्वं मनसाऽभिवृतो वरः। तेन चास्मि वृता पूर्व्वं रहस्यविदिते पितुः।
कथं मामन्यकामां त्वं राजन् धर्म्ममतीत्य वै। वासयेथा गृहे भीष्म कौरवः सन् विशेषतः।
एतद्बुद्ध्या विनिश्चित्य मनसा भरतर्षभ। यत् क्षमन्ते महाबाहो तदिहारब्धुमर्हसि।
स मां प्रतीक्षते व्यक्तं शाल्वराजो विशाम्पते। तस्मान्मां त्वं कुरुश्रेष्ठ समनुज्ञातुमर्हसि।
कृपां कुरु महाबाहो मयि धर्म्मभृतां वर। त्वं हि सत्यव्रतो वीर पृथिव्यामिति नः श्रुतं। ५९७५
॥ इति श्रीमहाभारते उद्योगपर्व्वण्यम्बोपाख्यानपर्व्वण्यम्बावाक्ये त्रिसप्तत्यधिकशततमोऽध्यायः॥ १७३ ॥
॥ भीष्म उवाच ॥ ततोऽहं समनुज्ञाप्य कालीं गन्धवतीं तदा। मन्त्रिणश्चर्त्विजश्चैव तथैव च पुरोहितान्।
समनुज्ञासिषं कन्यामम्बां ज्येष्ठां नराधिप। अनुज्ञाता ययौ सा तु कन्या शाल्वपतेः पुरं।
वृद्धैर्द्विजातिभिर्गुप्ता धात्र्या चानुगता तदा। अतीत्य च तमध्वानमासाद्य नृपतिं तथा।
सा तमासाद्य राजानं शाल्वं वचनमब्रवीत्। आगताऽहं महाबाहो त्वामुद्दिश्य महामते।
तामब्रवीच्छाल्वपतिः स्मयन्निव विशाम्पते। त्वयाऽन्यपूर्व्वया नाहं भार्य्यार्थी वरवर्णिनि। ५९८०
गच्छ भद्रे पुनस्तत्र सकाशं भीष्मकस्य वै। नाहमिच्छामि भीष्मेण गृहीतां त्वां प्रसह्य वै।
त्वं हि भीष्मेण निर्ज्जित्य नीता प्रीतिमती तदा। परामृश्य महाबुद्धे निर्ज्जित्य पृथिवीपतीन्।
नाहं त्वय्यन्यपूर्व्वायां भार्य्यार्थी वरवर्णिनि। कथमस्मद्विधो राजा परपूर्व्वां प्रवेशयेत्।
नारीं विदितविज्ञानः परेषां धर्म्ममादिशन्। यथेष्टं गम्यतां भद्रे मा त्वां कालोऽत्यगादयं।
अम्बा तमब्रवीद्राजन्ननङ्गशरपीडिता। मैवं वद महीपाल नैतदेवं कथञ्चन। ५९८५
नास्मि प्रीतिमती नीता भीष्मेणामित्रकर्षण। बलान्नीताऽस्मि रुदती विद्राव्य पृथिवीपतीन्।
भजस्व मां शाल्वपते भक्तां बालामनागसं। भक्तानां हि परित्यागो न धर्म्मेषु प्रशस्यते।
साऽहमामन्त्र्य गाङ्गेयं समरेष्वनिवर्त्तिनं। अनुज्ञाता च तेनैव ततोऽहं भृशमागता।
न स भीष्मो महाबाहुर्मामिच्छति विशाम्पते। भ्रातृहेतोः समारम्भो भीष्मस्येति श्रुतो मया।
भगिन्यौ मम ये नीते अम्बिकाऽम्बालिके नृप। प्रादाद्विचित्रवीर्य्याय गाङ्गेयो हि यवीयसे। ५९९०
यथा शाल्वपते नान्यं वरं ध्यायामि कञ्चन। त्वामृते पुरुषव्याघ्र तथा मूर्द्धानमालभे।
न चान्यपूर्व्वा राजेन्द्र त्वामहं समुपस्थिता। सत्यं ब्रवीमि शाल्वैतत् सत्येनात्मानमालभे।
भजस्व मां विशालाक्ष स्वयं कन्यामुपस्थितां। अनन्यपूर्व्वां राजेन्द्र त्वत्प्रसादाभिकाङ्क्षिणीं।
तामेवं भाषमाणान्तु शाल्वः काशिपतेः सुतां। अत्यजत् भरतश्रेष्ठ जीर्णां त्वचमिवोरगः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding: IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

एवं बहुविधैर्वाक्यैर्याच्यमानस्तथा नृपः । नाश्रद्दधच्छाल्वपतिः कन्याया भरतर्षभ । ५९९५
ततः सा मन्युनाविष्टा ज्येष्ठा काशिपतेः सुता । अब्रवीत् साश्रुनयना वाष्पविप्लुतया गिरा ।
त्वया त्यक्ता गमिष्यामि यत्र तत्र विशाम्पते । तत्र मे गतयः सन्तु सन्तः सत्यं यथा ध्रुवं ।
एवं तां भाषमाणान्तु कन्यां शाल्वपतिस्तदा । परितत्याज कौरव्य करुणं परिदेवतीं ।
गच्छ गच्छेति तां शाल्वः पुनःपुनरभाषत । बिभेमि भीष्मात् सुश्रोणि त्वञ्च भीष्मपरिग्रहः ।
एवमुक्ता तु सा तेन शाल्वेनादीर्घदर्शिना । निश्चक्राम पुराद्दीना रुदती कुररी यथा । ६०००
॥ भीष्म उवाच ॥ निष्क्रामन्ती तु नगराच्चिन्तयामास दुःखिता । पृथिव्यां नास्ति युवतिर्विषमस्था मया समा ।
बन्धुभिर्विप्रहीनाऽस्मि शाल्वेन च निराकृता । न च शक्यं पुनर्गन्तुं मया वारणसाह्वयं ।
अनुज्ञाता तु भीष्मेण शाल्वमुद्दिश्य कारणं । किन्तु गर्हाम्यथात्मानमथ भीष्मं दुरासदं ।
अथ वा पितरं मूढं यो मेऽकार्षीत् स्वयम्बरं । मया ऽयं स्वकृतो दोषो याऽहं भीष्मरथात्तदा ।
प्रवृत्ते दारुणे युद्धे शाल्वार्थं न गता पुरा । तस्येयं फलनिर्वृत्तिर्यदापन्नाऽस्मि मूढवत् । ६००५
धिग्भीष्मं धिक् मे मन्दं पितरं मूढचेतसं । येनाऽहं वीर्य्यशुल्केति पण्यस्त्रीव प्रचारिता ।
धिङ्मां धिक्शाल्वराजानं धिग्धातारमथापि वा । येषां दुर्नीतभावेन प्राप्ताऽस्म्यापदमुत्तमां ।
सर्व्वथा भागधेयानि स्वानि प्राप्नोति मानवः । अनयस्यास्य तु मुखं भीष्मः शान्तनवो मम ।
सा भीष्मे प्रतिकर्त्तव्यमहं पश्यामि साम्प्रतं । तपसा वा युधा वाऽपि दुःखहेतुः स मे मतः ।
को नु भीष्मं युधा जेतुमुत्सहेत महीपतिः । एवं सा परिनिश्चित्य जगाम नगराद्बहिः । ६०१०
आश्रमं पुण्यशीलानां तापसानां महात्मनां । ततस्तामवसद्रात्रिं तापसैः परिवारिता ।
आचख्यौ च यथावृत्तं सर्व्वमात्मनि भारत । विस्तरेण महाबाहो निखिलेन शुचिस्मिता ।
हरणञ्च विसर्गञ्च शाल्वेन च विसर्ज्जनं । ततस्तत्र महानासीत् ब्राह्मणः संशितव्रतः ।
शैखावत्यस्तपोवृद्धः शास्त्रे चारण्यके गुरुः । आर्त्तान्तामाह स मुनिः शैखावत्यो महातपाः ।
निःश्वसन्तीं सतीं बालां दुःखशोकपरायणां । एवं गते तु किं भद्रे शक्यं कर्त्तुं तपस्विभिः । ६०१५
आश्रमस्थैर्महाभागे तपोयुक्तैर्महात्मभिः । सा त्वेनमब्रवीद्राजन् क्रियतां मदनुग्रहः ।
प्राव्रज्यमहमिच्छामि तपस्तप्स्यामि दुश्चरं । मयैव यानि कर्म्माणि पूर्व्वदेहे तु मूढया ।
कृतानि नूनं पापानि तेषामेतत् फलं ध्रुवं । नोत्सहे तं पुनर्गन्तुं स्वजनं प्रति तापसाः ।
प्रत्याख्याता निरानन्दा शाल्वेन च निराकृता । उपदिष्टमिहेच्छामि तापस्यं वीतकल्मषाः ।
युष्माभिर्देवसङ्काशैः कृपा भवतु वो मयि । स तामाश्वासयत् कन्यां दृष्टान्तागमहेतुभिः । ६०२०
सान्त्वयामास कार्य्यञ्च प्रतिजज्ञे द्विजैः सह ॥

इति श्रीमहाभारते उद्योगपर्व्वण्यम्बोपाख्यानपर्व्वणि शैखावत्याम्बासंवादे चतुःसप्तत्यधिकशततमोऽध्यायः ॥ १७४ ॥

॥ भीष्म उवाच ॥ ततस्ते तापसाः सर्व्वे कार्य्यवन्तोऽभवंस्तदा । तां कन्यां चिन्तयन्तस्ते किङ्कार्य्यमिति धर्म्मिणः ।
केचिदाहुः पितुर्व्वेश्म नीयतामिति तापसाः । केचिदस्मदुपालम्भे मतिञ्चक्रुर्हि तापसाः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

केचिच्छाल्वपतिं गत्वा नियोज्यमिति मेनिरे । नेति केचित् व्यवस्यन्ति प्रत्याख्याता हि तेन सा ।
एवं गते तु किं शक्यं भद्रे कर्त्तुं मनीषिभिः । पुनरूचुश्च तां सर्व्वे तापसाः संशितव्रताः । ६०२५
अलं प्रव्रजितेनेह भद्रे शृणु हितं वचः । इतो गच्छस्व भद्रं ते पितुरेव निवेशनं ।
प्रतिपत्स्यति राजा स पिता ते यदनन्तरं । तत्र वत्स्यसि कल्याणी सुखं सर्व्वगुणान्विता ।
न च तेऽन्या गतिर्नार्य्या भवेत् भद्रे यथा पिता । पतिर्वाऽपि गतिर्नार्य्याः पिता वा वरवर्णिनि ।
गतिः पतिः समास्थाया विषमे वा पिता गतिः । प्रव्रज्या हि सुदुःखेयं सुकुमार्य्या विशेषतः ।
राजपुत्र्याः प्रकृत्या च कुमार्य्यास्तव भाविनि । भद्रे दोषा हि विद्यन्ते बहवो वरवर्णिनि । ६०३०
आश्रमे हि वसन्त्यास्ते न भवेयुः पितुर्गृहे । ततस्त्वन्ये ब्रुवन् वाक्यं तापसास्तां तपस्विनीं ।
त्वामिहैकाकिनीं दृष्ट्वा निर्ज्जने गहने वने । प्रार्थयिष्यन्ति राजानस्तस्मान्नैवं मनः कृथाः ।
॥ अम्बोवाच ॥ न शक्यं काशिनगरं पुनर्गन्तुं पितुर्गृहान् । अवज्ञाता भविष्यामि बान्धवानां न संशयः ।
उषिताऽस्मि तथा बाल्ये पितुर्वेश्मनि तापसाः । नाहं गमिष्ये भद्रं वस्तत्र यत्र पिता मम ।
तपस्तप्तुमभीप्सामि तापसैः परिरक्षिता । यथा परेऽपि मे लोके न स्यादेवं महात्ययः । ६०३५
दौर्भाग्यं तापसश्रेष्ठास्तस्मात्तप्स्याम्यहं तपः ।
॥ भीष्म उवाच ॥ इत्येवन्तेषु विप्रेषु चिन्तयत्सु यथातथं । राजर्षिस्तद्वनं प्राप्तस्तपस्वी होत्रवाहनः ।
ततस्ते तापसाः सर्वे पूजयन्ति स्म तं नृपं । पूजाभिः स्वागताद्याभिरासनेनोदकेन च ।
तस्योपविष्टस्य सतो विश्रान्तस्योपशृण्वतः । पुनरेव कथाञ्चक्रुः कन्यां प्रति वनौकसः ।
अम्बायास्तां कथां श्रुत्वा काशिराज्ञश्च भारत । राजर्षिः स महातेजा बभूवोद्विग्नमानसः । ६०४०
तां तथावादिनीं श्रुत्वा दृष्ट्वा च स महातपाः । राजर्षिः कृपयाविष्टो महात्मा होत्रवाहनः ।
स वेपमान उत्थाय मातुस्तस्याः पिता तदा । तां कन्यामङ्कमारोप्य पर्य्याश्वासयत प्रभो ।
स तामपृच्छत् कार्त्स्न्येन व्यसनोत्पत्तिमादितः । सा च तस्मै यथावृत्तं विस्तरेण न्यवेदयत् ।
ततः स राजर्षिरभूत् दुःखशोकसमन्वितः । कार्य्यञ्च प्रतिपेदे तन्मनसा सुमहातपाः ।
अब्रवीत् वेपमानश्च कन्यामार्त्तां सुदुःखितां । मागाः पितृगृहं भद्रे मातुस्ते जनको ह्यहं । ६०४५
दुःखं छिन्द्यामहं ते वै मयि वर्त्तस्व पुत्त्रिके । पर्य्याप्तं ते मनो वत्से यदेवं परिशुष्यसि ।
गच्छ मद्वचनाद्रामं जामदग्न्यं तपस्विनं । रामस्ते सुमहद्दुःखं शोकञ्चैवापनेष्यति ।
हनिष्यति रणे भीष्मं न करिष्यति चेद्वचः । तं गच्छ भार्गवश्रेष्ठं कालाग्निसमतेजसं ।
प्रतिष्ठापयिता स त्वां समे पथि महातपाः । ततस्तु सुस्वरं वाष्पमुत्सृजन्ती पुनःपुनः ।
अब्रवीत् पितरं मातुः सा तदा होत्रवाहनं । अभिवादयित्वा शिरसा गमिष्ये तत्र शासनात् । ६०५०
अपि नामाद्य पश्येयमार्य्यन्तं लोकविश्रुतं । कथञ्च तीव्रं दुःखं मे नाशयिष्यति भार्गवः ।
एतदिच्छाम्यहं ज्ञातुं यथा यास्यामि तत्र वै ।

इति श्रीमहाभारते उद्योगपर्व्वण्यम्बोपाख्यानपर्व्वणि होत्रवाहनाम्बासंवादे पञ्चसप्तत्यधिकशततमोऽध्यायः ॥ १७५ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ होत्रवाहन उवाच ॥ रामं द्रक्ष्यसि भद्रे त्वं जामदग्न्यं महावने । उग्रे तपसि वर्त्तन्तं सत्यसन्धं महाबलं ।
महेन्द्रं वै गिरिश्रेष्ठं रामो नित्यमुपास्ति ह । ऋषयो वेदविद्वांसो गन्धर्व्वाप्सरसस्तथा ।
तत्र गच्छस्व भद्रन्ते ब्रूयाश्चैनं वचो मम । अभिवाद्य च तं मूर्द्ध्ना तपोवृद्धं दृढव्रतं । ७०५५
ब्रूयाश्चैनं पुनर्भद्रे यत्ते कार्य्यं मनीषितं । मयि सङ्कीर्त्तिते रामः सर्व्वं तत्ते करिष्यति ।
मम रामः सखा वत्से प्रीतियुक्तः सुहृच्च मे । जमदग्निसुतो वीरः सर्व्वशस्त्रभृतां वरः ।
एवं ब्रुवति कन्यान्तु पार्थिवे होत्रवाहने । अकृतव्रणः प्रादुरासीद्रामस्यानुचरः प्रियः ।
ततस्ते मुनयः सर्व्वे समुत्तस्थुः सहस्रशः । स च राजा वयोवृद्धः सृञ्जयो होत्रवाहनः ।
ततो दृष्ट्वा कृतातिथ्यमन्योन्यं ते वनौकसः । सहिता भरतश्रेष्ठ निषेदुः परिवार्य्य तं । ७०६०
ततस्ते कथयामासुः कथास्तास्ता मनोरमाः । धन्या दिव्याश्च राजेन्द्र प्रीतिहर्षमुदा युताः ।
ततः कथाऽन्ते राजर्षिर्म्महात्मा होत्रवाहनः । रामं श्रेष्ठं महर्षीणामपृच्छदकृतव्रणं ।
क सम्प्रति महाबाहो जामदग्न्यः प्रतापवान् । अकृतव्रण शक्यो वै द्रष्टुं वेदविदां वर ।
॥ अकृतव्रण उवाच ॥ भवन्तमेव सततं रामः कीर्त्तयति प्रभो । सृञ्जयो मे प्रियसखो राजर्षिरिति पार्थिव ।
इह रामः प्रभाते श्वो भवितेति मतिर्म्मम । द्रष्टास्येनमिहायान्तं तव दर्शनकाङ्क्षया । ७०६५
इयञ्च कन्या राजर्षे किमर्थं वनमागता । कस्य चेयं तव च का भवतीच्छामि वेदितुं ।
॥ होत्रवाहन उवाच ॥ दौहित्रीयं मम विभो काशिराजसुता प्रिया । ज्येष्ठा स्वयम्वरे तस्थौ भगिनीभ्यां सहानघ ।
इयमम्बेति विख्याता ज्येष्ठा काशिपतेः सुता । अम्बिकाऽम्बालिके कन्ये कनीयस्यौ तपोधन ।
समेतं पार्थिवं चत्त्रं काशिपुर्य्यां ततोऽभवत् । कन्यानिमित्तं विप्रर्षे तत्राऽसीदुत्सवो महान् ।
ततः किल महावीर्य्यो भीष्मः शान्तनवो नृपान् । अधिक्षिप्य महातेजास्तिस्रः कन्या जहार ताः । ७०७०
निर्ज्जित्य पृथिवीपालानथ भीष्मो गजाह्वयं । आजगाम विशुद्धात्मा कन्याभिः सह भारत ।
सत्यवत्यै निवेद्याथ विवाहं समनन्तरं । भ्रातुर्व्विचित्रवीर्य्यस्य समाज्ञापयत प्रभुः ।
तन्तु वैवाहिकं दृष्ट्वा कन्येयं समुपार्ज्जितं । अब्रवीत् तत्र गाङ्गेयं मन्त्रिमध्ये द्विजर्षभ ।
मया शाल्वपतिर्व्वीर मनसाऽभिवृतः पतिः । न मामर्हसि धर्म्मज्ञ दातुं भ्रात्रेऽन्यमानसां ।
तच्छ्रुत्वा वचनं भीष्मः समन्त्र्य सह मन्त्रिभिः । निश्चित्य विससर्ज्जैनां सत्यवत्या मते स्थितः । ७०७५
अनुज्ञाता तु भीष्मेण शाल्वं सौभपतिं ततः । कन्येयं मुदिता तत्र काले वचनमब्रवीत् ।
विसर्ज्जिताऽस्मि भीष्मेण धर्म्मं मां प्रतिपादय । मनसाऽभिवृतः पूर्व्वं मया त्वं पार्थिवर्षभ ।
प्रत्याचख्यौ च शाल्वोऽप्यस्याश्चारित्रस्याभिशङ्कितः । सेयं तपोवनं प्राप्ता तापस्येऽभिरता भृशं ।
मया च प्रत्यभिज्ञाता वंशस्य परिकीर्त्तनात् । अस्य दुःखस्य चोत्पत्तौ भीष्ममेवेह मन्यते ।
॥ अम्बोवाच ॥ भगवन्नेवमेवेह यथाह पृथिवीपतिः । शरीरकर्त्ता मातुर्म्मे सृञ्जयो होत्रवाहनः । ७०८०
न ह्युत्सहे स्वनगरं प्रतियातुं तपोधन । अपमानभयाच्चैव व्रीडया च महामुने ।
यत्तु मां भगवान्राम वक्ष्यति द्विजसत्तम । तन्मे कार्य्यतमं कार्य्यमिति मे भगवन्मतिः ।
इति श्रीमहाभारते उद्योगपर्व्वणि अम्बोपाख्यानपर्व्वण्यकृतव्रणाम्बासंवादे षट्सप्तत्यधिकशततमोऽध्यायः ॥१७६॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ अकृतव्रण उवाच ॥ दुःखद्वयमिदं भद्रे कतरस्य चिकीर्षसि। प्रतिकर्त्तव्यमबले तत्त्वं वत्से वदस्व मे।
यदि सौभपतिर्भद्रे नियोक्तव्यो मतस्तव। नियोक्ष्यति महात्मा स रामस्त्वद्धितकाम्यया।
अथापगेयं भीष्मं तं रामेणेच्छसि धीमता। रणे विनिर्ज्जितं द्रष्टुं कुर्य्यात्तदपि भार्गवः।
सृञ्जयस्य वचः श्रुत्वा तव चैव शुचिस्मिते। यदत्र ते क्षमं कार्य्यं तदद्यैव विचिन्त्यतां।
॥ अम्बोवाच ॥ अपनीताऽस्मि भीष्मेण भगवन्नविजानता। नाभिजानाति मे भीष्मो ब्रह्मन् शाल्वगतं मनः।
एतद्विचार्य्य मनसा भवानेतद्विनिश्चयं। विचिनोतु यथान्यायं विधानं क्रियतां तथा।
भीष्मे वा कुरुशार्द्दूले शाल्वराजेऽथ वा पुनः। उभयोरेव वा ब्रह्मन् युक्तं यत् तत् समाचर।
निवेदितं मया ह्येतद्दुःखमूलं यथातथं। विधानं तत्र भगवन् कर्त्तुमर्हसि युक्तितः।
॥ अकृतव्रण उवाच ॥ उपपन्नमिदं भद्रे यदेवं वरवर्णिनि। धर्म्मं प्रति वचो ब्रूयाः शृणु चेदं वचो मम।
यदि त्वामापगेयो वै न नयेद्गजसाह्वयं। शाल्वस्त्वां शिरसा भीरु गृह्णीयाद्रामचोदितः।
तेन त्वं निर्ज्जिता भद्रे यस्मान्नीताऽसि भाविनि। संशयः शाल्वराजस्य तेन त्वयि सुमध्यमे।
भीष्मः पुरुषमानी च जितकाशी तथैव च। तस्मात् प्रतिक्रिया युक्ता भीष्मे कारयितुं तव।
॥ अम्बोवाच ॥ ममाप्येष सदा ब्रह्मन् हृदि कामोऽभिवर्त्तते। घातयेयं यदि रणे भीष्ममित्येव नित्यदा।
भीष्मं वा शाल्वराजं वा यं वा दोषेण गच्छसि। प्रशाधि तं महाबाहो यत्कृतेऽहं सुदुःखिता।
॥ भीष्म उवाच ॥ एवं कथयतामेव तेषां स दिवसो गतः। रात्रिश्च भरतश्रेष्ठ सुखशीतोष्णमारुता।
ततो रामः प्रादुरासीत् प्रज्वलन्निव तेजसा। शिष्यैः परिवृतो राजन् जटाचीरधरो मुनिः।
धनुष्पाणिरदीनात्मा खड्गं बिभ्रत् परश्वधी। विरजा राजशार्द्दूल सोऽभ्ययात् सृञ्जयं नृपं।
ततस्ते तापसा दृष्ट्वा स च राजा महातपाः। तस्थुः प्राञ्जलयो राजन् सा च कन्या तपस्विनी।
पूजयामासुरव्यग्रा मधुपर्क्केण भार्गवं। अर्च्चितश्च यथान्यायं निषसाद सहैव तैः।
ततः पूर्व्वव्यतीतानि कथयन्तौ स्म तावुभौ। आसातां जामदग्न्यश्च सृञ्जयश्चैव भारत।
तथा कथाऽन्ते राजर्षिर्भृगुश्रेष्ठं महाबलं। उवाच मधुरं काले रामं वचनमर्थवत्।
रामेयं मम दौहित्री काशिराजसुता प्रभो। अस्याः शृणु यथातत्त्वं कार्य्यं कार्य्यविशारद।
परमं कथ्यताञ्चेति तां रामः प्रत्यभाषत। ततः साऽभ्यागमद्रामं ज्वलन्तमिव पावकं।
ततोऽभिवाद्य चरणौ रामस्य शिरसा उभौ। स्पृष्ट्वा पद्मदलाभाभ्यां पाणिभ्यामग्रतः स्थिता।
रुरोद सा शोकवती बाष्पव्याकुललोचना। प्रपेदे शरणञ्चैव शरण्यं भृगुनन्दनं।
॥ राम उवाच ॥ यथा त्वं सृञ्जयस्यास्य तथा मे त्वं नृपात्मजे। ब्रूहि यत्ते मनोदुःखं करिष्ये वचनं तव।
॥ अम्बोवाच ॥ भगवञ्छरणं त्वद्य प्रपन्नाऽस्मि महाव्रतं। शोकपङ्कार्णवान्मग्नां घोरादुद्धर मां विभो।
॥ भीष्म उवाच ॥ तस्याश्च दृष्ट्वा रूपञ्च वपुश्चाभिनवं पुनः। सौकुमार्य्यं परञ्चैव रामश्चिन्तापरोऽभवत्।
किमियं वक्ष्यतीत्येवं विममर्ष भृगूद्वहः। इति दध्यौ चिरं रामः कृपयाऽभिपरिप्लुतः।
कथ्यतामिति सा भूयो रामेणोक्ता शुचिस्मिता। सर्व्वमेव यथातत्त्वं कथयामास भार्गवे।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तच्छ्रुत्वा जामदग्न्यस्तु राजपुत्र्या वचस्तदा । उवाच तां वरारोहां निश्चित्यार्थविनिश्चयं ।
॥ राम उवाच ॥ प्रेषयिष्यामि भीष्माय कुरुश्रेष्ठाय भाविनि । करिष्यति वचो मह्यं श्रुत्वा च स नराधिपः ।
न चेत् करिष्यति वचो मयोक्तं जाह्नवीसुतः । धक्ष्याम्यहं रणे भद्रे सामात्यं शस्त्रतेजसा । ७०१५
अथ वा ते मतिस्तत्र राजपुत्रि निवर्त्तते । यावच्छाल्वपतिं वीरं योजयाम्यत्र कर्म्मणि ।
॥ अम्बोवाच ॥ विसर्ज्जिताऽहं भीष्मेण श्रुत्वैव भृगुनन्दन । शाल्वराजगतं भावं मम पूर्व्वं मनीषितं ।
सौभराजमुपेत्याहमवोचं दुर्व्वचं वचः । न च मां प्रत्यगृह्णात् स चारित्रपरिशङ्कितः ।
एतत् सर्व्वं विनिश्चित्य स्वबुद्ध्या भृगुनन्दन । यदत्रौपयिकं कार्य्यं तच्चिन्तयितुमर्हसि ।
मम तु व्यसनस्यास्य भीष्मो मूलं महाव्रतः । येनाहं वशमानीता समुत्क्षिप्य बलात् तदा । ७०२०
भीष्मं जहि महाबाहो यत्कृते दुःखमीदृशं । प्राप्ताऽहं भृगुशार्द्दूल चराम्यप्रियमुत्तमं ।
स हि लुब्धश्च नीचश्च जितकाशी च भार्गव । तस्मात् प्रतिक्रियां कर्त्तुं युक्ता तस्मै त्वयाऽनघ ।
एष मे क्रियमाणाया भारतेन तदा विभो । अभवद्धृदि सङ्कल्पो घातयेयं महाव्रतं ।
तस्मात् कामं ममाद्येमं राम सम्पादयानघ । जहि भीष्मं महाबाहो यथा वृत्रं पुरन्दरः ।
इति श्रीमहाभारते उद्योगपर्व्वणि अम्बोपाख्यानपर्व्वणि रामाम्बासंवादे सप्तसप्तत्यधिकशततमोऽध्यायः ॥ १७७ ॥
॥ भीष्म उवाच ॥ एवमुक्तस्तदा रामो जहि भीष्ममिति प्रभो । उवाच रुदतीं कन्यां चोदयन्तीं पुनः पुनः । ७०२५
काश्ये न कामं गृह्णामि शस्त्रं वै वरवर्णिनि । ऋते ब्रह्मविदां हेतोः किमन्यत् करवाणि ते ।
कामं भीष्मश्च शाल्वश्च मम राज्ञि वशानुगौ । भविष्यतो ऽनवद्याङ्गि तत्करिष्यामि मा शुचः ।
न तु शस्त्रं ग्रहीष्यामि कथञ्चिदपि भाविनि । ऋते नियोगाद्विप्राणामेष मे समयः कृतः ।
॥ अम्बोवाच ॥ मम दुःखं भगवता व्यपनेयं यतस्ततः । तच्च भीष्मप्रसूतं मे तं जहीश्वर मा चिरं ।
॥ राम उवाच ॥ काशिकन्ये पुनर्ब्रूहि भीष्मस्ते चरणावुभौ । शिरसा वन्दनार्होऽपि ग्रहीष्यति गिरा मम । ७०३०
॥ अम्बोवाच ॥ जहि भीष्मं रणे राम गर्ज्जन्तमसुरं यथा । समाहूतो रणे राम मम चेदिच्छसि प्रियं ।
प्रतिश्रुतञ्च यदपि तत् सत्यं कर्त्तुमर्हसि ।
॥ भीष्म उवाच ॥ तयोः संवदतोरेवं राजन्रामाम्बयोस्तदा । ऋषिः परमधर्म्मात्मा इदं वचनमब्रवीत् ।
शरणागतां महाबाहो कन्यां न त्यक्तुमर्हसि । यदि भीष्मो रणे राम समाहूतस्त्वया मृधे ।
निर्ज्जितोऽस्मीति वा ब्रूयात् कुर्य्याद्वा वचनं तव । कृतमस्या भवेत् कार्य्यं कन्याया भृगुनन्दन । ७०३५
वाक्यं सत्यञ्च ते वीर भविष्यति कृतं विभो । इयञ्चापि प्रतिज्ञा ते तदा राम महामुने ।
जित्वा वै क्षत्रियान् सर्व्वान् ब्राह्मणेषु प्रतिश्रुता । ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैव रणे यदि ।
ब्रह्मद्विड्भविता तं वै हनिष्यामीति भार्गव । शरणार्थप्रपन्नानां भीतानां शरणार्थिनां ।
न शक्ष्यामि परित्यागं कर्त्तुं जीवन् कथञ्चन । यश्च कृत्स्नं रणे क्षत्रं विजेष्यति समागतं ।
दीप्तात्मानमहं तञ्च हनिष्यामीति भार्गव । स एवं विजयी राम भीष्मः कुरुकुलोद्वहः । ७०४०
तेन युध्यस्व सङ्ग्रामे समेत्य भृगुनन्दन ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ राम उवाच ॥ स्मराम्यहं पूर्व्वकृतां प्रतिज्ञामृषिसत्तम । तथैव च करिष्यामि यथा साम्नैव लभ्यते ।
कार्य्यमेतन्महद्ब्रह्मन् काशिकन्यामनोगतं । गमिष्यामि स्वयं तत्र कन्यामादाय यत्र सः ।
यदि भीष्मो रणश्लाघी न करिष्यति मे वचः । हनिष्याम्येनमुद्रिक्तमिति मे निश्चिता मतिः ।
न हि बाणा मयोत्सृष्टाः सज्जन्तीह शरीरिणां । कायेषु विदितं तुभ्यं पुरा क्षत्रियसङ्गरे । ७०४५
एवमुक्त्वा ततो रामः सह तैर्ब्रह्मवादिभिः । प्रयाणाय मतिं कृत्वा समुत्तस्थौ महातपाः ।
ततस्ते तामुषित्वा तु रजनीं तत्र तापसाः । हुताग्नयो जप्तजप्याः प्रतस्थुर्म्मज्जिघांसया ।
अभ्यगच्छत्ततो रामः सह तैर्ब्रह्मवादिभिः । कुरुक्षेत्रं महाराज कन्यया सह भारत ।
न्यविशन्त ततः सर्व्वे परिगृह्य सरस्वतीं । तापसास्ते महात्मानो भृगुश्रेष्ठपुरस्कृताः ।
इति श्रीमहाभारते उद्योगपर्व्वण्यम्बोपाख्यानपर्व्वणि रामकुरुक्षेत्रप्राप्तौ अष्टसप्तत्यधिकशततमोऽध्यायः ॥ १७८ ॥
॥ भीष्म उवाच ॥ ततस्तृतीये दिवसे सन्दिदेश व्यवस्थितः । कुरु प्रियं स मे राजन् प्राप्तोऽस्मीति महाव्रतः । ७०५०
तमागतमहं श्रुत्वा विषयान्ते महाबलं । अभ्यगच्छं जवेनाशु प्रीत्या तेजोनिधिं प्रभुं ।
गां पुरस्कृत्य राजेन्द्र ब्राह्मणैः परिवारितः । ऋत्विग्भिर्द्देवकल्पैश्च तथैव च पुरोहितैः ।
स मामभिगतं दृष्ट्वा जामदग्न्यः प्रतापवान् । प्रतिजग्राह तां पूजां वचनञ्चेदमब्रवीत् ।
॥ राम उवाच ॥ भीष्म कां बुद्धिमास्थाय काशिराजसुता तदा । अकामेन त्वया नीता पुनश्चैव विसर्जिता ।
विभ्रंशिता त्वया हीयं धर्म्मादास्ते यशस्विनी । परामृष्टां त्वया हीमां को हि गन्तुमिहार्हति । ७०५५
प्रत्याख्याता हि शाल्वेन त्वया नीतेति भारत । तस्मादिमां मन्नियोगात् प्रतिगृह्णीष्व भारत ।
स्वधर्म्मं पुरुषव्याघ्र राजपुत्री लभत्वियं । न युक्तस्त्ववमानोऽयं राजन् कर्त्तुं त्वयाऽनघ ।
ततस्तं वै विमनसमुदीक्ष्याहमथाब्रुवं । नाहमेनां पुनर्द्दद्यां ब्रह्मन् भ्रात्रे कथञ्चन ।
शाल्वस्याहमिति प्राह पुरा मामेव भार्गव । मया चैवाभ्यनुज्ञाता गतेयं नगरं प्रति ।
न भयान्नाप्यनुक्रोशान्नार्थलोभान्न काम्यया । क्षात्त्रं धर्म्ममहं जह्यामिति मे व्रतमाहितं । ७०६०
अथ मामब्रवीद्रामः क्रोधपर्य्याकुलेक्षणः । न करिष्यसि चेदेतद्वाक्यं मे नरपुङ्गव ।
हनिष्यामि सहामात्यं त्वामद्येति पुनः पुनः । संरम्भादब्रवीद्रामः क्रोधपर्य्याकुलेक्षणः ।
तमहं गीर्भिरिष्टाभिः पुनःपुनररिन्दम । अयाचं भृगुशार्दूलं न चैव प्रशशाम सः ।
प्रणम्य तमहं मूर्द्ध्ना भूयो ब्राह्मणसत्तमं । अब्रुवं कारणं किन्तत् यत्त्वं युद्धं मयेच्छसि ।
इष्वस्त्रं मम बालस्य भवतैव चतुर्व्विधं । उपदिष्टं महाबाहो शिष्योऽस्मि तव भार्गव । ७०६५
ततो मामब्रवीद्रामः क्रोधसंरक्तलोचनः । जानीषे मां गुरुं भीष्म गृह्णासीमां न चैव ह ।
सुतां काश्यस्य कौरव्य मत्प्रियार्थं महामते । न हि मे विद्यते शान्तिरन्यथा कुरुनन्दन ।
गृहाणेमां महाबाहो रक्षस्व कुलमात्मनः । त्वया विभ्रंशिता हीयं भर्त्तारं नाधिगच्छति ।
तथा ब्रुवन्तं तमहं रामं परपुरञ्जयं । नैतदेवं पुनर्भावि ब्रह्मर्षे किं श्रमेण ते ।
गुरुत्वं त्वयि सम्प्रेक्ष्य जामदग्न्य पुरातनं । प्रसादये त्वां भगवंस्त्यक्तैषा तु पुरा मया । ७०७०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

को जातु परभावां हि नारीं व्यालीमिव स्थितां । वासयेत् स्वगृहे जानन् स्त्रीणां दोषान् महात्ययान् ।
न भयाद्वासवस्यापि धर्म्मं जह्यां महाव्रत । प्रसीद मां वा यद्वा ते कार्य्यं तत् कुरु मा चिरं ।
अयञ्चापि विशुद्धात्मन् पुराणे श्रूयते विभो । मरुत्तेन महाबुद्धे गीतः श्लोको महात्मना ।
गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः । उत्पथप्रतिपन्नस्य परित्यागो विधीयते ।
स त्वं गुरुरिति प्रेम्णा मया सम्मानितो भृशं । गुरुवृत्तिं न जानीषे तस्मात् योत्स्यामि वै त्वया। ७०७५
गुरुं न हन्यां समरे ब्राह्मणञ्च विशेषतः । विशेषतस्तपोवृद्धमेवं चान्तं मया तव ।
उद्यतेषुमथो दृष्ट्वा ब्राह्मणं चत्त्रबन्धुवत् । यो हन्यात् समरे क्रुद्धं युध्यन्तमपलायिनं ।
ब्रह्महत्या न तस्य स्यादिति धर्म्मेषु निश्चयः । चत्त्रियाणां स्थितो धर्म्मे चत्त्रियोऽस्मि तपोधन ।
यो यथा वर्त्तते यस्मिंस्तस्मिन्नेव प्रवर्त्तयन् । नाधर्म्मं समवाप्नोति न चाश्रेयश्च विन्दति ।
अर्थे वा यदि वा धर्म्मे समर्थो देशकालवित् । अर्थसंशयमापन्नः श्रेयान्निःसंशयो नरः । ७०८०
यस्मात् संशयितेऽप्यर्थे यथान्यायं प्रवर्त्तसे । तस्मात् योत्स्यामि सहितस्त्वया राम महाहवे ।
पश्य मे बाहुवीर्य्यञ्च विक्रमञ्चातिमानुषं । एवं गतेऽपि तु मया यच्छक्यं भृगुनन्दन ।
तत् करिष्ये कुरुक्षेत्रे योत्स्ये विप्र त्वया सह । द्वन्द्वे राम यथेष्टन्तु सज्जीभव महाद्युते ।
यत्र त्वं निहतो राम मया शरशतार्द्दितः । प्राप्स्यसे निर्ज्जितांल्लोकाञ्छस्त्रपूतो महारणे ।
स गच्छ विनिवर्त्तस्व कुरुक्षेत्रं रणप्रियं । तत्रैष्यामि महाबाहो युद्धाय त्वां तपोधन । ७०८५
अपि यत्र त्वया राम कृतं शौचं पुरा पितुः । तत्राहमपि हत्वा त्वां शौचं कर्त्तास्मि भार्गव ।
तत्र राम समागच्छ त्वरितं युद्धदुर्म्मद । व्यपनेष्यामि ते दर्पं पौराणं ब्राह्मणब्रुवं ।
यच्चापि कत्थसे राम बहुशः परिवत्सरे । निर्ज्जिताः चत्त्रिया लोके मयैकेनेति तत् शृणु ।
न तदा जातवान् भीष्मः चत्त्रियो वाऽपि मद्विधः । पश्चात् जातानि तेजांसि तृणेषु ज्वलितं त्वया ।
यस्ते युद्धमयं दर्पं कामञ्च व्यपनाशयेत् । सोऽहं जातो महाबाहो भीष्मः परपुरञ्जयः । ७०९०
व्यपनेष्यामि ते दर्पं युद्धे राम न संशयः ।
॥ भीष्म उवाच ॥ ततो मामब्रवीद्रामः प्रहसन्निव भारत । दिष्ट्या भीष्म मया सार्द्धं योद्धुमिच्छसि सङ्गरे ।
अयं गच्छामि कौरव्य कुरुक्षेत्रं त्वया सह । भाषितं ते करिष्यामि तत्र गच्छ परन्तप ।
तत्र त्वां निहतं माता मया शरशतान्वितं । जाह्नवी पश्यतां भीष्म गृध्रकङ्कबलाशनं ।
कृपणं त्वामभिप्रेक्ष्य सिद्धचारणसेविता । मया विनिहतं देवी रोदतामद्य पार्थिव । ७०९५
अतदर्हा महाभागा भगीरथसुता नदी । या त्वामजीजनन्मन्दं युद्धकामुकमातुरं ।
एहि गच्छ मया भीष्म युद्धकामुक दुर्म्मद । गृहाण सर्व्वं कौरव्य रथादि भरतर्षभ ।
इति ब्रुवाणं तमहं रामं परपुरञ्जयं । प्रणम्य शिरसा राममेवमस्त्वित्यथाऽब्रुवं ।
एवमुक्त्वा ययौ रामः कुरुक्षेत्रं युयुत्सया । प्रविश्य नगरे चाहं सत्यवत्यै न्यवेदयं ।
ततः कृतस्वस्त्ययनो मात्रा च प्रतिनन्दितः । द्विजातीन् वाच्य पुण्याहं स्वस्ति चैव महाद्युते । ७१००

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

रथमास्थाय रुचिरं राजतं पाण्डुरैर्हयैः । सूपस्करं स्वधिष्ठानं वैयाघ्रपरिवारणं ।
उपपन्नं महाशस्त्रैः सर्व्वोपकरणान्वितं । तत्कुलीनेन वीरेण हयशास्त्रविदा रणे ।
युक्तं सूतेन शिष्टेन बहुशो दृष्टकर्म्मणा । दंशितः पाण्डुरेणाहं कवचेन धनुष्मता ।
पाण्डुरं कार्म्मुकं गृह्य प्रायां भरतसत्तम । पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्द्धनि ।
पाण्डुरैश्चापि व्यजनैर्वीज्यमानो नराधिप । शुक्लवासाः सितोष्णीषः सर्व्वशुक्लविभूषणः । ७१०५
स्तूयमानो जयाशीर्भिर्निष्क्रम्य गजसाह्वयात् । कुरुक्षेत्रं रणक्षेत्रमुपायां भरतर्षभ ।
ते हयाश्चोदितास्तेन सूतेन परमाहवे । अवहन्मां भृशं राजन् मनोमारुतरंहसः ।
गत्वाऽहन्तं कुरुक्षेत्रं स च रामः प्रतापवान् । युद्धाय सहसा राजन् पराक्रान्तो परस्परं ।
ततः सन्दर्शने तिष्ठन्रामस्यातितपस्विनः । प्रगृह्य शङ्खप्रवरं ततः प्राधममुत्तमं ।
ततस्तत्र द्विजा राजंस्तापसाश्च वनौकसः । अपश्यन्त रणं दिव्यं देवाः सेन्द्रगणास्तदा । ७११०
ततो दिव्यानि माल्यानि प्रादुरासंस्ततस्ततः । वादित्राणि च दिव्यानि मेघवृन्दानि चैव ह ।
ततस्ते तापसाः सर्व्वे भार्गवस्यानुयायिनः । प्रेक्षकाः समपद्यन्त परिवार्य्य रणाजिरं ।
ततो मामब्रवीद्देवी सर्व्वभूतहितैषिणी । माता स्वरूपिणी राजन् किमिदं ते चिकीर्षितं ।
गत्वाऽहं जामदग्न्यन्तु प्रयाचिष्ये कुरूद्वह । भीष्मेण सह मा योत्सीः शिष्येणेति पुनः पुनः ।
मा मैवं पुत्रनिर्ब्बन्धं कुरु विप्रेण पार्थिव । जामदग्न्येन समरे योद्धुमित्यवभर्त्सयत् । ७११५
किन्न वै क्षत्त्रियहणो हरतुल्यपराक्रमः । विदितः पुत्र रामस्ते यतस्त्वं योद्धुमिच्छसि ।
ततोऽहमब्रुवं देवीमभिवाद्य कृताञ्जलिः । सर्व्वं तद्भरतश्रेष्ठ यथावृत्तं स्वयम्वरे ।
यथा च रामो राजेन्द्र मया पूर्ब्बं प्रचोदितः । काशिराजसुतायाश्च यथा कर्म्म पुरातनं ।
ततः सा राममभ्येत्य जननी मे महानदी । मदर्थं तम्मृषिं देवी क्षमयामास भार्गवं ।
भीष्मेण सह मा योत्सीः शिष्येणेति वचोऽब्रवीत् स तु तामाह याचन्तीं भीष्ममेव निवर्त्तय । ७१२०
न च मे कुरुते काममित्यहन्तमुपागमं ।
॥ वैशम्पायन उवाच ॥ ततो गङ्गा सुतस्नेहात् भीष्मं पुनरुपागमत् । न चास्याश्चाकरोद्वाक्यं क्रोधपर्य्याकुलेक्षणः ।
अथादृश्यत धर्म्मात्मा भृगुश्रेष्ठो महातपाः । आह्वयामास च तदा युद्धाय द्विजसत्तमः ।
इति श्रीमहाभारते उद्योगपर्व्वणि अम्बोपाख्यानपर्व्वणि गङ्गावाक्ये एकोनाशीत्यधिकशततमोऽध्यायः ॥ १७९ ॥
॥ भीष्म उवाच ॥ तमहं स्मयन्निव रणे प्रत्यभाषं व्यवस्थितं । भूमिष्ठं नोत्सहे योद्धुं भवन्तं रथमास्थितः ।
आरोह स्यन्दनं वीर कवचञ्च महाभुज । बधान समरे राम यदि योद्धुमिहेच्छसि । ७१२५
ततो मामब्रवीद्रामः स्मयमानो रणाजिरे । रथो मे मेदिनी भीष्म वाहा वेदाः सदश्ववत् ।
सूतश्च मातरिश्वा वै कवचं वेदमातरः । सुसंवीतो रणे ताभिर्योत्स्येऽहं कुरुनन्दन ।
एवं ब्रुवाणो गान्धारे रामो मां सत्यविक्रमः । शरव्रातेन महता सर्व्वतः प्रत्यवारयत् ।
ततोऽपश्यं जामदग्न्यं रथमध्ये व्यवस्थितं । सर्व्वायुधवरे श्रीमत्यद्भुतोपमदर्शने ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मनसा विहिते पुण्ये विस्तीर्णे नगरोपमे। दिव्याश्वयुजि सन्नद्धे काञ्चनेन विभूषिते। ७१३०
कवचेन महाबाहो सोमार्क्ककृतलक्षणे। धनुर्द्धरो बद्धतूणो बद्धगोधाङ्गुलित्रवान्।
सारथ्यं कृतवांस्तत्र युयुत्सोरकृतव्रणः। सखा वेदविदत्यन्तं दयितो भार्गवस्य ह।
आह्वयानः स मां युद्धे मनो हर्षयतीव मे। पुनः पुनरभिक्रोशन्नभियाहीति भार्गवः।
तमादित्यमिवोद्यन्तमनाधृष्यं महाबलं। क्षत्रियान्तकरं राममेकमेकः समासदं।
ततोऽहं बाणपातेषु त्रिषु वाहान्निगृह्य वै। अवतीर्य्य धनुर्न्यस्य पदातिरृषिसत्तमं। ७१३५
अभ्यगच्छं तदा राममर्च्चिष्यन् द्विजसत्तमं। अभिवाद्य चैनं विधिवदब्रुवं वाक्यमुत्तमं।
योत्स्ये त्वया रणे राम सदृशेनाधिकेन वा। गुरुणा धर्म्मशीलेन जयमाशास्व मे विभो।
॥ राम उवाच ॥ एवमेतत् कुरुश्रेष्ठ कर्त्तव्यं भूतिमिच्छता। धर्म्मो ह्येष महाबाहो विशिष्टैः सह युध्यतां।
शपेयं त्वां न चेदेवमागच्छेथा विशाम्पते। युध्यस्व त्वं रणे यत्तो धैर्य्यमालम्ब्य कौरव।
न तु ते जयमाशासे त्वां विजेतुमहं स्थितः। गच्छ युध्यस्व धर्म्मेण प्रीतोऽस्मि चरितेन ते। ७१४०
ततोऽहं तं नमस्कृत्य रथमारुह्य सत्वरः। प्राध्मापयं रणे शङ्खं पुनर्हेमपरिष्कृतं।
ततो युद्धं समभवन्मम तस्य च भारत। दिवसान् सुबहून् राजन् परस्परजिगीषया।
स मे तस्मिन्रणे पूर्व्वं प्राहरत् कङ्कपत्रिभिः। षष्ठ्या शतैश्च नवभिः शराणां नतपर्व्वणां।
चत्वारस्तेन मे वाहाः सूतश्चैव विशाम्पते। प्रतिरुद्धास्तथैवाहं समरे दंशितः स्थितः।
नमस्कृत्य च देवेभ्यो ब्राह्मणेभ्यो विशेषतः। तमहं स्मयन्निव रणे प्रत्यभाषं व्यवस्थितं। ७१४५
आचार्य्यता मानिता मे निर्मर्य्यादे ह्यपि त्वयि। भूयस्तु शृणु मे ब्रह्मन् सम्पदं धर्म्मसङ्ग्रहे।
ये ते वेदाः शरीरस्था ब्राह्मण्यं यच्च ते महत्। तपश्च महता तप्तं न तेभ्यः प्रहराम्यहं।
प्रहरे क्षत्त्रधर्म्मस्य यं त्वं राम समाश्रितः। ब्राह्मणः क्षत्त्रियत्वं हि याति शस्त्रसमुद्यमात्।
पश्य मे धनुषो वीर्य्यं पश्य बाह्वोर्ब्बलं मम। एष ते कार्म्मुकं वीर छिनद्मि निशितेषुणा।
तस्याहं निशितं भल्लं चिक्षिपे भरतर्षभ। तेनास्य धनुषः कोटिं छित्वा भूमावपातयं। ७१५०
तथैव च पृषत्कानां शतानि नतपर्व्वणां। चिक्षेप कङ्कपत्राणां जामदग्न्यरथं प्रति।
काये विषक्तास्तु तदा वायुना समुदीरिताः। चेलुः क्षरन्तो रुधिरं नागा इव च ते शराः।
क्षतजोक्षितसर्व्वाङ्गः क्षरन् स रुधिरं रणे। बभौ रामस्तदा राजन् मेरुर्धातुमिवोत्सृजन्।
हेमन्तान्ते ऽशोक इव रक्तस्तवकमण्डितः। बभौ रामस्तथा राजन् प्रफुल्ल इव किंशुकः।
ततोऽन्यद्धनुरादाय रामः क्रोधसमन्वितः। हेमपुङ्खान् सुनिशितान् शरांस्तान् हि ववर्ष सः। ७१५५
ते समासाद्य मां रौद्रा बहुधा मर्म्मभेदिनः। अकम्पयन्महावेगाः सर्पानलविषोपमाः।
तमहं समवष्टभ्य पुनरात्मानमाहवे। शतसङ्ख्यैः शरैः क्रुद्धस्तदा राममवाकिरं।
ततैरग्न्यर्कसङ्काशैः शरैराशीविषोपमैः। शितैरभ्यर्द्दितो रामो मन्दचेता इवाभवत्।
ततोऽहं कृपयाविष्टो विष्टभ्यात्मानमात्मना। धिग्धिगित्यब्रुवं युद्धं क्षत्त्रधर्म्मञ्च भारत।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अशक्नुवंश्चाब्रुवं राजञ्छोकवेगपरिप्लुतः। अहो वत कृतं पापं मयेदं क्षत्त्रधर्म्मणा। ७१६०
गुरुर्द्विजातिर्धर्म्मात्मा यदयं पीडितः शरैः। ततो न प्राहरं भूयो जामदग्न्याय भारत।
अथावताप्य पृथिवीं पूषा दिवससङ्क्षये। जगामास्तं सहस्रांशुस्ततो युद्धमुपारमत्।

इति श्रीमहाभारते उद्योगपर्व्वणि अम्बोपाख्यानपर्व्वणि भीष्मरामयुद्धे भीष्मपश्चात्तापे अशीत्यधिकशततमोऽध्यायः ॥१८०॥

॥ भीष्म उवाच ॥ आत्मनस्तु ततः सूतो हयानाञ्च विशाम्पते। मम चापनयामास शल्यान् कुशलसम्मतः।
स्नातोपवृत्तैस्तुरगैर्लब्धतोयैरविक्लवैः। प्रभाते चोदिते सूर्य्ये ततो युद्धमवर्त्तत।
दृष्ट्वा मां तूर्णमायान्तं दंशितं स्यन्दने स्थितं। अकरोद्रथमत्यर्थं रामः सज्जं प्रतापवान्। ७१६५
ततोऽहं राममायान्तं दृष्ट्वा समरकाङ्क्षिणं। धनुःश्रेष्ठं समुत्सृज्य सहसाऽवतरं रथात्।
अभिवाद्य तथैवाहं रथमारुह्य भारत। युयुत्सुर्जामदग्न्यस्य प्रमुखे वीतभीः स्थितः।
ततोऽहं शरवर्षेण महता समवाकिरं। स च मां शरवर्षेण वर्षन्तं समवाकिरत्।
संक्रुद्धो जामदग्न्यस्तु पुनरेव सुतेजितान्। सम्प्रैषीन्मे शरान् घोरान् दीप्तास्यानुरगानिव।
ततोऽहं निशितैर्भल्लैः शतशोऽथ सहस्रशः। अच्छिदं सहसा राजन्नन्तरीक्षे पुनःपुनः। ७१७०
ततस्त्वस्त्राणि दिव्यानि जामदग्न्यः प्रतापवान्। मयि प्रयोजयामास तान्यहं प्रत्यषेधयं।
अस्त्रैरेव महाबाहो चिकीर्षन्नधिकां क्रियां। ततो दिवि महान्नादः प्रादुरासीत् समन्ततः।
ततोऽहमस्त्रं वायव्यं जामदग्न्ये प्रयुक्तवान्। प्रत्याजघ्ने च तद्रामो गुह्यकास्त्रेण भारत।
ततोऽहमस्त्रमाग्नेयमनुमन्त्र्य प्रयुक्तवान्। वारुणेनैव तद्रामो वारयामास मे विभुः।
एवमस्त्राणि दिव्यानि रामस्याहमवारयं। रामश्च मम तेजस्वी दिव्यास्त्रविदरिन्दमः। ७१७५
ततो मां सव्यतो राजन् रामः कुर्व्वन् द्विजोत्तमः। उरस्यविध्यत् संक्रुद्धो जामदग्न्यः प्रतापवान्।
ततोऽहं भरतश्रेष्ठ सन्न्यसीदं रथोत्तमे। ततो मां कश्मलाविष्टं सूतस्तूर्णमुदावहत्।
ग्लायन्तं भरतश्रेष्ठ रामवाणप्रपीडितं। ततो मामप्रयान्तं वै भृशविद्धमचेतसं।
रामस्यानुचरा हृष्टाः सर्व्वे दृष्ट्वा विचुक्रुशुः। अकृतव्रणप्रभृतयः काशिकन्या च भारत।
ततस्तु लब्धसंज्ञोऽहं ज्ञात्वा सूतमथाऽब्रुवं। याहि सूत यतो रामः सज्जोऽहं गतवेदनः। ७१८०
ततो मामवहत् सूतो हयैः परमशोभितैः। नृत्यद्भिरिव कौरव्य मारुतप्रतिमैर्गतौ।
ततोऽहं राममासाद्य वाणवर्षैश्च कौरव। अवाकिरं सुसंरब्धः संरब्धञ्च जिगीषया।
तानापतत एवासौ रामो वाणानजिह्मगान्। वाणैरेवाच्छिनत्तूर्णमेकैकं त्रिभिराहवे।
ततस्ते मुदिताः सर्व्वे मम वाणाः सुसंशिताः। रामवाणैर्द्विधाच्छिन्नाः शतशोऽथ सहस्रशः।
ततः पुनः शरं दीप्तं सुप्रभं कालसम्मितं। असृजं जामदग्न्याय रामायाहं जिघांसया। ७१८५
तेन त्वभिहतो गाढं वाणवेगवशङ्गतः। मुमोह समरे रामो भूमौ च निपपात ह।
ततो हाहाकृतं सर्व्वं रामे भूतलमाश्रिते। जगत् भारत संविग्नं यथाऽर्कपतने भवेत्।
तत एनं समुद्विग्नाः सर्व्व एवाभिदुद्रुवुः। तपोधनास्ते सहसा काश्या च कुरुनन्दन।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तत एनं परिष्वज्य शनैराश्वासयंस्तदा । पाणिभिर्ज्जलशीतैश्च जयाशीर्भिश्च कौरव ।
ततः स विह्वलं वाक्यं राम उत्थाय चाब्रवीत् । तिष्ठ भीष्म हतोऽसीति वाणं सन्धाय कार्म्मुके । ७१९०
स मुक्तो न्यपतत्तूर्णं सव्ये पार्श्वे महाहवे । येनाहं भृशमुद्विग्नो व्याघूर्णित इव द्रुमः ।
हत्वा हयांस्ततो रामः शीघ्रास्त्रेण महाहवे । अवाकिरन्मां विश्रब्धो वाणैस्तैर्लोमवाहिभिः ।
ततोऽहमपि शीघ्रास्त्रं समरप्रतिवारणं । अवासृजं महाबाहो तेऽन्तराधिष्ठिताः शराः ।
रामस्य मम चैवाशु व्योमावृत्य समन्ततः । न स्म सूर्य्यः प्रतपति शरजालसमावृतः ।
मातरिश्वा ततस्तस्मिन् मेघरुद्ध इवाभवत् । ततो वायोः प्रकम्पाच्च सूर्य्यस्य च गभस्तिभिः । ७१९५
अभिघातप्रभावाच्च पावकः समजायत । ते शराः स्वसमुत्थेन प्रदीप्ताश्चित्रभानुना ।
भूमौ सर्व्वे तदा राजन् भस्मभूताः प्रपेदिरे । तदा शतसहस्राणि प्रयुतान्यर्व्वुदानि च ।
अयुतान्यथ खर्व्वाणि निखर्व्वाणि च कौरव । रामः शराणां संक्रुद्धो मयि तूर्णं न्यपातयत् ।
ततोऽहं तानपि रणे शरैराशीविषोपमैः । संछिद्य भूमौ नृपते पातयेयं नगानिव ।
एवं तदभवद्युद्धं तदा भरतसत्तम । सन्ध्याकाले व्यतीते तु व्यपायात् स च मे गुरुः । ७२००

इति श्रीमहाभारते उद्योगपर्व्वणि अम्बोपाख्यानपर्व्वणि रामभीष्मयुद्धे एकाशीत्यधिकशततमोऽध्यायः ॥ १८१ ॥

॥ भीष्म उवाच ॥ समागतस्य रामेण पुनरेवातिदारुणं । अन्येद्युस्तुमुलं युद्धमभवत भरतर्षभ ।
ततो दिव्यास्त्रविच्छूरो दिव्यान्यस्त्राण्यनेकशः । अयोजयत् स धर्म्मात्मा दिवसे दिवसे विभुः ।
तान्यहं तत्प्रतीघातैरस्त्रैरस्त्राणि भारत । व्यधमन्तुमुले युद्धे प्राणांस्त्यक्त्वा सुदुस्त्यजान् ।
अस्त्रैरस्त्रेषु बहुधा हतेष्वेव च भारत । अयुध्यत महातेजास्त्यक्तप्राणः स संयुगे ।
ततः शक्तिं प्राहिणोत् घोररूपामस्त्रे रुद्धे जामदग्न्यो महात्मा । कालोत्सृष्टां प्रज्वलितामिवोल्कां सन्दीप्ताग्रां तेजसा व्याप्य लोकं । ७२०५
ततोऽहन्तामिषुभिर्दीप्यमानां समायान्तीमन्तकालार्कदीप्तां । छित्त्वा त्रिधा पातयामास भूमौ ततो ववौ पवनः पुण्यगन्धिः ।
तस्यां छिन्नायां क्रोधदीप्तोऽथ रामः शक्तीर्घोराः प्राहिणोत् द्वादशान्याः । तासां रूपं भारत नोत शक्यं तेजस्वित्वाल्लाघवाच्चैव वक्तुं ।
किन्त्वेवाहं विह्वलः सम्प्रदिश्य दिग्भ्यः सर्व्वास्ता महोल्का इवाग्नेः । नानारूपास्तेजसोग्रेण दीप्ता यथादित्या द्वादश लोकसङ्क्षये ।
ततो जालं वाणमयं विवृत्तं सन्दृश्य भित्त्वा शरजालेन राजन् । द्वादशेषून् प्राहिणवं रणेऽहं ततः शक्तीरप्यधमं घोररूपाः ।
ततो राजन् जामदग्न्यो महात्मा शक्तीर्घोरा व्याक्षिपद्धेमदण्डाः । विचित्रिताः काञ्चनपट्टनद्धा यथा महोल्का ज्वलितास्तथा ताः । ७२१०
ताश्चाप्युग्राश्चर्म्मणा वारयित्वा खड्गेनाजौ पातयित्वा नरेन्द्र । वाणैर्दिव्यैर्जामदग्न्यस्य सङ्ख्ये दिव्यानश्वानभ्यवर्षं ससूतान् ।
निर्म्मुक्तानां पन्नगानां सरूपा दृष्ट्वा शक्तीर्हेमचित्रा निकृत्ताः । प्रादुश्चक्रे दिव्यमस्त्रं महात्मा क्रोधाविष्टो हैहयेशप्रमाथी ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

ततः श्रेण्यः शलभानामिवोग्राः समापेतुर्व्विशिखानां प्रदीप्ताः । समाचिनोच्चापि भृशं शरीरं हयान् सूतं सरथञ्चापि मह्य ।

रथः शरैर्म्मे निचितः सर्व्वतोऽभूत्तथा हयाः सारथिश्चैव राजन् । युगं रथे सा च तथैव चक्रे तथैवाचः शरकृत्तोऽथ भग्नः ।

ततस्तस्मिन् बाणवर्षे व्यतीते शरौघेण प्रत्यवर्षं गुरुन्तं । संविक्षतो मार्गणैर्ब्रह्मराशिर्देहादजस्रं मुमुचे भूरि रक्तं । ७२१५

यथा रामो बाणजालाभितप्तस्तथैवाहं सुभृशं गाढविद्धः । ततो युद्धं व्यरमच्चापराह्णे भानावस्तं प्रतियाते महीध्रं ।

इतिश्रीमहाभारते उद्योगपर्व्वणि अम्बोपाख्यानपर्व्वणि रामभीष्मयुद्धे शक्तिप्रक्षेपे द्व्यशीत्यधिकशततमोऽध्यायः॥ १८२ ॥

॥ भीष्म उवाच ॥ ततः प्रभाते राजेन्द्र सूर्य्ये विमलताङ्गते । भार्गवस्य मया सार्द्धं पुनर्युद्धमवर्त्तत ।

ततोऽभ्रान्ते रथे तिष्ठन् रामः प्रहरतां वरः । ववर्ष शरजालानि मयि मेघ इवाचले ।

ततः सूतो मम सुहृच्छरवर्षेण ताडितः । अपयातो रथोपस्थान्मनो मम विषादयन् ।

ततः सूतं ममात्यर्थं कश्मलं प्राविशन्महत् । पृथिव्याञ्च शराघातान्निपपात मुमोह च । ७२२०

ततः सूतोऽजहत् प्राणान् रामबाणप्रपीडितः । मुहूर्त्तादिव राजेन्द्र माञ्च भीराविशत्तदा ।

ततः सूते हते तस्मिन् क्षिपतस्तस्य मे शरान् । प्रमत्तमनसो रामः प्राहिणोन्मृत्युसम्मितान् ।

ततः सूतव्यसनिनं विप्लुतं मां स भार्गवः । शरेणाभ्यहनत् गाढं विकृष्य बलवद्धनुः ।

स मे भुजान्तरे राजन्निपत्य रुधिराशनः । मयैव सह राजेन्द्र जगाम वसुधातलं ।

मत्वा तु निहतं रामस्ततो मां भरतर्षभ । मेघवद्विननादोच्चैर्जहृषे च पुनः पुनः । ७२२५

तथा तु पतिते राजन्मयि रामो मुदा युतः । उदक्रोशन्महानादं सह तैरनुयायिभिः ।

मम तत्राभवन् ये तु कुरवः पार्श्वतः स्थिताः । आगता अपि युद्धन्तज्जनास्तत्र दिदृक्षवः ।

आर्त्तिं परमिकां जग्मुस्ते तदा पतिते मयि ।

ततोऽपश्यं पतितो राजसिंह द्विजानष्टौ सूर्य्यहुताशनाभान् । ते मां समन्तात् परिवार्य्य तस्थुः स्वबाहुभिः परिवार्य्याजिमध्ये ।

रक्ष्यमाणस्तु तैर्व्विप्रैर्नाहं भूमिमुपास्पृशं । अन्तरीक्षे धृतो ह्यस्मि तैर्व्विप्रैर्ब्बान्धवैरिव । ७२३०

श्वसन्निवान्तरीक्षे च जलबिन्दुभिरुक्षितः । ततस्ते ब्राह्मणा राजन्नब्रुवन् परिगृह्य मां ।

माभैरितिच मां सर्व्वे स्वस्ति तेऽस्त्विति चासकृत् । ततस्तेषामहं वाग्भिस्तर्पितः सहसोत्थितः । मातरं सरितां श्रेष्ठामपश्यं रथमास्थितां ।

हयाश्च मे संगृहीतास्तयासन् महानद्या संयति कौरवेन्द्र । पादौ जनन्याः प्रतिगृह्य चाहं तथा पितॄणां रथमभ्यरोहं ।

ररक्ष सा मां सरथं हयांश्चोपस्कराणि च । तामहं प्राञ्जलिर्भूत्वा पुनरेव व्यसर्ज्जयं ।

ततोऽहं स्वयमुद्यम्य हयांस्तान् वातरंहसः । अयुध्यं जामदग्न्येन निवृत्तेऽहनि भारत । ७२३५

ततोऽहं भरतश्रेष्ठ वेगवन्तं महाबलं । अमुञ्चं समरे बाणं रामाय हृदयच्छिदं ।

ततो जगाम वसुधां मम बाणप्रपीडितः । जानुभ्यां धनुरुत्सृज्य रामो मोहवशङ्गतः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ततस्तस्मिन्निपतिते रामे भूरिसहस्रदे । आवव्रुर्ज्जलदा व्योम चरन्तो रुधिरं बहु ।
उल्काश्च शतशः पेतुः सनिर्घाताः सकम्पनाः । अर्कञ्च सहसा दीप्तं स्वर्भानुरभिसंवृणोत् ।
ववुश्च वाताः परुषाश्चलिता च वसुन्धरा । गृध्रा बलाश्च कङ्काश्च परिपेतुर्मुदा युताः । ७२४०
दीप्तायां दिशि गोमायुर्दारुणं मुहुरुन्नदत् । अनाहता दुन्दुभयो विनेदुर्भृशदुःस्वनाः ।
एतदौत्पातिकं सर्व्वं घोरमासीद्भयङ्करं । विसंज्ञकल्पे धरणीं गते रामे महात्मनि ।
ततो वै सहसोत्थाय रामो मामभ्यवर्त्तत । पुनर्युद्धाय कौरव्य विह्वलः क्रोधमूर्च्छितः ।
आददानो महाबाहुः कार्म्मुकं बलसन्निभं । शरमप्याददानन्तं राममेव न्यवारयन् ।
महर्षयः कृपायुक्ताः क्रोधाविष्टोऽथ भार्गवः । स मेऽहरदमेयात्मा शरं कालानलोपमं । ७२४५

ततो रविर्म्मन्दमरीचिमण्डलो जगामास्तं पांशुपुञ्जावगूढः । निशा व्यगाहत् सुखशीतमारुता ततो युद्धं प्रत्यवहारयावः ।
एवं राजन्नवहारो बभूव ततः पुनर्व्विमलेऽभूत् सुघोरं । कल्यं कल्यं विंशतिर्व्वै दिनानि तथैव चान्यानि दिनानि त्रीणि ।

इति श्रीमहाभारते उद्योगपर्व्वणि अम्बोपाख्यानपर्व्वणि रामभीष्मयुद्धे गङ्गाह्रयसङ्क्रहे त्र्यशीत्यधिकशततमोऽध्यायः ॥ १८३ ॥

॥ भीष्म उवाच ॥ ततोऽहं निशि राजेन्द्र प्रणम्य शिरसा तदा । ब्राह्मणानां पितॄणाञ्च देवतानाञ्च सर्व्वशः ।
नक्तञ्चराणां भूतानां राजन्यानां विशाम्पते । शयनं प्राप्य रहिते मनसा समचिन्तयं ।
जामदग्न्येन मे युद्धमिदं परमदारुणं । अहानि च बहून्यद्य वर्त्तते सुमहात्ययं । ७२५०
न च रामं महावीर्य्यं शक्नोमि रणमूर्द्धनि । विजेतुं समरे विप्रं जामदग्न्यं महाबलं ।
यदि शक्यो मया जेतुं जामदग्न्यः प्रतापवान् । दैवतानि प्रसन्नानि दर्शयन्तु निशां मम ।
ततो निशि च राजेन्द्र प्रसुप्तः शरविक्षतः । दक्षिणेनेह पार्श्वेन प्रभातसमये तदा ।
ततोऽहं विप्रमुख्यैस्तैर्य्यैरस्मि पतितो रथात् । उत्थापितो धृतश्चैव माभैरिति च सान्त्वितः ।
त एव मां महाराज स्वप्ने दर्शनमेत्य वै । परिवार्य्याब्रुवन् वाक्यं तन्निबोध कुरूद्वह । ७२५५
उत्तिष्ठ माभैर्गाङ्गेय न भयं तेऽस्ति किञ्चन । रक्षामहे त्वां कौरव्य स्वशरीरं हि नो भवान् ।
न त्वां रामो रणे जेता जामदग्न्यः कथञ्चन । त्वमेव समरे रामं विजेता भरतर्षभ ।
इदमस्त्रं सुदयितं प्रत्यभिज्ञास्यते भवान् । विदितं हि तवाप्येतत् पूर्व्वस्मिन् देहधारणे ।
प्राजापत्यं विश्वकृतं प्रस्वापं नाम भारत । न हीदं वेद रामोऽपि पृथिव्यां वा पुमान् क्वचित् ।
तत् स्मरस्व महाबाहो भृशं संयोजयस्व च । उपस्थास्यति राजेन्द्र स्वयमेव तवानघ । ७२६०
येन सर्व्वान् महावीर्य्यान् प्रशासिष्यसि कौरव । न च रामः क्षयं गन्ता तेनास्त्रेण नराधिप ।
एनसा न तु संयोगं प्राप्स्यसे जातु मानद । स्वप्स्यते जामदग्न्योऽसौ त्वद्बाणबलपीडितः ।
ततो जित्वा त्वमेवैनं पुनरुत्थापयिष्यसि । अस्त्रेण दयितेनाजौ भीष्मसम्बोधनेन वै ।
एवं कुरुष्व कौरव्य प्रभाते रथमास्थितः । प्रसुप्तं वा मृतं वेति तुल्यं मन्यामहे वयं ।
न च रामेण मर्त्तव्यं कदाचिदपि पार्थिव । ततः समुत्पन्नमिदं प्रस्वापं युज्यतामिति । ७२६५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इत्युक्त्वाऽन्तर्हिता राजन् सर्व्व एव द्विजोत्तमाः । अष्टौ सदृशरूपास्ते सर्व्वे भास्वरमूर्त्तयः ।

इति श्रीमहाभारते उद्योगपर्व्वणि अम्बोपाख्यानपर्व्वणि रामभीष्मयुद्धे स्वप्नोपदेशे चतुरशीत्यधिकशततमोऽध्यायः ॥ १८४ ॥

॥ भीष्म उवाच ॥ ततो रात्रौ व्यतीतायां प्रतिबुद्धोऽस्मि भारत । ततः सञ्चिन्त्य वै स्वप्नमवापं हर्षमुत्तमं ।

ततः समभवत् युद्धं मम तस्य च भारत । तुमुलं सर्व्वभूतानां लोमहर्षणमद्भुतं ।

ततो वाणमयं वर्षं ववर्ष मयि भार्गवः । न्यवारयमहं तच्च शरजालेन भारत ।

ततः परमसंक्रुद्धः पुनरेव महातपाः । ह्यस्तनेन च कोपेन शक्तिं वै प्राहिणोन्मयि । ७२७०

इन्द्राशनिसमस्पर्शां यमदण्डसमप्रभां । ज्वलन्तीमग्निवत् सङ्ख्ये लेलिहानां समन्ततः ।

ततो भरतशार्दूल धिष्ण्यमाकाशगं यथा । सा मामभ्यवधीत्तूर्णं जत्रुदेशे कुरूद्वह ।

अथासृङ्मेऽस्रवत् घोरं गिरिगैरिकधातुवत् । रामेण सुमहावाहो चतस्य चतजेचण ।

ततोऽहं जामग्न्याय भृशं क्रोधसमन्वितः । चिचेप मृत्युसङ्काशं वाणं सर्पविषोपमं ।

स तेनाभिहतो वीरो ललाटे द्विजसत्तमः । अशोभत महाराज सशृङ्ग इव पर्व्वतः । ७२७५

स संरब्धः समावृत्य शरं कालान्तकोपमं । सन्दधे वलवत्कृष्य घोरं शत्रुनिवर्हणं ।

स वचसि पपातोग्रः शरो व्याल इव श्वसन् । महीं राजंस्ततस्त्वाहमगमं रुधिराविलः ।

संप्राप्य तु पुनः संज्ञां जामदग्न्याय धीमते । प्राहिण्वं विमलां शक्तिं ज्वलन्तीमशनीमिव ।

सा तस्य द्विजमुख्यस्य निपपात भुजान्तरे । विह्वलश्चाभवद्राजन् वेपथुश्चैनमाविशत् ।

तत एनं परिष्वज्य सखा विप्रो महातपाः । अकृतव्रणः शुभैर्व्वाक्यैराश्वासयदनेकधा । ७२८०

समाश्वस्तस्ततो रामः क्रोधामर्षसमन्वितः । प्रादुश्चक्रे तदा ब्राह्मं परमास्त्रं महाव्रतं ।

ततस्तत्प्रतिघातार्थं ब्राह्ममेवास्त्रमुत्तमं । मया प्रयुक्तं जज्वाल युगान्तमिव दर्शयत् ।

तयोर्ब्रह्मास्त्रयोरासीदन्तरा वै समागमः । असम्प्राप्यैव रामञ्च माञ्च भारतसत्तम ।

ततो व्योम्नि प्रादुरभूत्तेज एव हि केवलं । भूतानि चैव सर्व्वाणि जग्मुरार्त्तिं विशाम्पते ।

ऋषयश्च सगन्धर्व्वा देवताश्चैव भारत । सन्तापं परमं जग्मुरस्त्रतेजोऽभिपीडिताः । ७२८५

ततश्चचाल पृथिवी सपर्व्वतवनद्रुमा । सन्तप्तानि च भूतानि विषादं जग्मुरुत्तमं ।

प्रजज्वाल नभो राजन् धूमायन्ते दिशो दश । न स्थातुमन्तरिचे च शेकुराकाशगास्तदा ।

ततो हाहाकृते लोके सदेवासुरराचसे । इदमन्तरमित्येवं मोक्तुकामोऽस्मि भारत ।

प्रस्वापमस्त्रं त्वरितो वचनात् ब्रह्मवादिनां । विचित्रञ्च तदस्त्रं मे मनसि प्रत्यभात्तदा ।

इति श्रीमहाभारते उद्योगपर्व्वणि अम्बोपाख्यानपर्व्वणि रामभीष्मयुद्धे ब्रह्मास्त्रप्रयोगे पञ्चाशीत्यधिकशततमोऽध्यायः ॥ १८५ ॥

॥ भीष्म उवाच ॥ ततो हलहलाशब्दो दिवि राजन् महानभूत् । प्रस्वापं भीष्म मासाचीरिति कौरवनन्दन । ७२९०

अयुञ्जमेव चैवाहं तदस्त्रं भृगुनन्दने । प्रस्वापं मां प्रयुञ्जानं नारदो वाक्यमब्रवीत् ।

एते वियति कौरव्य दिवि देवगणा स्थिताः । ते त्वां निवारयन्त्यद्य प्रस्वापं मा प्रयोजय ।

रामस्तपस्वी ब्रह्मण्यो ब्राह्मणश्च गुरुश्च ते । तस्यावमानं कौरव्य मास्म कार्षीः कथञ्चन ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ततोऽपश्यं दिविष्ठान् वै तानष्टौ ब्रह्मवादिनः। ते मां स्मयन्तो राजेन्द्र शनकैरिदमब्रुवन्।
यथाह भरतश्रेष्ठ नारदस्तत्तथा कुरु। एतद्धि परमं श्रेयो लोकानां भरतर्षभ। ७२९५
ततश्च प्रतिसंहृत्य तदस्त्रं स्वापनं महत्। ब्रह्मास्त्रं दीपयाञ्चक्रे तस्मिन् युधि यथाविधि।
ततो रामो रुषितो राजसिंह दृष्ट्वा तदस्त्रं विनिवर्त्तितं वै। जितोऽस्मि भीष्मेति सुमन्दबुद्धिरित्येव वाक्यं सहसा व्यमुञ्चत्।
ततोऽपश्यत् पितरं जामदग्न्यः पितुस्तथा पितरञ्चास्य मान्यं। ते तत्र चैनं परिवार्य्य तस्थुरूचुश्चैनं सान्त्वपूर्व्वं तदानीं।
॥ पितर ऊचुः ॥ मास्मैवं साहसं तात पुनः कार्षीः कथञ्चन। भीष्मेण संयुगं गन्तुं क्षत्रियेण विशेषतः।
क्षत्रियस्य तु धर्म्मोऽयं यद्युद्धं भृगुनन्दन। स्वाध्यायो व्रतचर्य्या च ब्राह्मणानां परं धनं। ७३००
इदं निमित्ते कस्मिंश्चिदस्माभिः प्रागुदाहृतं। शस्त्रधारणमत्युग्रं तच्चाकार्य्यं कृतं त्वया।
वत्स पर्य्याप्तमेतावत् भीष्मेण सह संयुगे। विमर्द्दस्ते महाबाहो व्यपयाहि रणादतः।
पर्य्याप्तमेतत् भद्रन्ते तव कार्म्मुकधारणं। विसर्ज्जयैतद्दुर्द्धर्ष तपस्तप्यस्व भार्गव।
एष भीष्मः शान्तनवो देवैः सर्व्वैर्निवारितः। निवर्त्तस्व रणादस्मादिति चैव प्रसादितः।
रामेण सह मायोत्सीर्गुरुणेति पुनः पुनः। न हि रामो रणे जेतुं त्वया न्याय्यः कुरूद्वह। ७३०५
मानं कुरुष्व गाङ्गेय ब्राह्मणस्य रणाजिरे। वयन्तु गुरवस्तुभ्यं तस्मात् त्वां वारयामहे।
भीष्मो वसूनामन्यतमो दिष्ट्या जीवसि पुत्त्रक। गाङ्गेयः शान्तनोः पुत्त्रो वसुरेष महायशाः।
कथं शक्यस्त्वया जेतुं निवर्त्तस्वेह भार्गव। अर्ज्जुनः पाण्डवश्रेष्ठः पुरन्दरसुतो बली।
भीष्ममृत्युर्यथाकालं विहितो वै स्वयम्भुवा।
॥ भीष्म उवाच ॥ एवमुक्तः स्वपितृभिः पितृन्रामोऽब्रवीदिदं। नाहं युधि निवर्त्तेयमिति मे व्रतमाहितं। ७३१०
न निवर्त्तितपूर्व्वश्च कदाचिद्रणमूर्द्धनि। निवर्त्त्यतामापगेयः कामं युद्धात् पितामहाः।
न त्वहं विनिवर्त्तिष्ये युद्धादस्मात् कथञ्चन। ततस्ते मुनयो राजन्नृचीकप्रमुखास्तदा।
नारदेनैव सहिताः समागम्येदमब्रुवन्। निवर्त्तस्व रणात्तात मानयस्व द्विजोत्तमं।
इत्यवोचमहन्तांश्च क्षत्त्रधर्म्मव्यपेक्षया। मम व्रतमिदं लोके नाहं युद्धात्कदाचन।
विमुखो विनिवर्त्तेयं पृष्ठतोऽभ्याहतः शरैः। नाहं लोभान्न कार्पण्यान्न भयान्नार्थकारणात्। ७३१५
त्यजेयं शाश्वतं धर्ममिति मे निश्चिता मतिः। ततस्ते मुनयः सर्व्वे नारदप्रमुखा नृप।
भागीरथी च मे माता रणमध्यं प्रपेदिरे। तथैवात्तशरो धन्वी तथैव दृढनिश्चयः।
स्थिरोऽहमाहवे योद्धुं ततस्ते राममब्रुवन्। समेत्य सहिता भूयः समरे भृगुनन्दनं।
नावनीतं हि हृदयं विप्राणां शाम्य भार्गव। राम राम निवर्त्तस्व युद्धादस्मात् द्विजोत्तम।
अवध्यो वै त्वया भीष्मस्त्वञ्च भीष्मस्य भार्गव। एवं ब्रुवन्तस्ते सर्व्वे प्रतिरुध्य रणाजिरं। ७३२०
न्यासयाञ्चक्रिरे शस्त्रं पितरो भृगुनन्दनं। ततोऽहं पुनरेवाथ तानष्टौ ब्रह्मवादिनः।
अद्राक्षं दीप्यमानान् वै ग्रहानष्टाविवोदितान्। ते मां सप्रणयं वाक्यमब्रुवन् समरे स्थितं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रेहि रामं महाबाहो गुरुं लोकहितं कुरु । दृष्ट्वा निवर्त्तितं रामं सुहृद्वाक्येन तेन वै ।
लोकानाञ्च हितं कुर्व्वन्नहमप्याददे वचः । ततोऽहं राममासाद्य ववन्दे भृशविक्षतः ।
रामश्चाभ्युत्स्मयन् प्रेम्णा मामुवाच महातपाः । त्वत्समो नास्ति लोकेऽस्मिन् क्षत्त्रियः पृथिवीतले । ७३२५
गम्यतां भीष्म युद्धेऽस्मिंस्तोषितोऽहं भृशं त्वया । मम चैव समक्षन्तां कन्यामाहूय भार्गवः ।
उक्तवान् दीनया वाचा मध्ये तेषां महात्मनां ।
इति श्रीमहाभारते उद्योगपर्व्वणि अम्बोपाख्यानपर्व्वणि रामभीष्मयुद्धनिवृत्तौ षडशीत्यधिकशततमोऽध्यायः ॥ १८६ ॥
॥ राम उवाच ॥ प्रत्यक्षमेतल्लोकानां सर्व्वेषामेव भाविनि । यथाशक्त्या मया युद्धं कृतं वै पौरुषं परं ।
न चैवमपि शक्नोमि भीष्मं शस्त्रभृतां वरं । विशेषयितुमत्यर्थमुत्तमास्त्राणि दर्शयन् ।
एषा मे परमा शक्तिरेतन्मे परमं बलं । यथेष्टं गम्यतां भद्रे किमन्यद्वा करोमि ते । ७३३०
भीष्ममेव प्रपद्यस्व न तेऽन्या विद्यते गतिः । निर्जितो ह्यस्मि भीष्मेण महास्त्राणि प्रमुञ्चता ।
एवमुक्त्वा ततो रामो विनिःश्वस्य महामनाः । तूष्णीमासीत्ततः कन्या प्रोवाच भृगुनन्दनं ।
भगवन्नेवमेवैतत् यथाह भगवांस्तथा । अजेयो युधि भीष्मोऽयमपि देवैरुदारधीः ।
यथाशक्ति यथोत्साहं मम कार्य्यं कृतं त्वया । अनिवार्य्यं रणे वीर्य्यमस्त्राणि विविधानि च ।
न चैव शक्यते युद्धे विशेषयितुमन्ततः । न चाहमेनं यास्यामि पुनर्भीष्मं कथञ्चन । ७३३५
गमिष्यामि तु तत्राहं यत्र भीष्मं तपोधन । समरे पातयिष्यामि स्वयमेव भृगूद्वह ।
एवमुक्त्वा ययौ कन्या रोषव्याकुललोचना । तापस्ये धृतसङ्कल्पा सा मे चिन्तयती वधं ।
ततो महेन्द्रं सह तैर्मुनिभिर्भृगुसत्तमः । यथागतं तथा सोऽगात् मामुपामन्त्र्य भारत ।
ततो रथं समारुह्य स्तूयमानो द्विजातिभिः । प्रविश्य नगरं मात्रे सत्यवत्यै न्यवेदयं ।
यथावृत्तं महाराज सा च मां प्रत्यनन्दत । पुरुषांश्चादिशं प्राज्ञान् कन्यावृत्तान्तकर्म्मणि । ७३४०
दिवसे दिवसे ह्यस्या गति जल्पितचेष्टितं । प्रत्याहरंश्च ते युक्ताः स्थिताः प्रियहिते सदा ।
यदैव हि वनं प्रायात् सा कन्या तपसे धृता । तदैव व्यथितो दीनो गतचेता इवाभवं ।
न हि मां क्षत्त्रियः कश्चित् वीर्य्येण व्यजयत् युधि । ऋते ब्रह्मविदस्तात तपसा संशितव्रतात् ।
अपि चैतन्मया राजन्नारदे विनिवेदितं । व्यासे चैव तथा कार्य्यं तौ चोभौ मामवोचतां ।
न विषादस्त्वया कार्य्यो भीष्म काशिसुतां प्रति । दैवं पुरुषकारेण को निवर्त्तितुमुत्सहेत् । ७३४५
सा कन्या तु महाराज प्रविश्याश्रममण्डलं । यमुनातीरमाश्रित्य तपस्तेपेऽतिमानुषं ।
निराहारा कृशा रूक्षा जटिला मलपङ्किनी । षण्मासान् वायुभक्षा च स्थाणुभूता तपोधना ।
यमुनाजलमाश्रित्य सम्वत्सरमथापरं । उपवासनिराहारा धारयामास भाविनी ।
शीर्णपर्णेन चैकेन पारयामास सा परं । सम्वत्सरं तीव्रकोपा पादाङ्गुष्ठाग्रधिष्ठिता ।
एवं द्वादशवर्षाणि तापयामास रोदसी । निवर्त्त्यमानाऽपि च सा ज्ञातिभिर्नैव शक्यते । ७३५०
ततोऽगमत् वत्सभूमिं सिद्धचारणसेवितां । आश्रमं पुण्यशीलानां तापसानां महात्मनां ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding: IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तत्र पुण्येषु तीर्थेषु सा प्लुताङ्गी दिवानिशं । व्यचरत् काशिकन्या सा यथाकामविचारिणी ।
नन्दाश्रमे महाराज तथोलूकाश्रमे शुभे । च्यवनस्याश्रमे चैव ब्रह्मणः स्थान एव च ।
प्रयागे देवयजने देवारण्येषु चैव ह । भोगवत्यां महाराज कौशिकस्याश्रमे तथा ।
माण्डव्यस्याश्रमे राजन् दिलीपस्याश्रमे तथा । रामह्रदे च कौरव्य पैलगर्गस्य चाश्रमे । ७१५५
एतेषु तीर्थेषु तदा काशिकन्या विशाम्पते । आप्लावयत गात्राणि व्रतमास्थाय दुष्करं ।
तामब्रवीच्च कौरव्य मम माता जले स्थिता । किमर्थं क्लिश्यसे भद्रे तथ्यमेव वदस्व मे ।
सैनामथाब्रवीद्राजन् कृत्वाऽञ्जलिमनिन्दिता । भीष्मेण समरे रामो निर्जितश्चारुलोचने ।
कोऽन्यस्तमुत्सहेज्जेतुमुद्यतेषुं महीपतिः । साऽहं भीष्मविनाशाय तपस्तप्स्ये सुदारुणं ।
विचरामि महीं देवि यथा हन्यामहं नृपं । एतत् व्रतफलं देवि परमस्मिन् यथा हि मे । ७१६०
ततोऽब्रवीत् सागरगा जिह्मञ्चरसि भाविनि । नैष कामोऽनवद्याङ्गि शक्यः प्राप्तुं त्वयाऽबले ।
यदि भीष्मविनाशाय काश्ये चरसि वै व्रतं । व्रतस्था च शरीरं त्वं यदि नाम विमोक्ष्यसि ।
नदी भविष्यसि शुभे कुटिला वार्षिकोदका । दुस्तीर्था न तु विज्ञेया वार्षिकी नाष्टमासिकी ।
भीमग्राहवती घोरा सर्व्वभूतभयङ्करी । एवमुक्त्वा ततो राजन् काशिकन्यां न्यवर्त्तत ।
माता मम महाभागा स्मयमानेव भाविनी । कदाचिदष्टमे मासि कदाचिद्दशमे तथा । ७१६५
न प्राश्नीतोदकमपि पुनः सा वरवर्णिनी । सा वत्सभूमिं कौरव्य तीर्थलोभात्ततस्ततः ।
पतिता परिधावन्ती पुनः काशिपतेः सुता । सा नदी वत्सभूम्यान्तु प्रथिता चेति भारत ।
वार्षिकी ग्राहबहुला दुस्तीर्णा कुटिला तथा । सा कन्या तपसा तेन देहार्द्धेन व्यजायत ।
नदी च राजन् वत्सेषु कन्या चैवाभवत्तदा ।
इति श्रीमहाभारते उद्योगपर्व्वणि अम्बोपाख्यानपर्व्वणि अम्बातपस्यायां सप्ताशीत्यधिक शततमोऽध्यायः ॥ १८७ ॥
॥ भीष्म उवाच ॥ ततस्ते तापसाः सर्व्वे तपसे धृतनिश्चयाः । दृष्ट्वा न्यवर्त्तयंस्तात किं कार्य्यमिति चाब्रुवन् । ७१७०
तानुवाच ततः कन्या तपोवृद्धानृषींस्तथा । निराकृताऽस्मि भीष्मेण भ्रंशिता पतिधर्म्मतः ।
वधार्थं तस्य दीक्षा मे न लोकार्थं तपोधनाः । निहत्य भीष्मं गच्छेयं शान्तिमित्येव निश्चयः ।
यत्कृते दुःखवसतिमिमां प्राप्ताऽस्मि शाश्वतीं । पतिलोकाद्विहीना च नैव स्त्री न पुमानिह ।
नाहत्वा युधि गाङ्गेयं निवर्त्तिष्ये तपोधनाः । एष मे हृदि सङ्कल्पो यदिदं कथितं मया ।
स्त्रीभावे परिनिर्व्विण्णा पुंस्त्वार्थे कृतनिश्चया । भीष्मे प्रतिचिकीर्षामि नास्मि वार्य्येति वै पुनः । ७१७५
तां देवो दर्शयामास शूलपाणिरुमापतिः । मध्ये तेषां महर्षीणां स्वेन रूपेण तापसीं ।
छन्द्यमाना वरेणाथ सा वव्रे मत्पराजयं । हनिष्यसीति तां देवः प्रत्युवाच मनस्विनीं ।
ततः सा पुनरेवाथ कन्या रुद्रमुवाच ह । उपपद्येत् कथं देव स्त्रिया युधि जयो मम ।
स्त्रीभावेन च मे गाढं मनः शान्तमुमापते । प्रतिश्रुतश्च भूतेश त्वया भीष्मपराजयः ।
यथा स सत्यो भवति तथाकुरु वृषध्वज । यथा हन्यां समागम्य भीष्मं शान्तनवं युधि । ७१८०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तामुवाच महादेवः कन्यां किल वृषध्वजः । न मे वागनृतं प्राह सत्यं भद्रे भविष्यति ।
हनिष्यसि रणे भीष्मं पुरुषत्वञ्च लप्स्यसे । स्मरिष्यसि च तत्सर्व्वं देहमन्यं गता सती ।
द्रुपदस्य कुले जाता भविष्यसि महारथः । शीघ्रास्त्रश्चित्रयोधी च भविष्यसि सुसम्मतः ।
यथोक्तमेव कल्याणि सर्व्वमेतत् भविष्यति । भविष्यसि पुमान् पश्चात् कस्माच्चित् कालपर्य्ययात् ।
एवमुक्त्वा महादेवः कपर्द्दी वृषभध्वजः । पश्यतामेव विप्राणां तत्रैवान्तरधीयत ।
ततः सा पश्यतां तेषां महर्षीणामनिन्दिता । समाहृत्य वनात्तस्मात् काष्ठानि वरवर्णिनी । ७३८५
चितां कृत्वा सुमहतीं प्रदाय च हुताशनं । प्रदीप्तेऽग्नौ महाराज रोषदीप्तेन चेतसा ।
उक्त्वा भीष्मवधायेति प्रविवेश हुताशनं । ज्येष्ठा काशिसुता राजन् यमुनामभितो नदीं ।
इति श्रीमहाभारते उद्योगपर्व्वणि अम्बोपाख्यानपर्व्वण्यम्बाहुताशनप्रवेशे अष्टाशीत्यधिकशततमोऽध्यायः ॥ १८८ ॥
॥ दुर्य्योधन उवाच ॥ कथं शिखण्डी गाङ्गेय कन्या भूत्वा पुरा तदा । पुरुषोऽभूत् युधिश्रेष्ठ तन्मे ब्रूहि पितामह ।
॥ भीष्म उवाच ॥ भार्य्या तु तस्य राजेन्द्र द्रुपदस्य महीपतेः । महिषी दयिता ह्यासीदपुत्त्रा च विशाम्पते । ७३९०
एतस्मिन्नेव काले तु द्रुपदो वै महीपतिः । अपत्यार्थं महाराज तोषयामास शङ्करं ।
अस्मद्वधार्थं निश्चित्य तपो घोरं समास्थितः । ऋते कन्यां महादेव पुत्त्रो मे स्यादिति ब्रुवन् ।
भगवन् पुत्त्रमिच्छामि भीष्मं प्रतिचिकीर्षया । इत्युक्तो देवदेवेन स्त्रीपुमांस्ते भविष्यति ।
निवर्त्तस्व महीपाल नैतत् जात्वन्यथा भवेत् । स तु गत्वा च नगरं भार्य्यामिदमुवाच ह ।
कृतो यत्नो महादेवि तपसाराधितो मया । कन्या भूत्वा पुमान् भावी इति चोक्तोऽस्मि शम्भुना । ७३९५
पुनः पुनर्याच्यमानो दिष्टमित्यब्रवीच्छिवः । न तदन्यच्च भविता भवितव्यं हि तत्तथा ।
ततः सा नियता भूत्वा ऋतुकाले मनस्विनी । पत्नी द्रुपदराजस्य द्रुपदं प्रविवेश ह ।
लेभे गर्भं यथाकालं विधिदृष्टेन कर्म्मणा । पार्षतस्य महीपाल यथा मां नारदोऽब्रवीत् ।
ततो दधार सा देवी गर्भं राजीवलोचना । तां स राजा प्रियां भार्य्यां द्रुपदः कुरुनन्दन ।
पुत्त्रस्नेहान्महाबाहुः सुखं पर्य्यचरत्तदा । सर्व्वानभिप्रायकृतान् भार्य्याऽलभत कौरव । ७४००
अपुत्त्रस्य सतो राज्ञो द्रुपदस्य महीपतेः । यथाकालन्तु सा देवी महिषी द्रुपदस्य ह ।
कन्यां प्रवररूपान्तु प्राजायत नराधिप । अपुत्त्रस्य तु राज्ञः सा द्रुपदस्य मनस्विनी ।
ख्यापयामास राजेन्द्र पुत्त्रो ह्येष ममेति वै । ततः स राजा द्रुपदः प्रच्छन्नाया नराधिप ।
पुत्त्रवत् पुत्त्रकार्य्याणि सर्व्वाणि समकारयत् । रक्षणञ्चैव मन्त्रस्य महिषी द्रुपदस्य सा ।
चकार सर्व्वयत्नेन ब्रुवाणः पुत्त्र इत्युत । न च तां वेद नगरे कश्चिदन्यत्र पार्षतात् । ७४०५
श्रद्दधानो हि तद्वाक्यं देवस्याच्युततेजसः । छादयामास तां कन्यां पुमानिति च सोऽब्रवीत् ।
जातकर्म्माणि सर्व्वाणि कारयामास पार्थिव । पुंवद्विधानयुक्तानि शिखण्डीति च तां विदुः ।
अहमेकस्तु चारेण वचनान्नारदस्य ह । ज्ञातवान् देववाक्येन अम्बायास्तपसा तथा ।
इति श्रीमहाभारते उद्योगपर्व्वणि अम्बोपाख्यानपर्व्वणि शिखण्ड्युत्पत्तौ एकोननवत्यधिकशततमोऽध्यायः ॥ १८९ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ भीष्म उवाच ॥ चकार यत्नं द्रुपदः सुतायाः सर्व्वकर्म्मसु । ततो लेख्यादिषु तथा शिल्पेषु च परन्तप ।
इष्वस्त्रे चैव राजेन्द्र द्रोणशिष्यो बभूव ह । तस्य माता महाराज राजानं वरवर्णिनी । ७४१०
चोदयामास भार्य्यार्थं कन्यायाः पुत्त्रवत्तदा । ततस्तां पार्षतो दृष्ट्वा कन्यां सम्प्राप्तयौवनां ।
स्त्रियं मत्वा ततश्चिन्तां प्रपेदे सह भार्य्यया ।
॥ द्रुपद उवाच ॥ कन्या ममेयं सम्प्राप्ता यौवनं शोकवर्द्धिनी । मया प्रच्छादिता चेयं वचनात् शूलपाणिनः ।
॥ भार्य्योवाच ॥ न तन्मिथ्या महाराज भविष्यति कथञ्चन । त्रैलोक्यकर्त्ता कस्माद्धि वृथा वक्तुमिहार्हति ।
यदि ते रोचते राजन् वक्ष्यामि शृणु मे वचः । श्रुत्वेदानीं प्रपद्येथाः स्वां मतिं पृषतात्मज । ७४१५
क्रियतामस्य यत्नेन विधिवद्दारसंग्रहः । भविता तद्वचः सत्यमिति मे निश्चिता मतिः ।
ततस्तौ निश्चयं कृत्वा तस्मिन् कार्य्येऽथ दम्पती । वरयाञ्चक्रतुः कन्यां दशार्णाधिपतेः सुतां ।
ततो राजा द्रुपदो राजसिंहः सर्व्वान्राज्ञः कुलतः सन्निशाम्य । दशार्णकस्य नृपतेस्तनूजां शिखण्डिने वरयामास दारान् ।
हिरण्यवर्म्मेति नृपो योऽसौ दाशार्णकः स्मृतः । स च प्रादान्महीपालः कन्यां तस्मै शिखण्डिने ।
स च राजा दशार्णेषु महानासीत् सुदुर्जयः । हिरण्यवर्म्मा दुर्द्धर्षो महासेनो महामनाः । ७४२०
कृते विवाहे तु तदा सा कन्या राजसत्तम । यौवनं समनुप्राप्ता सा च कन्या शिखण्डिनी ।
कृतदारः शिखण्डी च काम्पिल्यं पुनरागमत् । ततः सा वेद तां कन्यां कञ्चित्कालं स्त्रियं किल ।
हिरण्यवर्म्मणः कन्या ज्ञात्वा तान्तु शिखण्डिनीं । धात्रीणाञ्च सखीनाञ्च व्रीडमाना न्यवेदयत् ।
कन्यां पञ्चालराजस्य सुतां तान्तु शिखण्डिनीं । ततस्ता राजशार्दूल धात्र्यो दाशार्णकास्तदा ।
जग्मुरार्त्तिं परां प्रेष्याः प्रेषयामासुरेव च । ततो दशार्णाधिपतेः प्रेष्याः सर्व्वा न्यवेदयन् । ७४२५
विप्रलम्भं यथावृत्तं स च चुक्रोध पार्थिवः । शिखण्ड्यपि महाराज पुंवद्राजकुले तदा ।
विजहार मुदा युक्तः स्त्रीत्वमेव तिरोदधन् । ततः कतिपयाहस्य तच्छ्रुत्वा भरतर्षभ ।
हिरण्यवर्म्मा राजेन्द्र रोषादार्त्तिं जगाम ह । ततो दाशार्णको राजा तीव्रकोपसमन्वितः ।
दूतं प्रस्थापयामास द्रुपदस्य निवेशनं । ततो द्रुपदमासाद्य दूतः काञ्चनवर्म्मणः ।
एक एकान्तमुत्सार्य्य रहो वचनमब्रवीत् । दशार्णराजो राजंस्त्वामिदं वचनमब्रवीत् । ७४३०
अभिषङ्गात् प्रकुपितो विप्रलब्धस्त्वयाऽनघ । अवमन्यसे मां नृपते नूनं दुर्म्मन्त्रितं तव ।
यन्मे कन्यां स्वकन्यार्थे मोहात् याचितवानसि । तस्याद्य विप्रलम्भस्य फलं प्राप्नुहि दुर्म्मते ।
एष त्वां सजनामात्यमुद्धरामि स्थिरो भव ।
इति श्रीमहाभारते उद्योगपर्व्वणि अम्बोपाख्यानपर्व्वणि हिरण्यवर्म्मदूतप्रेषणे नवत्यधिकशततमोऽध्यायः ॥ १९० ॥
॥ भीष्म उवाच ॥ एवमुक्तस्य दूतेन द्रुपदस्य तदा नृप । चोरस्येव गृहीतस्य न प्रावर्त्तत भारती ।
स यत्नमकरोत् तीव्रं सम्बन्धिन्यनुमानने । दूतैर्म्मधुरसम्भाषैर्नैतदस्तीति सन्दिशन् । ७४३५
स राजा भूय एवाथ ज्ञात्वा तत्त्वमथागमत् । कन्येति पञ्चालसुतां त्वरमाणो विनिर्य्ययौ ।
ततः संप्रेषयामास मित्राणाममितौजसां । दुहितुर्व्विप्रलम्भं तं धात्रीणां वचनात्तदा ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

ततः समुदयं कृत्वा बलानां राजसत्तमः। अभियाने मतिञ्चक्रे द्रुपदं प्रति भारत।
ततः सम्मन्त्रयामास मन्त्रिभिः स महीपतिः। हिरण्यवर्म्मा राजेन्द्र पाञ्चाल्यं पार्थिवं प्रति।
तत्रैव निश्चितं तेषामभूद्राज्ञां महात्मनां। तथ्यं भवति चेदेतत् कन्या राजन् शिखण्डिनी। ७४४०
बद्धा पञ्चालराजानमानयिष्यामहे वयं। अन्यं राजानमाधाय पाञ्चालेषु नरेश्वरं।
घातयिष्याम नृपतिं पाञ्चालं सशिखण्डिनं। तत्तदा नूनमाज्ञाय पुनर्दूतान्नराधिपः।
प्रास्थापयत् पार्षताय निहन्मीति स्थिरो भव।
॥ भीष्म उवाच ॥ स हि प्रकृत्या वै भीतः किल्बिषी च नराधिप। भयन्तीव्रमनुप्राप्तो द्रुपदः पृथिवीपतिः।
विसृज्य दूतान् दाशार्णे द्रुपदः शोककर्षितः। समेत्य भार्य्यां रहिते वाक्यमाह नराधिपः। ७४४५
भयेन महताविष्टो हृदि शोकेन चाहतः। पाञ्चालराजो दयितां मातरञ्च शिखण्डिनः।
अभियास्यति मां कोपात् सम्बन्धी सुमहाबलः। हिरण्यवर्म्मा नृपतिः कर्षमाणो वरूथिनीं।
किमिदानीं करिष्यावो मूढौ कन्यामिमां प्रति। शिखण्डी किल पुत्त्रस्ते कन्येति परिशङ्कितः।
इति सञ्चिन्त्य यत्नेन समित्रः सबलानुगः। वञ्चितोऽस्मीति मन्वानो मां किलोद्धर्त्तुमिच्छति।
किमत्र तथ्यं सुश्रोणि मिथ्या किं ब्रूहि शोभने। श्रुत्वा त्वत्तः शुभे वाक्यं संविधास्याम्यहं तथा। ७४५०
अहं हि संशयं प्राप्तो बाला चेयं शिखण्डिनी। त्वञ्च राज्ञि महत् कृच्छ्रं सम्प्राप्ता वरवर्णिनी।
सा त्वं सर्व्वविमोक्षाय तत्त्वमाख्याहि पृच्छतः। तथा विदध्यां सुश्रोणि कृत्यमाशु शुचिस्मिते।
शिखण्डिनि च मा भैस्त्वं विधास्ये तत्र तत्त्वतः। कृपयाऽहं वरारोहे वञ्चितः पुत्त्रधर्म्मतः।
मया दाशार्णको राजा वञ्चितः स महीपतिः। तदाचक्ष्व महाभागे विधास्ये तत्र यद्धितं।
जानता हि नरेन्द्रेण ख्यापनार्थं परस्य वै। प्रकाशञ्चोदिता देवी प्रत्युवाच महीपतिं। ७४५५
इति महाभारते उद्योगपर्व्वणि अम्बोपाख्यानपर्व्वणि द्रुपदप्रश्ने एकनवत्यधिकशततमोऽध्यायः॥ १९१ ॥
॥ भीष्म उवाच ॥ ततः शिखण्डिनो माता यथातत्त्वं नराधिप। आचचक्षे महाबाहो भर्त्रे कन्यां शिखण्डिनीं।
अपुत्त्रया महाराज सपत्नीनां भयादिदं। कन्या शिखण्डिनी जाता पुरुषो वै निवेदितः।
त्वया चैव नरश्रेष्ठ तन्मे प्रीत्याऽनुमोदितं। पुत्त्रकर्म्म कृतञ्चैव कन्यायाः पार्थिवर्षभ।
भार्य्या चोढा त्वया राजन् दशार्णाधिपतेः सुता। मया च प्रत्यभिहितं देववाक्यार्थदर्शनात्।
कन्या भूत्वा पुमान् भावीत्येवञ्चैतदुपेक्षितं। ७४६०
एतत् श्रुत्वा द्रुपदो यज्ञसेनः सर्वं तत्त्वं मन्त्रविज्ञो निवेद्य। मन्त्रं राजा मन्त्रयामास राजन् यथायुक्तं रक्षणे वै प्रजानां।
सम्बन्धकञ्चैव समर्थ्य तस्मिन् दाशार्णके वै नृपतौ नरेन्द्रः। स्वयं कृत्वा विप्रलम्भं यथावत् मन्त्रैकाग्रो निश्चयं वै जगाम।
स्वभावगुप्तं नगरमापत्काले तु भारत। गोपयामास राजेन्द्र सर्व्वतः समलङ्कृतं।
आर्त्तिञ्च परमां राजा जगाम सह भार्य्यया। दशार्णपतिना सार्द्धं विरोधे भरतर्षभ।
कथं सम्बन्धिना सार्द्धं न मे स्यात् विग्रहो महान्। इति सञ्चिन्त्य मनसा दैवतमर्च्चयत् तदा। ७४६५
तन्तु दृष्ट्वा तदा राजन् देवी देवपरन्तदा। अर्च्चां प्रयुञ्जानमथो भार्य्यावचनमब्रवीत्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

देवानां प्रतिपत्तिश्च सत्यं साधुमता सतां । किन्तु दुःखार्णवं प्राप्य तस्मादर्चयतां गुरून् ।
दैवतानि च सर्व्वाणि पूज्यन्तां भूरिदक्षिणं । अग्नयश्चापि हूयन्तां दाशार्णप्रतिषेधने ।
अयुद्धेन निवृत्तिश्च मनसा चिन्तय प्रभो । देवतानां प्रसादेन सर्व्वमेतद्भविष्यति ।
मन्त्रिभिर्मन्त्रितं सार्द्धं त्वया पृथुललोचन । पुरस्यास्याविनाशाय तच्च राजंस्तथा कुरु ।
दैवं हि मानुषोपेतं भृशं सिध्यति पार्थिव । परस्परविरोधाद्धि सिद्धिरस्ति न चैतयोः ।
तस्माद्विधाय नगरे विधानं सचिवैः सह । अर्च्चयस्व यथाकामं दैवतानि विशाम्पते ।
एवं सम्भाषमाणौ तु दृष्ट्वा शोकपरायणौ । शिखण्डिनी तदा कन्या व्रीडितेव तपस्विनी ।
ततः सा चिन्तयामास मत्कृते दुःखितावुभौ । इमाविति ततश्चक्रे मतिं प्राणविनाशने ।
एवं सा निश्चयं कृत्वा भृशं शोकपरायणा । निर्जगाम गृहं त्यक्त्वा गहनं निर्जनं वनं ।
यक्षेणर्द्धिमता राजन् स्थूणाकर्णेन पालितं । तद्भयादेव च जनो विसर्ज्जयति तद्वनं ।
तत्र च स्थूणभवनं सुधामृत्तिकलेपनं । लाजोल्लापिकधूमाढ्यमुच्चप्राकारतोरणं ।
तत्प्रविश्य शिखण्डी सा द्रुपदस्यात्मजा नृप । अनश्नाना बहुतिथं शरीरमुदशोषयत् ।
दर्शयामास तां यक्षः स्थूणो मार्द्दवसंयुतः । किमर्थोऽयं तवारम्भः करिष्ये ब्रूहि मा चिरं ।
अशक्यमिति सा यक्षं पुनःपुनरुवाच ह । करिष्यामीति वै क्षिप्रं प्रत्युवाचाथ गुह्यकः ।
धनेश्वरस्यानुचरो वरदोऽस्मि नृपात्मजे । अदेयमपि दास्यामि ब्रूहि यत्ते विवक्षितं ।
ततः शिखण्डी तत्सर्व्वमखिलेन न्यवेदयत् । तस्मै यक्षप्रधानाय स्थूणाकर्णाय भारत ।
॥ शिखण्ड्युवाच ॥ अपुत्रो मे पिता यक्ष न चिरान्नाशमेष्यति । अभियास्यति सक्रोधो दशार्णाधिपतिर्हि तं ।
महाबलो महोत्साहः सहेमकवचो नृपः । तस्माद्रक्षस्व मां यक्ष मातरं पितरञ्च मे ।
प्रतिज्ञातो हि भवता दुःखप्रतिशमो मम । भवेयं पुरुषो यक्ष त्वत्प्रसादादनिन्दितः ।
यावदेव स राजा वै नापयाति पुरं मम । तावदेव महायक्ष प्रसादं कुरु गुह्यक ।
इति श्रीमहाभारते उद्योगपर्व्वणि अम्बोपाख्यानपर्व्वणि स्थूणाकर्णप्रत्यक्षे द्विनवत्यधिकशततमोऽध्यायः ॥ १९२ ॥
॥ भीष्म उवाच ॥ शिखण्डिवाक्यं श्रुत्वाऽथ स यक्षो भरतर्षभ । प्रोवाच मनसा चिन्त्य दैवेनोपनिपीडितः ।
भवितव्यं तथा तद्धि मम दुःखाय कौरव । भद्रे कामं करिष्यामि समयन्तु निबोध मे ।
किञ्चित्कालान्तरं दास्ये पुंलिङ्गं स्वमिदं तव । आगन्तव्यं त्वया काले सत्यञ्चैव वदस्व मे ।
प्रभुः सङ्कल्पसिद्धोऽस्मि कामचारी विहङ्गमः । मत्प्रसादात् पुरञ्चैव त्राहि बन्धूंश्च केवलं ।
स्त्रीलिङ्गं धारयिष्यामि तवेदं पार्थिवात्मजे । सत्यं मे प्रतिजानीहि करिष्यामि प्रियन्तव ।
॥ शिखण्ड्युवाच ॥ प्रतिदास्यामि भगवन् पुंलिङ्गं तव सुव्रत । किञ्चित् कालान्तरं स्त्रीत्वं धारयस्व निशाचर ।
प्रतियाते दशार्णे तु पार्थिवे हेमवर्म्मणि । कन्यैव हि भविष्यामि पुरुषस्त्वं भविष्यसि ।
॥ भीष्म उवाच ॥ इत्युक्त्वा समयं तत्र चक्राते तावुभौ नृप । अन्योन्यस्याभिसन्देहे तौ सङ्क्रामयतां ततः ।
स्त्रीलिङ्गं धारयामास स्थूणो यक्षोऽथ भारत । यक्षरूपञ्च तद्दीप्तं शिखण्डी प्रत्यपद्यत ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

ततः शिखण्डी पाञ्चाल्यः पुंस्त्वमासाद्य पार्थिव । विवेश नगरं हृष्टः पितरञ्च समासदत् ।
यथावृत्तन्तु तत्सर्व्वमाचख्यौ द्रुपदस्य तत् । द्रुपदस्तस्य तच्छ्रुत्वा हर्षमाहारयत्परं ।
सभार्य्यस्तच्च सस्मार महेश्वरवचस्तदा । ततः सम्प्रेषयामास दशार्णाधिपतेर्नृप ।
पुरुषोऽयं मम सुतः श्रद्दधातु भवानिति । अथ दाशार्णको राजा सहसाऽभ्यागमत्तदा ।
पञ्चालराजं द्रुपदं दुःखशोकसमन्वितः । ततः काम्पिल्यमासाद्य दशार्णाधिपतिस्ततः ।
प्रेषयामास सत्कृत्य दूतं ब्रह्मविदां वरं । ब्रूहि मद्वचनात् दूत पाञ्चाल्यं तं नृपाधमं ।
यन्मे कन्यां स्वकन्यार्थं वृतवानसि दुर्म्मते । फलं तस्यावलेपस्य द्रक्ष्यस्यद्य न संशयः ।
एवमुक्तश्च तेनासौ ब्राह्मणो राजसत्तम । दूतः प्रयातो नगरं दशार्णनृपचोदितः ।
तत आसादयामास पुरोधा द्रुपदं पुरे । तस्मै पञ्चालको राजा गामर्घ्यञ्च सुसत्कृतं ।
प्रापयामास राजेन्द्र सह तेन शिखण्डिना । तां पूजां नाभ्यनन्दत्स वाक्यञ्चेदमुवाच ह ।
यदुक्तं तेन वीरेण राज्ञा काञ्चनवर्म्मणा । यत्तेऽहमधमाचार दुहित्राऽस्म्यभिवञ्चितः ।
तस्य पापस्य करणात् फलं प्राप्नुहि दुर्म्मते । देहि युद्धं नरपते ममाद्य रणमूर्द्धनि ।
उद्धरिष्यामि ते सद्यः सामात्यसुतबान्धवं । तदुपालम्भसंयुक्तं श्रावितः किल पार्थिवः ।
दशार्णपतिना चोक्तो मन्त्रिमध्ये पुरोधसा । अभवत् भरतश्रेष्ठ द्रुपदः प्रणयानतः ।
यदाह मां भवान् ब्रह्मन् सम्बन्धिवचनाद्वचः । अस्योत्तरं प्रतिवचो दूतो राज्ञे वदिष्यति ।
ततः सम्प्रेषयामास द्रुपदोऽपि महात्मने । हिरण्यवर्म्मणे दूतं ब्राह्मणं वेदपारगं ।
तमागम्य तु राजानं दशार्णाधिपतिं तदा । तद्वाक्यमाददे राजन् यदुक्तं द्रुपदेन ह ।
आगमः क्रियतां व्यक्तः कुमारोऽयं सुतो मम । मिथ्यैतदुक्तं केनापि तन्न श्रद्धेयमित्युत ।
ततः स राजा द्रुपदस्य श्रुत्वा विमर्षयुक्तो युवतीर्वरिष्ठाः । सम्प्रेषयामास सुचारुरूपाः शिखण्डिनं स्त्रीपुमान् वेति वेत्तुं ।
ताः प्रेषितास्तत्त्वभावं विदित्वा प्रीत्या राज्ञे तच्छशंसुर्हि सर्व्वं । शिखण्डिनं पुरुषं कौरवेन्द्र दाशार्णराजाय महानुभावं ।
ततः श्रुत्वा तु राजा स आगमं प्रीतिमानथ । सम्बन्धिना समागम्य हृष्टो वासमुवास ह ।
शिखण्डिने च मुदितः प्रादाद्वित्तं जनेश्वरः । हस्तिनोऽश्वांश्च गाश्चैव दास्योऽथ बहुलास्तथा ।
पूजितश्च प्रतिययौ निर्भर्त्स्य तनयां किल । विनीतकिल्बिषे प्रीते हेमवर्म्मणि पार्थिवे ।
प्रतियाते दशार्णे तु हृष्टरूपा शिखण्डिनी । कस्यचित्त्वथ कालस्य कुबेरो नरवाहनः ।
लोकयात्रां प्रकुर्व्वाणः स्थूणस्यागान्निवेशनं ।
स तत् गृहस्योपरि वर्त्तमान आलोकयामास धनाधिगोप्ता । स्थूणस्य यक्षस्य विशिष्टवेश्म स्वलङ्कृतं माल्यगुणैर्व्विचित्रैः ।
लाजैश्च गन्धैश्च तथा वितानैरभ्यर्चितं धूपनधूपितञ्च । ध्वजैः पताकाभिरलङ्कृतञ्च भक्ष्यान्नपेयामिषदत्तहोमं ।
तत्स्थानं तस्य दृष्ट्वा तु सर्व्वतः समलङ्कृतं । मणिरत्नसुवर्णानां मालाभिः परिपूरितं ।
नानाकुसुमगन्धाढ्यं सिक्तं सम्मृष्टशोभितं । अथाब्रवीत् यक्षपतिस्तान् यक्षाननुगांस्तदा ।
स्वलङ्कृतमिदं वेश्म स्थूणस्यामितविक्रमाः । नोपसर्पति मां चैव कस्मादद्य स मन्दधीः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यस्माज्जानन् स मन्दात्मा मामसौ नोपसर्पति । तस्मात्तस्मै महादण्डो धार्य्यः स्यादिति मे मतिः ।
॥ यक्षा ऊचुः ॥ द्रुपदस्य सुता राजन् राज्ञो जाता शिखण्डिनी । तस्यां निमित्ते कस्मिंश्चित् प्रादात् पुरुषलक्षणं ।
अग्रहील्लक्षणं स्त्रीणां स्त्रीभूता तिष्ठते गृहे । नोपसर्पति तेनासौ सव्रीडः स्त्रीस्वरूपवान् ।
एतस्मात् कारणाद्राजन् स्थूणो न त्वाऽद्य सर्पति । श्रुत्वा कुरु यथान्यायं विमानमिह तिष्ठतां ।
आनीयतां स्थूण इति ततो यक्षाधिपोऽब्रवीत् । कर्त्ताऽस्मि निग्रहं तस्य प्रत्युवाच पुनः पुनः । ७५३०
सोऽभ्यगच्छत यक्षेन्द्रमाहूतः पृथिवीपते । स्त्रीस्वरूपो महाराज तस्थौ व्रीडासमन्वितः ।
तं शशापाथ संक्रुद्धो धनदः कुरुनन्दन । एवमेव भवत्वस्य स्त्रीत्वं पापस्य गुह्यकाः ।
ततोऽब्रवीत् यक्षपतिर्महात्मा यस्माददास्त्वमवमन्येह यक्षान् । शिखण्डिनो लक्षणं पापबुद्धे स्त्रीलक्षणं चाग्रहीः पापकर्म्मन् ।
अप्रवृत्तं सुदुर्ब्बुद्धे यस्मादेतत् त्वया कृतं । तस्मादद्य प्रभृत्येव स्त्रीत्वं सा पुरुषस्तथा ।
ततः प्रसादयामासुर्यक्षा वैश्रवणं किल । स्थूणस्यार्थे कुरुष्वान्तं शापस्येति पुनः पुनः । ७५३५
ततो महात्मा यक्षेन्द्रः प्रत्युवाचानुगामिनः । सर्व्वान् यक्षगणांस्तात शापस्यान्तचिकीर्षया ।
शिखण्डिनि हते यक्षाः स्वरूपं प्रतिपत्स्यते । स्थूणो यक्षो निरुद्वेगो भवत्विति महामनाः ।
इत्युक्त्वा भगवान् देवो यक्षराजः सुपूजितः । प्रययौ सहितैः सर्व्वैर्निमेषान्तरचारिभिः ।
स्थूणस्तु शापं संप्राप्य तत्रैव न्यवसत्तदा । समये चागमत्तूर्णं शिखण्डी तं क्षपाचरं ।
सोऽभिगम्याब्रवीत् वाक्यं प्राप्तोऽस्मि भगवन्निति । तमब्रवीत्ततः स्थूणः प्रीतोऽस्मीति पुनः पुनः । ७५४०
आर्ज्जवेनागतं दृष्ट्वा राजपुत्रं शिखण्डिनं । सर्व्वमेव यथावृत्तमाचचक्षे शिखण्डिने ।
॥ यक्ष उवाच ॥ शप्तो वैश्रवणेनाहं त्वत्कृते पार्थिवात्मज । गच्छेदानीं यथाकामञ्चर लोकान् यथासुखं ।
दिष्टमेतत् पुरा मन्ये न शक्यमतिवर्त्तितुं । गमनं तव चेतो हि पौलस्त्यस्य च दर्शनं ।
॥ भीष्म उवाच ॥ एवमुक्तः शिखण्डी तु स्थूणयक्षेण भारत । प्रत्याजगाम नगरं हर्षेण महता वृतः ।
पूजयामास विविधैर्गन्धमाल्यैर्महाधनैः । दिजातीन् देवतांश्चैव चैत्यानथ चतुष्पथान् । ७५४५
द्रुपदः सह पुत्रेण सिद्धार्थेन शिखण्डिना । मुदञ्च परमां लेभे पाञ्चाल्यः सह बान्धवैः ।
शिष्यार्थं प्रददौ चाथ द्रोणाय कुरुपुङ्गव । शिखण्डिनं महाराज पुत्रं स्त्रीपूर्व्विणं तथा ।
प्रतिपेदे चतुष्पादं धनुर्वेदं नृपात्मजः । शिखण्डी सह युष्माभिर्धृष्टद्युम्नश्च पार्षतः ।
मम त्वेतच्चरास्तात यथावत् प्रत्यवेदयन् । जडान्धबधिराकारा ये युक्ता द्रुपदे मया ।
एवमेष महाराज स्त्रीपुमान् द्रुपदात्मजः । स सम्भूतः कुरुश्रेष्ठ शिखण्डी रथसत्तमः । ७५५०
ज्येष्ठा काशिपतेः कन्या अम्बा नामेति विश्रुता । द्रुपदस्य कुले जाता शिखण्डी भरतर्षभ ।
नाहमेनं धनुष्पाणिं युयुत्सुं समुपस्थितं । मुहूर्त्तमपि पश्येयं प्रहरेयं न चाच्युत ।
व्रतमेतत् मम सदा पृथिव्यामपि विश्रुतं । स्त्रियां स्त्रीपूर्व्विके चैव स्त्रीनाम्नि स्त्रीस्वरूपिणि ।
न मुञ्चेयमहं वाणमिति कौरवनन्दन । न हन्यामहमेतेन कारणेन शिखण्डिनं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

एतत् तत्त्वमहं वेद जन्म तात शिखण्डिनः । ततो नैनं हनिष्यामि समरेष्वाततायिनं । ७५५५
यदि भीष्मः स्त्रियं हन्यात् सन्तः कुर्य्युर्व्विगर्हणं । नैनं तस्माद्धनिष्यामि दृष्ट्वाऽपि समरे स्थितं ।
॥ वैशम्पायन उवाच ॥ एतच्छ्रुत्वा तु कौरव्यो राजा दुर्य्योधनस्तदा । मुहूर्त्तमिव स ध्यात्वा भीष्मे युक्तममन्यत ।
इति श्रीमहाभारते उद्योगपर्व्वणि अम्बोपाख्यानपर्व्वणि शिखण्डिपुंस्त्वप्राप्तौ त्रिनवत्यधिकशततमोऽध्यायः ॥ १९३ ॥
॥ सञ्जय उवाच ॥ प्रभातायान्तु शर्व्वर्य्यां पुनरेव सुतस्तव । मध्ये सर्व्वस्य सैन्यस्य पितामहमपृच्छत ।
पाण्डवेयस्य गाङ्गेय यदेतत् सैन्यमुद्यतं । प्रभूतनरनागाश्वं महारथसमाकुलं ।
भीमार्ज्जुनप्रभृतिभिर्म्महेष्वासैर्म्महाबलैः । लोकपालसमैर्गुप्तं धृष्टद्युम्नपुरोगमैः । ७५६०
अप्रधृष्यमनावार्य्यमुद्धूतमिव सागरं । सेनासागरमक्षोभ्यमपि देवैर्म्महाहवे ।
केन कालेन गाङ्गेय क्षपयेथा महाद्युत । आचार्य्यो वा महेष्वासः कृपो वा सुमहाबलः ।
कर्णो वा समरश्लाघी द्रौणिर्व्वा द्विजसत्तमः । दिव्यास्त्रविदुषः सर्व्वे भवन्तो हि बले मम ।
एतदिच्छाम्यहं ज्ञातुं परं कौतूहलं हि मे । हृदि नित्यं महाबाहो वक्तुमर्हसि तन्मम ।
॥ भीष्म उवाच ॥ अनुरूपं कुरुश्रेष्ठ त्वय्येतत् पृथिवीपते । बलाबलममित्राणां तेषां यदिह पृच्छसि । ७५६५
शृणु राजन्मम रणे या शक्तिः परमा भवेत् । शस्त्रवीर्य्यं रणे यच्च भुजयोश्च महाभुज ।
आर्ज्जवेनैव युद्धेन योद्धव्य इतरो जनः । मायायुद्धेन मायावी इत्येतद्धर्म्मनिश्चयः ।
हन्यामहं महाभाग पाण्डवानामनीकिनीं । दिवसे दिवसे कृत्वा भागं प्रागाह्निकं मम ।
योधानां दशसाहस्रं कृत्वा भागं महाद्युते । सहस्रं रथिनामेकमेष भागो मतो मम ।
अनेनाहं विधानेन सन्नद्धः सततोत्थितः । क्षपयेयं महत्सैन्यं कालेनानेन भारत । ७५७०
मुञ्चेयं यदि वाऽस्त्राणि महान्ति समरे स्थितः । शतसाहस्रघातीनि हन्यां मासेन भारत ।
॥ सञ्जय उवाच ॥ श्रुत्वा भीष्मस्य तद्वाक्यं राजा दुर्य्योधनस्ततः । पर्य्यपृच्छत राजेन्द्र द्रोणमङ्गिरसां वरं ।
आचार्य्य केन कालेन पाण्डुपुत्त्रस्य सैनिकान् । निहन्या इति तं द्रोणः प्रत्युवाच हसन्निव ।
स्थविरोऽस्मि महाबाहो मन्दप्राणविचेष्टितः । शस्त्राग्निना निर्द्दहेयं पाण्डवानामनीकिनीं ।
यथा भीष्मः शान्तनवो मासेनेति मतिर्म्मम । एषा मे परमा शक्तिरेतन्मे परमं बलं । ७५७५
द्वाभ्यामेव तु मासाभ्यां कृपः शारद्वतोऽब्रवीत् । द्रौणिस्तु दशरात्रेण प्रतिजज्ञे बलक्षयं ।
कर्णस्तु पञ्चरात्रेण प्रतिजज्ञे महास्त्रवित् । तच्छ्रुत्वा सूतपुत्त्रस्य वाक्यं सागरगासुतः ।
जहास सस्वनं हासं वाक्यञ्चेदमुवाच ह । न हि यावद्रणे पार्थं रणे शङ्खधनुर्द्धरं ।
वासुदेवसमायुक्तं रथेनायान्तमाहवे । समागच्छसि राधेय तेनैवमभिमन्यसे ।
शक्यमेवञ्च भूयश्च त्वया वक्तुं यथेष्टतः । ७५८०
इति श्रीमहाभारते उद्योगपर्व्वणि अम्बोपाख्यानपर्व्वणि भीष्मादिशक्तिकथने चतुर्नवत्यधिकशततमोऽध्यायः ॥ १९४ ॥
॥ वैशम्पायन उवाच ॥ एतच्छ्रुत्वा तु कौन्तेयः सर्व्वान् भ्रातॄनुपह्वरे । आहूय भरतश्रेष्ठ इदं वचनमब्रवीत् ।
॥ युधिष्ठिर उवाच ॥ धार्त्तराष्ट्रस्य सैन्येषु ये चारपुरुषा मम । ते प्रवृत्तिं प्रयच्छन्ति ममेमां व्युषितां निशां ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

दुर्य्योधनः किलापृच्छदापगेयं महाव्रतं । केन कालेन पाण्डूनां हन्याः सैन्यमिति प्रभो ।
मासेनेति च तेनोक्तो धार्त्तराष्ट्रः सुदुर्म्मतिः । तावता चापि कालेन द्रोणोऽपि प्रतिजज्ञिवान् ।
गौतमो द्विगुणं कालमुक्तवानिति नः श्रुतं । द्रौणिस्तु दशरात्रेण प्रतिजज्ञे महास्त्रवित् । ७५८५
तथा दिव्यास्त्रवित् कर्णः संपृष्टः कुरुसंसदि । पञ्चभिर्द्दिवसैर्हन्तुं स सैन्यं प्रतिजज्ञिवान् ।
तस्मादहमपीच्छामि श्रोतुमर्ज्जुन ते वचः । कालेन कियता शत्रून् क्षपयेरिति फाल्गुन ।
एवमुक्तो गुडाकेशः पार्थिवेन धनञ्जयः । वासुदेवं समीक्ष्येदं वचनं प्रत्यभाषत ।
सर्व्वे एते महात्मानः कृतास्त्राश्चित्रयोधिनः । असंशयं महाराज हन्युरेव न संशयः ।
अपैतु ते मनस्तापो यथासत्यं ब्रवीम्यहं । हन्यामेकरथेनैव वासुदेवसहायवान् । ७५९०
सामरानपि लोकांस्त्रीन् सर्व्वान् स्थावरजङ्गमान् । भूतं भव्यं भविष्यच्च निमेषादिति मे मतिः ।
यत्तत् घोरं पशुपतिः प्रादादस्त्रं महन्मम । कैराते द्वन्द्वयुद्धे तु तदिदं मम वर्त्तते ।
तद्युगान्ते पशुपतिः सर्व्वभूतानि संहरन् । प्रयुङ्क्ते पुरुषव्याघ्र तदिदं मयि वर्त्तते ।
यन्न जानाति गाङ्गेयो न द्रोणो न च गौतमः । न च द्रोणसुतो राजन् कुत एव तु सूतजः ।
न तु युक्तं रणे हन्तुं दिव्यैरस्त्रैः पृथग्जनं । आर्ज्जवेनैव युद्धेन विजेष्यामो वयं परान् । ७५९५
तथेमे पुरुषव्याघ्राः सहायास्तव पार्थिव । सर्व्वे दिव्यास्त्रविद्वांसः सर्व्वे युद्धाभिकाङ्क्षिणः ।
वेदान्तावभृथस्नाताः सर्व्वे एतेऽपराजिताः । निहन्युः समरे सेनां देवानामपि पाण्डव ।
शिखण्डी युयुधानश्च धृष्टद्युम्नश्च पार्षतः । भीमसेनो यमौ चोभौ युधामन्यूत्तमौजसौ ।
विराटद्रुपदौ चोभौ भीष्मद्रोणसमौ युधि । शङ्खश्चैव महाबाहुर्हैडिम्बश्च महाबलः ।
पुत्त्रोऽस्याञ्जनपर्व्वा तु महाबलपराक्रमः । शैनेयश्च महाबाहुः सहायो रणकोविदः । ७६००
अभिमन्युश्च बलवान् द्रौपद्याः पञ्च चात्मजाः । स्वयञ्चापि समर्थोऽसि त्रैलोक्योत्सादनेऽपि च ।
क्रोधाद्यं पुरुषं पश्येस्तथा शक्रसमद्युते । स क्षिप्रं न भवेत् व्यक्तमिति त्वां वेद्मि कौरव ।
इति श्रीमहाभारते उद्योगपर्व्वणि अम्बोपाख्यानपर्व्वणि अर्ज्जुनवाक्ये पञ्चनवत्यधिकशततमोऽध्यायः ॥ १९५ ॥
॥ वैशम्पायन उवाच ॥ ततः प्रभाते विमले धार्त्तराष्ट्रेण चोदिताः । दुर्य्योधनेन राजानः प्रययुः पाण्डवान् प्रति ।
आप्लाव्य शुचयः सर्व्वे स्रग्विणः शुक्लवाससः । गृहीतशस्त्रध्वजिनः स्वस्तिवाच्य हुताग्नयः ।
सर्व्वे ब्रह्मविदः शूराः सर्व्वे सुचरितव्रताः । सर्व्वे कामकृतश्चैव सर्व्वे चाहवलक्षणाः । ७६०५
आहवेषु परांल्लोकान् जिगीषन्तो महाबलाः । एकाग्रमनसः सर्व्वे श्रद्दधानाः परस्परं ।
विन्दानुविन्दावावन्त्यौ कैकेया वाह्लिकैः सह । प्रययुः सर्व्व एवैते भारद्वाजपुरोगमाः ।
अश्वत्थामा शान्तनवः सैन्धवोऽथ जयद्रथः । दाक्षिणात्याः प्रतीच्याश्च पार्व्वतीयाश्च ये नृपाः ।
गान्धारराजः शकुनिः प्राच्योदीच्याश्च सर्व्वशः । शकाः किराता यवनाः शिवयोऽथ वशातयः ।
स्वैः स्वैरनीकैः सहिताः परिवार्य्य महारथं । एते महारथाः सर्व्वे द्वितीये निर्ययुर्ब्बले । ७६१०
कृतवर्म्मा सहानीकस्त्रिगर्त्तश्च महारथः । दुर्य्योधनश्च नृपतिर्भ्रातृभिः परिवारितः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शलो भूरिश्रवाः शल्यः कौशल्योऽथ वृहद्रथः। एते पश्चादनुगता धार्त्तराष्ट्रपुरोगमाः।
ते समेत्य यथान्यायं धार्त्तराष्ट्रा महाबलाः। कुरुचेत्रस्य पश्चार्द्धे व्यवतिष्ठन्त दंशिताः।
दुर्य्योधनस्तु शिविरं कारयामास भारत। यथैव हास्तिनपुरं द्वितीयं समलङ्कृतं।
न विशेषं विजानन्ति पुरस्य शिविरस्य वा। कुशला अपि राजेन्द्र नरा नगरवासिनः। ७६१५
तादृशान्येव दुर्गाणि राज्ञामपि महीपतिः। कारयामास कौरव्यः शतशोऽथ सहस्रशः।
पञ्चयोजनमुत्सृज्य मण्डलं तद्रणाजिरं। सेनानिवेशास्ते राजन्नाविशञ्छतसङ्घशः।
तत्र ते पृथिवीपाला यथोत्साहं यथाबलं। विविशुः शिबिराण्यत्र द्रव्यवन्ति सहस्रशः।
तेषां दुर्य्योधनो राजा ससैन्यानां महात्मनां। व्यादिदेश सवाह्यानां भक्ष्यभोज्यमनुत्तमं।
सनागाश्वमनुष्याणां ये च शिल्पोपजीविनः। ये चान्येऽनुगतास्तत्र सूतमागधवन्दिनः। ७६२०
वणिजो गणिकाचारा ये चैव प्रेक्षका जनाः। सर्व्वांस्तान् कौरवो राजा विधिवत्प्रत्यवैक्षत।
इति श्रीमहाभारते उद्योगपर्व्वणि अम्बोपाख्यानपर्व्वणि कौरवसैन्यनिर्य्याणे षण्णवत्यधिकशततमोऽध्यायः॥ १९६॥
॥ वैशम्पायन उवाच॥ तथैव राजा कौन्तेयो धर्म्मपुत्त्रो युधिष्ठिरः। धृष्टद्युम्नमुखान् वीरांश्चोदयामास भारत।
चेदिकाशिकरूषाणां नेतारं दृढविक्रमं। सेनापतिममित्रघ्नं धृष्टकेतुमथादिशत्।
विराटं द्रुपदञ्चैव युयुधानं शिखण्डिनं। पाञ्चाल्यौ च महेष्वासौ युधामन्यूत्तमौजसौ।
ते शूराश्चित्रवर्म्माणस्तप्तकुण्डलधारिणः। आज्यावसिक्ता ज्वलिता धिष्ण्येष्विव हुताशनाः। ७६२५
अशोभन्त महेष्वासा ग्रहाः प्रज्वलिता इव। अथ सैन्यं यथायोगं पूजयित्वा नरर्षभः।
दिदेश तान्यनीकानि प्रयाणाय महीपतिः। तेषां युधिष्ठिरो राजा ससैन्याना महात्मनां।
व्यादिदेश सवाह्यानां भक्ष्यभोज्यमनुत्तमं। सगजाश्वमनुष्याणां ये च शिल्पोपजीविनः।
अभिमन्युं वृहन्तञ्च द्रौपदेयांश्च सर्व्वशः। धृष्टद्युम्नमुखानेतान् प्राहिणोत्पाण्डुनन्दनः।
भीमञ्च युयुधानञ्च पाण्डवञ्च धनञ्जयं। द्वितीयं प्रेषयामास बलस्कन्धं युधिष्ठिरः। ७६३०
भाण्डं समारोपयतां चरतां सम्प्रधावतां। हृष्टानां तत्र योधानां शब्दो दिवमिवास्पृशत्।
स्वयमेव ततः पश्चात् विराटद्रुपदान्वितः। अथापरैर्महीपालैः सह प्रायान्महीपतिः।
भीमधन्वायनी सेना धृष्टद्युम्नेन पालिता। गङ्गेव पूर्णा स्तिमिता स्यन्दमाना व्यदृश्यत।
ततः पुनरनीकानि न्ययोजयत बुद्धिमान्। मोहयन् धृतराष्ट्रस्य पुत्त्राणां बुद्धिनिश्चयं।
द्रौपदेयान्महेष्वासानभिमन्युञ्च पाण्डवः। नकुलं सहदेवञ्च सर्व्वांश्चैव प्रभद्रकान्। ७६३५
दश चाश्वसहस्राणि द्विसहस्राणि दन्तिनां। अयुतञ्च पदातीनां रथाः पञ्चशतं तथा।
भीमसेनस्य दुर्द्धर्षं प्रथमं प्रादिशद्बलं। मध्यमे च विराटञ्च जयत्सेनञ्च पाण्डवः।
महारथौ च पाञ्चाल्यौ युधामन्यूत्तमौजसौ। वीर्य्यवन्तौ महात्मानौ गदाकार्म्मुकधारिणौ।
अन्वयातां तदा मध्ये वासुदेवधनञ्जयौ। बभूवुरतिसंरब्धाः कृतप्रहरणा नराः।
तेषां विंशतिसाहस्राः हयाः शूरैरधिष्ठिताः। पञ्च नागसहस्राणि रथवंशाश्च सर्व्वशः। ७६४०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पदातयश्च ये शूराः कार्म्मुकासिगदाधराः । सहस्रशोऽन्वयुः पश्चादग्रतश्च सहस्रशः ।
युधिष्ठिरो यत्र सैन्ये स्वयमेव बलार्णवे । तत्र ते पृथिवीपाला भूयिष्ठं पर्य्यवस्थिताः ।
तत्र नागसहस्राणि हयानामयुतानि च । तथा रथसहस्राणि पदातीनाञ्च भारत ।
चेकितानः स्वसैन्येन महता पार्थिवर्षभ । धृष्टकेतुश्च चेदीनां प्रणेता पार्थिवो ययौ ।
सात्यकिश्च महेष्वासो वृष्णीनां प्रवरो रथः । वृतः शतसहस्रेण रथानां प्रणुदन् बली । ७६४५
क्षत्त्रहा क्षत्त्रदेवश्च रथस्थौ पुरुषर्षभौ । जघनं पालयन्तौ च पृष्ठतोऽनुप्रजग्मतुः ।
शकटापणवेशाश्च यानं युग्यञ्च सर्व्वशः । तत्र नागसहस्राणि हयानामयुतानि च ।
फल्गु सर्व्वं कलत्रञ्च यत्किञ्चित् कृशदुर्व्वलं । कोशसञ्चयवाहांश्च कोष्ठागारं तथैव च ।
गजानीकेन सङ्गृह्य शनैः प्रायाद्युधिष्ठिरः । तमन्वयात् सत्यधृतिः सौचित्तिर्युद्धदुर्मदः ।
श्रेणिमान् वसुदानश्च पुत्त्रः काश्यस्य वा विभुः । रथा विंशतिसाहस्रा ये तेषामनुयायिनः । ७६५०
हयानां दशकोट्यश्च महतां किङ्किणीकिनां । गजा विंशतिसाहस्रा ईषादन्ताः प्रहारिणः ।
कुलीना भिन्नकरटा मेघा इव विसर्पिणः । षष्टिर्नागसहस्राणि दशान्यानि च भारत ।
युधिष्ठिरस्य यान्यासन् युधि सेनासु सप्तसु । चरन्त इव जीमूताः प्रभिन्नकरटामुखाः ।
राजानमन्वयुः पश्चाच्चलन्त इव पर्व्वताः । एवं तस्य बलं भीमं कुन्तीपुत्त्रस्य धीमतः ।
तदाश्रित्याथ युयुधे धार्त्तराष्ट्रं सुयोधनं । ततोऽन्ये शतशः पश्चात्सहस्रायुतशो नराः । ७६५५
नर्द्दन्तः प्रययुस्तेषामनीकानि सहस्रशः । तत्र भेरीसहस्राणि शङ्खानामयुतानि च ।
न्यवादयन्त संहृष्टाः सहस्रायुतशो नराः ।

इति श्रीमहाभारते उद्योगपर्व्वणि अम्बोपाख्यानपर्व्वणि पाण्डवसैन्यनिर्य्याणे सप्तनवत्यधिकशततमोऽध्यायः ॥ १९७ ॥

समाप्तञ्चेदमुद्योगपर्व्व ॥

अत्र श्लोकाध्यायसङ्ख्ययोरादिपर्व्व[illegible]खितसङ्ख्यान्यथात्वं यत्तल्लिपिकरप्रमादादेवाधुनैतंमध्यवर्त्तिपर्व्वान्यथात्वमपि ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry